सारदाविनोदे

# वैयाकरणसिद्धान्तकौमुद्याः

तद्धितप्रकरणम्

BHATTOJI DIKSHITA'S

# SIDDHANTA-KAUMUDI

## Vol III—Part II

(*Taddhita Complete*)

With English translation and Sanskrit commentary

S
491.25
B469.III,2S

BY

ANJAN RAY, M. A., Bhishagacharyya.

Rs. 3/8/-

INDIAN INSTITUTE OF ADVANCED STUDY
SIMLA

**INDIAN INSTITUTE OF ADVANCED STUDY SIMLA**

S
491.25
B 469.111,2 S

Library IIAS, Shimla
S 491 25 B 469.1.1 S-B 469 V S
00001293

# PREFACE

Owing to unexpected circumstances, the publication of this part is unusually delayed. For which I apologise to my readers. This completes the Purvardham of our Siddhanta-Kaumudi. Two Parts of Uttarardham also are already out. Vol VI (containing Kridanta, Vaidika Prakriya etc. and also an Index on the sutras) is in the Press and will be out in early July 1940. That will complete our stupendous and labourious task with what success the readers will judge.

The Ganas are almost everywhere given in their respective places under the Mitabhashini Tika.

Errors and inconsistencies it is impossible to avoid in such a work. So the author will be obliged if any of his esteemed readers will kindly point these out to him to be rectified in the next edition.

Calcutta,
Oct. 1934.

KUMUD RANJAN RAY

# सिद्धान्तकौमुदी

## अथ तद्धितेषु रक्तार्थकाः

१२०२। तेन रक्तं रागात् ॥४।२।१॥

टी—। रज्यतेऽनेनेति रागः, कषायेण रक्तं वस्त्रं काषायम्। माञ्जिष्ठम्। रागात् किम्? देवदत्तेन रक्तं वस्त्रम्।

The word राग here denotes the material, with which a thing is dyed. Now words expressive of राग (dyeing materials) take the affix or suffix अण् after them to form a new word, when the राग itself becomes the instrumental. Thus कषाय is a particular kind of राग and in the sense of कषायेण रक्तम् (dyed with Kasaya; "Kasaya" here being the instrumental), the suffix अण् comes after it and a new word काषायं is formed meaning—dyed with कषाय। Similarly मञ्जिष्ठया रक्तं वस्त्रम्=माञ्जिष्ठं वस्त्रम्। But, no suffix is allowed, when the तृतीयान्तपद denotes no राग—as देवदत्तेन रक्तम्। Here देवदत्त is not a word, expressive of a kind of राग; moreover it is the agent and not the instrument and hence no suffix is taken by it to form a new word. Hence Bhattoji says "रागात् किम्" etc.

मितभाषिणी। रज्यते शुक्लवर्णस्य वर्णान्तरम् आपाद्यते अनेन वस्तुना इति रागः ["घञि च भावकरणयोः" इति नलोपः]। येन द्रव्येन शुक्लादिवर्णस्य वर्णान्तरं विधीयते स "राग" इति संज्ञां भजते। "तेन" रागविशेषेण "रक्त"

वर्णान्तरम् प्रापितम् इति एतस्मिन्नर्थे "रागात्" रागविशेषवाचिनः शब्दात् तृतीयान्तात् अण् प्रत्ययो भवति। तथाहि—कषायस्तु कश्चित् रागविशेषः। तेन कषायेण रक्तम् इत्यर्थे कषायशब्दात् अण् प्रत्यये कृते काषायम् इति पदं भवति। मञ्जिष्ठा अपि कश्चित् रञ्जनसाधनो द्रव्यविशेषः। तया मञ्जिष्ठया रक्तम् इति एतस्मिन्नर्थे मञ्जिष्ठा-शब्दात् अण् प्रत्यये कृते माञ्जिष्ठम् इति पदं भवति। तद्धितप्रत्ययेन कृतं पदं प्रायेण विशेषणमेव तेन काषायं वस्त्रम्, माञ्जिष्ठः प्रावारकः इत्यादि।

सूत्रे "रागात्" कथमुक्तम्? ननु रागविशेषवाचिनः एव शब्दात् अण् प्रत्ययो भवति, नैव अन्यत्र। तेन देवदत्तेन रक्तं वस्त्रम् इत्यत्र देवदत्तशब्दात् नहि अण् प्रत्ययो विधीयते—यतः नहि देवदत्तशब्दः रागवाची, अपिच व्यक्तिवाची। तृतीया च अत्र कर्त्तर्येव, न खलु करणे।

काषायौ गर्द्दभस्य कर्णौ, हारिद्रौ कुक्कुटस्य पादौ इत्यादौ कथं कषायशब्दोत्तरं हरितशब्दोत्तरं च अण् विहितः? नहि कर्णौ कषायेण, पादौ वा हरिद्रावर्णेन रक्तौ, तत्र तत्र वर्णस्य स्वाभाविकत्वात्। अतोच्यते—उपमानादेव भविष्यति तयोः साधुत्वम्; तथाहि "काषाय इव" इत्यर्थे काषायौ इति पदं प्रयुक्तम्। एवं हारिद्रौ इव हारिद्रौ।

अस्मिन् सूत्रे तृतीयान्तात् पदात् प्रत्ययो विधीयते। "तृतीयान्तात् पदात्" इत्यस्य अनुवृत्तिम् "इंपर्वयाग्रादञ्" (४।२।१२) इति सूत्रं यावत् अस्ति।

## १२०३। लाक्षारोचनाट्ठक् ॥ ४।२।२ ॥

टी—। लाक्षिकः। रौचनिकः। "शकलकर्दमाभ्यामुपसंख्यानम्" (वा २६७८)। शाकलिकः। कार्दमिकः। 'आभ्यामणपि' इतिवृत्तिकारः—शाकलः। कार्दमः। 'नील्या अन्' (वा २६८०)—नीलया रक्तं नीलम्। 'पीतात् कन्' (वा २६८१)—पीतकम्। 'हरिद्रामहारजनाभ्यामञ्' (वा २३८२)—हारिद्रम्। माहारजनम्।

The two words लाक्षा and रोचना (themselves expressive of राग.) take the suffix ठक् after them (to form new words), in the sense of dyed with it. Thus, in the sense of "dyed with लाक्षा", we have लाक्षिक ; and रौचनिक is used in the sense of "dyed with रोचना"। The Varttika of Katyayana sanctions "ठक्" for the two words शकल and कर्द्दम also ; and thus we have शाकलिक and कार्द्दमिक। The Kasika Vritti of Vamana and Jayaditya declares that the suffix अण् may be optionally taken by these two (viz शकल and कर्द्दम ), and hence the words शाकलः and कार्द्दमः also। According to varttika, the suffix अन् is taken by the word नीली ( meaning "indigo" ) in the aforesaid sense and the word नीलम् is formed, meaning dyed with indigo or blue colour. कन् is taken by the word पीत and we have पीतकम् in the sense of "dyed with"—some material producing yellow colour ; The words हरिद्रा and महारजन take the suffix अञ् after them, in the same sense and the words हारिद्रम् and माहारजनम् are formed.

मित—। लाक्षाशब्दात् तथा रोचनाशब्दाच्च (रागवाचकात्) तृतीयान्तात् "तेन रक्तम्" इत्येतस्मिन् अर्थे ठक् प्रत्ययो भवति। लाक्षा धातुद्रव्यविशेषः [गाला इति वङ्गाः]। लाक्षया रक्तम् इत्यर्थे ठक् प्रत्यये कृते सति लाक्षिकः इति पदं लभ्यते। एवं रोचनया रक्तः इति रौचनिकः। लाक्षिकः पटः ; रौचनिकः प्रावारकः। अत्र विहितः ठक् प्रत्ययस्तु पूर्वसूत्रविहितस्य अण्—प्रत्ययस्य वाधकः। वार्त्तिककारमते शकलशब्दात् कर्दमशब्दादपि "तेन रक्तम्" इत्यर्थे ठक् प्रत्ययो भवति। शकलं रागद्रव्यविशेषः। तेन रक्तः इति शाकलिकः शाकलः। कर्द्दमेन रक्तः इति कार्द्दमिकः, कार्द्दमः इति पदद्वयम् काशिकावृत्तिमते अपि इष्टम्। पदद्वयं महाभाष्ये तु न दृश्यते। नीली औषधिविशेषः। तया रक्तम् इत्यर्थे अन् प्रत्ययो वार्त्तिककारेण

विधीयते तेन नीलम्। नीलं वस्त्रम्। अस्मिन्नर्थे पीतशब्दात् कन् प्रत्ययो वार्त्तिकसम्मतः। पीतेन रक्तम् पीतकम्; कन्प्रत्ययस्तु अण् प्रत्ययस्य अपवादः। पीतं हरितालकादि पीतवर्णोत्पादकं रञ्जनद्रव्यम्। हरिद्राशब्दात् महारजनशब्दात् च पूर्व्वोक्त एव अर्थे अञ् प्रत्ययो विहितः। अयं खलु अण्—प्रत्ययस्य अपवादः। हरिद्रया रक्तम् हारिद्रम्। हरिद्रा प्रसिद्धा [हलुद इति भाषा]। महारजनः राग-द्रव्यविशेषः। तेन रक्तम् इति माहारजनम्।

ननु कृते अपि अण्प्रत्यये हारिद्रम्, माहारजनम् इति पदद्वयं सिध्यति, कथं तर्हि अणोऽपवादस्य अञ् प्रत्ययस्य विधानम्? अतोच्यते—"स्वरे विशेषः"—इति बालमनोरमा। कृते खलु अञ्प्रत्यये स्वरे यत् वैशिष्ट्यं भवति, तस्यैव लाभाय अणोपवादस्य अञः विधानमित्यर्थः। स्वरस्तु उदात्तादिभेदः।

**१२०४। नक्षत्रेण युक्तः कालः॥ ४।२।७॥**

**टी—। पुष्येण युक्तं पौषम् अहः। पौषी रात्रिः।**

To denote a period of time, with reference to the moon lying near a particular star, proper suffixes (within the limit of प्राग्दीव्यतीय) are used after the प्रथमोच्चारित नक्षत्रवाचकशब्द। Thus in the sense of पुष्येण पुष्यनाम्ना नक्षत्रेण युक्तो यश्चन्द्रमास्तेन युक्तम् (अहः) we have अण् प्रत्यय after पुष्य and the newly formed word is पौषम्। Thus पौषम् अहः is the day, when the moon is situated near the star पुष्य। पौषी रात्रिः the night, in which the moon comes near the star पुष्या।

मित—। तृतीयान्तात् नक्षत्रविशेषवाचिनः शब्दात् "तेनयुक्तः कालः" इत्यर्थे यथाविहितम् अणाद्यः प्राग्दीव्यतीयाः प्रत्ययाः भवन्ति। ननु नक्षत्रेण कथम् कालो युक्तो भवति इति चेत् सत्यम्। परम् नक्षत्रेण चन्द्रमा युक्तो भवति। तेन नक्षत्र-युक्तेन चन्द्रमसायुक्तः कालः इत्यर्थः बोद्धव्यः। अतः सूत्रस्थेन नक्षत्रशब्देन नक्षत्र-युक्तश्चन्द्रमा लक्ष्यते इति ज्ञेयम्। यदा किञ्चित् नक्षत्रचन्द्रमसः सन्निधौ तिष्टत् तस्य समसूत्रपाते वर्त्तते, तदा तत् चन्द्रमसायुक्तम् इत्याख्यायते। पुष्येण युक्तम् अहः

पौषमिति। "पुष्येण युक्तम्" इत्यस्य पुष्यनामकनक्षत्र-समीपस्थेन चन्द्रेण युक्तम् अहः इत्यर्थो बोध्यः। अत्र पुष्यशब्दात् अण् प्रत्यये कृतेसति "तिष्यपुष्ययोर्नक्षत्राणि यलोपः" इति सूत्रबलात् पुष्यशब्दस्य यकारलोपः। आदिस्वरवृद्धिः—तेन पौषम् इति सिद्धम्। पौषी रात्रिरिति—अण् प्रत्यये यलोपेसति "टिड्ढाण्"—(४।१।१५) इति सूत्रेण स्त्रियां ङीप्। एवं मघया (मघानक्षत्रेण) युक्तम् माघम् अहः। माघी रात्रिः। "नक्षत्रेण" इति कथम् उक्तम्? चन्द्रेन युक्ता रात्रिः। अत्र चन्द्रेति पदस्य नक्षत्रत्वाभावात् तदन्तरं न कश्चित् प्रत्ययः। "कालः" इति किम्? पुष्येण युक्तश्चन्द्रमाः अत्र चन्द्रमसः कालत्वाभावात् पुष्यपदोत्तरं न कश्चित् प्रत्ययः।

१२०५। लुबविशेषे ॥४।२।४॥

टी—। पूर्व्वेण विहितस्य लुप्स्यात् षष्टिदण्डात्मककालस्य अवान्तरविशेषश्चेत् न गम्यते। अद्य पुष्यः। कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषी इति। "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः" (सू १२२५) इति निर्देशेन पौर्णमास्याम् अयं लुब्नेति ज्ञापितत्वात्। श्रवणशब्दात्तु युक्तवद्भावाभावश्च। 'अवाधकान्यपि निपातनानि'। श्रावणी।

The suffix, sanctioned by the previous rule, elides, provided there is not implied any particular part of the day, containing sixty *dandas* (i.e., twenty four hours). The example here is अद्य पुष्यः। The word अद्य is an indeclinable, implying the present अहोरात्र (this day, or rather this full day of twenty four hours) and the suffix after पुष्य has elided, giving the sense पुष्ययुक्त-चन्द्रमसा युक्तः (presided by the moon that is in touch with the star पुष्य)। The sense of the example अद्य पुष्यः is अयम् अहोरात्रः पुष्ययुक्त-चन्द्रमसा युक्तः i. e, this complete day is pre-

sided by the moon, that is now in touch with the star पुष्य। The word अद्य denotes the full day (day and night taken together) and not any part of it (i.e. neither the day alone nor the night alone) and hence the rule has been said to be satisfied.

Now a question may be raised as to the validity of "पुष्य-युक्तापौर्णमासी पौषी" इति। The word पौर्णमासी does not imply any particular part of a complete day-and-night (of 24 hours) and hence the elision of the suffix was due by this rule—which however we do not notice here. Against this objection it is argued that this law (rule) of elision does not apply in the case of पौर्णमासी and this is suggested by the rule "विभाषा फाल्गुनीश्रवणा-कार्त्तिकीचैत्रीभ्यः"। Now there is another point, if there be no elision of the suffix in the case of श्रवण, then how can there be the appearnce of श्रवणा in the aforesaid rule? Undoubtedly the suffix अण् after श्रवण has elided, keeping the word श्रवण intact which afterwards has taken the feminine suffix आ to denote पौर्णमासी। Against this objection, it is urged that this (लुप्) is due to निपातन, that is the elision has irregularly taken place. The word श्रवण is originally a masculine one and after the elision, too it must keep its gender unchanged by the rule "लुपि युक्तवद्व्यक्तिवचने"। But we find it here as श्रवणा a feminine one and why? Because here too, the dictum of irregularity (निपातन) is applied. Well, then, assuming निपातन in the present case we can have no such word as श्रावणी:, That is true; but we may have such word and

this is due to the dictum—that the law of irregularity never prevents any legal form from being formed.

मित—। "नक्षत्रेणयुक्तः कालः" इति सूत्रे यः अणादिः प्राग्दीव्यतीयः विहितः, तस्य प्रत्ययस्य लुप् स्यात्। यदि "षष्टिदण्डात्मकस्य" षष्टिदन्डस्नात्मकस्य कालस्य अहोरात्रस्य "अवान्तरविशेषः" कश्चिदंशविशेषः केवलं दिनं केवला वा रात्रिर्नगम्यते। निर्विशेषः कालश्चेत् प्रतिपाद्यते, तर्हि प्रत्ययस्य लोपः। नक्षत्र-युक्तस्य कालस्य रात्र्यादिविशेषोऽंशश्चेत् अभिधीयते, तर्हि प्रत्ययस्य लोपाभाव इति सरलार्थः। अद्य पुष्य इति। अद्य इति अव्ययम् उपस्थिताहोरात्रवाचि। इदं अधिकरणशक्तिप्रधानम् सप्तम्यन्तम् एव इति निर्दिश्यते। अत्र तु अधिकरणशक्ति-विनिर्मुक्तः प्रथमान्तः एव ज्ञातव्योऽयम् अद्येति शब्दः। अस्य अर्थस्तु "वर्त्तमानाहो-रात्रकालः"। पुष्येणयुक्तः (पुष्ययुक्तचन्द्रमसायुक्तः) अद्य (अयम् वर्त्तमानः अहोरात्रः) इत्यर्थे पुष्यशब्दोत्तरम् अण्प्रत्ययस्य लोपः। अद्यपदेन वर्त्तमानोऽहोरात्र एव लक्ष्यते, न खलु अहोरात्रस्य कश्चिद्विशेषोऽंशः अहर्वा रात्रिर्वा, अतः अनेन सूत्रेण अण् प्रत्ययो लुप्यते। प्रत्ययलोपे सति पुष्यपदस्य न किञ्चित् रूपान्तरं संजायते। एवम् अद्य कृत्तिका। अविशेषे इति किम्? पौषी रात्रिः, पौषम् अहः। अत्र प्रथमोदाहरणे रात्रिः (अहोरात्रस्य अवान्तरविशेषः), द्वितीये अहः (अहोरात्रस्य अवान्तरविशेषः) गम्यते, अतः प्रत्ययस्य लोपाभावः। ननु पौर्णमासीति शब्देन अहोरात्रस्य कश्चिदवान्तर-विशेषो न गम्यते, अतः नक्षत्रयुक्ता पौर्णमासीति ज्ञातव्या प्रत्ययस्य लोप एव अनेन सूत्रेण भवितुम् अर्हति। कथं तर्हि "पुष्ययुक्ता पौर्णमासी पौषी" इत्यत्र लोपो न दृश्यते? अत्रोच्यते—अनेन सूत्रेण विहितस्य प्रत्ययस्य लोपः पौर्णमासीति बोद्धव्या न भवति इति विशेषःज्ञेयः। कस्मात् विशेषोऽयं ज्ञेयः? "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः" इति सूत्रात्। पौर्णमासीति प्रतिपत्तव्या अस्मिन् सूत्रे विकल्पेन अण् विधीयते। अस्मात् विधानात् इदं ज्ञाप्यते यत् पौर्णमास्याम् नक्षत्रयुक्तायां विहितस्य अण् प्रत्ययस्य "लुबविशेषे" सूत्रवशेन लोपो मा भूदिति।

भवतु तावत्, श्रवणयुक्तपौर्णमास्याम् अनेनैव लोपाभावात् कथं सूत्रे "श्रवणा"

इति निर्द्देशः सम्भवति ? प्रत्ययस्य लोपाभावात् "श्रावणी" इति निर्द्देशस्य इह औचित्यात्। अस्योत्तरं ददाति—"श्रवणशब्दात्तु अत एव लुप्"। यतः सूत्रे श्रवणेति निर्द्देशो दृश्यते अतस्तस्य साधुत्वम् अवश्यम् उररीकर्त्तव्यम्। श्रवणशब्दात् पौर्णमास्यां निपातनादेव लुप् भवति। तथा सति श्रवणा इति निर्द्देशः सिध्यति। ननु "कृत्तिकाश्रवणः पुष्यः चित्रास्वात्योर्यदन्तरम्"—इत्यादौ पुंलिङ्ग एव श्रवणशब्द-प्रयोगो दृश्यते। तस्मात् अणो लुपि सति "लुपि युक्तवद्व्यक्तिवचने" (१।२।५१—लुपि सति प्रकृतिवत् लिङ्गवचने) इति सूत्रार्थबलात् पुंलिङ्गत्वस्यैव अवश्यम्भा-वात् कथं श्रवणा इति स्त्रीलिङ्गकथनम्? अस्य उत्तरं वदति—'युक्तवद्भावाभावश्च"। "लुपि—(१।२।५१)" इति सूत्रबलात् यो युक्तवद्भावः (प्रकृतिवल्लिङ्गवचने) भवितव्यः, तस्य अभावः खलु अत्र भवति; सोऽपि पूर्ववत् निपातनादेव इति ज्ञेयः। ननु निपातनेनैव यदि श्रवणा इति भवेत् तर्हि श्रावणी इति न्याय्यं पदं बाधितं स्यात् चेत्; नैवम्। "अबाधकानि निपातनानि" निपातनं खलु न्याय्यपदस्य बाधकं न भवति। निपातनेन निष्पन्नं पदं भवति, पक्षे न्याय्यं (सूत्रविहितं) पदमपि भवति इति निष्कर्षः। तेन श्रावणी इति पदम् अपि अबाधितं स्यात्।

"अबाधकानि"—इति परिभाषा काशिकावृत्तौ एव दृश्यते। तस्य साधुत्वम् अत्र दीक्षितेन स्वीकृतम्। परं भाष्ये "तु बाधकान्येव निपातनानि" इत्युक्तम्। इति बालमनोरमा।

## १२०६। संज्ञायाम् श्रवणाश्वत्थाभ्याम् ॥ ४।२।५॥

**दी—। विशेषार्थोऽयमारम्भः। श्रवणा रात्रिः। अश्वत्थो मुहूर्तः। संज्ञायां किम्? श्रावणी; आश्वत्थी।**

The suffix after श्रवण and अश्वत्थ elides, when a proper noun (a name) or designation is implied. In the previous rule, the suffix elides only when there is no mention of any particular part of "day-and-night', but by this rule, the law of elision holds good, even when any part of the day-and-night (अहोरात्र)

is referred to, in the case of these two words only, if there is reference to संज्ञा। श्रवणा रात्रिः ; अश्वत्थो मुहूर्त्तः—these are proper names, implying some particular night and some particular moment and in absence of these, we have श्रावणी रात्रिः, आश्वत्थी रात्रिः। अश्वत्थ is a name for the अश्विनी star—the first of the twenty-seven star taken into account by Hindu astrologers.

मित—। श्रवणाशब्दात् अश्वत्थशब्दात् च परस्य नक्षत्रप्रत्ययस्य लुप् भवति संज्ञायां विषये। पूर्व्वसूत्रे "अविशेषे" लुप् विधीयते, इहतु "विशेषे" अपि, अतं उक्तम् "विशेषार्थोऽयमारम्भः"। अयम् आरम्भः सूत्रोपन्यासः विशेषार्थः विशेषबोधनहेतुकः। अहोरात्रस्य कस्मिंश्चित् विशिष्टे अंशे दिने वा रात्रौ वा गम्यमाने सति श्रवणा-शब्दात् अश्वत्थशब्दात् च उत्पन्नस्य प्रत्ययस्य लुप् स्यात् संज्ञायाम् इति भावः। श्रवणा रात्रिः। श्रवणनक्षत्रयुक्तश्चन्द्रेण युक्ता रात्रिरितिज्ञेयः। ननु पूर्व्वसूत्र-व्याख्यायां ज्ञापितं यत् पौर्णमास्यां खलु युक्तवद्भावाभावः (प्रकृतिवल्लिङ्गवचनाभावः) जायते, अतः लोपात्परम् श्रवणा इति स्त्रीलिङ्गे निर्द्देशस्य साधुत्वम्; इह तु अपौर्ण-मास्यां कथं श्रवणा इति स्त्रीत्वनिर्द्देशः? अत्रोच्यते—"विभाषाफाल्गुनीश्रवणा कार्त्तिकीचैत्रीभ्यः"—इति सूत्रे श्रवणा इति निर्द्देशस्य सामान्यापेक्षत्वात् अपौर्ण-मास्याम् अपि युक्तवद्भावोनेति विज्ञायते"—इति बालमनोरमा। अयं भावः— "विभाषा—" इति सूत्रे श्रवणा इति यः स्त्रीलिङ्गे निर्द्देशः अस्य स्त्रीलिङ्गत्वम् न केवलम् पौर्णमास्याम् इति विशेषम् अपेक्ष्य प्रयुज्यते, अपितु सर्व्वत्रैव; अत उक्तं निर्देशस्य सामान्यापेक्षत्वम्। अश्वत्थो मुहूर्त्तः इति अश्वत्थशब्देन अश्विनी-नक्षत्रम् अभिधीयते। तेन युक्तः मुहूर्त्तः अश्वत्थः मुहूर्त्तः। ज्योतिःशास्त्रे प्रसिद्धः कश्चित् मुहूर्त्तविशेषः। संज्ञायाम् इति किम्? श्रावणी; आश्वत्थी। यत्र संज्ञा न अभिधीयते, तत्र प्रत्ययस्य लुप् न स्यात्। तेन श्रावणी रात्रिः, आश्वत्थी रात्रिः। श्रवणनक्षत्रयुक्तचन्द्रेण युक्ता काचित् रात्रिः। अश्विनीनक्षत्रयुक्तचन्द्रेण युक्ता काचित् रात्रिः इत्यर्थः।

१२०७। द्वन्द्वाच्छः ॥४।२।६॥

दो—। नक्षत्रद्वन्द्वाद् युक्ते काले छः स्यादिशेषे सति असति च। तिष्यपुनर्वसवीयमहः। राधानुराधीया रात्रिः।

The suffix छ (ईय) is taken by a compound (द्वन्द्व) word, denoting a pair of stars, with reference to time, be it general or particular. Thus तिष्य stands for a star and so does पुनर्वसु। The compound word is तिष्यपुनर्वसु। It is an instance of द्वन्द्व compound. The compound word तिष्यपुनर्वसु takes the suffix छ (which is radically changed into ईय) to denote time in general, and the newly formed word that we get is-तिष्यपुनर्वसवीयम्। तिष्यपुनर्वसवीयम् अहः—a day, which is presided over by the moon that is in touch with the pair of stars तिष्य and पुनर्वसु। राधा stands for the star विशाखा। राधानुराधीया रात्रिः—the night, presided over by the moon, coming in contact with the pair of stars राधा (विशाखा) and अनुराधा।

मित—। "नक्षत्रद्वन्द्वात्" द्वन्द्वसमासस्थितनक्षत्रयुगलात् तृतीयान्तात् युक्ते काले छ प्रत्ययः स्यात्, "विशेषे" दिने वा रात्रौ वेति कस्मिंश्चित् विशिष्टे काले गम्यमाने; "अविशेषे" कालसाधारणे च गम्यमाने। तिष्योनाम नक्षत्रविशेषः। पुनर्वसुशब्दोऽपि च नक्षत्रे एव। तेषां द्वन्द्वम् तिष्यपुनर्वसू। ताभ्यां युक्तम् अहः इति बोधे "छ" प्रत्ययः। छ-प्रत्ययस्य स्थाने ईयादेशः। ["तिष्यपुनर्वसु" इति पदस्य अन्तिमस्य ओकारस्य गुणः "ओर्गुणः" इति सूत्रेण। ततः "एचोऽयवायावः" इति सूत्रविहित-सन्धिः। अनया प्रणाल्या तिष्यपुनर्वसवीयम् इति पदं सिद्धम्]। "तिष्यपुनर्वसु" इति नक्षत्राभ्याम् युक्तेन चन्द्रमसायुक्तम् अहः। "राधा" इति विशाखानक्षत्रस्य संज्ञा। राधा च अनुराधाश्च राधानुराधाः। तद्युक्ता रात्रिरिति गम्यमाने छ-प्रत्ययः। पूर्ववत् ईयादेशः। राधानुराधीया रात्रिः। उदाहरणद्वयं विशेषे। अविशेषे यथा—अद्य तिष्यपुनर्वसवीयम्। तिष्यपुनर्वसुभ्यां युक्तः अयं वर्त्तमानः

अहोरात्रः इत्यर्थः। "लुपविशेषे" इति सूत्रबलात् अविशेषे प्रत्ययलोपो भवतु इति चेत् न। पूर्वविधेः परविधिर्बलीयान्। अतः "इन्द्राक्षः" इति परविधेः बलीयस्त्वात् प्रत्ययलोपो माभूदिति सर्वम् अवदातम्।

१२०८। दृष्टं साम ॥४।२।६॥

**दी—। तेन इत्येव। वसिष्ठेन दृष्टं वासिष्ठं साम। "अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः" (वा २६९०)। उशनसा दृष्टम् औशनम्—औशनसम्।**

Words, used in the third case endings and expressive of persons, take suffixes like अण् after them to imply साम (Sama Veda), seen (declared) by them. Thus to denote वसिष्ठेन दृष्टं साम, the word वसिष्ठ takes the suffix अण् and a new word वासिष्ठ is formed, which is an adjunct of साम। In this sense, अण् optionally becomes a डित्, (डकार—इत् प्रत्यय) and the word, taking a डित् suffix after it loses its टि portion. Thus in the sense of उशनसा (शुक्राचार्येण) दृष्टं साम, we have the suffix अण् after it and the word औशनसम् is got ; again अण् is optionally taken to be a डित् suffix and consequently the last vowel of उशनस् with the portion after it, (i.e. the टि portion of उशनस्) is lost and a new word औशनम् is formed.

मित—। "तेन इतीव" तेन दृष्टं साम इतीव अर्थे तृतीयान्तात् यथाविहितम् अणादयः प्रत्ययाः भवन्ति। वशिष्ठनामा कश्चित् प्रख्यातः ऋषिः। तेन दृष्टं साम इत्येतस्मिन् अर्थे अण् प्रत्ययः। ततः वाशिष्ठम् इति पदम्। वासिष्ठं साम। साम वेदः। एवं क्रुञ्चेन दृष्टं साम क्रौञ्चं साम। विश्वामित्रेण दृष्टं साम वैश्वामित्रं साम। ऋषयो मन्त्रद्रष्टार इति प्रसिद्धिः। वेदास्तु मन्त्रब्राह्मणात्मकाः। येन

ऋषिणा योमन्त्रः दृष्टः स हि तन्मन्त्रस्य ऋषिः। एवं विश्वामित्रस्तु गायत्रीमन्त्रस्य ऋषि रिति प्रोक्तम्।

अपिच "अस्मिन्नर्थे" दृष्टं साम तेनेति अर्थे "अण्" प्रोक्तः, अण् प्रत्ययः "डित्वा" विकल्पेन डकारित्-प्रत्ययतुल्यः "वक्तव्यः" वाच्यः। डकारित् प्रत्यये परे सति प्रकृतेः टिल्लोपो भवति। यथा डकारप्रत्यये परे "टि"-लोपः विधीयते, एवम् दृष्टं सामतेनेति अर्थे प्रयुक्ते अण् प्रत्ययेऽपि परेसति प्रकृतेः "टि"-लोपः विकल्पेन भवति। यथा उशनसा दृष्टं साम इति अण् प्रत्यये औशनसम् इति पदम्। विकल्पेन टि लोपेसति उशनम् इति शब्दस्य "अस्" इति अंशस्य टि-संज्ञस्य लोपः ("अचोऽन्त्यादि टि" इति सूत्रम्)। ततःऔशनम् इति पदं सिद्धम्। उशनाः शुक्राचार्य्यः दैत्यगुरुः। इयं व्यवस्था वार्त्तिककारसम्मता कात्यायनस्तु वार्त्तिककृत्।

१२०९। कलेर्ढक् ॥४।२।८॥ (वार्तिक २९८८ ? इति नागेशः)

टी—। कलिना दृष्टं कालेयं साम।

To denote सामन्, seen by कलि, the suffix ढक् is used. The suffix ढक् is replaced by एय ; and in the sense of कलिना दृष्टं साम we have कालेयः। The suffix is joined to कलि—who is the seer here.

मित—। कलिशब्दात् तृतीयान्तात् तेन दृष्टं साम इत्यर्थे ढक् प्रत्ययोभवति। अयं ढक् प्रत्ययः अण ऽपवादः। कलिना दृष्टं साम कालेयं साम ढक् प्रत्ययस्य एय इति रूपम्। वृत्तिकारमते तु सर्व्वत्र अग्निकलिभ्यां ढक् प्रत्ययः विहितः। यथा अग्नेः आगतम्=अग्नौ भवम्—अग्नेः स्वमिति सर्व्वत्रैव ढक्; तेन सर्व्वत्रैव आग्नेयमिति पदम्। एवं कलिना दृष्टं, कलौ भवम्, कलेः आगतम् इति सर्व्वत्रैव ढक् प्रत्ययो ज्ञेयःतेन सर्व्वत्रैव कालेयमिति पदम्।

१२१०। वामदेवाड्ड्यड्ड्यौ ॥ ४।२।९ ॥

टी—। वामदेवेन दृष्टम् साम वामदेव्यम्।

"सिद्धे यस्येति लोपेन किमर्थं ययतौ ङितौ।
ग्रहणं माऽतदर्थेभूद्वामदेव्यस्य नञ्स्वरे।"—[इतिभाष्यम्।]

The word वामदेव takes the suffix ड्यत् and ड्य to denote सामन् seen by the sage of the same name. Thus to imply वामदेवेन दृष्टं साम we have वामदेव + ड्यत् and वामदेव + ड्य and in both the cases we have the form वामदेव्यम्।

Now, a question may be raised why are the suffixes rendered as ङित् (ङकारेत्)? Surely not to sanction the elision of टि, as by the rule "यस्येति च" (६।४।१४८), the अ of वामदेव which is practically टि in the present case, disappears. The answer to this query is that the ङकारेत् has connection with the process of स्वर here. There runs the rule "ययतोश्चातदर्थे" (६।२।१५६) which means—when the two suffixes (of course of the तद्धित class) य and यत्, are taken by a noun, itself preceded by the negative अ, to denote गुणप्रतिषेध, the last vowel of the word, thus formed with the two suffixes, becomes उदात्त। गुणप्रतिषेध means the exclusion or ejection of some quality. But this rule does not hold good, when the suffixes य and यत् are सानुबन्धक, i.e. joined to some other letter or letters. In the present case, अवामदेव्यम्—the negative form of वामदेव्यम, might have its last vowel उदात्त as the word is formed with suffix य and यत् but this is not to be, as the य and यत् of this sutra are not taken by themselves, but to the contrary are joined to another letter, viz ड, and are shown as ड्य and ड्यत्। They are thus सानुबन्धक here. The quotation

from the महाभाष्य of Patanjali gives the above statement. Another point is to be noted in this connection. Both the suffixes show the same form and hence one of them seems to be useless ; but against this, Kasika as well as Balamanorama affirm that "डित्त्वं (डित्करण', "ड्यत्" इति प्रत्यये तकारेत् करणं) स्वरार्थं", i. e. the तकारेत् of ड्यत् serves the purpose of स्वरप्रक्रिया। The word वामदेव्यम् formed with the help of ड्यत्, differs from the same word, formed with the help of ड्य, as far as स्वर (उदात्त, अनुदात्त and स्वरित) is concerned.

मित—। तृतीयान्तात् वामदेवशब्दात् "तेन दृष्टं साम" इत्येतस्मिन्नर्थे ड्यत् ड्य इत्येतौ प्रत्ययौक्त:। अण् प्रत्ययस्य अपवाद:। वामदेवेन दृष्टं साम इति ड्यत् प्रत्यय: वामदेव्यम्, ड्य प्रत्ययश्च—तस्मादपि वामदेव्यम्। ड्यत् प्रत्ययस्य डकार: तकारश्च इतौ। ड्यप्रत्ययस्य डकार: इति वामदेव्यम् साम। ननु ड्यप्रत्यये यत् पदं भवति, ड्यत् प्रत्यये अपि तत्पदमेव। तर्हि कथम् तकारेत् ड्यप्रत्यय: (ड्यत् प्रत्यय:) पुनरपि विधीयते इतिचेत्—"स्वरार्थम् एव एतद्विधानं' ड्य-प्रत्ययनिष्पन्नात् वामदेव्यम् इति पदात् ड्यत्प्रत्ययसिद्धस्य वामदेव्यमितिपदस्य स्वरे भिन्नता अस्ति। तद्बोधनाय एव प्रत्ययद्वयम्। स्वरस्तु उदात्तादिभेद:।

पुनरपि—चोदयति ; ननु यत्प्रत्यय: य—प्रतायश्च वामदेवात् भवत: इति अनेनैव कार्यसिद्धिर्भवेत्। कथं डकारेत् ड्यत्प्रत्यय: ड्यप्रत्ययश्च विधीयेते ? डकारेत्-प्रत्यये परे प्रकृते: "टि" लोपो भवति इति सिद्धार्थम्—इतिचेत् न। "यस्येतिच" (६।४।१४६) इति सूत्रवलात् तद्धितप्रत्यये परे प्रकृते: अन्तिमस्य अवर्णस्यलोपो भवति। "वामदेव" इति पदे अन्तिमोऽवर्ण एव "टि"—संज्ञाभाक्। अत: "यस्येति च" इति सूत्रेणैव इष्टसिद्धौ (वामदेव इति पदस्य अवर्णलोपे सति) कथं यत् य इति प्रतायद्वयस्य डित्करणम् ? अत्रोच्यते—"सिद्ध-यस्येति—इत्यादि।" इयं कारिका महाभाष्ये काशिकावृत्तौ च दृश्यते। अस्यार्थस्तु—"यस्येति"—'यस्येतिच' इति सूत्रवलात् "लोपेन" प्रकृते: अकारलोपेन "सिद्धे" ययतौ, किमर्थं डितौ कृतौ ?

यस्येति च इति सूत्रवलेनैव प्रकृतेः अकारलोपो भवति, अतः य यत् इति प्रत्ययद्वयस्य ड्य, ड्यदिति डित्करणस्य का सार्थकता ? अस्य उत्तरं पठति—"वामदेवस्य" वामदेव्यं इति पदस्य नञ्स्वरे नञाश्रयस्वरविधौ अतदर्थे "ययतोश्चातदर्थे" इति सूत्रे अनयोर्ड्यड्यतो र्ग्रहणं माभूदिति एतदर्थं डित्-करणम्—इति बालमनोरमा। अयं भावः—"य यतोश्चातदर्थे" ( ६।२।१५६ ) इति सूत्रे गुणप्रतिषेधे सति अतदर्थे ( नञर्थे ) विहितस्य य यत् इति प्रत्ययद्वयस्य अन्त्यवर्णस्य उदात्तत्वम् विधीयते। तत्र प्रत्ययद्वयम् निरनुबन्धम्। य, यत् इत्येवरूपेणैव ग्रहणात्। अनेन सूत्रेण ज्ञाप्यते—यत् अनुबन्धहीनस्यैव य यत् इति प्रत्ययद्वयस्य अतदर्थे गुणप्रतिषेधे प्रयुक्तस्य अन्तोदात्तत्वं जायते। सानुबन्धस्य य यदिति प्रत्ययस्य एतत् सूत्रविहितम् अन्तोदात्तत्वं न भवति। "वामदेवेति" सूत्रे ड्यड्यत् इति डकारानुबन्धयुक्तस्यैव ययत् इति प्रत्ययद्वयस्य उल्लेखः। अतः न वामदेव्यम् अवामदेव्यमिति पदस्य अन्तोदात्तत्वं न इति ज्ञापनार्थम् एव अस्मिन् सूत्रे प्रत्ययद्वयस्य डित् करणम्।

**१२११। परिवृतो रथः॥ ४।२।१०॥**

**टी—। वस्त्रैः परिवृतो वास्त्रो रथः। रथः किम् ? वस्त्रेण परिवृतः कायः। समन्ताद्वेष्टितः परिवृत उच्यते। तेनेह न— छात्रैः परिवृतो रथः।**

Suffixes like अण् are taken by the thing (word), with which a car is said to to be covered. Thus to denote a car covered (all over) with a piece of cloth, we have वास्त्रः रथः, वस्त्रेण परिवृतः इत्यर्थः। Here परिवृत means covered all over, so in छात्रैः परिवृतः (surrounded), we have no प्रत्यय by this rule.

मित—। तेन परिवृतो रथ इत्येतस्मिन्नर्थे तृतीयान्तात् आवरकद्रव्यात् यथाविहिता अणादिप्रत्ययाः भवन्ति। वस्त्रैः परिवृतो रथः इति वास्त्रोरथः। एवं कम्बलेन परिवृतो रथः काम्बलः रथः। चर्मणा परिवृतो रथः चार्मणो रथः। रथ इत्येव बोधयितव्यः। तेन वस्त्रेण परिवृतः काय इत्यत्र अणादयः प्रत्यया न भवन्ति। समन्तात् "चतुर्दिक्षु" वेष्टित आवृतः एव परिवृत इति कथ्यते। तेन छात्रैः

परिवृतो रथ इत्यत्र न प्रत्ययः। अत्र रथस्य कश्चिदवयवो न वस्त्रादिना वेष्टितः। परम् कात्स्न्येन रथं सर्व्वतो वर्त्तन्त इत्येवमर्थं वोधयति इदं वाक्यम्।

१२१२। पाण्डुकम्बलादिनिः ॥४।२।११॥

**टी—। पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली। पाण्डु-कम्बलशब्दो राजास्तरणवर्णकम्बलस्य वाचकः। मत्वर्थीयेनैव सिद्धे वचनम् अणो निवृत्त्यर्थम्।**

The suffix इनि (इन्) is taken by the word पान्डुकम्बल to denote a car entirely covered with a thing of the same name. Thus a car covered with पान्डुकम्बल is पान्डुकम्बली। There is an इन् suffix, often used in the sense of मतुप्, and sanctioned by the rule—अत इनि ठनौ (५।२।११५), but still this rule is formed only to bar the अण् suffix from पान्डुकम्बल। पाण्डुकम्बल means a coloured (brown) blanket, a first class covering sheet.

मित—। पाण्डुकम्बलेन परिवृतोरथः इत्येतस्मिन्नर्थे पान्डकम्बलशब्दात् इनि-प्रत्ययः स्यात्। इनि प्रत्ययस्य अन्तिमः इकारः सुखोच्चारणार्थं एव। पाण्डुकम्बलेन परिवृतोरथ इति पान्डुकम्बली रथः। पान्डुकम्बलिनौ रथौ—पान्डुकम्बलिनः रथाः। पान्डुकम्बलशब्देन पाण्डुवर्णो विशिष्टः उत्कृष्टः आस्तरणविशेषो गम्यते। अयम् इनि-प्रत्ययः अण्प्रतायस्य अपवादः। ननु मतुप्प्रतायस्यैव अर्थे (अस्त्यर्थे इत्यर्थः) "अत इनिठनौ" (५।२।११५) इतिसूत्रेण इनि प्रतायो विधीयते। तस्मादेव सूत्रवलात् पान्डुकम्बलीति पदं लब्धुम् शक्यते किम् अनेनसूत्रेण इति चेत् उच्यते—"अणो निवृत्त्यार्थम्"। पाण्डुकम्बलशब्दात् "परिवृतो रथः" इति सूत्रवलेन अण् प्रतायो माभूदिति ज्ञापनार्थम्।

१२१३। द्वैपवैयाघ्रादञ् ॥४।२।१२॥

**टी—। द्वीपिनो विकारो द्वैपम्। तेन परिवृतो द्वैपोरथः। एवं वैयाघ्रः।**

The words द्वैप and वैयाघ्र imply the skin of leopard and tiger respectively. The suffix अञ् (and not अण्) is taken by these two words, in order to denote a car, covered with द्वैप (the skin of a leopard) and वैयाघ्र (the leather of a tiger). Thus द्वैपः रथः, वैयाघ्रः रथः। अञ् is used instead of अण् and it is to mark difference in स्वर only.

मित—। द्वीपिन् कश्चित् व्याघ्रजातीयः प्राणी। हकः इत्यर्थः। तस्य विकारः चर्म्म इत्यर्थे "प्राणिरजतादिभ्योञ्" (४।३।१५४) इति अञ्प्रत्ययो विहितः। टिलोपश्च। तेन द्वैपम्। द्वैपशब्दः निष्पन्नः इतार्थः। द्वैपम् द्वीपिचर्म्म इत्यर्थः। अन्यत् मूले स्पष्टम्। एवं व्याघ्रस्य विकारः चर्म्म इत्यर्थे अञ्प्रत्ययः। तथा सति "न य्वाभ्याम् पदान्ताभ्याम्—" (७।३।३) इति ऐच्। तेन वैयाघ्रशब्दः सिद्धः; वैयाघ्रः व्याघ्रचर्म्म इत्यर्थः। द्वैप शब्दात् तथा वैयाघ्रशब्दात् च तृतीयान्तात् परिवृतो रथ इत्यं तस्मिन्नर्थे अञ्प्रत्ययो भवति। द्वैपेन द्वीपिचर्म्मणा परिवृतो रथः द्वैपो रथः। वैयाघ्रेण व्याघ्रचर्म्मणा परिवृतो रथः वैयाघ्रो रथः। अयम् अञ् प्रत्ययः अणोऽपवादः। अञ्प्रत्ययनिष्पन्नं पदम् अण्प्रत्ययसिद्धात् पदात् स्वरे (उदात्तादिविषये) भिद्यते। अत्र अञ्प्रत्ययविहितः स्वरो भवेदिति ज्ञापनार्थम् एव अणो बाधकः अञ्प्रत्ययो विहितः।

## १२१४। कौमारापूर्व्ववचने॥४।२।१३॥

**दी—। 'कौमार' इत्यविभक्तिको निर्द्देशः। अपूर्व्वत्वे निपातनमिदम्। अपूर्व्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः। यद्वा—अपूर्वपतिः कुमारी पतिम् उपपन्ना कौमारी भार्य्या।**

The word कौमार (mentioned as without any विभक्ति in the sutra) is formed with the suffix अण् to imply wedding. The word is irregularly formed having sense of a wife, not married before.—

Or thus—To imply a husband, who has married a spinister (maiden), the suffix अण् is taken by the word कुमारी used in the second case-ending, or to denote a maid, who has been wedded to a person, the suffix अण् is taken by the word कुमारी used in the first case-ending.

( —Translation after Bal.-manorama )

मित— । "अपूर्व्ववचने" पाणिग्रहणवचने, पाणिग्रहणं बोधयितुम् इत्यर्थः । पाणिग्रहणं बोधयितुं कौमार इति पदम् अण् प्रत्ययान्तम् निपातनेन सिध्यति इति काशिका ।

"कौमारापूर्व्ववचने" इति सूत्रे कौमारशब्दात् विभक्तिर्नदृश्यते । अतः आह— "कौमार इत्यविभक्तिको निर्द्देशः" । अविभक्तिको विभक्तिरहितः लुप्तप्रथमान्तः निर्द्देश इत्यर्थः ।

"अपूर्व्ववचने" इत्यत्र योऽपूर्व्वशब्दः स भावप्रधानः । "अपूर्व्ववचने"—अपूर्व्वत्व-वचने इत्यर्थः । अतः पठति—'अपूर्व्वत्वे निपातनमिदम्' । "अपूर्व्वत्वे" स्त्रिया अपूर्व्वत्वम् इति बोद्धव्ये "इदम्" कौमारशब्दः "निपातनम्" निपातनसिद्धम् । अपूर्व्वत्व-वचने इति बोधयितव्ये अपूर्व्ववचने इत्युक्तः ! अत अपूर्व्व शब्दस्य अपूर्व्वत्वमेवार्थः इति सरलार्थः । न पूर्व्वःपतिर्य्यस्याः सा अपूर्व्वपतिः । अपूर्व्वपतिम् कुमारीम् पतिः उपपन्नः पतिः उपयतवान्—इत्येतस्मिन्नर्थे द्वितीयान्तात् कुमारीशब्दात् अण् प्रत्ययः स्यात् इत्येकोऽर्थः । अयं प्रत्ययः कुमारीशब्दात् द्वितीयान्तात् उपयन्तरि ( वरे ) भवति । कौमारः पतिः । यद्वा—इति द्वितीयमर्थं पठति । अपूर्व्वपतिः कुमारी पतिम् उपपन्ना सङ्गता इत्येतस्मिन्नर्थे प्रथमान्तात् कुमारीशब्दात् अण् स्यात्—इति द्वितीयोऽर्थः । अस्मिन्नर्थे उपयतायाम् ( ऊढायाम् कौमार्य्याम् ) एव स्वार्थे प्रत्ययः । कुमारी + अण् स्वार्थे, ततः स्त्रियामीप् कौमारी । कौमारी भार्य्या ।

अस्मिन् सूत्रव्याख्याने काशिकाकारः पठति—

कौमारापूर्व्ववचने कुमार्य्या अण् विधीयते ।
अपूर्व्वत्वं यदा तस्याः कुमार्य्या भवतीतिवा ।

कुमार्य्यां भवतीति विषये च अपूर्व्वत्वं भवति। तेन कुमार्य्यां भवः इति अण् कौमारः। तस्य स्त्री कौमारी भार्य्या इति सिद्धम्।

## १२१५। तत्रोद्धृतममत्रेभ्यः ॥४।२।१४

दी—। शरावे उद्धृतः = शारावः ओदनः। उद्धरतिरिह उद्धरणपूर्व्वके निधाने वर्त्तते। तेन सप्तमी। उद्धृत्य निहित इत्यर्थः।

Words, expressive of pots, take proper suffixes after them to denote a thing or things, placed in it from somewhere. Thus शराव is a word meaning a pot. The food, placed in it from elsewhere, is called शाराव; the suffix here taken by शराव being अण्।

मित—। तत्र इति सप्तमीवाचकं पदम्; "तत्र" इति सप्तम्यन्तात् अमत्रवाचिनः शब्दात् यथायोग्यं प्रत्ययाः अणादयः भवन्ति तस्मिन् अमत्रे स्थानान्तरात् उद्धृत्य किञ्चिद्वस्तु स्थापितमिति गम्यमाने सति। अमत्रं भाजनम् पात्रम् उच्यते। शरावे उद्धृतः इति शारावः ओदनः। शरावो भोज्यवस्तुस्थापनपात्रविशेषः [सरा इति वङ्गाः]। ननु यस्माद्वस्तु किञ्चित् उद्ध्रियते तस्य अपादानता एव स्यात् यथा कूपात् वारि उद्धरति, तर्हि कथम् अधिकरणता शरावस्य, येन तत्र सप्तमी स्यादिति चेत्; उच्यते। सूत्रे उद्धृतमिति पदं वर्त्तते। तेन उपन्यस्तम्—"उद्धरति" इति पदम् "इह" अस्मिन् सूत्रविषये "उद्धरणपूर्व्वके निधाने" आदौ स्थानान्तरात् उद्धरणं पश्चाच्च अमत्रे निधानं (स्थापनम्) इत्यर्थे "वर्त्तते", तस्मादेव अमत्रस्य अधिकरणता "तेन" तेनैवहेतुना "सप्तमी" अमत्रे सप्तमी विहिता। "उद्धृत्य" स्थानान्तरात् उत्तोल्य "निहितः" अमत्रे स्थापित इत्यर्थः। एवं कर्परे निहितः इति कार्परः ओदनः।

"भुक्तोच्छिष्टम् उद्धरणमुच्यते, तस्य उद्धरणमिति प्रसिद्धिः"—इति काशिका।

## १२१६। स्थण्डिलाच्छयितरि व्रते ॥४।२।१५॥

टी—। तत्र इत्येव। समुदायेन चेद्व्रतं गम्यते। स्थण्डिले शेते स्थाण्डिलो भिक्षुः।

The word स्थण्डिल takes the suffix (अण्), provided that it denotes a person, that lies down upon it in order to observe some vow only. Thus a mendicant is said to be स्थाण्डिलः as he lies down upon the स्थण्डिल to observe his vow.

मित—। व्रतहेतोः स्थण्डिले (परिष्कृतभूमौ) शेते अयम् इति व्रतचारिणि शयितरि गम्यमाने स्थण्डिलशब्दात् सप्तम्यन्तात् अण् प्रत्ययो जायते, "तत्र" इत्यत्र—तत्र शयितरि इत्यर्थः। 'व्रते' व्रते बोध्यमाने सति; "समुदायेन चेत् व्रतं गम्यते" प्रत्ययान्तपदेन चेत् कश्चित् व्रतचारी शयिता बोध्यते इत्यर्थः। स्थण्डिले शेते इति स्थाण्डिलो भिक्षुः। भिक्षोः स्थण्डिले शयनं व्रतनिमित्तकमेव। एवं स्थाण्डिलो शेते ब्रह्मचारी। व्रतमिति पदेन शास्त्रतो नियमः कथ्यते। व्रते इति किम्? स्थण्डिले शेते ब्रह्मदत्तः। अत्र ब्रह्मदत्तस्य स्थण्डिले शयनं न व्रतनिमित्तकम् अपितु आकस्मिकमेव, तेनात्र स्थण्डिलशब्दात् प्रत्ययाभावः।

१२१७। संस्कृतं भक्षाः ॥४।२।१६॥

टी—। सप्तम्यन्तादण् स्यात् संस्कृतेऽर्थे, यत् संस्कृतम् भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृता भ्राष्ट्रा यवाः। अष्टसु कपालेषु संस्कृतोऽष्टाकपालः पुरोडाशः।

Words used in the seventh case-ending take the suffix अण् provided that they imply an article or articles of food, which are refined in them. Thus barley corns (यवाः) are said to be भ्राष्ट्राः, when thay are refined in a भ्राष्ट्र; the word भ्राष्ट्र taking the suffix अण्। Similarly we get अष्टाकपालः &c., (see Tika).

मित—। अत्र "तत्र" इति पदस्य अनुवृत्तिरस्ति। तत्रेति सप्तम्यन्तात् अण् स्यात्, तस्मिन् संस्कृतं भोज्यमिति गम्यमाने सति। संस्कृतम् कृतसंस्कारम्। संस्कारो नाम पाकादिना वस्तुनः गुणविशेषाधानम्, उत्कर्षाधानम् वा। भक्ष्यन्ते एते इति भक्षाः भक्ष् धातोः कर्मणि घञ्। ये द्रव्याः संस्कृतास्ते चेत् भक्षाः भवन्ति तर्हि यस्मिन् पात्रे ते संस्कृताः तत्पात्रवाचकात् सप्तम्यन्तात् पदादण् प्रत्ययो भवति इति निष्कर्षः। भ्राष्ट्रे संस्कृताः इत्यण् = भ्राष्ट्राः यवाः ; भ्राष्ट्रं भर्जनपात्रम्। एवं कलशे संस्कृताः कालशा अपूपाः। कुम्भे संस्कृताः कौम्भाः यवाः। अष्टसु कपालेषु संस्कृतो अष्टा-कपालः पुरोडाशः [ 'तद्धितार्थोत्तरपदसमाहारे च' इति तद्धितार्थे द्विगुः। ततः "द्विगोर्लुगनपत्ये" इति अत्राणो लुक्। "अष्टनः कपाले हविषि" इति आत् ]। भक्षाः इति किम् ? पुटे संस्कृतं वस्त्रम्। कुसुमपुटे संस्कृतो मालागुणः।

**१२१८। शूलोखाद्यत् ॥४।२।१७॥**

**टी—। अणोऽपवादः। शूले संस्कृतं शूल्यं मांसम्। उखा पात्रविशेषः। तस्यां संस्कृतम् उख्यम्।**

To denote an article or articles of food, refined or prepared on themselves the two words शूल and उखा take the suffix यत् instead of अण्। Thus a piece of meat is said शूल्यम् as (शूल + यत्), when it is roasted on a spit, and उख्यम् when roasted on an उखा a kind of pot.

मित—। "तस्मिन् संस्कृतं भोज्यम्" इत्यर्थे बोधयितव्ये सप्तम्यन्तात् शूलशब्दात् उखाशब्दात् च यत्प्रत्ययो भवति, न खलु अण्। सूत्र विग्रहणं तु इत्थम्—शूलश्च उखा च शूलोखम् इति समाहारद्वन्द्वसमासः। तस्मात् यत् इति "शूलोखाद्यत्"। यत्-प्रत्ययः अणोऽपवादः। शूले संस्कृतं शूल्यं मांसम्। उखायां संस्कृतम् उख्यं मांसम्। उखा पात्रविशेषः। तथाहि "पिठरं स्थाल्युखा कुण्ड"मित्यमरः।

**१२१९। दध्नष्ठक् ॥४।२।१८॥**

**टी—। दध्नि संस्कृतं दाधिकम्।**

The word दधि takes the suffix ठक् (इक) to imply an article of food, placed on and refined with it along with other condiments.

मित—। तत्र संस्कृतम् भोज्यम् इत्यर्थे गम्यमाने दधिशब्दात् ठक् (इक) प्रत्ययः स्यात्, न खलु अण्। दध्नि अधिकरणे संस्थाप्य लवणादिना संस्कृतम् इत्यर्थे एव दाधिकमिति ठगन्तम् पदं सिध्यति। ठकि इकादेशः। "यस्येति च" (६।४।१४८) सूत्रबलात् दधि-शब्दस्य इकारलोपः, ततः इक। ननु संस्कारार्थे "प्राग्वहतेष्ठक्" (४।४।१) इति सूत्रेणैव ठक्प्रत्यये सिद्धे किमनेन सूत्रेणेति चेत्; न। तत्र तु "संस्कृतं" (४।४।३) इति तृतीयान्तादेव ठक् विधानम्। तत्र दध्ना संस्कृतम् दाधिकमित्यत्र दध्न एव करणत्वम्। इह तु दध्नःअधिकरणता, लवणादीनां तु द्रव्यान्तराणां करणत्वम् इति पृथक् सूत्रकरणम्। यदस्तु दध्ना संस्कृतम् तत् दाधिकं तेनैव सूत्रेण, यदस्तु दध्नि संस्थाप्य लवणादिना संस्कृतम् तत् अपि दाधिकम् अनेनैव इति निष्कर्षः।

## ११२२०। उदश्वितोऽन्यतरस्याम्॥ ४।२।१९॥

**टी—। ठक् स्यात्। पक्षे अण्।**

The word उदश्वित् takes the suffix ठक् as well as अण् in the aforesaid sense.

मित—। तत्र संस्कृतः ओदनः इत्यर्थे "उदश्वित्" इति शब्दात् ठक्प्रत्ययः तथा अण् प्रत्ययश्च भवतः।

## १२२१। इसुसुक्तान्तात्कः॥ ७।३।५१॥

**टी—। इस् उस् उक् त एतदन्तात् परस्य ठस्य कः स्यात्। उदकेन श्वयति वर्द्धते इत्युदश्वित्। तत्र संस्कृतः औदश्वित्कः। औदश्वितः। इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह—आशिषा चरत्याशिषिकः; उषा चरति औषिकः। "दोष उपसंख्यानम्" (वा ५०७१)। दोर्भ्यां चरति दोष्कः।**

This rule of the seventh chapter is introduced here in order to show the process by which the new word औदश्वित्कः is to be formed. The meaning of the sutra is as follows :—Words, ending in इस्, उस्, उक् or त् ( without अ after त ) change the ठ of the suffix ठक् they take after them, into क। The क् of ठक् is इत्, the अ after ठ is for the sake of pronunciation and now the ठ which remains, is changed to ककार। Thus उदश्विति संस्कृतः ओदनः औदश्वित्कः। Again अण् is taken optionally and the form is औदश्वितः। By the particles इस् and उस्, mentioned in the sutra, the natural इस् or उस of a word formed with the help of the उणादि suffixes only, are to be taken into consideration and hence any word ending in इस् or उस् and that इस or उस् coming through the operation of कृदन्त should be excluded from this law.

मित—। यस्य शब्दस्य अन्ते इस्, उस्, उक्, त—इति एतेषां चतुष्टयानां मध्ये कश्चित् वर्त्तते, तस्मात् शब्दात् विहितस्य ठक् प्रत्ययस्य ठस्थाने ककारः भवति न तु इकः। ठक् प्रत्ययस्य अन्तिमः ककारः इत्। ठकारात् परोऽकारस्तु उच्चारणार्थ एव। तेन ठकप्रत्ययस्य ठ एव शिष्यते। तस्य स्थाने व ककारो भवति। उदकेन श्वयति वर्द्धते इति उदकशब्दात् 'टुओ श्वि' गतिवृद्धौ इति धातोः क्विप् प्रत्ययः। "ह्रस्वस्य पिति कृतितुक्" ( ६।१।६१ ) इति तुक्। तेन उदश्वित् इति पदं सिद्धम्। तत्र उदश्विति संस्कृतः ओदनः इत्यर्थे ठक् प्रत्ययस्य ककारे एव शिष्यमाणे औदश्वित्कः इति पदं सिध्यति। औदश्वित्कः ओदनः। पक्षे अण् प्रत्ययः; तेन औदश्वितः। "इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह"—इति। भूते इस् उस् इति यद् ग्रहणं तेन स्वाभाविकः इस् भागान्तशब्दः, उस् भागान्तशब्दश्च ज्ञेयः। इस् प्रत्ययस्य उस् प्रत्ययस्य च उणादौ प्रतिपदोक्तयोरिह ग्रहणम्"—इति बालमनोरमा। तस्यायमर्थः—उणादि-प्रत्ययेषु सिद्धस्य इस्भागान्तशब्दस्य उस्भागान्तशब्दस्य च

अत्र ग्रहणं न खलु तद्धितेन कृदन्तेन वा यः शब्दः इस्भागान्तः उस्भागान्तो वा जायते तस्य। यथा सर्पिषि संस्कृतः इति ठकि ककारादेशे सार्पिष्कः ओदनः। धनुषि संस्कृतः ओदनः इति धानुष्कः। सर्पिष् शब्दः उणादिः प्रत्ययेष् इस् भागान्तः, तथा धनुष् शब्दोऽपि उणादिना उस् भागान्तस्तेन तयोरत्र सूत्रे ग्रहणम्। अन्यत्र यथा—आशिषा चरति इति ठक्। ठकि इकादेशः; न खलु अनेन सूत्रेण ककारादेशः। तेन आशिषिकः। कथम् आशिष् इति इस्भागान्तस्य अत्र न ग्रहणम्? उच्यते—आङ् पूर्व्वकस्य शास् इति धातोः क्विपि "आशासः क्वौ" इति उपधायाः आकारस्थाने इकारादेशस्तेन आशिष् इति पदं सिद्धं कृदन्तेनैव न खलु उणादि प्रत्ययेन; तेन अत्र तस्य न ग्रहणम्। एवम् उषा चरति औषिकः; वस निवासे इति धातोः क्विपि "वचिस्वपि यजादीनाम् किति—" इति (६।१।१५) संप्रसारणम्। तेन उष् इति पदम्। "शासि वसि घसीनां च" (८।३।६०) इति सूत्रेण आशिष् इत्यत्र उष इत्यत्र च षत्वम्। उषा चरति इत्यत्र उषा इति तृतीयान्तपदम्। "दोष"—इति। दोष् शब्दात् ठक् इत्यस्य ठस्य कः स्यादित्यर्थः। दोर्भ्यां चरति इति ठक्। ककारादेशः। दौष्कः—इति कात्यायनस्य वार्त्तिककारस्य मतम्।

१२२२। क्षीराड्ढञ्॥ ४।२।२०।

**दी—। अत्र संस्कृत मित्येव सम्बध्यते, न तु भक्षा इति। तेन यवाग्वामपि भवति। क्षैरेयी।**

The word क्षीर takes the suffix ढञ् instead of अण् after it, to imply an article, prepared or seasoned in it, be it an article of food or drink. Thus क्षीरे संस्कृतम् क्षैरेयम्। यवागू is a kind of drink and when it is seasoned in क्षीर, it should be called क्षैरेयी।

मित—। अस्मिन् सूत्रे "संस्कृतं भक्षा" इति सूत्रात् संस्कृतम् इत्येव अनुवर्त्तते, न तु भक्षा इति। तेन "अत्र संस्कृतम् इति सम्बध्यते न तु भक्षा" इत्युक्तं धीमता दीक्षितेन। क्षीरे संस्कृतम् इत्यर्थे क्षीरशब्दात् ढञ् प्रत्ययः स्यात्।

अयम् अणोऽपवादः। यऽस्तु संस्कृतम् तद् भोज्यवस्तु भवतु, पानीयं वा भवतु— सर्वं एव बोध्यमाने ढञ् भविष्यति। यथा चीरे संस्कृतः ओदनः चैरेयः। यवागू पानीयद्रव्यविशेषः [याउ इति वङ्गाः]। अयं शब्दः स्त्रीलिङ्गे वर्त्तते। चीरे संस्कृता यवागूः चैरेयी यवागूः [स्त्रियामीप्]।

## १२२३। सास्मिन् पौर्णमासीति ॥ ४।२।२१ ॥

**टी—। इति शब्दात् "संज्ञायाम्" इति लभ्यते। पौषी पौर्णमास्यस्मिन् पौषो मासः।**

The word, denoting a particular पौर्णमासी (full moon), takes proper suffixes, अण् and the like, to imply the period (viz, the month) in which is comprised the said full moon, provided that a proper name is meant.

मित—। "सा" इति प्रथमान्तात् "अस्मिन्निति" सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमान्तं सा "पौर्णमासी" चेद्भवति। सूत्रस्थात् इति-शब्दात् संज्ञायामेव अयं प्रत्ययो विधीयते इति ज्ञायते। एतत् भाष्ये स्थितम्। पूर्वोक्तसूत्रात् "तत्र' इत्यस्य "संस्कृतं भक्षाः" इत्यस्य च अनुवृत्तिरस्मिन् सूत्रे नास्ति। सा पौर्णमासी अस्मिन् इत्यर्थे प्रथमान्तात् पदात् अणादयः प्रत्ययाः भवन्ति संज्ञायामेव इति सरलार्थः। संज्ञा शब्देन मासः अर्द्धमासः संवत्सरश्च बोध्याः। पौषी पौर्णमासी अस्मिन् इति पौषः मासः। पुष्येण युक्ता पौषी पौर्णमासी। सा यस्मिन् मासे स पौषो मासः। पौषी इति शब्दात् अण् प्रत्ययः। अण् प्रत्यये सति "यस्येति च" (६।४।१४८) इति सूत्रबलात् पौषीति शब्दस्य ईकार-लोपः। एवं मघाभिर्युक्ता पौर्णमासी माघी। सा यस्मिन् स माघो मासः। एवं फाल्गुनः मासः। तथा पौषः अर्द्धमासः, पौषः संवत्सरः। एवम् माघः अर्द्धमासः, माघः संवत्सरः। संज्ञायाम् इति किम्? पौषी पौर्णमासी अस्मिन् दशरात्रे। ननु पौर्णमासीति शब्दस्य कोऽर्थः? उच्यते "पूर्णमासात् अण्", इति पौर्णमासी; अथवा पूर्णो माः पूर्णमाः। पूर्णमासइयं पौर्णमासी। मा इति चन्द्र उच्यते"।—इति काशिका।

१२२४। आग्रहायण्यश्वत्थाट्ठक्॥ ४।२।२२॥

टी—। अग्रे हायणमस्या इत्याग्रहायणी। प्रज्ञादेराकृतिगणत्वादण्। "पूर्वपदात् संज्ञायाम्—" (सू ८५७) इति णत्वम्। आग्रहायणी पौर्णमास्यस्मिन्नाग्रहायणिकोमास:। अश्वत्थेन युक्ता पौर्णमास्यश्वत्थ:। निपातनात् पौर्णमास्यामपि लुप्। आश्वत्थिक:।

In the sense of the subject, stated in the previous rule, the two words आग्रहायणी and अश्वत्थ take the suffix ठक् and not अण् after them. Thus to denote the month, which comprises the आग्रहायणी पौर्णमासी we have आग्रहायणिको मास: ; also आश्वत्थिक: the month in which comprises the full moon, in touch with the star अश्वत्थ or अश्विनी।

मित—। सा अस्मिन् पौर्णमासीति अनुवर्त्तते। सा अस्मिन् पौर्णमासीति प्रथमान्तात् आग्रहायणीशब्दात् अश्वत्थशब्दात् च ठक् प्रत्ययो भवति। अयम् अणोऽपवाद:। अग्रे हायनम् अस्या इति आग्रहायणी। "प्रज्ञादिभ्यश्च" (५।४।३८) इति सूत्रे प्रज्ञादिशब्दात् अण् विधीयते स्वार्थे एव (यथा प्राज्ञ:)। प्रज्ञादयश्च आकृतिगणस्तेन अग्रे हायनमस्या: इति प्रज्ञादित्वात् स्वार्थे अण् प्रत्यय:, तथा सति "टिड्ढा" —(४।१।१५) इत्यादि सूत्रेण स्त्रियाम् ङीप् तेन आग्रहायणी इति पदं सिध्यति। हायन-शब्देन संवत्सरो गम्यते। ["संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री" त्यमर:]। यस्या: पौर्णमास्या: ऊर्द्धम् संवत्सरस्यारम्भ: सा च पौर्णमासी आग्रहायणीति कथ्यते। "पूर्ब्बपदात्संज्ञायामग:" (८।४।३) इति सूत्रेण नकारस्य णत्वम्। आग्रहायणी पौर्णमासी अस्मिन् इति ठक् तेन आग्रहायणिको मास:। एवम् आग्रहायणिक: अर्द्धमास:। आग्रहायनिक: संवत्सर:। अश्वत्थ: अश्विनीनक्षत्रम्। अश्वत्थेन युक्ता पौर्णमासीति अश्वत्थ:। "लुबविशेषे" (४।२।४) इत्यादि सूत्रेण अण् प्रत्ययस्य लोप:। ननु "विभाषा फाल्गुनी श्रवणाकार्त्तिकीचैत्रीभ्य:" (४।२।२३) इति निर्देशेन पौर्ण-

मासमात्रम् "लुबविशेषे" (४।२।४) इति सूत्रबलात् लुप् न स्यादिति ज्ञापितम्, तर्हि कथम् अत्र पौर्णमास्यामेव अण् प्रत्ययस्य लुप् भवति इति चेत्; उच्यते। निपातनादेव पौर्णमास्यामपि लुप्। अतएव पौर्णमास्यां लुप् न स्यात् इति यत् ज्ञापितम्, तत् एतद्व्यतिरिक्त एव विषये प्रवर्त्तते इति बोध्यम्। अश्वत्थशब्दात् ठक् आश्वत्थिकः।

## १२२५। विभाषा फाल्गुनी श्रवणा कार्त्तिकी चैत्रीभ्यः॥ ४।२।२३॥

**टी—। एभ्यष्ठग। पक्षे अण्। फाल्गुनिकः—फाल्गुनो वा मासः। श्रावणिकः—श्रावणः। कार्तिकिकः—कार्तिकः। चैत्रिकः—चैत्रः।**

In the above sense the words फाल्गुनी, श्रवणा, कार्त्तिकी and चैत्री take the suffix ठक् or the suffix अण् after them.

मित—। सा अस्मिन् पौर्णमासीति संज्ञायां फाल्गुनी श्रवणा कार्त्तिकी चैत्री शब्देभ्यः ठक् प्रत्ययो विकल्पेन अण् प्रत्ययश्च भवतः फाल्गुनी पौर्णमासी अस्मिन् मासि, अर्द्धमासि, संवत्सरे वा इति फाल्गुनिकः फाल्गुनो वा मासः, अर्द्धमासः, संवत्सरः। फाल्गुनिक इति ठक्। फाल्गुन इति अण्। एवं श्रावणिकः, कार्त्तिकिकः, चैत्रिकः इति ठक् प्रत्ययान्ताः, तथा श्रावणः, कार्त्तिकः, चैत्रः इति अण् प्रत्ययान्ताः। कार्त्तिको मासः। चैत्रो मासः, श्रावणो मासः। एवम् अर्द्धमासः, संवत्सरः।

## १२२६। साऽस्य देवता॥४।२।२४॥

**टी—। इन्द्रो देवता अस्येति ऐन्द्रं हविः। पाशुपतम्। बार्हस्पत्यम्। त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता, मन्त्रस्तुत्या च। ऐन्द्रो मन्त्रः। "आग्नेयो वै ब्राह्मणो देवतया" इति तु शैषिकेऽर्थे सर्व्वत्राग्नि—(वा २६८८) इति ढक्॥**

Words, expressive of deities take proper suffixes like अण् after them to denote something, offered to or presided over by the said deities. By "something" generally is meant the sacrificial things offered to the deities or the incantation by which they are eulogised. Thus हवि: (clarified butter) of which इन्द्र is the presiding deity, is said to be ऐन्द्रं हवि: । हविस् is the sacrificial thing offered to gods like Indra. The मन्त्र: (incantation) by which इन्द्र is eulogised is said to be ऐन्द्र: मन्त्र: ।

An objection may be raised against the suffix taken by अग्नि in the line—आग्नेयो वै ब्राह्मणो देवतया the suffix being, of course, ढक् here; there being no reference here to any sacrifical article or any incantation. This problem is explained away by the argument that the quality of अग्नि is ascribed to the Brahman and here he is identified with the देवता in question.

मित—। "सा" इति प्रथमान्तात् "अस्य" इति षष्ठ्यर्थे यथाविहिता: प्रत्यया भवन्ति, यत् खलु प्रथमान्तं सा चेत् देवता भवतीति। सा अस्य देवता इति एतस्मिन्नर्थे प्रथमान्तात् देवतावाचकशब्दात् अणादय: प्रत्यया: स्युरिति भाव: । इन्द्रो देवता अस्य इति ऐन्द्रं हवि: । पशुपति देवता अस्य इति पाशुपतं हवि: । बृहस्पति देवता अस्य इति बार्हस्पत्यं हवि: । एवम् आदित्यं हवि: । प्राजापत्यं हवि: । ननु देवता इति शब्देन किं गम्यते ? "त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता, मन्त्रस्तुत्या च"—याग हविरादय: त्यज्यन्ते । यम् उद्दिश्य त्यज्यन्ते, स एव देवतासंज्ञाभाक्; अत उक्तं "त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता । मन्त्रस्तुत्या च"—मन्त्र घटिता स्तुति: मन्त्रस्तुति: । वैदिकमन्त्रवर्णकयुक्त: स्तव: इत्यर्थ: । तेन य उद्दिश्यते—देवतां याम् उद्दिश्य वैदिकस्तव: प्रवर्त्तते सा अपि देवतासंज्ञां भजति इति भाव: । तेन इन्द्रो देवता यस्य मन्त्रस्य स ऐन्द्रो मन्त्र: । देवता इति किम् ?

कन्या देवता अस्य इति प्रत्ययो न भवति कन्यायाः देवत्वाभावात्। ननु "आग्नेयो वै ब्राह्मणो देवतया" इत्यत्र नवा अग्निम् उद्दिश्य हविर्दीयते इति बोधः, नापि अग्निम् उद्दिश्य मन्त्रस्तुतिः प्रवर्त्तते—इति तर्हि कथमत्र देवतातद्धितप्रत्ययो भवति इति चेत्? उच्यते। "शेषिकेऽर्थे—शेषे (४।२।९२) इति सूत्रेण ज्ञापिते तदभिमानिकत्वं गम्यं (अत्र अग्न्यभिमानिकत्वं गम्यं) इति बोधाः। "सर्वत्राग्नि—" (वा २६८९) इति वार्त्तिकबलेन ठक् विहितः। अग्निर्नाम यो लोकवेदप्रसिद्धो देवताजातिविशेषः श्रूयते तदभिमानी ब्राह्मणः इति ज्ञेयः। ब्राह्मणस्तेजोदीप्त्या अग्निम् तुलयितुम् अलमिति अनेन गम्यते। अतः साधूक्तं काशिका कारेण—"उपमानाद्भविष्यति इति"। ब्राह्मणस्तेजसा अग्निना सह उपमीयते इत्यर्थः। "महाराज प्रोष्ठपदात् ठञ्" (४।२।३५) इति सूत्रं यावत् "सा अस्य देवता" इत्यस्य अनुवृत्तिर्वर्त्तते।

**१२२७। कस्येत्॥ ४।२।२५॥**

**दी—। क शब्दस्येदादेशः स्यात् प्रत्ययसंनियोगेन। "यस्य—"(सूत्र) इति लोपात् परत्वात् आदिवृद्धिः। को ब्रह्मा देवता अस्य कायं हविः। श्रीर्देवता अस्य श्रायम्।**

The word क ( meaning either ब्रह्मा or प्रजापति ) changes the final अ into इ when it comes in touch with the suffix. Thus in the sense कः ब्रह्मा प्रजापति र्वा देवता अस्य we have कि + अण्—the अ of क being transformed into इ ; now a question arises whether the इ of कि will elide through the influence of the rule "यस्ये—" ( rule no 311 ), or it will be lengthened by the rule "तद्धितेष्वचामादेः" ( ७।२।११७ )। The solution is—that the rule for lengthening comes after the rule for elision as far as the order of the arrangement of अष्टाध्यायी is concerned ; and consequently it will supercede the previous one. Thus we have

lengthening in कि and the word काय is formed. कायं हविः—the clarified butter offered to the deity, bearing the name क।

मित—। सा अस्य देवता इत्यर्थे तस्मिन्नर्थे विहिते अणादौ प्रत्यये परे सति "क" इति शब्दस्य "इत्" इति आदेशः स्यात्। "अलोऽन्त्यस्य" (१।१।५२) इति क-शब्दस्य अन्त्यस्य अकारस्य स्थाने इकारादेशो भवति। तकारः इत्। तेन कः देवता अस्य इति विग्रहे अणि परे सति कि + अ इति स्थितम्। ततः किम् "यस्येति च" (६।४।१४८) इति सूत्रबलात् इकारस्य लोपोभवेत् उत "तद्धितेष्वचामादेः" (७।२।११७) इति सूत्रबलेन आदिस्वरस्य इकारस्य वृद्धिः स्यादिति विविच्य आह—परसूत्रस्य बलीयस्त्वात् आदिवृद्धिरेव भवति, न खलु पूर्वसूत्रविहितो लोपः। तेन कै अ इति स्थिते "एचोऽय्—" इति सन्धिसूत्रतः काय इति शब्दः। कायं हविः। क-देवताकं हविरित्यर्थः। कः इति ब्रह्मा उच्यते—इति दीक्षितः। क—इति प्रजापतिरिति वृत्तिः। कोदेवता अस्य इति अणि कायं हविः।

## १२२८। शुक्राद् घन् ॥ ४।२।२६ ॥

### टी—। शुक्रियम्।

The word शुक्र takes the suffix घन् ( इय ) instead of अण् to denote the sacrificial thing offered to the deity of the same name or the incantation by which heis to be eulogised. Thus शुक्रोदेवता अस्य इति शुक्रियं हविः।

मित—। शुक्रशब्दात् प्रथमान्तात् सा अस्य देवता इत्यर्थे तस्मिन्नर्थे घन् प्रत्ययो भवति। अयम् अणोऽपवादः। शुक्रो देवता अस्य इति शुक्रियं हविः शुक्रियोऽध्यायः। वेदस्य यस्मिन् अध्याये शुक्रस्तुत्यर्थं मन्त्रा विद्यन्ते स शुक्रियोऽध्यायः।

## १२२९। अपोनप्त्रपान्नप्त्रभ्यां घः ॥ ४।२।२७ ॥

### टी—। अपोनप्त्रियम्—अपान्नप्त्रियम्। अपोनपात् अपांनपाच्च देवते। प्रत्ययसंनियोगेन तूक्तं रूपं निपात्यते। अतएव अपोनपाते—अपांनपातेऽनुब्रूहीति प्रैषः।

The suffix घ (i. e इय) is attached to the two words, अपोनपात् and अपांनपात्, themselves expressive of vedic deities, to imply something, presided over by the said deities ; and the two words अपोनप्त्रियम् and अपांनप्त्रियम are irregularly formed. This irregularity, relative to the structure of these two words, comes only when the aforesaid suffix घ steps in and never elsewhere : and thus we meet with such expression as अपोनपाते अपांनपाते अनुब्रूहि ।

मित—। सा अस्य देवता इत्यर्थेऽस्मिन्नर्थे अपोनपात् अपांनपात् चेति वैदिक-देवताविशेष-प्रतिपादकशब्दाभ्यां घ-प्रत्ययो जायते। कृते च घ-प्रत्यये, निपातनेन अपोनप्त्रियम्, अपांनप्त्रियम् इति पदद्वयं भवति। अयं घ-प्रत्ययो अण् प्रत्ययस्य अपवादः। घ-प्रत्ययसन्निधानेनैव निपातनसाधितं पूर्वोक्तम् रूपद्वयं भवति, अन्यत्र नहि। तथाहि—"अपोनपाते अपांनपाते अनुब्रूहि"—इत्यत्र घ-प्रत्ययाभावात् नैव निपातननिष्पन्नं रूपान्तरम्। अपांनपात्—अपोनपात् इति ऋग्वेदे प्रसिद्धः। देवतायाः नामधेये एते। 'प्रैषः' ऋक्वेदमन्त्रविशेषः। अपोनप्त्रियं हविः। अपांनप्त्रियं हविः।

१२३०। छ च ॥४।२।२८॥

टी—। योगविभागो यथा संख्यनिवृत्त्यर्थः। अपोनप्त्रीयम्—अपांनप्त्रीयम्। "छ प्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम्" (वा २७०१), पैङ्गाक्षीपुत्रीयम्। तार्णविन्दवीयम्। "शतरुद्राद् घश्च च" (वा २७०२)। चाच्छः। शतं रुद्राः देवता अस्य = शतरुद्रियम्—शतरुद्रीयम्। घच्छयोर्विधानसामर्थ्यात् "द्विगोर्लुगनपत्ये" (सू १०८०) इति न लुक्॥

The suffix छ (ईय) may also be attached to the two afore-

said words and the forms अपोनप्त्रीयम् and अपांनप्त्रीयम् are the results.

Now a question may be asked as to why a separate rule is formed. The author of the aphorisms might have sanctioned the suffix छ in the previous rule—making the expression अपोनप्त्रपांनप्तृभ्यां घछौ; undoubtedly the separation of the suffix छ from the previous rule is significant. The significance is that this suffix छ is attached to the two aforesaid words as well as to some other words also. These other words include the following :—(1) पैङ्गाक्षीपुत्र, तार्णबिन्दु and the like, and we have forms as पैङ्गाक्षीपुत्रीयम्, तार्णबिन्दवीयम् and so forth. (2) The word शतरुद्र takes छ as well as घ and the two forms शतरुद्रियम्, शतरुद्रीयम् are found to denote something of which शतं रुद्राः are the deities. Now the words शतरुद्रियम् as well as शतरुद्रीयम् are instances of तद्धितार्थद्विगु, where the elision of the suffixes is demanded by the rule "द्विगोर्लुगनपत्ये" (४।१।८८); but in the present case this elision does not occur as the two aforesaid rules are formed only to sanction the said suffixes—the existence of which is hereby demanded.

मित—। सा अस्य देवता इत्यस्मिन्नर्थे अपोनपात्-शब्दात् तथा अपांनपात्-शब्दात् छ-प्रत्ययो भवति। अपोनप्त्रीयम्। अपांनप्त्रीयम्। तथाहि अपोनप्त्रीयं हविः। अपांनप्त्रीयं हविः।

ननु "अपोनप्त्रपांनप्तृभ्यां घछौ" इति एकसूत्रेणैव लाघवं स्यात्। कथं पृथक्सूत्रेण प्रयोजनम्? समाधत्ते—"योगविभागः पूर्वसूत्रे छ-प्रत्ययस्य यो योगः भवितुम् अर्हति, तस्य योगस्य पूर्वसूत्रात् विभागः, छ-प्रत्ययं पूर्वसूत्रयोगात् विभज्य तद्विधानार्थं पृथक् सूत्रकरणं इत्यर्थः; "यथासंख्यनिवृत्त्यर्थः" यथासंख्यस्य

यथासंख्यस्य अपोनपात्शब्दात् तथा अपांनपात्शब्दादेव छप्रत्ययो भवति नान्यत इति निर्द्देशस्य 'निवृत्त्यर्थः' वारणार्थः। "छ च" इति पृथक् सूत्रकरणेन इदं ज्ञाप्यते यत् अपोनपात्शब्दात् अपांनपात्शब्दाच्च छप्रत्ययो भवति, एवं अन्येभ्योऽपि केभ्यः शब्देभ्यः छप्रत्ययो जायते इति भावः। येभ्यः अन्येभ्यः छप्रत्ययोऽनेन ज्ञाप्यते, तेऽन्ये शब्दाः वार्त्तिकात् आलप्य अत्र लिख्यन्ते दीक्षितेन = छप्रकरणे पैङ्गाक्षी-पुत्रादिभ्य उपसंख्यानम् (वा २७०१)। पैङ्गाक्षीपुत्रादिभ्यः शब्देभ्यः अस्मिन्नेव अर्थे छप्रत्ययो भवति। पैङ्गाक्षीपुत्रो देवता अस्य इति पैङ्गाक्षीपुत्रीयम्। तार्णविन्दु-र्देवता अस्य इति तार्णविन्दवीयम्। पैङ्गाक्षीपुत्रीयं हविः। तार्णविन्दवीयं हविः। "शतरुद्राद् घश्च" (वा २७०२)—शतरुद्रशब्दात् घ-प्रत्ययस्तथा चकारात् छ-प्रत्ययश्च भवतः। शतं रुद्राः देवता अस्य इति घप्रत्यये शतरुद्रियम्। एवं छप्रत्यये शतरुद्रीयम्। [छस्य ईयादेशः। घस्य च इयादेशः स्मर्त्तव्यः]।

ननु अत्र "तद्धितार्थोत्तरपद-समाहारे च" (२।१।५१) इति सूत्रेण तद्धितार्थद्विगु-समासः विहितः, तथासति "द्विगोर्लुगनपत्ये" (४।१।८८) इति सूत्रबलात् प्रत्ययस्य लोपोभवितुम् अर्हति। कथं नात्र लोपोदृश्यते? अस्य उत्तरं ददाति—"घच्छयो-र्विधानसामर्थ्यात् 'द्विगोर्लुगनपत्ये' (सू १०८०) इति न लुक्"। घ इति प्रत्ययं छ इति प्रत्ययं च विधातुमेव सूत्रद्वयं प्रवर्त्तते। यदि प्रत्ययो एव लुप्यते तर्हि सूत्रयोः का सार्थकता? तस्मात् प्रत्ययलोपाभावस्तेन च—शतरुद्रियं शतरुद्रीयम् इति पदद्वयम्। शतरुद्रियं शतरुद्रीयं वा हविः।

पूर्वसूत्रव्याख्यायामिदमत्र स्मर्त्तव्यम्—वेदे तु क्वचित् "अपोनप्त्रे स्वाहा" इति प्रयोगो दृश्यते। स च छान्दसत्वात् सोढव्यः।

## १२३१। महेन्द्राद् घाणौ च ॥४।२।२९॥

## टी—। चात्छः। महेन्द्रियं हविः। माहेन्द्रं—महेन्द्रीयम्।

The suffixes घ and अण् as well as छ too are attached to the word महेन्द्र and consequently we have three forms here —महेन्द्रियम् with घ, माहेन्द्रम् with अण् and महेन्द्रीयम् with छ।

मित—। महेन्द्रोऽस्य देवता इति एतस्मिन् अर्थे महेन्द्रशब्दात् घ-प्रत्ययः, अण् प्रत्ययस्तथा सूत्रस्थचकारात् छ-प्रत्ययश्च भवति। महेन्द्रियं हविः—अत्र घ-प्रत्ययः। माहेन्द्रम्—अत्र अण्। महेन्द्रीयम्—अत्र छ प्रत्ययः।

### १२३२। सोमाट् ट्यण्॥ ४।२।३०॥

### टी—। सौम्यम्। टित्वात् ङीप्। सौमी ऋक्।

The suffix ट्यण् is attached to सोम, instead of अण् and we have the form सौम्य। The elision of टकार in the suffix ट्यण् signifies ई in the feminine and the form is सौमी—the य eliding by the rule—हलस्तद्धितस्य (६।४।१५०)। [ सोम means Moon-god ]

मित—। सा अस्य देवता इति एतस्मिन् अर्थे सोमशब्दात् ट्यण् प्रत्ययो भवति, न तु अण्। णकार इत्। तेन आदिवृद्धिः। टकार इत्; तेन स्त्रीयाम् ङीप्। सौम्यम्। सौम्यं हविः, सौम्यं सूक्तम्। स्त्रियां—सौमी। सौमी ऋक्। "सौमी" इत्यत्र "हलस्तद्धितस्य" (६।४।१५१) इति सूत्रेण ईतिपरे यकारलोपः। सोमः =चन्द्रः (देवता)।

### १२३३। वाय्वृतुपित्रुषसो यत्॥ ४।२।३१॥

### टी—। वायव्यम्। एवम् ऋतव्यम्।

The suffix यत्, and not अण् is attached to वायु, ऋतु, पितृ and उषस्। [ The यत् necessitates the guna of the stem ( वायु ) and then by the rule "वान्तो यि प्रत्यये" (६।१।७९), the ओ of the गुण form is changed to अव् and we have the forms वायव्यम् and ऋतव्यम्। उषस् means *aurora.* ]

मित—। सा अस्य देवता इति एतस्मिन्नर्थे वायुशब्दात्, ऋतुशब्दात्, पितृशब्दात् उषस्शब्दाच्च यत्प्रत्ययो भवति, न तु अण्। वायुर्देवता अस्य इति वायव्यम्। एवं ऋतुर्देवता अस्य इति ऋतव्यम्। वायव्यम् अस्त्रम्। यत् प्रत्यये परे अन्त्यस्य उकारस्य गुणः। ततः "वान्तो यि प्रत्यये" (६।१।७९) इति सूत्रेण ओस्थाने अवादेशः। पितरः देवता अस्य इति पित्र्यम्। उषः देवता अस्य इति

उषस्यं सूक्तम्। पितृदेवता उषस् इति देवता ऋग्वेदे प्रसिद्धे। वायुस्तु ऋग्वेद-प्रोक्तः पवनदेवः। ऋतुस्तु कालाभिमानी देवता। पित्र्यम् इत्यत्र ऋकारस्थाने रीङादेशहेतुस्तु परसूत्रात् ज्ञातव्यः। उषस्यमित्यत्र पदत्वाभावात् सकारस्य "ससजुषोरुः" (८।२।६६) इति रुत्वं न; पदत्वाभावस्तु यकारप्रत्यये परे भसंज्ञा-हेतो र्बोध्यः। भसंज्ञा तु पदत्वस्य अपवादः। भसंज्ञा तु "यचिभम्" (१।४।१८) इति सूत्रेण विहिता, प्राक् प्रोक्ता च।

## १२३४। रीङृतः॥ ७।४।२७॥

**टी—। अकृद्यकारेऽसार्व्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात्। "यस्येति च" (६।४।१४८)। पित्र्यम्। उषस्यम्।**

The ऋकार, forming the part of any word, is changed to रीङ्, when any यकार, except that of a कृदन्त or सार्वधातुक or the suffix च्वि comes after it. [ The ङ of रीङ् signifies अन्तादेश by the rule 'ङिच्च'—( १।१।५३ ) ]।

मित—। "अकृद् यकारे" कृत्प्रत्ययान्तर्गतयकारं वर्ज्जयित्वा प्रत्ययान्तरान्त-र्भूते यकारे परे, "असार्वधातुके यकारे" कर्त्तृलटादिचतुर्लकारस्थितं यकारं वर्ज्जयित्वा लकारान्तरान्तर्भूते यकारे परे, "च्वौ परे" अभूततद्भावार्थे विहिते च्वि प्रत्यये च परे सति "ऋदन्ताङ्गस्य" ऋकारान्तप्रकृतेः अन्तिमस्य ऋकारस्य "रीङादेशः" ऋकार स्थाने 'री' इति आदेशः स्यात्। रीङ् इत्यस्य ङकार इत्। तच्च "ङिच्च," ( १।१।५३ ) इति अन्तादेशं ज्ञापयति। ऋकार एव "री" इति भवति इत्यर्थः। मातरम् इव आचरति सहोदराम् इति मात्रीयति। क्यच् प्रत्यये परे ऋकारस्थाने "रीङ्"। क्यच् प्रत्ययस्तु नहि कृदन्तान्तर्गतः। एवं पिता इव आचरति पित्रीयते। अत्र क्यङ् प्रत्ययः। पुनः पुनः करोति इति चेक्रीयते इति यङ्। यङ् प्रत्ययस्तु न सार्वधातुकः। अमाता माता भूता इति मात्रीभूता [च्वि प्रत्ययः। ऋकार-स्थाने "रीङ्" च ]। एवं पितरः देवता अस्य इति विग्रहे यत् प्रत्यये परे ऋकारस्य

रीङ्। अन्तादेश:। तेन पित्री यत् इतिस्थितम्। तत: "यस्येति च" (६।४।१४८) इति सूत्रेण ईकारलोप:। तत: पित्र्यम् इति पदम्।

"ऋत:" इत्यत्र तकारस्य का सार्थकता? "तपरस्तत्कालस्य" (१।१।७०) इति ऋकार: परिहृतस्तेन चेकीर्य्यते इत्यत्र कृधातो: यङि न रीङादेश:। निजेगिल्यते इत्यत्र गृ धातो: यङि च न रीङादेश: बोद्धव्य:।

## १२३५। द्यावापृथिवी-शुनासीर-मरुत्वदग्नीषोम-वास्तोष्पति-गृहमेधाच्छ च॥ ४।२।३२॥

## टी—। चाद्यत्। द्यावापृथिवीयम्-द्यावापृथिव्यम्। शुनासीरीयम्-शुनासीर्य्यम्।

The suffix छ (ईय), as well as the suffix यत्, are attached to द्यावापृथिवी, शुनासीर, मरुत्वत्, अग्नीषोम, वास्तोष्पति and गृहमेध।

मित—। सा अस्य देवता इति एतस्मिन्नर्थे एभ्य: छ प्रत्यय:, चकारात् यत्-प्रत्ययश्च भवत:। अण् प्रत्ययस्य तथा पत्युत्तरपदशब्दे विहितस्य ण्यप्रत्ययस्य च अपवाद:। द्यौश्च पृथिवी च द्यावापृथिव्यौ ["दिवसश्च पृथिव्याम्" इति सूत्रमत्र द्रष्टव्यम्]। द्यावापृथिव्यौ देवते अस्य इति छ प्रत्यय:—द्याव्यापृथिवीयम्। यत्—द्यावापृथिव्यम्। उभयत्र "यस्येति च" (६।४।१४८) इति सूत्रेण ईकार लोप:। छस्य ईयादेश:। शुन: वायु:। सीर: सूर्य्य:। शुनश्च सीरश्च इति शुनासीरौ। "देवताद्वन्द्वे च" (६।३।२६) इति आनङ्। शुनासीरौ देवते अस्य इति छे शुनासीरीयम्, यति शुनासीर्य्यम्। मरुत्वान् देवता अस्य इति मरुत्वतीयम्। पक्षे मरुत्वत्यम्। मरुत्वतीयम्—इत्यत्र भसंज्ञायां पदत्वाभावात् न तकारस्य दकार:। [मत्वर्थे तु सान्तस्य तान्तस्य च "तसौ मत्वर्थे" इति पदत्वाभाव: ज्ञेय:; तेन मरुत्वत्, विद्युत्वत् इत्यादि सिद्धम् इति एतदग्रे वक्ष्यते]।

अग्निश्च सोमश्च इति अग्नीषोमौ। ["ईद्‌ग्ने: सोमवरुणयो:" (६।३।२७) इ ई- इत्] । तौ देवते अस्य इति अग्नीषोमीयम्। पक्षे अग्नीषोम्यम्। वास्तुन: पति: इति वास्तोष्पति: रुद्र: इन्द्रो वा। [रुद्र: खलु वै वास्तोष्पति: इति ब्राह्मण:। वास्तोष्पति:

सुरपतिरितामरः।] वास्तोष्पतिर्देवता अस्य इति वास्तोष्पतीयम् वास्तोष्पत्यम्। गृहमेधो देवता अस्य इति गृहमेधीयम्, गृहमेध्यम्। वास्तोष्पति इत्यत्र निपातनादलुक्-समासः, षकारागमश्च बोद्धव्यः। बालमनोरमातु—शुनासीरौ अस्यास्तः इति शुनासीरः इन्द्रः इति आर्द्रो साधयित्वा पश्चात् शुनासीरः इन्द्रः देवता अस्य इति विग्रहं प्रदर्शितवान्। उक्तं च—'वाय्वादित्यवानिन्द्रो विवक्षितः' इति वेदभाष्ये भट्टभास्करः। भट्टिकाव्ये च—"बभौ मरुत्वान् विकृतसमुद्रः" अत्र मरुत् अस्य अस्ति इति मरुत्वान् इन्द्रः इति भरतमल्लिकः।

## १२३६। अग्नेर्ढक्॥ ४।२।३३॥

## टी—। आग्नेयम्।

The suffix ढक् is attached to अग्नि and the form is आग्नेयम्।

मित—। अग्निशब्दात् ढक् स्यात् देवता इत्येतस्मिन् अर्थे। अग्निर्देवता यस्य तत् आग्नेयं सूक्तम्। आग्नेयोऽष्टाकपालः। अयम् ढक् प्रत्ययः अण् प्रत्ययस्या-पवादः। अपिच "प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्र अग्निकलिभ्याम् ढक् वक्तव्य"—इति काशिका। अयमर्थः—"तेन दीव्यति खनति जयति जितम्" (४।४।२) इति सूत्रात् प्राक् येषु येषु अर्थेषु तद्धितप्रत्ययाः भवन्ति, तेषु केषुचिदपि अर्थेषु अग्निशब्दात् कलिशब्दाच्च ढक् प्रत्ययो भवति। कलेर्ढक् कालेयः।

## १२३७। कालेभ्यो भववत्॥ ४।२।३४॥

## टी—। मासिकम्। प्रावृषेण्यम्।

Words, expressive of time, take the same suffixes after them, to denote something, presided over by the said time, as are attached to them in the sense of "produced or born in it". Thus the suffix ठञ् is attached to the word मास to denote something born or produced in the month and the form is मासिक; consequently the same suffix will be taken by मास and the form will be मासिक to imply something, of which मास is the presiding deity.

मित—। "कालेभ्यः" कालवाचकशब्देभ्यः "भववत्" प्रत्ययाः भवन्तीति शेषः। कालवाचकशब्देभ्यः "तस्मिन् भवः ( उत्पत्तिः )" इत्यर्थे ये ये प्रत्ययाः यत्र यत्र भवन्ति, तत्र तत्र "सा अस्य देवता" इति एतस्मिन्नर्थे अपि तेन प्रत्ययाः इष्यन्ते।" "कालाट् ठञ्" ( ४।३।११ ) इति प्रकरणे "तस्मिन् भवः (जातः)" इत्यर्थे कालविशेषवाचिशब्देभ्यः प्रत्ययाः विधास्यन्ते, ते प्रत्ययाः "सा अस्य देवता" इति एतस्मिन्नर्थेऽपि तथैव इष्यन्ते इति निष्कर्षः। ननु "भववत्" इति ( वत्करणं ) कथम् विहितम् ? "सर्वसादृश्य परिग्रहार्थम्" इति काशिका। देवतार्थे विहिताः प्रत्ययाः सर्वथैव भवार्थे विहितेभ्यः प्रत्ययेभ्यः अभिन्ना इति ज्ञापनार्थमिति भावः। तथाहि मासो देवता अस्य इति मासिकम् एवं मासेभवं मासिकम्। ["कालाट् ठञ्" (४।३।११) इति ठञ् प्रत्ययः]। प्रावृट् देवता अस्य इति प्रावृषेण्यम्। एवं प्रावृषि भवं प्रावृषेण्यम् [ "प्रावृष एण्यः" ( ४।३।१७ ) इति एण्य प्रत्ययः]। एवं सांवत्सरिकम्, आर्द्रमासिकम्, वासन्तम् इत्यादि।

### १२३८। महाराजप्रोष्ठपदात् ठञ् ॥ ४।२।३५ ॥

### टी—। माहाराजिकम्। प्रौष्ठपदिकम्।

The suffix ठञ् is attached to महाराज and प्रोष्ठपद and the forms are माहाराजिकम् and प्रौष्ठपदिकम्।

मित—। "सा अस्य देवता" इत्येतस्मिन्नर्थे महाराजशब्दात् प्रोष्ठपदशब्दाच्च ठञ् प्रत्ययो भवति। महाराजो देवता अस्य इति माहाराजिकम् सूक्तम्। प्रोष्ठपदो देवता अस्य इति प्रौष्ठपदिकम्। महाराजः कुवेरः।

"सा अस्य देवता "इत्यधिकारः समाप्तः ॥ अथ प्रासङ्गिकसूत्रत्रयम् व्याचष्टे—

### १२३९। देवताद्वन्द्वे च ॥७।३।२१

### टी—। अत्र पूर्वोत्तरपदयोराद्यचोर्वृद्धिः स्यात् ञिति णिति किति च परे। आग्निमारुतम्।

When two words, expressive of vedic deities, are compounded into a single whole ( in द्वन्द्वसमास ) and the com-

pounded word takes a suffix, which is a ञित्, णित्, or कित् one, the first vowel of both the words forming the compound, undergoes lengthening. [As already said a suffix is said to be ञित्, when the letter ञ elides from it, णित्—when ण elides, and कित्—when क elides ]।

मित—। वेदविहितयागे ययो र्देवतयो: सहैव हवि:प्रदानम् वेदेषु विहितम्, तयोर्यो द्वन्द्वसमासो भवति, स एव देवताद्वन्द्व इति पारिभाषिकीं संज्ञां भजते, यत्र ईदृशो देवताद्वन्द्वसमासो भवति, तत्र समासस्थितस्य देवतावाचिन: पूर्वपदस्य ये अच: ( स्वरवर्णा: ) वर्त्तन्ते तेषु आद्यस्य अच: ( स्वरवर्णस्य ), तथा समासस्थितस्य देवतावाचिन: उत्तरपदस्य ये अचो विद्यन्ते तेषामपि आद्यस्य अचो वृद्धिर्भवति तद्धिते ञकारेत्—प्रत्यये परे, णकारेत्—प्रत्यये परे, ककारेत्—प्रत्यये च परे ।

अत्र "देवताद्वन्द्वे च" इति सूत्रे "मृजेर्वृद्धि"—(७।२।११४) रित्यतो वृद्धिरनुवर्त्तते, "अचो ञ्णिति" ( ७।२।११५ ) इत्यतो ञकारेत् प्रत्यये तथा णकारेत्प्रत्यये परे इति अनुवर्त्तते, "किति च" ( ७।२।११८ ) इत्यस्मात् किति ( ककारेत् प्रत्यये परे ) इत्यस्य चानुवृत्ति:, "तद्धितेष्वचामादे:" ( ७।२।११७ ) इति सूत्रात् अचामादे—रित्यस्य, "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" (७।३।१९) इत्यस्मात् "पूर्वपदस्य" इत्यस्य तथा "उत्तरपदस्य" ( ७।३।१० ) इत्यस्मात् "उत्तरपदस्य" इत्यस्याच अनुवृत्ति:। अग्निश्च मरुत् च इति अग्नामरुतौ—"देवताद्वन्द्वे च" ( ६।३।२६ ) इति आनङ्। अग्नामरुतौ देवते अस्य इति अण्। अण् खलु तद्धिते णकारेत्-प्रत्यय:—तेन अग्निपदस्य आदिस्वरस्य अकारस्य, तथा मरुत्पदस्यच आदिस्वरस्य अकारस्य वृद्धि:। तस्मात् आग्निमारुतम् इति पदं सिद्धम्।

ननु आग्नामारुतम् इति भवितुमर्हति. "देवताद्वन्द्वे—" ( ६।३।२६ ) इत्यनेन "आनङ्"वलात्, अग्नामरुतौ इति समासान्तपदत्वात्। समाधत्ते—इदं विग्रहवाक्यम् न लौकिकसाहित्यप्रचलितम्, अपि तु वैदिकसाहित्यप्रचलितम् एव। तेन विग्रहवाक्यस्य अलौकिकत्वात् (वैदिकत्वात्) आनङ् इति वाधित्वा "इद्वृद्धौ" (६।३।२८)

इति द्वन्द्वमेव। आग्निमारुतं कर्म, एवम् अग्निश्च वरुणश्च अग्नीवरुणौ तौ देवते अस्य आग्निवारुणम् सूक्तम। स्त्रियां—आग्निमारुतीम् अनड्वाहीम् आलभेत।

"यो देवताद्वन्द्वः युक्तहविःसम्बन्धी, तत्रायं विधिः। इह तु न भवति। स्कन्दविशाखौ देवते स्कान्दविशाखः ; ब्रह्मप्रजापती = ब्राह्मप्रजापत्यम्"—इति काशिका।

वेदे स्कन्दविशाखयोस्तथा ब्रह्मप्रजापत्योः सह हविःप्रदानम् न विहितम् अतो न देवताद्वन्द्वसमासविधिरिति भावः।

१२४०। नेन्द्रस्य परस्य ॥७।३।२२॥

दी—। परस्य इन्द्रस्य वृद्धिर्न स्यात्। सौमेन्द्रः। परस्य किम्?—ऐन्द्राग्नः।

But the word इन्द्र, forming the second half of a देवताद्वन्द्व compound, is an exception to the previous rule—( i. e. it undergoes no lengthening ).

मित—। यदा तु देवताद्वन्द्वे इन्द्र इति परपदं भवति, तदा पूर्वोक्तसूत्रविहितां वृद्धिम् इदं परस्थितम् इन्द्र-पदम् न भजते। सोमश्च इन्द्रश्च इति सोमेन्द्रौ। सोमेन्द्रौ देवते अस्य इति अण्। सौमेन्द्रः चरुः। अत्र पूर्वपदस्य सोमस्य एव आदिस्वर-वृद्धिर्नतु इन्द्रस्य परपदस्य। अग्निश्च इन्द्रश्च इति अग्नेन्द्रौ। [देवताद्वन्द्वे च (६।३।२६) इति आनङ्]। अग्नेन्द्रौ देवते अस्य इति अण्—आग्नेन्द्र श्चरुः। यत्र इन्द्र इति परपदम् न भवति तत्र तु नायं नियमो यथा—इन्द्रश्च अग्निश्च इति इन्द्राग्नी। इन्द्राग्नी देवते अस्य इति अण् ऐन्द्राग्नः चरुः। अत्र उभयपदस्य एव आदिस्वर-वृद्धिः। ऐन्द्राग्नम् एकादशकपालं चरुं निर्वपेत्—इति काशिका।

१२४१। दीर्घाच्च वरुणस्य ॥ ७।३।२३ ॥

दी—। दीर्घात् परस्य वरुणस्य न वृद्धिः। ऐन्द्रावरुणम्। दीर्घात् किम्? आग्निवारुणम्। आग्निवारुणीम् अनड्वाहीम् आलभेत।

Under parallel circumstances, the word वरुण undergoes no lengthening, when it stands after a long vowel.

मित—। "दीर्घात्" दीर्घस्वरात् "परस्य" परस्थितस्य "वरुणस्य" वरुण इति शब्दस्य "न वृद्धिः"। दीर्घादुत्तरस्य वरुणस्य पूर्वोक्तसूत्रविहिता वृद्धि र्न भवति इति भावः। इन्द्रश्च वरुणश्च इति इन्द्रावरुणौ। ["देवताद्वन्द्वे च" (६।३।२६) इति आनङ्]। इन्द्रावरुणौ देवते अस्य इति अण्—ऐन्द्रावरुणम् : दीर्घवर्णात् आकारात् उत्तरस्थितस्य वरुणपदस्य न वृद्धिः, एवं मैत्रावरुणम्। दीर्घात् परो वरुणशब्दो यत्र न भवति तत्र तु एवम्—अग्निश्च वरुणश्च इति अग्नीवरुणौ। "ईदग्नेः सोमवरुणयोः" (६।३।२७)। ततः अग्नीवरुणौ देवते अस्य इति अण्। "इद्वृद्धौ" (६।३।२८) इति सूत्रवलात् वृद्धिमति उत्तरपदे परे सति "ईदग्नेः सोमवरुणयो" रिति सूत्रस्य-वाधस्तेन आग्निवारुणम् इति पदम्। अत्र ईदग्नेः सोमवरुणयोरिति सूत्रस्य वाधितत्वात् अग्ने रित्वमेव। तेन वरुणपदस्य दीर्घस्वरपरत्वाभावात् आदिस्वरवृद्धिनिषेधो न प्रवर्त्तते। स्त्रियां—आग्निवारुणीम् अनड्वाहीम् आलभेत ॥

अथ प्रासङ्गिकं समाप्य प्रकृतमारभते—

"महाराजप्रोष्ठपदाट्ठञ्" (४।२।३५) इति सूत्रस्य वार्त्तिकद्वयं पठति—

**दी—। "तदस्मिन् वर्त्तत इति नवयज्ञादिभ्य उपसंख्यानम्" (वा २७०६)। नावयज्ञिकः कालः। पाकयज्ञिकः। "पूर्णमासादण् वक्तव्यः" (वा २७०७)। पूर्णो मासोऽस्यां वर्त्तत इति पौर्णमासी तिथिः।**

Words like नवयज्ञ, पाकयज्ञ etc., take the suffix ठञ् after them to imply the time or place in which they are performed. Thus the word नावयज्ञिकः denotes the time in which the sacrifice नवयज्ञ takes place, similarly we have पाकयज्ञिकः। The suffix अण् is attached to पूर्णमास to denote the time which

comprises it. Thus the word पौर्णमासी implies the तिथि ( i.e the lunar day ), in which there is पूर्णमास ( i. e the completion of the lunar month ).

मित—। तदस्मिन् वर्त्तते इति एतस्मिन्नर्थे प्रथमान्तेभ्यः नवयज्ञादिभ्यः ठञ् प्रत्ययो भवति। वार्त्तिकस्य अर्थस्तु अयम्—"तदस्मिन् वर्त्तते इत्यर्थे प्रथमान्तेभ्यः नवयज्ञादिभ्यः ठञः "उपसंख्यानम्" गणनम् कार्य्यम् इति शेषः। नवः नूतनः यज्ञः इति नवयज्ञः। "नवयज्ञः नूतनधान्यविषयको यज्ञः आग्रहायणाख्यः, सः यस्मिन् काले वर्त्तते सः नावयज्ञिकः आग्रहायणकालः इति यावत्"—इति बालमनोरमा। एवं पाकयज्ञः उपासनागनिसाध्यः पार्वणस्थालीपाकादिः, स यस्मिन् काले वर्त्तते स पाकयज्ञिकः। अस्मिन् वर्त्तते इत्येतस्मिन्नर्थे पूर्णमासशब्दात प्रथमान्तात् अण् प्रत्ययो भवति। "मासः चन्द्रमा। पूर्णश्चासौ मासस्तु इति पूर्णमासः पूर्णचन्द्रः, स यस्यां तिथौ वर्त्तते सा पौर्णमासी तिथिरित्यर्थः। अण्प्रत्यये सति "टिड्ढाणञ—(४।१।१५)" इति स्त्रियां ङीप्। "यद्यपि पूर्णोमाः चन्द्रः=पूर्णमाः। तस्येदमित्यर्थे "तस्येदम्" इत्यणि पौर्णमासीति सिद्धम्, तथापि ईदृश एवार्थे अयं साधुरिति भावः"—बालमनोरमा।

१२४२। पितृव्यमातुलमातामहपितामहाः॥ ४।२।२६॥

टी—। एते निपात्यन्ते। "पितुर्भ्रातरिव्यत्" (वा २७०८)। पितुर्भ्राता पितृव्यः। "मातुर्डुलच्" (२७०८)। मातुर्भ्राता मातुलः। "मातापितृभ्याम् पितरि डामहच्" (वा २७०९)। मातुः पिता मातामहः। पितुः पिता पितामहः। "मातरि षिच्च" (वा २७१०)। मातामही। पितामही। "अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः" (वा २७१२)। सकारपाठ-सामर्थ्यान्न षः। अविसोढम्। अविदूसम्। अविमरीसम्। "तिलान्निष्फलात् पिञ्जपेजौ" (वा २७१३)। तिलपिञ्जः।

तिलपेजः। वन्ध्यस्तिलः इत्यर्थः। "पिञ्जश्छन्दसि डिच्च" ( वा २७१४ )—तिल् पिञ्जः।

Four words, viz पितृव्य, मातुल, मातामह and पितामह are irregularly formed.' But Katyayana in his varttika has derived them in the following ways :—

(I) The suffix व्यत् is attached to पितृ, to denote his bother and we have the word पितृव्य।

(II) The suffix डुलच is attached to मातृ to denote her brother and we have consequently the form मातुल।

(III) The suffix डामहच् is attached to both पितृ and मातृ to denote their fathers and we have at once the words पितामह and मातामह।

(IV) The same suffix, is attached to मातृ and पितृ to imply their mother and in this case, the suffix is said to be a षित् one, whereby ई ( ङीष् ) is attached to them in the feminine. In this way पितामही and मातामही are formed.

(V) The suffixes सोढ़, दूस and मरीसच् are attached to अवि to denote her milk. Thus we have अविसोढ़, अविदूस and अविमरीस! The स of सोढ़ is dictated to be a dental one in the body of the said suffix, and consequently it is not turned into a cerebral one.

(VI) The suffixes पिञ्ज and पेज are attached to तिल to denote a sterile sesamum ( plant ) and we have the forms तिलपिञ्ज and तिलपेज।

(VII) In the vedic literature the suffix पिञ्ज is counted as

ङित् and consequently the अकार of तिलelides, giving rise to the form तिल्पिञ्ज: ।

मित— । पितृव्यशब्द: मातुलशब्द: मातामहशब्द: पितामहशब्दश्च निपातनेन सिध्यन्ति । वार्त्तिककारास्तु एवं मन्यन्ते—"पितृशब्दात् तस्यभ्रातरि अभिधीयमाने "व्यत्" प्रत्ययो भवति—पितृव्य: । मातृशब्दात् तद्भ्रातरि गम्यमाने डुलच् प्रत्ययो भवति—मातुल: । पितृशब्दात् तथा मातृशब्दाच्च तयो: पितरि बोध्यमाने डामहच् प्रत्ययो भवति—पितामह: । मातामह: । "मातरि पिच्च"—पितृशब्दात् तथा मातृशब्दाच्च तयो: मातरि गम्यमाने डामहच प्रत्ययो भवति । स च प्रत्यय: पिद्वत् भवति ; तेन पित्वात् स्त्रियाम् ङीष् ["पिद्गौरादिभ्यश्च" इति ]—पितामही । मातामही । "अवे:—इति । अवि शब्दात् दुग्धे गम्यमाने सोढ़, दूस, मरीसच् एते प्रत्यया भवन्ति । अविसोढ़म्, अविदूसम्, अविमरीसम् । अविदुग्धमित्यर्थ: । अवि: स्त्रीजातीयो मेष: ।

ननु अविसोढ़म् इति पदस्य सकारस्य कथं न षत्वं भवति—तस्य "सोढ़" इति प्रत्ययस्य अवयवत्वादिति चेत् ?—उच्यते ! सूत्रे यत: "षोढ़" इति निर्द्देशम् अदत्त्वा "सोढ़" इति निर्द्देश: प्रदत्त:, अत: प्रत्यये "सकार-पाठसामर्थ्यात्" सकारेणैव प्रत्ययस्य निर्द्देशात्, सत्वस्य न षत्वापत्ति: । तिलादिति—तिलशब्दात् पिञ्ज पेज इति प्रत्ययौ भवत:, फलशून्य: औषधिविशेषश्चेत् गम्यते । तिलपिञ्ज:, तिलपेज:—फलशून्य: तिल-संज्ञक: औषधिविशेष: । एवं—"छन्दसि" वैदिके साहित्ये अयं पिञ्जप्रत्यय: ङिद्वत् भवति, ङित्वात् च टेर्लोप:—तेन "तिल" इत्यस्य अकारलोप: । तिल्पिञ्ज: ।

## १२४३ । तस्य समूह: ॥ ४।२।३७ ।

## दो— । काकाणाम् समूह:—काकम् । वाकम् ।

Suffixes like अण् are attached to words to imply a collective group of persons or beings or things. Thus suffix अण् is attached to the word काक ( a crow ), giving rise to the form काकम्—which means a group of crows.

मित—। "तस्य" इति षष्ठ्यन्तात् "समूहः" इति एतस्मिन्नर्थे यथाविहितम् प्राक्दीव्यतीया अणादयः प्रत्यया भवन्ति। काकानां समूहः इति अण् काकम्। बकानाम् समूहः इति अण् बाकम्। समूहप्रत्ययान्तानां पदानाम् साधारणतः व्यवहारतश्च क्लीवत्वम्।

समूहवाचक—प्रत्ययानाम् अधिकारः "इनित्रकट्यचश्च" (४।२।५१) इति सूत्रं यावत् वर्त्तते। सूत्रकाराश्च पश्चात् वक्ष्यन्ति (१) अचित्तात् (अचेतनवस्तुवाचक शब्दात्) ठक् भवति, (२) यच्छन्दस्य आदिवर्णः अनुदात्तः तस्मात् अञ् भवति (३) गोत्रात् (गोत्रवाचकात् शब्दात्) वुञ् भवति, (४) तथा केभ्यश्चित् शब्देभ्यः केचित् विशिष्टाः प्रत्यया भवन्ति—यथा "केदाराद्यञ्च" (४।२।४०) इति केदारशब्दात् यञ् प्रत्ययो भवति—एवमादयः। अतोऽस्मिन् सूत्रे येषाम् अण् विहितः, ते पूर्वोक्तेभ्यः अन्ये इति विज्ञेयः। तथाहि यः शब्दः चेतनवस्तुवाचकः, अपिच यस्य आदिवर्णः उदात्तस्तथा यश्च गोत्रवाचकाद् अन्यः, यस्य च तद्धितप्रकरणे समुदायार्थे विशिष्य कश्चित् प्रत्ययो नोक्तः तस्मादेव शब्दात् अण् भवति। इत्थम्भूतमेव उदाहरणम् अस्मिन् सूत्रे उल्लिखितम्।

काकशब्दस्तु चेतनवस्तुवाचकः, अस्य आदिवर्ण उदात्तः, नहि अयं गोत्रवाचको न वा अस्मात्तरं विशिष्य कश्चित् प्रत्ययः समूहवाचक—प्रत्ययाधिकारे कथितस्तस्मात् एतस्मात् काकशब्दात् समूहार्थे अण् भवति। [गुणादिभ्यो ग्रामच् प्रत्ययश्च वक्तव्यः इति क्वचित् दृष्टं तदपि इह स्मर्त्तव्यम्। गुणानां समूहः गुणग्रामः। करणानां समूहः इति करणग्रामः। गुणादयस्तु—गुण करण, तत्त्व, शब्द, इन्द्रिय। आकृतिगणोऽयम्]।

## १२४४। भिक्षादिभ्योऽण् ॥ ४।२।३८ ॥

**टी—। भिक्षाणां समूहो भैक्षम्। गर्भिणीनां समूहो गार्भिणम्। इह 'भस्याढे—' इति पुंवद्भावे कृते ॥**

The suffix अण् is taken by भिक्षा and a few other words (i.e, भिक्षादिशब्द) to denote a collective group. Thus to denote भिक्षाणां समूहः we have भैक्षम्।

मित—। तस्य समूह इति एतस्मिन्नर्थे भिक्षाशब्दात् तथा अपरेभ्यः शब्देभ्यश्च अण् प्रत्ययो भवति। भिक्षाणाम् समूह इति भैक्षम्। भिक्षादि यथा— भिक्षा, गर्भिणी, क्षेत्र, करीष, अङ्गार, चर्मिन्, धर्मिन्, सहस्र, युवति, पदाति, पद्धति, अथर्वन्, दक्षिणा, भरत, विषय, श्रोत्र ; इत्यादिभ्यः शब्दः—इत्यपि अत्र कश्चिदनुगृह्यते।

"अचित्त हस्तिधेनोष्ठक्" ( ४।२।४७ ) इति वक्ष्यमाणसूत्रेण ठक् प्रत्यये प्राप्ते सति तस्य ठकः अपवादोऽयम् अण् इति अनेन सूत्रेण ज्ञापितम्। गार्भिणम् इति—गर्भ शब्दात् मत्वर्थीये इन् प्रत्यये कृते सति गर्भिन् इति शब्दः। स्त्रियामपि गर्भिणी। गर्भिणीनां समूहः इति अण् प्रत्ययेनैन गार्भिणम्। येषाम् आदिवर्णअनुदात्तस्तेषाम् अञ् भवति इति पश्चात् "अनुदात्तादेरञ्" ( ४।२।४४ ) इति सूत्रे वक्ष्यति। गर्भिणी-शब्दोऽपि अनुदात्तादिस्तस्मादेतस्मात् अञ्भवतु इति अञ् प्रत्यये प्रसक्ते तस्य अपवादोऽण् प्रत्ययोऽस्मिन् सूत्रे विहितः।

ननु अञ् प्रत्ययं वर्जयित्वा अण् प्रत्ययविधानस्य किं फलमिति चेदुच्यते— अण् प्रत्यये कृते प्रत्ययान्त—पदस्य अन्तोदात्तत्वं भवति ( अन्तिमवर्णः उदात्तो भवतीत्यर्थः ), अञ् प्रत्यये तु विहिते प्रत्ययान्तपदस्य आद्युदात्तत्वम् ( आदि वर्ण उदात्तोभवतीत्यर्थः ) इति स्वरे विशेषोऽस्ति तद्विशेषज्ञापनार्थमेव अत्र गर्भिणीशब्दस्य ग्रहणम्।

इहगर्भिणी शब्दे —"भस्याढे—" इति पुंवद्भावे कृते सति—

गर्भिणी शब्दात् अण् प्रत्यये कृते सति "भस्याढे तद्धिते" इति पुंवद्भावः। ततः ङीप् प्रत्ययस्यनिवृत्तौ गर्भिन् अ ( अण् ) इति स्थितम्। ततः "नस्तद्धिते" (६।४।१४४) इति टि-लोपे प्राप्ते सति आह—

## १२४५। इनण्यनपत्ये ॥ ६।४।१६४ ॥

**टी—। अनपत्यार्थे अणि परे इन् प्रकृत्या स्यात्। तेन "न— स्तद्धिते" ( सूत्र ६७८ ) इति टिलोपो न। युवतीनां समूहो यौवनम्। यतन्तादनुदात्तादेरञि यौवतम्।**

A word ending in (the suffix) इन् suffers no change, provided that the suffix अण् be attached to it in any sense other than अपत्यार्थ ( i. e the son or descendants of the person, denoted by the word ending in इन्). [ Thus in the aforesaid case the elision of टि—sanctioned by "नस्तद्धिते" (६।४।१४४ ) is barred by this rule and we have गर्भिन् + अण् intact. Then the first vowel is lengthened and we have the form गार्भिणम्] । In the similar way we have यौवनम् with अण् meaning युवतीनाम् समूहः a bevy of युवति or youthful ladies. Again the word युवती may be said to be the feminine form of युवत्—a word derived from the root यु of the अदादि class, with the suffix शतृ, and consequently to denote युवतीनां समूहः we may have यौवतम् with अञ्—this word युवती undergoing पुंवद्भाव by the varttika "भस्याढे तद्धिते" and with the necessary lengthening of the first vowel.

मित—। इन् अणि अनपत्ये इति च्छेदः। "प्रकृत्यैकाच्" (६।४।१६३) इति सूत्रात् "प्रकृतिवद्भव"तीति अनुवर्त्तते। अपत्यात् अपत्यप्रत्ययात् अन्यत् इति 'अनपत्यम्'। तस्मिन् इति "अनपत्ये"। अपत्यार्थं वर्जयित्वा अन्यस्मिन्नर्थे प्रयुक्ते अण् प्रत्यये परे सति, "इन्" इन् प्रत्ययान्तः शब्दः "प्रकृत्या" प्रकृतिवद् भवति, न कदापि विकृतिं भजते। यदि केनचिदपि सूत्रेण इन्प्रत्ययान्त-शब्दस्य काचित् विकृतिः ( परिवर्त्तनम् ) उपदिष्टा, सा विकृतिः अपत्यार्थात् अन्यस्मिन्नर्थे विहिते अणि परे न भवतीति इति सरलार्थः। तथाहि पूर्वसूत्रव्याख्यायाम्—गर्भिणीनां समूह इत्यर्थे अण् प्रत्यये विहिते, "भस्याढे तद्धिते" इति कृते च पुंवद्भावे, गर्भिन् + अण् इति स्थिते सति "नस्तद्धिते" ( ६।४।१४४ ) इति टिलोपे प्रसक्ते विदधाति—अपत्यार्थात् अन्यः समूहार्थस्तस्मिन्नर्थे विहिते अण् प्रत्यये परे सति इन् प्रत्ययान्तस्य गर्भिन् शब्दस्य "नस्तद्धिते" ( ६।४।१४४ ) इति सूत्रेण प्रसक्ता टिलोपरूपा विकृतिर्न स्यात्। तेन गर्भिन् इति शब्दस्य आदिस्वरवृद्धौ गार्भिणम् इति रूपम्। एवं युवतीनां समूहः इति

युवतिशब्दात् अण्। "भस्याढे तद्धिते" इति पुंवद्भावत्वेन युवतिस्थाने युवन् इति प्राप्तम्। ततः युवन्+अण् इति स्थिते सति अपत्यार्थात् अन्यस्मिन् समूहार्थे विहिते अण् प्रत्यये परे "नस्तद्धिते" (६।४।१४४) इति सूत्रेण प्राप्ता टिलोपरूपा विकृतिरनेन प्रतिषिद्धा। ततः आदिस्वरवृद्धौ यौवनमितिरूपम्। "कनिन्युवृषितक्षि—" इति युधातोरौणादिकः कनिन् प्रत्ययः, तेन युवन् इति पदम्। ततः स्त्रियां "यूनस्तिः" इति सूत्रेण युवतिशब्दः प्राप्यते। स च अनुदात्तादिः। अतोऽस्मात् अञ् प्रकृतः। फलतश्च युवतिशब्दे अनुदात्तादिलक्षणोऽञ् प्राप्नोति। तद्बाधनार्थं मयं शब्दः भिक्षादिगणे पठितः इति। युवति+अण इत्यत्र पूर्वं पुंवद्भावः पश्चात् प्रत्यय इति अधुना अनुदात्तादित्वाभावात् अणि एव प्राप्ते सति अत्र पाठानर्थक्यमपि भाष्य-कैयटयोः स्पष्टम्। यौतीति अदादिगणीयधातोः शतृप्रत्यये कृते युवत् इति पदं स्त्रियां च युवतीति भवति। युवतीनां समूह इति अणि "भस्याढे तद्धिते" इति पुंवद्भावे सति अनुदात्तादित्वात् युवत् अञ् इति स्थितम्। ततः आदिस्वरवृद्धौ यौवतमिति रूपम्।

## १२४६। गोत्रोक्षोष्ट्रोरभ्रराज-राजन्य-राजपुत्रवत्समनुष्या-जाद्वुञ्॥ ४।२।३९॥

**टी—। एभ्यः समूहे वुञ् स्यात्। लौकिकमिह गोत्रम्, तच्चापत्यमात्रम्।**

The suffix वुञ् is attached to गोत्र, उक्षन्, उष्ट्र, उरभ्र, राजन्, राजन्य, राजपुत्र, वत्स, मनुष्य and अज in the sense of a collective group. By the word गोत्र present in this sutra, we are to understand its ordinary meaning, that is लौकिक गोत्र i, e. the lineage (all the offsprings comprising the sons, grandsons and so forth) and not the technical sense of the term as in the sutra "अपत्यं पौत्रप्रभृति गोत्रम्" &c.

मित—। गोत्रवाचकशब्दात् तथा उक्षादिभ्यश्च "एतेषां समूहः" इति एतस्मिन्नर्थे वुञ् प्रत्ययो भवति। अस्मिन् सूत्रे उल्लिखितेन गोत्रशब्देन लौकिकम्

एव गोत्रं काश्यपभारद्वाजादिरूपं ज्ञेयम्। तच्च गोत्रम् अपत्यमात्रं "प्रवराध्याये परिगणितं पुत्रपौत्रादिकृत्स्नापत्य" मिति बालमनोरमा। "अपत्यं पौत्रप्रभृति गोत्रम्" (४।१।१६२) इति यत् पारिभाषिकं गोत्रं तत् तु इह न विवक्षितम्। "अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते, न तु पारिभाषिकम् गोत्रमित्यर्त इति 'स्त्रीपुंसाभ्याम्—' (४।१।८७) इत्यादि सूत्रभाष्ये सिद्धान्तितत्वादितिभाव" इति बालमनोरमा।

१२४७। युवोरनाकौ ॥ ७।१।१ ॥

दी—। यु वु एतयोरनुनासिकयोः क्रमात् 'अन' 'अक' एतावादेशौ स्तः। ग्लुचुकायनीनां समूहो ग्लौचुकायनकम्। औक्षकमित्यादि। 'आपत्यस्य च'—(सू १०८२) इति यल्लोपे प्राप्ते "प्रकृत्याऽके राजन्यमनुष्ययुवानः" (वा ४२१४)। राजन्यकम्। मानुष्यकम्। "वृद्धाच्चेति वक्तव्यम्" (वा २७१६) वार्द्धकम्।

The two particles यु and वु forming parts of suffixes are changed into अन and अक respectively, provided that they are alleged to be nasals. Thus in the sense of a collective group of ग्लुचुकायनीs, we have ग्लौचुकायनकम्। A collective group of उक्षन्s is औक्षकम्। A collective group of राजन्यs is राजन्यकम्। Here though the elision of य after राजन्य was apprehended through the influence of the rule "आपत्यस्य च तद्धितेऽनाति" (६।४।१५१), yet it does not elide, being barred by the varttika "प्रकृत्या—राजन्यमनुष्ययुवानः" (वा ४२१४), meaning the words राजन्य, मनुष्य and युवन् suffer no change, when the suffix अक् is attached to them. वुञ् (समूहार्थे) is attached to the word वृद्ध too, and we have at once the form वार्द्धकम्।

मित— । यु वु इति प्रत्ययौ प्रत्ययांशौ वा ; यु इति प्रत्ययस्थाने अन इति आदेशो भवति, वु इति प्रत्ययस्य स्थाने च अक इति आदेशो भवति, यदि यु च , च अनुनासिकौ भवत: ।

ग्लुचुक इति कश्चित् ऋषि: । "प्राचामवृद्धादिति"(४।१।१६०) फिन् तेन ग्लुचुकायन इति पदम् । तत "इतो मनुष्यजाते:" ( ४।१।६५ ) इति स्त्रियाम् ङीष्, तेन ग्लुचुकायनी इति स्थितम् । तासां समूह इति समूहे वुञ् । वुञ् इत्यस्य ञकार: इत्—वु स्थाने च अकादेशस्तेन ग्लुचुकायनी + अक इति स्थिति: । तत आदिस्वर वृद्धिस्तेन ग्लौचुकायनी + अक इति स्थितम् । तत: "यस्येति च"(६।४।१४८) इति ईकार लोप: । तथा सति ग्लौचुकायनकम् इति सिद्धम् । एवम् उक्ष्णाम् समूह इति उक्षन् + वुञ । अकादेशश्च वुञस्थाने । टिलोप:, आदिस्वरवृद्धिश्च ; तेन औक्षकम् इति सिद्धम् । एवम् उष्ट्राणां समूह इति औष्ट्रकम् । उरभ्राणाम् समूह: औरभ्रकम् । उरभ्र: मेष: । राज्ञां समूह: राजकम् । राजपुत्राणाम् समूह: राजपुत्रकम् । वत्सानां समूह: वात्सकम् । अजानां समूह: आजकम् । राजन्यानां समूह: इति राजन्य शब्दस्य तथा मनुष्याणां समूह: इति मनुष्यशब्दस्य च अकप्रत्यये परे सति "आपत्यस्य च तद्धितेऽनाति" ( ६।४।१५२ ) इति अन्तिमस्य यकारस्य लोप: प्रसक्त: ; तं लोपम् वारयति "प्रकृत्याऽके राजन्यमनुष्ययुवान:" ( वा ४२१४ ) इति वार्त्तिकेण । अस्य अर्थस्तु—अके परे सति राजन्यशब्दो मनुष्यशब्दस्तथा युवन्शब्दश्च प्रकृत्या भवन्ति न काञ्चित् विकृतिम् आपद्यते इत्यर्थ: । तेन यकारस्य लोपो न भवति । मानुष्यकम् । राजन्यकम् । एवं यूनो भाव: इति युवन् शब्दात् मनोज्ञादित्वात वुञ । प्रकृतिभावात् ( अनेन वार्त्तिकेण कस्याश्चिदपि विकृतेरभावात् ) "नस्तद्धिते" ( ६।४।१४४ ) इति टिलोपो न भवति । तेन यौवनकम् इति सिद्धम् । "वृद्धाच्चेति" इति—वृद्धशब्दाच्च वुञ् भवतीति बोध्यं, तेन वृद्धानां समूह इति वार्द्धकम् । अत्र वृद्धशब्देन वृद्धशब्दस्वरूपम् एव ज्ञातव्यं न खलु "वृद्धिर्यस्याचामादि:" ( १।१।७३ ) इति वृद्धसंज्ञका: शब्दा: । भाष्ये वृद्धशब्दस्य खलु उदाहरणं प्रदत्तम् ।

ननु "अनुनासिकयो:" इति यदुक्तं तस्य किं प्रत्युदाहरणम् ? उच्यते—ऊर्णाया: युस् इति ऊर्णायु: । 'भुजिमृङ्भ्याम् युक्त्युकौ' = भुज्यु: । मृत्यु: ।

एवं 'युं' इत्यस्य अनुनासिकत्वं न प्रतिज्ञायते। उक्तं च प्रागेव—"प्रतिज्ञानुनासिक्याः पाणिनीयाः" इति। अतश्च 'यु'-स्थाने 'अन' न स्यात्।

१२४८। केदाराद्यञ्च ॥ ४।२।४० ॥

टी—। चाद्वुञ्। कैदार्य्यम्—कैदारकम्। "गणिकाया यञिति वक्तव्यम्" ( वा २७११ )। गाणिक्यम्।

The word केदार takes the suffix यञ as well as the suffix वुञ after it to denote a collective group of the same. यञ gives rise to the form कैदार्य्य whereas वुञ accounts for कैदारक। The word गणिका takes यञ only in the same sense and we have the form गाणिक्यम्।

मित—। तस्य समूह इति एतस्मिन्नर्थे केदारशब्दात यञ, चकारात् वुञ च भवतः। "अचित्तहस्तिधेनोष्ठक्" ( ४।२।४७) इति विहितस्य ठक्प्रत्ययस्य अपवादः। केदाराणां समूह इति कैदार्य्यम्—अत्र यञ्। कैदारकम्—अत्र वुञ। केदारः क्षेत्रस्य सीमानिर्देशकः मृत्तिकास्तूपविशेषः [आलि इति वङ्गभाषा]।

गणिकाशब्दात् एतस्मिन्नेवार्थे यञ् भवति यञग्रहणात् वुञो निवृत्तिः। गणिकानां समूहः गाणिक्यम्।

१२४९। ठञ्कवचिनश्च ॥ ४।२।४१ ।

टी—। चात् केदारादपि। कवचिनां समूहः कावचिकम्। कैदारिकम्।

The suffix ठञ is attached to कवचिन् as well as to केदार in the aforesaid sense.

मित—। तस्य समूह इति एतस्मिन् विषये कवचिन् इति शब्दात् ठञ्प्रत्ययो भवति, चकारात् केदारशब्दादपि। ठञ् इत्यस्य स्थाने इकादेशः। कवचिनां समूह इति ठञ्। इकादेशः। "नस्तद्धिते" ( ६।४।१४४ ) इति टिलोपः। आदिस्वर-

छद्धिय। तेन कावचिकम् इति पदम्। एवं कैदाराणां समूह इति ठञ् कैदारिकम्।

१२५०। ब्राह्मणमाणववाडवाद्यन् ॥ ४।२।४२ ॥

दी—। ब्राह्मण्यम्। मानव्यम्। वाड़व्यम्। "पृष्ठादुपसंख्यानम्" ( वा २७२० )—पृष्ठ्यम्।

The suffix यन् is attached to the words ब्राह्मण, माणव and वाड़व in the same sense. The suffix is the य and the न after it signifies the accent. The word पृष्ठ also takes the same suffix in the same sense. The word implies six kinds of "stotras"—they are रथन्तर, बृहत्, वैरूप, वैराज, शाक्कर and रैवतक।

मित—। ब्राह्मणशब्दात्, माणवशब्दात् तथा वाड़वशब्दात् तस्य समूह इति एतस्मिन्नर्थे यत्प्रत्ययो भवति। यकारः प्रत्ययः, नकारस्तु उदात्तादिस्वरभेदप्रदर्शनार्थः। ब्राह्मणानां समूह इति य ( न् ) = ब्राह्मण्यम्। माणवानां समूहः इति माणव्यम्। मनोरपत्यं पुमान् इति मनुशब्दात् अण् प्रत्यये सति मानव इति पदम्। अण् प्रत्यये परे 'मानव' इत्यत्र नकारस्य कुत्रापि णत्वं स्यात्। "अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्धन्यः तेन सिध्यति माणवः इति "मनोर्जातावञ्यतौ षुक्च' इति सूत्रे ( ४।१।१६१ ) भाष्यम्"—इति बालमनोरमा च। वाड़वानां समूह इति वाड़व्यम्। पृष्ठादिति—पृष्ठशब्दाच्च य ( न् ) भवति। पृष्ठानां समूह इति पृष्ठ्यम्। कथं 'पृष्ठ्यः षड़हः' = षणाम् अह्नाम् समाहारः इति षड़हः समाहारे द्विगुसमासः। "राजाहःसखिभ्यष्टच्" (५।४।९१) इत्ति टच् प्रत्यये परे टिलोपः। रथन्तर-बृहद्वैरूप-वैराज-शाक्करवैतकाख्यानि षट् पृष्टाख्यस्तोत्राणि। तद्युक्तानि अहानि लक्षणया पृष्ठानि, तेषां समूहः इति बालमनोरमा। भट्टोजिस्तु मनोरमायां 'पृष्ठ्यः षड़हः' इति छान्दसमत्वर्थलक्षणया साधयति।

१२५१। ग्रामजनबन्धुभ्यस्तल् ॥ ४।२।४३ ॥

दी—। ग्रामता। जनता। बन्धुता। "गजसहायाभ्यां चेति वक्तव्यम्" ( वा २७२१ ) गजता। सहायता। 'अह्नः खः

क्रतौ (वा २७२२—२७२३)। अहीनः। अहर्गणसाध्य-सुत्याकः क्रतुरित्यर्थः। क्रतौ किम्? आह्नः। इह खण्डिकादित्वादञ्। "अह्नष्टखोरेव" (सू ७८८) इति नियमाट्टिलोपो न। 'पर्श्वा णस् वक्तव्यः' (वा २७२४)।

The suffix तल् is attached to the words ग्राम, जन and बन्धु in the self-same sense and we have at once the forms ग्रामता, जनता and बन्धुता। The words गज and सहाय also take the same suffix in the same sense and give rise to the words गजता and सहायता respectively.

The word अहन्—when meaning a sacrifice (यज्ञ), takes the suffix ख (ईन) after it to imply a collective group of the same. Thus the form अहीन is derived from अहन् denoting a particular kind of sacrifice (सौत्ययज्ञ), with the suffix ख (ईन)। But when the word does not imply a sacrifice, we have the suffix अञ् and not ख, attached to अहन्, giving rise to आह्नः। The elision of टि, as apprehended by the rule—नस्तद्धिते (६।४।१४४) is here barred by the restriction in the rule "अह्नष्टखोरेव" (६।४।१४५)। The word पर्शु takes the suffix णस् and not अण् after it.

मित—। ग्रामशब्दात् जनशब्दात् बन्धुशब्दात् च तल्प्रत्ययो भवति। तल्-प्रत्ययान्तानां स्त्रीलिङ्गत्वं स्यात्। तथाहि—"तलन्तं स्त्रियाम्" इति लिङ्गानुशासन-सूत्रम्। ग्रामाणां समूह इति ग्रामता। जनानां समूह इति जनता। बन्धूनां समूह इति बन्धुता। गजशब्दात् सहायशब्दाच्च तल् भवति। गजानां समूह इति गजता, सहायानां समूह इति सहायता। "अह्नः" इति—क्रतुशब्दवाचकात् अहन् शब्दात् खप्रत्ययो भवति। ख स्थाने ईन इति आदेशः स्यात्। अहन् इत्यनेन

सौत्यानि अहानि वाच्यानि। तेषां समूह इति अहीनः। सौत्यं यज्ञविशेषः। "अह्नष्टखोरेव" ( ६।४।१४५ ) इति सूत्रेण टिलोपः। अह्नां समूह अहीन इति यत् पदं तस्य कोऽर्थः ? कथयति—'अहर्गणसाध्यसुत्याकः क्रतुः'। अहर्गणैः दिवस-समूहैः साध्यः समापनीयः सुत्याकः इति संज्ञकः क्रतुः। दिवससमूहैः यः सुत्याकः क्रतुः समाप्यते, तस्यैव अन्यत् नाम अहः इति ज्ञेयम्। यदा अहन् शब्देन क्रतु नं उच्यते तदातु अह्नां ( दिवसानां) समूह इति "खण्डिकादिभ्यश्च" (४।२।४५) इति सूत्रेण अञ् स्यात् तेन आह्नः इति पदम्। "अह्नष्टखोरेव" ( ६।४।१४५ ) इति सूत्रे टप्रत्यये खप्रत्यये च परे एव अहन् शब्दस्य टिलोपः स्यात्, न खलु अन्यस्मिन् प्रत्यये परे सति इति नियमकरणात् अञ प्रत्यये परे अहन् इत्यस्य न टिलोपः। भसंज्ञायाम् "अल्लोपोनः" इति अन्भागस्य अकारलोपस्तत 'आह्न' इति। पर्शु इति। पर्शु-शब्दः उकारान्तः स्त्रीलिङ्गे वर्त्तते। एषः शब्दः पार्श्वगतास्थिवाची—पर्शु इति शब्दात् तस्य समूह इति एतस्मिन्नर्थे णस प्रत्ययो भवति। अयं णस् प्रत्ययः अणप्रत्ययस्य अपवादः। एवं पर्शु + णस् इति स्थिते आह—

## १२५२। सिति च ॥ १।४।१६ ॥

**दी—। सिति परे पूर्व्वं पदसंज्ञं स्यात्। अभत्वादोर्गुणोन। पार्शूनां समूहः पार्श्वम्।**

A प्रकृति ( i. e शब्द ) must be termed a पद and not a भ, whenever any suffix of which स elides, is attached to it. Thus in the present case the प्रकृति पर्शु should be taken to be a पद and not a भ as the suffix णस, of which स elides, stands after it. Thus पर्शु + णस् = पार्श्वम्।

सित—। सकारः इत् यस्य सः 'सित्'। तस्मिन् इति—यस्य प्रत्ययस्य सकार इत् भवति तस्मिन् परे सति पूर्वपदस्य पदसंज्ञा भवति नतु "यचिभम्" (१।४।१८) इति सूत्रबलात् भसंज्ञा। 'सुप्तिङन्तं पदम्' ( १।४।१४ ) इति सूत्रात् पदम् इत्यंशस्य अनुवृत्तिरस्मिन् सूत्रे वर्त्तते। प्रकृते च पर्शूनां समूह इति विग्रहे पर्शु णस् इति

स्थिते पर्श्‌ इति प्रकृतेः पद-संज्ञा न खलु भसंज्ञा—यतः सकारेत्‌ णस्‌ प्रत्ययः अस्य परे विद्यते। ननु अत्र यत्‌ भ-संज्ञां निषिध्य पदसंज्ञां विदधाति तत्‌ किं फलं दास्यति ? उच्यते—"अभत्वाद्योर्गुणः न"। 'ओर्गुणः' (६।४।१४६) इति सूत्रं तद्धितप्रत्यये परे सति उवर्णान्तस्य भस्य गुणो विधीयते। अत्र पर्शुशब्दस्य "अभत्वात्‌" भसंज्ञारहितत्वात्‌ गुणः न भवति। ननु निषिद्धोगुणस्तर्हि "इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" (६।१।१२७) इति सूत्रेण प्रकृतिभावः (सन्ध्यभावः) अस्तु इति चेत्‌—न। 'सिति च' (वा ३९८) इति वार्त्तिकवलेन स निषिद्धः। अस्य अर्थस्तु एवमेव—सकारेत्‌ प्रत्यये परे सति "इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" इति सूत्रविहितं कार्य्यं न स्यात्‌। तथा सति पर्शु अ (णस्‌) इत्येव स्थिते आदिस्वरवृद्धिस्तेन पार्शु अ इति स्थितम्‌। ततः "इको यणचि" (६।१।७७) इति सन्धौ वादेशः। तेन पार्श्वम्‌ इति पदं सिद्धम्‌।

## १२५३। अनुदात्तादेरञ्‌ ॥ ४।२।४४।

### टी—। कापोपतम्‌। मायूरम्‌।

The suffix अञ्‌ is attached to words of which the first syllable is अनुदात्त, in the sense of a collective group of the persons or things, implied by the said words.

Thus in the sense of a collective groups of pigeons (कपोत) we have कापोतम्‌।

मित—। यस्य शब्दस्य आदिवर्णोऽनुदात्तो भवति, तस्मात्‌ शब्दात्‌ "तस्य समूह" इति एतस्मिन्‌ विषये अञ्‌ प्रत्ययः स्यात्‌। कपोतानाम्‌ समूह इति अञ्‌= कापोतम्‌। मयूराणां समूह इति अञ=मायूरम्‌। एवं तित्तिराणाम्‌ समूह तैत्तिरम्‌। "लघावन्ते द्वयोश्च वह्वषो गुरुः" इति कपोत-मयूरशब्दौ मध्योदात्तावितिं भाव इति वालमनोरमा।

## १२५४। खण्डिकादिभ्यश्च ॥ ४।२।४५ ॥

### टी—। अञ्‌ स्यात्‌। खण्डिकानां समूहः खाण्डिकम्‌।

The suffix अञ् is attached to a few words, such as खण्डिका [though their first syllable is उदात्त and though some of them are inanimate objects and consequently fall under the rule "अचित्तहस्तिधेनोष्टक्" (४।२।४७)] in the sense of a collective group.

मित—। तस्य समूह इत्यर्थे, खण्डिका शब्दात् तथा आदिशब्देन वड़वा-क्षुद्रक-शुक-भिक्षुको-लूक-श्व-युगाहन् वरत्र-हलवन्ध शब्देभ्यश्च अञ् प्रत्ययो भवेत्। एषाम् आदिवर्णो न अनुदात्तास्तेन "अनुदात्तादेरञ्" इति सूत्रस्य विषयाः एते न भवन्ति। अतएव एतत् पृथक् सूत्रकरणं। एषु शब्देषु ये खलु अचित्त वस्तु द्योतयन्ति तेऽपि "अचित्तहस्तिधेनोष्टक्" इति ठक् प्रत्ययं वर्जयित्वा एतत्सूत्र-विहितम् अञ् प्रत्ययमेव ग्रहीष्यन्ति। खण्डिकानां समूह इति खाण्डिकम्। वड़वानां समूह इति वाड़वम्। क्षुद्रक-मालवशब्दात् च सेना-सञ्ज्ञायाम् अञ् भवति। क्षुद्रकमालवानां सेनानां समूहः क्षौद्रकमालवी सेना। अन्यत्र तु क्षौद्रकमालवकम्। क्षुद्रकाश्च मालवकाश्च इति क्षत्रियद्वन्द्वे क्षुद्रक-मालव इति पदं तस्मादेव अञ्।

## १२५५। चरणेभ्यो धर्म्मवत्॥ ४।२।४६॥

## टी—काठकम्। छान्दोग्यम्।

Words, expressive of different sections of the vedic literature, take the same suffixes after them as are taken by words to denote some particular feature (धर्म्म)। Thus the word कठ stands for a particular section of the vedic literature and in the sense of a collective group of kathas, the suffix वुञ् is taken by it, giving rise to the word काठकम्। In the similar way the word छन्दोग takes the suffix ञ्य and we have at once the word छान्दोग्य।

मित—। चरणाः वेदानां शाखाः कठकलापादयः। षष्ठ्यन्तेभ्यः चरणशब्देभ्यः तस्य समूह इति एतस्मिन्नर्थे "धर्म्मवत्" प्रत्यया भवन्ति। "धर्म्मवत् प्रत्ययाः" इत्यस्य कोऽर्थः? "गोत्रचरणाद् वुञ्" (४।३।१२६) इत्यारभ्य धर्म्मे अर्थे याभ्यः प्रकृतिभ्यः ये प्रत्ययाः वक्ष्यन्ते, ते प्रत्ययास्ताभ्यः प्रकृतिभ्यः समूहे अर्थेऽपि स्युरिति।

ननु "धर्म्मवत्" इति वत्प्रत्ययेन किं द्योत्यते? वतिः सर्व्वसादृश्यार्थः इति काशिका। धर्म्मे अर्थे यादृशाः प्रत्यया भवन्ति अन्यतिरेकेणैव तादृशाः समूहार्थे स्युरिति।

अयमेव फलितार्थः—धर्म्म-अर्थे ये प्रत्ययाः याभ्यः प्रकृतिभ्यः भवन्ति त एव ताभ्यः समूहार्थे अपि स्युरिति। चरणशब्देन शाखाध्येतारः एव ग्राह्याः इति बालमनोरमाकृत् मन्यते।

कठानाम् धर्म्म इति "गोत्रचरणाद् वुञ्" (४।३।१२६) = काठकम्। एवं कठानाम् समूह इति अनेन वुञ् काठकम्। कलापानां धर्म्मः इति वुञ् कालापकम्। कलापानां समूह इति वुञ् कालापकम्।

कठाः वेदशाखाविशेषाः इति काशिका। कठाः कठाख्यवेदशाखाध्यायिन इति बालमनोरमा।

एवं छन्दोगानां धर्म्म इति "छन्दोगौक्थिक याज्ञिक-बह्वृच-नटात् ञ्यः" (४।३।१२९) इति ञ्यप्रत्ययः, तेन छान्दोग्यम्। एवं छन्दोगानां समूह इति छान्दोग्यम्। एवम् औक्थिक्यम्, आथर्वणम्। छन्दोगाः सामवेदशाखाविशेषाः।

## १२५६। अचित्तहस्तिधेनोष्ठक्॥ ४।२।४७॥

## टी—। साक्तुकम्। हास्तिकम्। धैनुकम्।

Words, expresive of inanimate objects as well as the two words हस्तिन् and धेनु take the suffix ठक् to denote a collective group.

मित—। अचित्ताः अप्राणिनः। अप्राणिवाचिभ्यस्तथा हस्तिशब्दात् धेनु-शब्दाच्च तस्य समूह इत्येतस्मिन् अर्थे ठक्प्रत्ययः स्यात्। अयम् अण् प्रत्ययस्य

तथा अञ् प्रत्ययस्य चापवादः। सक्तूनाम् समूहः इति ठक्। "इसुसुक्तान्तात्कः" (७।३।५१) इति उकः परत्वात् ठस्य कः। एवम् अपूपानां समूह आपूपिकम्। शाष्कुलिकम्।

हस्तिनां समूह इति ठक्। ठक् स्थाने इकादेशः। "नस्तद्धिते" (६।४।१४४) इति टिलोपः। आदिस्वरवृद्धिश्च। तेन हास्तिकम् इति पदम्। धेनूनाम् समूह इति ठक्। उकः परत्वात् ठस्य कः। आदिस्वरवृद्धिस्तेन धैनुकमिति पदम्।

## १२५७। केशाश्वाभ्याम् यञ्छावन्यतरस्याम् ॥ ४।२।४६ ॥

**टी—। पक्षे ठगणौ। कैश्यम्—कैशिकम्। अश्वीयम्—आश्वम्।**

The words केश and अश्व optionally take the suffix यञ and छ respectively in the aforesaid sense. Besides these the suffix ठक is attached to केश by the previous rule and अण to अश्व।

मित—। केशशब्दात् तथा अश्वशब्दात् च यथासंख्यं यञ् प्रत्ययः छप्रत्ययश्च विकल्पेन भवतः, तस्य समूह इति एतस्मिन्नर्थे। केशशब्दात् यञ्, अश्वशब्दात् च छ इति बोध्यम्। केशानां समूह इति यञ् कैश्यम्। पक्षे अचित्तत्वात् "अचित्त हस्तिधेनोष्ठक्" (४।२।४७) इति ठक् कैशिकम्, एवम् अश्वानाम् समूह इति छ प्रत्ययः = अश्वीयम्। पक्षे "तस्य समूहः" (४।२।३७) इति अण् आश्वम्। "अन्यतरस्याम्" इति विकल्पार्थद्योतकः इति प्रागुक्तम्।

## १२५८। पाशादिभ्यो यः ॥ ४।२।४९ ॥

**टी—। पाश्या। तृण्या। धूम्या। वन्या। वात्या।**

Words, such as पाश and others take the suffix य after them to imply a collective group. A collective group of पाशs is पाश्या। The feminine form is used—as required by idiom and usage.

मित—। पाशादिभ्यः यप्रत्ययः स्यात् तेषाम् समूह इति एतस्मिन् अर्थे। पाशानां समूह इति पाश्या। "स्त्रीत्वं लोकात्" इति बालमनोरमा, स्त्रियामाप् भवति—एतेषां स्त्रीलिङ्ग एव साहित्ये प्रयोगदर्शनात्। पाशादिर्यथा—पाश, तृण, धूम, वन, वात, अङ्गार, पोत, बालक, पिटक शकट, पिटाक, हल, नट। एवं तृणानाम् समूहः तृण्या इत्यादयः।

१२५९। खलगोरथात्॥ ४।२।५०॥

टी—। खल्या। गव्या। रथ्या।

The words खल, गो and रथ take the suffix (य) in the aforesaid sense. Thus we have खल्या in the sense of खलानां समूहः।

मित—। खलशब्दात् गोशब्दात् रथशब्दात् च तस्य समूह इत्येतस्मिन्नर्थे य-प्रत्ययः स्यात्। खलानां समूहः खल्या। गवां समूह गव्या। रथानां समूह रथ्या। अस्य सूत्रस्य पूर्वसूत्रे एव अन्तर्भावः युक्तः, तर्हि कथं पृथक् सूत्रकरणम्? उच्यते—अस्य सूत्रस्य परसूत्रे (इनित्रकट्यचश्च इति सूत्रे) अनुवृत्तिरस्ति इति द्योतनार्थमेव पृथक्सूत्रकरणं।

१२६०। इनित्रकट्यचश्च॥ ४।२।५१॥

टी—। खलादिभ्यः क्रमात् स्युः। खलिनी। गोत्रा। रथकट्या। "खलादिभ्य इनिर्वक्तव्यः" (वा २७३५)—डाकिनी। कुटुम्बिनी। आकृतिगणोऽयम्।

The suffixes इनि, त्र and कट्यच् are attached to खल, गो and रथ respectively in the sense of a collective group. Thus we have the forms खलिनी in the sense of a group of knaves, गोत्रा to denote a herd of cattle and रथकट्या—a number of cars.

Katyayana sanctions the attachment of इनि to खल and others falling under the category of खलादि। They are डाक, कुण्डल, कुटुम्ब and the like, and the words डाकिनी, कुण्डलिनी and कुटुम्बिनी, etc are formed.

मित—। खलशब्दात् इनि, गोशब्दात् त्र, तथा रथशब्दात् च कटाच् प्रत्ययो भवति, तस्य समूह इति एतस्मिन् अर्थे बोध्यमाने सति। खलानां समूह इति खल-शब्दात् इनिप्रत्ययः खलिनी। स्त्रियामीप्। "स्त्रीत्वं लोकात्" इति बालमनोरमा। लोकात् लौकिकसाहित्यप्रयोगदर्शनात् इति भावः। इनिप्रत्यये नकारात् पर इकार उच्चारणार्थः। गवां समूह इति त्रप्रत्ययः = गोत्रा। स्त्रियाम् टाप्। स्त्रीत्वं—साहित्ये तथा प्रयुक्तत्वात्। एवं रथानां समूह इति कटाच् रथकट्या। स्त्रियाम् टाप्। स्त्रीत्वं च लोकात्। "खलादिभ्यः" इति वार्त्तिककारमते खल-प्रभृतिभ्यः शब्देभ्यः इनि-प्रत्ययः भवति। तेन डाकानां समूहः डाकिनी, कुटुम्बानां समूहः कुटुम्बिनी, कुण्डलानां समूहः कुण्डलिनी इत्यादयः सिध्यन्ति। अयं खलादि-राकृतिगणः।

इदमपि व्याकरणान्तरम् अत्र स्मर्त्तव्यम्—

(१) कमलादिभ्यः तस्य समूह इति एतस्मिन्नर्थे खण्डच् प्रत्ययो भवति। कमलानां समूह इति कमलखण्डम्। एवम् अम्भोजखण्डम्। कमलादिर्यथा—कमल, अम्भोज, पद्मिनी, कुमुद, सरोज, पद्म, नलिनी, कैरविणी, कमलादिराकृतिगणः। खण्डच् प्रत्ययो इत्यत्र षण्डच् प्रत्ययोपि पाठोदृश्यते।

(२) नरकरितुरङ्गानां स्कन्धच् प्रत्ययो भवति पूर्वोक्ते एव अर्थे। नराणां समूह इति नरस्कन्धः। एवं करिस्कन्धः। तुरङ्गस्कन्धः।

(३) पूर्वादिभ्यः काण्डप्रत्ययो भवति प्रागुक्ते एव अर्थे। पूर्वकाण्डम्। एवं तृणकाण्डम्, कर्मकाण्डम्।

१२६१। विषयो देशे॥ ४।२।५२॥

टी—। षष्ठ्यन्तादणादयः स्युरत्यन्त-परिशीलितेऽर्थे. स

चेद्देशः । शिवीनां विषयो देशः शैवः । देशे किम् ? देवदत्तस्य विषयोऽनुवाकः ।

Words ending in the sixth case-ending, take the suffixes अण् and the like to imply a country, highly familiar due to permanent residence ; thus to imply the country, where the शिविs permanently put up at, the suffix अण् is attached to शिवि and the word शैवः is at once formed.

मित— । "तस्य समूह" इत्येतस्मात् "समूह" इत्यंशस्य निवृत्तिः । "तस्य" इत्यंशस्य तु अनुवृत्तिरस्ति । तेन "तस्य" इति षष्ठीप्रत्ययान्तात् "विषय" इति एतस्मिन्नर्थे द्योत्यमाने यथाविहितम् अणादयः भवन्ति, विषयशब्देन अत्यन्तपरिशीलितो योऽर्थः बोधाते, स चेत् देश एव नान्यः कश्चित् । विषयशब्दस्य विविधाः अर्थाः दृश्यन्ते । यथा—अनेन विषयोलब्धः—अत्र विषयशब्दः ग्रामसमूहात्मके जनपदे वर्त्तते । कर्णस्य विषयः शब्दः—अत्र विषयः इन्द्रियग्राह्ये वस्तुनि प्रवर्त्तते । मत्स्यस्यविषयो जलम्—अत्र अन्यत्र अवृत्तौ विषयशब्दः प्रयुक्तः । मत्स्यो जलादन्यत्र न वर्त्तते इति भावः । देवदत्तस्य विषयोऽनुवाकः—अत्र अत्यन्तपरिशीलिते अर्थे विषय-शब्द-प्रयोगः । अत्यन्त परिशीलितः अत्यन्तपरिचितः इत्यर्थः । अत्यन्तपरिचितोऽर्थः विषयः । सचेत् विषयो देश एव भवति, तर्हि "तस्य विषय" इति एतस्मिन्नर्थे षष्ठ्यन्तात् यथाविहितम् अणादयः भवन्ति इति भावः । देशशब्देन ग्रामसमुदायात्मक-जनपदो ज्ञेयः ।

शिवीनां विषयो देशः इति अण् शैवः (देशः) । देशे इति किम् ? देवदत्तस्य विषयोऽनुवाकः । अत्र देवदत्तस्य अत्यन्तपरिचितो विषयः अनुवाकः वेदांशः एकः । स तु न देशस्तेन अत्र प्रत्ययो न भवति ।

## १२६२ । राजन्यादिभ्यो वुञ् ॥ ४।२।५३ ॥

## दी— । राजन्यकः ।

The suffix वुञ् and not अण्, is attached to राजन्य and the like, to imply a country inhabited by them. Thus in the sense of "राजन्यानां विषयः", we have राजन्यकः ।

मित—। "तस्य विषयो देशः" इत्यर्थे राजन्यादिगणदेभ्यः षष्ठ्यन्तेभ्यः वुञ् प्रत्ययो भवति। अयम् अण्प्रत्ययस्य अपवादः। राजन्यानां विषयोदेश इति राजन्यकः। एवं मालवानां विषयो देशः मालवकः। इत्थम् दैवनायकः। वैराटकः। वैगर्त्तकः। राजन्यादिराकृतिगणः। तेषु राजन्य, वाभ्रव्य, दैवयात। शालङ्कायन। अम्बृत। जालन्धरायण। आत्मकामेय। अम्बरीषपुत्र। वसाति। वैल्वन। शैलूष। उदुम्बर। वैल्वल। आर्जुनायन। संप्रिय। दाक्षि। ऊर्णनाभ—इत्यादयो ज्ञेयाः।

## १२६३। भौरिक्याद्यैषुकार्य्यादिभ्यो विधल्भक्तलौ ॥ ४।२।५४ ॥

**टी—। भौरिकीणां विषयो देशः भौरिकिविधम्। भौलिकिविधम्। ऐषुकारिभक्तम्। सारसायनभक्तम्।**

In the aforesaid sense, the suffix विधल् is attached to भौरिकि and others, falling under the category of भौरिक्यादि, and the suffix भक्तल् is attached to ऐषुकारि and others falling under the head of ऐषुकारि। Thus the word भौरिकिविधम् implies the country, inhabited by the भौरिकिs, and the word ऐषुकारिभक्तम् denotes the country of the ऐषुकारिs.

मित—। तस्य विषयो देश इति एतस्मिन् विषये षष्ठ्यन्तेभ्यः भौरिक्यादिभ्यः विधल्प्रत्ययस्तथा ऐषुकार्य्यादिभ्यश्च भक्तल्प्रत्ययो भवतः। अणोऽपवादः। भौरिकीणां विषयो देशः भौरिकिविधम्। भौलिकीनाम् विषयो देशः भौलिकिविधम्। एवं ऐषुकारीणाम् विषयो देशः ऐषुकारिभक्तम्। सारसायनानां विषयो देशः सारसायनभक्तम्। इह क्लीवत्वम् लौकिकसाहित्ये प्रयोगदर्शनात्।

भौरिक्यादिर्यथा—भौरिकि। भौलिकि। चौपयत। चैटयत। काणेय। वाणिजक। वालिज। वालिकाज्य। सैकयत। चैकयत।

शिपुकार्यादिर्यथा—शिपुकारि। सारसायन। चान्द्रायण। द्राक्षायण। त्र्याक्षायण। औडायन। जौलायन। खाण्डायन। सौवीर। दासमित्रि। दासमित्रायण। शौद्रायण। दाक्षायण। शायण्डायण। तार्क्ष्यायण। शौभ्रायण। शयाण्ड। शौण्डि। वैश्वमानव। वैश्वधेनव। नड। तुण्डदेव। विश्वदेव। शापिण्डि।

## १२६४। सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ॥ ४।२।५५ ॥

दी—। अण्। पङ्क्तिरादिरस्येति पाङ्क्तः प्रगाथः। 'स्वार्थ उपसंख्यानम्' (वा २७४४)। त्रिष्टुवेव त्रैष्टुभम् ॥

The suffix अण् is attached to a word, expressive of a particular metre, provided that the said metre heads some "Pragatha" ( i. e. a couple of "Riks" giving rise to an additional one, by means of recitation ). Thus the "Pragatha" which has the metre पङ्क्ति in the top, is said to be a पाङ्क्तः, and the suffix अण् being taken by पङ्क्ति।

Moreover, words, expressive of metres, take suffixes like अण् without undergoing any change in their meaning. Thus the suffix अण् is attached to त्रिष्टुभ्, a kind of vedic metre and the word त्रैष्टुभम् is at once formed. Both the words त्रिष्टुप् and त्रैष्टुभम्, are, of course, identical in meaning.

मित— "गाथशब्दः क्रियानिमित्तकः क्वचिदेव मन्त्रविशेषे वर्त्तते। यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्ते स प्रगाथनात् प्रकर्षगानात् वा प्रगाथ इत्युच्यते" इति काशिका। "ऋग्द्वयम् पादावृत्त्या ऋक्त्रयं सम्पद्यते। स च सं प्रगाथ इति छन्दोगसूत्रे बह्वृचसूत्रे च प्रसिद्धम्" इति बालमनोरमा।

इत्थम्भूता प्रक्रिया श्रीश्रीसप्तशतीस्तवेऽपि दृश्यते। यथा—

"या देवी सर्वभूतेषु विष्णुमायेति शब्दिता,
नमस्तस्यै, नमस्तस्यै; नमस्तस्यै नमो नमः ॥

अत्र एकएव श्लोकः। तमेव त्रिधा विभज्य मन्त्रत्रयं क्रियते। एवम् आम्नातं ऋग्द्वयं प्रगथनेन वा पादावृत्त्या वा यत्र ऋक्‌त्रयं सम्पद्यते स प्रगाथ इति संज्ञां भजते इति फलितार्थः।

छन्दसः इति। अक्षरेयत्ताविशेषः गायत्र्यादिच्छन्दः—इति बालमनोरमा। वेदेषु बाहुल्येन सप्त छन्दांसि दृश्यन्ते—यथा गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती।

प्रगाथेषु प्रगाथ इत्याख्यातेषु ऋङ्‌मन्त्रेषु अस्य प्रगाथस्य स आदिरिति एतस्मिन् अर्थे प्रथमान्तात् छन्दोविशेषवाचकात् अणादिप्रत्ययाः भवन्ति। प्रगाथेषु इति विषये सप्तमी। पङ्क्तिः छन्दोविशेषः। पङ्क्तिरादिरस्य प्रगाथस्य इति पाङ्क्तः प्रगाथः। एवं अनुष्टुप् आदिरस्य प्रगाथस्य इति आनुष्टुभः प्रगाथः। इत्थं जागतः प्रगाथः। ननु "आदि"रिति किम्? अनुष्टुप् मध्यम् अस्य प्रगाथस्य इति न अणादि-प्रत्ययः। छन्दसः इति किम्? "उदुत्य"शब्द आदिरस्य प्रगाथस्य इति न प्रत्ययः। तथाहि सन्ध्यामन्त्रे "उदुत्यं जातवेदसं देवम् वहन्ति केतवः" इत्यादि। प्रगाथेषु इति किम्? पङ्क्तिरादिरस्य अनुवाकस्य इति प्रत्ययाभावः।

"स्वार्थे"—इति। छन्दोविशेषवाचिभ्यः स्वार्थे एव अणादिप्रत्ययाः जायन्ते। त्रिष्टुप् एव इति अण् त्रैष्टुभम्। अत्र क्लीवत्वम् लौकिकसाहित्ये प्रयोगदर्शनात्। "स्वार्थे" इति पदस्य—"अर्थान्तरम् अनुत्पाद्य" इत्यर्थः।

**१२६५। संग्रामे प्रयोजनयोद्धृभ्यः॥ ४।२।५६॥**

**टी—। "सोऽस्य" इत्यनुवर्त्तते। सुभद्रा प्रयोजनमस्य संग्रामस्य इति सौभद्रः। भरता योद्धारोऽस्य संग्रामस्य भारतः।**

The suffix अण् and the like are attached to words, which denote the root or the warriors of a battle, provided that by the words, thus formed, the battle itself is implied.

Thus a battle of which सुभद्रा constitutes the root cause may be called a सौभद्र battle, the suffix अण् being attached to सुभद्राः etc।

मित—। तदस्य संग्रामस्य प्रयोजनम्, तथा तेऽस्य संग्रामस्य योद्धार इति एतस्मिन् विषये संग्राम—प्रयोजनवाचिशब्देभ्यस्तथा संग्रामयोद्धृवाचिशब्देभ्यश्च प्रथमान्तेभ्यः अणादयः प्रत्ययाः भवन्ति, संग्रामे अभिधेये सति।

तथाहि सुभद्रा प्रयोजनम् अस्य संग्रामस्य इति अण्—सौभद्रः संग्रामः। इत्थं गौरिमित्रः संग्रामः।

अपिच भरता योद्धारोऽस्य संग्रामस्य इति भारतः संग्रामः। अहिमाला योद्धारः अस्य संग्रामस्य इति आहिमालः संग्रामः। एवं स्यान्दनाश्वः संग्रामः। संग्रामे इति किम्? सुभद्रा प्रयोजनम् अस्य दानस्य अत्र संग्रामाभावात् न प्रत्ययः। "प्रयोजनयोद्धृभ्यः" इति किम्? सुभद्रा प्रेक्षिका अस्य संग्रामस्य अत्र प्रयोजनाभावात् योद्धृभावाच्च न प्रत्ययः।

सूत्रे अस्मिन् "सोऽस्य" इत्यस्य अनुवृत्तिरस्ति। संग्रामे इति भावे सप्तमी। संग्रामे सति तदस्य संग्रामस्य प्रयोजनम्, तथा ते अस्य संग्रामस्य योद्धार इति एतस्मिन्नेव विषये संग्राम-प्रयोजनवाचिभ्यस्तथा संग्रामयोद्धृवाचिभ्यश्च शब्देभ्यः प्रथमान्तेभ्यः अणादयः स्युरिति सूत्रस्य विवृतिः।

## १२६६। तदस्यां प्रहरणमिति क्रीड़ायां णः ॥ ४।२।५७ ॥

**दी—। दण्डः प्रहरणम् अस्यां क्रीड़ायाम् इति दाण्डा। मौष्टा।**

The suffix ण is attached to words, expressive of missiles, to imply the exercise, in which the said missiles are used. Thus the physical feat in which दण्डs are used is said to be a दाण्डा क्रीड़ा, the suffix ण being taken by the word दण्ड।

मित— । तत् अस्यां क्रीड़ायाम् इति एतस्मिन्नर्थे प्रथमान्तात् प्रहरणवाचक-शब्दात् ण-प्रत्ययः स्यात् । दण्डः प्रहरणम् अस्यां क्रीड़ायाम् इति दण्डशब्दात् ण-प्रत्ययस्तेन दाण्डः । स्त्रियाम् आप् । दाण्डा क्रीड़ा । मुष्टिः प्रहरणम् अस्यां क्रीड़ायाम् इति मुष्टिशब्दात् ण-प्रत्ययस्तेन मौष्टः । स्त्रियामाप् मौष्टा । मौष्टा क्रीड़ा ।

ननु अण् प्रत्ययेनैव इष्टसिद्धौ कथं णप्रत्ययविधानमिति चेत्—न । अण् प्रत्यये कृते सति स्त्रियाम् ङीप् स्यात् नतु आप् । स्त्रीलिङ्गे अत्र आप्प्रत्यय एव भवितेति ज्ञापनार्थमेव णप्रत्ययविधानम् ।

प्रहरणमिति किम् ? माला भूषणम् अस्याम् क्रीड़ायाम्—अत्र प्रहरणाभावात् न प्रत्ययः । क्रीड़ायाम् इति किम् ? खड्गः प्रहरणम् अस्यां सेनायाम्—अत्र क्रीड़ाभावात् प्रत्ययाभावः ।

## १२६७ । घञः सास्यां क्रियेति ञः ॥ ४।२।५८ ॥

**दी— । घञन्तात् क्रियावाचिनः प्रथमान्तात् अस्यामिति सप्तमर्थे स्त्रीलिङ्गे ञ-प्रत्ययः स्यात् । घञः इति कृद्ग्रहणाद् गतिकारकपूर्वस्यापि ग्रहणम् ॥**

The suffix ञ is attached to words, derived from a root with the suffix घञ्, provided that the said words denote some motion or action, relative to some game or the like, and the word, newly formed is used in the feminine gender only. By the word "घञः" here, we are to understand घञ् preceded by गति, कारक ।

मित— । घञन्तात् कृदन्तघञ्प्रत्ययान्तशब्दात् । 'क्रियावाचिनः' यो घञ्-प्रत्ययान्तशब्दः क्रियां द्योतयति तस्मात् । 'प्रथमान्तात्' प्रथमासमर्थात् । अस्याम् इति । मृगयायाम् इति सप्तम्यन्तं विशेष्यम् अत्र अध्याहार्य्यम् । अस्यामिति तस्यैव विशेषणम् । घञ्प्रत्ययान्तो यो क्रियावाची शब्दस्तस्मात् प्रथमान्तात् ञप्रत्ययो भवति, सा क्रिया अस्याम् इति एतस्मिन्नर्थे ; ञ-प्रत्ययान्तः शब्दस्तु स्त्रीलिङ्गे एवात्र प्रयुज्यते—इति सूत्रार्थः ।

ननु "घञन्तात् शब्दात् "इति अनुल्लिख्य "घञः" इति कृत्-प्रत्यय एव सूत्रे उल्लिख्यते ; तस्य का सार्थकतेति समाधत्ते—"घञः इति कृद्ग्रहणात् गतिकारकपूर्व्वस्यापि ग्रहणम। यस्मात् धातोर्घञ् विधीयते, तस्मात् प्राक् गतिसंज्ञकं किञ्चित् कारको वा कश्चित् विद्यते चेत् न कापि हानिरिति सूच्यते। तथाहि श्येनः पततीति पत् धातोर्घञि कृते श्येनपातः इति भवति। अत्र घञन्तात् पत् धातोः प्राक् श्येन इति कर्त्तृकारको विद्यते। अत्रैव "गतिकारकपूर्व्वस्यापिग्रहणम्" इति उदाक्रियते। श्येनपातः इति क्रिया अस्याम् मृगयायां वर्त्तते इति स्त्रीलिङ्गे वाच्ये ञ-प्रत्ययः। ञकारः इत्— तेन आदिस्वरवृद्धिः। अत्र मुम् इत्यस्य आगमो भवति, तदपेक्षायां सूत्रयति—

## १२६८। श्येनतिलस्य पाते ञे ॥ ६।३।७१ ॥

**टी—। श्येन तिल एतयोर्मुमागमः स्यात् ञप्रत्यये परे पातशब्दे उत्तरपदे। श्येनपातोऽस्यां वर्त्तते श्यैनम्पाता मृगया। तिलपातोऽस्यां वर्त्तते तैलम्पाता स्वधा। श्येनतिलस्य किम् ? दण्डपातोऽस्यां तिथौ वर्त्तते दाण्डपाता तिथिः।**

The words श्येन and तिल take the particle मुम् after them, when the word पात, with the suffix ञ् attached to it, follows them. Thus to denote श्येनपातः क्रिया वर्त्तते अस्याम् मृगयायाम्, we have श्यैनम्पाता मृगया etc.।

मित—। यदा खलु "घञः सास्यां क्रियेति ञः" इति सूत्रबलेन पात इति घञन्त-शब्दात् ञ-प्रत्ययो भवति, स च ञ-प्रत्ययान्तः पातशब्दश्चेत् श्येनशब्दात् तिलशब्दाद्वा उत्तरे भवति, तदा श्येन-शब्दात् अनन्तरं तिलशब्दादनन्तरं च मुम् इति आगमः स्यात्। मकार इत् ; तेन ञ-प्रत्ययान्त पातशब्दस्य आदौ पूर्व्वं मकारस्य अवस्थितिः। उकार उच्चारणार्थः।

श्येनपातः अस्याम् क्रियायाम् वर्त्तते इति श्यैनम्पाता मृगया। श्यैनम् पातेति स्त्रियामाप्। तिलः पतति इति तिलपातः क्रिया। तिलः इति कर्त्तृकारकः।

तिलपातः क्रिया वर्त्तते अस्यां क्रियायाम् इति तैलम्पाता स्वधा। स्वधाशब्दः स्त्रीलिङ्ग पितृक्रियायाम् वर्त्तते "नमः स्वधायै" इति दर्शनात्। ननु स्वधेति न कापि क्रीड़ा तर्हि कथं ञ प्रत्ययः कथं वा मुमागमः इति चेदुच्यते—"तदस्यां प्रहरणमिति क्रीड़ायाम् णः" इत्यस्मात् "क्रीड़ायाम्" इति पदम् अस्मिन् सूत्रे, "घञः सास्याम् क्रियेति ञः" इति सूत्रे च न अनुवर्त्तते—"तदस्याम् इत्यत्र स्थितेऽपि "अस्याम्" इति पदे "सास्याम्" इति पुनरपि अस्याम् इति पदस्य ग्रहणात्।

श्येनतिलाभ्याम् अन्यत्र मुमागमेन स्यात्। दण्डपातः क्रिया वर्त्तते अस्याम् तिथौ इति दाण्डपाता तिथिः। सामान्येन इदं विधानं तेन "तिथौ" इत्यत्र क्रियाभावादपि पात इति घञन्तात् ञ-प्रत्ययः। एवं मुसलपातः क्रिया वर्त्तते अस्याम् भूमौ इति मौसलपाता भूमिः।

"घञः सास्याम् क्रियेति ञः" इति सूत्रे घञः इत्यस्य ग्रहणम् कथम्? अन्य-प्रत्यये परे माभूदिति। तथाहि पत्धातो ल्युट् प्रत्यये सति पतनम् इति पदम्। श्येनपतनम् क्रिया वर्त्तते अस्याम् इति ञ-प्रत्ययः न स्यात्। क्रियेति किम्? प्राकारोऽस्यां वर्त्तते इति प्रत्ययाभावः। प्राकारशब्दस्य घञ् प्रत्ययान्तत्वेऽपि क्रिया-वाचित्वाभावात्।

## १२६८। तदधीते तद्वेद ॥४।२।५८॥

## टी—। व्याकरणम् अधीते वेद वा वैयाकरणः।

Suffixes like अण् are attached to words ending in the second case-ending to denote one who either learns or is a master of the subject, implied by the self-same words. Thus to denote one who learns, or is a master of grammar (व्याकरणम्), we have the word वैयाकरणः—the suffix अण् being taken by व्याकरण।

मित—। तद् वेत्ति, तद् अधीते वा इति एतयोरेव अर्थयोः द्वितीयान्तात् शब्दात् अण् प्रत्ययो भवति। अणादयः स्युरिति केचित्। व्याकरणम् वेत्ति अधीते वा

इति व्याकरणशब्दात् अण्। अणि "न य्वाभ्याम्" (४।३।३) इति ऐचः आगमः। एवम् छन्दो वेत्ति अधीते वा छान्दसः। निमित्तानि अधीते वेद्वा नैमित्तः। निरुक्तं वेत्ति अधीते वा नैरुक्तः, मौहूर्त्तः, ज्यौतिषः, औत्पातः, नैगमः, तथाहि रामायणे—

"पार्थिवांश्चनरव्याघ्रः पण्डितान् नैगमांस्तथा।

गुरुमुखात् अक्षरानुपूर्व्वीग्रहणम् अध्ययनम्, शब्दार्थज्ञानं वेदनमिति बालमनोरमा। ननु "तदधीते तद्वेद" इत्यत्र कथं द्विः तदिति पदस्य उल्लेखः? अधीयानस्य तथा विदुषश्च पृथक् विधानार्थम् इति काशिका। तयोः पार्थक्यं तु बालमनोरमाकारेण प्रदर्शितम्—ऊर्द्धमेव प्रोक्तम्।

१२७०। क्रतूक्थादि सूत्रान्ताट्ठक्॥ ४।२।६०॥

टी—। क्रतुविशेषवाचिनामेवह ग्रहणम्। तेभ्यो मुख्यार्थेभ्यो वेदितरि, तत्-प्रतिपादकग्रन्थ-परेभ्यस्त्वध्येतरि। आग्निष्टोमिकः, वाजपेयिकः। उक्थं सामविशेषः। तल्लक्षण-परो ग्रन्थविशेषो लक्षणया उक्थम्। तदधीते वेद वा औक्थिकः। "मुख्यार्थात्तूक्थ शब्दाट्ठगणौ नेष्येते" (वा-)। न्यायम्=नैयायिकः। वृत्तिम्—वार्त्तिकः। लोकायतम्—लौकायतिकः इत्यादि। "सूत्रान्तात्वकल्पादेरेवेष्यते (वा २७४४)। सांग्रह-सूत्रिकः। अकल्पादेः किम्? काल्पसूत्रः। 'विद्यालक्षणकल्पान्ता-च्चेति वक्तव्यम्" (वा २७४४) वायसविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। पाराशरकल्पिकः। अङ्गक्षत्रधर्म्मत्रिपूर्व्वा-द्विद्यान्तान्नेति वक्तव्यम्' (वा २७४५)। आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रिविधा विद्या त्रिविद्या। ताम् अधीते वेद वा त्रैविद्यः। 'आख्यानाख्यायिकेतिहास पुराणेभ्यश्च' (२७४६)। यवक्रीतम् अधिकृत्य कृतम् आख्यानम् उपचारात् यवक्रीतम्,

तदधीते वेत्ति वा यावक्रीतिकः। वासवदत्ताम् अधिकृत्यकृता आख्यायिका वासवदत्ता। "अधिकृत्य कृते ग्रन्थे" (सू १४६७) इत्यर्थे 'वृद्धाच्छः' (सू १३६७)। तस्य 'लुबाख्यायिकाभ्यो बहुलम्' इति लुप्। ततोऽनेन ठक् वासवदत्तिकः। ऐतिहासिकः। पौराणिकः।

'सर्वादेः सादेश्च लुग्वक्तव्यः' (वा २७४६)। सर्ववेदान् अधीते सर्ववेदः। सर्वतन्त्रः। सवार्त्तिकः। 'द्विगोर्लुक्—' (सू १०८०) इति लुक्। द्वितन्त्रः। 'इकन् पदोत्तरपदाच्छतषष्टेः षिकन् पथः' (वा २७४८—२७५०)। पूर्वपदिकः! उत्तरपदिकः। शतपथिकः—शतपथिकी। षष्टिपथिकः—षष्टिपथिकी।

The suffix ठक् ( and not अण् ) is attached to words, expressive of a particular kind of sacrifice, to words of the उक्थादि class, and to words which end in सूत्र (forming the final half ), to denote one, that is a master of or studies the subjects referred to. Thus to denote one, who is a master of or studies the vedic chapter that deals with the particular sacrifice अग्निष्टोम, we have the from आग्निष्टोमिकः—the suffix ठक् being attached to अग्निष्टोम। Rest easy—See Tika.

मित—। तदधीते, तद्वेद इति एतयोः अर्थयोः क्रतुविशेषवाचिशब्देभ्यः, उक्थादिशब्देभ्यस्तथा येषां शब्दानाम् अन्ते "सूत्र" इत्यंशः विद्यते, तेभ्यश्च ठक् प्रत्ययो भवति। अणोऽपवादः। सूत्रे यः क्रतुशब्दो दृश्यते तेन अग्निष्टोमादिक्रतुविशेषः एव ज्ञेयः।

ननु क्रतुशब्देन अग्निष्टोमादियागाः उच्यन्ते, तान् वेत्ति इति क्रतुवेदितरि ठक् प्रत्ययो भवेत् एव; परं तान् अधीते इत्यर्थे कथम् प्रत्ययो भवेत्? ग्रन्थस्य एव

अध्ययनम् सम्भवेत्—अक्षरग्रहणात्मकत्वात् अध्ययनस्य—न पुनः क्रतोरित्यपेक्षायां कथयति—"तेभ्यः" इत्यादि। क्रतुशब्दस्य मुख्यार्थः गौणार्थश्च इति द्विविधोऽर्थः दृश्यते। यागः एव क्रतुशब्दस्य मुख्योऽर्थः, यागप्रतिपादकग्रन्थः एव क्रतुशब्दस्य गौणार्थः। यदातु मुख्यार्थे क्रतुशब्दः ग्राह्योभवेत् तदा "तद्वेत्ति" इति एतस्मिन्नर्थे क्रतुवेदितरि गम्यमाने प्रत्ययो भवेत्, यदा गौणार्थ एव क्रतुशब्दस्य अभिप्रेतस्तदा तु "तदधीते" इति एतस्मिन्नर्थे क्रतुप्रतिपादक-ग्रन्थस्य अधेतरि गम्यमाने प्रत्ययः स्यात्। अग्निष्टोमः नाम कश्चित् क्रतुः। तम् वेत्ति इति ठक् आग्निष्टोमिकः। एवम् अग्निष्टोमः नाम कश्चित् अग्निष्टोम—क्रतुप्रतिपादकग्रन्थविशेषः। तम् अधीते इति ठक् आग्निष्टोमिकः। वाजपेयः नाम कश्चित् क्रतुविशेषः। तं वेत्ति इति ठक् वाजपेयिकः। एवं वाजपेयः नाम कश्चित् वाजपेयक्रतुप्रतिपादकः ग्रन्थविशेषः। तम् अधीते इति ठक् वाजपेयिकः। उक्थं सामविशेषः। उक्थशब्दः सामसुएव मुख्यः। अग्निष्टोमस्तोत्रात्परं यानि सामानि गीयन्ते तान्येव उक्थानि उच्यन्ते। सामलक्षणम् औक्थिक्यमिति नाम ग्रन्थः उक्थशब्दस्य गौणार्थः। अतएव उक्तं दीक्षितेन "तल्लक्षणपरो ग्रन्थविशेषो औक्थिक्यम् इत्यादि विशिष्टे ग्रन्थे लक्षणया गौण्या वृत्त्या उकथम् उकथशब्दः।" उक्थशब्दः गौणार्थे तु सामलक्षणपरम् औक्थिक्यनामानं ग्रन्थं बोधयतीति निष्कर्षः। मुख्यार्थे प्रयुक्तः (सोमसु प्रसिद्ध इत्यर्थः) उक्थशब्दः ठक प्रत्ययं न गृह्णाति नवा अण् प्रत्ययम्। गौणार्थे प्रयुक्तः (औकथिक्यमिति ग्रन्थे प्रसिद्धः) उकथशब्दस्तु ठकप्रत्ययम् गृह्णाति। उकथम् वेत्ति अधीते वा ठक औक्थिकः। उक्थम् वेत्ति अधीते वा इत्यस्य औकथिक्यम् इति ख्यातम् सामलक्षणं प्रातिशाख्यग्रन्थम् वेत्ति अधीते वा इत्येव अर्थः बोद्धव्यः। औकथिक्यमिति शब्दात् तु न कश्चित प्रत्ययो भवतिअनभिधानात्। उक्थादिर्यथा—उक्थ, यज्ञ, लोकायत, न्याय, न्यास, तर्क, वृत्ति इत्यादि। न्यायम् वेत्ति अधीते वा ठक। ठकि ऐचः आगमः = नैयायिकः। वृत्तिम् अधीते वेत्ति वा ठक ; ठकि आदि स्वरवृद्धिः। "उरण् र परः"। वार्त्तिकः। लोकायतम् वेत्ति अधीते वा लौकायतिकः। लोकायतम् चार्व्वाकप्रणीत—नास्तिक्यप्रतिपादकदर्शनशास्त्रविशेषः। तर्कम् वेत्ति अधीते वा तार्किकः। तर्कम्—न्यायशास्त्रम्। यज्ञं वेत्ति अधीते वा याज्ञिकः। न्यायं वेत्ति

अधीते वा नैयासिकः। न्यासस्तु काशिकावृत्ते व्याख्यानग्रन्थविशेषः जिनेन्द्रबुद्धि-विरचितः। तथाहि शिशुपालवधे—

अनुत्सूत्र पदन्यासा सद्वृत्तिः सन्निबन्धना
शब्दविद्येव नो भाति राजनीतिरपस्पशा।

सूत्रान्तात्—यथा संग्रहसूत्रम् (संग्रहाख्यं सूत्रम् इत्यर्थः) वेत्ति अधीते वा इति ठक सांग्रहसूत्रिकः। वार्त्तिकसूत्र वेत्ति अधीते वा ठक इति वार्त्तिक-सूत्रिकः। "सूत्रान्तात्" इत्यादि। सूत्रान्तात ठक इष्यते, परम् कल्पसूत्रात ठक न स्यात अपि तु अण एव। कल्पसूत्रम् वेत्ति अधीते वा अण्=काल्पसूत्रः। "विद्या"—इत्यादि, येषां शब्दानाम् अन्ते, विद्या इति, लक्षणमिति, कल्प इति वा वर्त्तते, तेषाम् तद्वेत्ति तदधीते च एतयोरर्थयोः ठक् स्यात्। विद्या—वायसविद्यां वेत्ति अधीते वा ठक=वायसविद्यिक। सर्पविद्याम् अधीते वेत्ति वा ठक् सार्पविद्यिकः। धनुर्विद्यां वेत्ति अधीते वा ठक धानुर्विद्यिकः।

ननु तर्हि चातुर्वैद्य इति कथं सिध्यति? उच्यते चतुर्विद्यायां कुशल इति एतस्मिन् अर्थे "कृत लब्धक्रीतकुशलाः" (४।३।३८) इति सूत्रबलात अण प्रत्ययेनैव—इति पाणिनीयभाषावृत्तिकाराणाम् आशयः। चतुरो वेदानधीते चतुर्वेदः स एव चातुर्वैद्यः इत्यादि तु अग्रे द्रष्टव्यम्।

"अङ्ग"—इत्यादि। अङ्गविद्या, क्षत्रविद्या, धर्म्मविद्या, त्रिविद्या इति एतेभ्यः शब्देभ्यः ठक न स्यात अपि अण एव। अङ्गविद्याम् अधीते वेत्ति वा आङ्गविद्यः। अङ्गविद्या यथा—शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिश्च। क्षत्रविद्यां वेत्ति अधीते वा क्षात्रविद्यः। क्षत्रविद्या धनुर्वेदः। धर्म्म विद्याम् अधीते वेत्ति वा धार्मविद्यः। धर्मविद्या—मन्वादि स्मृतिशास्त्रम्। त्रिविधा विद्या इति त्रिविद्या—शाक पार्थिवादित्वात् समासः। त्रिविद्याम् अधीते वेत्ति वा इति त्रैविद्यः। त्रिविद्या—वेदत्रयम्। उक्तं चश्रीमद्भगवद्गीतायाम्—"त्रैविद्याः माम् सोमपा पूतपापा" इति। "तिस्रः विद्या स्त्रिविद्या इति कर्म्मधारयः न स्यात्—"दिक्संख्ये संज्ञायाम्" इति संज्ञायामेव नियमात्; नापि तिस्रः विद्या अधीते वेद वेति तद्धितार्थे द्विगुः; तथा सति

तद्धितस्य द्विगुनिमित्ततया "द्विगोर्लुगनपत्ये" इति लुगापत्तेः। तिसृणां विद्यानां समाहार इति द्विगुरप्यत्र निर्बाध एव"—इति बालमनोरमा। अत्र मनोरमाकारेण द्विगुविधानम् प्रामादिकं मन्यते—यतः द्विगौकृते त्रिविद्यम् इति नपुंसकान्तं पदम् भवितुमर्हति—"स नपुंसकम्" (२।४।१७) इति सूत्रबलात्। "आवन्तो वा" (१५५७) इति वार्त्तिकसूत्रेण स्त्रियां प्रामायां त्रिविद्यी इति वा भवेत्, न कदापि त्रिविद्या इति सुधिभिर्विभाव्यम्। संवर्गविद्याशब्दाच्च अण् इति काशिका। संवर्ग-विद्याम् अधीते वेत्ति वा ; संवर्गविद्या तु छान्दोग्योपनिषत्प्रोक्तः ब्रह्मविद्याविशेषः। "आख्यान"—इत्यादि—आख्यानवाचिशब्देभ्यः, आख्यायिकावाचिशब्देभ्यश्च तथा इतिहासशब्दात् पुराणशब्दाच्च तद्वेत्ति तदधीते वेति अर्थयोः ठक् स्यात्। आख्यानम् कथाप्रबन्धः। साहित्यदर्पणकृता श्रीमता विश्वनाथेन गद्यकाव्यं द्विधा व्यवस्थापितम्—आख्यायिका कथाचैव। अत्र आख्यानशब्देन कथा एव लक्ष्यते। आख्यानस्य उदाहरणम्—यवक्रीतम् अधिकृत्य कृतम् आख्यानम् उपचारात् यवक्रीतम् एव कथ्यते। यवक्रीतम् वेत्ति अधीते वा ठक् यावक्रीतिकः। प्रियङ्गुम् अधिकृत्य विरचितम् आख्यानम् उपचारात् प्रियङ्गु एव उच्यते। प्रियङ्गुम् वेत्ति अधीते वा प्रैयङ्गविकः। आख्यायिकायाः उदाहरणम्—वासवदत्ताम् अधिकृत्य कृता आख्यायिका वासवदत्ता। "अधिकृत्य कृते ग्रन्थे" (४।३।८७) इत्यर्थे "वृद्धाच्छः" (४।२।११४)। ततः छ प्रत्ययस्य —"लुबाख्यायिकाभ्यो बहुलम्" इति लुप्। तथा सति वासवदत्ता इति स्थितम्। वासवदत्ताम् अधीते वेद वा ठक् वासवदत्तिकः। वासवदत्ताम् अधिकृत्य ग्रन्थद्वयं वर्त्तते। एका सुबन्धुकृता वासवदत्तेति आख्यायिका। अपरं च भासविरचितम् स्वप्नवासवदत्तमिति नाटकम्। सुमनोत्तराम् अधिकृत्य रचिता आख्यायिका सुमनोत्तरा। अत्रापि प्रत्ययस्य लुप्। सुमनोत्तराम् अधीते वेत्ति वा ठक् सौमनोत्तरिकः। इतिहासं वेत्ति अधीते वा ठक् ऐतिहासिकः "इतिह" (इति) आस्ते अत्र इति इतिह + आस् + घञ् = इतिहासः। इतिहासः पुरावृत्तम्। पुराणम् वेत्ति अधीते वा ठक् पौराणिकः। तथाहि रामायणे-"पौराणिकान् शब्दविदो ये वृद्धाश्च द्विजातय" इति। "सर्गश्च प्रतिसर्गश्च वंश मन्वन्तराणि च। वंश्यानुचरितं चैव पुराणं पञ्च लक्षणम्।" महापुराणं तु दशलक्षणम्—उक्तं च श्रीमद्भागवते—"अत्र सर्गोविसर्गश्च-

स्थानपोषणमूत्वयः"—इति ॥ "सर्व्वादेः"—इत्यादि = येषां शब्दानाम् अग्रे "सर्व्व" इति विद्यते, बहुव्रीहिसमासनिष्पन्नः "स" इति वा अस्ति, तेभ्यः विहितस्य अण् प्रत्ययस्य लुक् स्यात्। सर्व्वे वेदा इति सर्व्ववेदाः। सर्व्ववेदान् अधीते इति अण्। प्रत्ययस्य अनेन लुक्, लुकि सति आदिस्वरस्य वृद्ध्यभावः—तेन सर्ववेदः इति पदम्। सर्वतन्त्रान् अधीते वेत्ति वेति अण् प्रत्ययस्य लुक् सर्वतन्त्रः। वार्त्तिकेण सह विद्यमानः यः सः इति सवार्त्तिकः (बहुव्रीहिः)। "वोपसर्जनस्य (६।३।८२) इति सहस्य सभावः। सवार्त्तिकम् सूत्रम् अधीते इति अण्। प्रत्ययस्य लुक्। सवार्त्तिकः। एवं ससंग्रहम् सूत्रम् अधीते इति ससंग्रहः। द्वितन्त्रः इति—द्वे तन्त्रे अधीते वेत्ति वा इति अण्। "द्विगोर्लुगनपत्ये (४।१।८८) इति तद्धितार्थे द्विगुनिमित्तत्वात् अणो लुक्। तथा सति आदिस्वरस्य वृद्ध्यभावः—तेन द्वितन्त्रः इतिरूपम्। एवं द्वौ वेदौ वेत्ति अधीते वा इति अण्। प्रत्ययस्य लुक्—द्विवेदः। पञ्चकल्पान् अधीते वेत्ति वा पञ्चकल्पः। कल्पः कल्पसूत्रम्। पञ्च व्याकरणानि वेत्ति अधीते वा पञ्चव्याकरणः।

"इकन्—" इत्यादि। प्रत्ययः स्यात्। पदशब्दः उत्तरपदं यस्य स पदोत्तरपदः। येषां पदानाम् अन्ते "पद" इति वर्त्तते तेभ्यः इकन् प्रत्ययः स्यात्। पूर्वपदम् वेत्ति अधीते वा पूर्वपदिकः, उत्तरपदम् वेत्ति अधीते वा उत्तरपदिकः। भाषावृत्तिकारः पुरुषोत्तमदेवस्तु वार्त्तिकमिदम् एवम् व्याचष्टे—पदोत्तरपदात् इकन् प्रत्ययः। पदोत्तरपदम् वेत्ति अधीते वा पदोत्तरपदिकः। "शतषष्टेः"—इत्यादि—शत शब्दात् षष्टिशब्दात् च परो यः पथिन्शब्दः तस्मात् तद्वेत्ति अधीते वा इति एतयोरर्थयोः षिकन् प्रत्ययः स्यात्। शतपथं नाम वाजसनेयिब्राह्मणम्। यजुर्वेदस्य ब्राह्मणविशेषः शतपथब्राह्मणम् इत्यर्थः। शतपथम् वेत्ति अधीते वा शतपथिकः। षित्वात् स्त्रियाम् ङीष् शतपथिकी। षष्टिपथम् वेत्ति अधीते वा षष्टिपथिकः। स्त्रियां षष्टिपथिकी। काशिका मते अत्र अणपि इष्यते—तेन शातपथः, षाष्टिपथश्च। "अनुसूलक्ष्यलक्षणे च। अनुसूर्नाम ग्रन्थः। तम् वेत्ति अधीते वा इति ठक् आनुसूकः एवं लाक्षिकः। लाक्षणिकः, '—इति काशिका।

१२७१। **क्रमादिभ्यो वुन्** ॥ ४।२।६१ ॥

दी—। क्रमकः। क्रम, पद, शिक्षा, मीमांसा इति क्रमादिः।

The suffix वुन् is attached to words falling under the category of क्रमादि list, to denote the person who learns or studies the subject, referred to by the self-same words ; क्रम, पद, शिक्षा and मीमांसा form the क्रमादि class.

मित—। तद्वेत्ति तदधीते इति एतयोरर्थयोः क्रमादिभ्यः वुन् प्रत्ययः स्यात्। वुन् स्थाने ककारः। क्रमादि यथा-क्रम पद शिक्षा मीमांसा च। क्रमं वेत्ति अधीते वा क्रमकः। पदम् वेत्ति अधीते वा पदकः। शिक्षां वेत्ति अधीते वा शिक्षकः। मीमांसां वेत्ति अधीते वा मीमांसकः। शिक्षा—वेदाङ्गविशेषः। वर्णानाम् उच्चारणादिकम् अधिकृत्य रचितः वेदाङ्गः शिक्षा, मीमांसा जैमिनीयं दर्शनम्। अयं वुन् प्रत्ययः अणोऽपवादः। काशिकाकारस्तु सामन् इत्यपि, भाषावृत्तिकारस्तु उपनिषत् इति च क्रमादि गणे पठतः। सामानि वेत्ति वा सामकः। उपनिषदम् वेत्ति अधीते वा उपनिषत्कः।

## १२७२। अनुब्राह्मणादिनिः॥ ४।२।६२

दी—। तदधीते तद्वेद इत्यर्थे। ब्राह्मणसदृशो ग्रन्थोनुब्राह्मणम्, तदधीते अनुब्राह्मणी। मत्वर्थीयेनैव सिद्धे अण् बाधनार्थमिदम्।

The suffix इनि is attached to the word अनुब्राह्मण to denote the person who knows or studies the subject, referred to by the word,that takes the suffix. (Rest easy),

मित—। तदधीते तद्वेद इति एतयोरर्थयोः अनुब्राह्मणशब्दात् इनि प्रत्ययः स्यात्। इनि प्रत्ययस्य अन्तिम इकारः इत्—उच्चारणार्थं एव। तथा सति नकारस्य उपदेशे अन्त्यत्वाभावात् न तस्य इत्संज्ञा। ब्राह्मणसदृशो ग्रन्थविशेषः अनुब्राह्मण इत्याख्यायते। तम् अधीते वेत्ति वा अनुब्राह्मणी। द्विवचने—अनुब्राह्मणिनौ, बहुवचने अनुब्राह्मणिनः।

ननु "अत इनिठनौ" (५।२।११५) इति मतुप् प्रत्ययार्थवाचकेन इनिप्रत्ययेन एव इष्टसिद्धौ किमर्थम् अस्य सूत्रस्य विधानम्?—इति समाधत्ते—"अण् बाधनार्थमिदम्"। इनिप्रत्ययेन अत्र ज्ञाप्यते—यत् अनुब्राह्मणशब्दात् तद्वेत्ति तदधीते इति एतयोरर्थयोः अण् प्रत्ययः कदापि न स्यात्। अनभिधानात् अनुब्राह्मणशब्दात् ठन् न भवतीति काशिका।

१२७२। **वसन्तादिभ्यष्ठक् ॥ ४।२।६३।**

**टी—। वासन्तिकः। अथर्वाणम् अधीते आथर्वणिकः, "दाण्डिनायन—" (सू ११४५) इति सूत्रे निपातनाट्टिलोपो न।**

The suffix ठक् it attached to the word वसन्त and some other words forming the वसन्तादि class ; to imply one who knows or studies the subject, mentioned by the said words. No टिलोप in आथर्वणिक ( see Tika )।

मित—। तद्वेत्ति तदधीते इति एतयोरर्थयो वसन्त इत्येवमादिभ्यः शब्देभ्यः ठक् प्रत्ययः स्यात्। अणोरपवादः। वसन्तवर्णनाम् अधिकृत्य विरचितो ग्रन्थः वसन्तः। तमधीते वेत्ति वा वासन्तिकः। वसन्तादिर्यथा—वसन्त, वर्षा, शरत्, हेमन्त, शिशिर। प्रथम, गुण, चरम, अनुगुण, अपर्वन्, अथर्वन्।

अथर्वा इति कश्चित् ऋषिः। तेन (अथर्वणा) प्रोक्तः वेदः लक्षणावृत्त्या अथर्वा उच्यते। अथर्वाणम् अधीते वेत्ति वा आथर्वणिकः। ननु 'आथर्वणिकः' इत्यत्र "नस्तद्धिते" (६।४।१४४) इति टिलोपः कथं न भवतीति समाधत्ते?—"दाण्डिनायन—हास्तिनायनाथर्वणिक जैह्माशिनेय—वाशिनायनिभ्रौणहत्या धैवत्यसारवैक्ष्वाकमैत्रेय-हिरण्मयानि ॥" (६।४।१७४) इति सूत्रे निपातनात् न टिलोपः। आथर्वणिकः इत्यत्र वकारात् अकारस्य लोपस्तु "न संयोगाद्वमन्तात्" (६।४।१३७) इति न भवति। वर्षावर्णनपरो ग्रन्थः वर्षा। वर्षाम् अधीते वेत्ति वा वार्षिकः।

१२७४। **प्रोक्ताल्लुक् ॥४।२।६४॥**

**टी—। प्रोक्तार्थकप्रत्ययात् परस्याध्येतृ-वेदितृप्रत्ययस्य लुक्**

स्यात्। पणनं पणः। 'घञर्थे कविधानम्' इति कः। सोऽस्यास्तीति पणी। तस्य गोत्रापत्यं पाणिनः।

Suffixes that are used to imply the knower or the learner elide, when attached to words, themselves formed with suffixes used to denote something dictated by another.

मित—। अनेन प्रोक्तम् इति एतस्मिन्नर्थे ये प्रत्यया विधीयन्ते, तैर्निष्पन्नेभ्यः शब्देभ्यः "तद्वेत्ति तदधीते" इति एतयोरर्थयो र्विहिताः प्रत्ययाः लुप्यन्ते। पणनं पणः [पण व्यवहारे स्तुतौ च इति धातुः। तस्मात् घञर्थे क-प्रत्यय-विधानं तेन पणः इति पदम्। तस्यार्थस्तु पणनं स्तुतिरित्यर्थः। घञि सति "हलश्च" (३।३।१२१) इति उपधावृद्धौ पाणः इति स्यात्—अतः घञर्थे क प्रत्ययविधानम्]। सोऽस्यास्तीति "अत इनि ठनौ" (५।२।११५) मतुप्—प्रत्ययवाचकः इनि प्रत्ययस्तेन पणिन् इति। प्रथमैकवचने पणी। तस्य पणिनः गोत्रापत्यम् इति अण्=पाणिनः इति रूपम्।

ननु अत्र विहितस्य अण् प्रत्ययस्य अपत्यप्रत्ययानामन्तर्भूतत्वे सति, अस्मिन् अणि परे "इनण्यनपत्ये" (६।४।१६४) इति प्रकृतिभावस्य अभावात् टिलोपो भवतु—इति स न भवति इति ज्ञापयितुं सूत्रयति—

## १२७५। गाथिविदथिकेशिगणिपणिनश्च ॥ ६।४।१६५

टी—। एते अणि प्रकृत्याः स्युः। इति टिलोपोन। ततो यूनि अपत्ये इञ्। पाणिनिः।

The words गाथिन् विदथिन्, केशिन्, गणिन्, and पणिन् suffer no change, when before the suffix अण्, forming a member of the अपत्यार्थ-प्रत्यय class.

मित—। गाथिन्, विदथिन्, केशिन्, गणिन्, पणिन् च इत्येतानि पदानि अपत्यार्थे विहिते अण् प्रत्यये परे प्रकृतिभावम् आपद्यन्ते। "मूलप्रकृतिः पणी। तदपेक्षया चतुर्थे अपत्ये यूनि विवक्षिते पणिन् शब्दात् गोत्रापत्ये विहितेन अण् प्रत्ययेन सिद्धात् ततः इञि पाणिनिः इति रूपम्।

अत इञः लुकम् आशङ्कितुम् आह—

१२७६ । ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥२।४।५८॥

दी—। ण्यप्रत्ययान्तात् क्षत्रियगोत्रप्रत्ययान्तात् ऋष्यभिधायिनो गोत्रप्रत्ययान्तात् ञितश्च परयो युवाभिधायिनोरणिञोर्लुक् स्यात्। कौरव्यः पिता। कौरव्यः पुत्रः। श्वाफल्कः पिता। श्वाफल्कः पुत्रः। वासिष्टः पिता। वासिष्टः पुत्रः। तैकायनिः पिता। तैकायनिः पुत्रः। एभ्यः किम्? शिवाद्यण्। कौहड़ः पिता। अत इञ्=कौहड़िः पुत्रः। यूनि किम्? वामरथ्यस्यच्छात्राः वामरथाः। इत्यणो लुक्तु न भवति। आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात्।

To imply a technical युवन् the suffixes अण् and इञ् disappear, when attached to words, themselves formed with the suffix ण्य or with any other suffix used to denote क्षत्रियगोत्र or ऋषिगोत्र or with suffixes, out of which the letter ञ elide. (Rest easy).

मित—। ये खलु ण्य-प्रत्ययान्तशब्दास्तेभ्यस्तथा क्षत्रियगोत्रम् ऋषि-गोत्रम् च बोधयितुं विहिता ये प्रत्ययास्तदन्तेभ्यः एवम् ञकारेत्—प्रत्ययान्तशब्देभ्यश्च युवानं द्योतयितुम् विहितस्य अण् प्रत्ययस्य इञ् प्रत्ययस्य च लुक् स्यात्। अत्र ण्यादयः सर्वे गोत्रप्रत्यया एव गृह्यन्ते। कुरोर्गोत्रापत्यं पुमान् कौरव्यः—"कुर्वादिभ्यो ण्यः" (४।१।१५१) इति सूत्रेण ण्यप्रत्ययः। कौरव्यस्य अपत्यम् युवा इत्यर्थे "अत इञ्" (४।१।९५) इति इञ् प्रत्ययः। इञ् प्रत्ययस्य अनेन सूत्रेण लुक्—कौरव्यः पुत्रः (युवा)। अयम् ण्य-प्रत्ययस्य उदाहरणम्। क्षत्रिय-गोत्रप्रत्ययस्य उदाहरणम् यथा—श्वफल्कस्य राज्ञः (क्षत्रियस्य) गोत्रापत्यं पुमान् श्वाफल्कः। "ऋष्यन्धकवृष्णिकुरुभ्यश्च" (४।१।११४) इति अण् प्रत्ययः। ततः श्वाफल्कस्य अपत्यं युवा इत्यर्थे "अत इञ्" (४।१।९५) इति इञ् प्रत्ययः। इञ् प्रत्ययस्य अनेन सूत्रेण लुक् तथा सति श्वाफल्कः पुत्रः (युवा) इति सिध्यति। ऋषिगोत्रप्रत्ययस्य उदाहरणम्

यथा—वशिष्ठस्य गोत्रापत्यं पुमान् वाशिष्ठः। "ऋष्यन्धक वृष्णिकुरुभ्यश्च" ( ४।१।११४ ) इति अण् प्रत्ययः। वासिष्ठस्य अपत्यं युवा इति एतस्मिन्नर्थे "अत इञ्" ( ४।१।९५ ) इति इञ्। तस्य इञ् प्रत्ययस्य अनेन लुक् इति वाशिष्ठः पुत्रः ( युवा )। ञकारेत् प्रत्ययस्य उदाहरणम् यथा—तिकस्य गोत्रापत्यं पुमान् इति तैकायनिः। "तिकादिभ्यः फिञ्" ( ४।१।१५४ ) इति फिञ् प्रत्ययः। फिञ् तु ञकारेत्-प्रत्ययः। तैकायनेरपत्यं युवा इत्यर्थे "तस्यापत्यम्" ( ४।१।९२ ) इति अण् प्रत्ययः। अस्य अण् प्रत्ययस्य अनेन लुक् ततः तैकायनिः पुत्रः ( युवा ) इति। एभ्य एव प्रत्ययान्तेभ्यः अणः इञश्च लुक् स्यात् नान्येभ्यः। एभ्य एव इति किम्? कुहड़स्य अपत्यं पुमान् इति कौहड़ः। "शिवादिभ्योऽण्" ( ४।१।११२ ) इति अण् प्रत्ययः। तस्य अपत्यं पुमान् इति "अत इञ्" ( ४।१।९५ ) इति इञ् प्रत्ययस्तेन कौहड़िः पुत्रः। इञ् प्रत्ययस्य लुक् न भवति कौहड़शब्दस्य गोत्रापत्यप्रत्ययसिद्धत्वाभावात्। "यूनि" इति किम्? वामरथस्य गोत्रापत्यं पुमान् वामरथ्यः। "कुर्वादिभ्यो ण्यः" (४।१।१५१) इति ण्य-प्रत्ययः, वामरथ्यस्य छात्राः इति एतस्मिन्नर्थे "कण्वादिभ्यो गोत्रे" (४।२।१११) इति अण् प्रत्यय। अयं प्रत्ययः छ-प्रत्ययस्य अपवादः। अस्य अण् प्रत्ययस्य अनेन सूत्रेण लुक् न भवति—यतोऽयम् न युवाभिधायी प्रत्ययः।

"इत्यणो लुक्—" इत्यादि। इति "ण्यक्षत्रियार्षञितो यूनि लुगणिञोः" इति सूत्रेण पाणिनिरित्यत्र इञ् प्रत्ययस्य लुक् न भवति। कथम् लुक् न भवति पाणिनः इति शब्दस्य ऋषिगोत्रप्रत्ययेन सिद्धत्वात् इति चेत्—

समाधत्ते—"आर्षं ग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात्।" आर्ष ग्रहणेन ऋषिगोत्रग्रहणेन। "ण्य क्षत्रिय"—इत्यादि सूत्रे ऋषिवाचकस्य रूढस्यैव ग्रहणम्। पणिन् शब्दः तदपत्यं पाणिनशब्दश्च न ऋषिवाचकौ अतः प्रतिपदे अस्य उक्ति नं दृश्यते। येषाम् ऋषिवाचकशब्दानां पदे पदे ग्रहणम् दृश्यते तेभ्य एव विहितो यो अण् प्रत्ययः, तदन्तस्यैव अस्मिन् सूत्रे ग्रहणम्। तेभ्यः एव विहितस्य अणः इञश्च लुक् स्यात्। अत पाणिनि शब्दस्य इञ् प्रत्ययस्य न लुक्। पाणिनिना प्रोक्तम् इति पाणिनीयम्। "तेन प्रोक्तम्" ( ४।३।१०१ ) इति अण् प्रत्ययं बाधित्वा

"वृद्धाच्छः" ( ४।२।११४ ) इति छ प्रत्ययः। तस्य ईयादेशत्वेन पाणिनीयम् इति पदं प्राप्तम्।

ननु पाणिनि शब्दात् तद्धिते विवक्षिते "यूनि लुक्" ( ४।१।९० ) इति इञो लुकि सत्यपि "प्रत्ययलोपे प्रत्ययलक्षणम्" इति नियममाश्रित्य छप्रत्ययस्यापवादः अण् प्रत्ययः स्यात् इति शङ्कायामाह—इञश्च ( ४।२।११२ ) इति सूत्रेण विहितोऽण् प्रत्ययो न स्यात्। गोत्रापत्यार्थे विहितो यः इञ्, तदन्तादेव अण् स्यात् इति "इञश्च" ( ४।२।११२ ) इति सूत्रं वक्ष्यति। अत्र पाणिनि शब्दे इञ् प्रत्ययान्त न गोत्रापत्य-विहितः अपितु युवापत्ये विहितः ["अत इञ्" ( ४।१।९५ ) इति सूत्रेण]। अतएव पाणिनि शब्दे इञः गोत्रापत्ये विहितत्वाभावात् "इञश्च" ( ४।२।११२ ) इति सूत्रेण अण् न स्यात् इति सरलार्थः।

पाणिनीयम् अधीतेवेत्ति वा इति पणिनीयशब्दात् "तदधीते तद्वेद" ( ४।२।५९ ) इति अण्। तस्य अणः "प्रोक्ताल्लुक्" ( ४।२।६४ ) इति लुक्; पाणिनीयः। पाणिनीयम्छात्रः।

ननु असत्यपि "तदधीते तद्वेद" इति विहितस्य अणः प्रोक्ताल्लुक् इति लुकि पाणिनीयशब्दः सिद्धः स्यात् किमनेन इति शङ्कायाम् आह—"स्वरे स्त्रियां च विशेषः।"

असति "तदधीते तद्वेद" इति अर्थे विहितस्य अणः लुकि प्रत्ययस्वरेण अन्तोदात्तत्वं स्त्रियां च ङीप् स्यात्—तत् माभूदिति अणः लुक्। तथासति ऽप्रत्ययस्य स्थाने च ईयादेशस्तस्य ईकारः प्रत्ययस्वरेण उदात्तः, स्त्रियां टाप् च स्यात्। तेन पाणिनीया। पाणिनीया ब्राह्मणी। आपिशलिना प्रोक्तम् इति "इञश्च" ( ४।२।११२ ) इति सूत्रेण अण्। आपिशलम् अधीते वेत्ति वा आपिशलः, "प्रोक्ताल्लुक्" ( ४।२।६४ ) इति अणः लुक्। आपिशला ब्राह्मणी।

## १२७७। सूत्राच्च कोपधात् ।४।२।६५॥

**दी—। सूत्रवाचिनः ककारोपधादध्येतृप्रत्ययस्य लुक् स्यात्। अप्रोक्तार्थं आरम्भः। अष्टावध्यायाः परिमाणमस्य**

अष्टकम् पाणिनेः सूत्रम्। तदधीयते विदन्ति वा अष्टकाः॥ 'संख्याप्रकृतिकादिति वाच्यम्'। नेह। कलापकमधीते कालापकः। माहावार्तिकः।

The suffixes used to denote the person that knows or learns, elide when coming after words—which are expressive of sutras and have a कवर्ग as their penultimate or last but one letter. The above rule holds good with regard to a ककारोपध संख्यावाचक word only etc.

- मित—। तदधीते तद्वेत्ति इति एतयोरर्थयोर्विहितस्य प्रत्ययस्य ककारोपधात् सूत्रवाचिशब्दात् परस्य लुक् स्यात्। अष्टौ अध्यायाः परिमाणमस्य इति अष्टकम्। "तदस्य परिमाणम्" (५।१।५७) इति परिमाणाधिकारे "संख्यायाःसंज्ञासङ्घसूत्राध्ययनेषु" (५।१।५८) इति सूत्रार्थे प्रत्ययविधानम्। ततः "संख्याया अतिशदन्तायाः कन्" (५।१।२२) इति कन् प्रत्ययः; तेन अष्टकम् इति रूपम्। अष्टकम् पाणिनेः सूत्रम्। अष्टकं पाणिनिसूत्रम् विदन्ति अधीयते वा इति अष्टकाः पाणिनीयाः। एवं दशकं विदन्ति अधीयते वा दशका वैयाघ्रपदीयाः। द्वादशकम् विदन्ति अधीयते वा द्वादशकाः मीमांसकाः। त्रिकम् विदन्ति अधीयते वा त्रिकाः काशकृत्स्नाः।

ननु "प्रोक्ताल्लुक्" (४।२।६४) इति सूत्रेणैव लुकि सिद्धे सति किमर्थम् अस्य सूत्रस्य आरम्भ इति चेत्—कथयति। "अप्रोक्तार्थ" इति। अप्रोक्तार्थादपि प्रत्ययात् परस्य तदधीते तद्वेत्ति वेति एतयोरर्थयोर्विहितस्य प्रत्ययस्य लुक् स्यादिति ज्ञापनार्थम्।

"संख्येति"। संख्याप्रकृतिकात् एव ककारोपधात् सूत्रवाचिशब्दात् अध्येतृ-वेदितृ-प्रत्ययस्य लुक् स्यात्—नान्यस्मात् परस्य। पूर्ववत् उदाहरणनिचयेषु संख्याप्रकृतिकात् एव लुक् स्यात् इति प्रदर्शितम्। तदन्यत्र तु महावार्त्तिकम् नाम सूत्रम्। तदधीते वेत्ति वा इति अण् प्रत्ययः। माहावार्त्तिकः। महावार्त्तिकम्

६

इति पदस्य संख्याप्रकृतिकत्वाभावात् न अण् प्रत्ययस्य लुक्। कलापकम् नाम सूत्रम्। तद्वेत्ति अधीते वा इति अण् कालापकः। अस्यापि संख्याप्रकृतिकत्वाभावात् न अण् प्रत्ययस्य लुक्। "कोपधात्" इति किम्? चतुष्टयम् अधीते इति अण् चातुष्टयः। चतुष्टय इति पदस्य सूत्रवाचित्वे तथा संख्याप्रकृतिकत्वे अपि ककारोपधत्वाभावात् न "सूत्राच्चकोपधात्" इति सूत्रबलात् अण् प्रत्ययस्य लुक् स्यात्।

## १२७८। छन्दोब्राह्मणानि च तद्विषयाणि ॥ ४।२।६६ ॥

दी—। छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः। अध्येतृवेदितृ प्रत्ययं विना न प्रयोज्यानीत्यर्थः। कठेन प्रोक्तम् अधीयते कठाः। वैशम्पायनान्तेवासित्वात् णिनिः। तस्य 'कठचरकात्—' ( सू १४८७ ) इति लुक्। ततोऽण्। तस्य 'प्रोक्ताल्लुक्' ( १२७४ )।

Words expressive of chhandas [or chandas] (vedic poems ) and Brahmans ( vedic prose ) formed with suffixes, used to imply "तेनप्रोक्तम्" i. e. dictated by him ( some one ), must not be used except with the suffixes that are attached to denote the knower or the learner.

मित—। ऋक् सामन् यजुस् अथर्वन् इति च चत्वारो वेदाः। एषु प्रत्येकम् अपि चतुर्धा विभागं गच्छति। मन्त्रः, ब्राह्मणम्, आरण्यकम्, उपनिषत् इति। मन्त्राः छन्दांसि। तानि च देवतास्तुतिरूपाणि पद्यानि। ब्राह्मणानि मन्त्रार्थप्रतिपादनपराणि गद्यानि। तानि च विधिवाक्यानि अर्थवादवाक्यानि इति द्विधा विभज्यन्ते। ···छन्दांसि मन्त्राः, तथा ब्राह्मणानि विधिवाक्यरूपाणि गद्यानि वैदिकसाहित्यान्तर्भूतानि प्रोक्तप्रत्ययान्तानि तद्विषयानि "तद्वेत्ति तदधीते" वेति अध्येतृवेदितृ-प्रत्ययविषयाणि एव भवन्ति। मण्डूकप्लुतिगत्या "प्रोक्ताल्लुक" ( ४।२।६४ ) इति सूत्रात् 'प्रोक्तात्' इति अस्मिन् सूत्रे अनुवर्त्तते।

पाणिनीयाः—पाणिनिना प्रोक्तं व्याकरणम् पाणिनीयम्। एतत्तदध्येतारः वेदितारः वा इति यथा अध्येतृवेदितृप्रत्ययं विनापि प्रयुज्यन्ते तादृशम् माभूदिति नियमार्थमेव अस्य सूत्रस्य आरम्भः; तेन अध्येतृ वेदितृप्रत्ययं विना कदापि छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि न प्रयोक्तव्यानि। कठेन प्रोक्तम् इति-"कलापिवैशम्पायनान्तेवासिभ्यश्च" (४।३।१०४) इति णिनि प्रत्ययः। कठोपनिषत् तु यजुर्वेदान्तर्गता—; वैशम्पायन एव महर्षेः श्रीकृष्णद्वैपायनात् अधिगतवान्। अतः कठस्य मुनेः वैशम्पायनान्तेवासित्वं सिद्धम्; अयम् णिनिप्रत्ययान्त "तेन प्रोक्तम्" (४।३।१०१) इति विहितस्य अण् प्रत्ययस्य अपवादः। ततः "कठचरकाल्लुक्" (४।३।१०७) इति णिनि प्रत्ययस्य लुक्। तेन कठेन् प्रोक्तः वेदांश कठः इतिस्थितम्। ततः कठम् अधीयते विदन्ति वा इति "तदधीते तद्वेद" इति अण्। तस्य अण् प्रत्ययस्य लुक्—"प्रोक्ताल्लुक्" (४।२।६४) इति सूत्रबलात्, तेन कठाः इति।

अस्य इदं विश्लेषणम्—कठेन प्रोक्तम् अधीयते कठाः इत्येवं कठशब्दस्य लुप्तणिनीतिप्रोक्तप्रत्ययान्तस्य "तदधीते तद्वेद" इति विहितेन अध्येतृवेदितृप्रत्ययेन सहैव प्रयोगमर्हति न खलु अधेतृ वेदितृ प्रत्ययं वर्जयित्वा केवलप्रोक्तप्रत्ययान्तस्य इति भावः। तेन कठेन प्रोक्तः कठः इति प्रयोगो न भवति। कठेन प्रोक्तः कठः, तम् अधीयते विदन्ति इति कठाः इत्येव प्रयोगः साधुः। एवं पिप्पलादेन प्रोक्तम् अधीयते इति पैप्पलादाः। ब्राह्मणस्य उदाहरणं यथा—ताण्ड्येन प्रोक्तं ब्राह्मणम् अधीयते विदन्ति वा ताण्डिणः, ब्राह्मणशब्देन छन्दसाम् अनुगामीनि एव ब्राह्मणानि गृह्यन्ते, तदभावे—यथा याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि—न प्रत्ययोऽत्र, यतः याज्ञवल्क्यइति छन्दोनाम नास्ति, सूत्रस्थेन "च" शब्देन ज्ञाप्यते यत् केचन पुराणप्रोक्ताः कल्पाः सूत्राणि च प्रोक्त प्रत्ययान्तानि अधेतृवेदितृविषयानि स्युरिति, कल्पाः यथा कश्यपेन प्रोक्तम् अधीयते विदन्ति वा काश्यपिनः, सूत्रे—पराशरेण प्रोक्तम् अधीयते विदन्ति वा पाराशरिणः। छन्दो ब्राह्मणानि—इति किम्? पाणिनीयं व्याकरणम् इति प्राग्व्याख्यातम्।

# अथ चातुरर्थिकाः

१२७८ । तदस्मिन्नस्तीति देशे तन्नाम्नि । ४।२।६७ ॥

टी— । उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरः ।

The suffix अण् is attached to words to imply a country which derives its name from the said words due to it abounding with the things, denoted by them.

मित— । "तद्" इति प्रथमान्तात् शब्दात् "अस्मिन्" अस्तीति सप्तम्यर्थे अण् प्रत्ययः स्यात् ; तत् पादेन यत् बोध्यते, "तन्नाम्नि" तत्-संज्ञके "देशे" गम्यमाने सति, सूत्रे "अस्मिन्" इत्यतः परं यत् इति शब्दो वर्त्तते स तु प्रसिद्धदेश-ज्ञापनार्थमेव प्रयुक्तः, अयम् अण् प्रत्ययः मतुप् प्रत्ययस्य अपवादः, उदुम्बराः सन्ति अस्मिन् देशे इति औदुम्बरः देशः, कश्चित् प्रसिद्ध-देशविशेषः, एवं वल्वजाः सन्ति अस्मिन् देशे इति अण् वाल्वजः, पर्व्वताः सन्ति अस्मिन् देशे इति पार्व्वतः देशः ।

१२८० । तेन निर्वृत्तम् । ४।२।६८ ।

टी— । कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी ।

The suffix अण् is duly attached to words to imply a country which thus derives its name from the said words—due to its being called into existence ( or erected ) by them.

मित— । तेन इति तृतीयान्तात् शब्दात् निर्वृत्तम् इति एतस्मिन् अर्थे अण् प्रत्ययः स्यात्, येन निर्वृत्तम् तदाख्याया देशे गम्यमाने सति ; निर्वृत्तः स्थापितः रचितः इत्यर्थः, कुशाम्बेन निर्वृत्ता प्रतिष्ठिता पुरी इति अण् कौशाम्बी, एवं सहस्रेण निर्वृत्ता साहस्री परिखा इति काशिका-भाषावृत्तिकारौ ।

१२८१ । तस्य निवासः ॥४।२।६९ ॥

टी— । शिवीनां निवासो देशः शैवः ।

The suffix अण् is duly attached to words to imply a country which thus derives its name from the said words, due to its being the abode ( or—seat of residence ) of those-denoted by them.

मित—। निवसति अस्मिन् इति निवासः। स्वत्ववान् विषयः। निवासस्तु वसतिमात्रम् स्वत्वासत्वसाधारणम् इति विषय—निवासयोर्भेदः।

तस्य इति षष्ठ्यन्तात् शब्दात् निवास इति एतस्मिन्नर्थे अण् प्रत्ययः स्यात्, "तस्य" इत्यनेन यन्निर्दिश्यते तदाख्याया प्रसिद्धे देशे गम्यमाने सति।

शिवीनां निवासो देशः इति अण् शैवो देशः। उदिष्टानां निवासो देशः इत्यण् औदिष्टो देशः। ऋजुनावाम् निवासो देशः इति अण् आर्जनावो देशः।

१२८२। अदूरभवश्च ॥ ४।२।७० ॥

**टी—। विदिशाया अदूरभवं नगरम् वैदिशम्। चकारेण प्रागुक्तास्त्रयोऽर्थाः सन्निधाप्यन्ते, तेन वक्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति.**

The suffix अण् is attached to words to imply a country that, thus, derives its name from the said words due to its being in close proximity to them. By "च" in the sutra, other three senses said in the three prior sutras are taken together constituting चातुरर्थिकत्व here.

मित—। 'तस्य' इति पूर्व्वसूत्रात् तथा "देशे तन्नाम्नि" इति च अत्र अनुवर्त्तते। तस्य इति षष्ठ्यन्तात् शब्दात् "अदूरभवश्च" इति एतस्मिन् अर्थे अण् प्रत्ययः स्यात् "तन्नाम्नि देशे" गम्यमाने सति। अदूरभवः निकटवर्त्ती। विदिशायाः तन्नाम्न्याः नगर्याः अदूरभवम् नगरम् इति विदिशाशब्दात् अण्; तेन वैदिशम् नगरम्। पम्पायाः सरसः अदूरभवानि वनानि पाम्पानि। हिमवतः पर्व्वतस्य अदूरभवं नगरम् हैमवतम्।

ननु सूत्रस्थेन चकारेण किं द्योत्यते? उच्यते—चकारेण "तदस्मिन्नस्तीति, तेन

निर्वृत्तम् इति, "तस्य निवासः" इति प्रागुक्ताः त्रयोऽर्थाः अत्र आक्रियन्ते। तेन "अदूरभवश्च" इति एतम् गणयित्वा चत्वारोऽर्थाः, "शेषे"—(४।२।९२) इति सूत्रान्तं शेषाधिकारं यावत् अनुवर्त्तन्ते।—अनेनैव वक्ष्यमाणानां प्रत्ययानां चातुरर्थिकत्वं सिध्यति—येन "अथ चातुरर्थिका" इति शीर्षदेशस्था संज्ञा अन्वर्था जायते। चतुर्णां सूत्राणाम् अर्थविषये भवाः चातुरर्थिकाः। एतेषामेव चतुर्णां सूत्राणाम् अर्थे वक्ष्यमाणाः प्रत्ययाः विधीयन्ते, तेनहि ते चातुरर्थिकाः कथ्यन्ते इति भावः।

## १२८३। ओरञ्॥ ४।२।७१॥

## टी—। अणोऽपवादः। कक्षतु—काक्षतवम्। नद्यान्तु परत्वात् मतुप्। इक्षुमती।

Words ending in उकार take the suffix अञ् in the four aforesaid senses. This अञ् bars the suffix अण्। Words, which will denote नदी and will pass by the name नदी ( नद्याम् अभिधेयायाम् ) is to take the suffix मतुप् instead of अञ् by the rule "नद्यां मतुप"—due to its being पर (later) in the order of अष्टाध्यायी।

मित—। "उ" इत्यस्य पञ्चम्यां विभक्तौ "ओः" इतिरूपम्। अत्र पूर्व्वोक्तानां चतुर्णाम् सूत्राणाम् अनुवृत्तिः। उवर्णान्तात् प्रातिपदिकात् "तदस्मिन्नस्तीति देशे तन्नाम्नि" (४।२।६७), तेन निर्वृत्तमिति (४।२।६८), तस्यनिवासः (४।२।६९) इति, अदूरभवश्च इति (४।२।७०) चतुर्षु अर्थेषु अञ् प्रत्ययः स्यात्। अयम् अञ् प्रत्ययः अण् प्रत्ययस्य अपवादः। "सुवास्त्वादिभ्योऽण्" (४।२।७७) इति सूत्रात् प्राक् अञ् प्रत्ययस्य अधिकारो वर्त्तते। कक्षतुः अस्मिन् अस्ति इति काक्षतवम्। अरन्तु; तस्मात् अञ्—आरन्तवम्। कर्कटेलु—अञ् कार्कटेलवम्। कर्कटु—कार्कटवम्।

"नद्यां" नदी इति संज्ञाभाजाम् शब्दानाम् विषये अभिधेये सति मतुप् प्रत्ययः स्यात्—यथा इक्षुमती। कथम् अञ् प्रत्ययं बाधित्वा मतुप् प्रवर्त्तते? उत्तरं पठति—"परत्वात्"। पूर्व्वविधेः परविधि र्बलीयान्, अञ् पूर्व्वविधिः, मतुप् प्रत्ययस्तु परविधिस्तेन अञ् प्रत्ययं बाधित्वा मतुप् प्रवर्त्तते।

१२८४। मतोश्च बह्वजङ्गात् ॥ ४।२।७२ ॥

टी—। बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ्। नाण्। सैध्रकावतम्। बह्वच् इति किम्? आहिमतम्। अङ्गग्रहणं बह्वच् इति तद्विशेषणं यथा स्यात् मत्वन्तविशेषणं माभूत्।

The suffix अञ् is attached to words, themselves derived with the suffix मतुप् and are abounding with many (i.e. more than two) vowels. This अञ् supersedes अण्। For the rest see Tika.

मित—। मतोश्च इति। मतुप् इति अस्त्यर्थे विहितस्तद्धितप्रत्ययः। यः खलु शब्दः मतुप्—प्रत्ययान्तस्तथा बहुस्वरवर्णसनाथश्च स्यात्, तस्मात् चतुर्षु एव अर्थेषु अञ् प्रत्ययो भवेत्, न तु अण्। सिध्रकावान् अस्मिन् अस्तीति, अञ् सैध्रकावतम्। एवम् अत्र तेन निर्वृत्तम्, तस्य निवासः, अदूरभवश्च इत्यादयस्त्रयः अर्था अपि बोध्याः, तथाहि सिध्रकावता निर्वृत्तम्, सिध्रकावताम् निवासः, सिध्रकावतः अदूरभवश्च इति सैध्रकावतम्। एवं ऐषुकावत् नाम देशः, ऐषुकावतम्। बहुस्वरविशिष्टस्य एव मतुप्-प्रत्ययान्तस्य ग्रहणात् द्विस्वरविशिष्टस्य मतुप्प्रत्ययान्तस्य अञ् न स्यात्—यथा अहिमान् अस्मिन् अस्तीति आहिमतम्, अत्र अहिशब्दस्य द्विस्वरविशिष्टत्वात् न अञ् अपितु अण् एव, अत्रापि चत्वारः अर्थाः उन्नेयाः, एवं यावमतम्।

ननु अहिमान् इत्यत्र मतुप् प्रत्ययमपि संगृह्य बहुस्वरविशिष्टत्वम् एव दृश्यते तर्हि कथम् अस्य द्विस्वरसनाथत्वम् उररीकृतमिति समाधत्ते—

अङ्गग्रहणमिति, सूत्रे "बह्वजङ्गात्" इति अङ्गशब्दस्य उच्चारणं विद्यते, बह्वच् इति पदं तु अङ्गशब्दस्य एव विशेषणं, न तु मतुप्प्रत्ययान्तशब्दस्य विशेषणम्—तेन अयमेव अर्थः आयाति—बहुस्वरसनाथो यः शब्दस्तस्मात् विहितो मतुप् प्रत्ययः। तथा सति स शब्दः मतुप्—प्रत्ययान्तो भवति, ततः ईदृशस्य मतुप्प्रत्ययान्तस्य चतुर्षु अर्थेषु अञ् विधीयते। सिध्रका इति त्रिस्वर-विशिष्ट-शब्दस्य मतुप् तेन सिध्रकावान्—ततः अनेन अञ् प्रत्यये विहिते सैध्रकावतम्, अहिशब्दस्तु बहुस्वर-

विशिष्ट अपितु द्वि-स्वर-सनाथ एव, तस्मात् मतुप्—तेन अहिमान्, परम् अहिमान् इत्यन्तर्गतस्य अहि इति अङ्गस्य बहुस्वराभावात् अहिमान् इत्यस्मात् परम् चतुर्षु अर्थेषु अनेन अञ् न स्यात् अपि तु अण् एव ; तेन आहिमतम्, एवं मालावतां निवासः— इति मालावतम्, अत्रापि अञ् न, अपितु अण् एव ।

[ ननु अण्-प्रत्ययान्तस्य अञ्प्रत्ययान्तस्य च विभेदकरणे, का सार्थकता इति चेत्—स्वरे भेदत्व एव एतयोर्विभेदकरणे हेतुरिति मन्यामहे ] ॥

## १२८५ । बह्वचः कूपेषु ॥ ४।२।७३ ॥

## टी— । अणोऽपवादः । दीर्घवरत्रेण निवृत्तो दैर्घवरत्रः कूपः ।

The suffix अञ् is attached to words, containing more than two vowels, in any of the aforesaid four senses, to imply a well.

मित— । बहुस्वरविशिष्टात् प्रातिपदिकात् प्रागुक्तानाम् चतुर्णाम् मध्ये यस्मिन कस्मिन् अपि अर्थे अञ्प्रत्ययः स्यात् कूपे अभिधेये सति, अणोऽपवादः दीर्घवरत्र-नामा कश्चित् विप्रः, तेन दीर्घवरत्रेण निर्वृत्तः कूपः इति अञ् दैर्घवरत्रः कूपः, कपिलवरत्रेण निर्वृत्तः कूप इति अञ् कापिलवरत्रः कूपः, वृक्षमूलस्य अदूरभवः कूपः इति अञ् वार्क्षमूलः कूपः ।

## १२८६ । उदक् च विपाशः ॥४।२।७४॥

## टी— । विपाशः उत्तरे कूले ये कूपास्तेष्वञ् । अबह्वजर्थ आरम्भः । दत्तेन निवृत्तो दात्तः कूपः । उदक् किम् ? दक्षिणतः कूपेषु अण् एव ।

The words, which are expressive of the wells, that are lying on the northern bank of the river Vipasa ( Beas ) are derived with the suffix अञ् and not अण् ( the difference being shown or vindicated by the accent ), may they be of one, two or more vowels, in the four aforesaid senses. See Tika also.

मित—। विपाश् इति शकारान्तशब्दः, सिन्धुनदस्य काचित् शाखानदी पञ्चनदप्रदेशवाहिनी विपाश् इति संज्ञां भजते, तस्याः विपाशः नद्याः उदक् उत्तरे कूले ये कूपाः वर्त्तन्ते तेषु, अभिधेयेषु, चातुरर्थिकः अञ् प्रत्ययः स्यात्, न खलु अण्, अण् प्रत्ययस्तु पूर्व्वपश्चिमवाहिन्याः विपाशः दक्षिणे कूले ये कूपाः वर्त्तन्ते, तेषु अभिधेयेषु विधीयते, पूर्व्वसूत्रे बहुस्वरविशिष्टेभ्यः प्रातिपदिकेभ्यः कूपेषु अभिधेयेषु अञ् विहितः, अत्र विपाशः उत्तरे तटे स्थितानां बहुस्वरविशिष्टानाम् एक-द्विस्वरविशिष्टानां च अविशेषेण खलु अञ् व्यवस्थापित इति सूत्रस्य अस्य उपन्यासः। दत्तेन निर्वृत्तः कूपः इति अञ्—दात्तः कूपः। एवम् गुप्तेन निवृत्तः कूपः इति अञ् गौप्तः कूपः। एतौ विपाशः उत्तरतटस्थितौ कूपौ। उदक् इति किम्? विपाशतः दक्षिणतः ये कूपास्तेषु अभिधेयेषु प्रातिपदिकेभ्यः अण् एव स्यात्; यथा दत्तेन निवृत्तः कूपः इति अण् दात्तः कूपः।

ननु अण् प्रत्ययस्य तथा अञ् प्रत्ययस्य च कुत्र विशेषोऽवगम्यते इति चेत्—श्रूयताम्—स्वरे विशेषः। [ "महती सूक्ष्मेक्षिका वर्त्तते सूत्रकारस्य"—इति काशिका। इयं उक्तिः सूत्रकारं प्रति काशिकाकृतोः सविस्मयप्रशंसापरेति भाषावृत्तिसम्पादकस्य श्रीशचन्द्रचक्रवर्त्तिण आशयः। ]

## १२८७। सङ्कलादिभ्यश्च। ४।२।७५॥

## दी—। कूपेषु इति निवृत्तम्। सङ्कलेन निवृत्तं साङ्कलम्। पौष्कलम्।

The suffix अञ् in the four aforesaid senses, are attached to a few words like संकल, पुष्कल—etc; the particular connection with wells ceases to exist in the present rule.

मित—। संकलशब्दात् तथा सङ्कलादिगणपठितेभ्यः अन्येभ्यः शब्देभ्यः प्रागुक्तेषु चतुर्षु अर्थेषु अञ् प्रत्ययः स्यात्। "कूपे अभिधेये" इत्यस्य अंशस्य अनुवृत्तिरत्र नास्ति। संगतः कलः संकलः; सङ्कलेन निर्वृत्तम् इति अञ् साङ्कलम्। पुष्कलेन निवृत्तम् इति पौष्कलम्। पौष्कलः देशविशेषः, अयम् अञ् अणोऽपवादः।

मङ्गलादिर्यथा—मंकल, पुष्कल, उत्तम, उडुप, उत्पुट, कुम्भ, निधान, सुत्म, सुदत्त, सुपूत, सुनेत्र, सुपिङ्गल, सिकत, पूतीक, पूलास, कूलास, निवेश, गवेष, गभीर, इतर, शर्मन्, अहन्, लोमन्, वेमन्, वरुण, बहुल, सद्योज, अभिषिक्त, गोभृत्, राजभृत्, गृह भृत, भल्ल, मल्ल। सिकत + अञ् चातुरर्थिक = सैकतम्।

इत्यप्यतावधेयम्—सिकता: अस्मिन् सन्ति इति मत्वर्थे अण् = सैकतम्।

यथा "कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी"ति अभिज्ञान-शकुन्तलम्।

## १२८८। स्त्रीषु सौवीरसाल्वप्राक्षु। ४।२।७६॥

**टी—। स्त्रीलिंगेषु एषु देशेषु वाच्येषु अञ्। सौवीरे—दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी। साल्वे—वैधूमाग्नी। प्राचि—माकन्दी।**

The suffix अञ् (and not अण्) is attached to words, to imply a (city or) country—the very name of which is used in the feminine gender—within the provinces of Sauvira, or Salwa or within the eastern province.

[ Sauvira is supposed to be an outlying part of modern Sind and the situation of Salva is not definitely known. ]

मित—। सिन्धुप्रदेशसंलग्नजनपदविशेष: सौवीर:। सौवीरदेशे, साल्वदेशे तथा प्राच्यदेशे च स्थितेषु स्त्रीलिङ्गे वर्त्तमानेषु जनपदेषु अभिधेयेषु सत्सु, प्रातिपदिकेभ्य: अञ् प्रत्यय: स्यात्, न खलु अण्। सौवीरे इति। सौवीरप्रदेशस्थित जनपदस्य उदाहरणं यथा—दत्तामित्रेण निर्वृत्ता नगरी इति अञ् दात्तामित्री नगरी। साल्वे इति। साल्वदेशस्थितजनपदस्य उदाहरणं यथा—विधूमाग्निना निर्वृत्ता नगरी वैधूमाग्नी। प्राचि इति। प्राच्यदेशस्थितजनपदस्य उदाहरणं—यथा माकन्देन निर्वृत्ता नगरी माकन्दी। ककन्देन निर्वृत्तानगरी काकन्दी। एवं माणिचरी, जाराषी। सर्वत्र "टिड्ढाणञ्—"इति (४।१।१५) सूत्रेण स्त्रियां ङीप्।

१२८९ । सुवास्त्वादिभ्योऽण् ।४।२।७७ ॥

दो— । अञोऽपवादः । सुवास्तोरदूरभवं सौवास्तवम् । वर्णु = वार्णवम् । अण्ग्रहणं नद्यां मतुपो बाधनार्थम् । सौवास्तवी ।

The suffix अण् (and not अञ्) is attached to words like सुवास्तु and others—falling within the category of सुवास्तु class in the four aforesaid senses. This अण् supersedes the suffix मतुप् sanctioned by the rule—नद्यां मतुप् ( ४।२।८५ ) ।

मित— । सुवास्तुशब्दात् तथा सुवास्तुगणपठितेभ्योऽन्येभ्यः शब्देभ्यः अण् प्रत्ययः स्यात् न खलु अञ् । "ओरञ्" ( ४।२।७१ ) इति सूत्रेण विहितस्य अञ् प्रत्ययस्य बाधकोऽयम् अण् प्रत्ययः । सुवास्तु इत्यस्य अदूरभवम् नगरम् इति अण् सौवास्तवम् । अण् प्रत्यये परे ओकारस्य गुणः स्यात् "ओर्गुणः" ( ६।४।१४६ ) इति सूत्रेण । वर्णोरदूरभवम् नगरम् इति अण् वार्णवम् नगरम् । सुवास्तोरदूरभवा सौवास्तवी ।

ननु "ओरञ्" इत्येव सिद्धे पुनरपि सूत्रकरणात् अञ्प्रत्ययस्य अननुवृत्तौ सत्याम्, फलवत्त्वात् अण् इत्येव आयाति तर्हि कथं पुनरेव सूत्रे अण् इत्यंशस्य उल्लेख इति आशङ्कां निराकरोति—अण् ग्रहणम् इति । पुनरपि सूत्रे अण् इत्यस्य उल्लेखदर्शनात् इदम् ज्ञायते यत् अयम् अण् प्रत्ययः "नद्यां मतुप्" इति ( ४।२।८५ ) सूत्रेण यो मतुप् प्रत्ययः विधीयते, तस्य बाधकः इति ।

सुवास्त्वादिर्यथा—सुवास्तु, वर्णु, भण्डु, खण्डु, शेवालिन्, कर्पूरिन्, शिखण्डिन्, गर्त्त, कर्कश, शकटीकर्ण, कृष्ण, कर्क, कर्कन्धुमती, गोह, अहिसक्थ ।

१२९० । रोणी ॥ ४।२।७८ ॥

दो— । रोणी शब्दात् तदन्ताच्च अण् । कूपाञोऽपवादः । रौणः । आजकरोणः ।

The suffix अण् ( and not अञ् ) is attached to the word रोणी or to any other word, of which रोणी forms the last member, in the four aforesaid senses.

मित—। रोणी इति लुप्तपञ्चमीविभक्तिकम् इदं पदम्। रोणीति शब्दात् तथा "येन विधिस्तदन्तस्य ( १।१।७२ )" इति नियमात् रोणीति यस्य शब्दस्य अन्ते वर्त्तते तस्मात् च, चातुरर्थिकः अण् प्रत्ययः स्यात्। चतुर्णामर्थानां मध्ये यथासम्भवम् अर्थेन सह प्रत्ययस्य सम्बन्धः। अयं प्रत्ययः "वह्वचः कूपेषु" ( ४।२।७३ ) इति विहितस्य अण् प्रत्ययस्य अपवादः। रोण्या निर्वृत्तः इति अण् रौणः। रौणः कूपः। अजकरोण्या निर्वृत्तः कूपः इति अण् आजकरोणः कूपः। एवं रोणः। सैंहिकरोणः। अण् प्रत्यये परे रोणीत्यस्य—यस्येति च (६।४।१४८) इति सूत्रेण ईकारस्लोपः।

१२८१। कोपधाच्च ॥ ४।२।७९ ॥

दी—। अण्। अञोऽपवादः। कार्णच्छिद्रकः कूपः। कार्कवाकवम्। त्रैशङ्कवम्।

The suffix अण् ( and not अञ् ) is attached to words, of which ककार ( the letter क ) forms the last but one syllable, in the above four senses.

मित—। यस्य प्रातिपदिकस्य उपधायां कवर्गो विद्यते, तस्मात् चातुरर्थिकः अण् प्रत्यय एव स्यात् न खलु अञ्, "ओरञ्" ( ४।२।७१ ) इति विहितस्य तथा "वह्वचः कूपेषु" ( ४।२।७३ ) इति विहितस्य च अञ्प्रत्ययस्य अपवादोऽयम्। यथासम्भवम् अर्थेन सह सम्बन्धः। कर्णच्छिद्रेण निर्वृत्तः इति अण् कार्णच्छिद्रकः कूपः। कर्णवेष्टकेन निर्वृत्तः इति अण् कार्णवेष्टकः कूपः। कृकवाकुना निर्वृत्तम् इति कार्कवाकवम्। ओर्गुणः ( ६।४।१४६ )—इति उकारस्यगुणः। आदिस्वरवृद्धि-स्तथा ऋकारस्य रपरत्वम्—"उरण्रपरः" ( १।५१ ) इति विधानात्। त्रिशङ्कुना निर्वृत्तम् इति अण् त्रैशङ्कवम्। ओर्गुणः ( ६।४।१४६ )—इति उकारस्यगुणः। "एचोऽयवायावः" ( ६।१।७८ ) इति अवादेशश्च। आदिस्वरवृद्धिरपि।

१२८२। वुञ्छण् कठजिलसेनिरढञ् ण्ययफक्फिञिञ्ञ्यककठकोऽरीहण-कृशाश्व-र्श्य-कुमुद-काश-तृण-प्रेक्षाश्म-सखि-सङ्काश-बल-पक्ष-कर्ण-सुतंगम-प्रगदिन्-वराह-कुमुदादिभ्यः ॥४।२।८०॥

टी—। एभ्यः सप्तदशभ्यः गणेभ्यः सप्तदश क्रमात् स्युश्चतुरर्थ्याम्। अरीहणादिभ्यो वुञ्। अरीहणेन निर्वृत्तम् आरीहणकम्। कृशाश्वादिभ्यश्छण्। कार्शाश्वीयम्। ऋश्यादिभ्यः कः। ऋश्यकम्। कुमुदादिभ्यष्ठच्। कुमुदिकम्। काशादिभ्यः इलः। काशिलः। तृणादिभ्यः सः। तृणसम्। प्रेक्षादिभ्य इनिः—प्रेक्षी। अश्मादिभ्यः रः—अश्मरः। सख्यादिभ्यो ढञ्—साखेयम्। संकाशादिभ्यो ण्यः। सांकाश्यम। बलादिभ्यो यः—बल्यम्। पक्षादिभ्यः फक्—पाक्षायणः। 'पथः पन्थ च' (ग सू ७८) पान्थायनः। कर्णादिभ्यः फिञ्—कार्णायनिः। सुतंगमादिभ्यः इञ्। सौतंगमिः। प्रगद्यादिभ्यो ञ्यः। प्रागद्यः। वराहादिभ्यः कक्। वाराहकः। कुमुदादिभ्यष्टक्—कौमुदिकः।

The seventeen suffixes, viz वुञ, छण, क, टच, इल, स, इनि, र, ढञ्, ण्य, य, फक्, फिञ, इञ्, ञ्य, कक and ठक are added to कृशाश्व, ऋश्य, कुमुद, काश, तृण, प्रेक्षा, अश्मन्, सखि, सङ्काश, बल, पक्ष, कर्ण, सुतङ्गम, प्रगदिन्, वराह and कुमुद classes in the four aforesaid senses—respectively.

मित—। वुञ, छण्, क, ठच्, इल, स, इनि, र, ढञ, ण्य, य, फक, फिञ, इञ, ञ्य, कक, ठक् इति सप्तदश प्रत्ययाः। अरीहण, कृशाश्व, ऋश्य, कुमुद, काश, तृण,

प्रेक्षा, अश्मन्, सखि, सङ्काश, बल, पक्ष, कर्ण, सुतङ्गम, प्रगदिन्, वराह, कुमुद इति सप्तदशगण-नामानि। एतेभ्यो गणेभ्यः यथासंख्यम् एते प्रत्ययाः "तदस्मिन् अस्तीति देशे तन्नाम्नि, तेन निर्वृत्तम्, तस्य निवासः, अदूरभवश्च" इति चतुर्ष्वर्थेषु भवन्ति। एतेषां सप्तदश-गणानाम् मध्ये चेतनवाचकास्तथा अचेतनवाचकाश्च शब्दाः सन्ति। तेभ्यः यथासम्भवमेव एतेषु चतुर्षु अर्थेषु प्रत्ययाः स्युरिति बोध्यम्। तथाहि अचेतन-वाचक-शब्देभ्यः "तेन निर्वृत्तम्" इति एतस्मिन् अर्थे प्रत्ययो न स्यात् अचेतनस्य निर्वर्तने योगस्याभावात्। एवमेव सर्वत्र ज्ञेयम्।

विवरणं प्रदर्श्यते—अरीहणादिभ्यः वुञ् प्रत्ययः स्यात्। अरीहणेन निर्वृत्तम् इति आरीहणकम्। एवम् द्रौघणकम्। अरीहणादिर्यथा—अरीहण, द्रुघण, खदिर, सार, भगल, उलन्द, साम्परायण, क्रौष्टायण, वीरण, काशकृत्स्न, जाम्बवत्, शिंशपा, किरण, रैवत, बैल्व, वैमतायन, सौसायन, शिरीष, वधिर, वैगतायन, गोमतायन, तौमायन, खाण्डायन, विपाश्, सुयज्ञ, जम्बु, सुशर्म। वुञ् प्रत्ययस्य ञित्वात् एतेषाम् आदिस्वरवृद्धिः स्यात्।

कृशाश्वादिभ्यः छण् प्रत्ययः स्यात्। कृशाश्वेन निर्वृत्तमिति कार्शाश्वीयः। छस्थाने ईयादेशः। णकारः इत्—तेन आदिस्वरवृद्धिः। एवम् आरिष्टीयः। कृशाश्वादि यथा—कृशाश्व, अरिष्ट, अरिश्म, वेश्मन्, विशाल, रोमक, शबल, कूट, रोमन्, वर्वर, सूकर, प्रतर, सदृश, पुरग, सुख, अजिन, विनत, विकुध्यास, अरुस्, अवयास, मौद्गल्य। विनतेन निर्वृत्तम् इति वैनतीयम्। ऋश्यादिभ्यः कप्रत्ययः स्यात्। ऋश्येन निर्वृतम् ऋश्यकम्। न्यग्रोधस्य अदूरभव इति न्यग्रोधकः। न्यग्रोधः वटवृक्षः। ऋश्यादि यथा—ऋश्य, न्यग्रोध, शिरा, निलीन, निवास, निधान, निवात, निवद्ध, विवद्ध, परिगूढ़, उपगूढ़, उत्तराश्मन्, स्थूल बाहु, खदिर, शर्करा अनडुह्, परिवंश, वेणु, वीरण॥ कुमुदादिभ्यः ठच् प्रत्ययो भवति। ठच् इत्यस्य स्थाने इकादेशः। कुमुदानां निवासः अदूरभव इति कुमुदिकम्। एवं शर्करिकम्। कुमुदादिर्यथा—कुमुद, शर्करा, न्यग्रोध, इकट, खण्ड, परिवृत, कर्दम, अंशु, गर्त, बीज, अश्वत्थ, बल्वज, परिवाप, शिरीष, यवाष, कूप, विकङ्कत, कण्टक, विकङ्कट, सङ्कट, पलाश, तिक, कच, दशग्राम।

काशादिभ्यः इलप्रत्ययः स्यात्—काशैः निर्वृत्तम् काशिलम्, पाशैः निर्वृत्तम् इति पाशिलम्। काशादि यथा—काश, वास, अश्वत्थ, पलाश, पीयूष, विश, तृण, नर, चरण, कर्दम, कर्पूर, कण्टक, गुह, आवास, पाश, वन, वधूल, बर्बर। तृणादिभ्यः सप्रत्ययो भवति। तृणैः निर्वृत्तम् इति तृणसम्। एवं नड़सम् इति। तृणादि यथा—तृण, नड़, मूल, पर्ण, वर्ण, चरण, अर्ण, जन, वल, लव, वन, [ अत्र "स" स्थाने "श" इति काशिकाकारौ वामनजयादित्यौ। तृणशः नड़शः इति काशिकायाम् उदाहरणे वर्तते। वीरणशब्दम् अपि तृणादिगणे पठति भाषावृत्तिकृत् पुरुषोत्तमदेवः। वीरणसा इति तेन प्रदत्तम् उदाहरणम्। वीरणैः निर्वृत्ता इति वीरणसा। ] प्रेक्षादिभ्यः इनि प्रत्ययो भवेत्प्रेक्षैः प्रेक्षाभिर्वा निर्वृत्तमिति—प्रेक्षी। प्रेक्षादिर्यथा—प्रेक्षा, हलका, बन्धुका, ध्रुवका, क्षिपका, न्यग्रोध, इक्कट, बुधक, सङ्कट, कङ्कट, कर्कट, मुकट, पुक, मह।

अश्मादिभ्यः र-प्रत्ययो भवति—अश्मभिः निर्वृत्तम् इति अश्मरः। अश्मादिर्यथा—अश्मन्, यूथ, ऊष, मीन, दर्भ, वृन्द, गुड़, खण्ड, नग, शिखा, यूथ, नद, नख, काट, पाम। सख्यादिभ्यः ढञ् प्रत्ययो भवेत्—सख्या निर्वृत्तमिति साखेयम्। ढञ् इत्यस्य स्थाने इयादेशः। आदिस्वरवृद्धिश्च। सख्यादिर्यथा—सखि, सखिदत्त, वायुदत्त भल्ल. पाल, चक्रपाल, चक्रवल, छगल, अशोक, करवीर, सीकर, सकर, सरस, समल, तर्क, चक्रपाल, उशीर, सुरस, रोह, तमाल, कदल, समल। सङ्काशादिभ्यः ण्य-प्रत्ययो भवति—सङ्काशानां निवासः इति साङ्काश्यं नगरम्। एवं काम्पिल्यं नगरम्। सङ्काशादिर्यथा— सङ्काश, कम्पिल्य, समीर, कश्मीर, शूरसेन, सुपथिन्, सक्थट, यूप, अंश, अश्मन, कूट, मलिन, तीर्थ, अगस्ति, विरत, चिकार, विरह, नासिका। कश्मीराणां निवासः इति काश्मीरः देशविशेषः, एवं शौरसेनः। वलादिभ्यः य प्रत्ययः स्यात्—वलेन निर्वृत्तमिति वल्यम्। एवम् वनस्य अदूरभवम् इति वन्यम्। [अधुना तु भवार्थेऽपि 'वन्यम्' व्यवह्रियते। नायं 'वन्य'-शब्दः भवार्थे दिगादि-यता साध्यः (दिगादि-गणे अस्य अपाठात्) ; मन्ये वन्यस्तु वनशब्दात् वलादि—यप्रत्ययेन साध्यः, कालक्रमेण भवाद्यर्थेऽपि व्यवहृतः ]।

वलादिर्यथा—वल, वन, कुल, तुल, उल, भुल, कवल, कुल।

पक्षादिभ्यः फक् प्रत्ययः स्यात्—पक्षाः सन्ति अस्मिन् देशे इति पाक्षायणः। एवम् तौषायनः। पक्षादि यथा—पक्ष, तुष, अण्ड, कम्बलिक, चित्र, अश्मन्, अतिश्वन्, कुम्भ, सरक, सरीक, सरक, सकल, सरस, समल, रोमन्, लोमन्, हंसका, सुकण्डक, अन्तिबल, यमल, हस्त, सिंहक, पथिन्।

"पथः पन्थच" इति गणनिर्दिष्टः।

फक् प्रत्यये परे सति पथिन् इति शब्दस्य स्थाने पन्थ इति आदेशः स्यात्। पथः अदूरभवः इति पान्थायनः।

कर्णादिभ्यः फिञ्प्रत्ययो भवति—कर्णानाम् निवासः इति कार्णायनिः। वशिष्ठेन निर्वृत्तमितिवासिष्ठायनिः। फिञ् इत्यस्य स्थाने आयनि इति आदेशः। कर्णादि यथा—कर्ण, वशिष्ठ, अर्कलूष, शल, द्रुपद, आनडुह्य, पाञ्चजन्य, स्थिर, कुलिश, कुम्भी, जीवन्ती, जीत्व, आण्डीवत।

सुतङ्गमादिभ्यः इञ् प्रत्ययः स्यात्—सुतङ्गमानां निवासः इति सौतङ्गमिः। मुनिचितेन निर्वृत्तमिति मौनिचितिः। इञ् प्रत्ययस्य ञकार इत्—तेन आदिस्वर वृद्धिः। सुतङ्गमादिर्यथा—सुतङ्गम, मुनिचित, विप्रचित, महापुत्र, श्वेत, गडिक, शुक्र, विग्र, बीजवापिन्, श्वन्, अर्जुन, अजिर, जीव।

प्रागदिन् इत्यादिभ्यः ञ्य प्रत्ययो भवति—प्रगदिभिर्निर्वृत्तमिति प्रागद्यम्।

ननु प्रागदिन् इति नकारस्य सर्वे कथं न लोप इति चेत् उच्यते—प्रगदिन् इति शब्दः नकारान्त इति स्पष्टमेव ज्ञापयितुम्—अन्यथा अयं शब्दः इकारान्त इति संशयो भवत्।

प्रगद्यादि यथा—प्रगदिन्, मगदिन्, मदृदिन्, कविल, खण्डित, गदित, चूडार, मार्जार, कोविदार। वराहादिभ्यः कक् प्रत्ययो भवति—वराहेन निर्वृत्तमिति वाराहकम्। पलाशस्य अदूरभवमिति पालाशकम्। वराहादि यथा—वराह, पलाश, शिरीष, पिनद्ध, विदग्ध, विभग्न, बाहु, खदिर, शर्करा। कुमुदादिभ्यः ठक् प्रत्ययः स्यात्—कुमुदानां निवासः कौमुदिकम्। कुमुदादि यथा—कुमुद, गोमथ, रथकार, दशग्राम, अश्वत्थ, शाल्मली, कुण्डल, मुनिस्थूल, कूट, मधुकर्ण।

अपिच—"शिरीषशब्दः अरीहनादिषु, कुमुदादिषु, वराहादिषु च पठ्यते। औत्सर्गिकोऽपि तत् दृश्यते। तस्य च वरणादिषु दर्शनात् लुब् भवति। तथाचोक्तम्।

शिरीषाणाम् अदूरभवो ग्रामः शिरीषास्तस्य वनमिति शिरीषवनमि"ति—काशिका।

"वरणादिभ्यश्च" ( ४।२।८२ ) इति सूत्रेण एव शिरीषशब्दात् विहितस्य प्रत्ययस्य लुप् स्यात् इति ज्ञेयम्। शिरीषो वृक्षविशेषः।

१२८३। जनपदे लुप् ॥४।२।८१।

दी—। जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात्।

The suffixes sanctioned to be used in the four aforesaid senses, elide, when a tract of land having human habitation or country is implied.

मित—। "तदस्मिन्नस्तीति देशे तन्नाम्नी"ति ( ४।२।६७ ) यश्चातुरर्थिकः प्रत्ययो विहितः, तस्य प्रत्ययस्य देशविशेषे जनपदे अभिधेये सति लुप् स्यात्। ग्राम-समुदायो जनपदः इति काशिका।

१२८४। लुपि युक्तवद्व्यक्तिवचने ॥ १।२।५१ ॥

दी—। लुपि सति प्रकृतिवत् लिङ्गवचने स्तः। पञ्चालानां निवासो जनपदः पञ्चालाः। कुरवः, अङ्गाः, वङ्गाः, कलिङ्गाः।

Words, the suffixes after which elide, by the word लुप् take their original number and gender. Or—when disapperance of an afflix is enjoined by the word लुप्, it is to be understood that the gender and number of the word derived are to be the same as those of the stem.

मित—। प्रत्ययस्य अदर्शनं लुप्। "लुपि सति" यस्मात् प्रातिपदिकात् विहितस्य कस्यचित् प्रत्ययस्य केनापि सूत्रेण लुप् भवति, "प्रकृतिवत् लिङ्गवचने" प्रत्ययस्य लुपः प्रवृत्तेः प्राक् तस्य प्रातिपादिकस्य यत् लिङ्गं यच्च वचनम् आस्ताम्, ते एव "स्तः" भवतः, न खलु प्रत्ययस्य अर्थ-विशेषम् अनुसृत्य लिङ्गवचने व्यवक्रियेते।

पञ्चालानां निवासी जनपदः इति। तस्य निवासः (४।२।६९) इति पञ्चालशब्दात् विहितस्य अण् प्रत्ययस्य "जनपदे लुप्" (४।२।८१) इति लुप् स्यात्। अण् प्रत्ययस्य लुपि सति, लुपः प्रकृतेः प्राक् स्थितस्य पञ्चालशब्दस्य पुंलिङ्गत्वम् बहुवचनत्वम् च अधुना भवेताम्; तेन पञ्चालाः। एवं कुरूणाम् निवासी जनपद इति कुरवः। अङ्गानां निवासी जनपदः इति अङ्गाः। वङ्गानां निवासी जनपदः इति वङ्गाः। कलिंगानां निवासी जनपदः इति कलिंगाः।

एवम् कटुवदर्य्याः अदूरभवः जनपदः कटुवदरी। अत्र जनपदस्य पुंलिंगत्वेऽपि प्रत्ययस्य लुपि सति कटुवदरी इति पदस्य स्त्रीलिंगता।

[ ननु उदुम्बरा अस्मिन् सन्तीति औदुम्बरो जनपदः; एवं वैदिशः जनपदः; अत्र उदाहरणद्वये कथं न "जनपदे लुप्" इति प्रत्ययस्य लुप् स्यात् इति चेत्, उच्यते— अत्र "तन्नाम्नीति इति वर्त्तते, न चात्र लुबन्तं तन्नामधेयं भवति" इति काशिका। अयमर्थः—अत्र लुपि कृते सति यत् प्रातिपदिकं शिष्येत तत् देशविशेषस्य संज्ञा न भवति अनभिधानात् इति प्रत्ययस्य न लुप्। ]

## १२९५। तदशिष्यं संज्ञाप्रमाणत्वात्॥ १।२।५३॥

## टी—। युक्तवद्वचनं न कर्त्तव्यम्। संज्ञानां प्रमाणत्वात्।

[ N. B.—The previous rule was formed by older Grammarians, and Panini does not approve of it so he proceeds to reject the same— ]

The matter referred to in the preceding rule—is to be rejected simply because a proper name has no significance here and consequently their number and gender should be determined by usage.

मित—। पूर्व्वसूत्रे प्रत्ययस्य लुपि प्रातिपदिकस्य प्रत्यय-प्रकृतेः प्राक् अवस्थिते लिंगवचने स्तः इति यद्विहितम् "तद् अशिष्यम्" पाणिनिना असम्मतम्, अननुमोदितम् इति यावत्। प्रकृतिवत् लिंगवचनं न कर्त्तव्यम् इति पाणिनिमुनेराशयः

कथम् ? "संज्ञा प्रमाणत्वात्"—संज्ञानां लोकव्यवहारतः प्रमाणत्वात् प्रामाणिकत्वेन ग्रहणीयत्वात्। तथाहि—"स्वतःप्रमाणं संज्ञाशब्दाः"।

अपिच—संज्ञाशब्दाः हि नानालिंगसंख्याः [Proper names are of various numbers and genders]। ईदृशाः नानालिंगसंख्याः संज्ञाशब्दा एव प्रमाणं—यथा पञ्चालाः, वरणाः। "नैते योगशब्दाः किं तर्हि जनपदादीनां संज्ञा एताः।"—इति काशिका।

अयमाशयः—शब्दास्तावत् त्रिविधाः, यौगिकाः, रूढाः, योगरूढाश्चेति। पचति यः सः पाचकः इति पाचकशब्दः यौगिकः। अस्यैव अपरं नाम योगशब्दः। संज्ञावाचकाः शब्दाः न योगशब्दाः, अपि च मण्डप इतिवत् रूढा एव। एतेषां जनपदादिसंज्ञावाचकशब्दानां लिंगवचनं च स्वभाव-सिद्धमेव न खलु यौगिकशब्दवत् प्रयत्न-प्रतिपाद्यम्। तथाहि यथा पचतियः सः पाचकः इति पुंलिंगम्। एवं पचति या या पाचिका इति स्त्रीलिंगम्—एवं जनपदादिसंज्ञावाचकशब्दानां लिंगवचनविनिर्णयः न स्यात्। अपि तु साहित्ये प्रयोगदर्शनादेव तेषां लिंगवचनव्यवस्था भवति। सा एव व्यवस्था प्रामाणिकत्वेन ग्राह्या इति। यथा आपः, दाराः, गृहाः सिकताः, वर्षाः इत्यादयः।

## १२८६। लुब्योगाप्रख्यानात्॥ १।२।५४॥

## दी—। लुबपि न कर्त्तव्योऽवयवार्थस्य इह अप्रतीतेः।

The elison of suffixes [as sanctioned by "जनपदे लुप" (४।२।८१) and "वरणादिभ्यश्च" (४।२।८२)] is also to be disallowed, as a proper noun is not replete with its derivative meaning.

मित—। "अशिष्यम्" इति अत्र पूर्वसूत्रात् अनुवर्त्तते। "लुप्" इति प्रथमान्तम्। लुप् अपि अशिष्यम्। लुप् अपि न कर्त्तव्यम् इति पाणिनिः व्यवस्थापयति, कथम् ? "योगाप्रख्यानात्"—योगस्य अवयवार्थस्य इह शब्दे अप्रतीतेः प्रतीत्यभावात् उपलब्ध्य-भावात्। नहि प्रकृतिप्रत्ययार्थः संज्ञावाचके शब्दे विद्यते।

आयमाशयः। योऽयं "जनपदे लुप (४।२।८१), "वरणादिभ्यश्च" (४।२।८२) इति सूत्रद्वयेन लुप् विधीयते सोऽपि लुप् न कर्त्तव्यः। कथम् इति चेत् ?—'योगा प्रख्यानात्'—नहि पञ्चालाः वरणा इत्यादौ संज्ञावाचके शब्दे प्रकृतिप्रत्ययस्य अर्थेन सह शब्दार्थस्य कश्चित् योगः (सम्बन्धः इत्यर्थः) प्रख्यायते (ज्ञाप्यते इत्यर्थः)। नहि पञ्चालानां स्वामित्वात् पञ्चाला इति जनपदः, अथवा नहि वृक्षयोगात् वरणाः इति ग्रामः नगरं वा ; अपि पञ्चालाः वरणाः इति संज्ञामात्राः एते। तस्मात् अत्र "तस्य निवासः" (४।२।६९) "अदूरभवश्च" (४।२।७०) इति तद्धित-सूत्रद्वय-विहित-प्रत्ययानाम् प्रयोगावसर एव नास्ति, किं अप्रयुक्तस्य प्रत्ययस्य लुपो विधानेन ?—

**१२८७। योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥१।२।५५॥**

**कौ—। यदि हि योगस्य अवयवार्थस्य इदं बोधकं स्यात्, तदा तदभावे न दृश्येत।**

Should the derivative meaning be accepted, the proper names might not denote the objects they do, when devoid of the things from which they are alleged to derive their denomination.

मित—। पूर्वसूत्रं व्याचष्टे—योगस्याप्रख्यानादिति। ननु योगस्य अप्रख्यानं कथं नाम भवेदिति आकांक्षायां सूत्रयति—"योगप्रमाणे" इति।

'योगस्य' यौगिकार्थस्य प्रकृतिप्रत्ययाभ्यां लब्धस्य अर्थस्य इति यावत्, 'प्रमाणे' स्वीकरणे सति "तदभावे" योगार्थप्रतिपाद्यस्य वस्तुनः अभावे "अदर्शनम्" शब्दस्य तदर्थ—वाचकत्वाभावः "स्यात्" प्रसज्येत।

आयमाशयः—यदि अंग वंग कलिंगादि संज्ञावाचकाः शब्दाः यौगिकार्थ—प्रतिपादकाः इति स्वीक्रियेत तर्हि अंगजातीय—क्षत्रियाणां वाससम्बन्धित्वादेव अंगशब्दः देशवाचको भवति, वंगजातीयक्षत्रियाणां स्वामित्वसम्बन्धित्वात् वंगशब्दस्य देशवाचकत्वं, तथा कलिंगजातीयक्षत्रियाणामेव आधिपत्यहेतुत्वात् कलिंगशब्दस्य देशबोधकत्वम् इति उररीकर्त्तुम् युज्यते। तथा सति यदा वंगविषये वंगजातीयाः

क्षत्रियाः न राज्यं कुर्व्वन्ति, तदा वंगदेशस्य वंग इति संज्ञा न भवेत्, एवं यदा अंगजातीयाः क्षत्रियाः अंगविषये न वसन्ति तदा अंगदेशस्य अंग इति संज्ञा लुप्येत, अपि च यदा कलिंगविषये कलिंगजातीयानां क्षत्रियाणां राज्यं न विद्यते, तदा कलिंगदेशस्य कलिंग इति संज्ञा न प्रयुज्येत। परं तत् न भवति, दृश्यन्ते हि अंगादिक्षत्रियाणाम् असद्भावे अपि अंगादिविषयाणां तत्तत् संज्ञाः। अतो यथा दण्डयोगात् साधवः दण्डिन इत्युच्यन्ते एवम् अंग वंग कलिंग—पञ्चालादिशब्दाः नहि तत्तत् क्षत्रियजातियोगात् यौगिकार्थवाचकाः अपि च अंगादिजनपदविशेषेषुकेवलं रूढ़ाः।

## १२८८। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ १।२।५६ ॥

**टी—। "प्रत्ययार्थः प्रधानम्" इत्येवंरूपं वचनमपि अशिष्यम्। कुतः? अर्थस्य लोकत एव सिद्धेः।**

With reference to the inter-relationship of the meaning of the root or stem as well as of thesuffixes, declare the ancient grammarians, the import of the latter predominates over the former; but this theory is rejected by Panini—on the ground that the exact meaning of a word is learnt by usage and not form books on grammar.

मित—। "प्रधानप्रत्ययार्थवचन"मिति। प्रत्ययस्य अर्थः इति प्रत्ययार्थः। तस्य वचनं कथनम् इति 'प्रत्ययार्थवचनं प्रधानम्' सुखार्थम् प्रत्ययार्थवचनम् इति प्रधानप्रत्ययार्थवचनम्। प्रत्ययस्य कश्चित् अर्थः वर्त्तते, प्रकृतेरपि अन्यः कश्चित् अर्थोऽस्ति। एतयोरर्थयोर्मध्ये प्रत्ययस्य एव अर्थः प्रधानं भवति, प्रकृतेरर्थस्तु अप्रधानं भवति। यत् प्रधानं तद् विशेष्यरूपेण अवतिष्ठते, यदप्रधानं तद् विशेषणरूपेण इति। इममेव पूर्व्वाचार्य्याणां मतं पाणिनिः प्रत्याख्याति। अत्र सूत्रे "तदशिष्यं संज्ञाप्रमाणत्वात्" इत्यस्मात् "अशिष्यम्" इति अनुवर्त्तते।

तदा सूत्रस्य अयमर्थः—प्रत्ययार्थः एव प्रधानम् इति एवंरूपं यत् प्राचीन-वैयाकरणानां वचनं दृश्यते तत् अशिष्यम् अग्राह्यम् इत्यर्थः। कथं ? 'अर्थस्य' शब्दार्थस्य 'अन्यप्रमाणत्वात्', शास्त्रात् (व्याकरणादियंथात्) योऽस्य लोकव्यवहारः दृश्यते, तस्यैव प्रमाणत्वात्। शब्दस्य अर्थावगमे शास्त्रं नहि प्रमाणत्वेन गृह्यते अपि तु लोकव्यवहार एव। अनधीतव्याकरणादिशास्त्रः कृषकोऽपि यत् शब्दस्य अर्थं बोद्धुम् समर्थः स्यात् तत्, लोकव्यवहारादेव, अतस्तस्यैव प्रामाण्यम्।

अयमाशयः—ननु पूर्व्वसूत्रे योगस्य (प्रकृतिप्रत्ययाभ्याम् लभ्यस्य अर्थस्य) संज्ञावाचकशब्देषु अनुपयोगित्वम् इति यत् आरोपितं तत् न समीचीनम्, इति पूर्व्वपक्षः। कथं न समीचीनम् इति आशङ्काम् पूर्वपक्षवादी प्रदर्शयति—"प्रधान-प्रत्ययार्थवचनमिति" अर्थं विनिर्णयकाले प्रकृतेरर्थस्य विशेषणत्वेन अप्रधानत्वं प्रत्ययस्यैव अर्थस्य विशेष्यतया प्रधानत्वम् अतएव पूर्वाचार्य्याः घोषयन्ति प्रत्ययार्थः प्रधानम् इति। उदाहरणं प्रदर्शयति—

पाचकः इति शब्दः पच् धातोः कर्त्तरि ण्वुल् (अक) प्रत्ययेन कृते सति सिध्यति। पच् धातुना पाक इत्यस्य प्रतीतिः, कर्त्तरि विहितेन ण्वुलप्रत्ययेन कर्त्तुरेव प्रतीतिः। पाकस्य तथा कर्त्तुश्च अधिकाराधिकारिरूपः सम्बन्धः। एवं पाचक इत्यनेन पाकाधिकारवान् कर्त्ता इति अवगम्यते। अत्र विशेष्यतया अवस्थितः कर्त्ता इति तु प्रत्ययस्य (ण्वुल् प्रत्ययस्य) अर्थः, एवम् कर्त्ता इत्यस्य विशेषणतया अवस्थितः पाकः (पाकाधिकारवान्) इति तु प्रकृतेः (पच् धातोः) एव अर्थः। स्थिते सति अवगम्यते यत् प्रत्ययस्य अर्थः खलु प्रधानम्। प्रकृतेरर्थस्तु अप्रधानम्। यदिहि प्रत्ययस्य एव अर्थः प्रधानं भवति इति सिध्यति, तर्हि कथम् न सर्व्वत्रैव (संज्ञावाचकेष्वपि) यौगिकार्थस्य अप्रामाणिकत्वं भवेत् इति पूर्वपक्षीयाणाम् उक्तिं निरस्यति—"अर्थस्य अन्यप्रमाणत्वात्"। सर्व्वत्रैव हि व्याकरणादिशास्त्रादेव शब्दानाम् अर्थाः ज्ञायन्ते इति नियमो न भवति। यतः शास्त्रात् अन्यस्मात् लोक-व्यवहारादपि अर्थप्रतीतिः स्यात्। अनधीतशास्त्रः हालिकोऽपि शब्दस्य अर्थं प्रत्येति—अतः लोकव्यवहारस्य प्रामाण्यं स्वीकार्य्यम्। स्वीकृते लोकव्यवहारस्य प्रामाण्ये

प्रत्ययार्थ एव प्रधानमिति वचनम् पूर्वाचार्य्यसम्मतमपि अग्रहणीयमेव इति पाणिनेराशयः।

१२८८। कालोपसर्जने च तुल्यम् ॥ १।२।५७ ॥

टी—। अतीतायाः रात्रेः पश्चार्धेनागामिन्याः पूर्व्वार्धेन च सहितो दिवसोऽद्यतनः, विशेषणम् उपसर्ज्जनम् इत्यादि पूर्व्वाचार्य्यैः परिभाषितम्। तत्रापि अशिष्यत्वं समानम्। लोकप्रसिद्धेः।

The definition of different division of time as well of the subordinate (with reference to the principal), as framed by the older grammarians. is also to be rejected in the similar way.

One concrete example may suffice here :—by "to-day", they meant the time, beginning with the latter half of the previous night and ending with the midnight of the day in question. This definition is absolutely unnecessary as it may be best known by usage.

[ Mark the similarity of this definition with the time of presentday railway system ; the rail way authorities reckon time from 1 A. M. to 12 P. M ].

मित—। पूर्वाचार्य्यैः कालस्य विविधाः संज्ञाः कृताः, उपसर्ज्जनस्य च अपि लक्षणम् निर्द्दिष्टम्। उपसर्ज्जनं = विशेषणम्, गौणम्, अप्रधानम् इति यावत्। तथाहि तेषां काचिदेका परिभाषा—"अहरुभयतोऽर्द्ध-रात्र एषोऽद्यतनः कालः"। अस्यैव अर्थः प्रकटितः श्रीमतादीक्षितेन—अतीतायाः रात्रेः, गतायाः रात्रेः, पश्चार्द्धेन द्वि-प्रहरपरिमितरजन्याः अनन्तरस्थितेन समयेन तथा आगामिन्याः रात्रेः पूर्वार्द्धेन पूर्वभागेन सहितः दिवसः अद्यतनः इति परिभाषया उच्यते। एवम् "अप्रधानम् उपसर्ज्जनम्" इति उपसर्ज्जनस्य लक्षणः। अस्यैवार्थः—विशेषणम् उपसर्ज्जनम्

यत् विशेषणं गौणम्, अप्रधानम् इति यावत् भवति, तदेव उपसर्ज्जनम् इति परिभाषां लभते।

कालोपर्ज्जने कालस्य तथा उपसर्ज्जनं च कालस्य या परिभाषा, उपसर्ज्जनस्यापि या परिभाषा, इत्यर्थः, तुल्यम् समानमेव "अशिष्ये" भवतः इत्यर्थः, नितराम् एव त्यक्तव्ये इति भावः। कथमितिचेत्—लोकप्रसिद्धेः—लोकव्यवहारतः एव सिद्धत्वात्। यथार्थो लोकत एव सिद्धः, किं तत्र प्रयत्नेन।

[ननु यदि एवम्भूतः खलु व्यापारः, तर्हि कथं न पूर्वसूत्रमध्ये एव कालोपसर्ज्जनयोरन्तर्भावः न कृतः? कथं वा इदं पृथक् सूत्रनिर्माणमिति चेत्—उच्यते। न केवलं कालोपार्ज्जने, अपिच अन्यदपि एवं जातीयम् अशिष्यम् अस्ति इति ज्ञापनार्थम्। तथाच पूर्वाचार्य्याः परिभाषन्ते "मत्वर्थे बहुव्रीहिः, पूर्वपदार्थप्रधानोऽव्ययीभावः, उभयपदार्थप्रधानो द्वन्द्वः इत्येवमादि। तदपि अशिष्यम्" इति काशिका]।

१३०० । विशेषणानां चाजातेः । ( १।२।५२ )

**दी—। लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्ज्जयित्वा। पञ्चाला रमणीयाः। गोदौ रमणीयौ। अजातेः किम्? पञ्चाला जनपदः। गोदौग्रामः।**

Adjectives, qualifying the words, of which suffixes elide, follow the original number and gender of the said words except when they imply some particular class (or qualify some particular class).

मित—। इदं सूत्रं "लुपि युक्तवद् व्यक्तिवचने" (१।२।५१) इत्यस्मात् अनन्तरम् एव स्थितः। तस्मात् च "लुपि" इति पदम् अनुवर्त्तते, तत् च लुपीति पदं षष्ठ्या विभक्त्या विपरिणतं सत् "लुपः" इति रूपं गृह्णत् अनेन सूत्रेण सह सम्बध्यते। "युक्तवद्व्यक्ति वचने" इत्यस्यापि अत्र अनुवृत्तिस्तेनास्य सूत्रस्य इयमेव अभिव्यक्तिः—"लुपः विशेषणानां युक्तवद् व्यक्तिवचने च अजातेः"। 'लुपः' लुबर्थस्य

'विशेषणानाम् अपि' तद्वत् युक्तवत् प्रकृतिवत् इत्यर्थः 'व्यक्तिवचने' स्तो 'जाति' जाति वाचक-विशेषणं जातिवाचकशब्दस्य विशेषणं वा वर्ज्जयित्वा।

अयम् भावः—प्रत्ययस्य लुपि सति यथा प्रकृतिवत् लिङ्गवचने स्तः, एवम् लुप्त-प्रत्ययानां पदानां यानि विशेषणानि, तेषाम् अपि प्रकृतिवत् लिङ्गवचने भवतः।

यथा—पञ्चालानां निवासो जनपदः पञ्चालाः। पञ्चालाः रमणीयाः। अत्र जनपदस्य एकत्वे अपि यथा पञ्चालपदस्य "जनपदे लुप्" इति प्रत्ययलुपि सति बहुवचनम् एव अवतिष्ठते, तथा लुप्तप्रत्ययस्य पञ्चालपदस्य यत् विशेषणं रमणीयम् इति पदं, तदपि पञ्चालशब्दवत् बहुवचनान्तमेव भवति। "गोदौ रमणीयौ"—गोदयोः वासो जनपदः इति जनपदे लुपि प्रकृतिवत् लिङ्गवचनं तेन गोदौ इति द्विवचने रूपम्। तस्य लुप्त-प्रत्ययस्य गोदौ इति पदस्य यत् विशेषणं रमणीयम् इति पदं, तदपि गोदौ इतिवत् द्विवचनान्तमेव। "जातिं वर्जयित्वा"—

अस्यार्थः—जातिवाचकं किञ्चित् पदं लुप्तप्रत्ययान्तपदस्य विशेषणतया अवतिष्ठते चेत्, तत् तु नैव प्रकृतिवत् लिङ्गवचने भजते। तथाहि पञ्चालाः जनपदः। अत्र जातिवाचकः शब्दः जनपदः पञ्चालाः इति बहुवचनान्तस्य लुप्तप्रत्ययस्य पदस्य विशेषणतया अवभासते, अतः जनपदेति पदस्य जातिवाचित्वात् न तस्य पञ्चालाः इति शब्द इव प्रकृतिवत् लिंगवचने। तेन पञ्चालाः इति पदस्य बहुत्वेऽपि जनपद इत्यस्य तु एकवचनान्तत्वं, तत् तु अभिधेयस्य विषयस्य (अत्र जनपदस्य इत्यर्थः) एकत्वानुसारेणैव भवति इति बोद्धव्यम्। एवं गोदौ ग्रामः। अत्र द्विवचनान्तत्वेऽपि गोदौ इत्यस्य ग्राम इति पदस्य गोदौ इति शब्द इव नहि प्रकृतिवत् लिंगवचने, तस्य जातिवाचित्वात्. तस्य एकवचनान्तत्वं तु अभिधेयस्य विषयस्य (अत्र ग्रामस्य इत्यर्थः) एकत्वम् अनुसृत्य इति ज्ञेयम्।

"जात्यर्थस्य अयम् युक्तवद्भावप्रतिषेधः। तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति" इति काशिका।

अयमाशयः—जातिवाचकशब्दस्य यथा प्रकृतिवत् लिंगवचने न स्तः, तथा जातिवाचकशब्दस्य विशेषणं किञ्चित् भवति चेत्, तस्यापि जातिवाचकशब्द इव प्रकृतिवत् लिंगवचने न स्तः। तथाहि—पञ्चालाः जनपदः रमणीयः बह्वन्नः। गोदौ

ग्राम: रमणीय: वह्वन:। अत्र पूर्वोदाहरणे रमणीय इत्यस्य वह्वन्न इत्यस्य च, जनपद इति पदस्य विशेषणतया न तयो: प्रकृतिवत् लिंगवचने, अपितु तयो र्यो विशेष्य: जनपद इति शब्द: स इव तयो: लिंगवचने भवत:। द्वितीयोदाहरणे अपि एवम्।

**टी—। हरीतक्यादिषु व्यक्ति: (वा ७१५)—हरीतक्या: फलानि हरीतकय:। खलतिकादिषु वचनम् (वा ७१६)—खलतिकस्य पर्व्वतस्य अदूरभवानि खलतिकं वनानि। मनुष्य लुपि प्रतिषेध: (वा ७१६)—मनुष्यलक्षणे लुवर्थे विशेषणानां न। लुवन्तस्य तुभवतीत्यर्थ:। चञ्चा अभिरूप:।**

Words like Haritaki ( हरीतकी ), after which the suffixes elide [ by the rule हरीतक्यादिभ्य—४।३।१६७ ) ] follow the original gender only ( and not the number ). Words—beginning with खलतिक ( and some others falling within the category of खलतिकादि ) follow the original number only ( and not the gender )—when the suffixes after them, elide [ see the rules अदूरभवश्च ( ४।२।७० ) and वरणादिभ्यश्च ( ४।२।८२ ) ]

Adjectives that qualify a word ( or words )—after which a suffix ( or suffixes ) elides—only to denote a human figure, do not follow the original number and gender of the word, though the word itself follows them.

मित—। हरीतक्यादिषु इति। हरीतक्यादि यथा—हरीतकी। कौशातकी। नख, रजनी। शष्कण्डी, दाडी, दोडी, श्वेतपाकी, अर्जुनपाकी, काला, द्राक्षा, ध्वांक्षा, गर्गरिका, कण्टकारिका, शेफालिका।

एभ्य: हरीतक्यादिभ्य "हरीतक्यादिभ्यश्च" ( ४।३।१६७ ) इति सूत्रेण फले अभिधेये प्रत्ययस्य लुप् भवति। लपि प्राप्ते सति पुनश्च लुपो विधानम् तु लुपि प्रकृतिवद्भाव: भवेदिति ज्ञापनार्थम्।

ननु प्रकृतिवद्भावे सति प्रकृतिवत् लिंगं वचनं च भवेताम् इति प्राप्ते कथयति-हरीतक्यादिषु व्यक्तिरिति। हरीतक्यादिषु शब्देषु प्रत्ययलुपि सति प्रकृतिवत् लिंग-मेव भवति, न खलु वचनं, वचनं तु अभिधेयवदेव भवेत्। हरीतक्याः फलानि इति "हरीतक्यादिभ्यः" (४।३।१६७) इति सूत्रेण प्रत्ययस्य लुप्। तथा सति हरीतकीशब्दस्य प्रकृतिवदेव लिंगं—तेन स्त्रीलिंगत्वम्। परं वचनं तु फलानि इति अभिधेयस्य वचनम् अनुसरति तेन बहुवचनं—अतः हरीतक्यः इतिरूपम्।

खलतिकादिषु इति। अदूरभवश्च (४।२।७२) इति सूत्रेण अण् प्रत्ययस्य, तथा "वरणादिभ्यश्च" (४।२।८२) इति सूत्रेण चातुरर्थिकप्रत्ययस्य च खलतिकादिभ्यः शब्देभ्यः लुप् स्यात्। लुपि सति "लुपि युक्तवद्व्यक्तिवचने" (१।२।५१) इति सूत्रेण प्राप्ते तु प्रकृतिवत् लिंगवचने कथयति खलतिकादिषु इति। प्रत्ययस्य लुपि सति खलतिकादिषु प्रकृतिवत् वचनम् एव स्यात् न तु लिंगम्। खलतिकस्य पर्वतस्य अदूरभवानि वनानि इति खलतिकशब्दात् "वरणादिभ्यश्च"ति प्रत्ययस्य लुप्। तथा सति खलतिक इति लुप्प्रत्ययान्तस्य प्रकृतिवत् वचनम् एव भवेत्; तेन अस्य एकवचनान्तत्वं, अपि च अस्य लिंगं तु अभिधेयम् (वनानि इत्येवम्) अनुसरेत्, तेन अस्य क्लीवत्वम न खलु खलतिकइति प्रकृतिवत् पुंलिंगत्वं—खलतिकं वनानि।

मनुष्यलुपीति। "इवे प्रतिकृतौ" इति सूत्रम् (५।३।९६)। अस्यार्थः—"इवार्थे तद्विशेषणं प्रतिकृतिः। प्रतिकृतिलक्षणे इवार्थे कन् स्यात्। अश्वप्रतिकृतिरश्वकः" —इति भाषावृत्तिः। ततः "संज्ञायां च" इति सूत्रं, (५।३।९७)। ततः "लुम्मनुष्ये" इति सूत्रम् (५।३।९८)। अत्र संज्ञायाम् इत्यस्य अनुवृत्तिस्तेन अस्यार्थस्तु—"संज्ञायां विहितस्य कनो मनुष्ये अभिधेये लुक् भवति। चञ्चेव मनुष्य चञ्चा, दासी, खरकुटी"—इति काशिका।

एवम् मनुष्ये अभिधेये सति, यस्मात् शब्दात् प्रत्ययस्य लुप् स्यात्, तस्य प्रकृति-वल्लिङ्गवचनत्वेऽपि, तस्य विशेषणानां तु न प्रकृतिवत् लिङ्गं न वा वचनं स्यात्—अपि तु अभिधेयवत् एव तस्य लिंगवचने स्तः। "चञ्चा तृणमयी प्रतिमा, तत् सदृशी मनुष्यः चञ्चा। 'इवे प्रतिकृतौ' इत्यधिकारे, 'संज्ञायाम्' इति कनः 'लुम् मनुष्ये' इति लुप्"—इति बालमनोरमा। चञ्चा अभिरूपः।

अत्र लुप्प्रत्ययान्तस्य चञ्चा इति शब्दस्य मनुष्ये अभिधेये सति नैव अभिधेयवत् लिंगवचनं—तेन नास्य पुंलिंगता। अपि तु "लुपि युक्तवद्व्यक्तिवचने" इति प्रकृतिवत् लिंगवचने एव तेन अस्य स्त्रीलिंगता, परं तस्य (चञ्चेति शब्दस्य) यत् विशेषणम् अभिरूप इति पदं, तस्य तु अनेन "मनुष्यलुपि प्रतिषेधः" इति वार्त्तिकसूत्रेण न खलु प्रकृतिवत् लिंगत्वम्, तेन नैवास्य स्त्रीलिंगता—अपितु अस्य योऽभिधेयः मनुष्यः, स इव अस्य लिंगं तेन अस्य पुंलिंगत्वम्। अस्य वचनमपि अभिधेयवत् भवेत्। अत्र तु प्रकृतिस्थाने, अभिधेयस्थले च उभयत्रैव एकवचनं विद्यते तेन न किञ्चित् पार्थक्यम्। परं यत्र प्रकृतिवचनस्य तथा अभिधेयवचनस्य च परस्परं विरोधः स्यात्, अदा अस्य अभिधेयवदेव वचनं भवेदिति बोध्यम्। एवम् "वध्रिका दर्शनीयः" इति काशिका।

समाप्तं प्रासंगिकम्, पुनरपि प्रकृतम् अनुसरति—

## १३०१। वरणादिभ्यश्च। ४।२।८२॥

**टी—। अजनपदार्थ आरम्भः। वरणानाम् अदूरभवं नगरं वरणाः।**

Suffixes used in the four aforesaid senses, elide when they come after such word as fall within the category of वरणादि (list) if it do not imply a tract of land, abounding with human habitation.

मित—। "जनपदे लुप्" इत्यतः परम् एव इदं सूत्रं वर्त्तते। तस्मात् "लुप्" इत्यस्य अत्र अनुवृत्तिः। तेनायं भावः—वरणादि शब्देभ्यः चातुरर्थिकप्रत्ययस्य लुप् स्यात्। ननु कथं पृथक् सूत्रकरणमिति चेत्—उच्यते "अजनपदार्थः आरम्भः।" पूर्वसूत्रे जनपदे वाच्ये लुप् स्यात्, अत्र तु जनपदात् अन्यस्मिन्नपि अभिधेये सति वरणादिशब्देभ्यः चातुरर्थिकप्रत्ययस्य लुप् स्यात् इति विहितम्। लुपि सति प्रकृतिवदेव लिङ्गवचने स्याताम्। वरणा इति काश्याः उत्तरतः अवस्थिता काचित् नदी।

कारणोम् अनु प्रवहति इति तस्याः गौरवम्। तेन गौरवे बहुवचनं वरणानाम् इति। वरणानाम् अदूरभवम् नगरम् इति "अदूरभवश्च" (४।२।७०) इति सूत्रेण विहितः अण् प्रत्ययान्तस्य तु अनेन लुप्; लुपि सति युक्तवद्भावस्तेन लुप्—प्रत्ययान्तस्य वरणा-शब्दस्य अभिधेये अपि नगरे प्रकृतिवत् (प्रत्ययस्य प्रवृत्तेः प्राक् अवस्थितः वरणा इति शब्द इव) स्त्रीलिंगत्वं, बहुवचनं च; तेन वरणाः ग्रामः नगरं वा। आकृतिगणोऽयं वरणादिः—तेषु केचित् उल्लिख्यन्ते। कटुबदरी—कटु बदर्याः अदूरभवः ग्रामः कटु बदरी इति। शिरीषाः। काञ्ची। गोदौ। पर्णी। शृंगी। शाल्मलिः। मथुरा। उज्जयिनी। गया। तक्षशिला इत्यादयः।

१३०२। शर्कराया वा ॥४।२।८२॥

टी—। अस्मात् चातुरर्थिकस्य वा लुप् स्यात्।

Suffixes, usual in the four afore-said senses, optinally elide when after the word शर्करा।

मित—। शर्करा इति शब्दात् चातुरर्थिक—प्रत्ययस्य विकल्पेन लुप् भवति। उदाहरणं परसूत्रे द्रष्टव्यम्।

१३०३। ठक्छौ च ॥४।२।८४॥

टी—। शर्करायाः एतौ स्तः। कुमुदादौ वराहादौ च पाठ-सामर्थ्यात् पक्षे ठच्कको। वा-ग्रहणसामर्थ्यात् पक्षे औत्सर्गि-कोऽण्। तस्य लुब्विकल्पः। षड्रूपाणि। शर्करा—शार्करम् —शार्करिकम्—शर्करीयम्—शर्करिकम्—शार्करकम्।

The suffixes ठक् and छ also are attached to the word शर्करा। Rest easy. For the significance of "वा" in the previons rule—See Tika.

मित—। शर्कराभिनिर्वृत्तम् इति "तेन निर्वृत्तम्" (४।२।६८) इति सूत्रेण अण् प्रत्ययः। अयं च औत्सर्गिकः प्राथमिकः। तेन अणि सति शार्करम् इति

रूपम्। "शर्करायाः वा" (४।२।८२) इति सूत्रेण अण् प्रत्ययस्य विकल्पेन लुप्—तेन लुप्पक्षे शर्करा इति रूपम्। लुपि सति प्रकृतिवत् लिंगवचने, तेन अस्य स्त्रीलिंगता। अस्मिन् सूत्रे तु ठक्-छौ इति विधीयते यत् शर्करायाः एतौ प्रत्ययौ स्तः। प्रत्ययद्वयम् अण् प्रत्ययस्य अपवादभूतम्। शर्करायाः ठक्—तेन शार्करिकम्। ठक् स्थाने इकादेशः। पक्षे छ—तेन शर्करीयम्। छ स्थाने ईयादेशः। शर्करा शब्दस्य कुमुदादिगणे पाठात् कुमुदादिभ्यश्च—तेन शर्करिकम्। वराहादिगणे अपि पठात् वराहादिभ्यः कक्—तेन शर्करकम् इतिचरूपम्।

ननु शर्करायाश्च इत्येव सूत्रं कर्त्तुम् उचितम्। तथा सति शर्कराशब्दात् चातुरर्थिक—प्रत्ययस्य लुप् स्यात्, लुपः अप्राप्तिपक्षे ठक्छौ इति प्रत्ययौ प्रसज्येयाताम्; तर्हि कथं पूर्व्वसूत्रे वा-ग्रहणम् इति आशङ्कायाम् समाधत्ते—वा-ग्रहण सामर्थ्यात् लुपः अप्राप्तिपक्षे "तेन निर्वृत्तम्" इति औत्सर्गिकः अण् प्रत्ययः स्यात्। यद्यपि तस्य अपवादौ इव दृश्येते ठक्छप्रत्ययौ, तथापि तौ तम् अण्प्रत्ययं वारयितुम् न शक्यौ इति ज्ञापनार्थम् एव वा-ग्रहणम्।

१३०४। **नद्यां मतुप्** ॥४।२।८५॥

**टी—। चातुरर्थिकः। इक्षुमती।**

The suffix मतुप is attached in either of the four aforesaid senses to words, provided that (by the word newly formed) a river (नदी) is implied.

मित—। नद्याम् अभिधेयायाम् मतुप् प्रत्ययः स्यात् चतुर्षु अर्थेषु। इक्षूणां निवासः इति इक्षुमती नदी। एवं उदुम्बरा यस्यां सन्ति; उदुम्बरा-वती नदी। मशकावती, पुष्करावती द्रुमती।

[ ननु भागीरथी भैमरथी इत्यादौ कथं न भवति इति चेत्—श्रूयताम्। "मतुवन्तस्यातन्नामधेयत्वात्" इति काशिका, मतुप् प्रत्ययान्तपदेन अत्र नदी न अभिधीयते अतो मतुप् न स्यात्। ]

१३०५। **मध्वादिभ्यश्च** ॥४।२।८६।

**दो—। मतुप् स्यात् चातुरर्थिकः। मधुमान्। अनद्यर्थ आरम्भः।**

Words, that fall within the category of मध्वादि class, take the suffix मतुप् in either of the four aforesaid senses, ( though a river may not be implied ).

मित—। मधुप्रभृतिभ्यः शब्देभ्यः चतुर्षु अर्थेषु मतुप् प्रत्ययः स्यात्, नद्याम् अनभिधेयायाम् अपि। मधूनां निवासः इति मधुमान्। "नद्याम् अनभिधेयायाम् अपि" इत्येव ज्ञापयितुम् "अनद्यर्थ आरम्भः" इत्युक्तः श्रीमता दीक्षितेन। मध्वादि यथा—मधु। बिस। बिसानां निवासः इति बिसवान्, देशः। स्थाणु। मुष्टि। इक्षु। वेणु। रम्य। ऋक्ष। कर्कन्धु। शमी। किरीर। हिम। किशरा। शर्पणा। मरुत्। दार्वाघाट। शर। इष्टका। तक्षशिला। शक्ति। शलाका इत्यादि।

**१३०६। कुमुदनड़वेतसेभ्यो ड्मतुप् ॥४।२।८७॥**

**दो—। कुमुद्वान्। नड्वान्। वेतस्वान्। आद्ययोः "झय" (सूत्र १८८८) इति, अन्त्ये 'मादुपधायाः—' (सू १८८७) इति वक्ष्यमाणेन वः। "महिषाच्चेतिवक्तव्यम्।" (वा २७६१)। महिष्मान् नाम देशः।**

The suffix ड्मतुप् is attached to the words कुमुद, नड़ and वेतस in either of the four aforesaid senses. [ The ड of ड्मतुप signifies that the टि of these words must elide]. The म of मतुप is replaced by व, with reference to the first two words by the rule "झयः" ( ८।२।१० ), and with reference to the last word by the rule "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" (८।२।९), both to come later on. The word महिष also takes this suffix in the same sense.

मित—। कुमुद नड़ वेतस इति एतेभ्यः शब्देभ्यः ड्मतुप् प्रत्ययो भवेत्, चतुर्षु अर्थेषु। ड्मतुप् इति प्रत्ययस्य यो डकारः, स इत्। तेन डकारेत्त्वात् कुमुदादि-शब्दानां "टि"भागस्य लोपः। कुमुदाः अस्मिन् सन्तीति ड्मतुप्—टेर्लोपः; तेन अकारस्य लोपात् कुमुद्वान् इतिरूपम्। नड़ाः अस्मिन् सन्तीति ड्मतुप्। टेर्लोपस्तेन अकारस्य लोपात् नड्वान् इति रूपम्। एवं वेतसाः अस्मिन् सन्तीति ड्मतुप्—टेर्लोपस्तेन अकारस्य लोपात् वेतस्वान् इतिरूपम्। वेतस्वती इति काचित् नदी। ननु कथम् एषु शब्देषु मतुप् प्रत्ययस्य मकारस्थाने वकारो दृश्यते इति चेत् उच्यते? कुमुद्वान्, नड्वान् इति पदद्वये "झयः" इति (८।२।१०) सूत्रबलात्, तथा "वेतस्वान्" इत्यत्र "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" (८।२।९) इति सूत्रबलात् मकारस्थाने वकारः। सूत्रद्वयं अग्रे विद्यते, तेन पश्चादेव आगमिष्यति।

"महिष" इति शब्दात् च चातुरर्थिकः ड्मतुप् प्रत्ययः स्यात्—इति वार्त्तिक-कारः कात्यायनः कथयति। महिषाः अस्मिन् सन्तीति ड्मतुप्—टेर्लोपस्तेन अकारस्य लोपात् महिष्मान् इतिरूपम्। महिष्मान् नाम देशः।

## १२०७। नडशादाड्ड्वलच्।४।२।८८।

## दी—। नड्वलः। "शादो जम्बालघासयोः" इत्यमरः।

**शाद्वलः।**

The suffix ड्वलच् is attached to नड़ and शाद in either of the four aforesaid senses.

मित—। नडशब्दात् तथा शादशब्दात् च चातुरर्थिकः ड्वलच् प्रत्ययः स्यात्। चतुर्षु अर्थेषु येन केनचित् अर्थेन सह यथासम्भवम् सम्बन्धः। तथाहि नड़ाः सन्ति अस्मिन् इति विग्रहे नड़शब्दात् ड्वलच्। डकारेत्—तेन डित्त्वात् टेर्लोपस्तथासति नड़ शब्दस्य अन्तिमस्य अकारस्य लोपः। ततः नड्वलः इतिरूपम् नडप्राये नड्वान् नड्वल इत्यपि इत्यमरः। शादशब्दस्य कोऽर्थः इति प्रश्ने प्रतिवक्ति—"शादो" इति जम्बाल इत्यर्थे तथा घास इत्यर्थे च शादशब्दः प्रयुज्यते इति अभिधान-कृतः अमरसिंहस्य वचनम् [तथा च रघौ—"मृगाध्यासितशाद्वलानि"]। शादाः सन्ति

अस्मिन् इति विग्रहे ड्वलच्। डित्वात् टेर्लोपस्तया सति शाद इत्यस्य अन्तिमस्य अकारस्य लोपस्तेन शाड्वलम् इति रूपम्। "शाड्वलं शादहरिते इति च"—इति बालमनोरमा। "शय्याशाड्वलमासनं शुचिशिला"—इति भाषावृत्तिधृतवचनम्।

१३०८। शिखाया वलच् ॥४।२।८९॥

टी—। शिखावलम्।

The suffix वलच् is attached to शिखा and we have the word शिखावलम्।

मित—। शिखाशब्दात् वलच् प्रत्ययः स्यात्—स च चातुरर्थिकः, पूर्व्वसूत्रवत् अत्रापि यथासम्भवमेव अर्थसम्बन्धः। शिखाः सन्ति अस्मिन् इति शिखावलम् नाम नगरम्। शिखावलः केकी। ननु 'दन्तशिखात् संज्ञायाम्' इति मतुवर्थकः वलच् प्रत्ययः विद्यते तर्हि किमनेन—उच्यते तत्र तु अदेशे अपि वलच् प्रत्ययः स्यात्, अत्र तु देशे एव। "तदस्मिन् अस्ति इति तन्नाम्निदेशे एव वलच् प्रत्ययः प्रवर्त्तते—इति बोध्यम्। तदर्थे प्रयुक्तस्य अणोऽयं वलच् प्रत्ययः बाधकः" इति बालमनोरमा।

१३०९। उत्करादिभ्यश्छः ॥ ४।२।९०।

टी—। उत्करीयः।

The word उत्कर and some other falling within the category of उत्करादि, take the suffix छ (transformed into ईय) in one of the either aforesaid senses. The word उत्कर stands for the name of a country.

मित—। उत्कर इत्येवमादिभ्यः चातुरर्थिकः छप्रत्ययः स्यात्। छ स्थाने ईयादेशः। प्रकृतिप्रत्यययोर्यथासम्भवम् अर्थसम्बन्धः। उत्करेण निर्वृत्तम्, इत्यर्थे; यद्वा तस्य निवासः इत्यर्थे, अथवा तस्य अदूरभव इत्यर्थे उत्कर शब्दात् छ प्रत्ययः, तेन उत्करीय इति पदम्। तत् च देश-विशेषस्य संज्ञा। उत्करादि यथा—उत्कर। शफरे छप्रत्यये शफरीयम् इति पदम्। संफल। पिप्पल। पिप्पलीमूल। अश्मन्। अर्क। पर्ण। सुवर्ण। खलाजिन्। इडा। अग्नि।

तिक ; कितव । आतप । अनेक । पलाश । तैगाद ; पिचुक । अश्वत्थ ; शकाचुद्र । भस्रा । विशाला । अवरोहित । गर्त ; शाल । अन्या । जन्या ; अजिन । मञ्च । चर्मन् । उत्क्रोश । शान्त । खदिर । शूर्पणाय । श्यावनाय । नैवाकव । नितान्त । वृक्ष । इन्द्रवृक्ष । आर्द्रवृक्ष । अर्जुनवृक्ष ।

१३१० । नडादीनां कुक् च ॥ ४।२।९१ ॥

टी— । नडकीयम् 'कुञ्चाह्रस्वत्वं च' (गणसूत्रम् ८०)। कुञ्चकीय । "तक्षन्नलोपश्च" (गणसूत्रम्)। तक्षकीयः ।

The suffix छ, together with the particle कुक् before the suffix, is attached to words of the नडादि class. [They are नड । प्लक्ष । बिल्व । वेणु । वेत्र । वेतस । तृण । इक्षु । काष्ठ । कपोत etc.] ।

The word कुञ्चा (here) undergoes the shortening of the long vowel आ, when the suffix छ and the particle कुक् are attached to it. The नकार of the word तक्षन् (here) elides before the suffix छ—with the particle कुक् standing before it.

मित— । नड इत्येवमादिभ्यः शब्देभ्य छ-प्रत्ययः स्यात्, परे च छे प्रत्यये कुक् इत्यागमश्च भवति । अयं छप्रत्ययः चातुरर्थिकत्वेन यथासम्भवम् अर्थसम्बन्धः बोध्यः । छ स्थाने ईयादेशः—नडकीयम् । प्लक्षकीयम् । कुक् इत्यागमस्य उकारः, अन्तिमकश्च इत् । "कुञ्चेति" । कुक् इत्यागम-सहिते छप्रत्यये परे सति कुञ्चा इति शब्दस्य ह्रस्वत्वं स्यात् । आकारस्थाने अकारोभवति इत्यर्थः । कुञ्चा अस्मिन् सन्तीति कुञ्चकीयः । "तक्षन्निति"—तक्षन् इति शब्दस्य नकारस्य लोपः स्यात्, कुक् इत्यागमसहिते छप्रत्यये परे सति । तक्षकीयम् । इमे नडादिगणसूत्रे ।

१३११ । विल्वकादिभ्यश्छस्य लुक् ॥ ६।४।१५३ ॥

दी—। नड़ादयन्तर्गता विल्वकादयः, तेभ्यश्छस्य लुक् तद्धिते परे। विल्वा यस्यां सन्ति सा विल्वकीया। तस्यां भवा वैल्वकाः। वेत्रकीयाः—वैत्रकाः। छस्य किम्? छमात्रस्य लुग् यथा स्यात् कुको निवृत्तिर्माभूत्। अन्यथा 'सन्नियोगशिष्टानाम्" (प ८७) इति कुगपि निवर्त्तेत। लुग् ग्रहणं सर्व्वलोपार्थम्। लोपो हि यमात्रस्य स्यात्।

The suffix छ (and छ alone), attached to the word विल्वक and some others, falling within the category of विल्वकादि (a sub-class of नड़ादि and counted along with कुक), elides, when any suffix of the तद्धित class comes after it.

The word "छस्य" in the sutra is to show that छ only will elide and not कुक as well by the परिभाषा "सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः"। And the word लुक in the sutra is to signify elision (लोप) of the whole suffix ईय (coming in place of छ)।

मित—। "आपत्यस्य च तद्धितेनाति" (६।४।१५१) इति सूत्रात् "तद्धिते" इत्यस्य अनुवृत्तिरस्ति अस्मिन् सूत्रे। तेन विल्वकादिभ्यश्छस्य लुक् तद्धिते परे इति सूत्रयोजना। पूर्व्वसूत्रे नड़ादिगणाः पठिताः। तेषु "विल्व" इत्यारभ्य कपोत इति यावत् ये शब्दाः विद्यन्ते, तेभ्यः "नड़ादीनांकुक् च" (४।२।९१) इति सूत्रेण विहिते कुक् प्रत्यये सति यानि पदानि भवन्ति तानि एव विल्वकादिसंज्ञां भजन्ति। एभ्यः विल्वकादिभ्यः, विहितस्य छ-प्रत्ययस्य "यचिभम्" (१।४।१८) इति सूत्रेण भसंज्ञया अभिहितस्य तद्धितप्रत्यये परे सति लुक् स्यात्। विल्वाः यस्यां सन्ति सा इति विग्रहे विल्वशब्दात् "नड़ादीनां कुक् च" (४।२।९१) इति कुक्, छप्रत्ययश्च स्याताम् तेन विल्वकीया इति रूपम्। विल्वकीयायाम् भूमौ भवा इति विग्रहे भवार्थे अण् प्रत्ययः। विहिते च अण् प्रत्यये अनेन सूत्रेण छप्रत्ययस्य (छस्थाने जातस्य "ईय" इत्यस्य)

लुक् स्यात्; तेन विल्वक इत्यस्मादेव अण् युक्तं स्यात्। आदिस्वरवृद्धिः—अतः वैल्वकाः इतिरूपम्। एवम् वेत्राः यस्यां सन्ति सा इति विग्रहे कुक्, छत्र तेन वेत्रकीया। वेत्रकीयायां भूमौ भवाः इति अण्। अणि परे छस्य लुक् आदिस्वर-वृद्धिः—अतः वैत्रकाः इति पदम्।

इत्थम्—वेतसकीयायाम् भूमौ भवः इति वैतसकाः। वेणकीयायाम—वैणकाः। इक्षुकीयायाम्—ऐक्षुकाः। काष्ठकीयायाम्—काष्ठकाः। कपोतकीयायाम्—कापोतकाः। [ कुञ्चा शब्दस्य ह्रस्वत्वं च ग्राह्यं तेन—कुञ्चकीयायाम् भूमौ भवः इति क्रौञ्चकाः। ]

ननु विल्वकादिभ्यः परस्य विहितस्य प्रत्ययस्य एव अस्तित्वं, "नड़ादीनां कुक् च" ( ४।२।९१ ) इति सूत्रेण ज्ञाप्यते। तेन "विल्वकादिभ्यश्च लुक्" इत्थंरीत्या सूत्र-करणेनैव ज्ञापितं स्यात् यत् विल्वकादिभ्यः परस्य छप्रत्ययस्यैव लुक् स्यात् तद्धिते परे, तर्हि किमर्थं "छस्य" इत्यंशस्य अस्मिन् सूत्रे ग्रहणम् इति प्रश्ने उत्तरं पठति—छस्य किम्?—छमात्रस्य लुग् यथा स्यात् कुको निवृत्तिर्माभूत्। "छस्य" इति अंशस्य सूत्रग्रहणेन इदं ज्ञाप्यते—यत् छप्रत्ययस्य एव लुक् स्यात्, नतु कुक् इत्यस्य अपि।

ननु कुक् इत्यंशस्य लुक्सम्भावना कथं विद्यते इति आकाङ्क्षायाम् समाधत्ते—"सन्नियोग" इति।"सन्नियोग-शिष्टानां सह वा प्रवृत्तिः सहवा निवृत्तिः" इति परिभाषा। अयमर्थः—ये खलु सन्नियुक्ताः तेषां परस्परं मिलित्वा स्थितानाम् एकस्य अभावे उभयोरपि अभावः स्यात्। अत्र कुक् इति, छ इति च सन्नियुक्तौ—तेन छ इत्यस्य अभावे कुक् इत्यस्यापि अभावः स्यात्—अतः सूत्रे "छस्य" इति ग्रहणेन विशिष्य एव कथितं यत् छइत्यस्य एव निवृत्ति र्भविता, न खलु कुक् इत्यस्यापि।

ननु "ढे लोपोऽकद्र्वाः" ( ६।४।१४७ ) इति सूत्रात् "लोपः" इत्यस्य अनुवृत्त्या एव अत्र सूत्रे छ प्रत्ययस्य लोपे सिद्धे सति किमर्थं सूत्रे अस्मिन् "लुक्" इति उक्तम् इति प्रश्ने उत्तरं पठति—"लुग् ग्रहणम्" इति। लुक् इत्यस्य अस्मिन् सूत्रे ग्रहणेन ज्ञाप्यते यत् छस्थाने जातस्य "ईय" इत्यस्य सकलानाम् एव अक्षराणाम् अदर्शनं स्यात् न खलु, केवलं "य" इति अक्षरस्य, "प्रत्ययादर्शनस्य एव लुक्-

शब्दार्थत्वात् कृत्स्नस्य ईयस्य लोपो लभ्यते इति भावः—" इति बालमनोरमा। ननु किम् लोपशब्देन समग्रस्य प्रत्ययस्य अदर्शनं न स्यादिति आकाङ्क्षायाम् प्रवक्ति—"लोपोऽहि" इति। लोपं इति कथितं चेत्, यमात्रस्य एव च अदर्शनम् अभविष्यत् न खलु समग्रस्य "ईय" इति प्रत्ययस्य। कथं तत् ज्ञायते इति चेत् उच्यते—अस्मिन् सूत्रे लुक् इत्यस्य अग्रहणात्—"सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः" (६।४।१४७) इति सूत्रात् "य उपधायाः" इत्यस्य अनुवृत्तिर्भवेत्। "सूर्य" इत्यादि सूत्रे तु "ढे लोपो"—इति (६।४।१४७) "लोप" इत्यस्य अनुवृत्तिरस्ति। तेन अत्र सूत्रे "ढे लोपो—" इति सूत्रात् "लोपः" इत्यस्य, तथा "सूर्यतिष्य" इति सूत्रात् "य उपधायाः" इत्यस्य च अनुवृत्तेः बिल्वकादिभ्यः परस्य छ इत्यस्य स्थाने आदिष्टस्य "ईय" इत्यस्य उपधाभूतो यो यकार तस्य एव लोपः प्रसज्येत—न खलु समग्रस्य "ईय" इति प्रत्ययस्य। अत्र सूत्रे लुक् इति ग्रहणात् "य उपधायाः" इत्यस्य अनुवृत्तिर्नास्ति—उपधायाः यस्य लोपस्यैव विधानात्।

ननु "य उपधायाः" इति अस्मिन् सूत्रे अनुवृत्तं मा भूत्—तेन "ढे लोपः—" इत्यस्मात् लोपस्य एव अनुवृत्तौ ेष दोषः इति चेत्?—न। तथा सति "आदेः परस्य" (१।१।५४) इति सूत्रबलात् ईकारस्य एव लोपः स्यात्। यतः पञ्चमीनिर्देश न परस्य यद्विहितम्—तत्तस्यादेर्बोध्यम्। तस्मात् "लुक्" इति सूत्रे सुष्टु गृहीतम्।

इति तद्धिते चातुरर्थिक प्रकरणम्।

# अथ तद्धिते शैषिकप्रकरणम्

१३१२। शेषे ॥ ४।२।९२ ॥

टी—। अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषः, तत्र अणादयः स्युः। चक्षुषा गृह्यते चाक्षुषम् रूपम्। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदि पिष्टाः दार्षदाः सक्तवः। उलूखले क्षुण्णः औलूखलो यावकः। अश्वैरुह्यते आश्वोरथः। चतुर्भिरुह्यते चातुरं शकटम्। चतुर्दश्याम् दृश्यते चातुर्दशं रक्षः। "शेषे" इति लक्षणं चाधिकारश्च। 'तस्यविकारः' इत्यतः प्राक् शेषाधिकारः।

Suffixes such as अण् and the like—( as sanctioned by the rules beginning with प्राग्दीव्यतोऽण् ) are attached to words in very many senses other than those hitherto referred to, and these suffixes are said to pass by the general term शेषे प्रत्ययाः।

The term "शेषे" justifies the use of the suffixes exhibited in the vritti—in different senses though they are not spoken of in the later sutras, and that is why the term शेषे is said to be a लक्षणम् ; the domain of शेष extends up to the rule—तस्य विकारः ( ४।३।१३४ )।

मित—। "शेषे" इति। शेषे अवशिष्टे अर्थे प्रत्ययाः भवन्ति इत्यर्थः। के ते प्रत्ययाः ? विशेषेण अवचनात् "प्राग्दीव्यतोऽण्" ( ४।१।८३) इत्यस्मात् आरभ्य ये प्रत्ययाः इदानीम् कथितास्ते एव। अवशिष्टे अर्थे इति केभ्यः अवशिष्टे ? अपत्यार्थं प्रभृति चतुरर्थीं यावत् ये ये अर्थाः प्रोक्तास्तेभ्य एव अवशिष्टे—तेभ्यः अन्यस्मिन् एव अर्थे इति। अयम् अर्थः—अतः ऊर्द्ध्वं ये प्रत्ययाः वक्ष्यन्ते, ते खलु अपत्यार्थात्

आरभ्य चतुरर्थीं यावत् ये अर्था: प्रोक्तास्तेभ्य: अन्यस्मिन् एव अर्थे प्रयुज्यन्ते इति बोद्धव्यम्। "अन्यस्मिन् अर्थे" इति संज्ञया तत्रजात:, तत्र भव:, तस्मात् आगत:, तेन गृह्यते" इत्यादय: अर्था: अभिप्रेता:। "शेषे" इति लक्षणम् अधिकारश्च। "शेषे" इति अधिकारत्वस्वीकरणात् उत्तरसूत्रेषु अनुवृत्तिरस्ति इति ज्ञेयम्। शेषाधिकारश्च "तस्य विकार:" (४।३।१३४) इति सूत्रं यावत् वर्त्तते। "शेषे"—इति लक्षणम् अपि—तेन परसूत्रेषु अगृहीतेषु अपि अर्थेषु वृत्तौ प्रदर्शितेषु "चक्षुषा गृह्यते" इति ग्रहणादिषु अणादिप्रत्यया: विधीयन्ते। श्रावण: शब्द: श्रवणाभ्याम् गृह्यते इति श्रावण:। उपनिषदा प्रोक्त: इति औपनिषद:। ["तं तु औपनिषदम्पुरुषम् पृच्छामी"ति श्रुति:]। चतुर्द्दश्याम् दृश्यते इति चातुर्द्दशं रक्ष:। रक्ष: = राक्षस:। [कृष्णचतुर्द्दश्यां रात्रौ राक्षसा: वीक्ष्यन्ते इति आगम:]।

**१३१३। राष्ट्रावारपाराद् घखौ ॥ ४।२।९३ ॥**

**टी—। आभ्याम् क्रमात् घखौ स्त: शेषे। राष्ट्रिय:। अवारपारीण:। 'अवारपारात् विगृहीतादपि विपरीताच्चेति वक्तव्यम्।' (२७७१—२७७२)। अवारीण:। पारीण:। पारावारीण:। इह प्रकृतिविशेषाद् घादयष्टुट्युलन्ता: प्रत्यया उच्यन्ते। तेषां जातादयोऽर्थविशेषा: समर्थविभक्तयश्च वक्ष्यन्ते ॥**

The suffix घ (to be replaced by इय) and ख (to be replaced by ईन) are attached to राष्ट्र and अवार पार respectively in शेषे (i.e. to imply suitable and proper meanings). अवार, पार take ख separately and reversely also.

घ etc are here attached after special stems and in special senses of "तत्रजात:" etc. See tika also.

मित—। राष्ट्रशब्दात् शेषे घप्रत्यय: स्यात्, तथा अवार पार शब्दात् च ख-

प्रत्ययः स्यात्। घस्थाने इयादेशस्तथा खस्थाने च ईनादेशः। शेषे प्रत्ययद्वयं स्यात्—तेन यथासम्भवम् अर्थसम्बन्धः बोध्यः। राष्ट्रे भवः इति राष्ट्रशब्दात् घः—तेन राष्ट्रियः। "राजश्यालस्तु राष्ट्रियः।" अस्मिन्नर्थे राष्ट्रियशब्दस्य बहुलप्रयोगस्तु मृच्छकटिक-प्रकरणे दृश्यते। एवम् अवार पारशब्दात् खप्रत्यये सति अवारपारीनः। "अवार-पारात्" इति।—अवार पार इति शब्दं द्विधा विभज्य अवार इति पार इति शब्दद्वयं लभ्यते। आभ्याम् ख प्रत्ययः स्यात्—तेन अवार शब्दात् खः—अवारीणः, तथा पार शब्दात् खः—पारीणः। एवं अवार इति पार इति शब्दद्वयम् विपरीत क्रमेण विन्यस्य खप्रत्यये भवेत्—तेन पारावार इत्यस्मात् खः—पारावारीणः। खप्रत्यय-मारभ्य टुल्प्रत्ययं यावत् ये प्रत्यया इह लिख्यन्ते, ते विशिष्टाया प्रकृतेः एवस्युः। एते प्रत्ययाः "तत्र जातः, तत्रभवः" इत्यादौ विशिष्टे एव अर्थे विशिष्टाया एव प्रकृतेः भवेयुरितिज्ञेयम्। एवं "समर्थानां प्रथमाद्वा" (४।१।८२) इति सूत्रबलेन समर्थानां पदानां मध्ये सूत्रे प्रथमानिर्द्दिष्टेभ्य एव प्रत्ययाः स्युः।

## १३१४। ग्रामाद् यखञौ ॥४।२।९४॥

टी—। ग्राम्यः—ग्रामीणः।

The suffixes य and खञ् are attached to the word ग्राम।

मित—। अत्र "भवः" इत्यर्थे ग्रामशब्दात् य प्रत्ययः खञ् प्रत्ययश्च स्याताम्। य—ग्राम्यः। "यस्येति च" (६।४।१४८) इति सूत्रेण ग्रामशब्दस्य अकारलोपः। एवं खञ्—तेन ग्रामीणः। ग्रामीणः—ग्रामवासी इत्यर्थः। करजा ग्रामीणः, नन्दनावासी ग्रामीणः इत्यादयः वङ्गीयविप्राणां मध्ये लक्ष्यन्ते।

## १३१५। कत्त्र्यादिभ्यो ढकञ् ॥ ४।२।९५ ॥

टी—। कुत्सितास्त्रयः कत्त्रयः। तत्र जातादि—कात्त्रेयकः। नागरेयकः। ग्रामात् इत्यनुवृत्तेर्ग्रामेयकः।

The suffix ढकञ् is attached to words of the कत्त्र्यादि class.

मित—। कुत्सिताः निन्द्याः वयः इति "कुगतिप्रादयः" (२।२।१८) इति समासे कुशब्दस्य स्थाने कदादेशः। अतः कत्त्रय इति। कत्त्रि इत्येवमादिभ्यः शब्देभ्यः "तत्र जातः" इत्यादौ अर्थे ढकञ् प्रत्ययः स्यात्। ढकञ् इत्यस्य ञकार इत्। ढस्थाने इयादेशः। तेन कत्त्रि इत्यस्मात् तत्र जातः इत्यादौ अर्थे ढकञ् प्रत्यये सति कात्त्रेयकः इति रूपम्। ञित्वात् आदिस्वरवृद्धिः। एवम् नगरे भवः इति नागरेयकः। पूर्वसूत्रात् ग्रामपदोऽपि अत्र अनुवर्त्तते तेन ग्रामे जातः इति ढकञ्—ग्रामेयकः। कत्त्र्यादिर्यथा—कत्त्रि। उम्भि—उम्भेयकः। पुष्कर, पुष्कल, मोदन, कुम्भी, कुण्डिन, नगर, वञ्जी, भक्ति, माहिष्मती, चर्मण्वती, ग्राम, उख्या, कुल्याया यलोपश्च (कुभ्या इति भाषावृत्ति.)।

[कुल्यायाः यलोपश्च—तेन कौलेयकः—इति काशिका। कुभ्यायाः यलोपः—तेन कौम्भेयकः—इति भाषावृत्तिः]

**१२१६। कुलकुक्षि ग्रीवाभ्यः श्वास्यलङ्कारेषु ॥४।२।९६॥**

**दी—। कौलेयकः श्वा। कौलोऽन्यः। कौक्षेयकः असिः। कौक्षोऽन्यः। ग्रैवेयकोऽलंकारः। ग्रैवोऽन्यः।**

The suffix ढकञ् is attached to the words कुल, कुक्षि and ग्रीवा in the sense of a dog, a sword and ornament respectively.

मित—। कुलशब्दात् शुनि वाच्ये, तथा कुक्षिशब्दात् खड्गे वाच्ये, एवम् ग्रीवाशब्दात् ग्रीवायाम् परिधेये अलङ्कारे च वाच्ये ढकञ् प्रत्ययः स्यात्। कुले भवः इति कौलेयकः श्वा। गृहपालितः सारमेयः इत्यर्थः। शुनि वाच्ये इति किम्? कुलेभवः इति अण् कौलः। कौलः गौः। कौलशब्देन तान्त्रिकविशेषोऽपि उच्यते। कुक्षिः कोशः। कुक्षौ (कोशे) भवः इति कौक्षेयकः असिः। अन्यत्र तु कुक्षौ भवः इति अण् कौक्षः। ग्रीवासुभवः इति ग्रैवेयकः अलङ्कारः। तथाहि श्रीश्रीचण्डीग्रन्थे "नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम्"। अन्यत्र तु ग्रीवायां भवः इति अण् ग्रैवः।

**१२१७। नद्यादिभ्यो ढक् ॥४।२।९७॥**

दी—। नादेयम्। माहेयम्। वाराणसेयम्।

The suffix ढक् is attached to words of the नद्यादि class.

मित—। नदी इति एवम् आदिभ्यः शब्देभ्यः तत्र भवः इत्यादौ अर्थे (शैषिकः) ढक् प्रत्ययः स्यात्। नद्यां भवः इति ढक्। नादेयः, नादेयं जलम्। 'मही'-भूमिः—तस्याम् जातः इति माहेयः वृक्षः। वाराणस्यां भव इति वाराणसेयः जनः। नद्यादिर्यथा—नदी, मही, वाराणसी, श्रावस्ती—श्रावस्तेयः। कौशाम्बी, वनकौशाम्बी, काशफरी, खादिरी, पूर्वनगरी—पौर्वनगरेयम्, पाठा, माया, साल्वा, दार्वा, दाल्वा, सेतकी, वडवाशब्दस्तु वृषे वाच्ये नद्यादिमध्ये पतति। ढक् प्रत्यये परे आदिस्वर वृद्धिः। नद्यादीनाम् ईकारलोपश्च "यस्येति च" (६।४।१४८) इति सूत्रेण।

१३१८। दक्षिणा-पश्चात्-पुरसस्त्यक् ॥४।२।९८॥

दी—। दक्षिणा इत्याजन्तमव्ययम्। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः।

The suffix त्यक is attached to the words दक्षिणा, पश्चात् and पुरस्।

मित—। दक्षिणा, पश्चात्, पुरस् इति एतेभ्यः अव्ययशब्देभ्यः "तत्रजातः" इत्यादौ अर्थे त्यक् प्रत्ययः स्यात् शैषिकः। दक्षिणा इति तु न स्त्रीलिङ्गः सर्वनाम—तथा सति "सर्वनाम्नः वृत्तिमात्रे पुंवद्भावः" (२।१।२६—वार्त्तिक) इति नियमात् आकारस्य अदर्शनं स्यात्—अपि तु आकारान्त अव्ययशब्दः एषः, "दक्षिणादाच्" (५।३।३६) इति सूत्रेण दक्षिणशब्दात् आच् प्रत्ययेन निष्पन्नः। दक्षिणस्यां दिशि इति दक्षिणा। तत्रभवः इति त्यक्—दाक्षिणात्यः। दाक्षिणात्यः देशः। पश्चात् (५।३।३२) इति सूत्रेण अपरशब्दात् तात् प्रत्ययस्तेन पश्चात् इति रूपम्। तत्रभवः इति त्यक्—पाश्चात्यः। पाश्चात्यः देशः। पुरस्—पौरस्त्यः।

१३१९। कापिश्याः ष्फक् ॥४।२।९९॥

दी—। कापिश्यां जातादि कापिशायनम् मधु। कापिशायनी द्राक्षा।

The suffix फक् is attached to कापिशी।

मित—। कापिशीशब्दात् "तत्र जातः" इत्यादौ अर्थे फक् प्रत्ययः स्यात् शैषिकः। फक् इति स्थाने आयन इति आदेशः। कापिशी इति कश्चित् देशः। तत्र जात इति फक्—कापिशायनं मधु। कापिशीशब्दस्य ईकार लोपस्तु "यस्येति च" (६।४।१४८) इति सूत्रेण। फक् प्रत्ययस्य षकारः इत्—तेन "षिद्गौरादिभ्यश्च" (४।१।४१) इति सूत्रेण स्त्रीलिङ्गे ङीष् = कापिशायनी द्राक्षा।

[ बाह्लशब्दात् उर्द्दिशब्दात् पर्द्दिशब्दात् च फक् प्रत्ययः स्यात्—तेन बाह्लायनः। स्त्रियां—बाह्लायनी, और्द्दायनः—और्द्दायनी, पार्द्दायनः—पार्द्दायनी—इति काशिका—भाषावृत्तिकृताम् निर्द्देशः ]

## १३२०। रङ्कोरमनुष्येऽण् च ॥४।२।१००॥

**दी—। चात् ष्फक्। राङ्कवः गौः। राङ्कवायणः। अमनुष्ये इति किम्? राङ्कवको मनुष्यः।**

The suffix अण् as well as the suffix ष्फ् are attached to रङ्कु a word, denoting the name of a country,—provided that a human being is not implied.

मित—। रङ्कु इति कस्यचित् देशविशेषस्य नाम, तस्मात् रङ्कुशब्दात् अण् प्रत्ययः स्यात्, सूत्रे चकारस्य सत्त्वात् ष्फ् अपि च, मनुष्यादपरश्चेदभिधेयोभवति। रङ्कु इति देशनाम्। तत्र जातः इति शैषिकः अण्—राङ्कवः गौः—रङ्कुदेशोत्पन्नः गौरित्यर्थः। ष्फ्—राङ्कवायणः। यत्र तु कश्चित् मनुष्योऽभिधेयो भवति तत्र तु न अण् नापि ष्फक्, अपि तु "मनुष्यतत्स्थयोः" (४।२।१३४) इति सूत्रेण वुञ् प्रत्ययः स्यात्; तेन रङ्कुदेशीयो मनुष्यः इति वाच्ये "राङ्कवकः" मनुष्यः इति भवेत्। वुञ् स्थाने अकादेशः।

१३२१। द्युप्रागपागुदक्प्रतीचो यत् ॥४।२।१०१॥

टी—। दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्।

The suffix यत् is attached to दिव्, प्राच् अपाच् उदच् and प्रत्यच्।

मित—। "तत्र भवः" इत्येतस्मिन्नर्थे दिव्, प्राच्, अपाच्, उदच्, प्रत्यच्, इति एतेभ्यः शब्देभ्यः यत् प्रत्ययः स्यात् शैषिकः। दिवि भवः इति दिव् शब्दात् यत्—दिव्यम्। अत्र सूत्रे तु "दिव उत" (६।१।१३१) इति सूत्रनियमात् पदान्ते दिव् इति स्थाने उकारस्य अन्तादेशत्वात् "द्यु" इति उकारान्तनिर्देशः।

प्राचि प्रदेशे भवः इति यत्—प्राच्यम्। अपूर्व्वकात् अञ्चधातोः क्विपि प्रत्यये परे प्राञ्च् च् इति रूपम्। तस्मात् अनेन सूत्रेण यत प्रत्ययः। तद्धितप्रत्ययस्य यत् इत्यस्य उत्पत्तौ सुप्प्रत्ययस्य लुकि सति प्राञ्च् च् य इति स्थितम्। यत् प्रत्ययस्य तकारः इत्। ततः "अनिदिताम् हल उपधायाः क्ङिति" (६।४।२४) इति सूत्रेण नकारस्य लोपः, "अचः" (६।४।१३८) इति सूत्रेण अञ्च इत्यस्य अकार-लोपश्च। ततः "चौ" (६।३।१३८) पूर्व्वस्य (प्र इत्यस्य) अकारस्य दीर्घत्वं तेन प्राच्यम् इति सिद्धम्। अपाचि भवम् इति यत्—अपाच्यम्। एतदपि पूर्व्वोक्तया प्रणाल्या सिद्धम्। उदीचि भवम् इति उदीच्यम्। अत्र साधनप्रणालीतु पूर्व्ववदेव परं "उद ईत" (६।४।१३९) इति सूत्रबलात ईत्वम् इति विशेषः ज्ञेयः। प्रतीचि भवः इति प्रतीच्यम्। अत्रापि प्राच्यम् इतिवत साधन प्रणाली।

१३२२। कन्थायाष्ठक् ॥४।२।१०२॥

टी—। कान्थिकः।

The suffix ठक is attached to the word कन्था।

मित—। कन्था-शब्देन तिर्य्यकसूत्रवद्धवस्त्रखण्डसमूहः उच्यते। [कांथा इति वङ्गीयाः]। कन्था इति देशविशेषस्य संज्ञा इति केचन। कन्थाशब्दात ठकप्रत्ययो भवति शैषिकः। कन्थायां भवः इति कान्थिकः।

१३२३ । वर्णौ वुक् ॥४।२।१०३॥

टी— । वर्णूनदस्य समीपदेशो वर्णुः, तद्विषयार्थवाचिकन्याशब्दात् वुक् स्यात् । "यथाहिजातं हिमवत्सु कान्यकम् ।"

The suffix वुक (i.e. अक) is attached to the word कन्या, provided that it is produced in the country round the river वर्णु i.e the Indus.

मित— । वर्णुरिति सिन्धुनदस्य अपरनाम । तस्य अदूरभवः इत्यर्थे "सुवास्त्वादिभ्योऽण्" (४।२।७७) इति अण् प्रत्ययः । तस्य प्रत्ययस्य "जनपदे लुप" (४।२।८१) इति लुप् । तथा सति वर्णुर्नाम सिन्धुनदसमीपदेशविशेषः । तस्मिन् देशे या कन्या तस्याः वुक् प्रत्ययः स्यात् शैषिकः । अयं वुक्प्रत्ययः पूर्व्वसूत्रविहितस्य ठकप्रत्ययस्य अपवादः । वु स्थाने अकादेशः । आदिस्वरवृद्धिः —आकार लोपश्च । तेन कान्यकम् इतिरूपम् ।

१३२४ । अव्ययात् त्यप् ॥४।२।१०४॥

टी—"अमेहक्वतसित्रेभ्य एव" (वा २७७८) । "अमान्तिकसहार्थयोः ।" अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । परिगणनम् किम् ? उपरिष्टात् भवः औपरिष्टः । "अव्ययानां भमात्रे टिलोपः' (वा ४१८७) । अनित्योऽयं बहिषष्टिलोपविधानात् । तेनेह न । आरातीयः । शाश्वतीयः । 'त्यब् नेर्ध्रुवे इति वक्तव्यम्' (२७८०) । नित्यः । "निसो गते" (वा २७८१) ।

The suffix त्यप् is attached to indeclinables (अव्यय words).

(i) The varttika—bearing the no. 2779 definitely declares that the said suffix is attached to a certain number of inde-

clinables and they are the following :—(1) अमा, (2) इह, (3) क्व, (4) तसि (5) त्र ।

(ii) The indeclinable अमा implies nearness and association.

(iii) The varttika bearing the number 4187 here, states that the टि ( the last vowel together with the letters following it). of an indeclinable elide—when the said indeclinable is alleged to be classed as a "भ" sanctioned by the rule "यचि भम्" ( १।४।१८ ) ; but this rule does not hold good in all cases. because though बहिस् is an अव्यय still its टिलोप is separately enjoined in the other varttika.

(iv) The suffix त्यप is attached to the particle नि and the word thus formed (i.e. नित्य) means "eternal, or permanent."

मित— । अव्ययात् त्यप्प्रत्ययो भवति शैषिकः—इति सूत्रार्थः । परम् "अमेहक्व तसित्रेभ्य एव" इति वार्त्तिकसूत्रेण ज्ञाप्यते—यत् अमा, इह, क्व, तसि, त्र इत्येतेभ्य एव अव्ययेभ्यः त्यप् स्यात्, नान्येभ्यः । कथम् इति चेत् ? अभिधानात् एव । 'अमा इति अव्ययम् अन्तिक इत्यर्थे सह इत्यर्थे च प्रयुज्यते' एतस्मात् त्यप्— अमात्यः, इह—इति अव्ययम् अत्र इत्यर्थे प्रयुज्यते । एतस्मात् त्यप्—इहत्यः । क्व इति अव्ययं कुत्र इति अर्थे प्रयुज्यते । एतस्मात् त्यप् क्वत्यः । "क्वेयम् दुर्मतिस्तव" इति भाषावृत्तिकृता उद्धृतम् श्लोकाङ्गम्, तसि इत्यनेन तस् ( तसिल् ) प्रत्ययान्तः अव्ययः बोद्धव्यः, तेन ततः इति तस्प्रत्ययान्तात् अव्ययात् त्यप्—ततस्त्यः एवं इतस्त्यः । त्र इत्यनेन त्रप्रत्ययान्तोऽव्ययशब्दो ज्ञेयः । तेन तत्र इति त्र प्रत्ययान्त्यात् अव्ययात् त्यप्—तत्रत्यः । एवं यत्रत्यः । एभ्यः अन्यत्र न त्यप् । तेन उपरिष्टात् भवः इति उपरिष्टात् इति अव्ययात् न त्यप् अपितु अण् एव । अणि परे उपरिष्टात्—इत्यस्य टिलोपः तेन औपरिष्टः इति रूपम् । कथं टिलोपः इति आकाङ्क्षायाम् कथयति—"अव्ययानामिति", "यचिभम्" (१।४।१०) इति सूत्रेण यकारादिषु अजा-

दिषु च कप्-प्रत्ययावधिषु स्वादिषु असर्व्वनामस्थानेषु परतः पूर्व्वं भसंज्ञं स्यात्" ; यदा तु अव्ययं किञ्चित् अनेन विधानेन भसंज्ञां भजति, तदा तस्यटिलोपः भवेत्, अत अण्प्रत्ययः अजादिः, सुप्रत्ययम् आरभ्य कप्प्रत्ययं यावत् ये प्रत्ययाः सन्ति, तेषु अन्तर्भवति च तेन तस्मिन् अणि परे पूर्व्वस्य उपरिष्टात् इत्यस्यटिलोपः। ननु "भमाव" इति मातृशब्दस्य प्रयोगः—तेन सर्व्वेषाम् एव भसंज्ञायाम् अव्ययानां टिलोपः स्यात, न खलु "नस्तद्धिते" ६।४।१४४ ) इति विहितस्य नकारान्तस्य भस्य एव।

ननु सर्व्वेषां खलु भसंज्ञाभाजाम् अव्ययानां टिलोपे प्राप्ते—आरात् इति अव्ययात् विहितस्य छप्रत्ययस्य स्थाने ईयादेशे सति अनेन टिलोपः, तेन आरीय इति स्यात् ततः च अनिष्टम् स्यात् इति विज्ञापयति—"अनित्योऽयम् इत्यादि।' इदं टिलोप-विधानम् अनित्यं तेन सर्व्वत्र न प्रयुज्यते—तथा सति आरात् इत्यस्मात् छ-प्रत्यये परे न टिलोपः—तेन आरातीयः इति रूपम्। एवं शाश्वतः। छ-स्थाने जाते ईय-प्रत्यये परे सति आरात् इत्यस्य भसंज्ञाया खलु पदं संज्ञा। तेन पदत्वाभावात् "झलां जशोऽन्ते" ८।२।३९ इत्यनेन तकार स्थाने दकारो न स्यात्।

ध्रुव इत्यर्थे गम्ये नि इत्यस्मात् अव्ययात् त्यप् प्रत्ययः स्यात्—नित्य। "नियतं भवम् नित्यम्"—इति भाष्यम्।"अजो नित्यः शाश्वतोऽयं पुराणः"—श्रीमद्भगवद्गीता।

"निसो गते"—(वा २७८१)।

"गत" इत्यर्थे गम्ये निस् इति अव्ययात् त्यप् प्रत्ययो भवेत्। देशात् वर्णा-श्रमेभ्यः वा निर्गता इत्यर्थे निस् इत्यस्मात् त्यप्। निस् त्य इति स्थितम्। "आदेश प्रत्यययोः" ८।३।५९ इति सूत्रेण आदेशप्रत्ययावयवस्यैव सकारस्य षत्वं स्यात्। अपिच "अपदान्तस्यमूर्धन्यः" ८।३।५५ इति अपदान्तस्य एव सकारस्य मूर्द्धन्यत्वम्। अत्र तु "निस्" इत्यस्य सकारस्य आदेशप्रत्ययावयवत्वाभावात् तथा पदान्तत्वात् च न षत्वम्। तेन षत्वे अप्राप्ते सति तस्य विधानार्थं सूत्रयति—

: १३२५। ह्रस्वात्तादौ तद्धिते ॥८।३।१०१॥

दी—। ह्रस्वादिण: परस्य सस्य षः स्यात्तादौ तद्धिते। निर्गतो वर्णाश्रमेभ्यः निष्ट्यः चाण्डालादिः। "अरण्याण्णः (वा २७८२)। आरण्याः सुमनसः। "दूरादेत्यः" (वा २७८३)—दूरेत्यः। "उत्तरादाहञ्" (२७४४)। उत्तराहः।

A dental स standing after a short इण् is changed into a cerebral ष, when any suffix of the तद्धित class, beginning with the letter त, comes after.

(i) The suffix ण is attached to the word अरण्य।

(ii) The suffix एत्य is attached to the word दूर।

(iii] The suffix आहञ is attached to the word उत्तर।

मित—। ह्रस्वात् तादौ इति। ह्रस्वादिति पञ्चमी तद्धिते इति सप्तमी तादौ इति तद्धिते इत्यस्य विशेषणम्। इण्कोः (८।३।५७) इत्यस्मात इण् ग्रहणम् अनुवर्तते "सहे साढः सः" [८।३।५६] सूत्रतः स इत्यस्य अनुवृत्तिरत्र अस्ति। "अपदान्तस्य मूर्धन्यः" [८।३ ५५] इत्यस्मात मूर्धन्य इति अनुवर्तते तेन इत्थं सूत्रयोजना—ह्रस्वात् इणः सः मूर्धन्यः तादौ तद्धिते, ह्रस्वादिति इणः इत्यस्य विशेषणं तेन अयम अर्थः—ह्रस्वात इणः परस्य सस्य षः स्यात तकारादौ तद्धिते—यस्य तद्धितप्रत्ययस्य आद्यक्षरम् तकार इति।

तस्मिन परे सति ह्रस्ववर्णात इणः परस्थितसकारस्य मूर्धन्यः स्यात इति सरलार्थः, निर्गतः वर्णाश्रमेभ्यः इति निस् इत्यस्मात त्यप् प्रत्ययः। अनेन सकारस्य षत्वम् तथासति ष्टुनाष्टुः [८।४।५] इति सूत्रेण तकारस्य टुत्वं तेन निष्ट्य इति रूपं—निष्ट्यः चण्डालादिः, चन्डाला हि वर्णाश्रम—वहिर्भूताः। एवम् यजुसः [यजुर्वेदस्य] भावः इति त्व—प्रत्ययः। अनेन सूत्रेण सकारस्य षत्वं, तकारस्य टुत्वं तेन यजुष्टम्।

अरण्य इत्यस्मात णप्रत्ययः स्यात शैषिकः अरण्ये भवः इति णः आरण्यः

सुमनसः। धन्यानि पुष्पाणि इत्यर्थः। दूरादेत्यः —दूरशब्दात् तत्र भवः वा आगत इतिअर्थे एत्यप्रत्ययः स्यात—दूरेत्यः पथिकः, दूरादागत इत्यर्थः।

उत्तरादाहञ्—उत्तर इत्यस्मात् तत्र भव तत्रआगत इत्यर्थे आहञ् प्रत्ययः स्यात उत्तरस्मात भवः, वा आगत इति औत्तराहः "औत्तर इति तु असाधु"—बालमनोरमा। अत्र किञ्चित विवेच्यम् अस्ति "ह्रस्वं लघु" (१।४।१०) तथा "दीर्घं च" [ १।४।१२ ] इति सूत्रद्वये ह्रस्वस्य लघुसंज्ञा तथा दीर्घस्य गुरुसंज्ञा विधीयते। तयोः का सार्थकता? "संयोगे गुरु" [ १।४।११ ] इति सूत्रेण संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात, न खलु तदा तस्य दीर्घत्वम् अस्ति इति लघुगुरुसंज्ञयोः सार्थकता इतिचेत्, तस्य किं फलं लब्धम्? अत्रोच्यते—यजुषः भावः इति त्वप्रत्ययः तेन यजुष्ट्वम् इति स्थितिः—इति संयोगः तस्मिन् परे पूर्वस्य उकारस्य गुरुत्वं जायते—छन्दसि एव तस्य सार्थकता परं गुरुत्वे अपि उकारस्य तस्य दीर्घ इति आख्या अत्र न भवति। तेन 'ह्रस्वादिणः तादौ तद्धिते' इत्यनेन ह्रस्वात् उकारात् परस्थितस्य संयुक्तवर्णान्तर्गतस्य सकारस्य षत्वं स्यात इति दिक्।

[अत्रास्माकं वृत्तौ 'उत्तराहः' इति मुद्रणप्रमादः। "औत्तराहः" इति स्यात्।]

## १३२६। ऐषमोह्यःश्वसोऽन्यतरस्याम् ॥४।२।१०५॥

**वृ—। एभ्यस्त्यप् वा। पक्षे वक्ष्यमाणौ ट्युट्युलौ। ऐषमस्त्यम्। ऐषमस्तनम्। ह्यस्त्यम्—ह्यस्तनम्। श्वस्त्यम्—श्वस्तनम्। पक्षे शौवस्तिकं वक्ष्यते।**

The suffix त्यप् is optionally attached to the following words :—ऐषमः, ह्यः, and श्वः। In case of the absence of this suffix, ट्यु and ट्युल् suffixes to be spoken of hereafter, are joined to them ; and a fourth suffix, ठञ with तुट् may also be attached to श्वः only, giving rise to the form शौवस्तिकम्। [ ऐषमः is an अव्यय—meaning "In this year" ].

मित—। ऐषमः इति अव्ययम् "अस्मिन् वर्षे" इत्यर्थे प्रयुज्यते। तथाहि "परुत्परार्य्यैषमोऽब्दे पूर्वे पूर्वतरे यति" इति अमरवचनम्। ह्यः—इति अव्ययम् अतीते अह्नि प्रयुज्यते। श्वः—इति अव्ययम् आगामिनि दिवसे प्रयुज्यते। ऐषमस्, ह्यस्, श्वस् इति एतेभ्यः "तत्र भवः" इत्यर्थे विकल्पेन त्यप् प्रत्ययो भवति शैषिकः। ऐषमस्—इति अस्मिन् भवः इत्यर्थे त्यप्—ऐषमस्त्यम्। ह्यः—इति अस्मिन् जातः इत्यर्थे त्यप्—ह्यस्त्यम्। श्वः—इति अस्मिन् भवः इत्यर्थे त्यप्—श्वस्त्यम्। उदाहरणत्रये "सामान्ये नपुंसकम्" इति नियमात् क्लीवलिङ्गं प्रदर्शितम्। त्यप् प्रत्ययस्य अप्राप्तिपक्षे तु "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" (४।३।२३) इति सूत्रेण ट्युट्युल् प्रत्ययौ। प्रत्यययोः टकारौ इतौ। युकारयोः स्थाने "अन" इति आदेशः। "अन" इत्यस्य तुट् इति च आगमः। तुट् इत्यस्य उकारः उच्चारणार्थः, टकारः इत्। तेन "आद्यन्तौ टकितौ" (१।१।४६) इति सूत्रेण "त्" इत्यस्य अवस्थितिः "अन" इत्यस्मात् प्रागेव। तथा सति "तन" इति। ह्यः इत्यस्मात् तन—ह्यस्तनः। स्त्रियाम्—ह्यस्तनी। श्वः इत्यस्मात् तन इति श्वस्तनः। स्त्रियां श्वस्तनी। एषमः—इत्यस्मात् तन—ऐषमस्तनः स्त्रियां ऐषमस्तनी। "सामान्ये नपुंसकम्" इति निर्देशं मानयन् श्रीमान् दीक्षितः कर्त्ता क्लीव-लिङ्गे एव उदाहरणं प्रदर्शितवान्।

"पक्षे" इति। "श्वसस्तुट् च" (४।३।१५) इति सूत्रेण श्वस् इत्यस्मात् विकल्पेन ठञ् प्रत्ययः स्यात्। तस्य तुट् इति आगमश्च। ठञ् इत्यस्य स्थाने—"इक" आदेशः। टित्वात् "तुट्" इत्यस्य "इक" इत्यस्मात् प्रागेव स्थितिस्तेन "तिक" इति रूपम्। "द्वारादीनां च" (७।३।४) इति सूत्रेण "श्वस्" इत्यस्य न वृद्धिः, परम् "ऐच्" इति आगमः स्यात्। तथा सति श्वस् इत्यस्मात् "तिक" इति गृहीतरूपे प्रत्यये कृते "वकारस्य" आदौ औकारस्य आगमे जाते शौवस्तिकम् इतिरूपम्। विशेषणमिदम्। "तस्यभावः" इत्यर्थे एतस्मात् त्वप्रत्यये कृते शौवस्तिकत्वम् इति पदं स्यात्। तथाहि "शौवस्तिकत्वं विभवो न येषाम्"—इति भट्टिकाव्ये।

## १३२७। तीररूप्योत्तरपदादञ्ञौ ॥४।२।१०६॥

टी—। यथासंख्येन। काकतीरम्। पाल्वलतीरम्। शैवरूप्यम्। तीररूपान्तात् इति नोक्तम्। बहुच्पूर्व्वात् मा भूत्। बाहुरूपम्।

The suffix अञ् is added to words ending in तीर, whereas the suffix ञ्य is attached to words ending in रूप।

मित। यस्य शब्दस्य "तीर" इति उत्तरपदं भवति, तस्मात् अञ्प्रत्ययः स्यात् शैषिकः; एवं यस्य शब्दस्य "रूप" इति उत्तरपदमस्ति, तस्मात् ञ्यप्रत्ययो भवेत् शैषिकः। प्रत्ययद्वयम् अण्प्रत्ययस्य अपवाद-भूतम्; "तत्रभवः" इत्यर्थे च प्रयुज्यते। काकतीरे भवम् इति अञ्—काकतीरम्। पल्वलतीरे भवम् इति अञ् पाल्वलतीरम्। शिवरूपे भवम् इति ञ्य—शैवरूप्यम्। ननु "तीररूपान्तात्" —इति नोक्ता "तीररूपोत्तरपदात्" इति प्रोक्तम्। तस्य का सार्थकता इतिचेत्— उच्यते। "विभाषा सुपो बहुच् पुरस्तात्" (५।३।६८) इति सूत्रेण प्रातिपदिकात् "बहु" इति प्रत्यये कृते, तस्य प्रत्ययस्य प्रातिपदिकात् पूर्व्वमेव स्थितिः। ईषत्-रूपम् इति बहुरूपम्। ईदृशात् बहुप्रत्ययान्तात् पदात् ञ्यप्रत्ययो न स्यात्— अपितु अण् एव स्यात् इति ज्ञापयितुं खलु तीररूपोत्तरपदात् इति उक्तम्। बहुरूपम्—इत्यत्र रूपान्तत्वेऽपि रूपोत्तरपदत्वं नास्ति। "बहु"—इत्यस्य प्रत्ययत्वात्। अतएव बहुरूपे भवम्—इति अण् बाहुरूपम्।

१३२८। दिक्पूर्व्वपदादसंज्ञायां ञः॥ ४।२।१०७॥

टी—। अणोऽपवादः। पौर्व्वशालः। असंज्ञायाम् किम्? संज्ञाभूतायाः प्रकृतेर्मा भूत्। पूर्व्वेषुकामशम्याम् भवः पूर्व्वेषु-कामशमः। "प्राचाम् ग्रामनगराणाम्" (सूत्र १४००) इति उत्तरपदवृद्धिः।

The suffix ञ is attached to a compound word of which the first member is expressive of a particular quarter (दिक्) of

the horizon (i. e. is a दिग्वाचक शब्द), provided that the said compound word is not a proper noun (संज्ञा)।

This ञ cancels अण्। And this ञ does not come after a संज्ञा शब्द।

मित—। दिक् इति दिग्वाचकः शब्दः। दिक् दिग्वाचकः शब्दः पूर्व्वपदं यस्य स दिक्पूर्व्वपदः। असंज्ञायाम्—इति प्रकृतेरेव विशेषणीभूतम्। तेन अयमर्थः—यस्याः प्रकृतेः दिग्वाचकः शब्दः पूर्व्वपदं भवति। सा प्रकृतिः संज्ञावाचिका न भवतिचेत्। तस्याः "तत्र भवः" इत्यर्थे ञः प्रत्ययः स्यात् शैषिकः! अयं ञ-प्रत्ययः अणोऽपवादः। पूर्व्वस्यां शालायां भवम् इति "तद्धितार्थोत्तरपदसमाहारे च" (२।१।५१) इति सूत्रेण कृतसमासात् पूर्व्वशालाशब्दात् ञः, तेन आदिस्वरवृद्धौ पौर्व्वशालः इति रूपम्। एवं उत्तरस्यां शालायां भवः औत्तर-शालः। अपरस्यां शालायां भवः आपरशालः। दक्षिणस्यां शालायां भवः दाक्षिणशालः। असंज्ञायाम् इति किम्? यत्र प्रकृतिः संज्ञावाचिका भवति तत्र अयं प्रत्ययः न स्यात्। "दिक्संख्ये संज्ञायाम्" इति (२।१।५०) सूत्रेण पूर्व्वशब्देन सह इषुकामशमीशब्दस्य समासः—तेनपूर्वेषुकामशमी इति रूपम्। अयं देशविशेषस्य संज्ञा। अस्मात् संज्ञावचनात् ञः न स्यात् तेन पूर्व्वेषु-कामशम्यां भवम् इति अण् प्रत्ययः। "प्राचाम् ग्रामनगराणाम्" (७।३।१३) इति सूत्रेण दिशः परेषां ग्रामवाचिनां नगरवाचिनां च अङ्गानाम् अवयवस्य वृद्धिः स्यात्—तेन "पूर्व्व" इति पूर्व्वपदस्थितस्य स्वरवर्णस्य न वृद्धिः, अपितु "पूर्व्व" इति दिग्वाचकात् शब्दात् परस्थितस्य "इषुकामशमी" इति उत्तरपदस्य एव आदि-स्वरवृद्धिः। तेन पूर्व्वषुकामशमी इति रूपम्।

## १३२८। मद्रेभ्योऽञ्॥ ४।२।१०८॥

**टी—। दिक्-पूर्वपदात् इत्येव। "दिशोऽमद्राणाम्" इति मद्रपर्य्युदासात् आदिवृद्धिः। पौर्वमद्रः। आपरमद्रः।**

The suffix अञ् is attached to the word मद्र when it forms the second member of a compound word, the first member being a दिग्वाचक word etc.

मित—। दिग्वाचकेन पूर्व्वपदेन सह कृतसमासात् मद्रशब्दात् "तत्रभवः" इत्यर्थ अञ् प्रत्ययः स्यात् शैषिकः। पूर्व्वेषु मद्रेषु भवः इति पौर्वमद्रः। अपरेषुमद्रेषु भवः इति आपरमद्रः। सर्वत्र "तद्धितार्थोत्तरपद-समाहारे च" (२।१।५१) इति सूत्रेण-कृतसमासान्तात् मद्रशब्दात् अञ् प्रत्ययः। मद्रः इति देश-विशेषस्य संज्ञा। अस्मिन्नेव विषये भारतसमरकाले शल्यो नरपतिरासीत्। [माद्राज इति वर्त्तमानसंज्ञा इति केचित् ]।

ननु यथा "प्राचां ग्रामनगराणाम्" (७।३।१४) इति सूत्रेण दिशः परेषां ग्रामवाचिनाम् नगरवाचिनाम् च अङ्गानाम् अवयवस्य एव वृद्धिः, यथा पूर्वेषु-कामशमः। अत्र तु न कथं तादृशी वृद्धिः, अपितु समस्तस्य एव शब्दस्य आदिस्वर-वृद्धिर्दृश्यते—यथा पौर्वमद्रः, आपरमद्रः इति? अत्रोच्यते "दिशोऽमद्राणाम्" (सू १३९९) इति मद्रपर्य्युदासात् आदिवृद्धिः।" अत्र इदम् अवधेयम्। निषेध-द्योतकस्य नञ् इति अव्ययस्य द्विविधा प्रवृत्तिः सर्वशास्त्र-सम्मता। प्रसज्य-प्रतिषेधः, पर्युदासश्च।

"अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्य-प्रतिषेधोऽसौ क्रियया सह यत्रनञ्"।

यस्मिन् स्थाने विधिः अप्रधानत्वं भजति, प्रतिषेधश्च प्रधानत्वेन भासते, तत्र यो नञ् स प्रसज्य-प्रतिषेध इति कथ्यते। ईदृशेन नञा सह समासो न स्यात् कस्यचिदपि पदस्य। ईदृशो नञ् क्रियया सह एव वर्त्तते—यथा रामः गृहं न गच्छति। अत्र रामस्य गृह-गमनाभाव एव मुख्यत्वेन प्रतीयते। तेन अयं नञ प्रसज्यप्रतिषेधसंज्ञाभाक्। क्वचित् व्याकरणे प्रसज्यप्रतिषेधनञोऽपि समासः दृश्यते (अत्र इष्यते च)। तथाहि पाणिनिसूत्रम् "आदेच उपदेशेऽशिति", "अकृतसार्व-धातकयोः—" इत्यादि। अतः काशिकाकृदप्याह—"प्रसज्यप्रयिषेधेऽपि समासोऽस्ति"।

"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्युदासः सविज्ञेयः यत्र उत्तरपदे न नञ्।"

यत्र प्रतिषेधस्य अप्राधान्यं, विधेरेव मुख्यता, तत्र यो नञ् स पर्युदास इति कथ्यते। ईदृशेन नञा सह पदान्तरस्य समासः स्यात्। समासे नञ् उत्तरपदे न तिष्ठति अपितु पूर्वपदे एव। अयमेव नञ्समासः।

इत्येषु पर्युदासाख्येन नञा षट्, अर्थाः गीयन्ते—

"तत्सादृश्यम् अभावश्च, तदन्यत्वम् तदल्पता,

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"।

प्रकृते तु—"दिशोऽमद्राणाम्" (७।३।१३) इति सूत्रे ज्ञायते यत् "दिग्वाचकात् अमद्राणाम् जनपदवाचिनो वृद्धिः स्यात्"। अत्र "अमद्राणाम्" इत्यत्र नञः पर्युदासत्वम्—"तदन्यत्वम्" इत्यर्थे प्रयुक्तत्वात्। तेन अयमर्थः आयाति—मद्रेभ्यः अन्यानाम् एव दिग्वाचकात्परस्थितानां जनपदवाचिनाम् वृद्धिः। अत्र नञः पर्युदासत्वात् विधेरेव मुख्यता—तेन मद्राणाम् वृद्धिर्न स्यात् इति तु न बोध्यते—अपितु मद्राणाम् आदिस्वरस्य एव वृद्धिः स्यात्। "उत्तरपदस्य" (७।३।१०) इति उत्तरपदस्याधिकारात् वृद्धिःस्थितत्वात् तेषाम् इत्येव ज्ञाप्यते।

**१३२८। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्॥ ४।२।१०९॥**

**टी—। अञ् स्यात्। शैवपुरम्।**

The suffix अञ् is added to a word, expressive of a village in the north, provided that it contains more than one vowel and its last syllable is accented ( उदात्त )।

मित—। दिक् इत्यस्मात् परम् इति निवृत्तम्। उदीच्यम् उत्तरादिक्। उत्तरस्यां दिशि ये ग्रामाः सन्ति, तद्वाचिनः ये बहुस्वरसनाथाः शब्दाः, तेषाम् अन्त्यवर्णः उदात्तश्चेत्, तेभ्यः अञ्प्रत्ययः स्यात् "तत्र भवः" इत्यर्थे। अणोऽपवादः अञ्। शिवपुरम् इति उत्तरदेशे प्रसिद्धः कश्चित्ग्रामः। अयं शब्दः बहुस्वरसनाथः। शिवस्य पुरम् इति षष्ठीसमासोऽयं—तेन समासस्य (६।१।२२३) इति सूत्रेण समासस्य अन्त्यवर्णस्य उदात्तत्वे सति अन्त्योदात्तोऽयं शब्दः। तत्र भवः इति अञ्—शैवपुरम्। एवं माहानगरम्। महानगरे भवम् इत्यर्थः। माण्डवपुरम्—मण्डवपुरे भवम् इत्यर्थः।

उदीच्यग्रामात् इति किम्? मथुरायाम् भवः इति अण् माथुरम्। नहि मथुरा उदीच्यग्रामविशेषः। बह्वचो इति किम्? ध्वज इति कश्चित् उदीच्यग्रामः,

तत्र भवम् इति अण्—ध्वाजम्। नहि ध्वजशब्दः बहु-स्वर-विशिष्टः, अपितु द्वि-स्वर विशिष्ट एव।

अन्त्योदात्तात् इति किम्? शर्करीधानम् इति उदीच्यग्रामविशेषस्य संज्ञा। तत्र भवम् इति अण्—शार्करीधानम्। शर्करीधानशब्दस्य नहि अन्त्योदात्तत्वम्—अपि तु मध्योदात्तत्वम् एव। धान इति पदं धाधातोर्ल्युटि प्रत्यये कृते सिध्यति। ल्युट् इति कृत्प्रत्ययः—लकारोऽस्मिन् प्रत्यये इत् स्यात्। लकारेत् कृत् प्रत्ययस्य प्रकृतिस्वरत्वम्—धातोश्च उदात्तत्वम् तेन धा इत्येव उदात्तः; अतो मध्योदात्तोऽयं शब्दः। तथाहि सूत्रम्—'लिति' (६।१।१९०) लिति प्रत्ययात् पूर्वम् उदात्तं भवति। चिकीर्षकः—इति काशिका।

## १३३१। प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥ ४।२।११० ॥

## टी—। माहिकिप्रस्थः। पालदः; नैलीनकः।

The suffix अञ् is attached to words ending in प्रस्थ, also to words of the पलद्दी (पलदि) class, as well as to words, having क for its last but one syllable.

मित—। प्रस्थ इति उत्तरपदं येषां ते, पलद्दीः आदिर्येषां ते।. कः उपधा येषां ते। प्रस्थोत्तरपदाश्च पलद्यादिश्च कोपाधाश्च इति प्रस्थोत्तरपदपलद्यादिकोपधम् समाहार द्वन्द्वः। एतस्मात् अण्। तथाहि येषां शब्दानाम् अन्ते प्रस्थ इति भागो वर्त्तते, एवं येषां शब्दानाम् उपधायां ककारो विद्यते तेभ्यस्तथा पलद्दीः इत्यादिभ्यश्च "तत्र भवः" इत्यर्थे अण् प्रत्ययः स्यात् शैषिकः। महिकिप्रस्थ इति ग्रामविशेषस्य संज्ञा। तत्र भवः इति अण् माहिकिप्रस्थः। एवं माद्रीप्रस्थः। पलदि इति कश्चित् ग्रामः। तत्र भव इति अण् पालदः। एवं पारिषदः। निलीनकनाम्नि ग्रामेभवः इति नैलीनकः। ककारोपधः अयं शब्दः, एवं वैघातकः। अयम् अण् प्रत्ययः "उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्" इति विहितस्य अञः अपवादः। पलद्दी वा पलदि, परिषत्, यकृल्लोमन्, रोमक, कलकूट, पटच्चर, वाहकी, कलकीठ, मलकीट, कमलकोट, कमलभिदा, कमलकीर, वाहुकीट, नैतकी, परिखा, शूरसेन, गोमती, उदपान।

१३३२। कण्वादिभ्यो गोत्रे ॥ ४।२।१११ ।

दी—। एभ्यो गोत्रप्रत्ययान्तेभ्योऽण् स्यात्। कण्वो-गर्गादिः। काण्वस्यछात्राः काण्वाः।

The suffix अण् is attached to words of the कण्वादि class [ itself a sub-class of गर्गादि ]—after they have been already affected by any suffix attached to them to imply a गोत्र ( descendant ).

मित—। कण्वादिरिति गर्गादिमध्यस्थितः अवान्तर-गणः। गोत्रे इति तु नहि कण्वादिरिति प्रकृतेः विशेषणीभूतम् ; न वा पदमिदं प्रत्ययार्थे प्रयुक्तम्। तर्हि का सूत्रव्याख्या ? उच्यते—

"कण्वादिभ्यो गोत्रे यः प्रत्ययोविहितस्तदन्तेभ्यः एव अण्प्रत्ययो भवति शैषिकः।" छप्रत्ययस्य अपवादोऽयम् अण्। कण्वस्य गोत्रापत्यं पुमान् इति कण्वादेः गर्गादित्वात् यञ् प्रत्ययः—गर्गादिभ्यो यञ् ४।१।१०५ इति सूत्रेण। तेन काण्व्यः इति रूपम्। काण्व्यस्य छात्राः इति अनेन अण्। "यस्येति च" ६।४।१४८ इति अकारस्य लोपः। "आपत्यस्य च तद्धितेऽनाति" ६।४।१५१ इति यकार-लोपः। एवं गौकक्षाः।

[ ननु गोत्रे इति किम् ? कण्वो देवता अस्य काण्वः। तस्य इदम् काण्वीयम् इति छप्रत्ययः। ]

१३३३। इञश्च ॥ ४।२।११२ ॥

दी—। गोत्रे य इञ् तदन्तात् अण् स्यात्। दाक्षाः। गोत्रे किम् ? सौतङ्गमेरिदम् सौतङ्गमीयम्। गोत्रमिह शास्त्रीयं, न तु लौकिकम्। तेनेह न। पाणिनीयम्।

The suffix अण् is attched to words, themselves derived with the suffix इञ् used to imply a गोत्र। The गोत्र is to be

understood here in strict accordance with the grammatical dictums.

मित—। "अत इञ्" (४।१।९५) इति सूत्रेण गोत्रे य इञ् प्रत्ययो विहित-स्तदन्तात् प्रातिपदिकात् अण् प्रत्ययः स्यात् शैषिकः। छस्य अपवादोऽयम्। दक्षस्य गोत्रापत्यं पुमान् इति इञ्—दाक्षिः। दाक्षेः छात्राः इति विग्रहे अनेन अण्—दाक्षाः। एवं प्लाक्षाः। माहकाः। गोत्रे इति किम्? सुतङ्गमस्य निवासः इति "सुतङ्गमादिभ्य इञ्"—सौतङ्गमिः। सौतङ्गमेरिदम् इति "वृद्धाच्छः" (४।२।११४) इति वक्ष्यमाणेन छप्रत्ययः—तेन सौतङ्गमीयम्। नहि अत्र अण् स्यात् इञ् प्रत्ययस्य गोत्रार्थकत्वाभावात्।

ननु गोत्रशब्देन किं पारिभाषिकं गोत्रम् गृह्यते उतलौकिकम् इत्याकाङ्क्षायां वक्ति—"गोत्रमिह" इति। अपत्याधिकारे पारिभाषिकम् (व्याकरणशास्त्रीयम् इत्यर्थः) गोत्रं ज्ञेयम्, तस्मात् अन्यत्र तु लौकिकमेव। परं यद्यपि "कण्वादिभ्यो गोत्रे", "इञश्च" इति सूत्रद्वयम् अपत्याधिकारात् वहिरेव स्थितम्, तथापि अनयोः सूत्रयोः शास्त्रीयमेव गोत्रम् बोध्यम्—यतः "यूनि लुक्" ४।१।९० इति सूत्रे महाभाष्ये महर्षिपतञ्जलिना तथैव व्यवस्थापितम्। पणिनो गोत्रापत्यं पुमान् इति पाणिनः। तस्य अपत्यं युवा पाणिनिः। तस्य इदम् इति पाणिनीयम्—"वृद्धाच्छः" ४।२।११४ इति छप्रत्ययः। अत्र अण् प्रत्ययो न स्यात् पाणिनिशब्दस्य युव-प्रत्ययान्तत्वात् तस्य न गोत्रत्वम् "जीवति तु वंश्ये युवा" ४।१।१६३ इति तस्य युव-संज्ञकत्वस्यैव विधानात्।

**१३३४। न द्व्यचः प्राच्यभरतेषु ४।२।११३॥**

**टी—। इञश्च (सू १३३३) इत्यणोऽपवादः। प्रौष्ठीयाः। काशीयाः। भरतानां प्राच्यत्वे अपि पृथगुपादानम् अन्यत्र प्राच्य-ग्रहणे भरतानाम् अग्रहणस्य लिङ्गम्।**

But the suffix अण् is not be attached to words containing two vowels only, though themselves derived with the suffix

इञ्, provided that the said words imply one of the Eastern or Bharata clan ( गोत्र )। Rest easy, see Tika.

मित—। इञश्च ( ४।२।११२ ) इति सूत्रेण गोत्रे विहितो य इञ् प्रत्ययस्तदन्तात् अण् प्रत्ययो व्यवस्थापितः। अनेन सूत्रेण ज्ञाप्यते यत् ईदृशात् इञ्प्रत्ययान्तात् द्विस्वरविशिष्टात् प्रातिपदिकात् अण् न स्यात् प्राच्येषु तथा भरतेषु च गोत्रेषु। अतएव "इञश्च" इत्यणोऽपवादो विधीयते अत्र। प्रौष्ठस्य गोत्रापत्यम् इति इञ्—प्रौष्ठिः। तस्य छात्राः इति अण् न स्यात्—"प्रौष्ठि" इत्यस्य द्विस्वर-विशिष्टत्वात् तथा प्राच्यगोत्रीयत्वात्। तर्हि कः प्रत्ययोऽत्र कर्त्तव्यः ? उच्यते—"वृद्धाच्छः" (४।२।११४) इति वक्ष्यमाणेन छ-प्रत्यय एव। प्रौष्ठीयाः। काशस्य गोत्रापत्यम् इति इञ्—काशिः; तस्य छात्राः इति छ = काशीयाः।

ननु भरतगोत्रमपि प्राच्यगोत्रान्तर्गतम् तर्हि कथम् अत्र सूत्रे "भरत" इत्यस्य पृथक् भावेन ग्रहणम् इति चेत्—समाधत्ते। "भरतानाम्"—इत्यादिना। प्राच्यत्वेऽपि भरतानाम् पृथक् ग्रहणेन ज्ञाप्यते—यत् इतोऽन्यत्र यत्र "प्राच्य" इति गृहीतम्, तत्र प्राच्यान्तर्गतत्वेऽपि भरत इत्यस्य ग्रहणं न स्यात्।

तथाहि उद्दालकः इति कश्चित् ऋषिः, "आरुणि"रित्यपरनामा। तस्य उद्दालकस्य गोत्रापत्यं पुमान् इति इञ्—औद्दालकिः। औद्दालकि इति कश्चित् उद्दालकगोत्रीयः जनः। सहि पितरि—तस्य पुत्रः इति वाच्ये—"यञिञोश्च" (४।१।१०१) इति फक्। औद्दालकायन इतिरूपम्। ननु "उद्दालक" इति भरतानां गोत्रस्य एव। भरतगोत्रम् च प्राच्यदेशीयम्। तर्हि "इञः प्राचाम्" ( २।४।६० ) इति सूत्रेण गोत्रे विहितो य इञ् तदन्तात् औद्दालकिः इत्यस्मात् फक् इति युवप्रत्ययस्यालुक् भवतु—इति प्रश्ने वक्तव्यम् यत् "इञः प्राचाम्" इति सूत्रे "प्राचाम्" इति प्राग्देशीयं गोत्रम् एव गृहीतम्, न हि तदन्तर्गतत्वेऽपि "भरत" इति गोत्रस्य पृथक् ग्रहणम् अत्रास्ति, तेन पृथक् ग्रहणाभावात् भरतगोत्रीयात् "उद्दालकि"इत्यस्मात् विहितस्य फक्प्रत्ययस्य लुक् न स्यात्। इमम् एव न्यायभावं "नड्वाचःप्राच्यभरतेषु" इति प्राच्यभरतशब्दयोः पृथग्ग्रहणरूपेण लिङ्गेन बोधयति भगवान् सूत्रकारः।

१३३५। वृद्धिर्यस्याचामादिस्तद्वृद्धम्। १।१।७३॥

दो—। यस्य समुदायस्य अचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्।

The word, the very first vowel of which is a "वृद्धि' one, passes by the techinical name 'वृद्ध'।

मित—। "यस्य" इति समुदायः उच्यते इति काशिका। वर्णसमुदयात्मकस्य शब्दस्य इत्यर्थः। वर्णसमुदयात्मके शब्दे ये "अचः" विद्यन्ते, तेषाम् अचां मध्ये यः खलु आदिः स चेत् वृद्धिसंज्ञकः कस्मिंश्चित् शब्दे, तर्हि स शब्दः "वृद्ध" इति संज्ञां भजते। यथा पाणिनिः, दैवदत्तः इत्यादयः। "पाणिनिः"—इत्यत्र त्रयोऽचः वर्त्तन्ते, तेषु आद्योच् आकारः वृद्धिसंज्ञकः—"वृद्धिरादैच्" (१।१।१) इति सूत्रेण। अतः पाणिनिइतिशब्दः वृद्धसंज्ञकः स्यात्। एवं दैवदत्त इत्यत्र चत्वारः अचो विद्यन्ते; तेषु य आदि ऐकारः, स वृद्धिसंज्ञकः—"वृद्धिरादैच्" इति सूत्रेण; तेन दैवदत्त इति वृद्धसंज्ञकः शब्दः।

ननु सूत्रे "अचाम्" इति बहुवचनं दृश्यते, तेन "शाला" इति द्वि-स्वर-विशिष्टः शब्दः, ज्ञा इति एकस्वरसनाथः शब्दः, वृद्धसंज्ञकत्वे अपि प्रथमस्वरस्य, वृद्धसंज्ञको न स्यात् इति चेत्—न। "अचाम्"—इत्यत्र यत् बहुवचनं तत् तु उपलक्षणमेव। "स्व-प्रतिपादकत्वेऽपि स्वेतर-प्रतिपादकत्वम् उपलक्षणत्वम्"। यत् "स्वम्" बोधयत् "स्वस्मात्" अन्यदपि बोधयति तदुपलक्षणम्। यथा काकेभ्यो दधि रक्ष्यताम्। अत्र यथा काकात् दधि रक्षणीयम्, तथा काकात् अन्यस्मात् अपि दधिविघातकात् सारमेयादेः दधि रक्षितव्यम् इति वाक्यार्थः—इदम् उपलक्षणम्। प्रकृते तु अचाम् इति बहुवचनं बहुत्वम् बोधयत् द्विवचनम् अपि बोधयति तेन यस्मिन् शब्दे द्वौ अचौ विद्यते तत्र प्रथमः अच् चेत् वृद्धिसंज्ञकः, तर्हि स शब्दोऽपि वृद्धसंज्ञां भजेत। यथा शाला इति शब्दः।

एवम् ज्ञा इतिशब्दसत्तायाम् अपि एकस्यैव स्वरस्य व्यपदेशिवद्भावात् एकमेव स्वरम् आदिस्वरम् इति मन्तव्यम्, तेन आदिर्वृद्धत्वात् "ज्ञा" इत्यस्यापि "वृद्ध" इति संज्ञा।

१२३६। त्यदादीनि च ॥१।१।७४॥

टी—। वृद्धसंज्ञानि स्युः।

The words, falling under the त्यदादि class, are to pass by the denomination "वृद्ध"।

मित—। त्यद, तद, यद, एतद, इदम्, अदस्, एक, द्वि, युष्मद, अस्मद, भवत्, किम् इति त्यदादिः। एषाम् आदेरचो वृद्धिसंज्ञकत्वाभावेऽपि एषाम वृद्धसंज्ञास्यात्। ननु एषां वृद्धसंज्ञाविधानेन किं लभ्यते इति चेत् तत् परसूत्रे एव स्फुटीभविष्यति।

१२३७। वृद्धाच्छः। ४।२।११४।

टी—। शालीयः। मालीयः। तदीयः।

The suffix छ (i.e ईय) is added to words, that pass by the denomination वृद्ध।

मित—। वृद्धसंज्ञकेभ्यः शब्देभ्यः "तत्रजातः" इत्यादौ अर्थे छप्रत्ययः स्यात्। अणोऽपवादः, शालायां जातः इति शालीयः, मालायां भव इति मालीयः। "त्यदादीनि च" (१।१।७४) इति त्यदादीनां वृद्धसंज्ञकत्वात् तस्मिन् जातः, तम् अधिकृतः इति वा अर्थे छ प्रत्ययः—तदीयः। एवं मदीयः। अस्मदीयः। युष्मदीयः। इदमीयः। अदसीयः। किमीयः। अपिच—वौद्धीयम् मतम्। आचार्यीयः। वात्सीयः। गार्गीयः।

१२३८। एङ् प्राचां देशे ॥ १।१।७५॥

टी—। एङ् यस्य अचाम् आदिस्तद् वृद्धसंज्ञं वा स्यात् देशाभिधाने। एणीपचनीयः। गोनर्दीयः। भोजकटीयः। पक्षे अणि—ऐणीपचनः। गौनर्दः। भौजकटः।

एङ् किम्? आहिच्छत्रः। कान्यकुब्जः। "वा नामधेयस्य वृद्धसंज्ञावक्तव्या" (वा ५७६)। देवदत्तः—देवदत्तीयः।

The word, that has either ए or ओ for its first vowel, optionally passes by the denomination वृद्ध, provided the word stands for the name of a country—so say the ancient grammarians.

मित— । यस्य शब्दस्य स्वराणाम् मध्ये एकार: ओकारो वा आदिस्वरभूतस्तिष्ठति, स शब्दश्चेत् कस्यचित् देशविशेषस्य संज्ञा, तर्हि स विकल्पेन वृद्ध-संज्ञां भजते। यदा वृद्धसंज्ञा, तदा तस्मात् "वृद्धाच्छ:" (४।२।११४) इति छ-प्रत्यय: स्यात्, वृद्ध-संज्ञाभावपक्षे तु तस्मात् अण् प्रत्ययो भवेत्। प्राचां—इति प्राचीनवैयाकरणानाम् मतम् इत्यर्थ:। "प्राचाम्" इत्यस्य अयमेव अर्थ: महाभाष्ये दृश्यते। काशिकायाम् तथा भाषावृत्तौ च "प्राचाम्" इत्यनेन सह "देशे" इत्यस्य अन्वय: विहित:—तेन यदा प्राग्देशस्य एव संज्ञाभूत: कश्चित्शब्दश्चेत् पूर्व्वोक्तलक्षण: स्यात्, तदा स विकल्पेन वृद्धसंज्ञाभाक् इति अर्थ: प्रस्तावित:। दीक्षितेन तु अत्र न किञ्चित् स्पष्टम् उक्तम्।

नियमसूत्रम् इदम्। अयं नियमो अनेन सूत्रेण व्यवस्थापित:—"यदा एङ् इति आदिस्वरसनाथ: कश्चित्शब्द: देशविशेषवाची तदैव तस्य वृद्धसंज्ञा विकल्पेन स्यात्। देशवाचित्वाभावे तु एङ् इति आदिस्वर-विशिष्ट: शब्द: वृद्धसंज्ञको न स्यात्" इति।

एणीपचन: इति कश्चित् देश:। तत्रभव: इति "वृद्धाच्छ:"—एणीपचनीय: ग्राम:। गोनर्द्द: इति देशविशेष:—तत्र भव इति छ: = गोनर्द्दीय:। भोजकट: इति देशनाम। तत्र भव: इति छ: = भोजकटीय:। वृद्धसंज्ञाभावपक्षेतु अण् स्यात् एणीपचनात् अण् = ऐणीपचन:। गोनर्द्दात् अण्—गौनर्द्द। भोजकटात् अण्—भौजकट:। एङ् इति किम्? अहिच्छत्र: इति कश्चित् देश:। तत्रभव: इति अण् आहिच्छत्र:। देशवाचित्वे अपि एङ: अभावात् न वृद्धसंज्ञा। कान्यकुब्ज इति देशविशेष:। तत्रभव: इति अण् कान्यकुब्ज:। देशवाचित्वेपि एङ: अभावात् न वृद्धसंज्ञा। वृद्धसंज्ञाभावात् उभयत्र न छप्रत्यय:। ननु देशे इति किम्? गोमती इति काचित् नदी। तस्यां भव: इति अण् गौमत:। गौमता: मत्स्या:। अत्र गोमती इत्यत्र एङ: सद्भावेपि देशवाचित्वाभावात् न वृद्धसंज्ञा—तेन न छ-प्रत्यय:।

[ काशिकायां हि पूर्वदेशात् अन्यं देशं बोधयन् शब्दः एङ् इति आदिस्वर सनाथोऽपि न वृद्धसंज्ञाभाक् इति ज्ञापयितुम् "देवदत्तः इति वाहीकेषु ग्रामः, तत्रभव इति दैवदत्तः" इति प्रत्युदाहरणम् प्रदर्शितम् ]।

"वा नामधेयस्य—इति"। नामधेयस्य संज्ञाभूतस्य वा विकल्पेन वृद्धसंज्ञा स्यात्। इदमत्र अवधेयम्—शब्दस्तावत् त्रिविधः—यौगिकः, रूढ़ः, योगरूढ़श्चेति। तेषु यौगिको यथा पचतीति पाचकः। योगरूढ़ो यथा—पङ्के जायते इति पङ्कजः। पङ्कजः कमलम् इत्यर्थः। रूढ़ो यथा—मण्डपः। अस्मिन् वार्त्तिके "नामधेयस्य" इति पदेन रूढ़-शब्दस्यैव ग्रहणं कर्त्तव्यम्। तेन वार्त्तिकस्य अयमेव सरलार्थः—एङ् इति आदिस्वर-सनाथायेत् रूढ़शब्दाः, तर्हि तेषां विकल्पेन वृद्धसंज्ञा स्यात्। देवदत्त इति कस्यचित् जनस्य नाम। अयं रूढ़शब्दः। तेन अस्य वृद्धसंज्ञा वा स्यात्। वृद्धसंज्ञापक्षे छः स्यात्—देवदत्तीयः। वृद्धसंज्ञाभावे तु अण्—दैवदत्तः। एवं घट धातोनिष्पन्नः घटः इति शब्दः कलशे रूढ़ः। तस्मात् छ-प्रत्ययः = घटीयम्।

## १३३८। भवतष्ठक्छसौ ॥४।२।११५॥

**टी—। वृद्धात् भवत एतौ स्तः। भावत्कः। जश्त्वम्; भवदीयः। वृद्धात् इत्यनुवृत्तेः शत्रन्तात् अण् एव। भावतः।**

The suffixes ठक् and छस् are added to the words भवत्, ( which passes by the denomination "वृद्ध" on account of its being included in the त्यदादि class ). These two suffixes bar the suffix छ। भवत् derived as भू + शतृ however takes अण् and not छ for this भवत् is not a वृद्ध word.

मित—। भवत् इति भाधातोर्डवतु प्रत्ययेन सिद्धो युष्मत्-समानार्थवाचकः त्यदादिषु अन्तर्भुक्तः शब्दः। त्यदादिषु अन्तर्भावात् अस्य वृद्ध-संज्ञा। एतस्मात् वृद्ध-संज्ञकात् भवत्इति शब्दात्, ठक् छस् इति प्रत्ययौ स्याताम् शैषिकौ। छ-प्रत्ययस्य अपवादभूतौ इमौ। "इसुसुक्तान्तात्कः" ( ७।३।५१ ) इति सूत्रेण "भवत्" इति

तकारान्तात् परस्य ठक्प्रत्ययस्य ठकारस्य स्थाने ककारादेश:। ठक् इत्यस्मिन् य: ककार: स इत्, ककारात् प्राक्-स्थितोऽकार उच्चारणार्थ:। ककारस्य इत्त्वात् "किति च" (७।२।११८) इति सूत्रेण भवत् इत्यस्य आदिस्वरवृद्धि: तेन भावत्क: इतिरूपम्। भवत्सम्बन्धीय: इत्यर्थ: एवं भवत इत्यस्मात् छस्प्रत्यय:। प्रत्ययस्य सकार इत्; छ स्थाने ईयादेश:—तेन भवत ईय इति स्थितम्। तत: "यचिभम्" (१।४।१८) इति सूत्रेण अजादितद्धितप्रत्यये परे पूर्वस्य या भसंज्ञा प्राप्ता, सातु "सिति च" (१।४।१६) इति सूत्रेण निवार्य्यते, सकारेत्-प्रत्यये परे पूर्व्वस्य पदसंज्ञा स्यात न खलु भसंज्ञा। छस इति सकारेत प्रत्यय:, तत: "ईय" परे "भवत्" इत्यस्य पदत्वात "झलां जशोऽन्ते" (८।२।३९) इति सूत्रेण सन्धि: तेन भवदीय इति रूपम्। भूधातो: शतृप्रत्ययेन निष्पन्नो भवत् इतिशब्दोऽस्ति। एतस्य त्यदादिषु न अन्तर्भाव: अतो न वृद्धसंज्ञा। अस्मिन् सूत्रे पूर्व्वसूत्रात् "वृद्धात्" इति अनुवर्त्तते। तेन वृद्धसंज्ञकात् एव भवच्छब्दात ठक्छसो: विधानम्। तथा सति शतृप्रत्ययान्तस्य भवच्छब्दस्य अप्राप्यात् न खलु ठक्छसौ। एतस्मात अणि भावत इति रूपम्।

१३४०। काश्यादिभ्यष्ठञ्ञिठौ ॥ ४।२।११६ ॥

टी—। इकार उच्चारणार्थ:। काशिकी—काशिका। वैदिकी—वैदिका। 'आपदादिपूर्वपदात् कालान्तात् (गु सू ७४)। आपदादिराकृतिगण:। आपत्कालिकी—आपत्कालिका।

The Suffixes ठञ and ञिठ are added to the words of the काश्यादि class; by applying ठञ to काशि we have काशिकी and ञिठ we get काशिका।

A word—a compound one—of which the first member is "आपत्" and the second member denotes a part (divison) of time, takes these two suffixes—thus we get आपतकालिकी and आपतकालिका।

मित—। काशि इत्येवमादिभ्यः ठञ ञिठ इत्येतौ प्रत्ययौ स्तः शैषिकौ "तत्र भवः" इत्यादौ अर्थे एतौ स्याताम्। ञिठ इति प्रत्यये य इकारः स उच्चारणार्थ एव। ञकार इत। ठकारः तिष्ठति, तस्य स्थाने इकादेशः।

ननु "आदिर्ञिटुडवः (१।३।५)" इतिमतेन ञिठ इत्यस्य ञि इति इत् भवेत्, तर्हि कथमत्र ञकार इत, इकार उच्चारणार्थं इति कथ्यते ? नैवम्। ञिठ प्रत्यये "आदिर्ञिटुडव" इत्यनेन ञि इति भागस्य इत्करणे न किञ्चित प्रयोजनं विद्यते। ञकारस्य इत्करणे तु प्रत्ययस्य ञित्स्वर एव प्रयोजनम्। ञित-स्वरप्रयोजनं हि स्वरप्रकरणस्यैव विषयः। पुनरपि बोधयति ननु ठञ प्रत्यये अपि ञकार इत, ठकारस्थाने इकादेशः, तर्हि कुत्र एतयोः पार्थक्यं स्यात इति चेत ? स्त्रीलिङ्गे खलु इति वाच्यम्। ठञि प्रत्यये कृते एतत प्रत्ययान्तस्य पदस्य "टिड्ढाण्—" (४।१।१५) इति सूत्रेण स्त्रियाम् ङीप, ञिठ इति प्रत्ययान्तस्य तु स्त्रीलिङ्गे आप् एव स्यात।

काश्यां जात इति काशिशब्दात् ठञ्—काशिकः। स्त्रीलिङ्गे ङीप् काशिकी। काश्यां भव इति काशिशब्दात् ञिठ्—काशिकः। ञिठ् प्रत्यये परे ञकार इत्। इकार उच्चारणार्थः, ठस्थाने इकादेशः। इकादेशे सति स्त्रियाम्—"प्रत्ययस्थात् कात् पूर्व्वस्यात इदाप्यसुपः" ( ७।३।४४ ) इति सूत्रेण आप। एवम् वेद्याम् भव इति ठञ् वैदिकः। स्त्रियां वैदिकी। ञिठ्—वैदिका, वेदिः देशविशेषः। इत्थम् चैदिकी—चैदिका, [चेदि शिशुपालराज्यम्]।

काश्यादिर्यथा—काशि, वेदि, चेदि, संज्ञा, संवाह, अच्युत, मोहमान, शकुलाद, हस्तिकर्षू, कुदामन्, हिरण्य, करण, गोवासन, भैरिकि, भौलिङ्गि, अरिन्दम, सर्व्वमित्र, देवदत्त, साधुमित्र, दासमित्र, दासग्राम, शौवावतान, युवराज, उपराज, सिन्धुमित्र, देवराज।

"आपदादिपूर्व्वपदात् कालान्तात्", आपत् आदिर्यस्य स आपदादि। आपदादिराकृतिगणः। आपदादिपूर्व्वपदात् कालान्तात् ठञ् ञिठ इति प्रत्ययौ स्याताम् शैषिकौ "तत्र भवः" इत्यादौ अर्थे। आपत्काले भव इति ठञ् आपत्कालिकः स्त्रियाम्—आपत्कालिकी। ञिठ—आपत्कालिकः। स्त्रियां आपत्कालिका।

१३४१। वाहीकग्रामेभ्यश्च ॥ ४।२।११७ ॥

टी—। वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः। छस्य अपवादः। कास्तीरं नाम वाहीकग्रामः। कास्तिरिकी। कास्तीरिका।

Briddha words expressive of villages in the country of Bahika, take the suffix ठञ् as well as the suffix ञिठ् after them. Both of these bar the suffix छ।

मित—। वाहीक इति देशविशेषः। तस्मिन् देशे ये ग्रामाः सन्ति, तेषां वाचकेभ्यः वृद्धसंज्ञकेभ्यः शब्देभ्यः "तत्र भवः" इत्यादौ अर्थे ठञ्ञिठ्प्रत्ययौ भवतः शैषिकौ। कास्तीर इति कश्चित् वाहीकदेशीयः ग्रामः तत्रजातः इति ठञ् कास्तीरिकः। स्त्रियाम् ईप् कास्तीरिकी। ञिठ्—कास्तीरिकः। स्त्रियाम् आप् कास्तीरिका। एवं शाकलिकी शाकलिका। मान्यविकी मान्यविका।

१३४२। विभाषोशीनरेषु ॥४।२।११८॥

टी—। एषु ये ग्रामास्तद्वाचिभ्योवृद्धेभ्यष्ठञ्ञिठौ वास्तः। सौदर्शनिकी। सौदर्शनिका। सौदर्शनीया।

Briddha words, expressive of villages in the land of the Ushinaras optionally take the suffixes ठञ as well as ञिठ् after them.

मित—। उशीनर इति जनपदविशेषः। क्षत्रियविशेषाणां च संज्ञा। उशीनरविषये ये ग्रामाः सन्ति, तद्वाचिवृद्धसंज्ञकेभ्यः शब्देभ्यः विकल्पेन ठञ् ञिठ् इति प्रत्ययौ भवतः। प्रत्ययद्वयस्य अप्राप्तिपक्षे 'वृद्धाच्छः" (४।२।११४) इति छः स्यात्। सुदर्शनं नाम कश्चित् उशीनरविषयस्थितः ग्रामः। तत्र जातः इति ठञ्—सौदर्शनिकः स्त्रियां सौदर्शनिकी। ञिठ्=सौदर्शनिकः—स्त्रियां सौदर्शनिका। पक्षे छः सौदर्शनीय। स्त्रियां सौदर्शनीया। एवम् आह्वजालिकी—आह्वजालिका। आह्वजालीया।

अस्य सूत्रस्य व्याख्याने "उशीनरेषु ये वाहीकग्रामाः तेभ्यष्ठञ्ञिठौ विकल्पेन" इति अभिप्रायं काशिकाभाषावृत्तिकारौ आविष्कृतवन्तौ। परं वाहीकग्राम इति शब्दस्य कोऽर्थः स्यात्—तत् न खलु अत्र नापि पूर्वसूत्रे स्पष्टम् उल्लिखितः। श्रीमता दीक्षितेनापि पूर्वसूत्रे वाहीकग्राम इत्यस्य स्पष्टार्थः नोदल्लेखि।

वयम् तु वाहीकेषु वाहीकइति विषये ये ग्रामास्ते वाहीकग्रामा इति व्याख्यातवन्तः। अत तु प्रमाणं प्रदर्श्यते—तथाहि साहित्यदर्पणे द्वितीयाध्याये "गौर्वाहीकः" इत्यस्य टीप्पनां जयपुरसंस्कृतविद्यालयाध्यक्षः महामहोपाध्यायः श्रीदुर्गादासद्विवेदः—"वाहीक इति। वाहीको नाम देशविशेषः। तवत्यः पुरुषो वाहीकः। केचित् वहिर्भवो वाहीक इति व्युत्पत्त्या सदाचारवहिर्भूत इत्याहुः। "वहिषष्टिलोपो यंश्च", "इकक् च" इति वार्त्तिकाभ्याम् टिलोपे ईकक्ि च कृते ववयोरभेदात् वाहीकः इति रूपम् इत्याहुः।"

## १३४३। ओर्देशे ठञ् ॥४।२।११९।

**टी—। उवर्णान्तात् देशवाचिनष्ठञ्। निषादकर्षूः। नैषादकर्षुकः। "केऽणः" इति ह्रस्वः। देशे किम्? पटोश्छात्राः पाटवाः। ञिठम् व्यावर्त्तयितुम् ठञ्ग्रहणम्। वृद्धाच्छं परत्वात् अयं बाधते। दाक्षिकर्षुकः।**

The suffix ठञ् (ठञ् alone and not ञिठ्) is attched to words ending in उ or ऊ and denoting a country.

The word निषादकर्षूः stands for a country of the same name and to imply an intabitant of the country; we have here the suffix ठञ् attached to it and the word नैषादकर्षुकः is at once formed the ऊकार of निषादकर्षूः being shortened by the rule—केऽणः (see समास)।

मित—। अस्मिन् सूत्रे "वृद्धात्," इति न अनुवर्त्तते, परसूत्रे "वृद्धात्" इत्यस्य उल्लेखात्। अपिच सूत्रमिदं "वृद्धाच्छः" (४।२।११४) इति सूत्रात् परमेव अतोऽदः

तदपि बाधते परत्वात्। तस्मात् सूत्रस्यास्य अयमर्थः—वृद्धात् अवृद्धात् वा उवर्णान्तात् देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययः स्यात् शैषिकः।

ननु ठञ् इत्यस्य—काश्यादिभ्यष्ठञ्ञिठौ (४।२।११६) इत्यस्मात् अनुवृत्तौ सत्यां कथं पुनस्तस्य अत्र ग्रहणमिति चेत्—उच्यते। ठञ् इत्यस्य अस्मिन् सूत्रे अग्रहणे सति, ठञः साहचर्यवशात् ञिठापि अत्र अनुवर्त्तेत। तन्माभूदिति ठञः ग्रहणम्। इदमेव वृत्तौ उक्तम्—"ञिठं व्यावर्त्तयितुम्" इत्यादिना। व्यावर्त्तयितुम् वारयितुम् इत्यर्थः। निषादकर्षूः इति ऊकारान्तः कश्चित् देशविशेषवाची शब्दः। तत्र जातः इति ठञ् नैषादकर्षुकः निषादकर्षूः इत्यस्य ऊकारः "केऽणः" (७।४।१३) इति सूत्रेण क-प्रत्यये परे ह्रस्वत्वं गच्छति। एवम् शाबरजम्बुकः। देशवाचिनः एव प्रातिपदिकात् ठञ् स्यात्—नान्यत्र। तेन पटोः (पटुनामधेयस्य कस्यचित्) छात्राः पाटवाः। अत्र अण् न तु ठञ्—पटु इत्यस्य उकारान्तत्वेऽपि देशवाचित्वाभावात्।

ननु दाक्षिकर्षूः इति देशः। तत्र जातः इत्यर्थे दाक्षिकर्षूशब्दात् "वृद्धाच्छः" (४।२।११४) इति छः स्यात उत ठञ् स्यात इति सन्देहे आह "वृद्धाच्छम्" इति। परत्वात इदं सूत्रम् वृद्धाच्छं बाधते. तेन अत्र ठञ् एव स्यात्—दाक्षिकर्षुकः।

## १३४४। वृद्धात् प्राचाम् ॥ ४।२।१२० ॥

**दो—। प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम्। आढ़कजम्बुकः। शाकजम्बुकः। नेह मल्लवास्तु। माल्लवास्तवः।**

Briddha words (and these alone), if expressive of a country in the east and ending in उ or ऊ take the suffix ठञ्। Non-briddha words of such nature never take ठञ् and to signify this restriction this rule has been framed.

मित—। अस्मिन् सूत्रे पूर्व्वसूत्रात् "ओर्देशे ठञ्" इति अनुवर्त्तते। तेन सूत्रस्यायमेव अर्थः—उवर्णान्तात वृद्धात् प्रागदेशवाचकात् प्रातिपदिकात् ठञ् प्रत्ययः

स्यात् शैषिकः। प्राग्देशवाचिनः उवर्णात् वृद्धात् एव ठञ् स्यात् न अवृद्धात् इति नियमस्य ज्ञापनार्थमेव अस्य सूत्रस्य आरम्भः। आढ़कजम्बु इति उवर्णान्तः कश्चित् प्राग्देशवाची वृद्धशब्दः—तत्र जातः इति आरकजम्बुकः, शाकजम्बु इति अपरः कश्चित् प्राग्देशवाची वृद्धशब्दः तत्र भव इति शाकजम्बुकः। एवं नापित-वास्तुकः। वृद्धात इति किम्? मल्लवास्तु इति कश्चित प्राग्देशवाची उकारान्तः अवृद्धशब्दः—तत्रभव इति माल्लवास्तवः—अत्र न ठञ्—अवृद्धात्।

## १३४५। धन्वयोपधाद् वुञ्॥ ४।२।१२१॥

**दी—। धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धात् वुञ् स्यात्। ऐरावतं धन्व ऐरावतकः। साङ्काश्य काम्पिल्यशब्दौ वुञ्छणादिसूत्रेण ण्यान्तौ। साङ्काश्यकः। काम्पिल्यकः।**

The suffix वुञ is added to Briddha words that imply a country of the desert, as well as to Briddha words, that have य as the last but one letter, provided they stand for the name of a country.

मित—। धन्वा मरुदेशः। तथाहि सन्ध्याविधौ—"शं न आपो धन्वन्याः"—इत्यादयः। धन्वन्याः मरुदेशीयाः। धन्वविशेषवाचिनः इति। कश्चित धन्वानं (मरुदेशं) अभिदधति ये शब्दाः ते वृद्धाश्चेत् तेभ्यः, तथा येषां शब्दानाम् उपधायां यकारो विद्यते, ते वृद्धा अपिच देशवाचिनश्चेत् तेभ्यश्च वुञ् प्रत्ययः स्यात शैषिकः। ऐरावतम् इति कश्चित धन्वदेशः एव उपलक्षितः नतु धन्वविशेषः। तेन तत्र पारेधन्वकः इति उदाहरणं दृश्यते। पारेधन्वकः इति तु "पारे मध्ये षष्ठ्या वा" २।१।१८ इति सूत्रेण धन्वनः (मरुदेशस्य) पारं इति पारेधन्व। तत्र जातः इति पारेधन्वकः इत्यनया रीत्या सिद्धम्। भाषावृत्तौ तु "धन्वान्तात् देशवाचिनः वृद्धात् वुञ् स्यात्" इत्येवं व्याख्यातम्। उदाहरणं तु पारेधन्वकम्। धन्वशब्दः श्रीमता दीक्षितेन नपुंसकलिंगे प्रयुक्तः—भाषावृत्तौ तु पुंसि।

"वुञ्छण—(४।२।८०)"इत्यादि-सूत्रे प्रोक्तं यत् सांकाशादिभ्य: ण्य: स्यात्। तेन सांकाश्यम्। सांकाशादिषु काम्पिल्यशब्दोऽपि दृश्यते; अत: ण्य:—काम्पिल्यम्। यकारोपधाच्च आभ्याम् वृद्धाभ्यां देशवाचिभ्यां वुञ् स्यात्—तेन सांकाश्यदेशे भव: इति सांकाश्यक:। काम्पिल्यदेशे जात: इति काम्पिल्यक:। काम्पिल्य इति पाञ्चालानां राजधानी।

१३४६। प्रस्थपुरवहान्ताच्च ॥४।२।१२२॥

दी—। एतदन्तात् वृद्धात् देशवाचिनोवुञ् स्यात्। छस्यापवाद:। मालाप्रस्थक:। नान्दीपुरक:। पैलुवहक:। पुरान्तग्रहणम् अप्रागर्थम्। प्राग्देशेतु उत्तरेण सिद्धम्।

Briddha words, ending in प्रस्थ, पुर or वह and expressive of some country take the suffix वुञ् after them. One born in the country of नान्दीपुर is नान्दीपुरक:। Rest easy—see Tika.

मित—। अन्त इति एतेन सह प्रत्येकं सम्बध्यते।—"द्वन्द्वात् पर: श्रूयमाण: शब्द: प्रत्येकमभिसम्बध्यते" इति न्यायात्। तेनायमर्थ:—प्रस्थान्तात् पुरान्तात् वहान्ताच्च प्रातिपदिकात् वृद्धात् देशवाचिन: वुञ् प्रत्यय: स्यात् शैषिक:। अयं "वृद्धाच्छ:" (४।१।११४) इति छप्रत्ययस्य अपवाद:। मालाप्रस्थ इति कश्चित् जनपद:। तत्र भव: इति मालाप्रस्थक:। नान्दीपुरे जात: इति नान्दीपुरक:। पैलुवहे उत्पन्न इति पैलुवहक:। ननु "रोपधेतो: प्राचाम्" (४।२।१२३) इति परसूत्रेणैव प्राग्देशवाचिन: पुरान्तात् वृद्धात् प्रातिपदिकात् वुञ् सिध्यति—पुरान्तस्य रकारोपधत्वात्, तर्हि कथम् अत्र पुरान्तस्य पुनरपिनिर्द्देश: इतिचेत्?—उच्यते। प्राग्देशे अभिधेये परसूत्रेणसिध्यति—परम् प्राग्देशात् अन्यस्मिन्देशे गम्यमाने अनेन वुञ् स्यात्। एवं कान्तीपुरक: फाल्गुनीवहक:।

१३४७। रोपधेतो: प्राचाम् ॥४।२।१२३॥

दी—। रोपधात् ईकारान्तात् च प्राग्देशवाचिनोवृद्धात् वुञ् स्यात्। पाटलिपुत्रक:। ईत:—कान्दक:।

The suffix वुञ् is attached to Briddha words, that have either र for their last but one letter, or that end in ईकार, provided these words are expressive of some eastern countries..

N.B—By eastern countries, Bengal, Behar and Assam are meant. Thus one born in पाटलिपुत्र: is पाटलिपुत्रक:—a native of Pataliputra (modern Patna). One born in कान्दी is कान्दक: । कान्दी is a sub-divisional town in the district of Morshedabad in Bengal. There are two other Kandis—one is Gujrat and another in Ceylon—but evidently these are not meant here as they are not eastern countries.

मित—। यस्य शब्दस्य उपधायां रकार: वर्त्तते, तथा यश्चापि शब्द: ईकारान्त: स्यात्। तादृशाभ्याम् वृद्धाभ्याम् पूर्व्वदेशवाचिभ्याम् वुञ् प्रत्यय: स्यात् शैषिक: । पाटलिपुत्र: इति कश्चित् पूर्व्वदेशवाची वृद्ध: रकारोपध: शब्द:। तत्र जात: इति वुञ्—पाटलिपुत्रक:। कान्दी इति कश्चित् पूर्व्वदेशवाची ईकारान्त: वृद्ध: शब्द: । तत्र भव: इति कान्दक:। एवं काकन्दी=काकन्दक:। माकन्दी—माकन्दक: । अपिच—एकचक्रा इति पूर्वदेशवाची रकारोपध: वृद्ध: प्रातिपदिक:। तत्र जाता: इति ऐकचक्रका: इति काशिकाभाषावृत्तिकारौ। एकचक्रा इति ग्राम: वङ्गविषये वीरभूम-प्रदेशे वर्त्तते। अत्र मध्यमपाण्डव: भीम: अज्ञातवासकाले वकासुरं जघान इति वार्त्ता महाभारते दृश्यते। अपिच अत्रैव वङ्गीयवैष्णवधर्म्मनेता श्रीश्रीनित्यानन्द: समजनि। तेन ऐकचक्रक: इति शब्देन श्रीनित्यानन्दोऽपि उच्यते।

ननु प्राचाम् इति किम्? दात्तामित्रि: इति कश्चित् अप्राग्देशीय: जनपद: । तत्रभव: इति छ: नतु वुञ्। तेन—दात्तामित्रीय:।

किं च—सूत्रे "ईतो:" इति ईकारस्य तपरकरणं किमर्थम्? 'त-परस्तत्कालस्य' (१।१।७०) इत्यस्य अवकाशोऽत्र नास्ति—"अनुदित् सवर्णस्य चाप्रत्यय:" (१।१।६९) इति सूत्रेण निर्द्दिष्टस्य "अण्" इत्यस्य मध्ये ईकारस्य अदर्शनात् ईकारेण सवर्णग्रहणप्रसङ्गस्य अभाव:। काशिका समाधत्ते—"तपरकरणं विस्पष्टार्थम्"।

यद्यपि ईकारेण एव स्पष्टोक्तिः स्यात्—तथापि "ईत्" इत्यनेन विशेषेण स्पष्टोक्तिर्भवेत् इति काशिकाकृताम् आशयः।

१३४८। जनपद-तदवध्योश्च ॥४।२।१२४॥

टी—। जनपदवाचिनः तदवधिवाचिनश्च वृद्धात् वुञ् स्यात्। आदर्शकः। त्रैगर्त्तकः।

The suffix वुञ् is added to Briddha words, that express a country or the extremity of a country. Thus—One born in आदर्शः—is आदर्शकः। One born in त्रिगर्त्तः is त्रैगर्त्तकः।

मित—। जनपद-वाचकात् वृद्धात् प्रातिपदिकात् तथा जनपदस्य अवधिं वाचयन्ति ये वृद्धाः प्रातिपदिकास्तेभ्योऽपि वुञ् प्रत्ययः स्यात् शैषिकः। छस्य अपवादोऽयम् वुञ्। आदर्श इति कश्चित् जनपदः। तत्र-भवः इति वुञ् आदर्शकः। एवम् आभिसारः—आभिसारकः। जनपदावधिवाचिनश्च उदाहरणं—यथा त्रिगर्त्तः इति। तत्र जातः इति वुञ्—त्रैगर्त्तकः। जनपदावधिरपि जनपद एव न तु ग्रामः। तथाचेत्—किमर्थम् तस्य पृथक् ग्रहणम्? उच्यते—"गर्त्तोत्तर-पदाच्छः" (४।२।१३७) इति सूत्रेण गर्त्तोत्तरपदात् छप्रत्ययः विहितः—यथा वृकगर्त्तीयम्। जनपदावधिवाचकात् त्रि-गर्त्तोत्तरपदात् वुञ् स्यात्—न खलु छ इत्येव ज्ञापयितुम् जनपदावधेः पृथक् ग्रहणं—तेनैव त्रैगर्त्त इति गर्त्तोत्तरपदात् वुञ्। जनपदावधेः उदाहरणान्तरम् यथा चौपुष्टः—चौपुष्टकः। अपिच श्यामायनः—श्यामायनकः।

१३४९। अवृद्धादपि बहुवचनविषयात् ॥४।२।१२५॥

टी—। अवृद्धात् वृद्धाच्च जनपद-तदवधिवाचिनो बहुवचन-विषयात् प्रातिपदिकात् वुञ् स्यात्। अवृद्धादणोवृद्धाच्छस्य अपवादः। अवृद्धात्जनपदात्—आङ्गकः। अवृद्धाज्जनपदा-

**वधे:—आजमीढ़क:। वृद्धाज्जनपदात्—दार्व्वक:। वृद्धाज्जनपदावधे:—कालञ्जरक:। विषयग्रहणं किम्? एकशेषेण वहुत्वे माभूत। वर्त्तनीच वर्त्तनीचवर्त्तनीच वर्त्तन्य:, तासुभवो वार्त्तन:।**

The suffix वुञ् is added to words—whether Briddha or non-Briddha, provided they are expressive of some country or its extremity and consequently are used in the plural number (out of their own nature and not due to any other cause). This वुञ् stands as a bar to अण् in case of non-briddha words and to छ in case of briddha words. N.B.—By taking the word विषय in the Sutra it is indicated that natural अवृद्ध वहुवचनान्त words are to be taken and not those अवृद्ध words that are वहुवचन by एकशेषवृत्ति।

मित—। सूत्रस्थेन अपिना "वृद्धात्" इति आयाति। तेन—"अवृद्धात् अपि जनपदवाचिन: जनपदावधिवाचिनश्च वहुवचन-विषयात् प्रातिपदिकात् वुञ् स्यात् शैषिक:। किमुत वृद्धात् जनपदवाचिन: तदवधिवाचिनश्च वहुवचनविषयात् प्रातिपदिकात्—ताभ्याम् वुञ्प्रत्ययस्य पूर्व्वसूत्रेणैव सिद्धत्वात्" इत्येवार्थ:। सूत्रद्वयम् संकलय्य अयमेवसरलार्थ: स्यात्—वृद्धात् जनपदवाचिन: जनपदावधिवाचिनश्च प्रातिपदिकात् वहुवचनविषयात् तथा अवहुवचनविषयात् वुञ्प्रत्यय: स्यात् शैषिक:। अवृद्धात् जनपदवाचिन: जनपदावधिवाचिनश्च वहुवचनविषयादेव वुञ् स्यात् शैषिक:। अयं वुञ् अवृद्धात् विहितस्य अण्प्रत्ययस्य तथा वृद्धात् विहितस्य छ-प्रत्ययस्यच अपवाद:। अवृद्धात् जनपदवाचिन: वहुवचनविषयात् यथा—अङ्गा: इति अवृद्ध: वहुवचनविषय: जनपदवाची कश्चित् शब्द:। तथाहि अङ्गा: क्षत्रिया: पुंलिङ्गा: वहुवचनविषया:। तेषाम् अङ्गानां निवास: इति "तस्य-निवास." (४।२।६९) इति सूत्रेण "अङ्ग" इतिशब्दात् अण्। तत: जनपदेलुप् (४।२।८१) इति सूत्रेण अण्-प्रत्ययस्यलुप्। तत: "लुपि युक्तवद्व्यक्तिवचने" (१।२।५१) इति सूत्रेण

प्रत्ययस्य लुपिसति प्रकृतिवत् लिङ्गवचनं तेन अङ्गाः इति देशनाम्नः बहुवचने एव अवस्थितिः। अतः अङ्गाः इति बहुवचन-विषयः जनपदवाची शब्दः—अहृद्ध। अङ्गेषु जातः इति वुञ्—आङ्गकः। [N.B.—"Angas" is the modern Bhagalpur division; during the days of the Mahabharat, Karna was the ruler of Angas.] एवं वङ्गाः—वाङ्गकः। कलिङ्गाः—कालिङ्गकः। अवृद्धात् बहुवचनविषयात् जनपदावधिवाचिनः यथा—आजमीढ़ाः—इति जनपदावधिवाची अवृद्धः शब्दः बहुवचनविषयः। अजमीढ़ानां निवासः इति साधन-प्रक्रिया तु पूर्ववत्। अजमीढ़ाः इति जनपदविशेषस्य पश्चिमसीमापूर्वकः क्षुद्रः जनपदः। तत्रजातः इति वुञ्—आजमीढ़कः। [अजमीराः—is the modern little province of Ajmir-meharaora] एवं अजक्रन्दाः—अजक्रन्दकः। वृद्धात् जनपदात् बहुवचनविषयात् यथा—दार्व्वाः—दार्व्वकः। जाम्बाः—जाम्बकः। अबहुवचन-विषयात् वृद्धात् जनपदावधिवाचिनः वुञ् प्रत्ययस्य उदाहरणम् पूर्व्वसूत्रे द्रष्टव्यम्। बहुवचनविषयात् वृद्धात् जनपदावधिवाचिनः यथा—कालञ्जराः इति जनपदावधिवाची वृद्धः बहुवचनविषयः शब्दः। अस्य साधन-प्रक्रिया तु "वङ्गाः" इतिवदेव तेषु भवः इति वुञ्—कालञ्जरकः। [N.B.—कालञ्जराः —is modern Kalinjar—the fort of which city is noted in the History of India. During his laying seige to this fort, Emperor Sher Shah received a mortal wound from a canon ball to which he succumbed later on]. एवं वैकुलिशाः—वैकुलिशकः। जनपदावधिवाचिनः वृद्धात् अबहुवचनविषयात् वुञ् प्रत्ययस्य उदाहरणम् पूर्व्व-सूत्रे द्रष्टव्यम्।

ननु "बहुवचनविषयात्" इत्यत्र विषय इति पदस्य कथम् उल्लेखः? उच्यते —विषय इति पदस्य उल्लेखेन ज्ञापयति यत् एकवचनान्तः जनपदवाची अवृद्धः शब्दः यदा एकशेषवृत्त्या बहुवचनान्तः भवति—तदा तस्मात् वुञ् न स्यात् अपितु अण् एव स्यात्—एकशेषवृत्त्या बहुत्वं बोधयतः एकवचनान्तजनपदवाचिनः अवृद्धशब्दस्य स्वत एव बहुवचनविषयत्वाभावात्। वर्त्तनी इति अवृद्धः

एकवचनान्तः जनपदवाचिशब्दः। वर्त्तनी च वर्त्तनी च वर्त्तनी च इति एकशेषवृत्त्या वर्त्तनाः। वर्त्तनीषु भवः इति वुञ् न स्यात्—वर्त्तनीशब्दस्य स्वत एव बहुवचनविषयत्वाभावात्—अपितु अण् एव ; तेन वार्त्तनः।

१३५०। कच्छाग्निवक्त्रवर्त्तोत्तरपदात् ॥४।२।१२६॥

दी—। देशवाचिनः वृद्धात् अवृद्धात् च वुञ् स्यात्। दारुकच्छकः। काण्डाग्नकः। सैन्धुवक्त्रकः। बाहुवर्त्तकः।

The suffix वुञ fs attached to Briddha as well as non-briddha words—which end in कच्छ or अग्नि, or वक्त्र or वर्त्त—and which stand for the name of a country.

मित—। येषां शब्दानाम् अन्ते कच्छ इति, अग्नि इति वक्त्र इति वर्त्त इति वा वर्त्तते, ये शब्दाः देशाभिधायिनश्चेत् तेभ्यः वुञ स्यात् शैषिकः—ते वृद्धाः अवृद्धा वास्युः। दारुकच्छः इति कच्छान्तः देशवाचीशब्दः। तत्रभवः इति वुञ दारुकच्छकः। काण्डाग्निः—तत्रभव इतिवुञ् काण्डाग्नकः। सिन्धुवक्त्र—सैन्धुवक्त्रकः। बहुवर्त्तः—बाहुवर्त्तकः। अयं वुञ् वृद्धस्थले छप्रत्ययस्य तथा अवृद्धस्थले अण्प्रत्ययस्य च अपवादः। एवं वैभुजाग्नकः। पैप्पलीकच्छकः। ऐन्द्रवक्त्रकः। चाक्रगर्त्तकः। कच्छः जलप्रायो देशः। तथाहि अमरकोषे—जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः।

१४५१। धूमादिभ्यश्च ॥४।२।१२८॥

दी—। देशवाचिभ्यो वुञ्। धौमकः। तैर्थकः।

The suffix वुञ् is attached to words of the धुमादि class which stand for the name of a particular country.

मित—। धूमप्रभृतिशब्देभ्यः देशवाचिभ्यः वुञ्प्रत्ययः स्यात् शैषिकः। अयम् अणादेरपवादः। धूमः इति कश्चित् देशः तत्र जातः धौमकः। तीर्थ इति देशविशेषः तत्रभवः इति तैर्थकः। धूमादिर्यथा—धूम, तीर्थ, खण्ड,

खण्डेषु भवः इति खाण्डकः, ग्रशादन, आञ्जनाव, दाण्डायनस्थली, माहकस्थली, घोषस्थली, मापस्थली, राजस्थली भद्रास्थली, राजगृह, सवासाद, मद्रकूल, गर्त्त कुल, आञ्जीकुल, द्वाहाव, त्राहाव, स'हीय, वर्व'र, वर्च्चगर्त्त, विदेह, आनर्त्त, माठर, पाथेय, घोष, शिष्य, मित्र, वल, आराज्ञी, धार्त्त'राज्ञी, अवयात, कुक्षि, अन्तरीप, द्वीप, अरुण, उज्जयिनी, साकेत, दक्षिणापथ। तथाहि विदेहानां क्षत्रियाणां स्व'—वैदेहकम्। आनर्त्त :—देशविशेषः। अत्र कुरुवंशध्वंसावसाने अर्ज्जुनः कृतवर्म्मतनयं सिंहासने स्थापयामास। आनर्त्तः क्षत्रियविशेषः। आनार्त्तानां क्षत्रियाणाम् स्वम्—इति आनर्त्तकम्। समुद्रशब्दात् नाविवाच्ये, मनुष्ये च अभिधेये वुञ् स्यात्—यथा सामुद्रिका नौः। सामुद्रिकः मनुष्यः।

सामुद्रिका नौः इत्यनेन ज्ञायते यत् काशिकाकृतौ समये समुद्रयात्रा प्रचलिता आसीत्। सामुद्रिकः मनुष्य इत्यनेनापि एतत् तथ्यं समर्थ्यते। नौ-मनुष्ययोरन्यस्मिन् वाच्ये समुद्रशब्दात वुञ् न स्यात—यथा सामुद्रं जलम्। अत्र अण एव। पाथेय शब्दात् "धन्वयोपधात वुञ्" [ ४।२।१२१ ] इति सूत्रेण वुञि सिद्धे पुनरपि अत्र पाठः अदेशार्थः अदेशे अपि वाच्ये तत्र वुञ स्यात; पाथेयकं पाथेयेन क्रीतं वस्तु। अपिच "कूलात सौवीरेषु", कूले अभिधेये सति सौवीरादिभ्य शब्देभ्यः वुञ् स्यात यथा सौवीरकं कूलं, सौवीरदेशसमीपस्थः समुद्रतट इत्यर्थः।

## १३५२। नगरात् कुत्सन-प्रावीण्ययोः ॥ ६।४।१५३ ॥

**टी—। नगरात् वुञ् स्यात् कुत्सने प्रावीण्ये च गम्ये। नागरकः चौरः शिल्पी वा। कुत्सने इति किम्? नागरा ब्राह्मणाः।**

The suffix वुञ् is attached to the word नगर to imply a censurable or dexterous person. Thus नागरक etc means a thief or a person of illfame as well as an artisan—a dexterous person. Rest easy.

मित—। नगरशब्दात् वुञ्प्रत्ययो भवति शैषिकः कुत्सने प्रावीण्ये च गम्यमाने। नगरशब्दात् वुञ्प्रत्यये यस्मिन् अर्थे भवति तस्यैव अर्थस्य, विशेषणतया कुत्सनं प्रावीण्यं च मन्तव्ये। कुत्सनं निन्दनम्। प्रावीण्यं नैपुण्यम्।

"कुत्सने प्रावीण्ये च जातादौ प्रत्ययार्थः इति"—काशिका। नागरकाः चौराः इति। नगरे जाताः कुत्सनमनायाः इत्यर्थे वुञ्। कुत्सन—प्रावीण्ययोरन्यत्र यथा नगरे भवाः नागराः ब्राह्मणाः। अपिच कत्र्यादिषु नगरशब्दस्य पाठात् "कत्र्यादिभ्यो ढकञ्" (४।२।९५) इति नगरात् ढकञ् स्यात्। तेन नगरे उत्पन्नं नागरेयकम्। अत्र नगरशब्दः तु न नगरसामान्यवाची अपितु न नगरविशेषवाची। नगर इति कस्यचित् पुरस्य संज्ञा। तत्र भवं नागरेयकम्।

## १३५३। अरण्यान्मनुष्ये ॥ ४।२।१२८।

**टी—। वुञ्। अरण्याण्ण इत्यस्य अपवादः। "पथ्यध्याय न्यायविहारमनुष्यहस्तिष्विति वाच्यम्।" आरण्यकः पन्थाः अध्यायो न्यायो विहारो मनुष्यो हस्ती वा॥ वा गोमयेषु (वा) । आरण्यकाः आरण्याः वा गोमयाः ॥**

The suffix वुञ् is added to the word अरण्य to imply a human being; also to imply a way, a chapter, some principle, some monastery or an elephant; this word also optionally takes the said suffix to denote cow-dung. In absence of वुञ् we have the suffix ण by the dictum "अरण्याण्णः—a varttika barred by this rule in the present case.

मित—। मनुष्ये अभिधेये सति अरण्यशब्दात् वुञ् स्यात् शैषिकः। अरण्ये भवः मनुष्यः आरण्यकः मनुष्यः। वन्यः इत्यर्थः। अपिच मार्गे, अध्याये, न्याये, विहारे, गजे च गम्यमाने अरण्यात् वुञ् स्यात्। अरण्यम् अतिक्रम्य गच्छति पन्थाः। अरण्ये अध्येतव्यः अध्यायः आरण्यकः अध्यायः। वेदानां ज्ञानकाण्डे अवस्थितः

अध्याय-विशेषः यथा तैत्तिरीयः आरण्यकः । अरण्ये पालयितव्यः न्यायः आरण्यकः न्यायः । अरण्यस्थितः विहारः आरण्यको विहारः । विहारः बौद्धमठविशेषः । यद्वा अरण्ये आचरितव्यः विहारः आरण्यको विहारः । विहारः रत्यादिप्रमोद-क्रीडा । अरण्ये भवो हस्ती आरण्यको हस्ती । वन्यः गजः । गोमये गम्ये अरण्यात् वुञ् स्यात् विकल्पेन—यथा अरण्ये भवाः गोमयाः आरण्यकाः गोमयाः । वुञः अप्राप्तिपक्षे—अरण्यात् णः इति उपसंख्यानिक(वार्त्तिक)सूत्रेण णः—तेन आरण्याः गोमयाः । अरण्याणः इत्यस्य अपवादम् एतत् ।

## १३५४ । विभाषा कुरुयुगन्धराभ्याम् ॥ ४।२।१३० ॥

**टी— । वुञ् । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः ।**

The suffix वुञ् is optionally attached to कुरु and युगन्धर ।

मित— । कुरुशब्दात् तथा युगन्धरशब्दात् च वुञ् स्यात् शैषिकः विकल्पेन । एतौ शब्दौ जनपदवाचिनौ । अतएव "अवृद्धादपि बहुवचनविषयात्" ( ४ २।१२५ ) इति सूत्रेण नित्ये वुञ्प्रत्यये प्राप्ते सति अनेन विकल्पविधानम् । कुरुषु भवः इति कौरवकः । युगन्धरेषु भवः इति यौगन्धरकः । कुरुशब्दः "कच्छादिभ्यश्च" ( ४।२।१३३ ) इति सूत्रे उल्लिखिते कच्छादिगणे अपि पठ्यते—तेन कच्छादित्वात् अस्मात् अण् स्यात्—कौरवः । अपिच अस्य कच्छादित्वात् "मनुष्यतत्स्थयो र्वुञ्" ( ४।२।१३४ ) इति सूत्रबलेन मनुष्ये मनुष्यस्थे च जातादौ प्रत्ययार्थे नित्यमेव वुञ् स्यात्—यथा कौरवकः मनुष्यः । कौरवकम् अस्य हसितम् ।

युगन्धरशब्दात् वुञः अप्राप्तिपक्षे अण् स्यात् यौगन्धरः ।

## १३५५ । मद्रवृज्योः कन् ॥४।२।१३१॥

**टी— । जनपदवुञोऽपवादः । मद्रेषु जातः मद्रकः । वृजिकः ।**

The suffix कन् ( not वुञ् ) is attached to मद्र and वृजि two countries of the same name.

मित—। मद्रशब्दात् वृजिशब्दात् च कन् स्यात् शैषिकः, "जनपद-तद्वधोश्च" (४।२।१२४) इति वुञ् प्रत्ययं वाधित्वा एव कन् जनपदवाचिभ्याम् आभ्याम् भवति। मद्रेषु जातः मद्रकः मद्रदेशीयः इत्यर्थः। मद्रेषु भारत-युगे शल्यः नृपतिरासीत्। वृजिषु भवः इति वृजिकः।

## १३५६। कोपधादण् ॥४।२।१३२॥

## टी—। माहिषिकः।

The suffix अण् is added to words that possess क for their penultimate letter—provided the said words stand for the name of some country.

मित—येषां शब्दानाम् उपधायाम् ककारो विद्यते, तेभ्योऽण् प्रत्ययः स्यात् शैषिकः देशे गम्यमाने। वुञ्प्रत्ययस्य अपवादोऽयम् अण्। महिषक इति कश्चित् देशः—तत्र भवः इति अण् माहिषिकः। एवं ऋषिकेषु जातः आर्षिकः, माहर्षिकः, आर्ष्यकः। उवर्णान्तादपि शब्दात् देशवाचकात् अण् स्यात् इति केचित्। इक्ष्वाकुषु जातः ऐक्ष्वकः।

## १३५७। कच्छादिभ्यश्च ॥४।२।१३३॥

## टी—। देशवाचिभ्योऽण्। वुञादेरपवादः। काच्छः। सैन्धवः।

The suffix अण् [but not वुञ्] is attached to words of the कच्छादि class—if these stand for the name of a particular country.

मित—। कच्छ इत्येवमादिभ्यः देशवाचिभ्यः अण् प्रत्ययः स्यात् शैषिकः। अयं वुञ्छप्रभृतिप्रत्ययानाम् अपवादः। कच्छेषु भव इति काच्छः। सिन्धुषु जातः इति सैन्धवः। एवं वर्णुषु भवः वार्णवः, कुरुषु भवः इति कौरवः। सिन्धु-शब्दान्तादपि अण् स्यात् देशे गम्ये—यथा सौरसैन्धवम्—इति भाषावृत्तिकारः।

कच्छादिर्यथा—कच्छ सिन्धु, वर्ण, कुरु, कम्बोज, काश्मीर, गन्धार, शाल्व, मधुमत्, अनुषण्ड, द्वीप, अनूप, अजवाह, विजापक, कलूतर। रङ्कु, अण्, खण्ड, कलूत स्थाने कुलुन इति पठति काशिकाकार। परं कुलूत इत्येव पाठः समीचीनः इति वयं मन्यामहे। कुलूतोदेशविशेषः [ It is Modern Khelat the capital of Beluchisthan]—कादम्बरी ग्रन्थे उल्लिखित। पत्रलेखा कुलूतेश्वरस्य दुहिता आसीत्। अपिच मुद्राराक्षसे—कौलूतश्चित्रवर्मा मलयनरपतिः सिंहनादोनृसिंहः। कौलूतः कुलूतराज इत्यर्थः। कच्छादिगणे विजापकः इति पठ्यते। तस्य तु ककारोपधत्वात् अणि सिद्धेऽपि अत्र पाठः "मनुष्यतस्थयो वुञ्" । (४।२।१३४) इति परसूत्रेण वुञः बाधनार्थम्।

## १३५८। मनुष्यतत्स्थयोर्वुञ् ॥ ४।२।१३४ ॥

टी—। कच्छाद्यणोऽपवादः। कच्छे जातादिः काच्छको मनुष्यः। काच्छकं हसितम्। मनुष्ये इति किम्? काच्छो गौः॥

The suffix वुञ् is attached to the aforesaid words of the कच्छादि class to imply a hunam being or anything belonging to the person of the same. Thus we have the suffix वुञ् added to कच्छ—and the word atonce formed is काच्छकः—meaning a native of कच्छ modern Cutch ( capital Bhuj ). This वुञ् stands as a bar to अण्। काच्छकं हसितम् means the laughter after a native of Cutch—i. e langhter of the kind commonly met with in a native of Cutch.

मित—। कच्छादिभ्यः इत्येव। मनुष्यः मानवः। तत् स्थः मनुष्यस्थः। मानवे जातं यत् किञ्चित् वस्तु इत्यर्थः। तेन अयमर्थः—मनुष्ये मनुष्यदेहजाते कस्मिंश्चित् वस्तुनि वा गम्यमाने कच्छादिभ्यः वुञ् प्रत्ययः स्यात्। "कच्छादिभ्यः" ( ४।२।१३३ ) इति विहितस्य अणः अपवादः। कच्छ इति गुर्जर विषयस्य पश्चिमे

स्थित: देशविशेष:। अस्य राजधानी भुजनगरी। तत्र कच्छविषये जात: मनुष्य: इति वुञ् काच्छक: मनुष्य:। कच्छदेशोचितं हसितं जल्पितं वा अस्य इति काच्छकं हसितं जल्पितं वा कच्छदेशचूडा। एवं सिन्धुदेशे भव: मनुष्य: सैन्धवको मनुष्य:। सिन्धुदेशोचितं हसितं जल्पितं वा अस्य इति सैन्धवकं हसितं जलपितं वा। सिन्धुदेश चूड़ा तुल्या चूड़ा सैन्धविका चूड़ा। मनुष्य इति किम्? काच्छी गौ:। अत्र मनुष्यात व्यतिरिक्ते गवि गम्यमाने सति काच्छात वुञ न स्यात अपितु पूर्वसूत्रेण अण एव। तस्थे इति किम्? वर्णु इति देशविशेष:। तत्रजात: इति वार्णव:, एवं सैन्धव:, सैन्धवं जलम्। वार्णवं पुष्पं सिन्धुदेशजातो यो वृक्ष: तस्य फलम्। वर्णुदेशजात य:तरुस्तस्य पुष्पम्। अत्र फलपुष्पयो: मनुष्यस्थत्वाभावात न सिन्धुशब्दात नापि वर्णुशब्दात वुञ, अपितु अण एव।

## १३५८। अपदातौ साल्वात।४।२।१३५॥

**दी—। साल्वशब्दस्य कच्छादित्वात् वुञि सिद्धे नियमार्थमिदम्। अपदातावेवेति नियम:। साल्वको ब्राह्मण:। अपदातौ किम्? साल्व: पदाति व्रजति।**

The word साल्व is included in the कच्छादि class and hence the rule मनुष्यतस्थयोर्वुञ् ४।२।१३४ sanctions वुञ—to be added to it, but there is one exception; this वुञ is barred in साल्व if the word stands to qualify a पदाति [ foot soldier—infantry ]. Thus we have साल्वक: ब्राह्मण: but साल्व पदाति।

मित—। शाल्वशब्द: कच्छादिषु पठ्यते—तेन मनुष्ये मनुष्यस्थे वस्तुनि अभिधेये अस्मात् वुञ स्यात। परमत्र एकोनियम: अनेन विज्ञाप्यते—यत पदातौ वाच्ये साल्वाशब्दात् वुञ न स्यात—अपितु अण एव। पदातौ मनुष्येषु अन्तर्भूतत्वे सति पूर्वसूत्रेण वुञ प्रत्ययस्य प्रसक्तौ अनेन निषेध: साल्वदेशीय: ब्राह्मण: साल्वक: ब्राह्मण:। परं साल्वदेशीय: पदाति साल्वक: पदाति: इति न स्यात अपितु साल्व: पदाति: इत्येव। साल्व: पदाति व्रजति।

१३६० । गोयवाग्वोश्च ॥ ४।२।१३६ ॥

टी—। साल्वाद् वुञ् । कच्छाद्यणोपवाद: । साल्विका यवागू: । साल्वको गौ: । साल्वम् अन्यत् ।

The suffix वुञ् is attached to साल्व provided the word thus formed, stands to qualify a cow or Maize (यवागू) । Thus साल्विका यवागू:, साल्वक: गौ:—but witness साल्वं धान्यम् ।

मित—। गवि यवाग्वां च अर्थे साल्वशब्दात् वुञ् प्रत्यय: स्यात् शैषिक: । "कच्छादिभ्यश्च" ( ४।२।१३३ ) इति विहितस्य अण् प्रत्ययस्य अपवाद: । साल्वविषये भव: इति साल्वक: गौ: । साल्वविषये भवा इति साल्विका यवागू:···आभ्याम् अन्यत्र अण् एव—यथा साल्वम् धान्यम् । साल्वदेशजातं धान्यमित्यर्थ: ।

१३६१ । गर्त्तोत्तरपदाच्छ: ॥४।२।१३७॥

टी—। देशे । अणोऽपवाद: । वृकगर्त्तीयम् । उत्तरपद-ग्रहणम् वहुच् पूर्व्वनिरासार्थम् ।

The suffix छ ( not अण् ) is attached to a word, expressing a country and ending in गर्त्त । Thus a native of वृकगर्त्त is called वृकगर्त्तीय (the छ being substituted by ईय) । The उत्तरपद in the rule signifies that the word वहुगर्त्त formed from the word गर्त्त with the suffix वहुच् placed before it—is exempted from taking छ after it.

मित—। देशाभिधायिन: गर्त्तोत्तरपदात् प्रातिपदिकात् (तत्रजात इति प्रत्ययस्य अर्थे सति इत्यर्थ: ) छप्रत्यय: स्यात् शैषिक: । अयं छप्रत्यय: अण् प्रत्ययस्य अपवाद: । वृकगर्त्त: इति कश्चित् देश: । तत्रजातं वृकगर्त्तीयम् । एवं शृगालगर्त्तीयम् । श्वस्तगर्त्तीयम् ।

वाहीकग्रामेभ्यश्च ( ४।२।११७ ) इति सूत्रे च वाहीकग्रामवाचिवृद्धशब्देभ्य: छ-प्रत्ययं वाधित्वा ठञ्-ञिठ्-प्रत्ययद्वयं प्रवर्त्तते । इदं सूत्रन्तु वाहीकसूत्रात् परस्मिन्

तिष्ठति तेन वाहीकत्वमनेन वाध्यते। अतः इदम् आयाति यत् वाहीकग्रामाभिधायी कश्चित् वृद्धशब्दश्चेत् गर्त्तोत्तरपदस्तर्हि तस्मात् छ-प्रत्यय एव स्यात् न खलु ठञ्ञिठौ। आविदूर-गर्त्तः इति कश्चित् वाहीकग्रामवाची वृद्धः गर्त्तोत्तरपदः शब्दः। अस्मात् छ एव स्यात्—आविदूरगर्त्तीयम्।

ननु सूत्रे "गर्त्तोत्तर-पदाच्छः" इति उत्तरपदग्रहणं कथम् इति आशङ्कायां कथयति—"उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम्"। बहुच् इति कश्चित् ईषदर्थे विहितः तद्धितप्रत्ययोऽस्ति तस्य पुनः प्रकृतेः पूर्वमेव अवस्थितिः स्यात्। यथा ईषत् पटुः बहुपटुः। ईदृशात् बहुच्प्रत्ययनिष्पन्नात् गर्त्तशब्दात् छो न स्यात् इति ज्ञापयितुम् एव उत्तरपदग्रहणम्। तथाहि बहुगर्त्त इति बहुच्प्रत्ययनिष्पन्नः गर्त्तशब्दः। अत्र बहु इत्यस्य प्रत्ययत्वात् न गर्त्त इत्यस्य उत्तरपदत्वम्। तेन बहुगर्त्ते भवम् इत्यर्थे अनेन छप्रत्ययः न स्यात्—अपि तु अण् एव—अतः वाहुगर्त्तम् इति।

१३६२। गहादिभ्यश्च ॥४।२।१३८॥

**टी—। छः स्यात्। गहीयः। मुखपार्श्वतसोर्लोपश्च (वा)। मुखतीयम्। पार्श्वतीयम्। अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम्। कुग्जनस्यपरस्य च (वा)। जनकीयम्। परकीयम्। देवस्य च (वा)। देवकीयम्। स्वस्य च (वा)। स्वकीयम्। वेणुकादिभ्यश्छण् वाच्यः (वा)। वैणुकीयम्, वैत्रकीयम्, उत्तरपदकीयम्।**

Words, falling under the गहादि class, take the suffix छ after them, in various senses.

The two words मुखतस् and पार्श्वतस्—drop their टि portion ( i.e अस् ) before this छ ( i.e ईय ) ; this goes to show that the dictum "अव्ययानां भमात्रे टिलोपः"—( that is an avyaya loses its टि portion when it stands as भसंज्ञक) is not applicable in any and every case.

A क is inserted between this छ and the following words—जन, पर, देव, and स्व ।

Words, coming under the head वेणुकादि take this suffix छण् ( and not छ ) after them. The difference between the actions of छण् and छ is that the former causes वृद्धि of the first vowel of the word to which it is to be joined whereas the latter does not do so.

मित—। गह इति एवमादिभ्यः प्रातिपदिकेभ्यः छप्रत्ययः स्यात् शैषिकः। गहे भवः इति छः—गहीयः। एवं नान्तरीयः। अन्तःस्थीयः। एकग्रामीयः। गहादिर्यथा—गह, अन्तःस्थ, नान्तर, एकग्राम, सम, विषम, मध्य, मध्यन्दिन, उत्तम, अङ्ग, वङ्ग, मगध, पूर्व्वपक्ष, अपरपक्ष, अधमशाख, उत्तमशाख, एकशाख, समानशाख, समानग्राम, एकवृक्ष, एकपलाश, इष्वग्र, इष्वनीक, अवस्यन्दन, कामप्रस्थ, खाडायन, काठेरणि, लावेरणि, सौमित्रि, शैशिरि। आसुरि। दैवशर्म्मि, श्रौती, आहिंसि, आमिवि, व्याडि, वैदजि, आध्यश्वि, आनृशंसि, शौङ्गि, आग्निशर्म्मि, भौजि, वाराटकी, वाल्मीकि, क्षैमवृद्धि, आश्वत्थि, औद्गाहमानि, ऐदविन्दवी, दन्ताग्र, हंस, तन्त्वग्र, अनन्तर, अङ्गाधिकार, नगर, पूर्व्वांसिद्ध, इति गहादिराकृतिगणः।

गहादिगणमध्ये पतितानां केषाञ्चित् शब्दानां सम्बन्धे विशेषविधयः सन्ति। इदानीं तान् प्रवक्ति—

(१) मुख इत्यादि मुखशब्दात् तसि कृते मुखतः इति भवति, पार्श्वशब्दात् तसि कृते पार्श्वतः इति भवति। एतद्द्वयं गहादिगणे पठनीयम्। आभ्याम् छप्रत्यये कृते अनयो टिलोपः स्यात्। मुखतीयः। पार्श्वतीयः।

ननु छप्रत्यये परे पार्श्वत इति एतयोः "यचिभम्" ( १।४।१८ ) इति सूत्रेण भसंज्ञा स्यात्। तथा सति "अव्ययानां भमात्रे टिलोपः" इति नियमेन अव्यययोरनयोः टिलोपस्य प्रसक्तौ किमर्थम् अनेन सूत्रेण इति आशङ्कायां प्रतिवक्ति—"अव्ययानाम्" इत्यादिना। अनेन सूत्रेण ज्ञाप्यते यत्—"अव्ययानां भमात्रे टिलोपः" इति यो विधिः सोऽनित्य एव। न खलु एष नियमः सर्व्वत्रैव प्रयुज्यते इत्यर्थः।

(२) कुगिति। जनपद इति पदद्वयं गहादिगणस्थम्। आभ्याम् छप्रत्यये परे कुग् इति आगमो भवेत्। परकीयः। जनकीयः। तथाहि शाकुन्तले—अर्थो हि कन्या परकीय एव।

(३) गहादिगणपठितात् देवशब्दादपि छप्रत्यये परे कुगागमः स्यात्—देवकीयः।

(४) गहादिगणपठितात् स्वशब्दादपि छे परे कुगागमः—स्वकीयः।

(५) वेणुकादिशब्देभ्यः छण् प्रत्ययः स्यात् शैषिकः। वैणुकीयम्। णकारः इत्—तेन आदिस्वरवृद्धिः। वैवकीयम्, चैवकीयम्, उत्तरपदकीयम्। प्रास्थकीयम्। माध्यमकीयम्। आकृतिगणोऽयम्। अतः काचुकीयः इत्याद्यपि। वेणुकादीनाम् अपि गहादिषु अन्तर्भावो ज्ञेयः।

**१३६३। प्राचां कटादेः॥ ४।२।१३९॥**

**टी—। प्राग्देशवाचिनः कटादेश्छः स्यात्। अणोऽपवादः। कटनगरीयम्, कटघोषीयम्। कटपल्लीयम्।**

Words beginning with कट and denoting a country in the east, take the suffix छ after them. Thus we have कटनगरीयम्। कटनगरी is part of modern "Katwa"--in the district of Burdwan ( Bengal )

मित—। पूर्वदेशाभिधायिनः कटादेः प्रातिपदिकात् छप्रत्ययः स्यात् शैषिकः। अणोपवादोऽयं छः। कटनगरी इति काचित् पूर्वदेशस्थिता पुरी, तस्यां भवम् इति कटनगरीयम्। एवं कटघोषीयम्। कटपल्लीयम्।

**१३६४। राज्ञः क च ॥४।२।१४०॥**

**टी—। वृद्धत्वात् छे सिद्धे तत्सन्नियोगेन कादेशमात्रं विधीयते। राजकीयम्।**

The word राजन् is a briddha word and consequently it takes the suffix छ after it. This rule sanctions the insertion

of क between छ and राजन्—and we have राजकीयम्—belonging to a king.

मित—। राजन् इति वृद्धः शब्दस्तेन "वृद्धाच्छः" (४।२।११४) इति छप्रत्ययः स्यात्। छप्रत्यये परे अस्मात् ककारागमो भवेत्। राज्ञः इदम् इति राजकीयम्। अत्र देशवाचित्वं नास्ति असम्भवात्।

१३६५। वृद्धादकेकान्तखोपधात् ॥४।२।१४१॥

दी—। अक इक एतदन्तात खोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात्। ब्राह्मणको नाम जनपदो यत्र ब्राह्मणा आयुधजीविनस्तत्र जातो—ब्राह्मणकीयः। शाल्मलिकीयः। अयोमुखीयः॥

Words, that end in either अक, or इक or have ख as their penultimate letter, take the suffix छ after them—provided the selfsame words are briddha and at the same time, are expressive of some particular country.

मित—। तथाहि वृद्धात् देशाभिधायिनः अक इत्यन्तात् इकइत्यन्ताच्च तथा खकारोपधाच्च छप्रत्ययः स्यात् शैषिकः। अयं कोपधादण् (४।२।१३२) इति विहितस्य अणोऽपवादः। अकान्तात्—ब्राह्मणकीय—एवम् आरीहणकीयः द्रौघण-कीयः। इकान्तात्—शाल्मलिकः इति विषयः—तत्र भवः इति शाल्मलिकीयः। एवं आश्वपथिकीयः। खकारोपधात्—अयोमुख इति स्थानविशेषः। तत्रजातः इति अयोमुखीयः। एवं कौटिशिखीयः। काशिकामते अन्यत्रापि क्वचिद् भवति यथा—सौसुकीयः, मौसुकीयः, इन्द्रवेणुकीयः।

१३६६। कन्थापलदनगरग्रामह्रदोत्तरपदात् ॥४।२।१४२॥

दी—। कन्थादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात्। ठञ्‌ञिठादेरपवादः। दाक्षिकन्थीयम्। दाक्षिपलदीयम्। दाक्षिनगरीयम्। दाक्षिग्रामीयम्। दाक्षिह्रदीयम्।

The suffix छ is added to briddha words—which end in any one of the following—कन्या, पलद, नगर, ग्राम, and ह्रद and which are expressive of some particular country.

मित—। वृद्धात् देशाभिधायिनः कन्योत्तरपदात्, पलदोत्तरपदात्, नगरोत्तरपदात्, ग्रामोत्तरपदात् तथा ह्रदोत्तरपदाच्च छः स्यात् शैषिकः। अयम् "वाहीक ग्रामेभ्यश्च" ( ४।२।११७ ) इति विहितयोः ठञ्ञिठयोरपवादः। दाक्षिकन्या इति कश्चित् जनपदः। तत्र भवः इति दाक्षिकन्थीयः। एवं माहिकिकन्थीयः। दाक्षिपलदे भवः इति दाक्षिपलदीयः। एवं माहिकिपलदीयः। दाक्षिनगरे जातः इति दाक्षिनगरीयः। एवं माहकिनगरीयः। दाक्षिग्रामे उत्पन्न इति दाक्षिग्रामीयः, एवं माहकिग्रामीयः। दाक्षिह्रदे भवः इति दाक्षिह्रदीयः। एवं माहिकिह्रदीयः।

## १३६७। पर्व्वताच्च ॥४।२।१४३॥

## दो—। पर्व्वतीयः।

The suffix छ is attached to the word पर्व्वत।

मित—। पर्व्वत इति शब्दात् छप्रत्ययः स्यात् शैषिकः। पर्व्वतीयः पुरुष। पर्व्वतीयो राजा। तथाहि "पर्व्वतीय इति मावजीगणः"। "तवजन्यं रघोर्घोरं पार्वतीयैः गणैरभूत्" इत्यत्र तु पर्वतीयानामिमे इति पर्वतीय + अण् = पार्वतीयाः इति समाधेयम्।

## १३६८। विभाषाऽमनुष्ये ॥ ४।२।१४४॥

**दो—। मनुष्यभिन्नेऽर्थे पर्वतात् छो वा स्यात् पक्षे अण्। पर्वतीयानि पार्वतानि वा फलानि। अमनुष्ये किं? पर्वतीयो मनुष्यः।**

The suffix छ is added to पर्वत provided the word does not stand to quatify a human being.

मित—। मनुष्यात् अन्यत्र पर्वतशब्दात् "तत्र जातः" इत्यादौ अर्थे छप्रत्ययो

वा स्यात्। पूर्वसूत्रेण नित्यं प्राप्ते सति अनेन विकल्प उच्यते। पक्षे अण्। पर्वते जातानि इति पर्वतीयानि फलानि—अत्र छः। पार्वतानि फलानि—अत्र अण्, एवं पर्वतीयम् उदकम्। पार्वतम् उदकम्। मनुष्यार्थे तु पर्वतीयो मनुष्यः। अत्र छ एव न खलु अण्।

१३६८। कृकणपर्णाद्भारद्वाजे ॥ ४।२।१४६ ॥

टी—। भारद्वाजदेशवाचिभ्यामाभ्याम् छः। कृकणीयम्। पर्णीयम्। भारद्वाजे किम्? कार्कणम्। पार्णम्।

The suffix छ is added to the words कृकण and पर्ण when the objects denoted by them, are retative to the country of Bharadwaja.

मित—। भारद्वाजे देशे इत्यर्थः। भरद्वाजदेशाभिधायिनः कृकण इति शब्दात् तथा पर्णशब्दात् च छप्रत्ययः स्यात् शैषिकः। भारद्वाजात् अन्यस्मिन्—यथा कृकणे भवम् इति कार्कणम्—अण्। पर्णे भवम् इति पार्णम् अण्।

१३७०। युष्मदस्मदोरन्यतरस्यां खञ्च ॥ ४।३।१ ॥

टी—। चाच्छः। पक्षे अण्। युवयोर्युष्माकम् वा अयं युष्मदीयः। अस्मदीयः।

The suffix खञ् "too" becomes optionally attached to the words युष्मद् and अस्मद्; by "too" we are to know that "छ" and by "optionally" we are to understand that अण् also are attached to these. Thus—summing up—we may have the three suffixes अण्, छ, and ख attached to युष्मद् and अस्मद्।

मित—। देशे इति एतत् न अनुवर्त्तते। अन्यतरस्याम् इति विकल्पेन ख इति प्रत्ययश्च भवति। खप्रत्ययस्य अप्राप्तिपक्षे अण् प्रत्ययः स्यात्। अपिच "खञ्प्रत्ययश्च भवति" इत्यत्र स्थितेन चकारेण ज्ञाप्यते यत्—छ-प्रत्ययस्य आभ्याम्

स्यात्। अस्मिन् सूत्रे अनुक्तं पूर्वसूत्रे च "गर्त्तोत्तरपदाच्छः" (४।१।१३७) इत्यस्मात् अनुवृत्तं छ प्रत्ययं अवत्यचकारः समुचिनोति। अतएव अवत्यचकारः अनुक्तसमुच्चये एव विहितः।

युष्मदशब्दात् तथा अस्मदशब्दात् च अण्, खञ्, छ इति एते त्रयःप्रत्ययाः भवन्ति शैषिकाः इति सरलार्थः। युवयोः युष्माकं वा अयम् इति छ—युष्मदीयः। युष्मदीयः अश्वः भवत्सम्बन्धी भवत्स्वामिको वा अश्वः इत्यर्थः। एवं आवयोः अस्माकम् वा अयं इति छ-प्रत्ययः—अस्मदीयः। अस्मदीयं पुस्तकम्। अस्मत्-स्वामिकम् अस्मत्सम्बन्धि वा पुस्तकम्।

ननु अणि खञि वा प्रत्यये परे कीदृशानि रूपाणि स्युरिति आकाङ्क्षायां सूत्रयति—

**१३७१। तस्मिन्नणि च युष्माकास्माकौ ॥ ४।३।२ ॥**

**दी—। युष्मदस्मदोरेतावादेशौस्तः खञ्यणि च। यौष्माकीनः। आस्माकीनः। यौष्माकः। आस्माकः।**

The words युष्मद् and अस्मद् are changed to युष्माक and अस्माक respectively when the two suffixes खञ् and अण् are attached to them; thus we have यौष्माकीन and आस्माकीन by खञ् and यौष्माक and अस्माक by अण्।

मित—। तस्मिन् इति साक्षात् विहितः खञप्रत्यय एव उपदिष्टः—न खलु पूर्वसूत्रस्थेन चकारेण आकृष्टच्छप्रत्ययोऽपि। तेन तस्मिन् खञ्प्रत्यये इत्यर्थः। खञ् प्रत्यये अण्प्रत्यये परे युष्मदशब्दस्य युष्माक इति रूपम्, तथा अस्मदशब्दस्य च अस्माक इति रूपं स्यात्। युवयोः युष्माकम् वा अयम् इति खञ् यौष्माकीनः। यौष्माकीनम् गृहम्। आवयोः अस्माकम् वा अयम् इति खञ अस्माकीनं गृहम्। अणि यौष्माकः। आस्माकः। तस्मिन् अणि च इति किम्? छ प्रत्यये माभूत्-युष्मदीयः। अस्मदीयः इति।

**१३७२। तवकममकावेकवचने ॥ ४।३।३ ॥**

टी—। एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौस्तः खञणि च। तावकीनः। तावकः। मामकीनः। मामकः। छेतु—

The words युष्मद् and अस्मद् are respectively changed to तवक and ममक—with reference to a single person, should the suffixes खञ् and अण् be attached to these. The case of a छ प्रत्यय will be illustrated in the next rule—

मित—। एकवचनपरयोः युष्मदशब्दस्य तथा अस्मदशब्दस्य स्थाने यथाक्रमं तवक ममक इति आदेशौस्तः खञ प्रत्यये अपि च परे सति। खञि तावकीनः। अण् तावकः। मम अयम् इति खञ् मामकीनः। अण् मामकः। तथाहि श्रीश्री गीतायां "मामकाः पाण्डवाश्चैव किमकुर्वन्त सञ्जय ?"

छ प्रत्यये किं रूपम् स्यात् इत्यपेक्षायां सूत्रयति—

१३७३। प्रत्ययोत्तरपदयोश्च ॥ ७।२।९८ ॥

टी—। मपर्यन्तयोरेकार्थयोस्त्वमौस्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः।

The words युष्मद् and अस्मद्, when they denote a single object, replace their portions युष्म and अस्म by त्व and म respectively provided a suffix be attached to it or any word is joined to it as an उत्तरपद i.e by way of samasa. Thus युष्मद becomes त्वद् and अस्मद् becomes मद् when the suffix छ follows them and we at once get the words त्वदीयः and मदीयः।

मित—। एकवचने इति। प्रत्यये, उत्तरपदे च परतः एकत्वे वर्त्तमानयोः युष्मदशब्दस्य तथा अस्मदशब्दस्य च मपर्यन्तयोः यथाक्रमं त्व म इति आदेशौ स्तः। युष्मदशब्दस्य मपर्यन्तं—इत्यनेन अस्य युष्मइत्यस्य स्थाने त्व इति आदेशः, एवं अस्मदशब्दस्य मपर्यन्तम् इत्यनेन अस्म इत्यस्य स्थाने म इति आदेशः स्यात् इति। तथाहि युष्म स्थाने त्व स्यात्, अस्म स्थाने च म स्यात् इति भावः।

तव अयं इति त्वदीयः—छ प्रत्ययः । मम अयं इति मदीयः । छ प्रत्यये परे "तव" एकव्यक्तिं बोधयतः युष्मद्शब्दस्य ; तथा "मम" इति एकव्यक्तिं बोधयतः अस्मद्शब्दस्य च स्थाने यथासंख्यं त्व म इति आदेशौ मपर्य्यन्तमेव स्याताम्—तेन त्वद् मद् इति रूपम् । ततः प्रत्यये युक्ते त्वदीयः, मदीयः इति रूपे भवतः । उत्तरपदे परे—यथा तव पुत्रः इति त्वत्पुत्रः—षष्ठीतत्पुरुषः । एवं मत्पुत्रः । एवं बहुव्रीहौ त्वत्पितृकः, मत्पितृकः ।

## १३७४ । अर्धाद्यत् ॥ ४।३।४ ॥

## दी— । अर्ध्यः ।

The suffix यत् is added to अर्द्ध ।

मित— । अर्द्धशब्दात् यत् स्यात् शैषिकः, अणोऽपवादः, अर्द्धे भवः अर्द्ध्यः ।

## १३७५ । परावराधमोत्तमपूर्वाच्च ॥ ४।३।५ ॥

## दी— । परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् उत्तमार्ध्यम् ।

The suffix यत् is added to अर्ध—when it comes after पर, अवर, अधम or उत्तम ।

मित— । परपूर्व्वकात् अवरपूर्व्वकात् अधमपूर्व्वकात् तथा उत्तमपूर्वकात् अर्धशब्दात् यत् प्रत्ययः स्यात् शैषिकः । परः अर्द्धः इति परार्द्धः । यद्वा अर्द्धात् परम् इति परार्द्धम् । तत्र भवः इति परार्द्ध्यम् । एवं अवरार्द्धे स्थितम् इति अवरार्द्ध्यम् । इत्थम् अधमार्द्ध्यम् उत्तमार्द्ध्यम् ।

## १३७६ । दिक्पूर्वपदाट्ठञ्च ॥ ४।३।६ ॥

## दी— । चात् यत् । पौर्वार्धिकम् । पूर्वार्ध्यम् ।

The suffix ठञ् as well as the suffix यत् is added to अर्ध (अर्द्ध), when it comes after a word expressive of a particular direction.

मित—। दिग्वाचक-पूर्वपदात् अर्धान्तात् प्रातिपदिकात् ठञ्प्रत्ययः स्यात् शैषिकः, सूत्रस्थेन चकारेण ज्ञाप्यते—यत्प्रत्ययोऽपिभवेत्। अणोऽपवादः। पूर्व अर्धः पूर्वार्धः। तत्र भव इति ठञ्—पौर्वार्धिकम्। यत्—पूर्वार्ध्यम्।

ननु सूत्रे "दिक्पूर्वकात्" इत्येव न उक्त्वा "दिक्पूर्वपदात्" इत्येव कथ्यते तस्य को हेतुरिति चेत्—उच्यते। दिक्पूर्वकात् इति उक्ते तु दिक् इति शब्द-पूर्वकात् अर्धशब्दात् प्रत्ययः प्रसज्येत तच्च ष्वनभिमतम् इति दिक्पूर्वपदात् इति वक्ति, इत्थं कथिते तु दिग्विशेषवाचिपूर्वपदात् इत्येव अर्थ आयाति—स एव सूत्रकारस्य अभिमत इति सर्वसवदातम्।

**१३७७। ग्रामजन-पदैकदेशादञ्ठञौ ॥ ४।३।७ ॥**

**दी—। ग्रामैकदेशवाचिनोजनपदैकदेशवाचिनश्च दिक्पूर्व-पदात् अर्धान्तात् अञ्ठञौ स्तः। इमेऽस्माकम् ग्रामस्य जन-पदस्य वा पौर्वार्धाः। पौर्वार्धिकाः। ग्रामस्य पूर्वस्मिन् अर्धे भवा इति तद्धितार्थे समासः। ठञ् ग्रहणं स्पष्टार्थम्। 'अञ्च' इत्युक्ते ततोऽप्यनुकर्षः सम्भाव्येत।**

The suffixes अञ and ठञ are attached to the word अर्ध preceded by any word, itself expressive of a particular quarter of the horizon, provided the compound word denotes a part of a village or a tract of a land ( i.e. a country ).

Had the words "अञ्च" been used in this sutra, then also ठञ् would have come here ? Why then should we get अञठञौ here in the sutra. Bhattoji says that it is for a clear notion. Otherwise by "च" both ठञ् and यत् would be dragged down here.

मित—। ग्रामस्य एकदेशवाचिनस्तथा जनपदस्यापि एकदेशवाचिनो दिक्-पूर्वपदात् अर्धान्तात् प्रातिपदिकात् अञ ठञ इति प्रत्ययद्वयं स्यात शैषिकम्। यत-

प्रत्ययस्य अपवादः। इमे अस्माकम् ग्रामस्य जनपदस्य वा पूर्वस्मिन् अर्धे भवा इति अत्र पौर्वार्धाः। ठञ—पौर्वार्धिकाः। ग्रामस्य पूर्वस्मिन् अर्धे भवा इति "तद्धितार्थोत्तरपदसमाहारे च" (२।१।५१) इति तद्धितार्थे विषये समासः। ग्रामस्य जनपदस्य वा पौर्वार्धा पौर्वार्धिका वा वृत्ताः। ग्रामस्य जनपदस्य वा पूर्वभागे स्थिता वृत्ताः, एवं दक्षिणार्धाः दाक्षिणार्धिकाः।

ननु ग्रामजनपदैकदेशाद्ञ् च इत्येव सूत्रं स्यात कथं ठञ् इत्यस्य उल्लेख इति शङ्कायां समाधत्ते "ठञ ग्रहणमित्यादि"—स्पष्टार्थमेव ठञ इत्यस्य उल्लेखः। अन्यथा चकारेण यथा ठञः अनुकर्षः स्यात तथा यत्प्रत्ययस्य अपि अनुकर्षःसंभवति तन्माभूत् इति ठञप्रत्यय एव अञः अप्राप्तिपक्षे स्यात न खलु यत् इति फलितार्थः।

१३७८। **मध्यान्मः॥ ४।३।८॥**

**टी—। मध्यमः।**

The suffix म is attached to the word मध्य and there मध्यम is formed.

मित—। मध्यशब्दात म प्रत्ययः स्यात शैषिकः। तथाहि रघौ त्रयोदशे "धर्मोत्तरम् मध्यममाश्रयन्ते"। इदमपात्र स्मर्त्तव्यम्—

अवोधसोर्लोपश्च इति। अवस् इत्यस्मात अधस् इत्यस्मात च मः स्यात शैषिकः; कृते च मप्रत्यये सकारस्य लोपश्च, अवमम्, अधमम्।

१३७९। **अ सांप्रतिके॥ ४।३।९॥**

**टी—। मध्यशब्दात् अकारप्रत्ययः स्यात् सांप्रतिकेऽर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाकरणः। मध्यं दारु नातिह्रस्वं नातिदीर्घमित्यर्थः।**

The suffix अ is attached to मध्य when it means सांप्रतिक i.e. fit or proper ( neither more nor less ).

मित—। सांप्रतिकं न्याय्यं युक्तम् उचितम् समसुच्यते इति काशिका। सांप्रतिके भव इत्यादौ प्रत्ययस्य अर्थे मध्यशब्दात् मप्रत्ययः स्यात्। मप्रत्ययस्य अपवादः, मध्ये स्थितः इति मध्यो वैयाकरणः, अप्रत्ययः, मध्यो न उत्कृष्ट नापि अपकृष्टः, [ mediocre इति आङ्गल-भाषा ] मध्यं दारु, नातिह्रस्वं नापि वा अतिदीर्घं काष्ठम् इत्यर्थः,

१३४० । द्वीपादनुसमुद्रं यञ् ।४।३।१०॥

दी—। **समुद्रस्य समीपे योद्वीपस्तद्विषयात् द्वीपशब्दात् यञ् स्यात्। द्वैप्यम्, द्वैप्या।**

The suffix यञ is added to the word द्वीप, provided the island ( द्वीप ) becomes very near to the sea.

मित—। समुद्रस्य सान्निध्ये योद्वीपस्तद्दृशात् द्वीपात् तत्र भव इत्यादौ अर्थे यञप्रत्ययो भवेत, समुद्रसमीपो द्वीपस्तत्र भवम् इति द्वैप्यम्, स्त्रियां द्वैप्या, तथाहि —द्वैप्यं भवन्तोऽनुचरन्ति चक्रम् इति काशिका। अनुसमुद्रम् इति किम्? द्वैपकम्। समुद्रात् दूरे स्थिते द्वीपेभवम् इत्यर्थः। द्वीपशब्दः कच्छादिषु पठ्यते। तेन कच्छादिभ्यश्च ( ४।२।१३३ ) इति विहितोऽण् प्रत्ययस्तथा, मनुष्यतस्थयोर्वुञ् ( ४।२।१३४ ) इति विहितो वुञ्प्रत्ययश्च।

१३४१ । कालाट् ठञ् ॥ ४।३।११ ॥

दी—। **कालवाचिभ्यष्ठञ् स्यात्। मासिकम्। सांवात्सरिकम्। सायंप्रातिकः। पौनः पुनिकः। कथं तर्हि "शार्वरस्य तमसो निषिद्धये" इति कालिदासः, "अनुदितौषरागे"ति भारविः, समानकालीनं प्राक्कालीनमित्यादि च। अपभ्रंशा एव एत इति प्रामाणिकाः॥ तत्र जात इति यावत् कालाधिकारः।**

The suffix ठञ् (शैषिक) is attached to the words 'denoting any part of time.

मित—। कालविशेषवाचिनः शब्दात् ठञ् प्रत्ययः स्यात् शैषिकः, मासः इति कालविशेषः। तत्र भवम् इति मासिकम्, एवं आर्द्धमासिकम्, सांवत्सरिकः। पुनः पुनः जातः इति पौनःपुनिकः। पुनः पुनः इति लक्षणया कालम् अभिदधाति। यथा कथंचित् गौण्या अपि वृत्त्या काले वर्त्तमानात् (अतएव कालाभिधायिनः—लक्षणवृत्त्याश्रयणात्) शब्दात् ठञ् स्यात् शैषिकः। यथा—कादम्बपुष्पिकम्। कदम्ब पुष्पमस्य कालः वर्षाकालः इति लक्षणया कदम्बपुष्पः। तत्र भवम्। कादम्बपुष्पिकम्। वर्षाकालजातम् इत्यर्थः, एवं व्रीहिपलालमसुद्भवकाले जातम् व्रैहिपलालिकम्। अयम् ठञ् अण् प्रत्ययस्य अपवादः। अपिच अयम् परत्वात् "वृद्धाच्छः" (४।२।११४) इति विहितम् छ-प्रत्ययमपि वाधते।

ननु ठञ् प्रत्ययश्चेत् अन्येषां प्रत्ययानां वाधकस्तर्हि कथं शार्व्वर इति शर्व्वरी-शब्दात् अण्, अनुदितौपराग इति उषस् शब्दात् अण्, पार्वणम् इति च, तथा प्राक्कालीनं समानकालीनम् इति खप्रत्ययश्च दृश्यते ?

अत्र शब्दशास्त्रपारंगताः कथयन्ति यत् एते शब्दाः अपभ्रंशाः। अपभ्रंशाः प्रामादिकाः। यद्वा अपभ्रंशात् प्राकृतभाषायाः संस्कृतभाषायाम् परिगृहीताः।

अतः परम् यानि सूत्राणि वक्ष्यन्ते, तानि तत्रजातः (४।३।२५) इति सूत्रात् पूर्व्वं यावत् कालविषयाणि इति ज्ञेयम्।

## १३४२। श्राद्धे शरदः ॥ ४।३।१२ ॥

**टी—। ठञ् स्यात्। ऋत्वणोऽपवादः। शारदिकम् श्राद्धम्।**

The word शरद् ( antumn ) takes the suffix ठञ् after it, provided the word, thus formed, stands as an appellation to श्राद्ध ( sradh ceremony ).

मित—। श्राद्धे अभिधेये सति ऋतुविशेषवाचकात् शरद् इति शब्दात् ठञ् प्रत्ययो भवेत्। अयं ठञ् प्रत्ययः ऋतौ विहितस्य अण् प्रत्ययस्य वाधकः। शरदि कर्त्तव्यं श्राद्धम् शारदिकम्। अन्यत्र—शारदः शशी। अपिच—श्रीमद्भागवते राम-

पञ्चाध्यायाम्—"भगवानपि ताः रात्रीः शारदोत्फुल्लमल्लिकाः, वीक्ष्य रन्तुम् मनश्चक्रे योगमायामुपाश्रितः"। शारदाः शरदि जाताः इत्यर्थः। श्राद्धम् इति शब्देन श्रद्धया प्रेताय उद्दिश्य विहितम् कर्म (दत्तम्) एव ज्ञेयं, न खलु श्रद्धावान् पुरुषः—अनभिधानात्।

**१३४३। विभाषा रोगातपयोः ॥ ४।३।१३ ॥**

**दी—। शारदिकः शारदो वा रोग आतपो वा। एतयोः किम्? शारदं दधि।**

The suffix ठञ् as will as the suffix अण् are attched to the word शरद् provided thewords, thus formed, stand to qualify a disease or heat ( scorching rays of the sun ).

मित—। रोगे आतपे वा गम्यमाने शरद् इति शब्दात् ठञ् प्रत्ययः, अण् प्रत्ययश्च विकल्पेन स्तः। शरदि जातः रोगः शारदो रोगः। अत्र अण्। शारदिकः रोगः अत्र ठञ्. शारदः शारदिकः वा आतपः। एताभ्याम् अन्यत्र तु शारदं दधि—अत्र अण् एव न खलु ठञ्।

**१३४४। निशाप्रदोषाभ्याम् च ॥ ४।३।१४ ॥**

**दी—। वा ठञ् स्यात्। नैशिकम्। नैशम्। प्रादोषिकम्। प्रादोषम्।**

The suffix ठञ् as well अण् are attached to निशा and प्रदोष।

मित—। निशा इति शब्दात् तथा प्रदोष इति शब्दात् ठञ् प्रत्ययः अण् प्रत्ययश्च विकल्पेन स्तः। निशा रात्रिः। तत्र भवं नैशम् अण्। नैशिकम्—ठञ्। नैशम् तमः। नैशिकः अन्धकारः। प्रदोषो रजनीमुखम्। तत्र भवं प्रादोषम्—अण्। प्रादोषिकम्—ठञ्। "कालाठ्ठञ्" ( ४।३।११ ) इति सूत्रेण कालविशेषवाचिभ्याम् निशाप्रदोषशब्दाभ्याम् नित्यं ठञ् प्रत्यये प्राप्ते सति अनेन विकल्पः विधीयते।

१३४५। श्वसस्तुट् च ॥ ४।३।१८ ॥

टी—। श्वस् शब्दात् ठञ् वा स्यात्, तस्य तुडागमश्च ॥

The suffix ठञ् is optionally added to श्वस्, and तुट् is also inserted between श्वस् and ठञ्।

मित—। श्वस् इति आगामिदिनवाचकः अव्ययशब्दः। तस्मात् "तत्र भवः" इत्यादौ अर्थे ठञ् प्रत्ययो विकल्पेन स्यात्, प्रकृतिप्रत्यययोश्च मध्ये तुडागमोऽपि भवति [ "ऐषमह्यःश्वसोऽन्यतरस्याम्" ( ४।२।१०५ ) इति सूत्रेण अस्मात् त्यप् प्रत्ययोऽपि स्यात्—इति काशिका ]

१३४६। द्वारादीनां च ॥७।३।४॥

टी—। द्वार, स्वर, व्यल्कश, स्वस्ति, स्वर, स्फ्यकृत्, स्वादु, मृदु, श्वस्, श्वन्, स्व एषां न वृद्धिरैजागमश्च। शौवस्तिकम्।

The words here mentioned by Dikshit, constitute the द्वारादि class; these undergo no Briddhi but insted of it, ऐच् is inserted in the body of these words.

मित—। अस्मात् सूत्रात् प्राक् "न य्वाभ्याम् पदान्ताभ्याम् पूर्व्वौ तु ताभ्याम् ऐच्" ( ७।३।३ ) इति सूत्रम् विद्यते। तस्य च अनुवृत्तिरत्र अस्ति तेन सूत्रस्यास्य अयमर्थः—वृत्तौ उल्लिखितानाम् द्वार, स्वर इत्यादीनां प्रातिपदिकानां यकार वकाराभ्याम् परस्थितस्य अचां मध्ये आद्यस्य अचः स्थाने वृद्धि र्न स्यात्; अपिच यकार वकाराभ्याम् पूर्व्वं खलु "ऐच" इत्यस्य आगमो भवेत्, ऐच्—इति ऐ औ इति वर्णद्वयम्। तत्र यकारस्य पूर्व्वम् ऐकारस्य एवं वकारस्य पूर्व्वम् औकारस्य आगमो भवति इतिबोध्यम्।

तथाहि श्वस् इति द्वारादीनाम् अन्तर्भूतः प्रातिपदिकः, अस्मात् ठञ् विहितः, तुट् इति आगमश्च, ततः ठञि परे श्वस् इत्यस्य वकारान्तःस्थितस्य अकारस्य वृद्धौ प्रसक्तायाम् तस्य अनेन निषेधः। अपिच वकरात् पूर्व्वम् ऐच् इत्यस्य आगमः।

इयं प्रक्रिया—श् + व् + अ + स् = श्वस्। ततः ठञ्—तत् स्थाने इक। ततः तुट्; टकारस्य इत्वात् ठञ इति प्रत्ययात् प्रागेव अस्य स्थितिः—"आद्यन्तौ टकितौ" (१।१।४६) इति। तेन—श् + व् + अ + स् ( = श्वस ) + त् (तुट्) + इक ( ठञ ) इति स्थितिः। आद्याकारस्य वृद्धिनिषेधः। वकारात् प्राक् "ऐचः" (औकारस्य) आगमः। तेन श + औ + व् + अ + स् (= शौवस्) + त् + इक इति स्थितिः। ततः शौवस्तिक इति रूपम्। श्वो भवम् इति शौवस्तिकम्। श्वः पर शुः। तथाहि भट्टिः—"शौवस्तिकत्वं विभवो नयेषाम्" इति शौवस्तिकस्य भावः इति शौवस्तिकत्वम्। "ऐषम्—" इत्यादिना श्वस् इत्यस्मात् त्यप् प्रत्ययोऽपि। तेन श्वोभवः श्वस्त्यः इत्यपि। अपिच "श्वसः तुट्" इति सूत्रे ठञप्रत्ययस्य वैकल्पितत्वात् तस्य अप्राप्तिपक्षे ट्यु ट्युल इति प्रत्ययद्वयमपि स्यात्। तेन श्वोभवः इति श्वस्तनः। स्त्रियान् श्वस्तनी इति।

## १२४७। सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्॥ ४।३।१६॥

**टी—। सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् स्यात्। सन्धिवेलायां भवं सान्धिवेलम्। ग्रैष्मम्। तैषम्। सन्धिवेला, सन्ध्या, अमावस्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत्॥ संवत्सरात् फलपर्व्वणोः (वा)॥ सांवत्सरं फलं पर्व्व वा। सांवत्सरिकमन्यत्।**

The suffix अण् is attached to the word सन्धिवेला and some other words comprising the सन्धिवेलादि list, as well as to words, expressive of some particular season or star. Rest easy.

मित—। सन्धिवेला, सन्ध्या, अमावस्या, त्रयोदशी, चतुर्द्दशी, पौर्णमासी, प्रतिपत् इति एतेभ्यः प्रातिपदिकेभ्यस्तथा ऋतुभ्यः नक्षत्रेभ्यश्च कालवाचिभ्यः अण् प्रत्ययः स्यात् शैषिकः। ठञ् प्रत्ययस्यापवादः।

ननु ठञ्निषेधेनैव अणः प्राप्तिः प्रसज्येत इति किमर्थं सूत्रे अण् इत्यस्य उल्लेखः इति चेत् उच्यते। ठञः प्रतिषेधे "वृद्धाच्छः" इति छ-प्रत्ययस्य प्राप्तिः स्यात् तद्बाधनार्थ-

मेव अणो ग्रहणम्। साम्धिवेलम् इति। साम्धिवेली पूजा। अष्टमी तिथिस्तया नवमीतिथिश्च सन्धिवेलायां विहिता या शारदीय-देव्याः पूजा सा साम्धिवेली पूजा। सन्धिवेलायां भवा इत्यर्थः। एवं सन्ध्यायां भवइति सान्ध्यः। ग्रीष्मः निदाघकालः। तत्र जातम् इति ग्रैष्मम्। शिशिरः शीतकालः। तत्र जातं शैशिरम्। तैषम् इति। तिष्या इति कस्यचित् नक्षत्रस्य संज्ञा। कालवाचिभ्यः एव नक्षत्राभिधायि-प्रातिपदिकेभ्यः अण् स्यात्। अतएव तिष्यानक्षत्रेण युक्तः कालः इत्यर्थे "नक्षत्रेण युक्तः कालः" इति अण्। ततः "लुबविशेषे" (४।२।४) इति प्रत्ययस्य लुप्। तेन तिष्या इति पदम्। अस्य अर्थस्तु तिष्यानक्षत्रेण युक्तः कालः। ततः तिष्यायाम् (तिष्यानक्षत्रयुक्तकाले इत्यर्थः) भवम् इति अनेन सूत्रेण अण्—तैषम्, एवं पौषम्। संवत्सरादिति—फले पर्व्वणि च, अभिधेये संवत्सरशब्दादपि अण् स्यात् शैषिकः, संवत्सरे भवं सांवत्सरं फलम्। एवं सांवत्सरं पर्व्व। ताभ्याम् अन्यत्र तु "कालाट् ठञ्" (४।३।११) इति ठञ्—सांवत्सरिकम्। सांवत्सरिकं श्राद्धम्।

१३४८। प्रावृष एण्यः ॥ ४।३।१७ ॥

टी—। प्रावृषेण्यः।

The suffix एण्य is added to the word प्रावृट् (rainy season).

मित—। प्रावृष्शब्दात् एण्यप्रत्ययो भवति शैषिकः। प्रावृट् वर्षाऋतुः। अतएव पूर्व्वसूत्रविहितस्य ऋत्वणोऽपवादोऽयम्। प्रावृषि (वर्षासु) भवः इति प्रावृषेण्यः। प्रावृषेण्यः बलाहकः इति काशिका। बलाहकः = मेघः। तथाहि—"त्वं प्रावृषेण्यम्—" इत्यादि भट्टिकाव्ये ; प्रावृषेण्यं पार्थोवाहमिताादि रघौ च।

१३४९। वर्षाभ्यष्ठक् ॥ ४।३।१८ ॥

टी—। वर्षासु साधु वार्षिकं वासः। "कालात् साधु पुष्प्यत् पच्यमानेष्वि"ति साध्वर्थे (सूत्र—१३८१)।

The Suffix ठञ is added to the word वर्षा and we have the word वार्षिक formed out of it. वार्षिकं वासः—water proof (?).

मित—। वर्षा शब्दात् ठक् प्रत्ययो: भवति। ऋत्वणोपवाद:।

ननु कस्मिन्नर्थे अयं प्रत्यय इति समाधत्ते—कालादित्यादिना। "कालात् साधुपुष्यत् पच्यमानेषु" (४।३।४३) इति सूत्रे कालवाचकात् साधु इत्यर्थे प्रत्ययो विहित:। तस्मिन्नेव "साधु" इत्यर्थे अत्र वर्षाशब्दात् ठक् प्रत्यय: स्यात्। वर्षासु साधु वार्षिकं वास:। वर्षाकालसहं यद्वा वर्षाकालोचितं वस्त्रम्। वास: = वस्त्रम्। एवम् वार्षिकम् अनुलेपनम् वर्षाकालोचितम् गात्रानुलेपनम् इत्यर्थ:।

## १३५०। सर्व्वत्राण् च तलोपश्च ॥ ४।३।२२ ॥

**दो—। हेमन्तादण् स्यात्तलोपश्च वेदलोकयो:। चकारात् पक्षे ऋत्वण्। हैमनम्। हैमन्तम्।**

The suffix अण् is attached to the word हेमन्त in the vedic as well as in the classical literature; the presence of च in the sutra, indicates that अण् is also available here; so we have हैमनम् as well as हैमन्तम्।

मित—। इत: पूर्व्वम् "हेमन्ताच्च" (४।३।२१) इति सूत्रं दृश्यते। तस्माद्-वानुवृत्तिरस्ति। तेनायमर्थ:—हेमन्तशब्दात् सर्व्वत्र वैदिक-साहित्ये लौकिक-साहित्ये च अण् प्रत्ययो भवेत् शैषिक:। अण् प्रत्यये च परे सति हेमन्तशब्दस्य तकारस्य लोप: स्यात्।

"चकारात् पक्षे ऋत्वण्"। अयमर्थ:—"हेमन्ताच्च" इति सूत्रेण ज्ञाप्यते यत् वैदिक-साहित्ये हेमन्तशब्दात् ठञ् प्रत्यय: स्यात् शैषिक:। अयं ठञ् ऋतौ विहितस्य अण् प्रत्ययस्य अपवाद:। अस्मिन् सूत्रे तु "सर्व्वत्राण् च—" इति चकारोऽस्ति। अस्मात् चकारात् ज्ञाप्यते यत् सर्व्वत्र वेदे लोके च हेमन्तशब्दात् अण् स्यात्; तथा ऋतौ विहित: अण् अपि स्यात्। एतत् सूत्रविहितस्य अणस्तथा ऋत्वणोर्मध्ये अयं विशेष: यत् एतेन अण् प्रत्ययेन तकारलोप: स्यात् ऋत्वणि तु तत् न स्यात्। हेमन्ते भवम् इति हैमनम्—एतत् सूत्रविहित: अण्-प्रत्यय:। हेमन्ते भवम् इति हैमन्तम्—ऋत्वण्। हैमनं वास:। हैमन्तं पुष्पम्।

"हैमन्तिकम् इति भाषायाम् अपि ठञ् स्मरन्ति"—इति काशिका। तेन हैमन्तिकं, हैमनं, हैमन्तम् इति त्रीणि रूपाणि ; हैमन्तिकं धान्यम्।

१३५१। सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ ४।३।२३ ॥

टी—। सायम् इत्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौस्तस्तयोस्तुट् च। तुटः प्रागनादेशः। अनद्यतने इत्यादि निर्देशात्। सायन्तनम्। चिरन्तनम्। प्राह्णप्रगयोरेदन्तत्वम् निपात्यते ; प्राह्णेतनम्, प्रगेतनम्। दोषातनम्। दिवातनम्।

The suffixes ट्यु and ट्युल् are attached to the four words सायं चिरं प्राह्णे and प्रगे all implying time, and to other indeclinable words ; before these suffixes तुट् is also inserted as an आगम।

मित—। सायं इति मकारान्तम् अव्ययम्। अर्थस्तु—दिवावसानः। चिरम् इत्यपि मकारान्तम् अव्ययम् प्राह्ण इति प्रग इति पदाभ्याम् निपातनेन एकारः स्यात्, ततः प्राह्णे इति प्रगे इति एकारान्तम् अव्ययद्वयं सिध्यति। द्वयमपि प्रातःकालवाचि।

एतेभ्यः कालवाचिभ्यः चतुर्भ्यस्तथा अन्येभ्योऽपि अव्ययेभ्यः ट्यु ट्युल् इति प्रत्ययौ स्तः। प्रत्यये सति एभ्यस्तुट् इति च आगमोभवेत्। सायं भवः इति सायंतनम् "सायन्तनी तिथिः पुण्या।" चिरन्तनम्, प्राह्णेतनम्, प्रगेतनम्, अव्ययेभ्यः यथा—दोषातनम्, दिवातनम्।

ननु "आद्यन्तौ टकितौ" (१।१।४६) इति सूत्रनिर्देशात् तुट् इत्यस्य पदस्य आदौ एव स्थिति युक्ता, कथं तर्हि "सायम्" इत्यादेः परमेव तस्य स्थितिः ? उच्यते—प्रत्ययस्य आदौ एव तुटः स्थितिः स्यात्, न खलु पदान्तेपि "अनद्यतने लङ्" (३।२।१११) इति सूत्रे आचार्यः "अनद्यतन" इति पदं स्वीकरोति। तत्र च तुट प्रत्ययस्य पदस्य अन्ते च आगमः। अतः अनेन अनद्यतन पदस्य स्वीकरणेन

ज्ञाप्यते यत् तुटः ईदृश्येव स्थितिर्युक्ता। सायमादीनां अव्ययत्वादपि प्रत्यये सिद्धे सति तेषामत्र सूत्रे यत् पुनर्ग्रहणं तत् चिन्त्यम्।

दी—। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः (वा)। चिरत्नम्। परुत्नम्। परारित्नम्।

मित—। चिर परुत् परारि इति एतेभ्यः त्नप्रत्ययः स्यात्। चिरत्नम्। परुत् विगतवर्षः। तत्रभवं परुत्नम्। परारि—विगतवर्षात् पूर्व्ववर्षं—तत्रभवं परारित्नम्।

दी—। प्रगस्य गलोपश्च वक्तव्यः (वा)-प्रत्नम्। छन्दसि एव। अग्रादिपश्चाड्डिमच्। अग्रिमम्। आदिमम्। पश्चिमम्।

मित—। अग्र आदि पश्चात इति एतेभ्यः डिमच् स्यात। अग्रिमम्, आदिमम्, पश्चिमम्, इदं भाष्यवृत्तिमतम।

दी—। अन्ताच्च। अन्तिमम्।

मित—। अन्ताच्च डिमच् स्यात इति जयादित्यमतं—अन्तिमम्।

Eng.—Easy.

१२५३। विभाषा पूर्वाह्णापराह्णाभ्याम्॥ ४।३।२४॥

दी—। आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च। पक्षे ठञ्। पूर्वाह्णेतनम्। अपराह्णेतनम्। "घकालतनेष्विति अलुक्"। पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनम्। अपराह्णतनम्। पौर्वाह्णिकम्। आपराह्णिकम्।

The suffixes ट्यु and ट्युल are optionally added to पूर्व्वाह्ण and अपराह्ण and तुट is, of course, inserted between these words and the said suffixes; instead of ट्यु and ट्युल, ठञ् may also be attached to these.

मित—। अह्नः पूर्व्वः पूर्व्वभागः इति पूर्व्वाह्णः, एवं अह्नः अपरः अपरभागः इति अपराह्णः। एताभ्याम् पूर्व्वाह्णापराह्णाभ्याम् विकल्पेन ट्यु ट्युल् इति प्रत्ययौ भवतः। तुट् तयोरागमः स्यात्। "कालाट्ठञ्" (४।३।११) इति ठञि नित्ये

सति अनेन विकल्पवचनम्। तेन पक्षे ठञ् अपि भवेत्। पूर्वाह्णे भवम् इति पूर्वाह्णेतनम्। अपराह्णे भवम् इति सप्तम्या अलुक् अपि।

ननु सप्तम्या एव अलुक् स्यात्, यदा तु न सप्तमी विभक्तिर्दृश्यते तदा किं भवेत् इति चेत्—उच्यते। पूर्वाह्णः सोढोऽस्य इति विग्रहे तु पूर्वाह्णतनम् इति स्यात्। एवम् अपराह्णतनम्। "सोढः" = सह् धातोक्तं प्रत्ययः।

ठञि—पौर्वाह्णिकम्। आपराह्णिकम्। तथाहि—"श्वः कार्य्यमद्य कुर्वीत, पूर्वाह्णे चापराह्णिकम्।"

## १३५४। तत्रजातः ॥ ४।३।२५ ॥

**टी—। सप्तमीसमर्थाज्जात इत्यर्थे अणादयोघादयश्च स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण इत्यादि।**

Suffixes अण्, घ etc are attached to words of the seventh case-ending to denote something born there. Srughna stands for the name of a city and one who is born there is स्रौघ्नः—with the suffix अण् attached to स्रुघ्न।

मित—। "तत्र" इति सप्तमी। सप्तमीसमर्थात् सप्तमीविभक्तान्तात्। तस्मिन् स्थाने जातः इति अर्थे द्योत्ये सप्तमीविभक्तान्तात् स्थानवाचकशब्दात् यथाविहितम् अणप्रभृतयो घप्रभृतयश्च प्रत्ययाः भवन्ति। स्रुघ्नः इति देशवाचिशब्दः। तत्र जातः इति अण् स्रौघ्नः। एवम् उत्स देशे जातः औत्सः। राष्ट्रे भव इति राष्ट्रियः राजश्यालः। "राजश्यालस्तु राष्ट्रियः" इति। एवम् अवारपारीणः, माथुरः। ग्राम्यः। ग्रामीणः। शाकलिकः। उदपाने जातः औदपानः। कावेयकः इत्यादि।

## १३५५। प्रावृष्ठप् ॥ ४।३।२६ ॥

**टी—। एण्यस्य अपवादः। प्रावृषिजातः प्रावृषिकः।**

The suffix ठप् is attached to प्रावृट् ( the rains ) to denote something born in the season. It bars the suffix एण्य।

मित—। प्रावृषि जात इत्येतस्मिन् अर्थे प्रावृट् इत्यस्मात् ठप् प्रत्ययः स्यात् अयं च प्रत्ययः "प्रावृष एण्यः" इति (४।३।१७) विहितस्य एण्यप्रत्ययस्य अपवादः। प्रावृषि जातः इति ठप् प्रावृषिकः। ठप् प्रत्यये पकारस्तु उदात्तादिर्वैदिकस्वर-विशेषज्ञापनाय।

१३५६। संज्ञायां शरदो वुञ्॥ ४।३।२७॥

. टी—। ऋत्वणोऽपवादः। शारदकाः दर्भविशेषा मुद्ग-विशेषाश्च।

The suffix वुञ् (a bar to अण् sanctioned by सन्धिवेलाद्यृतुनक्षत्रेभ्यो—४।३।१६) is attached to the word शरद provided that the word thus formed stands as a proper name.

मित—। शरदिति शब्दात् सप्तमीसमर्थात् तत्रजातः इति एतस्मिन् अर्थे वुञ् प्रत्ययो भवेत्, प्रत्ययनिष्पन्नशब्देन चेत् संज्ञा गम्यते। अयं प्रत्ययः "सन्धिवेलाद्यृतु-नक्षत्रेभ्योऽण्" ४।३।१६) इति ऋतौ विहितस्य अणोपवादः। शरदिजाताः शारदकाः—दर्भविशेष-मुद्गविशेषाश्च दर्भविशेषस्य मुद्गविशेषस्य च शारदक इति संज्ञा। दर्भः कुशः। संज्ञायाम् इति किम्? शारदं शस्यम्। "शारदोत्फुल्लमल्लिकाः"—इति श्रीमद्भागवतेच।

१३५७। उत्तरपदस्य ॥७।३।१०॥

टी—। अधिकारोऽयम्। "हनस्त—" इत्यस्मात् प्राक्॥

All rules, that come after this and are placed before the rule "हनस्तोऽचिण्णलोः" (७।३।३२) will affect only the last member of the word ( i. e. of the compound word ).

मित—। "हनस्तोऽचिण्णलोः" (७।३।३२) इति सूत्रात् प्राक् एतत् सूत्रम् यथा "उत्तरपदस्य" इत्ययमधिकारः। अस्मात् सूत्रात् परं "हनस्तोऽचिण्णलोः" इति सूत्रात् पूर्वं च यत् कार्य्यं वक्ष्यते, तत् तु समस्तस्य पदस्य मध्ये उत्तरपदम् एव अधिकृत्य वर्त्तते, न खलु पूर्वपदम्—इति सरलार्थः।

१३५८। अवयवादृतोः ॥ ७।३।११ ॥

टी—। अवयववाचिनः पूर्वपदात् ऋतुवाचिनोऽचामादेरचोवृद्धिः स्यात् ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः अपरहैमनः। अवयवात् किम्? पूर्वासु वर्षासु भव पौर्ववार्षिकः। ऋतोर्वृद्धिमद्विधाववयवानामिति तदन्तविधिः पूर्वत्र। इह तु न। अवयवत्वाभावात्।

The first among all the vowels contained by a word denoting a season and having another word expressive of a part—prefixed to it, takes its Briddhi substitute whenever a suffix that has ञ, ण, or क (to be) इत् comes after it.

मित—। अवयववाचिनः अंशवाचिनः भागवाचिनः इत्यर्थः। "पूर्वपदात्" इत्यस्य विशेषणमेतत्। अवयववाचि यत् पूर्वपदम् तस्मात् इत्यर्थः।

यदि कस्यचित् ऋतुवाचिनः पदस्य समस्तस्य पूर्वपदे अवयववाचि पदं किञ्चित् तिष्ठति, तर्हि ऋतुवाचिपदमध्ये ये स्वरवर्णा आसते तेषाम् आद्यस्य एव अचः वृद्धिः स्यात्, ञिति, णिति, किति च तद्धितप्रत्यये परे। पूर्वं वर्षाणाम् इति पूर्ववर्षाः—एकदेशि समासः। वर्षाणां पूर्वभागः इत्यर्थः। अत्र पूर्ववर्षा इति समस्तस्य (कृतसमासस्य) पदस्य पूर्वभागो यः पूर्वशब्दः स खलु अवयववाची, एवम् उत्तरभागो यो हि वर्षाशब्दः स खलु ऋतुवाची। ततः पूर्ववर्षाशब्दात् तत्रभवः इत्यर्थे "वर्षाभ्यष्ठक्" (४।३।१८) इति ठक् प्रत्ययः। कृते च ठक् प्रत्यये, तस्य प्रत्ययस्य "कित्त्वात्" अनेन सूत्रेण पूर्ववर्षा इति शब्दान्तर्गतस्य ऋतुवाचिनः वर्षा इत्यस्य अचां मध्ये यः खलु आद्योऽच् वकारपरस्थितोऽकारस्तस्य वृद्धिर्भवति—तेन पूर्ववार्षिकः। वर्षाणां प्रथमभागे जातः इत्यर्थः। एवम् अपरहैमनः। हेमन्तस्य अपरभागः इति अपरहेमन्तः। हेमन्तस्य पश्चाद्भागः इत्यर्थः। तत्रभवः इति "सर्वत्राण् च तलोपश्च" (४।३।२२) इति सूत्रेण अण् प्रत्ययः तलोपश्च। ततोऽण् प्रत्ययस्य "णित्वात्," एकारस्य च अचां मध्ये आद्यत्वात्

तस्यैव अनेन सूत्रेण वृद्धिः। ततः अपरहैमनम् इति पदम्। हेमन्तस्य परभागे उत्पन्नमित्यर्थः।

पूर्वासु वर्षासु भवः इति पौर्ववार्षिकः। "तद्धितार्थोत्तरपदसमाहारे च" इति (२।१।५१) समासः। अत्र पूर्वशब्देन वर्षाणाम् अवयवो न गम्यते, अपितु पूर्वकालीनाः (पूर्वस्मिन् वर्षे स्थिताः) वर्षाः एव। तेन अत्र पूर्वशब्दस्य न अवयवत्वम्। ततः "कालाट्ठञ्" (४।३।११) इति ठञ् प्रत्ययः। तेन आदिस्वरस्य वृद्धौ सत्याम् पौर्ववार्षिकम् इतिरूपम्। पूर्वशब्दस्य अवयवत्वाभावात् "अवयवादृतोः" इति सूत्रस्य अत्राप्रवृत्तिः।

ननु पौर्ववार्षिकः इत्यत्रापि "पूर्व" इत्यस्य पूर्वपदत्वम् तथा "वर्षा" इत्यस्य च उत्तरपदत्वं दृश्यते तर्हि कथम् न "उत्तरपदस्य" (७।३।११) इति उत्तरपदविधिना "अवयवादृतो" रिति उत्तरपदस्य वर्षा इत्यस्य आदेरचोवृद्धिर्न स्यात् इति चेत्—न। "ऋतोः" ऋतुवाचिपदस्य "वृद्धिर्विधौ" आदिस्वरवृद्धिविधाने "अवयवानाम्" अवयववाचिपूर्वपदानां एव इति "तदन्तविधिः" उत्तरपदविहिता व्यवस्था "पूर्वत्र"। अयमाशयः—यदा उत्तरस्य ऋतुवाचिपदस्य आदिस्वरवृद्धिरिष्टा तदा अवयवपूर्वपदस्यैव तस्य, न खलु अन्यपूर्वपदस्य। "पूर्ववार्षिकम्" इत्यत्र अवयववाचि पूर्वपदत्वात् वर्षा इत्यस्य आदिस्वरवृद्धिः, परं पौर्ववार्षिकम् इत्यत्र तु पूर्वशब्दस्य अवयवत्वाभावात् न वर्षाइत्यस्य आदिस्वरवृद्धिः। पौर्ववार्षिकम् पूर्ववत्सरे याः वर्षाः तासु जातम् इत्यर्थः।

## १३५८। सुसर्वार्द्धाज्जनपदस्य ॥ ७।३।१२ ॥

**दी—। उत्तरपदस्य वृद्धिः। सुपाञ्चालकः। अर्द्धपाञ्चालकः। जनपदतदवध्योरिति वुञ्। सुसर्वार्द्धदिकशब्देभ्यः जनपदस्येति तदन्तविधिः।**

The first of all the vowels comprised by a word, expressive of a particular tract of inhabited land (जनपद)—takes its Briddhi substitute before a तद्धित suffix from which ञ, ण, or क

elides, provided the self same word stands as the last member of a componnd—formed with either सु, or सर्व वा अर्द्ध ; as सुपाञ्चालकः।

मित—। सु, सर्व, अर्द्ध इति एतेभ्यः उत्तरस्य जनपदवाचिनः उत्तरपदस्य अचाम् आदेरचः वृद्धिः स्यात् ञिति, णिति, किति च तद्धिते परे। सुपाञ्चाले भवः इति "जनपदतदवध्योश्च" (४।२।१२४) इति वुञ्। सुपाञ्चालकः, एवं सर्वपाञ्चालकः।

"सुसर्वार्द्ध दिक्शब्देभ्यः" इति, एतत् भाष्ये दृश्यते। एतेभ्यः सह जनपदवाचिनः पदस्य समासः स्यात् तेन जनपदवाचिनः खलु उत्तरपदत्वम्। ईदृशम् उत्तरपदत्वम् आश्रित्य अचां मध्ये आदस्य अचो वृद्धिः प्रवर्त्तते।

१३६०। दिशोऽमद्राणाम् ॥ ७।३।१३ ॥

**टी—। दिग्वाचकात् जनपदवाचिनोवृद्धिः। पूर्वपाञ्चालकः। दिशः किम्? पूर्वपञ्चालानाम् अयं पौर्वपञ्चालः। अमद्राणां किम्? पौर्वमद्रः। योगविभाग उत्तरार्थः।**

The first of all the vowels—comprised by any word—expressive of a country—save मद्र, takes its Briddhi substitute before a तद्धित suffix from which ञ, ण, or क elides, provided the self-same word stands as the last member of a compound formed with a word that stands for the name of a particular quarter of the horizon.

मित—। दिग्वाचकस्य उत्तरस्य जनपदवाचिनः मद्रवर्ज्जितस्य अचाम् आदेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः। पूर्वपञ्चाले भवः इति पूर्ववत् वुञ्—पूर्वपाञ्चालकः। एवम् अपरपाञ्चालकः। दिशः इति किम्? पूर्वः पञ्चालानाम् इति पूर्वपञ्चालः। पूर्वः अग्र अंश इत्यर्थः। तेषाम् अयं तत्र भव इति वा पौर्वपञ्चालकः। एवं आपरपञ्चालकः। अमद्राणाम् इति किम्? पौर्वमद्रः, आपरमद्रः—अत्र "मद्रेभ्योऽञ्" (४।२।१०८) इति अञ्।

ननु "योगविभाग" इति। एकस्मिन् एव विषये अत्र कथम् सूत्रद्वयं कृतम् ? एकेनैव सूत्रेण कार्य्यसिद्धिः स्यात् इति चेत् ? कथयति—योगविभागः उत्तरार्थ इत्यनेन। परस्थितेन "प्राचां ग्रामनगराणाम्" इति सूत्रेण सह अस्य सूत्रस्य अनुवृत्तिरूपः सम्बन्धो ऽस्ति इति तेनैव अस्य सूत्रस्य "सु सर्वार्द्धाज्जनपदस्य" इति सूत्रात् पृथक् कृत्वा उल्लेखः।

**१३६१। प्राचां ग्रामनगराणाम् ॥ ७।३।१४ ॥**

**टी—। दिशः परेषां नगरवाचिनां ग्रामवाचिनां च अङ्गानाम् अवयवस्य च वृद्धिः। पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः। नगरे पूर्वपाटलिपुत्रकः।**

Words, expressive of towns and villages of the east, takes their Briddhi substitute before a तद्धित suffix of the ञित्, कित् वा णित् class, provided themselves form the last member of a compound the first member of which stands for the name of particular quarter of the horizon.

मित—। प्राचां देशे स्थितानां ग्रामानां नगराणां च दिशः परेषां अचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। पूर्वेषुकामशमी इति कश्चित् पूर्वदेशीयः ग्रामः। "दिक्संख्ये संज्ञायाम्" (२।१।५०) इति समासः। तत्र भवः इति अण् पूर्वैषुकामशमः। इदं ग्रामस्य उदाहरणम्। एवं अपरैषुकामशमः। पूर्वकृष्णमृत्तिकायां भवः इति पूर्वकार्ष्णमृत्तिकः। एवं अपरकार्ष्णमृत्तिकः।

पूर्वस्मिन् पाटलिपुत्रे भवः इति पूर्वपाटलिपुत्रकः। अत्र वुञ् प्रत्ययः। नगरस्य उदाहरणमिदम्। एवं अपरपाटलिपुत्रकः। पूर्वस्मिन् कान्यकुब्जे भवः इति पूर्वकान्यकुब्जः, एवं अपरकान्यकुब्जः।

**१३६२। पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् ॥ ४।३।२८ ॥**

**टी—। पूर्वाह्णकः। अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः। अवस्करकः।**

The suffix वुन् is added to पूर्वाह्ण, अपराह्ण, आर्द्रा, मूल प्रदोष and अवस्कार, in the sense of "born or produced there or at that period," provided a proper noun is implied by the new word thus formed.

मित—। पूर्वाह्णादिभ्यः शब्देभ्यो वुन् प्रत्ययो भवेत् "तत्र जातः" इति एतस्मिन् विषये संज्ञायाम् गम्यमानायाम्। पूर्वाह्णे भवः पूर्वाह्णकः। अपराह्णे भवः अपराह्णकः। "विभाषा पूर्वाह्णापराह्णाभ्याम्" (४।३।२४) इति सूत्रस्य अपवादः अयम्। आर्द्रायां भवः आर्द्रकः। मूलायां जातः मूलकः। नक्षत्रेभ्यः विहितस्य अण् प्रत्ययस्य अपवादः। प्रदोषे भवः प्रदोषकः। "निशाप्रदोषाभ्याम् च" (४।३।१४) इत्यस्य अपवादः। अवस्करे भव इति अवस्कारकः। तत्रभवः इति विहितस्य अणः अपवाद संज्ञायां एते प्रत्ययाः। असंज्ञायां तु यथाप्राप्तं टञ् प्रभृतयः प्रत्यया भवन्ति।

### १३६३। पथः पन्थ च ॥ ४।३।२९ ॥

### दी—। पथि जातः पन्थकः।

The suffix वुन् is attached to पथिन् in the sense of तत्र जातः barring the suffix अण् and before the suffix this पथिन् is changed into पन्थ।

मित—। तत्रजातः इति एतस्मिन् अर्थे पथिन् इत्यस्मात् वुन् स्यात्। अयं अण् प्रत्ययस्य अपवादः। वुन्प्रत्ययसन्नियोगेन च पथिन् इत्यस्य स्थाने पन्थ इत्यादेशो भवति। अविभक्तिको निर्देशः सौत्रः। पथि जातः पन्थकः।

### १३६४। अमावास्याया वा ॥ ४।३।३० ॥

### दी—। अमावास्यकः। आमावास्यः।

In the aforesaid sense, वुन् is optionally added to अमावास्या।

मित—। तत्र जात इति एतस्मिन् अर्थे अमावास्याशब्दात् विकल्पेन वुन्प्रत्ययो भवेत्। अमावास्यायां जात इति वुन् अमावास्यकः। वुनोऽप्राप्तिपक्षे तु "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" इति (४।३।१६) सूत्रेण अण्। तेन आमावास्य इति रूपम्।

"एकदेशविकृतमपि अनन्यवद्भवति" इति न्यायात् अमावसाशब्दादपि अण् स्यात्—आमावसः, वुन् अपि अमावसकः।

१३६५। अ च ॥ ४।३।३१ ॥

दी—। अमावासः।

In the aforesaid sense the suffix अ may be added to अमावासा।

मित—। पूर्वोक्ते खलु विषये अमावास्याशब्दात् "अ" इति प्रत्ययोऽपि इष्टः। पूर्वेण वुन्, अण् च। अयं हि तृतीयः प्रत्ययो विधीयते। अमावसायां भव इति अमावासः। स्पष्टार्थं सर्वं एकत्रीकृत्य अत्र लिख्यते यथा—

अमावासा शब्दात् वुन्—अमवासकः। अमावसा शब्दात् वुन्—अमावसकः।
अमावासा शब्दात् अण्—आमावासः। अमावसा शब्दात् अण्—आमावसः।
अमावासा शब्दात् अ—अमावासः। अमावसा शब्दात् अ—अमावसः।

१३६६। सिन्ध्वपकराभ्याम् कन् ॥ ४।३।३२ ॥

दी—। सिन्धुकः। कच्छाद्यणि, मनुष्यवुञि च प्राप्ते। अपकरकः। औत्सर्गिकेऽणि प्राप्ते।

In the aforesaid sense the suffix कन् is taken by सिन्धु and अपकर।

मित—। प्रागुक्ते स्वार्थे सिन्धुशब्दात् अपकरशब्दाच्च कन्प्रत्ययो भवेत्। सिन्धौजात इति सिन्धुकः। "कच्छादिभ्यश्च" (४।२।१३३) इति सिन्धुशब्दादणि प्राप्ते, तथा "मनुष्यतस्थयो र्वुञ्" (४।२।१३४) इति मनुष्ये अभिधेये वुञि प्राप्ते, अनेन कन् विधीयते। कन्—सिन्धुकः। वुञ्—सैन्धवकः। अण्-सैन्धवः। एवम् अपकरशब्दात् औत्सर्गिके तत्रजात इति (एतस्मिन् अर्थे सामान्येन विहिते) अणि प्राप्ते कन् अनेन विधीयते—तेन अपकरकः।

१३६७। अणञौ च ॥ ४।३।३३ ॥

दी—। क्रमात् स्तः। सैन्धवः। आपकरः।

The words सिन्धु and अपकर take the suffixes अण् and अञ् respectively after then in the aforesaid sense.

मित—। पूर्व्वोक्ते हि विषये सिन्धुशब्दात् अण्, तथा अपकरशब्दात् अञ् स्यात्। सैन्धवः। आपकरः। पूर्व्वसूत्रेण कन्प्रत्यये प्राप्ते अनेन एतयो-र्विधानम्।

**१३६८। श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्व्वसुहस्त-विशाखाषाढ़ाबहुलाल्लुक्॥ ४।३।३४॥**

**दी—। एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात्।**

All suffixes attached to the words enumerated in the sutra in the sense "तत्रजातः" elide.

मित—। श्रविष्ठा, फल्गुनी, अनुराधा, स्वाति, तिष्य, पुनर्व्वसु, हस्त, विशाखा, अषाढ़ा बहुला इति एतेभ्यः "तत्रजातः" इति एतस्मिन् अर्थे विहितानां सर्व्वेषामेव प्रत्ययानां लुक् स्यात्।

**१३६९। लुक् तद्धितलुकि॥ १।२।४९॥**

**दी—। तद्धितलुकि सति उपसर्ज्जनस्त्रीप्रत्ययस्य लुक् स्यात्। श्रविष्ठासु जातः श्रविष्ठः। फल्गुनः इत्यादि।**

In case of a तद्धित suffix eliding, the feminine suffix that passes by the term उपसर्ज्जन (on account of its being relegated to a subordinate position ) is dropped.

मित—। "गोस्त्रियोरुपसर्ज्जनस्य" (१।२।४८) इति सूत्रात् परमेव इदं सूत्रं वर्त्तते। सूत्रात् तस्मात् षष्ठीविभक्त्यन्तस्य "स्त्री" इत्यस्य तथा "उपसर्ज्जनस्य" इत्यस्य च अत्र अनुवृत्तिरस्ति, तेनायमर्थः आयाति—"तद्धित लुकि" तद्धितप्रत्ययानां लुकि प्राप्ते सति, "उपसर्ज्जनस्य" उपसर्ज्जनीभूतस्य स्त्रीप्रत्ययस्य लुक् स्यात्। उपसर्ज्जनम्

गौणीभूतम्, विशेषणीभूतम् इत्यर्थः। यदा कश्चित् शब्दः समासे अप्रधानं भवति, तदा स उपसर्जनसंज्ञां भजते।

यथा उत्तरपदप्रधानस्तत्पुरुषः। अतएव तत्पुरुषे पूर्वपदस्य अप्रधान्यम्। तेन अत्र पूर्वपदमेव उपसर्जनसंज्ञां गच्छति। पञ्च इन्द्राण्यः देवताः अस्य इति तद्धितार्थ-द्विगुसमासः। स च समासः द्विप्रकारः—तद्धितार्थद्विगुः—वाच्ये, विषये—यदा तद्धितार्थे विहितः कश्चित्प्रत्ययस्तिष्ठति स "विषये" इति कथ्यते—यथा द्वयोः मात्रोः अपत्यं पुमान् इति द्वैमातुरः, एवं यदा तद्धितार्थे विहितस्य प्रत्ययस्य "द्विगोर्लुगनपत्ये" (४।१।८८) इति लुक् भवति, तदा स "वाच्ये" इति प्रोच्यते। पञ्च इन्द्राण्यः देवताः अस्य इति अत्र तद्धितार्थद्विगौ विहितस्य प्रत्ययस्य "द्विगोर्लुगनपत्ये" इति लुक् स्यात्।

किंच अत्र विग्रहे तद्धितार्थे विहितो यः प्रत्ययः, स तिष्ठतु वा, तस्य लुक् स्यात् वा, तस्यैव एव अर्थः प्राधान्यं प्राप्नोति तेन पञ्चइन्द्राण्यः देवताः अस्य इति समुदयेन यः खलु अन्यपदार्थः (समस्यमानेभ्यः पदार्थेभ्यः अतिरिक्त पदार्थः) लक्ष्यीकृतः स एव प्रधानं (मुख्यं), अन्ये खलु (समस्यमानाः पदार्थाः) अप्रधानं (गौणं, विशेषणम्)। अतएव समस्यमानपदानां अन्तर्भुक्तस्य इन्द्राणीति स्त्रीविहितस्यपदस्य अप्राधान्यम् अतएव इन्द्राणीति पदम् उपसर्जनम्। यथा खट्वाम् अतिक्रान्तः इति उपसर्जनस्य स्त्रीप्रत्ययान्तस्य खट्वा इति शब्दस्य गोस्त्रियोरुपसर्जनस्य इति सूत्रेण ह्रस्वं स्यात्, एवम् अत्रापि "इन्द्राणी" इति स्त्रीप्रत्ययान्तस्य उपसर्जनीभूतस्य शब्दस्य—"लुक तद्धित लुकि" इति सूत्रेण—तद्धितप्रत्ययस्य "द्विगोर्लुगनपत्ये" इति लुकि सति—लुक् स्यात्। लुकि च स्त्रीप्रत्ययस्य "पञ्चेन्द्रः" इतिरूपम्। एवम् श्रविष्ठादिसूत्रे अपि विधीयते यत् श्रविष्टादिभ्यः विहितस्य जातार्थप्रत्ययस्य लुक् स्यात्। तस्य लुपि सति उपसर्जनस्त्रीप्रत्ययस्यापि लुक् भवेत्। श्रविष्ठासु जातः इति "सन्धिवेलाद्यृतु नक्षत्रेभ्योऽण्" (४।३।१६) इति सूत्रेण अण्। तस्य च "श्रविष्टादि—(४।३।३४) सूत्रेण लुक्। श्रविष्टासु जातः इति वाक्येन यः खलुः जातः स एव लक्ष्यीकृतः अतएव श्रविष्टा इत्यस्य उपसर्जनम्। तेन उपसर्जन स्त्रीप्रत्ययस्य श्रविष्टा इत्यस्य आकारस्य अनेन सूत्रेण लुक् स्यात्—तेन श्रविष्ठः इतिरूपम्। एवं फल्गुन्यां जातः

फल्गुनः। एवं अनुराधः, स्वातिः, तिष्यः, पुनर्वसुः, हस्तः, विशाखः, आषाढ़ः, बहुलः, (कृत्तिकाप्रभवः), सर्व्वत्र खलु तत्रजातः इत्यर्थे प्रत्ययस्य लुक्, लुकि सति उपसर्ज्जन स्त्रीप्रत्ययस्यापि यथायोग्यं लुक् च। फल्गुनः अर्ज्जुनः। स्वार्थे अणि "फाल्गुनो मासि चार्ज्जुने" इति। पुनर्वसुः वररुचिः।

**दी—। चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्। चित्रायां जाताचित्रा। रेवती। रोहिणी। आभ्यां लुक तद्धित लुकीतिलुकि कृते पिप्पल्यादेराकृतिगणत्वात् पुनर्ङीष्।**

मित—। चित्रा रेवती रोहिणी इति एतेभ्यः शब्देभ्यः तद्धितप्रत्ययस्य लुकि, तथा तन्निमित्तके अपि स्त्रीप्रत्ययस्य लुकि सति, ये शब्दाः जायन्ते, ते स्त्रीलिङ्गे एव। ते स्त्रीलिङ्गे एव वर्त्तन्ते न खलु पुंलिङ्गे। तेन चित्रायां जाता इति तद्धितलुकि, स्त्रीप्रत्ययलुकि च यत् पदं "चित्रम्" इति भवति, तस्य पुंसि प्रयोगाभावात् स्त्रीलिङ्गे एव ग्रहणम्—अतएव चित्रा इतिरूपम्। "अजाद्यत ष्टाप्" ( ४।३।४ ) इति आप्। एवं रेवत्यां जाता रेवती, रोहिण्यां जाता रोहिणी। तद्धितलुकि स्त्रीप्रत्ययस्यापि लुकि सति "षिद्गौरादिभ्यश्च" (४।१।४१) इति गौरादिषु पाठात् ङीष् इति काशिका। पिप्पलादिगणस्य आकृतिगणत्वात् तत्रैव अनयोः पाठसम्भवात् ङीष् इति श्रीमान् दीक्षितः। पिप्पल्यादिगणश्च गौरादिगणे एवान्तर्भुक्तः।

**१३७०। फल्गुन्याषाढ़ाभ्याम् टानौ वक्तव्यौ। (वा)।**

**दी—। स्त्रियाम् इत्येव। फल्गुनी। अषाढ़ा।**

मित—। फल्गुनी अषाढ़ा इति एताभ्याम् क्रमात् टः अण् च प्रत्ययः स्यात् स्त्रियाम्। फल्गुन्याम् जाता इति फल्गुनी (टप्रत्ययः)। एवं अषाढ़ा (अन् प्रत्यय)।

**१३७१। श्रविष्ठाषाढ़ाभ्याम् छण् वक्तव्यः।**

**दी—। अस्त्रियामपि। श्राविष्ठीयः। आषाढ़ीयः।**

मित—। श्रविष्टा आषाढ़ा इति एताभ्याम् छण् स्यात् स्त्रियाम् अस्त्रियामपि। श्रविष्टायाम् जातः इति श्राविष्टीयः। आषाढ़ाम् जात इति आषाढ़ीयः। एवं स्त्रीलिङ्गे—श्राविष्टीया। आषाढ़ीया।

१३७२। ञे प्रोष्ठपदानाम् ॥ ७।३।१८ ॥

दी—। प्रोष्ठपदानामुत्तरपदस्य अचामादेरचो वृद्धिः स्यात् जातार्थे ञिति णिति किति च। प्रोष्ठपदासु जातः प्रौष्ठपादो माणवकः। ञे इति किम्? प्रोष्ठपदासु भवः प्रौष्ठपदः। बहुवचननिर्द्देशात पर्य्यायोऽपि गृह्यते। भाद्रपादः।

The first of all the vowels contained in the latter half of the word प्रोष्टपद (also in भाद्रपद etc) takes its Briddhi substitute before any तद्धित suffix that elides ञ, ण, or क।

मित।—ज इति जन्धातोर्ड:। पूर्व्वपदं विनापि अस्य साधुत्वं सूत्रावयवत्वात्। ज जातः। ञे जाते जातार्थे इत्यर्थः। "ज इति जातार्थो निर्द्दिश्यते" इति काशिका। जातार्थे विहितो यस्तद्धितस्तस्मिन् ञिति णिति किति च प्रत्यये परे प्रोष्टपदानाम् उत्तरस्य (उत्तरभागस्य) अचां मध्ये आदेरचो वृद्धिः स्यात्। प्रोष्ठपदा नाम नक्षत्रम्। प्रोष्ठपदासु जातः इति "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" (४।३।१६) इति अण्। अणि च अनेन सूत्रेण प्रोष्ठपदा इति शब्दान्तर्गतस्य यत् उत्तरपदम् तस्य अचां मध्ये य आद्यच् तस्य वृद्धि जातार्थे इति प्रोष्टपादः। जातात् अन्यस्मिन् अर्थे विहिते प्रत्यये परे तत् न स्यात्—यथा प्रोष्टपदासु भव इति प्रौष्टपदः। प्रोष्टपदानां इति बहुवचन निर्द्देशेन ज्ञाप्यते यत् प्रोष्टपदपर्य्यायभाद्रपदशब्दस्य अपि ग्रहणं यथा "मत्समीश्रोगर्डैः" इति सूत्रे बहुवचनग्रहणात् पर्य्यायशब्दानां ग्रहणम्। तेनात्र भाद्रपदशब्दस्यापि ईदृशो वृद्धिर्भवेत्। तेन भाद्रपदासु जातः इति भाद्रपादः। उदाहरणं—"प्रोष्टपादो मेघो धरणीमभिवर्षति" इति काशिका। "प्रोष्टपादोबालकः" इति भाषावृत्तिः।

१३७३। स्थानान्तगोशालखरशालाच्च ॥४।३।३५॥

दी—। एभ्यो जातार्थप्रत्ययस्य लुक् स्यात्। गोस्थानः। गोशालः। खरशालः। विभाषासेनेति नपुंसकत्वे ह्रस्वत्वम्।

Any तद्धित suffix, attached to any word ending in स्थान or to गोशाल or to खरशाल elide, provided they imply the sense of "तत्रजातः।"

मित—। स्थानान्तात् प्रातिपदिकात् गोशालशब्दात् खरशालशब्दाच्च विहितस्य तद्धितप्रत्ययस्य लुक् स्यात्। गोस्थाने जातः इति गोस्थानः। एवं अश्वस्थानः। गवां शाला गोशालम्। खराणां शाला इति खरशालम्। खरः उष्ट्रः। "विभाषा-सेनासुराच्छाया शालानिशानां" (२।४।२५) इति नपुंसकलिङ्गत्वम्। ततः "ह्रस्वो नपुंसके प्रातिपदिकस्य" (१।२।४७) इति ह्रस्वत्वं—तेन गोशालं खरशालम् इति रूपम्। तत्र जातः इति तद्धितलुकि गोशालः। एवं खरशालः।

## १३७४। वत्सशालाभिजिदश्वयुक्शतभिषजो वा ॥ ४।३।३६ ॥

**टी—। एभ्यो जातार्थस्य लुग्वा स्यात्। वत्सशाले जातो वत्सशालः। वात्सशालः इत्यादि।**

A suffix, attached to वत्सशाल, अभिजित्, अश्वयुक् and शतभिषज in the sense of "तत्रजात" optinally elides.

मित—। वत्सशाल, अभिजित्, अश्वयुज् शतभिषज् इति एतेभ्यः विहितस्य जातार्थप्रत्ययस्य विकल्पेन लुक् स्यात्, वत्सशालायां भवः इति अण् वात्सशालः। प्रत्ययस्य लुक्—वत्सशालः। एवं आभिजितः—अभिजित्। आश्वयुजः—आश्वयुक् शातभिषजः—शतभिषक्। तथाहि अश्वयुजि मासि = आश्विने मासि इत्यर्थः।

**टी—। जातार्थे प्रतिप्रसूतोऽण् डिद्वा वक्तव्यः (वा)॥ शातभिषजः। शातभिषः। शतभिषक्।**

The suffix अण् that stands as a counter-exception to any suffix in the sense of "तत्रजातः" should be optionally taken to be डित्—i.e. like a suffix that elides इकार—which results in the disappearance of टि-portion of the प्रकृति।

मित—। प्रतिप्रसवीभूतः, अपवादस्य अपवाद इत्यर्थः। तथाहि "तत्रजातः" इति (४।३।२५) इति जातार्थं अण्। "कालाट्ठञ्" इति (४।३।११) इति तस्य अपवादः ठञ्। पुनः "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" (४।३।१६) इति ठञ् प्रत्ययं

वाधित्वा अण् प्रवर्त्तते—अत: अण् इति प्रत्यय: स्वापवादस्य ( आत्मन: अण: इत्यस्य अपवादस्वरूपस्य ) ठञ्प्रत्ययस्य प्रतिप्रसव: । ईदृश: प्रतिप्रसूत: अण् यदा प्रवर्त्तते तदा स "डित्" इति विकल्पेन मन्तव्य: । डित् करणस्य किं फलमिति चेत्—टिलोप: एव फलम् । तथाहि शतभिषक् इति शब्दात् विहितोऽण् प्रतिप्रसूत: । "सन्धिवेला—" इत्यादिना नक्षत्रेभ्यो विहितत्वात् । स च "डित्" इति बोध्य· तेन तस्मिन् परे "शतभिषज्" इत्यस्य टिलोप: तथा सति शातभिष: इत्यपि रूपम् । डित: अप्राप्तिपक्षेतु शातभिषज: । प्रत्ययस्य लुकि तु शतभिषक् इति ।

ननु "नक्षत्रेभ्य: वहुलम् ( ४।३।३७ )" इति परसूत्रेणैव इष्टसिद्धौसत्यां कथमव नक्षत्राणां केषाञ्चित् ग्रहणम् इति चेत्—सत्यम्, "वहुलग्रहणस्यायं प्रपञ्च:" इति काशिका । प्रपञ्च: विस्तार: । विस्तार्य्य समुल्लेख: इत्यर्थ: ।

१३७५ । नक्षत्रेभ्यो बहुलम् ॥४।३।३७॥

टी— । जातार्थप्रत्ययस्य वहुलं लुक् स्यात् । रौहिण: । रोहिण: ।

As regards the लुक् of all suffixes attched to words expressive of stars or constellation of stars, the "वहुल" theory may be applied ; ( i.e sometimes the suffixes elide—sometimes not ).

मित— । नक्षत्रवाचिभ्य: "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" ( ४।३।१६ ) इत्यादिना जातार्थे ये अणादय: प्रत्यया: सु: तेषां वहुलं लुक् स्यात् । वहुलग्रहणेन ज्ञाप्यते यत् कदाचित् लुक् स्यात् कदाचिद्वा न स्यात् इति सर्व्वं प्रयोगत: एव ज्ञातव्यम् । रोहिण्यां जात: इति अण् रौहिण: । लुकि तु रोहिण: । एवं मार्गशीर्ष:—मृगशिरा: । "पूर्णो जातार्थ" इति भाषावृत्ति: । तथाहि यस्मिन् मासि मृगशिरा: जात:—पूर्णोह: स्यात् ( यस्मिन् मासि मृगशिरसि चन्द्र: पूर्ण: स्यात् इत्यर्थ: ) स मास: मार्गशीर्ष: ।

१३७६ । कृतलब्धक्रीतकुशला: ॥४।३।३८॥

टी— । "तत्र" इत्येव । स्रुघ्ने कृत: लब्ध: क्रीत: कुशलो वा स्रौघ्न: ।

In the sense of "कृत" (done or performed) "लब्धः" (got by, gained) "क्रीतः" (purchased), and "कुशलः" (expert, dexterous), proper suffixes are added to words.

मित—। "तत्र कृतः", "तत्र लब्धः", "तत्र क्रीतः", "तत्र कुशलः" इति एतेष्वेव अर्थेषु सप्तमीसमर्थात् प्रातिपदिकात् यथाविहितं प्रत्ययाः स्युः। स्रुघ्ने कृतः लब्धः क्रीतः कुशलो वा स्रौघ्नः, एवं मथुरायां कृतः लब्धः क्रीतः कुशलो वा माथुरः एवं राष्ट्रे कृतः लब्धः क्रीतः कुशलो वा राष्ट्रियः।

१३७७। प्रायभवः॥ ४।३।३९॥

टी—"तत्र" इत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः।

Proper Suffixes are attached to words in the sense of "प्रायेण तत्र भवः" (almost produced there)

मित—। तत्र प्रायेण बाहुल्येन भव इति एतस्मिन् अर्थे यथायोग्यं प्रत्ययाः स्युः। स्रुघ्ने प्रायेणभवः इति स्रौघ्नः। एवं माथुरः। राष्ट्रियः। "प्रायशब्दः साकल्यस्य किञ्चिन्न्यूनतामाह" इति काशिका।

१३७८। उपजानूपकर्णोपनीवेष्ठञ्॥४।३।४०॥

टी—औपजानुकः। औपकर्णिकः। औपनीविकः।

The suffix ठञ् is attached to उपजानु, उपकर्ण and उपनीवि।

मित—। उपजानु उपकर्ण उपनीवि इति एतेभ्यः शब्देभ्यः सप्तमीसमर्थेभ्यः "प्रायभव" इति एतस्मिन् विषये ठञ् प्रत्ययः स्यात्। अणोऽपवादः। जानुनः समीपे उपजानु, तत्र प्रायभव इति औपजानुकः। "पाणी यस्य उपजानुकौ", आजानुलम्बितभुज इत्यर्थः। कर्णस्य समीपे इति उपकर्णम्, तत्र प्रायभव इति औपकर्णिकः। "औपकर्णिकौ लोचनौ", औपकर्णिकौ अपाङ्गस्पर्शिनौ इत्यर्थः। नीविः कटिदेशः। तस्य समीपे इति उपनीवि। तत्र प्रायभव इति औपनीविकः। "औपनीविकस्कद्व किल यौवनस्य करमात्मकराभ्याम्"; अस्यार्थः—यौः किल आत्मकराभ्याम्

वल्लभस्य ( स्वामिन: प्रियस्य ) औपनीविकम् करम् अकरुद्ध ( रुद्धवती इत्यर्थ: )। औपनीविकं करं नीविबन्धमोचनार्थं नीविसमीपे प्रायभवो हस्त इत्यर्थ: ।

१३७९। संभूते ॥४।३।४१॥

टी—। स्रुघ्ने संभवति स्रौघ्न: ।

Proper suffixes are frequently added to words in the sense of "तत्र सम्भूत:"। [N. B.—सम्भवन is probability].

मित—। "तत्र" इत्येव। "तत्र संभूत" इति एतस्मिन्नर्थे सप्तमीसमर्थात् प्रातिपदिकात् यथाविहितं प्रत्ययो भवति। स्रुघ्ने संभवति इति स्रौघ्न:। एवं माथुर:। राष्ट्रिय:।

ननु इह संभूतशब्देन उत्पत्ति: सत्ता वा न गृह्यते। जातार्थे भवार्थे च प्रत्ययेनैव इष्टसिद्धौ सत्यां संभूतार्थप्रत्यया: अनर्थका: स्यु:। तर्हि संभूत इत्यस्य कोऽर्थ: ? संभूत इत्यनेन अवक्लृप्ति:, प्रमाणानतिरेकश्च सम्भवत्यर्थ इह गृह्यते इति काशिका। "स्थान"मिह संभूतार्थ इति भाषावृत्ति:।

१३८०। कोशाड्ढञ् ॥ ४।३।४२ ॥

टी—। कौशेयं वस्त्रम्।

The suffix ढञ् is added to the word कोश in the sense of "तत्र सम्भूत:"।

मित—। तत्र संभूत इति एतस्मिन् विषये कोशशब्दात् ढञ्प्रत्ययो भवति। अणोऽपवाद:। कोशे संभूतं कौशेयं वस्त्रम्। योगरूढशब्दोऽयम्। वस्त्रे रूढत्वात् तेन कोशे संभूत: खड्ग, इत्यत्र प्रत्ययो न स्यात्। कोशविकारं वस्त्रं इति विकारार्थे एव अयं प्रयुक्त:।

१३८१। कालात्साधुपुष्प्यत्पच्यमानेषु ॥ ४।३।४३ ॥

टी—। हेमन्ते साधु हैमन्त: प्राकार:। वसन्ते पुष्प्यन्ति वासन्त्य: कुन्दलता:। शरदि पच्यन्ते शारदा: शालय:।

The suffixes are often attached to words expressive of any divison of time in the sense of "तत्र साधुः", or "तत्र पुष्यन्ति" or "तत्र पच्यन्ते।"

मित—। सप्तमीसमर्थेभ्यः कालविशेषवाचिभ्यः "तत्र साधुः," "तत्र पुष्यन्ति" "तत्र पच्यन्ते" इति एतेष्वर्थेषु यथाविहितं प्रत्ययाः स्युः। हेमन्ते साधुः हैमन्तः प्राकारः। हेमन्ते निर्म्माणयोग्यो, निर्म्मेयो वा। शिशिरे साधु शैशिरं अनुलेपनम्। वसन्ते पुष्यन्ति वासन्त्यः कुन्दलताः, वासन्ती माधवी। ग्रीष्मे पुष्यन्ति इति ग्रैष्माः पाटलाः। शरदि पच्यन्ते इति शारदाः शालयः। ग्रीष्मे पच्यन्ते ग्रैष्माः यवाः।

१३८२। उप्ते च ॥४।३।४४॥

टी—। हेमन्ते उप्यन्ते हैमन्ताः यवाः।

Proper suffixes are lavishly added to words denoting any part of time in the sense of "तत्र उप्त" ( sown at that period ).

मित—"तत्र उप्त"मिति एतस्मिन्नर्थे कालविशेषवाचिभ्यः प्रातिपदिकेभ्यः यथाविहितं प्रत्ययाः स्युः। हेमन्ते उप्यन्ते इति हैमन्ताः यवाः। अण् प्रत्ययः, एवं ग्रीष्मे उप्यन्ते इति ग्रैष्माः व्रीहयः।

ननु कथम् सूत्रम् इदम् पूर्व्वसूत्रे एव नान्तर्भावितम्? उच्यते—परसूत्रेण सह अस्य अनुवृत्तिरूपसंपर्कवशादेव।

१३८३। आश्वयुज्या वुञ् ॥४।३।४५॥

टी—। ठञोऽपवादः। आश्वयुज्याम् उप्ता आश्वयुजका माषाः।

The suffix वुञ् ( standing as a bar to ठञ् ) is added to the word आश्वयुजी in the sense of "तत्र उप्तम्"।

मित—। "तत्र उप्तम्" इति एतस्मिन् अर्थे आश्वयुजीशब्दात् वुञ् प्रत्ययः स्यात्। "कालाट् ठञ्" ( ४।३।१९ ) इति विहितस्य ठञ् प्रत्ययस्य अपवादः। अश्विनीनक्षत्रसा

एव अश्वयुक् ( अश्वयुज् इति प्रातिपदिकम् ) इति अपरं नाम। अश्विनीशब्देन नक्षत्रद्वयं ज्ञेयम्—(Aswini is a constellation of two stars). अश्विनीभ्याम् युक्ता पौर्णमासी इति आश्वयुजी। तत्र उप्ताः इति वुन्—आश्वयुजकाः। आश्वयुजकाः माषाः।

१३८४। ग्रीष्मवसन्तादन्यतरस्याम् ॥४।३।४६॥

टी—। पक्षे ऋत्वण्। ग्रैष्मकम्। ग्रैष्मम्। वासन्तकम्। वासन्तम्।

In the aforesaid sense, the suffix वुन् is optionally added to ग्रीष्म and वसन्त।

मित—। अन्यतरस्यामिति विकल्पार्थं अव्ययम्। "तत्र उप्तम्" इति एतस्मिन्नेव विषये ग्रीष्मवसन्तशब्दाभ्याम् विकल्पेन वुन् प्रत्ययः स्यात्। पक्षे च "संधिवेलाद्यृतुनक्षत्रेभ्योऽण्" (४।३।१६) इति अण्। ग्रीष्मे उप्तम् इति ग्रैष्मकं शस्यम्। ग्रैष्मं शस्यम्। वसन्ते उप्तम् इति वासन्तकं वासन्तं वा।

१३८५। देयमृणे ॥ ४।३।४७॥

टी—। कालादित्येव। मासे देयं ऋणं मासिकम्।

The suffix is वुन् (or according to Kasika—any other suitable suffix ) may be added to a word, expressive of some particular divison of time, in the sense of "तस्मिन् देयं" ( to be paid in at that period), provided that what is to be paid up is debt and debt alone ( i. e. is nothing but debt ).

मित—। सप्तमीसमर्थात् कालवाचकात् प्रातिपदिकात् "तस्मिन् देयम्" इति एतस्मिन् अर्थे वुन्प्रत्ययः भवेत्, ( यथाविहितं प्रत्ययाः वा इति काशिकाकारमतम् ), यद्वस्तु देयं तत् चेत् ऋणमेव स्यात्। मासे देयं ऋणं मासिकम्। एवं आर्द्धमासिकम्। सांवत्सरिकम्। ऋणे इति किम् ? मासे देया भिक्षा इति न प्रत्ययः स्यादेव।

१३८६ । कलापयश्वत्थयवबुसाद्वुन् ॥ ४।३।४८ ॥

**दो—।** यस्मिन् काले मयूराः कलापिनो भवन्ति स उपचारात् कलापी। तत्रदेयं ऋणम् कलापकम्। अश्वत्थस्य फलम् अश्वत्थस्तद्युक्तः कालोऽश्वत्थः यस्मिन् काले अश्वत्था फलन्ति, तत्रदेयम् अश्वत्थम्। यस्मिन् यवबुसम् उत्पद्यते तत्र देयम् यवबुसकम्।

The suffix वुन् is added to the words कलापिन्, अश्वत्थ and यवबुस, provided that these words are made to denote any period of time and the newly formed words express some debt—to be paid up during the time—implied by these words.

मित—। कलापिन् अश्वत्थ यवबुस इति एतेभ्यः गौणवृत्त्या कालवाचकेभ्यः सप्तमीसमर्थेभ्य. "तस्मिन् देयम् ऋणम्" इति एतस्मिन्नेव अर्थे वुन्प्रत्ययः स्यात्।

कलापः शिखिपिच्छः। सोऽस्य अस्ति इति इनिप्रत्यये कृते कलापिन् मयूरः। यस्मिन् काले मयूराः कलापिनः भवन्ति सकालोपि कलापी, इति कलापीशब्दः कालसाहचर्य्यादेव गौणवृत्त्याकाले वर्त्तते। कलापी वर्षाकालः। तथाहि "मेघाध्यानेषु नृत्यं भवति च शिखिनाम्" इति साहित्यदर्पणः। तस्मिन् कलापिनि काले देयं ऋणम् इति वुन् कलापकम्। अश्वत्थस्य फलम् इति अश्वत्थः। "फले लुक्" (४।३।१६३) इति सूत्रेण प्रत्ययलुकि अश्वत्थ इति रूपम्। अश्वत्थयुक्तः (अश्वत्थफलयुक्तः इत्यर्थः) कालः इति अश्वत्थः। यस्मिन् काले अश्वत्थाः फलन्ति इति स कालोऽश्वत्थः। फलवाचकोऽश्वत्थशब्दः कालसाहचर्य्यादेव गौणवृत्त्या काले वर्त्तते। तस्मिन् काले देयं ऋणम् इति वुन् अश्वत्थकम्। यस्मिन्काले यवबुस उत्पद्यते स कालः यवबुसः। यवबुसशब्दः कालसाहचर्य्यात् गौणवृत्त्या काले वर्त्तते। तस्मिन् काले देयं ऋणं इति वुन् यवबुसकम्।

## १३८७। ग्रीष्मावरसमाद्वुञ् ॥४।३।४९॥

## दी—। ग्रीष्मे देयम् ऋणं—ग्रैष्मकम्। आवरसमकम्।

In the sense of "तस्मिन् देयं ऋणं", the suffix वुञ् is attached to ग्रीष्म and अवरसम।

मित—। "तस्मिन् देयम् ऋणम्" इति एतस्मिन्नेवार्थे ग्रीष्मशब्दात् अवरसमशब्दात् च वुञ्प्रत्ययो भवेत्। अण्प्रत्ययस्य ठञ्प्रत्ययस्य च अपवादः।

ग्रीष्मे देयं ऋणम् इति वुञ्—ग्रैष्मकम्। समाशब्दः वर्षापर्य्यायः। अवराः समाः। परवर्षाः इत्यर्थः। समाशब्दो बहुत्वे एव प्रयुज्यते। तथाहि "मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः"। तत्र देयम् ऋणम् आवरसमकं ऋणम्।

ननु "वुन्" इति पूर्व्वसूत्रीयप्रत्ययेनैव इष्टसिद्धौ कथं "वुञ्" इति प्रत्ययान्तरकरणम् इति चेत् उच्यते। "वृद्ध्यर्थम्" इति काशिका। वुन्प्रत्ययेन आदिस्वरवृद्धिर्नस्यात्—यथा कलापकम् न खलु कालापकम्। वुञ्प्रत्ययेन आदिस्वरवृद्धिः स्यात्—यथा ग्रैष्मकः। आदिस्वरवृद्धिरत्र इष्टा इति प्रत्ययान्तरकरणम्।

## १३८८। संवत्सराग्रहायणीभ्यां ठञ्च ॥ ४।३।५० ॥

## दी—। चाद्वुञ्। सांवत्सरिकम्। सांवत्सरम्। आग्रहायणिकम्। आग्रहायणकम्।

The suffix ठञ् is attached to संवत्सर and अग्रहायणी optionally.

मित—। "तस्मिन् देयम् ऋण"मिति एतस्मिन्नर्थे संवत्सरअग्रहायणी इति एताभ्याम् विकल्पेन ठञ् प्रत्ययः स्यात्। "ठञ् च" इति चकारात् वुञ् प्रत्ययोऽपि। संवत्सरे देयम् ऋणम् सांवत्सरिकम्। अग्रहायन्याम् देयम् ऋणम् आग्रहायणिकम्। वुञ्—सांवत्सरकम्। आग्रहायणकम्।

ननु संवत्सराग्रहायणीभ्याम् वा इत्यनेनैव इष्टसिद्धौ कथं सूत्रे ठञ् इत्यस्य उल्लेखः? "वा" इत्यनेन खलु पक्षे "कालाट्ठञ्" (४।३।११) इति सूत्रेण स्वत एव ठञ् लभेत—इति चेत्? उच्यते—सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् (४।३।१६) इति सूत्रे

आदिशब्देन "संवत्सरात् फलपर्व्वणोः" इति विधानात् तत्र अण् प्रत्ययेन सांवत्सरं फलं सांवत्सरं पर्व इति भवेत्। यदा तु संवत्सरशब्दात् परस्थितं यत् फलं तदेवह ऋणत्वेन विवक्षितं स्यात्, तदा अण् प्रत्ययं बाधित्वा अनेन सूत्रेण ठञ् प्रवर्त्तते इति बोध्यम्। तत्र संवत्सरे देयं यत् ऋणस्वरूपं यत् फलं तत् सांवत्सरिकं फलम्। तत् ऋणं चेत् न स्यात् तर्हि सांवत्सरं फलम्।

१३८८। व्याहरति मृगः ।४।३।५१॥

टी—। कालवाचिनः सप्तम्यन्तात् शब्दायते इत्यर्थे अणादयः सुः। यो व्याहरति स मृगश्चेत। निशायां व्यहरति नैशो मृगः। नैशिकः।

Suffixes are often attached to words denoting any divison of time, in the sense of "crying at that period," provided that the crier is nothing but a मृग ( deer or any other animal ?).

मित—। "तस्मिन् समये व्याहरति ( शब्दायते )" इति एतस्मिन्नर्थे काल-वाचकात् सप्तमीसमर्थात् प्रातिपदिकात् अणादयः यथायोग्यं प्रत्ययाः सुः—यो व्याहरति स चेत् मृगः—न खलु मृगादन्यः कश्चित्। निशायां व्याहरति मृगः नैशो मृगः, अण्। नैशिकः मृगः—ठञ्। एवं प्रदोषे व्याहरति मृगः प्रादोषः प्रादोषिकः। मृगः इति किम् ? निशायां व्याहरति उलूकः। मृगशब्देन किं हरिणो गम्यते उत यः कश्चित पशुरिति एतत् चिन्तनीयम्।

१३८०। तदस्य सोढ़म् ॥ ४।३।५२॥

टी—। कालादित्येव निशासहचरितम् अध्ययनं निशा। तत् सोढ़मस्य नैशिकः। नैशः।

Proper suffixes are frequently attached to words, expressive of any particular divison of time in the sense of "तदस्य

सोढ़म्"—i.e some one has been accustomed to that particular time—or he has control over it or he can utilize it to his own account.

मित—। तदिति प्रथमासमर्थात्। अस्य इति षष्ठ्यर्थे। सोढ़म् सहधातोः क्तप्रत्ययेन निष्पन्नम्। अस्यार्थस्तु—जितम्, अभ्यस्तम् इति। तथाहि प्रथमासमर्थात् कालवाचकात् प्रातिपदिकात् अणादयः यथाविहितं प्रत्ययाः स्युः षष्ठ्यर्थे, यत् खलु प्रथमासमर्थं तत् सोढ़ं ( जितम्, अभ्यस्तं ) चेत् भवति षष्ठीविहितस्य पदार्थस्य। निशा रात्रिः। निशासहचरितम् अध्ययनम् अपि गौणवृत्त्या ( लक्षणया ) निशा इति उच्यते। तत् सोढ़म् ( जितम्, अभ्यस्तम् ) अस्य छात्रस्य इति निशाशब्दात् अण्—नैशः। नैशः छात्रः। एवं ठञ् नैशिकः छात्रः। निशायां अध्ययने अभ्यस्तश्छात्रः। निशापाठो छात्र इत्यर्थः। एवं प्रादोषः छात्रः। प्रादोषिकश्छात्रः।

## १३८१। तत्र भवः ॥ ४।३।५३ ॥

## दी—। स्रुघ्ने भवः स्रौघ्नः। राष्ट्रियः॥

Proper suffixes are attached to words in the senses of "तत्रभव" ( existing there ) ; what exists in Srughna is स्रौघ्न, and in rastra is "rastriya".

मित—। कालात् इत्यस्य नानुवृत्तिः। तत्र इति सप्तमीसमर्थो निर्दिश्यते। भव इति भू सत्तायाम् इति धातोरप् प्रत्ययेन सिद्धः-तेन अस्यार्थस्तु सत्ता—न खलु जन्म ; "तत्र जात" इति एतेन जातार्थे प्रत्ययानाम् उक्तत्वात्।

"तत्र भव" इति एतस्मिन्नर्थे सप्तमीसमर्थात् प्रातिपदिकात् यथायोग्यम् अणादयः प्रत्ययाः स्युः। स्रुघ्ने भवः इति अण् स्रौघ्नः, एवं राष्ट्रे भवः इति राष्ट्रियः घप्रत्ययोऽत्र।

ननु "तत्र" इत्यस्य अनुवृत्तिसम्भवात् अपि कथं सूत्रे अस्मिन् तस्य पुनर्ग्रहणम् इति चेत्—उच्यते। तदस्य सोढ़म् इति सूत्रात् तदस्य इत्यस्य अनुवृत्तिप्रतिषेधार्थम् इति।

१३८२ । दिगादिभ्योयत् ॥ ४।३।५४ ॥

टी— । दिश्यम्, वर्ग्यम् ।

The suffix यत् is added to words of the दिगादि class.

मित— । तत्र भव इति एतस्मिन् विषये दिश् इत्येवमादिभ्यः प्रातिपदिकेभ्यः यत् प्रत्ययो भवति । अण्प्रत्ययस्य छप्रत्ययस्य च अपवादः । दिशि भवं दिश्यं, वर्गे भवं वर्ग्यम् । दिगादिर्यथा—दिश, वर्ग, पूग, गण, पक्ष, धाय्या, मित्र, मेधा, अन्तर, पथिन्, रहस्, अलीक, उखा, साक्षिन्, आदि, अन्त, मेध, यूथ, न्याय, वंश, अनुवंश, वेश, काल, अप्, आकाश: ।

अपिच मुखशब्दः तथा जघनशब्दो यदा शरीरस्य अवयवम् न बोधयति, तदा एते अपि एतस्मिन् गणे पठ्यन्ते । यथा—सेनामुखे भवं सेनामुख्यम् । एवं सेना-जघन्यम् ।

उदकात् संज्ञायाम इति वक्तव्यम् । उदक शब्दः संज्ञायामेव एतस्मिन् गणे पठ्यते—यथा उदकेभवा इति उदक्या रजस्वला । संज्ञायाम् इति किम् ? औदकः मत्स्यः उदकेभवः इत्यर्थे अण् ।

१३८३ । शरीरावयवाच्च ॥ ४।३।५५ ॥

टी—दन्त्यम, कर्ण्यम् ।

The aforesaid suffix is attached to words expreasive of limbs in the said sense.

मित— । शरीरं प्राणिनां देहः । शरीरस्य अवयवं बोधयन्ति ये शब्दास्तेभ्यः तत्रभव इति एतस्मिन् विषये यत्प्रत्ययः स्यात् । अणोऽपवादः । दन्तेषु भवं दन्त्यम् । कर्णेषु भवं कर्ण्यम् । एवं ओष्ठ्यम् । कण्ठ्यम् ।

१३८४ । प्राचां नगरान्ते । ७।३।२४॥

टी— । प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्य च अचामादेरचो वृद्धि ञिति णिति किति च । सुह्मनगरे भवः सौह्मनागरः,

पौर्वनागरः। प्राचां किम्? मनगरम् उदक्षु; तत्र भवो मानगरः।

The first of all the vowels—contained by the first member of a compound word, and so also the first of all the vowels, belonging to the second member of the self-same compound word, should the second member be nothing but the word नगर, take this Briddhi substitute—before any suffix of तद्धित that elides ञ, ण, or क, provided the said city be said to belong to the east.

मित—। प्राचां देशे इत्यनयार्थस्तु पूर्व्वदेशे। पूर्व्वदेशीयः य नगरान्तः समासनिष्पन्नः ( नगरवाची ) शब्दस्तस्य पूर्व्वपदस्य अचां मध्ये आदेरचस्तथा नगर इति अन्त्यपदस्य अचां मध्ये आदेरचोऽपि वृद्धिः स्यात् ञिति, णिति किति च तद्धितप्रत्यये परे, सुह्मनगरम् पूर्वदेशीयं, तत्र भवः इति अण्—सौह्मनागरः, एवं पूर्वनगरे भव पौर्वनागरः, एवं पौण्ड्रनगरे भवः पौण्ड्रनागरः। पूर्वदेशात् अन्यत्र तु—मद्रनगरे भवः इति माद्रनगरः, मद्रनगरः दक्षिणस्यां दिशि, दीक्षितवृत्तौ यत् "मनगरम् उदक्षु तत्र भवो मानगरः" इति दृश्यते स तु अपपाठ एव इतिमन्ये। "मनगरे भव मानगरः" इत्येव साधीयान् पाठः।

१३८४। जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥ ७।३।२५ ॥

दी—। जङ्गलादन्तस्य अङ्गस्य पूर्वपदस्य अचाम् आदेरचो वृद्धिरुत्तरपदस्य वा ञिति णिति किति च। कुरुजङ्गले भवं कौरुजङ्गलं। कौरुजाङ्गलम्। वैश्वधेनवम्। वैश्वधैनवम्। सौवर्णवलजम्। सौवर्णवालजम्।

The first of all the vowels—containedby a compound word of which जङ्गल, धेनु or वलज forms the second member,

takes its Briddhi substitute before any तद्धित suffix that elides ञ, ण, or क, and the first of all the vowels of the second member optionally do the some under parallel circumstances.

मित—। जङ्गल धेनु वलज इत्येवमन्तस्य समासनिष्पन्नपदस्य अचां मध्ये आद्यचो वृद्धिर्भवेत् ञिति, णिति, किति च तद्धिते परे। अपिच जङ्गलधेनु वलज इति एतेषां उत्तरपदानाम् अचामादिरचो वृद्धिर्विकल्पेन स्यात् पूर्व्वोक्तप्रत्यये परे। कुरुजङ्गलेषु भवम् इति कौरुजङ्गलं—कौरुजाङ्गलम्। विश्वधेनुषु भवं—वैश्वधेनवं—वैश्वधैनवम्। सुवर्णवलजे भवम् सौवर्णवलजं—सौवर्णवालजम्।

## १३८५। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्॥ ४।३।५६॥

## ढो—। दार्त्तेयम्। कौक्षेयम्। कलशिर्घटः-तत्रभवम् कालशेयम्। वास्तेयम्। आस्तेयम्। आहेयम्।

The suffix ढञ is attched to दृति, कुक्षि, कलशि वस्ति, अस्ति and अहि।

मित—। "तत्र भव" इति एतस्मिन् विषये दृति कुक्षि वस्ति अस्ति अहि इति एतेभ्यः ढञ्प्रत्ययो भवति। दृतिः स्वर्णकाराणाम् यन्त्रविशेषः। [हापर इति गौड़ीयाः]। तत्र भवम् दार्त्तेयम्। कुक्षौ भवम् इति कौक्षेयम्। कौक्षेयः असिः। कलशिर्घटः तत्र भवं कालशेयं जलम्। वास्तेयम्, आस्तेयम्, [अस्ति इति प्रातिपदिकम् न तिङन्तः—तस्मात् प्रत्ययः]। आहेयम्। आहेयम् अजयम् विषम् इति काशिका। "भोगान् भोगानिवाहेयान्" इति भाषावृत्तिकारोद्धृतं भारविवचनम्।

## १३८६। ग्रीवाभ्योऽण् च॥ ४।३।५७॥

## ढो—। चात् ढञ्। ग्रैवेयम्। ग्रैवम्।

The suffixes ढञ् as well as अण् are attached to the word ग्रीवा।

मित—। पूर्व्वोक्ते एव विषये ग्रीवेति शब्दात् अण् प्रत्ययः, सूत्रस्थात् चकारात्

ढञ् प्रत्ययश्च। "शरीरावयवाच्च" (४।३।५५) इति यत्प्रत्ययस्य अपवादः। ग्रीवासु भवं इति ढञ् ग्रैवेयम्। अण्—ग्रैवम्।

ननु ग्रीवाशब्दस्य कथं बहुवचने प्रयोगः इति चेत्—"ग्रीवाशब्दो धमनीवचनस्तासां बहुत्वात् बहुवचनं कृतम्।"

१३८७। गम्भीराञ्ञ्यः ॥ ४।३।५८ ॥

दी—। गम्भीरे भवं-गाम्भीर्यम्।

The suffix ञ्य is attached to गम्भीर in the aforesaid sense.

मित—। पूर्वोक्ते एव विषये गम्भीरशब्दात् ञ्यप्रत्ययः स्यात्। अणोऽपवादः। गम्भीरे भवं गाम्भीर्यम्। बहिर्देवपञ्चजन इति एतेभ्योऽपि अयं स्यादिति काशिका। बहिर्भवं बाह्यम्। देवे भवं दैव्यम्। पञ्चजने भवम् पाञ्चजन्यं। तथाहि "बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या" इति मेघदूते। "पाञ्चजन्यं हृषीकेशः" इति श्रीगीता।

१३८८। अव्ययीभावाच्च ॥ ४।३।५९ ॥

दी—। परिमुखं भवं इति पारिमुख्यं। परिमुखादिभ्य एवेष्यते (वा)। नेह—औपकूलः।

In the aforesaid sense, the self same suffix is added to words that are formed with the help of अव्ययीभाव समास, of course all अव्ययीभाव's are not liable to take the suffix—but only those that fall within the category of परिमुखादि class।

मित—। अव्ययीभावसमासनिष्पन्नात् प्रातिपदिकात् प्रत्ययो भवेत्, "तत्र भवः" इति एतस्मिन्नेव अर्थे। न खलु सर्वेभ्य एव अव्ययीभावेभ्यः एषः प्रत्ययो भवति, अपि तु परिमुखादिभ्यः एव।

परिमुखादिर्यथा—परिमुख, परिहनु, पर्योष्ठ, परिसीर, उपसीर, अनुसीर, पर्युलूखल, उपस्थल, उपकलाप, अनुगङ्ग, अनुतिल, अनुशीत, अनुमाष, अनुयव,

अनुपद, अनुयुप, अनुवंश, अनुपद, अनुगङ्ग, अनुयुप, प्रतिशाख, परिमुख। प्रति शाखेभवं इति प्रातिशाख्यम्।

अपिच—परिमण्डलशब्दात् प्रतिकूलअनुकूलशब्दात् च औदृश्यते—यथा "परिमण्डलाभिन्नानां कारणत्वमुदाहृतम्"—इति भाषापरिच्छेदे। आनुकूल्यम्। प्रातिकूल्यम्।

एभ्योऽन्यत्र न स्यात्—यथा उपकूले भव औपकूलः—अत्र अण् एव।

## १३९९। अन्तःपूर्व्वपदाट् ठञ् ॥४।३।६०॥

**टी—। अव्ययीभावादित्येव। वेश्मनि इति अन्तर्वेश्मम्। तत्र भवम् आन्तर्वेश्मिकम्। आन्तर्गणिकम्। अध्यात्मादेष्ठञ् इष्यते (वा)। अध्यात्मं भवम् आध्यात्मिकम्।**

The suffix ठञ् is attached to any compound of the अव्ययीभाव class, provided it be precceded by अन्तः, in the sense of "तत्र भवः"।

मित—। "अव्ययम् विभक्ति—( २।१।६ )" इति सूत्रेण विभक्त्यर्थे अव्ययीभावसमासः विहितः। "अन्तः" इति शब्दः विभक्त्यर्थे समस्यते। ईदृशात् अन्तः पूर्वपदात् अव्ययीभावात् ठञ् प्रत्ययोभवति "तत्रभवः" इति एतस्मिन् विषये। वेश्मनि इति अन्तर्वेश्मम्। वेश्मन्—गृहम्। तत्रभवम् इति आन्तर्वेश्मिकम्। गणे इति अन्तर्गणम्। तत्रभवम् इति आन्तर्गणिकम्, एवं आन्तर्गेहिकम्। अयं प्रत्ययः अण् प्रत्ययस्य अपवादः। आत्मनि इति अध्यात्मम्। अध्यात्मम् इत्येवमादिभ्यः शब्देभ्यः "तत्रभवः" इति एतस्मिन्नेव विषये ठञ् स्यात् इति वाच्यम्। अध्यात्मादिर्यथा—अध्यात्म, अधिदैव, अधिभूत, इहलोक, परलोक इति अध्यात्मादिराकृतिगणः। अध्यात्मम् भवम् इति आध्यात्मिकम्।

## १४००। अनुशतिकादीनां च ॥ ७।३।२० ॥

**टी—। एषाम् उभयपदवृद्धिः स्यात् ञिति णिति किति च।**

आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । अध्यात्मादिराकृतिगणः ।

The first of all the vowels of the first member as well as of the second member of a compound that falls within the category of अनुशतिकादि takes their Briddhi substitute before a तद्धित suffix, that elides ञ, ण, or क ।

मित— । अनुशतिक इत्येवमादीनां समासान्तपदानां पूर्वपदस्य तथा उत्तरपदस्य च अचां मध्ये आदिरचो वृद्धिः स्यात् तद्धिते ञिति, णिति किति च परे । देवे इति अधिदेवम् । तत्र भवम् इति ठञ् आधिदैविकम् । इहलोके भवम् इति ठञ् ऐहलौकिकम् । परलोके भवम् इति पारलौकिकम् । अनुशतिकादिर्यथा—

अनुशतिक, अनुहोड़, अनुसंवरण, अनुसंवत्सर, अङ्गारवेणु, असिहत्य, अस्यहेति, अस्यहत्य, वध्योग, पुष्करसद, अनुहरत्, कुरुकत, कुरुपञ्चाल, उदकशुद्ध, इहलोक, परलोक, सर्व्वलोक, सर्व्वपुरुष, सर्व्वभूमि, परस्त्री । ष्यञि प्रत्यये परे सति राजपुरुषोऽपि अनुशतिकादिर्यथा—राजपौरुष्यम् । ष्यञि इति किम् ? राजपुरुषस्य अपत्य—राजपुरुषायणिः । आकृतिगणोऽयं—तेन अधिगम, अधिदेव, अधिभूत, चतुर्व्विद्या इत्यादयोऽपि अत्र पठ्यन्ते ।

केचन अध्यात्मादिका अत्रलिख्यन्ते यथा—औपसर्गिकम्, त्रैवर्णिकम्, चातुरर्थिकम्, साम्प्रतिकम्, गैरिकम् । समानशब्दात् तथा समानादिशब्दादपि ठञ् स्यात् । समाने भवम् सामानिकम् । समानग्रामे भवः इति सामानग्रामिकः । ऊर्द्ध्वन्दमशब्दात् तथा ऊर्द्ध्वदेहशब्दाच्च "तत्रभव" इत्यर्थे ठञ् स्यात् और्द्ध्वन्दमिकः । और्द्ध्वदैहिकः । मध्यशब्दात् ईयः, मण्, मीय इति स्युः, मध्यीयः, माध्यमः, मध्यमीयः । मध्यशब्दात् दिनण्च प्रत्ययः स्यात् । प्रत्यये परे सति मध्यपदस्थाने मध्यम् इति भवति । माध्यन्दिनम् । माध्यन्दिनम् उपगायति । "लुक् स्थाम्नोऽजिनान्ताच्च" स्थामन् तथा अजिन इति एतदुत्तरेभ्यः पदेभ्यः विहितस्य प्रत्ययस्य लुक् स्यात् । अश्वत्थामा । कृष्णाजिनः ।

१४०१। देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥७।३।१॥

दी—। एषां पञ्चानां वृद्धिप्राप्तावादेरच आत् ञिति णिति किति च। दाविकम्। देविकाकूले भवा दाविकाकूलाः शालयः। शिंशपाया विकारः शांशपश्चमसः। पलाशादिभ्यो वेत्यञ्। दित्यौह इदं दात्यौहम्। दीर्घसत्रे भवम् दार्घसत्रम्। श्रेयसि भवम् श्रायसम्।

The five words देविका, शिंशपा, दित्यवाह्, दीर्घसत्र and श्रेयस् substitute आत् for the first of all their vowels in case of its taking a Briddhi substitute, before a Taddhita suffix that elides ञ, ण, or क।

मित—। देविका शिंशपा, दित्यवाह् दीर्घसत्र श्रेयस् इति एतेषां पञ्चानाम् अचां मध्ये आदेरचः स्थाने यदा ञिति णिति किति च तद्धितप्रत्यये परे वृद्धिः प्रसज्येत, तदा वृद्धिर्न स्यात् अपि च इदृशस्य अचः स्थाने आत् स्यात्। तकारः इत्। देविका इति काचित् नदी। तत्र भवम् उदकम् इति अण्—दाविकम् उदकम्। देविका-कूले भवाः शालयः दाविकाकूलाः शालयः, एवं पूर्वदेविका नाम प्राचां ग्रामः। तत्र भव इति "प्राचां ग्रामनगराणाम्" (७।३।१४) इति सूत्रेण उत्तरपदस्य एव वृद्धिः। सा वृद्धिः आकारेण परिणमति—अतः पूर्वदाविकः। शिंशपा वृक्षविशेषः। [शिशु इति गौड़ीयाः] । तस्य विकारः इति अञ् शांशपः। शांशपश्चमसः। चमसः यज्ञपात्र-विशेषः। अयं पलाशादिगणे पठ्यते। तेन "पलाशादिभ्यो वा" (४।३।१४१) इति विकारार्थे अञ् स्यात्। पूर्वशिंशपा नाम प्राचां ग्रामः—तत्रभवः पूर्वशांशपः। दित्यवाह् इति वैदिकः शब्दः। तस्य (दित्यौह इत्यर्थः) इदं दात्यौहम्। दीर्घसत्रे भवं दार्घसत्रम्। श्रेयसिभवम्—श्रायसम्। तथाहि "श्रायसेन प्रमदेन युक्तम्।"

१४०२। ग्रामात् पर्य्यनुपूर्वात् ॥४॥३।६१॥

टी—। ठञ् स्यात्। अव्ययीभावादित्येव। पारिग्रामिकः। आनुग्रामिकः।

In the sense of "तत्र भव" the suffix ठञ is attached to the word ग्राम, entering into an अव्ययीभाव-समास with परि or अनु।

मित—। परि अनु इत्येवं पूर्वात् ग्रामशब्दान्तादव्ययीभावात् "तत्र भव" इति एतस्मिन्नर्थे ठञ् प्रत्ययो भवेत्—अणोऽपवादः। समीपे ग्रामस्य इति अनुग्रामम्। तत्रभवः आनुग्रामिकः। ग्रामाद्बहिरिति परिग्रामम्। तत्र भवः पारिग्रामिकः।

१४०३। जिह्वामूलाङ्गुलेश्छः ॥४।३।६२॥

टी—। जिह्वामूलीयम्। अङ्गुलीयम्।

The suffix छ ( that is ईय ) is added to जिह्वामूल and अङ्गुली।

मित—। जिह्वामूलम् अङ्गुली इति एताभ्याम् छप्रत्ययः स्यात्—"तत्र भवः" इति एतस्मिन् विषये। "शरीरावयवाच्च" ( ४।३।५५ ) इति यत् प्रत्ययस्य अपवादः। जिह्वामूले भवं जिह्वामूलीयः वर्णः। अङ्गुल्यां भवम् इति अङ्गुलीयम्।

१४०४। वर्गान्ताच्च ॥ ४।३।६३ ॥

टी—। कवर्गीयम्।

The same suffix (छ) is added to the word ending in वर्ग. in the said sense.

मित—। वर्गान्तात् प्रातिपदिकात् तत्र भव इति एतस्मिन्नर्थे छप्रत्ययः स्यात्। अणोऽपवादः। कवर्गीयम्। एवं च वर्गीयम्। टवर्गीयम्। तवर्गीयम्। पवर्गीयम्।

१४०५। अशब्दे यत्खावन्यतरस्याम् ॥ ४।३।६४ ॥

टी—। पक्षे पूर्वेण छः। मद्वर्ग्यः। मद्वर्गीणः। मद्वर्गीयः। अशब्दे किम्? कवर्गीयो वर्णः।

The suffix यत् and ख are optionally added to any word, ending in वर्ग, provided the word वर्ग does not imply "शब्द"—i.e divison of the alphabet ; छ may also be added to it.

मित—। "शब्द" इत्यस्मात् अन्यस्मिन् एव प्रत्ययस्य अर्थे सति वर्गान्तात् प्रातिपदिकात् "तत्रभव" इत्यस्मिन् विषये यत् ख इति प्रत्ययद्वयं विकल्पेन भवति। एतयोरप्राप्तिपक्षे छप्रत्ययः स्यात्। मम वर्गः मद्वर्गः मम गोष्ठी इत्यर्थः। तत्रभवः इति मद्वर्ग्यः—यत्। मद्वर्गीणः—ख। मद्वर्गीयः-छ। एवं वासुदेववर्ग्यः—वर्गीणः—वर्गीयः। युधिष्ठिरवर्ग्यः—वर्गीणः—वर्गीयः। "अशब्दे" इति किम् ? कवर्गीयो वर्णः। अत्र पूर्वसूत्रेण छ एव। अत्र वर्गशब्देन शब्दः अभिहितः। 'तत् एकैकानपि स्ववर्गीयान् प्रयच्छ"—इति पञ्चतन्त्रे। स्ववर्गीणः। स्ववर्ग्यः।

## १४०६। कर्णललाटात् कनलंकारे ॥ ४।३।६५ ॥

दी—। कर्णिका। ललाटिका।

The suffix कन् is added to कर्ण and ललाट in the sense of "तत्रभवः" provided the thing denoted by the newly formed word is nothing but an ornament.

मित—। कर्ण ललाट इति एताभ्याम् कन्प्रत्ययो भवेत् तत्रभव इति एतस्मिन् विषये—यस्तत्रभवः सचेत् अलङ्कारः एव। शरीरावयवादिलक्षणस्य यत्प्रत्ययस्य अपवादः। कर्णे भवः अलङ्कारः इति कन् कर्णिका। ललाटे भवः अलङ्कारः इति ललाटिका। अत्र स्त्रीत्वम् अभिधानात् इति मन्यामहे वयम्। अलङ्कारे इति किम् ? कर्ण्यम्। ललाट्यम्—अत्र शरीरावयवादिलक्षणो यत्प्रत्यय एव।

## १४०७। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ॥ ४।३।६६ ॥

दी—। सुपां व्याख्यानः सौपो ग्रन्थः। तैङः। कार्त्तः। सुप्सु भवं सौपम्।

Suffixes are frequently added to words expressive of some particular subject of treatment, provided the words, thus formed stand for the exposition upon the said subject, suffixes are also added to the self-same words in the sense of "तत्रभवः" ।

मित—। व्याख्यायते अनेन (ग्रन्थेन) इति व्याख्यानम् व्याख्यानो वा—टीकाग्रन्थविशेषः। यस्य व्याख्यानम् कार्य्यम् तत्व्याख्यातव्यम्। व्याख्यातव्यस्य नाम इति व्याख्यातव्यनाम। तस्य व्याख्यातव्यनाम्नः। "तस्य" इति षष्ठीसमर्थत्वं द्योत्यते। षष्ठीसमर्थात् व्याख्यातव्य-विषयनाम्नः प्रातिपदिकात् व्याख्याने अभिधेये (व्याख्याग्रन्थे बोध्ये इत्यर्थः) यथाविहितं प्रत्ययः स्यात्; एवं "तत्रभवः" इत्येतस्मिन् अपि विषये व्याख्यातव्यविषयनाम्नः यथायोग्यं प्रत्ययाः स्युः। "सुप्" सुबन्तप्रक्रिया। इदं व्याख्यातव्यम्। एतस्य व्याख्यातव्यस्य व्याख्यानम् अस्मिन् (ग्रन्थे) वर्त्तते इति सुप् शब्दात् अण्—सौपः ग्रन्थः। सुपः व्याख्यानम् अधिकृत्य रचितः ग्रन्थः। तिङ् इति तिङ्प्रक्रिया। एतत् व्याख्यातव्यम्। एतस्य व्याख्यातव्यस्य व्याख्यानम् वर्त्तते अस्मिन् ग्रन्थे इति तैङः ग्रन्थः। एवं कृत् इति कृदन्तप्रक्रिया। एतत् व्याख्यातव्यम्। एतस्य व्याख्यातव्यस्य व्याख्यानं वर्त्तते अस्मिन् ग्रन्थे इति कार्त्तः ग्रन्थः।

अपिच—सुप् इति सुबन्तप्रक्रिया या च व्याख्यातव्या। तत्र भवं सौपम् अण्। सूत्रस्य चकारः "तत्रभवः" इत्येवम् अर्थं बोधयति। एवं तैङम्। कार्त्तम्। व्याख्यातव्यनाम्नः इति किम्? पाटलिपुत्रस्य व्याख्यानी सुकोसला। सुकोसलया पाटलिपुत्रः व्याख्यायते—"एवंसन्निवेशः पाटलिपुत्रः इति वर्ण्यते"—न खलु पाटलिपुत्र इति व्याख्यातव्यस्य नाम। अतोन प्रत्ययः।

## १४०८। बह्वचोऽन्तोदात्ताट् ठञ्॥ ४।३।६७॥

**दी—। षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वम्। तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः।**

The suffix ठञ् is added to words, contaning many vowels, and being accented in the last syllable ( अन्तोदात्त ), provided they stand for the name of a subject to be treated upon in the sense of the work that serves as an exposition upon the subject under treatment or occuring in the subject itself that is to be treated upon.

मित—। बह्वच् बहुस्वरसनाथ: तस्मात्। अन्तोदात्त इति अन्त: अन्तिमस्वर: उदात्त: यस्य स अन्तोदात्त:। यस्य शब्दस्य अन्तिमस्वर: उदात्तो भवति, ईदृश: शब्द:। बहुस्वरविशिष्टात् व्याख्यातव्यविषयनाम्न: प्रातिपदिकात् अन्तोदात्तात् व्याख्याने अभिधेये तथा "तत्र भव:" इति एतस्मिन् विषये च ठञ् प्रत्यय: स्यात्। अणोऽपवाद:।

षत्वं सकारस्थाने षकारविधानम्। णत्वं नकारस्थाने णकारविधि:। षत्वं च णत्वं च षत्वणत्वे। तयो: षत्वणत्वयो र्विधायकं शास्त्रं षत्वणत्वम्। षत्वणत्वम् इति शास्त्रं व्याख्यातव्यम् अत: षत्वणत्वम् इति व्याख्यातव्यस्य एव संज्ञा। अपि च षत्वणत्वम् इति बहुस्वरसनाथं भवति। तथाच एतत् अन्तोदात्तम् अपि। कथं ज्ञायते? उच्यते—"समासस्य ( ६।१।२२३ )" इति सूत्रम्। अत्र काशिकावृत्ति:— "समासस्यान्त उदात्तो भवति।" अतएव बह्वच: अन्तोदात्तात् व्याख्यातव्यनाम्न: षत्वणत्वम् इति एतस्मात् "तस्य षत्वणत्वस्य व्याख्यानम्" अस्मिन् ग्रन्थे भवति इत्यर्थे ठञ्—षात्वणत्विक:। अपिच षत्वणत्वे भव: इत्येतस्मिन् विषये अपि ठञ् षात्वणत्विक:। बह्वच: इति किम्? सौपम्। तैङम्। कार्त्तम्। अत्र एकाच्त्वात् पूर्व्वसूत्रेण अण्। द्विस्वर-विशिष्टात् प्रातिपदिकात् क: प्रत्यय: स्यात्? "टच्" स्यात् इति उत्तरतो वदिष्यति।

ननु अन्तोदात्तात् इति किम्? संहिता सन्धिशास्त्रम् व्याख्यातव्यम्। तस्या: व्याख्यानं विद्यते अत्र इति अण् सांहितम्। संहिता—इत्यत्र न कश्चित् समास:— यथा अस्य अन्तोदात्तं स्यात् अपिच सम् इति "गति:" एव धाधातो: प्राक् विद्यते; अत: गतिस्वरेण अस्य आद्युदात्तत्वम्।

१४०८। क्रतुयज्ञेभ्यश्च ॥ ४।३।६८॥

दी—। सोमसाध्येषु यागेषु एतौ प्रसिद्धौ। तत्रान्यतरोपादानेन सिद्धे उभयोरुपादानसामर्थ्यादसोमका अपीह गृह्यन्ते। अग्निष्टोमस्य व्याख्यानस्तत्र भव आग्निष्टोमिकः। वाजपेयिकः। पाकयज्ञिकः। नावयज्ञिकः। बहुवचनं स्वरूपविधिनिरासार्थम्। अनन्तोदात्तार्थ आरम्भः।

In the aforesaid senses, the self-same suffixes are attached to words, expressive of particular sacrifices. See Tika for the rest.

मित—। क्रतु इति यज्ञ इति पदद्वयं सोमयागेषु प्रसिद्धम्। एतयोरेकतरस्य एव उल्लेखेन खलु इष्टसिद्धिः स्यात्, तर्हि कथम् द्वयोरेव अत्र ग्रहणम् इति आशङ्कायां समाधत्ते—"तत्र" इत्यादिना, शब्दद्वयस्य अत्र ग्रहणेन ज्ञाप्यते यत् सोमयागास्तथा सोमयागेभ्यः अन्ये हि यागाः अत्र अभिप्रेताः।

क्रतुभ्यः यज्ञेभ्यश्च व्याख्यातव्यनामभ्यः प्रातिपदिकेभ्यः "तेषाम् व्याख्यानं विद्यते अस्मिन् ग्रन्थे" इत्यर्थे, तथा "तत्र भवः" इति एतस्मिन्नपि विषये च ठञ् प्रत्ययः स्यात्। अत्र अन्तोदात्तस्य न कश्चित् प्रसङ्गस्तेनैव हि पृथक् सूत्रकरणम्। अयं प्रत्ययः अणोऽपवादः।

ननु क्रतुयज्ञेभ्यश्च इति बहुवचनं कथम्? उच्यते—क्रतुयज्ञाभ्याम् इति अकृत्वा क्रतुयज्ञेभ्यश्च इति बहुवचनकरणेन ज्ञापयति यत् नहि क्रतु इति शब्दात् (क्रतु इत्यस्य स्वरूपात्), तथा यज्ञ इति शब्दात् (यज्ञ इत्यस्य स्वरूपात्) खलु प्रत्ययः इष्टः, अपि क्रतुविशेषवाचिभ्यस्तथा यज्ञविशेषवाचिभ्यश्च शब्देभ्यः एव अयं ठञ् प्रत्ययः स्यात्, अग्निष्टोमः इति क्रतुविशेषः, स च व्याख्यातव्यः, तस्य व्याख्यानं विद्यते अस्मिन् ग्रन्थे इति आग्निष्टोमिकः ग्रन्थः, अग्निष्टोमे भवः वा आग्निष्टोमिकः। वाजपेयस्य क्रतो व्याख्यानम् विद्यते इति वाजपेयिकः ग्रन्थः वाजपेये क्रतौ भवः इति

वाजपेयिकः, नवयज्ञस्य पाकयज्ञस्य वा इति यज्ञविशेषयोः व्याख्यानम् विद्यते अत्र ग्रन्थे इति नावयज्ञिकः पाकयज्ञिकः वा ग्रन्थः। तत्रभवः वा नावयज्ञिकः, पाकयज्ञिकः, एवं पाञ्चौदनिकः। पञ्चौदनस्य व्याख्याग्रन्थः। दाशौदनिक —दशौदनस्य व्याख्याग्रन्थः।

१४१०। अध्यायेष्वेवर्षेः॥ ४।३।६९॥

टी—। ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रन्थवृत्तिभ्योभवे व्याख्याने चाध्याये ठञ् स्यात्। वसिष्ठेन दृष्टोमन्त्रो वसिष्ठस्तस्य व्याख्यानस्तत्रभवो वा वासिष्ठिकोऽध्यायः। अध्यायेषु किम्? वासिष्ठी ऋक्।

The suffix ठञ् is attached to words which though stand for the name of Rishis, denote, by transference of epithet ( लक्षणावृत्ति ) a particular chapter of the vedas in the sense of "तस्यव्याख्यानम्" or "तत्र भवः"।

मित—। ऋषि मन्त्रद्रष्टा। ऋषिभिः दृष्टत्वेन साहचर्य्यात् लक्षणावृत्त्या तैर्दृष्टाः मन्त्रा अपि ऋषिशब्देन भण्यन्ते। लक्षणयावृत्त्या—गौण्यावृत्त्या, "मुख्यार्थबाधे तद्युक्तोययाऽन्यार्थः प्रतीयते, रूढेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिते"ति साहित्यदर्पणे। मन्त्रः संहिताग्रन्थविषयः, स च व्याख्यातव्यः। ईदृशेभ्यः व्याख्यातव्यग्रन्थवाचिभ्यः ऋषिशब्देभ्यः "तस्य व्याख्यानं, तत्र भवो वा" इति एतस्मिन् विषये ठञ्प्रत्ययः स्यात्, य खलु व्याख्यानः तत् चेत् अध्याय एव तस्मात् नान्यः। वशिष्ठेन दृष्टो मन्त्रः लक्षणवृत्त्या (लक्षणावृत्त्या वा ) वशिष्ठः इति संज्ञां गच्छति। तस्य वशिष्ठमन्त्रस्य ( संहिता ग्रन्थप्रतिपाद्यस्य ) व्याख्यानम् अस्ति अस्मिन् अध्याये, तत्र भवो वा योऽध्यायः स वाशिष्ठिकोऽध्यायः। एवं वैश्वामित्रिकः अध्यायः।

अध्यायेषु इति किम्? वाशिष्ठी ऋक्। अत्राध्यायाभावात् अण् एव। स्त्रियांङीप्।

१४११। पौरोडाशपुरोडाशात्ष्ठन् ।४।३।७०॥

टी—। पुरोडाश सहचरितो मन्त्रः पुरोडाशः। स एव पौरोडाशः। ततःष्ठन्=पौरोडाशिकः।

The suffix ष् ठन् is attached to the words पुरोडाश and पौरडाश।

मित—। पुरोडाशाः पिष्टानां पिण्डास्तेषां संस्कारको मन्त्रः पौरोडाशः। तथा पुरोडाशसहचरितो मन्त्रः पुरोडाशः। ईदृशात् पौरडाशशब्दात् तथा पुरोडाशशब्दात् च ष्ठन् प्रत्ययो भवति, "तस्य व्याख्यानः" "तत्र भवः" वा इति एतस्मिन्नर्थे, पुरोडाश ग्रंथस्य व्याख्यानं, पुरोडाशे भवः वा पौरोडाशिकः। स्त्रियां पौरोडाशिकी, एवं पौरोडाशग्रंथस्य व्याख्यानं, पौरोडाशे भवो वा पौरोडाशिकः स्त्रियां पौरोडाशिकी। प्रत्ययस्य ष्ठन् इत्यस्य यत् षकारेत्करणं तत्, स्त्रियाम् ङीष् स्यादिति ज्ञापनार्थमेव। "षिद्गौरादिभ्यश्च" इति हि सूत्रम्।

१४१२। छन्दसो यदणौ ॥ ४।३।७१ ॥

टी—। छन्दस्यः। छान्दसः।

The suffixes यत् and अण् are attached to the word छन्दस्।

मित—। छन्दस् इति शब्दात् "तस्य व्याख्यानः" "तत्र भवः" इति वा अर्थे यत् अण् इति प्रत्ययौ स्याताम्। छन्दसो व्याख्यानं छन्दसि भवो वा छन्दस्यः छान्दसः। "द्व्यच्"—( ४।३।७२ ) इति ठञ् प्रत्ययस्य प्रसक्तौ एतयो र्विधानम्।

१४१३। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ॥ ४।३।७२ ॥

टी—। द्व्यचः—ऐष्टिकः। पाशुकः। ऋत्—चातुर्होतृक। ब्राह्मणिकः। आर्चिकः। इत्यादि।

The suffix ठक् is added to words—having only two vowels, words ending in ऋ, to the words ब्राह्मण, ऋक्, प्रथम, अध्वर,

पुरश्चरण, नाम, and आख्यात as well as to the compound word नामाख्यात।

मित—। द्व्यच्—इति द्विस्वरविशिष्टः वर्णः, ऋत्—इति ऋकारान्तः शब्दः। अन्येषां स्वरूपग्रहणम्। नाम आख्यात इति एतयोर्व्यस्तस्य ग्रहणं, समस्तस्य च ग्रहणम्, तथाहि द्विस्वरसमन्वयात् वर्णात्, ऋकारान्तशब्दात्, तथा ब्राह्मण, ऋक्, प्रथम, अध्वर, पुरश्चरण, नाम, आख्यात, नामाख्यात इति एभ्यः व्याख्यातव्येभ्यः "तस्य व्याख्यानः" "तत्र भवः" इति एतस्मिन् विषये ठक्प्रत्ययो भवेत्। द्व्यचः—इष्टि इति इष्टि-संक्रान्त ग्रन्थः, इष्टिः यज्ञः, तस्याः व्याख्यानं तस्यां भवो वा ऐष्टिकः। पशु इति पशुसारसंक्रान्तः (पश्वालम्भनसंक्रान्तः) ग्रन्थः। तस्य व्याख्यानं तत्र भवो वा पाशुकः। एवं "निष्ठा" इत्यस्य व्याख्यानं अस्यां भवो वा नैष्ठिकः। ऋत—चतुर्होतृ इति ग्रन्थः। तस्य व्याख्यानं तत्र भवो वा चातुर्होतृकः। ब्राह्मण इति वेदांशः। तस्य व्याख्यानं तत्रभवो वा ब्राह्मणिकः। ऋचः व्याख्यानं ऋचि भवः वा आर्चिकः, प्रथम—प्राथमिकः, अध्वरो यज्ञः—आध्वरिकः, पुरश्चरण—पौरश्चरणिकः, नामिकः, आख्यातिकः, नामाख्यातिकः।

## १४१४। ऋगयनादिभ्यः॥ ४।३।७३॥

## टी—। ठञादेरपवादः। आर्गयनः। औपनिषदः। वैयाकरणः।

The suffix अण् (standing as a bar to ठञ् etc) is attached to words such as ऋगयन that fall within the category of ऋगयनादि।

मित—। ऋगयन इत्यादिभ्य प्रातिपदिकेभ्यः "तस्य व्याख्यान" "तत्र भवः" वा इति एतस्मिन् विषये अण्प्रत्ययो भवेत्। ठञ्प्रभृतिप्रत्ययानाम् अपवादः। ऋगयनस्य व्याख्यानम् तत्रभवो वा आर्गयनः। उपनिषदां व्याख्यानं उपनिषत्सु भवो औपनिषदः, एवं वैयाकरणः। ऋगयनादिर्यथा—ऋगयन, पदव्याख्यान, छन्दोनाम, (छन्दोमान), छन्दोभाषा, छन्दोविचिति, न्याय, पुनरुक्त, निरुक्त, निगम, व्याकरण,

वास्तुविद्या, क्षत्रविद्या, अङ्गविद्या, विद्या, उत्पात, उत्पाद, संवत्सर, मुहूर्त्त, उपनिषद्, निमित्त, शिक्षा, भिक्षा। वास्तुविद्यायाम् भवः, वास्तुविद्यायाः व्याख्यानं वा वास्तुविद्यः अण्। अत्र अण् ग्रहणम् बाधकबाधनार्थम्। अण् प्रत्ययं बाधित्वा यः यः प्रत्ययः सूत्रान्तरनिर्द्देशात् प्रवर्त्तते, स सोऽपि प्रत्ययः एतत्सूत्रविहितेन अण् प्रत्ययेन बाध्यते इति भावः।

१४१५। तत आगतः ॥ ४।३।७४ ॥

दो—। स्रुघ्नादागतः स्रौघ्नः।

Proper suffixes are often used to words, expressive of places, from which some one has come.

मित—। तत इति पञ्चमी समर्थम्, पञ्चमीसमर्थात् "आगतः" इति एतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्, स्रौघ्नः, एवं मथुरायाः आगतः माथुरः, राष्ट्रियः।

१४१६। ठगायस्थानेभ्यः ॥ ४।३।७५ ॥

दो—। शुल्कशालाया आगतः शौल्कशालिकः।

The suffix ठक् is attached to words expressive of some place from which some income accrues to the owner. [ शुल्कशाला—custom house ]

मित—। "आयः" इति स्वामिग्राह्यभाग उच्यते। ईदृशः अधिकारिग्राह्यः भागः यत्र उत्पद्यते तत् स्थानम् आयस्थानम्। आयस्थानवाचिभ्यः प्रातिपदिकेभ्यः ठक् प्रत्ययो भवेत्—तस्मात् आयस्थानादागतः इति एतस्मिन् अर्थे, अणोऽपवादः। शुल्कशाला इति आयस्थानं अस्मात् राज्ञः आयः स्यात्। शुल्कशालायाः आगतः—शौल्कशालिकः, एवं आकरेभ्यः आगतः—इति आकरिकः। सूत्रे आयस्थानेभ्यः इति बहुवचननिर्द्देशेन ज्ञाप्यते यत् आयस्थानवाचिभ्यः एव प्रत्ययः स्यात्—नतु आयस्थानम् इति एतस्मादेव पदात्।

१४१७। शुण्डिकादिभ्योऽण् ॥४।३।७६॥

दी—। आयस्थानठकञ्छादीनाम् चापवादः। शुण्डिकादागतः शौण्डिकः। कार्कणः। तैर्थः।

The suffix अण् (standing as a bar to the aforesaid ठक् and छ etc) is attached to words of the शुण्डिका class.

मित—। शुण्डिका इति एतेभ्यः प्रातिपदिकेभ्यः आयस्थानवाचकेभ्यः अण् स्यात् "तत आगतः" इति एतस्मिन् अर्थे, शुण्डिकादि यथा—शुण्डिका, कृकण, उदपान, स्थण्डिल, उपल, तीर्थ, भूमि, तृण, पर्ण, कृपण। अयं प्रत्ययः पूर्वसूत्रविहितस्य ठक्-प्रत्ययस्य च अपवादः, शुण्डिकादागतः शौण्डिकः, कृकणादागतः कार्कणः, तीर्थादागतः तैर्थः, औदपानः।

१४१८। विद्यायोनिसम्बन्धेभ्यो वुञ्॥ ४।३।७७॥

दी—। औपाध्यायकः। पैतामहकः।

The suffix वुञ् is added to words expressive of relationship through blood or education in the sense of "तत आगतः।"

मित—। विद्या शिक्षाग्रहणम्, योनिर्जन्म, विद्या च योनिश्च विद्यायोनी। ताभ्याम् कृतो यः सम्बन्धः स विद्यायोनिकृतः सम्पर्कः। शिक्षक-छात्रसम्पर्कः तथा योनिसम्पर्कः। विद्याकृतसम्बन्धवाचिभ्यस्तथा योनिसम्पर्कवाचिभ्यश्च शब्देभ्यः वुञ्प्रत्ययः स्यात् "तत आगत" इति एतस्मिन् विषये, अणोऽपवादः। विद्यासम्बन्धवाचिभ्यः—उपाध्यायादागतः औपाध्यायकः, एवं शिष्यादागतं शैष्यकम्। इत्थम् आचार्यकम्। योनिसम्बन्धवाचिभ्यः—पितुः पिता इति डामहच् पितामहः, तस्मात् आगतः इति पैतामहकः. एवं मातामहकः, मातुलकः।

१४१९। ऋतष्ठञ्॥ ४।३।७८॥

दी—। वुञोऽपवादः। हौतृकम्। भ्रातृकम्।

The aforesaid suffix is attached to words of the same description only ending in ऋ in the selfsame sense.

मित— । "तत आगत" इति एतस्मिन् विषये विद्यायोनिकृतसम्पर्कवाचिभ्य ऋकारान्तेभ्यः प्रातिपदिकेभ्यः ठञ् प्रत्ययः स्यात् । वुञ् प्रत्ययस्य अपवादः । विद्यासम्बन्धवाचिभ्य ऋकारान्तेभ्यस्तावत् होतुः आगतं हौतृकम्, एवं पोतुः आगतं पौतृकम् । योनिसम्बन्धेभ्यस्तावत्—भ्रातुरागतं भ्रातृकं, एवं मातृकम् । विद्यायोनिभ्याम् इति किम् ? सवितुः आगतं—सावित्रम् । सावित्री दीक्षा । अत न ठञ् अपि तु अण् एव ।

## १४२० । पितुर्यच्च ॥४।३।७९ ॥

## टी— । चात् ठञ् । रीङ् ऋतः । यस्येतिलोपः । पित्र्यम् । पैतृकम् ।

The suffix यत् as wellas ठञ् are attached to पितृ ।

मित— । "तत आगतः" इति एतस्मिन् विषये पितृशब्दात् यत्, सूत्रस्थचकारात् ठञ् प्रत्ययश्च स्याताम् । पितुरागतम् इति ठञ्—पैतृकम् । यत् = पितृ + यत् इति स्थिते "रीङ् ऋतः" ( ७।४।२७) इति सूत्रेण यकारे परे ऋस्थाने रीकारस्तेन पित्री + य इति स्थितं, ततः "यस्येति च" (६।४।१४८) इति सूत्रेण री इति ईकारस्यलोपस्तेन पित्र् य इति स्थितिः, ततः "हलोऽनन्तराः संयोगः" ( १।१।७ ) इति तेषां संयोगस्तेन पित्र्य इतिरूपं, क्लीवे पित्र्यम्—"सामान्ये नपुंसकमिति" वचनात् ।

## १४२१ । गोत्रादङ्कवत् ॥ ४।३।८० ॥

## टी— । विदेभ्यः आगतं वैदम् । गार्गम् । दाक्षम् । औपगवकम् ।

In the sense of तत आगतः, suffixes are attached to words themselves formed with such suffixes as imply descendants ( गोत्र ) in the same manner as suffixes are used in the sense of अङ्क

(characterstic-symbol)—sanctioned by (the rule "संघाङ्कलक्षणेष्व-ञ्यञिञामण् ( ४।३।१२७ )."

मित—। "संघाङ्कलक्षणेष्वञ्यञिञामण्" इति ( ४।३।१२७ ) सूत्रे अङ्क इत्येव प्रत्ययस्य अर्थे वाच्ये यादृशी प्रत्ययव्यवस्था अस्ति, तादृशीमेव व्यवस्थाम् अनुसृत्य गोत्र-प्रत्ययान्तात् प्रातिपदिकात् प्रत्ययो विधीयते तत आगत इति एतस्मिन् विषये ।

अयमाशयः—"गोत्रचरणाद् वुञ्" ( ४।३।१२६) इति सूत्रेण ज्ञाप्यते यत् तस्येदं इति विषये गोत्रवाचिनः ( तथा चरणवाचिनश्च ) वुञ् स्यात्, अस्य अपवादस्तु "संघाङ्कलक्षणेष्वञ्यञिञामण्" ( ४।३।१२७)। अनेन विधीयते यत् संघ अङ्क लक्षण इति एतेषु एव अर्थेषु अञ् प्रत्ययान्तात् यञ्प्रत्ययान्तात् इञ् प्रत्ययान्तच्च प्राति-पदिकात् अण् एव स्यात् नतु वुञ्। एवं सूत्रद्वयस्य अर्थं पिण्डीकृत्य अनेन प्रस्तुतेन "गोत्रादङ्कवत्" इति सूत्रेण सह सामंजस्यं संरक्ष्य अयमेव अर्थ आयाति—अञ्, यञ्, इञ् इति गोत्रप्रत्ययेभ्यः निष्पन्नात् प्रातिपदिकात् तत आगतः इत्यर्थे अण्। अन्येभ्यः गोत्रप्रत्ययान्तेभ्यश्च वुञ् इति। अञ्प्रत्ययनिष्पन्नात् यथा विदानां अपत्यं पुमान् वैदः—इति अञ्। ते इति बहुवचने प्रत्ययलुक् विदाः। तेभ्यः आगतम् इति अण् वैदम्। गर्गाणां अपत्यं पुमान् इति गार्ग्यः—यञ्। बहुवचने प्रत्ययलुक् गर्गाः। तेभ्यः आगतम् इति अण् गार्गम्। दक्षस्य अपत्यं पुमान् इति इञ् दाक्षिः, तस्मात् आगतम् इति अण्—दाक्षम्, यस्येति च ( ६।१।१।४८) इति इकारलोपः। एभ्यः अन्यत्र यथा—उपगोरपत्यम् पुमान् औपगवः—इति अण्, तेभ्यः आगतं इति वुञ् औपगवकम्।

## १४२२। नञः शुचीश्वरक्षेत्रज्ञ-कुशल-निपुणानाम् ॥ ७।३।३० ॥

**टी—। नञः परेषां शुच्यादि पञ्चानाम् आदेरचो वृद्धिः पूर्व-पदस्य तु वा ञिदादौ परे। आशौचम्। अशौचम्। आनैश्वर्य्यम्। अनैश्वर्य्यम्। आक्षैत्रज्ञम्। अक्षैत्रज्ञम्। आकौशलम्। अकौशलम्। आनैपुणम्। अनैपुणम्।**

Any Taddhita suffix that elides ञ, ण, or क, if attached to any of the words शुचि, ईश्वर, चैत्रज्ञ, कुशल and निपुण entering into a नञ तत्पुरुष compound with नञ्—necessitates the lengthening of the first of all the vowels-contained by any of the said words and causes the lengthening of the अ (that replaces नञ्) optionally.

मित—। नञ् इत्यनेन सह क्षत-समासानां शुचि ईश्वर चैत्रज्ञ कुशल निपुण इति एतेषां अचां मध्ये आदेरचो वृद्धिः स्यात् ञिति किति णिति च तद्धिते परे, तथा समास-पूर्व्वपदस्य नञ् इति स्थाने जातयोः अन् अ इत्यनयोः अकारस्य वृद्धि र्वा स्यात्। शुचेरन्य इति अशुचिः। तस्य भावः इति अण्—अशौचम्। अचां मध्ये आद्यस्य एव अचो वृद्धिः; आशौचम्—पूर्व्व पदस्य अकारस्य अपि वृद्धिः। ईश्वरात् अन्यः अनीश्वरः। तस्यभाव इति यञ् आनैश्वर्य्यं—अनैश्वर्य्यं, चैत्रज्ञः ईश्वरः। "चैत्रज्ञं चापिमां विद्धि सर्व्वचैत्रेषु भारत:" इतिश्रीगीतावचनात्, अचैत्रज्ञं—आचैत्रज्ञं, कुशलः दक्षः, तस्मात् अन्यः अकुशलः, तस्य भाव इति अण् अकौशलं—आकौशलम्, निपुणः दक्षः। निपुणात् अन्यः अनिपुणः, तस्य भाव इति अण् अनैपुणं—आनैपुणम्।

**१४२३। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः॥ ४।३।८१॥**

**दी—। समादागतं समरूप्यम। विषमरूप्यम्। पक्षे गहादित्वाच्छः। समीयम्। विषमीयम्। देवदत्तरूप्यम्। दैवदत्तम्।**

The suffix रूप्य is optionally attached to words, expressive of some cause or some persons in the sense of "तत आगतः।"

मित—। सूत्रे वहुवचनं यत् दृश्यते, तत् "स्वंरूपं शब्दस्याशब्द संज्ञा" (१।१।६८) इति सूत्रेण विहितं स्वरूपे एव विधिं निरासयितुम्; तेन अयमाशयः, हेतु-वाचिभ्यस्तथामनुष्यवाचिभ्यः प्रातिपदिकेभ्यः "तत आगत" इति एतस्मिन् विषये

विकल्पेन रूप्य इति प्रत्ययः स्यात्, सम इति हेतुः, तस्मात् समात् आगतम् इति समरूप्यं विषम इति हेतुः, तस्मात् विषमात् आगतं इति विषमरूप्यम्, पक्षे—"गहादिभ्यश्छः" (४।२।१३८) इति छ-प्रत्ययः स्यात्, समीयम्, विषमीयम्। देवदत्त इति मनुष्यवाची शब्दः, तस्मात् आगत इति देवदत्तरूप्यः, पक्षे "तत आगत" (४।३।७४) इति अण् दैवदत्तम्।

१४२४। मयट् च ॥४।३।८२॥

दो—। सममयम्, विषममयम्। देवदत्तमयम्।

The suffix मयट् may also be added to the aforesaid words in the self-same sense.

मित—। पूर्व्वोक्तेभ्यः पूर्व्वोक्ते एव विषये मयट् अपि स्यात्, सममयम्, समात् आगतं, विषममयं—विषमात् आगतं, देवदत्तमयं—देवदत्तात् आगतं; मयट्प्रत्ययस्य टकार इत्—तेन स्त्रियां ङीप्, सममयी, विषममयी, देवदत्तमयी।

१४२५। प्रभवति ॥ ४।३।८३ ॥

दो—। तत इत्येव। हिमवतः प्रभवति हैमवती गङ्गा।

Proper suffixes are often attached to words expressive of source or origin in the sense of ततः प्रभवति (originates from this).

मित—। प्रभवति ततः इत्येव। प्रभववाचकात् प्रातिपदिकात् "ततः प्रभवति" इति एतस्मिन्नर्थे यथायोग्यं प्रत्ययाः स्युः। प्रभवति = प्रकाशते, प्रथमतः उपलभ्यते इत्यर्थः। हिमवतः प्रभवति गङ्गा इति हैमवती गङ्गा। अत्र हिमवतः इत्यत्र "भुवः प्रभवः" इति (१।४।३१) पञ्चमी। हिमवत् इत्यस्मात् अण् प्रत्ययोऽत्र, स्त्रियामीप्। एवं दारदः नदः। दारदी सिन्धुः इति भाषावृत्तिकारः काशिकाकारश्च।

१४२६। विदूराञ्ञ्यः ॥ ४।३।८४ ॥

दो—। विदूरात् प्रभवति वैदूर्य्यो मणिः।

The suffix ञ is attached to विदूर in the aforesaid sense.

मित—। ततः प्रभवति इत्यर्थे विदूरशब्दात् ञप्रत्ययो भवेत्, अणोपवादः। विदूरात् प्रभवति इति वैदूर्योमणिः। उक्तं च कुमारे—"विदूरभूमिर्नवमेघशब्दा-दुद्भिन्नया रत्नशलाकयेव" इति।

## १४२७। तद् गच्छति पथिदूतयोः ॥ ४।३।८५ ॥

## टी—। स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा।

In the sense of "तद् गच्छति" (going there), suffixes are attached to words, provided what goes is no other than a messenger or a way.

मित—। तत् इति द्वितीया-समर्थात् गच्छतीति एतस्मिन् विषये यथायोग्यं प्रत्ययः स्यात् योऽसौ गच्छति सचेत् पन्थाः दूतो वा। स्रुघ्नं गच्छति इति अण् स्रौघ्नः, स्रौघ्नः पन्थाः, स्रौघ्नो दूतः, एवं माथुरो दूतः पन्थाः वा।

ननु पन्थाः कथं गच्छति? उच्यते—येन पथा चलन् जनः स्रुघ्नम् उपतिष्ठते स एव पन्थाः उपचारात् स्रुघ्नं गच्छति इति कथ्यते। पथिदूतयोः इति किम्? मथुरां गच्छति सार्थः।

## १४२८। अभिनिष्क्रामति द्वारम् ॥ ४।३।८६ ॥

## टी—। तदितीव। स्रुघ्नम् अभिनिष्क्रामति स्रौघ्नं कान्य-कुब्जद्वारम्।

Suffixes are attached to words to imply a door (gate-way) through which the objects denoted by the said words are to be reached.

मित—। तदिति द्वितीयासमर्थात् अभिनिष्क्रामतीति एतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्—यत् अभिनिष्क्रामति द्वारं चेत् तद् भवति। स्रुघ्नम् अभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम्। आभिमुख्येन निष्क्रामति इति अभिनिष्क्रामति। कान्य-कुब्जद्वारं स्रुघ्नम् अभिनिष्क्रामति इति तद्द्वारं स्रौघ्नम् इत्युच्यते। द्वारेण जनः

अभिनिष्क्रामति—न खलु द्वारं स्वयं निष्क्रामति तर्हि कथं द्वारस्य कर्तृत्वं दृश्यते अत्र इति चेत्—उच्यते। असिः साधु छिनत्ति इत्यत्र यथा छेदनक्रियायाः करणत्वम् उचितस्य असेः कर्तृत्वं स्यात् उपचारात्, तथा अत्रापि उपचारादेव द्वारस्य अभिनिष्क्रमणक्रियायाः कर्तृत्वम्। द्वारम् इति किम्? स्रुघ्नम् अभिनिष्क्रामति पुरुषः।

१४२८। अधिकृत्यकृते ग्रन्थे ॥ ४।३।८७ ॥

टी—। तदित्येव। शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः। शारीरकम् भाष्यम् इति तु अभेदोपचारात्।

Suffixes are frequently attached to words to imply some treatise provided the same deals with the subjects expressed by the said words. In शारीरकम् भाष्यम्, no प्रत्यय is added to शारीरक but it is taken as identical will भाष्य।

मित—। अधिकृत्य प्रस्तुत्य, विषयीकृत्य इत्यर्थः। तदिति द्वितीयासमर्थात् "अधिकृत्य कृतः" इति एतस्मिन्नर्थे यथाविहितं प्रत्ययो भवेत्, यत् तु कृतं सचेत् ग्रंथः स्यात्। सुभद्राम् अधिकृत्य कृतो ग्रंथः सौभद्रः—अत्र अण्।

ययातिम् अधिकृत्य कृतो ग्रंथः यायातः—अण्। शारीरकं जीवात्मा। तम् अधिकृत्य कृतो ग्रंथः—शारीरकीयः—अत्र वृद्धात् छः स्यात्—न तु अण्?

ननु छः चेत् साधुस्तर्हि कथं श्रीमता शङ्कराचार्येण विरचितम् वेदान्तदर्शनस्य भाष्यम् "शारीरकम् भाष्यम्" इति आख्यया प्रचरति—उच्यते शारीरकम् एव भाष्यम् इति शारीरकेण सह भाष्यस्य अभेद एव उपचारात् कल्प्यते, तेन भाष्यस्य शारीरक इति आख्या—नहि अत्र कश्चित् प्रत्ययः क्रियते।

ग्रंथे इति किम्? सुभद्राम् अधिकृत्य विरचितः प्रासादः—अत्र न प्रत्ययः।

वार्त्तिकसूत्रम्—"लुबाख्यायिकार्थस्य प्रत्ययस्य बहुलम्"। आख्यायिका इत्यर्थे विहितस्य प्रत्ययस्य बहुलं लुप् स्यात्। आख्यायिका गद्यकाव्यविशेषः। तथाहि दर्पणे "आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्त्तनम्।" ऐतिहासिकम्

वृत्तम् अधिकृत्य विरचितो गद्यकाव्यविशेषः आख्यायिका यथा हर्ष-चरितादिः। कथा यथा—साहित्यदर्पणे "कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।" अनैतिहासिकं वृत्तम् अधिकृत्य रचितो गद्यकाव्यविशेषः कथा; यथा कादम्बरी। वासवदत्ताम् अधिकृत्य कृता आख्यायिका वासवदत्ता। अत्र प्रत्ययस्य लुप्। वासवदत्ता इति सुबन्धुकृता काचित् आख्यायिका। बहुलग्रहणात्—क्वचित् प्रत्ययलुप् न स्यात् यथा—भैमरथम् अधिकृत्य कृता आख्यायिका—भैमरथी। अपिच बहुलग्रहणात् क्वचित् आख्यायिकाभ्यः अन्यत्र (कथादौ इत्यत्र) प्रत्ययस्य लुप् स्यात्—यथा कादम्बरीम् अधिकृत्य कृता कथा कादम्बरी।

## १४३० । शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥ ४।३।८८ ॥

**टी—। शिशूनां क्रन्दनं शिशुक्रन्दः। तमधिकृत्यकृतो ग्रन्थः शिशुक्रन्दीयः। यमस्यसभा यमसभम्। क्लीवत्वं निपातनात्; यमसभीयः। किरातार्जुनीयम्। इन्द्रजननादिराकृतिगणः। इन्द्रजननीयम्। विरुद्धभोजनीयम्।**

The suffix छ is attached to the words शिशुक्रन्द, यमसभ and to words falling within the category of इन्द्रजननादि as well as to words formed by means of a द्वन्द्वसमास in the aforesaid sense.

मित—। द्वन्द्वः—द्वन्द्वसमासनिष्पन्नः शब्दः, इन्द्रजननादिराकृतिगणः—यथा इन्द्रजनन, प्रद्युम्नागमन, सीतान्वेषण विरुद्धभोजन इत्यादयः। ते च प्रयोगत एव अनुसर्त्तव्याः। शिशुक्रन्द यमसभ इति एताभ्याम् तथा द्वन्द्वसमासनिष्पन्नेभ्यः शब्देभ्यः अपिच इन्द्रजननादिभ्यश्च द्वितीयासमर्थेभ्यः छप्रत्ययः स्यात् अधिकृत्य कृते ग्रंथे। अणोऽपवादः, शिशूनां क्रन्दनम् इति शिशुक्रन्दः—रोगविशेषः। क्रन्द्धातोर्घञ् प्रत्ययः। तमधिकृत्य कृतो ग्रंथः शिशुक्रन्दीयः। यमस्य सभा यमसभम्।

ननु "सभाराजाऽमनुष्यपूर्व्वा" ( २।४।२३ ) इति सूत्रे अमनुष्यस्य रक्षःपिशाचादौ रूढ़त्वात् कथमत्र क्लीवत्वम् इति चेत् ?—निपातनादेव इति वाच्यम्। तदधिकृत्य कृतो ग्रंथः यमसभीयः। किरातश्च अर्जुनश्च किरातार्ज्जुनौ। द्वन्द्वसमासः। तौ अधिकृत्य कृतो ग्रंथः किरातार्ज्जुनीयम्—भारविकृतकाव्यग्रंथविशेषः। एवं अग्निकाश्यपीयः, राघवपाण्डवीयम्, श्येनकपोतीयः, वाक्यपदीयम्। द्वन्द्वजननादिभ्यो यथा—द्वन्द्वजननम् अधिकृत्य कृतो ग्रंथः द्वन्द्वजननीयम्। विरुद्धभोजनम् अधिकृत्य कृतो ग्रंथः विरुद्धभोजनीयम्। विरुद्धभोजनं—कालविरुद्धम्, देशविरुद्धं संयोगविरुद्धं च भोजनम्। काल-विरुद्धं—नक्तं दधिभोजनम्, देशविरुद्धम् यथा ग्रीष्मदेशे उष्णवीर्य्यकटुद्रव्यादिभक्षणम्; संयोगविरुद्धं यथा एकत्र दधिकदलीभक्षणमित्यादि बोध्यम्। प्रद्युम्नागमनीयम्, सीतान्वेषणीयम्।

द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः—द्वन्द्वसमासनिष्पन्नां देवासुरादिशब्दानां छप्रत्ययो न स्यात् अपितु अण् एव, देवाश्च असुराश्च देवासुरम्। "येषां च विरोधः शाश्वतिकः" ( २।४।६ ) इति समाहारः। [विरोधाप्राधान्ये विरोधस्य कादाचित्कमनुसृत्य तु इतरेतर योग इव ( देवासुराः इति )]; तदधिकृत्य विरचितं पुस्तकं दैवासुरम्। एवं राक्षो-सुरम्, रक्षश्च असुरश्च रक्षोऽसुरौ, तौ अधिकृत्य रचितम् पुस्तकम्, एवं गौणमुख्यम्, गौणं तथा मुख्यं विषयम् अधिकृत्य रचितं पुस्तकम् इत्यर्थः।

## १४३१। सोऽस्य निवासः ॥ ४।३।८९ ॥

## टो—। स्रुघ्नो निवासोऽस्य स्रौघ्नः।

Suffixes are frequently attached to words expressive of some country to imply a native of the said one.

मित—। निवसन्ति अस्मिन् इति निवासो देशः। स इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथायोग्यं प्रत्ययः स्यात्, यः प्रथमासमर्थः स चेत् निवासः। निवासिनि बोध्यमाने निवासवाचिभ्यः प्रत्ययो भवेदिति सरलार्थः। स्रुघ्नः अस्य निवासः इति अण् स्रौघ्नः। मथुरा अस्य निवासः इति माथुरः—अण्। राष्ट्रम् अस्य निवास इति राष्ट्रियः—घः।

१४३२। अभिजनश्च ॥ ७।३।८० ॥

टी—। स्रुघ्नोऽभिजनोऽस्यस्रौघ्नः। यत्रस्वयं वसति सनिवासः। यत्र पूर्व्वैरुषितं सोऽभिजन इति विवेकः।

Suffixes are added to words expressive of some particular places to denote the person who has been living there from a few generations upwards.

मित—। सोऽस्य अभिजनः इति अन्वयः। स इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात्, प्रथमासमर्थः स चेत् अभिजनश्च भवति। अभिजन इति गम्ये अभिजनस्थानवाचकात् प्रत्ययः स्यादिति सरलार्थः। यत्र स्वयं कश्चित् वासभूमिं परिकल्प्य प्रतिवसति स निवासः, एवं यत्र पूर्व्वपुरुषाः न्यवसन् स्वयं च निवसति स अभिजनः इति निवासाभिजनयोः पार्थक्यम्। कुलस्थानम् अभिजनम् इति भाषावृत्तिः। स्रुघ्नः अभिजनः अस्य इति स्रौघ्नः, एवं माथुरः, राष्ट्रियः, पुरुषानुक्रमेण तत्तत्स्थानवासी इत्यर्थः।

ननु पूर्व्वसूत्रात् कथं अस्य सूत्रस्य पृथक्करणमिति चेत्—उच्यते। परसूत्रेण अस्य अनुवृत्तिरस्तिइति ज्ञापयितुमेव।

१४३३। आयुधजीविभ्यश्छः पर्वते ॥ ४।३।८० ॥

टी—। पर्वतवाचिनः प्रथमान्तात् अभिजनशब्दात् अस्य इत्यर्थे छः स्यात्। हृद्गोलः पर्वतोऽभिजनो येषां आयुधजीविनां ते हृद्गोलीयाः। आयुधेति किम्? ऋच्चोदः पर्वतोऽभिजनो येषां ते आर्च्चोदाः द्विजाः।

The suffix छ is affixed to words, expressive of hills to imply the permanent dwellers therein—provided they live by weapons.

मित—। सोऽस्य अभिजनः इति अनेनसह सूत्रस्य अन्वयः। आयुधजीविभ्यः इति तादर्थ्ये चतुर्थी आयुधजीव्यर्थम् इत्यर्थः। यद्वा आयुधजीविनोऽभिधातुम् इति आयुधजीविभ्यः। "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" (२।३।१४) इति चतुर्थी। सोऽस्य अभिजनः इति एतस्मिन् विषये पर्व्वतवाचिनः प्रातिपदिकात् छप्रत्ययः स्यात्। अस्य इति यत् षष्ठीसमर्थः स चेत् आयुधजीवी एव (नान्यः कश्चित्)।

हृद्गोलः पर्व्वतः अभिजनः येषां आयुधजीविनां ते हृद्गोलीयाः एवं रोहितगिरिः लोहितगिरिर्वा अभिजनः यस्य आयुधजीविनः स रोहितगिरीयः, लोहितगिरीयो वा। इत्थं अन्धकवर्त्ती पर्व्वतः अभिजनः यस्य आयुधजीविनः सोऽन्धकवर्त्तीयः। अस्य प्रत्युदाहरणं—यथा ऋक्षोदः पर्व्वतः अभिजनः येषां ब्राह्मणानां ते आर्क्षोदाः द्विजाः। नहि द्विजाः आयुधजीविनः—अतो न छप्रत्ययः—अपितु अण् एव।

ननु "पर्व्वते" इति किम्? सांकाश्य इति नगरम् अभिजनं येषाम् आयुधजीविनां ते सांकाश्यकाः। अत्र सांकाश्य इति न पर्व्वतः अपि तु नगरमेव। तेन न छप्रत्ययः अपितु वुञ्।

## १४३४। शण्डिकादिभ्यो ञ्यः ॥४।३।९२॥

## टी—। शण्डिकोऽभिजनोऽस्य शाण्डिक्यः।

The suffix ञ्य (standing as a bar to अण् and the like) is attached to words, that fall within the category of शण्डिकादि in the aforesaid sense.

मित—। शण्डिकादि यथा—शण्डिक, सर्व्वसेन, सर्व्वकेश, शक, शट, रक, शङ्ख, बोध, एतेभ्यः ञ्यप्रत्ययः स्यात्—सोऽस्याभिजनः इति एतस्मिन् अर्थे, अण्प्रभृतीनाम् अपवादः। शण्डिकः अभिजनोऽस्य इति शाण्डिक्यः, सर्व्वसेनोऽभिजनोऽस्य इति सार्व्वसेन्यः। शकोऽभिजनोऽस्य इति शाक्यः, शाक्यो बुद्धदेवः। भाष्यवृत्तिकृत् "चाणक्य" इत्यपि उदाहरति तथा सति चणकशब्दोऽपि शण्डिकादिषु स्यात्—चणकोऽभिजनः अस्य इति चाणक्यः। चाणक्यः कौटिल्यो विष्णुगुप्तः।

## १४३५। सिन्धुतक्षशिलादिभ्योऽणञौ ॥ ४।३।९३ ॥

दी—। सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यात् उक्ते अर्थे। सैन्धवः। तक्षशिला नगरी अभिजनोऽस्य ताक्षशिलः।

The suffix अण् is attached to words falling within the category of सिन्ध्वादि whereas अञ् to words of the तक्षशिलादि class.

मित—। सिन्ध्वादि यथा—सिन्धु, वर्णु, मधुमत्, कम्बोज, साल्व, गन्धार, कश्मीर, किष्किन्ध्या, गन्दिका, (गव्दिका इति काशिका) उरसा, दरद् इति। एतेभ्यः सिन्धु प्रभृतिभ्यः अण् प्रत्ययः स्यात् सोऽस्य अभिजनः इति एतस्मिन् विषये। तक्षशिलादि यथा—तक्षशिला, वत्सोद्धरण, कैमेंदुर (कौमेदुर), ग्रामणी, छगल; क्रोष्टुकर्ण, सिंहकर्ण, संकुचित, किन्नर, काण्डधार, पर्व्वत, अवसान, वर्व्वर, कंस, काण्डवारण, सरालक, सिंहकोष्ट, कणकोष्ट, इति। एतेभ्यः तक्षशिलादिभ्यः अञ् प्रत्ययः स्यात् सोऽस्य अभिजनः इति एतस्मिन् विषये। सिन्धुः अभिजनोऽस्य इति अण् सैन्धवः, वर्णुः अभिजनोऽस्य इति वार्णवः। एवं गान्धारः इति। कश्मीरोऽभिजनः अस्य काश्मीरः, एवं साल्वः। तथाहि मुद्राराक्षसे—"काश्मीरः पुष्कराख्यः क्षत-रिपुमहिमा सैन्धवः सिन्धुसेनः"। तक्षशिला नगरी अभिजनोऽस्य ताक्षशिलाः। वत्सोद्धरणः अभिजनोऽस्य इति वात्सोद्धरणः।

ननु सिन्धु वर्णु इत्येवमादीनां कच्छादिषु पाठः। तर्हि "कच्छादिभ्यश्च" (४।२।१३३) इति अणि सिद्धे कथं अत्र पुनरपि अण् विधानमितिचेत्—नैवम्। "मनुष्यतत्स्थयोर्वुञ्" (४।२।१३४) इति मनुष्ये मनुष्यस्थे च जातादौ प्रत्ययार्थे कच्छादिभ्यो यो वुञ्प्रत्ययो विहितस्तमेव वुञ् प्रत्ययं वाधित्वा अस्मिन् सोऽस्याभिजनः इति विषये अण् प्रवर्त्तते इति ज्ञापयितुमत्रएषां पुनरुल्लेखः। पर्व्वतः अभिजनोऽस्य इति अञ् पार्व्वतः इति भाषावृत्तिकारः। इत्थं छगलोऽभिजनोऽस्य इति छागलः।

१४३६। तुदीशलातुरवर्म्मतीकुचवाराड् ढक् छण् ढञ् यकः॥ ४।३।९४॥

दी—। तुदी अभिजनोऽस्य तौदेयः। शालातुरीयः। वार्म्मतेयः। कौचवार्य्यः।

The suffixes ढक्, छण्, ढञ् and यक् are respectively attached to the words तुदी, शलातुर, वर्म्मती and कुचवार in the sense of "सोऽस्य अभिजनः", N.B.—शलातुर—a place in Eastern Afghanistan.

मित—। सोऽस्य अभिजनः इति एतस्मिन् विषये तुदी इत्यस्मात् ढक्, शलातुर इति अस्मात् छण्, वर्म्मतीशब्दात् ढञ् तथा कुचवारशब्दात् यक् प्रत्ययः स्यात्। तुदी अभिजनोऽस्य इति ढक तौदेयः। शलातुरः अभिजनोऽस्य इति छण्—शालातुरीयः। शालातुरीयः पाणिनिः इति काशिकाटीकायां न्यासग्रन्थे उक्तम्। वर्म्मती अभिजनोऽस्य इति ढञ् वार्म्मतेयः। कुचवारः अभिजनोऽस्य इति कौचवार्य्यः।

१४३७। भक्तिः ॥ ४।३।८५ ॥

दी—। सोऽस्य इति अनुवर्त्तते। भज्यते सेव्यते इति भक्तिः। स्रुघ्नोभक्तिरस्य स्रौघ्नः।

Suffixes are frequently attached to words expressive of something that are objects of respect to imply the person—who himself is the respectful ( i.e. whose, objects of respect are the said things ).

मित—। सोऽस्य अभिजन इति वाक्यात् सोऽस्य इत्येव अंशः अत्र अनुवर्त्तते। भज्यते सेव्यते यः सः भक्तिरिति कर्म्मणि क्तिन्। भक्तिः भजनीयद्रव्यं, भक्तिभाजनं इत्यर्थः। सोऽस्यभक्तिः ( भक्त्यास्पदं ) इति एतस्मिन् विषये प्रातिपदिकेभ्यो यथाविहितं प्रत्ययः स्यात्। स्रुघ्न इति नगरम्। तदेव भक्ति भक्तिभाजनं यस्य स स्रौघ्नः अण्। एवं माथुरः। राष्ट्रियः। इत्थं "वृद्धः भक्तिरस्य इति वौद्धः। शिवः भक्तिरस्य शैवः। चण्डी भक्तिरस्य इति चाण्डः"—इति भाषावृत्तिः।

१४३८। अचित्तादद्देशकालाट् ठक् ॥ ४।३।९६ ॥

टी—। अपूपा भक्तिरस्य आपूपिकः। पायसिकः। अचित्तात् किम्? दैवदत्तः। अदेशात् किम्? स्रौघ्नः। अकालात् किम्? ग्रैष्मः।

In the aforesaid sense, the suffix ठक् is added to all words expressive of inanimate objects—other than time and space.

मित—। अचित्तात् चित्तरहितात्। देशश्च कालश्च इति देशकालौ। अविद्यमानौ देशकालौ यत्र स अदेशकालः। तादृशात् अदेशकालात्, अचित्तात्—इति विशेष्यम्, अदेशकालात् इति अचित्तात् इत्यस्य विशेषणम्। देशकालाभ्याम् अन्यत्र वर्त्तमानात् चित्तरहितवस्तुवाचकात् प्रातिपदिकात् सोऽस्य भक्तिरिति एतस्मिन् विषये ठक् स्यात् देशात् तथा कालात् च अन्यत् यत् किञ्चित् अचेतनं वस्तु वाचयति यः प्रातिपदिकः, तस्मात् सोऽस्य भक्तिरिति एतस्मिन् अर्थे ठक् स्यात्। अण् प्रत्ययस्य अपवादः। इदं सूत्रं परत्वात् "वृद्धाच्छः" (४।२।११४) इति सूत्रं बाधते। अपूपाः पिष्टकाः। अपूपाः भक्तिरस्य इति आपूपिकः। पिष्टकभोजनप्रियः इत्यर्थः। मोदकाः भक्तिरस्य इति मौदकिकः। मोदक-प्रियः। पायसः भक्तिरस्य इति पायसिकः—पायसभोजनलुब्धः। अचित्तात् इति किम्? देवदत्तः भक्तिरस्य इति दैवदत्तः—अत्र अण् पूर्व्वसूत्रेण। अदेशादिति किम्? स्रुघ्नः भक्तिरस्य इति स्रौघ्नः—अत्रापि पूर्व्वसूत्रेणैव अण्। अकालादिति किम्? ग्रीष्मः भक्तिरस्य इति ग्रैष्मः। ग्रीष्मकालप्रियः। अत्रापि अण् पूर्व्वसूत्रेण।

१४३९। महाराजाट् ठक् (ञ्) ॥ ४।३।९७ ॥

टी—। माहाराजिकः।

The suffix ठक् ( ठञ् according to काशिका etc ) is added to the word महाराज in the self-same sense.

मित—। महान् चासौ राजा चेति महाराजः। "राजाहःसखिभ्यष्टच्" (५।४।९१) "आन्महतः—" इति द्रष्टव्यम्। महाराज इति एतस्मात् ठक् (ठञ्) प्रत्ययः स्यात् सोऽस्य भक्तिरिति एतस्मिन् विषये। अणोऽपवादः। महाराजः भक्तिरस्य इति माहाराजिकः। अत्र ठञ् इति काशिकाभाषावृत्तिकारौ। ठक् इति प्रत्ययम् अकृत्वा कथं ठञ् इतिचेत्? "प्रत्ययान्तरकरणं स्वरार्थम्" इति काशिका। अत्र ठञ्प्रत्यय एव साधुः इति मन्यामहे।

## १४४०। वासुदेवार्जुनाभ्यां वुन् ॥ ४।३।९८ ॥

## दी—। वासुदेवकः। अर्जुनकः।

The suffix वुन ( standing a bar to छ or अण ) is attached to वासुदेव and अर्जुन in the aforesaid sense.

मित—। वासुदेवः श्रीकृष्णः। वासयति इति वासुः। उप्रत्ययः। एवं दीव्यति इति देवः। दिव्धातोरच्। वासुश्चासौ देवश्चेति वासुदेवः। नारायणावतारः। तथाहि श्रीमहाभारते—"वासनाद्देवनाच्चासौ वासुदेवेति गीयते।" वासुदेवो भक्तिरस्य इति गम्ये तथा अर्ज्जुनो भक्तिरस्य इति गम्ये च वासुदेवशब्दात् अर्ज्जुनशब्दात् च वुन् प्रत्ययः स्यात्। अर्ज्जुनोऽत्र नरस्य अवतारः। वासुदेवकः—वासुदेवभक्तः। अर्ज्जुनकः—अर्ज्जुनभक्तः। वुन् इति छप्रत्ययस्य तथा अणप्रत्ययस्याचापवादः।

ननु परसूत्रेण "गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्" इत्यनेन वासुदेवशब्दात् क्षत्रियाख्या-विशिष्टादेव वुञ स्यात्; वुञ् वुनोन कश्चित् विशेषोऽस्ति—तेन परसूत्रविहितेन वुञा एव इष्टसिद्धौ कथमत्र वासुदेवग्रहणमिति चेत्—कथ्यते। नहि अत्र वासुदेव इति क्षत्रियस्य आख्या। नैव स वसुदेवस्य अपत्यं पुमान्—अपिच साक्षात् ईश्वरः विवक्षितः। तथा च भाष्यम्—"संज्ञैषा तत्रभवतः"। तथाहि "वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः" इति श्रीगीतायाम्। तथा च मनोरमा—"सर्व्ववासौ समन्तं च वसत्यत्रेति वै यतः। ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते" तथा च नेयं गोत्राख्या नाप्यत्र क्षत्रियाख्या अतोयुक्त एव वुन्विधिः"। वासुदेवः नारायणः। एवं अर्ज्जुनोऽपि नरः। तौ नर-नारायणौ। "अल्पाच्तरम्" (२।२।३४) इति

अर्जुन शब्दस्य पूर्व्वनिपाते प्राप्तेपि, वासुदेवस्य पूर्व्वनिपातं कुर्व्वन् महर्षिः पाणिनि ज्ञापयत्यपि—यत् "अभ्यर्हितं प्राक् पतति।"

१४४१। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्॥ ४।३।९९॥

टी—। अणोऽपवादः। परत्वात् वृद्धाच्छं वाधते। ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः। नाकुलकः। बहुलग्रहणान्नेह। पाणिनो भक्तिरस्य पाणिनीयः।

The suffix वुञ is sometimes ( बहुलं ) attached to words, expressive of a particular gotra (गोत्र) or of a famous kshattriya in the aforesaid sense.

मित—। गोत्राख्येभ्यस्तथा क्षत्रियाख्येभ्यश्च शब्देभ्यः बहुलं वुञ् प्रत्ययः स्यात्। सोऽस्यभक्तिरिति एतस्मिन् अर्थे। अणोऽपवादः। "वृद्धाच्छः" ( ४।२।११४ ) इति छप्रत्ययं परत्वात् अयं वाधते। गोत्राख्येभ्यः ग्लुचुकायनिः भक्तिरस्य इति वुञ् ग्लौचुकायनकः। एवं औपगवः भक्तिरस्य औपगवकः। कापटवः भक्तिरस्य इति कापटवकः। क्षत्रियाख्येभ्यः—नकुलः भक्तिरस्य इति नाकुलकः, एवं साहदेवकः, साम्बकः। साम्बः श्रीकृष्णसुतः।

क्षत्रियेभ्यः इति नोक्ता क्षत्रियाख्येभ्यः इति यदुक्तं—तेन ज्ञापितं यत् प्रसिद्ध-क्षत्रियेभ्य एव अयं विधिः—न खलु यथाकथञ्चित् क्षत्रियवाचिभ्यः। बहुलग्रहणात् क्वचिदपि न स्यात्, यथा गोत्राख्यात्—पाणिनिः भक्तिरस्य इति पाणिनीयः—अत्र छः एव। क्षत्रियाख्यात्—पौरवो भक्तिरस्य इति पौरवीयः। एवं सौरमणीयः।

१४४२। जनपदिनां जनपदवत् सर्व्वं जनपदेन समानशब्दानां बहुवचने॥ ४।३।१००॥

टी—। जनपदस्वामिवाचिनां बहुवचने जनपदवाचिनां समानश्रुतीनां जनपदवत् सर्व्वं स्यात् प्रत्ययः प्रकृतिश्च। "जनपद-तवदध्योश्च"ति प्रकरणे ये प्रत्ययाः उक्तास्ते ऽत्रादिश्यन्ते। अङ्गा

जनपदोभक्तिरस्य आङ्गकाः। अङ्गाः क्षत्रियाः भक्तिरस्य आङ्गकः। जनपदिनां किम्? पञ्चालाः ब्राह्मणाः भक्तिरस्य पाञ्चालाः। जनपदेन इति किम्? पौरवो राजा भक्तिरस्य पौरवीयः।

Words expressive of some rulers of lands—and denoting at the same time, the lands themselves in the plural number. take such suffixes after them—as are sanctioned with reference to lands themselves ( by the rule "जनपद-तदवध्योश्च" —(४।२।१२४) ; the bases of these words also assume the same forms as are taken by the lands themselves. (i.e land denoting words).

मित— । जनपदिनः जनपदस्वामिनः क्षत्रियाः। जनपदिनां जनपदस्वामिक्षत्रियवाचिनां प्रातिपदिकानां वहुवचने समानशब्दानां वहुवचने ये शब्दाः जनपदवाचिनस्तथा जनपदस्वामिक्षत्रियवाचिनश्च भवन्ति तेषाम्, कथं भवति? वङ्गाः क्षत्रियाः। वङ्गानां निवासो जनपदः इति "तस्य निवासः" ( ४।२।६८ ) इति अण्। ततः "जनपदे लुप्" इति ( १।२।५१ ) सूत्रेण प्रकृतिवत् लिङ्गवचने—तेन वङ्गाः इति। वङ्गाः जनपदः। अतो दृश्यते यत् जनपदवाचिनस्तथा जनपदस्वामिवाचिनश्च प्रातिपदिकाः वहुवचने समानरूपाः भवन्ति। ईदृशानां वहुवचने जनपदेन समं समानरूपाणां जनपदस्वामिक्षत्रियवाचिनां शब्दानां जनपदवत् सर्वं स्यात् जनपदवत् तेषां प्रत्ययाः स्युः—"जनपदतदवध्योश्च" इति ( ४।२।१२४ ) तथा "अवृद्धादपि वहुवचनविषयात्" ( ४।२।१२५ ) इति सूत्रद्वयेन ये प्रत्ययाः जनपदवाचिभ्यः विहिताः—तेऽपि तेभ्यः ( जनपदसमानरूपजनपदिवाचिभ्यः ) विधीयन्ते। अपिच जनपदवाचिनां शब्दानां यादृशी प्रकृतिः स्यात्—एतेषामपि तादृशी स्यात् सोऽस्यभक्तिरिति एतस्मिन्नेव विषये। वङ्गाः जनपदः। वङ्गाः क्षत्रियाः। एवं अङ्गाः क्षत्रियाः। तेषां निवासः इति अण् जनपदे लुप् इति प्रत्ययस्य लुप्, लुपि युक्तवद् इति वहुवचनं—तेन अङ्गाः जनपदः। अङ्गाजनपदः भक्तिरस्य इति "अवृद्धादपि वहुवचनविषयात्" इति वञ

तेन आङ्गक:। एवं अङ्गा: क्षत्रिया: भक्तिरस्य इति पूर्व्ववत् आङ्गक:। एवं वाङ्गक:। सुह्मा: क्षत्रिया: जनपदो वा भक्तिरस्य इति सौह्मक:। एवं पौण्ड्रक:। जनपदिनाम् इति किम्? पञ्चाला: ब्राह्मणा: भक्तिरस्य पञ्चाला:। पञ्चाला: पञ्चालदेशीया:। नहि पञ्चालदेशीया: विप्रा: देशस्वामिन:। तस्मात् नात्र वुञ्—अपितु "भक्ति:" (४।३।९५) इत्यनेन अण् एव। जनपदेन इति किम्? पौरवो राजा भक्तिरस्य पौरवीय:। नहि पौरवशब्द: जनपदवाची अपितु पुरुवंशोद्भव क्षत्रियवाची। तस्मात् नात्र वुञ् अपितु "वृद्धाच्छ:" (४।२।११४) इति छ एव।

ननु जनपदसमानरूपाणां जनपदिवाचिनां प्रकृतिरपि जनपदवाचिवत् स्यादिति यत् उक्तं तस्य किं फलम्? उच्यते। मद्रा: क्षत्रिया:। मद्राणां क्षत्रियाणां निवास: इति मद्रा: जनपद:। मद्राणां अपत्यं पुमान् इति अण् माद्र; "द्व्यञ्मगधकलिङ्ग-सूरमसादण्" (४।१।१७०) इति सूत्रे जनपदशब्दात् क्षत्रियाभिधायिन: द्विस्वर-विशिष्टात् प्रातिपदिकात् अण् विहित: तेनैव अण्—माद्र:। एवं वृजय: क्षत्रिया: जनपदश्च। तेषां अपत्यं पुमान् इति वार्ज्य:। "वृद्धेत् कोशलाजादाञ् ञ्यङ्" (४।१।१७१) इति सूत्रेण ञ्यङ्। माद्र: भक्तिरस्यइति कन् "मद्रवृज्यो:कन्" इति। तेन मद्रक: एवं वार्ज्य: भक्तिरस्य इति एतेनैव कन्—तेन वृजिक:। माद्र इत्यस्य तथा वार्ज्य इत्यस्य च प्रकृति: जनपदवाचिमद्रवत् तथा जनपदवाचिवृजिवत् च स्यात् तत: कन् इति सर्व्वमवदातम्।

## १४४३। तेन प्रोक्तम् ॥ ४।३।१०१ ॥

## दी—। पाणिनिना प्रोक्तं पाणिनीयम्।

Suffixes are added to words to denote somthing (some treatise), spoken (written or elucidated) by the person expressed by the said words.

मित—। तेन इति। तृतीयासमर्थात् प्रोक्तमिति एतस्मिन् अर्थे यथायोग्यं प्रत्यया: स्यु:। प्रोक्तम्—प्रकर्षेण उक्तम्, भाषितं—व्याख्यातम वा। पाणिनिना प्रोक्तम् पाणिनीयम्। पाणिनिना विकृतं व्याकरणम्। (अन्येन कृता) मधुरेण

प्रोक्ता वृत्तिः माथुरीवृत्तिः। सुप्रसिद्धेन वङ्गकुलतिलकेन प्रोक्ता या गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणौ वृत्तिः सा माथुरी वृत्तिः। एवम् आपिशलम्; काशकृत्स्नम्।

ननु "कृते ग्रन्थे" (४।३।११६) इति स्थिते किमनेन सूत्रेण इति चेत्, मैवम्। अन्येन कृते द्वितीयेन केनापि प्रोक्ते ग्रन्थे गम्यमाने अयं विधिः, तेन हिरण्यगर्भेण रचितं किन्तु पतञ्जलिना प्रोक्तम् पातञ्जलं दर्शनम्।

## १४४४। तित्तिरिवरतन्तुखण्डिकोखाच्छण्॥४।३।१०२॥

**दी—। छन्दोब्राह्मणानीति तद्विषयता। तित्तिरिणा प्रोक्तम् अधीयते तैत्तिरीयाः।**

The suffix छण् is added to तित्तिरि, वरतन्तु, खन्डिक and उख in the aforesaid sense.

मित—। तित्तिरि वरतन्तु खण्डिक, उख इति एतेभ्यः छण्प्रत्ययः स्यात् तेन प्रोक्तम् इति एतस्मिन् विषये; यत् प्रोक्तं तेन तु छन्दसा ब्राह्मणेन वा भाव्यम्। छन्दः-संहिता। ब्राह्मणम् वेदानां संहिता-व्याख्या संवलिते गद्यभागः। तित्तिरिणा प्रोक्तम् छन्दः तैत्तिरीयम् तैत्तिरीयसंहिता। तित्तिरिणा प्रोक्तं ब्राह्मणम् (आरण्यकम्, उपनिषत् च) इति तैत्तिरीयम्। तैत्तिरीयम् आरण्यकम्। तैत्तिरीयोपनिषत्। तद् अधीयते इति अण् "तदधीते तद्वेद"(४।२।५९) इति सूत्रेण तैत्तिरीयाः। एवं वरतन्तुना प्रोक्तम् वारतन्तवीयम्। तदधीते वारतन्तवीयः। खण्डिकेन प्रोक्तं खाण्डिकीयम्। तदधीते खाण्डिकीयः। उखेन प्रोक्तम् औखीयम्। तदधीते औखीयम्। छन्दो ब्राह्मणानीति किम्? तित्तिरिणा प्रोक्तः श्लोकः। अत्र प्रत्ययो न स्यात् श्लोकस्य छन्दोब्राह्मणेभ्यो भिन्नत्वात्।

## १४४५। काश्यपकौशिकाभ्याम् ऋषिभ्याम् णिनिः॥४।३।१०३॥

**दी—। काश्यपेन प्रोक्तम् अधीयते काश्यपिनः।**

In the aforesaid sense, the suffix णिनिः is attached to काश्यप and कौशिक both standing for the name of a particular ऋषिः,

कौशिकः—a ऋषि ( seer ), sprung in the line of कुशिक in which विश्वामित्र was born ; काश्यप is also another name for कणाद the compiler of वैशेषिक दर्शनम् ( vide—my Evolution on Gita),

मित—। तेन प्रोक्तमिति एतस्मिन्नेव विषये ऋषिवाचिभ्याम् एव काश्यप कौशिक इति एताभ्याम् णिनिः प्रत्ययः स्यात्। णकारः इत्। इन् तिष्ठति। अन्तिमः इकारश्चापि इत्। छस्य अपवादः। छन्दसि एव प्रत्ययः इष्टः। तेन काश्यपेन गोत्र प्रवर्त्तकेण ऋषिणा प्रोक्तः कल्पः ( वेदाङ्गविशेषः ) इति काश्यपिन्। तदधीयते इति काश्यपिनः। कौशिकेन प्रोक्तः कल्प इति कौशिकिन्। तदधीयते इति कौशिकिनः। ऋषिभ्याम् इति किम्? इदानीन्तनेन काश्यपगोत्रजातेन ( अतएव काश्यप इति संज्ञाभाजा ) प्रोक्तम् काश्यपीयम्।

## १४४६। कलापिवैशम्पायनान्तेवासिभ्यश्च ॥ ४।३।१०४॥

## टी—। कलापन्तेवासिभ्यः—हरिद्रुणा प्रोक्तम् अधीयते इति हारिद्रविणः। वैशम्पायनान्तेवासिभ्यः, आलम्बिनः।

The self same suffix is attached in the aforesaid sense to those words that stand for the names of the pupils of Kalapi and Vaisampayana.

मित—। कलापिन् इति ऋषिः। वैशम्पायन इति महर्षि-कृष्ण-द्वैपायनस्य शिष्यः ऋषिविशेषः। अन्तेवासिन्—शिष्यः। कलापिनः चत्वारः अन्तेवासिनः आसन्—यथा हरिद्रु, तुम्बुरु, उलप, छगलिन्—इति। वैशम्पायनस्य च नव अन्तेवासिनः आसन्—यथा—आलम्बि, कमल, पलङ्ग, ऋचाभ, आरुणि, ताण्ड्य, श्यामायनः कठ, कलापिन् इति। अतोदृश्यते कलापी अपि वैशम्पायनस्य शिष्यः। तथाहि ये ये खलु शब्दाः वैशम्पायनस्य नवानां शिष्यानां वाचकाः, यः कलापी इति शिष्यः, तस्यापि चतुर्णाम् शिष्याणां वाचकाः ये शब्दाः तेभ्यः णिनिप्रत्ययः स्यात् तेन प्रोक्तम् इति एतस्मिन् विषये। अणोऽपवादः। छप्रत्ययं परत्वात् बाधते। कलापिनः अन्तेवासी हरिद्रुः। तेन प्रोक्तम् इति हारिद्रविन् तदधीयते इति.

हारिद्रविण: एवं तौम्बुरविण:। औलपिन:। छगलिन: ढिनुक्प्रत्ययस्तु परस्तात् वक्तव्य:। वैशम्पायनस्य अन्तेवासी आलम्बि। तेन प्रोक्तम् आलम्बिन्—तदधीयते आलम्बिन:, एवं कामलिन:, पालङ्गिन:, अर्च्चाभिन:, आरुणिन:, ताण्ड्नि:, श्यामायनिन:। कठशब्दात् प्रत्ययस्य लुक् इति पश्चात् वाच्यम्। कलापिशब्दाच्च अण् इति अग्र वक्ष्यति।

१४४७। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु॥ ४।३।१०५॥

**दी—। तृतीयान्तात् प्रोक्तार्थे णिनि: स्यात्। यत् प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ता:—भल्लु भाल्लविन:। शाट्यायन—शाट्यायनिन:। कल्पे—पिङ्गेन प्रोक्त: पैङ्गी कल्प:। पुराणेति किम्? याज्ञवल्क्यानि ब्राह्मणानि। आश्मरथ: कल्प:। अणि आपत्यस्य इति यलोप:।**

In the sense of "तेनप्रोक्तम्", the suffix णिनि (इन्) is affixed to words provided the subject spoken (discussed or elucidated) be nothing but Brahmans and Kalpas discussed by ancient sages only.

मित—। पुराण: पुरातन:। पुराणेन चिरन्तेन प्राचीनेन मुनिना प्रोक्तं इति पुराणप्रोक्तं, तेषु, पुराणै महर्षिभि: प्रोक्तेषु इति भाषावृत्तिकार:। महर्षीणां प्राचीनत्वम् तथा अर्व्वाचीनत्वम् इति विभाग: ऋग्वेदे अपि दृश्यते—यथा "अग्निरीड्य: पुराणै: ऋषिभिरुत नूतनैरुत"—इति आग्नेयपर्व्वणि। ब्राह्मणाश्च कल्पाश्च इति ब्राह्मणकल्पा: तेषु। पुराणै: महर्षिभि: प्रोक्तेषु ब्राह्मणेषु तथा ईदृशेषु एव च कल्पेषु गम्यमानेषु पुराणऋषिवाचिभ्य: तृतीयासमर्थेभ्य: प्रातिपदिकेभ्य: णिनि: प्रत्यय: स्यात्। पुराणप्रोक्तब्राह्मणेषु—यथा भल्लुरिति प्राचीनो महर्षि:, तेन प्रोक्तं ब्राह्मणम् इति भाल्लविन्। तदधीयते इति अण भाल्लविन:। शाट्यायन इति पुराण ऋषि:। तेन प्रोक्तं ब्राह्मणं शाट्यायनिन्। शाट्यायनिन:। एवं इतराया: अपत्यं पुमान्

ऐतरेयः। तेन प्रोक्तं ब्राह्मणं ऐतरेयिन् तदधीयते इति अण् ऐतरेयिणः। पुराणप्रोक्तेषु कल्पेषु पिङ्ग इति प्राचीनो महर्षिः। तेन प्रोक्तम् इति पैङ्गी। पैङ्गीकल्पः। एवं अरुणपराजेन प्रोक्तः कल्पः अरुणपराजी। पुराणप्रोक्तेषु इति किम्? याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्कानि—अत्र अण् एव। "याज्ञवल्क्यादयोऽचिरकाला इत्याख्यानेषु वार्त्ते"ति काशिका।

ननु अत्र अण् कथम्? अस्य कण्वादिषु पाठात् "कण्वादिभ्यो गोत्रे" (४।२।१११) इति वचनेन। आश्मरथ्येन प्रोक्तः कल्पः इति आश्मरथः कल्पः। अत्रापि अण्। अपि च "आपत्यस्य च तद्धितेऽनाति" (६।४।१५०) इति यकारस्य लोपः।

## १४४८। शौनकादिभ्यश्छन्दसि ॥ ४।३।१०६ ॥

वृ—। छन्दसि अभिधेये एभ्यो णिनिः। शौनकेन प्रोक्तमधीयते शौनकिनः।

In the sense of "तेनप्रोक्तम्" the suffix णिनि is affixed to words coming within the category of शौनकादि provided the subject discussed is relative to the vedas only.

मित—। शौनकादिर्यथा—शौनक, वाजसनेय, शार्ङ्गरव, शापेय, शाष्पेय, खाण्डायन, स्कन्ध, स्कन्द, स्कम्भ, रज्जुकण्ठ, रज्जुभार, देवदर्शन, कठशाठ, कषाय, अश्वपेय (अश्वपेज), पुरुषांसक (पुरुषांसक); तल, दण्ड, तवलकार, देवदत्तशठ।

शौनकादिभ्यः इति—शौनक इत्येवमादिभ्यः णिनिः प्रत्ययो भवति तेन प्रोक्तम् इति एतस्मिन् विषये छन्दसि अभिधेये।

शौनकेन प्रोक्तम् शौनकिन्। तदधीयते इति शौनकिनः। वाजसनेयेन प्रोक्तम् वाजसनेयिन तदधीयते इति वाजसनेयिनः। छन्दसि इति किम्? शौनकीया शिक्षा। अत्र वृद्धाच्छः (४।२।११४) इति छ एव। कठशाठाभ्याम् प्रोक्तम् अधीयते इति काठशाठिनः।

१४४८। कठचरकाल्लुक् ॥ ४।३।१०७ ॥

टी—। आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात्। कठेन प्रोक्तम् अधीयते कठाः। चरकाः।

A suffix, attached to the word कठ as well as to चरक elide provided the self same suffix is sanctioned in the sense of "तेन प्रोक्तम्"।

मित—। वैशम्पायनस्य अन्तेवासी कठः। अतस्तस्मात् णिनिः स्यात् तेन प्रोक्तम् इति एतस्मिन् विषये; एवम् चरकशब्दादपि पूर्वोक्ते एव विषये अण् स्यात्। कठात् ईदृशस्य णिनिप्रत्ययस्य तथा चरकात् ईदृशस्य अण् प्रत्ययस्य लुक् स्यात्। कठेन प्रोक्तम् अधीयते इति कठाः। छन्दसि एव। अच्छन्दसि तु नप्रत्यय-लुप् तेन अच्छन्दसि विहितस्य अण्प्रत्ययस्य स्थितिरेव—यथा काठाः—इति काशिका-भाषावृत्तिमतम्। चरकेण प्रोक्तम् अधीयते इति चरकाः।

१४५०। कलापिनोऽण् ॥४।३।१०८॥

टी—। कलापिना प्रोक्तम् अधीयते कालापाः। "नान्तस्य टिलोपे सब्रह्मचारि-पीठ सर्पि-कलापि कौथमि तैतिलि जाजलि लाङ्गलि शिलालि शिखण्डि सूकर सद्म सुपर्वणामुपसंख्यानम्" (वा)—इत्युपसंख्यानाट्टिलोपः।

The suffix अण् is attached to कलापिन्—a pupil of वैशम्पायन; thus this suffix stands as a bar to णिनिः। The टि of the words elides by the varttika herein quoted above.

मित—। कलापिन् इति वैशम्पायनस्य अन्तेवासी। तस्मात् ततः णिनि-प्रत्ययस्य प्रसक्तौ अनेन णिनिप्रत्ययं बाधित्वा अण् प्रवर्तते। कलापिन् इत्यस्मात् अण् स्यात् इत्यर्थः। अणि परे च "इनण्यनपत्ये" (६।४।१६४) इति प्रकृतिभावे एव प्राप्ते टिलोपो न स्यात्। "सब्रह्मचारीत्या"दि वार्त्तिकेन टिलोपः पुनः विधीयते

कलापिना प्रोक्तम् अधीयते इति कालापाः। छन्दोवासा विषयः इति भाषावृत्तिकृतामाशयः।

१४५१। छगलिनो ढिनुक ॥४।३।१०८॥

टी—। छगलिना प्रोक्तम् अधीयते छागलेयिनः।

The suffix ढिनुक् is attached to the word छगली।

मित—। छगली इति कलापिनः शिष्यस्तस्मात् ततो णिनिप्रत्यये प्राप्ते आह—पूर्वोक्ते एव विषये छगलिशब्दात् ढिनुक् प्रत्ययः स्यात्। उकारस्तथा ककारश्च इतौ। ढिन् इति तिष्ठति। ढस्य एयादेशः। छगलिना प्रोक्तम् अधीयते इति छागलेयिनः। आदौ "नस्तद्धिते" (६।४।१४४) इति टिलोपस्ततः "एयिन्" इति युक्तं स्यात् तेन छागलेयिन् इतिरूपम्; बहुवचने छागलेयिनः।

१४५२। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः

॥ ४।३।११० ॥

टी—। पाराशर्येण प्रोक्तं भिक्षुसूत्रम् अधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः।

The suffix णिनि (and not ढिनुक्) is attached to the words पाराशर्य and शिलालि in the aforesaid sense provided that the subject matter under study or discussion is nothing but भिक्षुसूत्रम् with reference to the former and नटसूत्रम् with respect to the latter; भिक्षुसूत्र = aphorisms dealing with the duties of a भिक्षु (one under the fourth stage of aryan life); and नटसूत्र is aphorisms dealing with the duties of an actor.

मित—। भिक्षुसूत्रम् चतुर्थाश्रमिणः कर्त्तव्यतोपदेशाय ग्रथितम् सूत्रजालम्। नटसूत्रम् नाट्याजीविनाम् (अभिनेतॄणाम्) अनुशासनार्थं रचितम् सूत्रजालम्। भिक्षुसूत्रे प्रोक्तविषये सति पाराशर्यशब्दात् तथा नटसूत्रे प्रोक्तविषये सति शिलालिशब्दात्

णिनिप्रत्ययः स्यात्। पाराशर्यः व्यासदेवः। तेन प्रोक्तं भिक्षुसूत्रम् अधीयते इति पाराशरिणः भिक्षवः। णिनिप्रत्यये परे "आपत्यस्य च तद्धितेऽनाति" (६।१।१५१) इति यकारलोपः। एवं शिलालिप्रोक्तम् नटसूत्रम् अधीयते इति शैलालिनः नटाः। भिक्षुनटसूत्रयोरिति किम्? पाराशरीयाः श्लोकाः। पाराशरं वचनम्। शैलालम्। न कुत्रापि णिनिः अपितु पाराशर्यशब्दात् छः। शिलालिशब्दात् अण् च।

## १४५३। कर्मन्दकृशाश्वादिनिः ॥४।३।१११॥

## दी—। भिक्षुनटसूत्रयोरित्येव। कर्मन्देन प्रोक्तम् अधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः।

The suffix इनि (standing as a bar to अण्) is attached to the words कर्मन्द and कृशाश्व in the aforesaid senses.

मित—। भिक्षुसूत्रे प्रोक्तविषये सति कर्मन्दशब्दात्, तथा नटसूत्रे प्रोक्तविषये सति कृशाश्वशब्दात् इनि प्रत्ययः स्यात् अणोऽपवादः। कथं णिनिप्रत्ययः न कृत इति चेत् उच्यते—आदिस्वरवृद्धिनिषेधाय। कर्मन्देन प्रोक्तं भिक्षुसूत्रम् अधीयते इति कर्मन्दिनो भिक्षवः। कृशाश्वेन प्रोक्तं नटसूत्रम् अधीयते इति कृशाश्विनो नटाः। भिक्षुनटसूत्रयोरिति किम्? कार्मन्दम्—कर्मन्देन प्रोक्तं अन्यत् किञ्चित्। अत्र अण्। एवं कार्शाश्वम्। कृशाश्वेन प्रोक्तम् अन्यत् किञ्चित् इति अण्।

## १४५४। तेनैकदिक् ॥ ४।३।११२ ॥

## दी—। सुदाम्ना अद्रिणा एकदिक् सौदामनी।

Suffixes are attached to words to imply एकदिक् i.e common direction.

मित—। तेन इति तृतीयासमर्थात् एकदिक् इति एतस्मिन् विषये यथायोग्यं प्रत्ययाः स्युः। एकदिक्—समानदिक् तुल्यदिक् इत्यर्थः। सुदाम्ना इति अद्रिणा (पर्वतेन) एकदिक् (समानदिक्) या सा सौदामनी विद्युत्। हिमवता (हिमालयेन) एकदिक् या सा हैमवती विद्युत्। सूर्येण सह एकदिक् इति

सौरी बलाका। "सूर्य" इत्यस्य यलोपः। अस्मिन् सूत्रे छन्दसि (छन्दोविषयत्वं) नास्ति।

१४५५। तसिश्च ॥ ४।३।११३ ॥

दी—। स्वरादिपाठादव्ययत्वम्। पीलुमूलेन एकदिक् पीलुमूलतः।

The suffix तसि may also be added to words in the selfsame sense.

मित—। तेनैकदिक् इति एतस्मिन्नेव विषये तसिः अपि स्यात्। विशिष्य तसिप्रत्ययस्य उल्लेखः कथम्? उच्यते। "स्वरादिनिपातमव्ययम्" (१।१।३७) इति तसि—प्रत्ययान्तानां स्वरादिषु पाठात् तेषाम् अप्यव्ययत्वं स्यात् इति ज्ञापयितुम्। पीलुमूलेन एकदिक विद्युत् पीलुमूलतः। एवं सुदामतः। सूर्यतः। हिमवतः इत्यादि।

१४५६। उरसो यच्च ॥ ४।३।११४ ॥

दी—। चात्तसिः। अणोऽपवादः। उरसा एकदिक् उरस्यः। उरस्तः।

The suffix यत् (a bar to अण्) as well as तसि is added to the word उरस् in the self same sense.

मित—। पूर्वोक्ते एव विषये उरस् इत्यस्मात् यत्प्रत्ययः स्यात्। तथा तसिप्रत्ययश्च भवेत्। उरसा एकदिक् उरस्यः। उरस्यः हारः। तसिः यथा—उरसा एकदिक् उरस्तः।

१४५७। उपज्ञाते ॥ ४।३।११५ ॥

दी—। तेन इत्येव। पाणिनिना उपज्ञातम् पाणिनीयम्।

To imply उपज्ञात, i.e, originated, suffixes are affixed to words expressive of some particular person with whom the subject ( under discussion ) first originated.

मित—। तेन इति अनुवृत्तम्। तेन इति तृतीयासमर्थात् "उपज्ञाते" उपज्ञातम् इति एतस्मिन् विषये यथायोग्यं प्रत्ययः स्यात्। "विनोपदेशेन ज्ञातम् उपज्ञातम् स्वयमभिसंबद्धम्" इति काशिका। पाणिनिना उपज्ञातम् "पाणिनीयम् व्याकरणमिति"। उपज्ञातं प्रथमं कृतम् इति भाषावृत्तिः। एवं कालापकं व्याकरणम्। सौरः संग्रहः। उक्तं च "पाणिनीयं काणादाचसर्वशास्त्रोपकारकम्।"

१४५८। कृते ग्रन्थे ।४।३।११६॥

टी—। वररुचिना कृतो वाररुचो ग्रन्थः।

Suffixes are added to words expressive of some particular person to denote the work composed by him.

मित—। तेन इति अनुवृत्तम्। तेन इति तृतीयासमर्थात् "कृते ग्रन्थे" यथाविहितं प्रत्ययाः स्युः। वररुचिः कात्यायनः। यद्वा वररुचिरिति श्रीविक्रमराजस्य सभासद्विशेषः। तेन रचितः ग्रन्थः वाररुचो ग्रन्थः। "वाररुचाः श्लोकाः" इति भाषावृत्तिः। ग्रन्थे इति किम्? तक्ष्णा कृतः प्रासादः। अत्र न प्रत्ययः।

ननु कृतम् उपज्ञातम् चानयोः कोभेद इति चेदुच्यते। कृतम् उत्पादितम् ( invented ); विद्यमानमेव ज्ञातम् उपज्ञातम् ( discovered )। शिक्षाकल्पौ व्याकरणमिति वेदाङ्गविशेषः। तदादौ स्थितम्। पश्चात् लुप्तप्रचारं तत् पाणिनिना ज्ञातं इति तेन उपज्ञातमिति कथ्यते। अनेन सह "तेन प्रोक्तम्" इति सूत्रस्य प्रभेदस्तत्रैव प्रदर्शितः।

१४५९। संज्ञायाम् ॥ ४।३।११७॥

टी—। तेन इत्येव। अग्रन्थार्थमिदम्। मक्षिकाभिः कृतं माक्षिकं मधु।

To denote some particular name ( i. e. a special proper term ), of something produced, suffixes are added to words that stand for the producer.

मित—। तेन इति अनुवृत्तम्। "अग्रन्थार्थेभिद"—ग्रन्थात् अन्यस्मिन् अर्थे दोषो इत्यर्थः। तेन इति तृतीयासमर्थात् कृतम् इति एतस्मिन् अर्थे यथायोग्यं प्रत्ययः स्यात्, यत् कृतं तच्चेत् स्यात् ग्रन्थादन्यस्य कस्यचित् संज्ञा। मक्षिकाभिः कृतं मधु इति माक्षिकं मधु। एवं कार्मुकं मधु। पौत्तिकं मधु। माक्षिकं सारसं कार्मुकं पौत्तिकम् इति एता मधुनः संज्ञाः।

## १४६० । कुलालादिभ्यो वुञ् ॥ ४।३।११८ ॥

**टी—। तेन कृते संज्ञायाम्। कुलालेन कृतं कौलालकम्। वारुड़कम्।**

The suffix वुञ् is attached to words falling within the category of कुलालादि in the sense of "तेन कृतम्" provided the word newly formed stands for a proper-name ( संज्ञा )।

मित—। कुलालादि यथा—कुलाल, वरुड़, चण्डाल, निषाद, कर्मार, सेना, सैरिध्र, इन्द्रिय ( इति भाषावृत्तिः ) सेन्द्रिय ( इति काशिका ), देवराज, परिषत्, वधू, रुरु, ध्रुव, रुद्र, मधु, ब्रह्मन्, कुम्भकार, श्वपाक।

अस्मिन् सूत्रे "तेन" इत्यस्य "कृते" इत्यस्य, तथा "संज्ञायाम्" इत्यस्य च अनुवृत्तिरस्ति। तेनायमेवार्थः—कुलाल इति एवमादिभ्यः प्रातिपदिकेभ्यः वुञ् प्रत्ययः स्यात् तेन कृतम् इति एतस्मिन् विषये, संज्ञायाम् गम्यमानायाम्। कुलालः कुम्भकारः। तेन कृतम् कौलालकम्। कौलालकं पात्रम् ; एवं वरुड़ेन कृतम् इति वारुड़कम्। इन्द्रियेण कृतम् इति ऐन्द्रियकं ज्ञानम्।

## १४६१ । क्षुद्राभ्रमर वटर-पादपादञ् ॥४।३।११९॥

**टी—। तेन कृते संज्ञायाम्। क्षुद्राभिः कृतं क्षौद्रम्। भ्रामरम्। वाटरम्। पादपम्।**

The suffix अञ् ( a bar to अण् ) is attached to the words क्षुद्रा, भ्रमर and पादप in the aforesaid sense.

मित—। क्षुद्रा मधुमक्षिका। वटरः—पक्षिविशेषः ( वटेर इति गौड़ीयाः )। पादपः वृक्षः। अस्मिन् सूत्रे पूर्ववत् "तेन" "कृतम्" "संज्ञायाम्" इति सर्व्वम् अनुवर्त्तते। अयमर्थः—क्षुद्रा, भ्रमर, वटर, पादप इति चतुर्भ्यः अञ् प्रत्ययः स्यात् "तेन कृतम्" इति एतस्मिन् विषये, संज्ञायाम् गम्यमानयाम् अणोऽपवादः। क्षुद्राभिः कृतं क्षौद्रं मधु। एवं भ्रमरैः कृतम् भ्रामरम्। वटरैः कृतं वाटरम्। पादपैः कृतं पादपम्।

## १४६२। तस्येदम् ॥४।३।१२०॥

## टी—। उपगोरिदम् औपगवम्।

Suffixes are attached to words in the sense of "तस्य इदम्" i.e. this belongs or pertains to him.

मित—। "तस्य" इति षष्ठीसमर्थात् "इदम्" इति एतस्मिन् विषये यथायोग्यं प्रत्ययाः स्युः। उपगुः इति कश्चित्। तस्य इदम् इति अण् औपगवम्। एवं कपट् इति कश्चित्। तस्य इदम् इति कापटवम्। राष्ट्रस्य इदम् इति राष्ट्रियम्। अवारपारस्य इदम् इति अवारपारीणम्। शास्त्रस्य इदम् इति शास्त्रीयं कार्य्यम्। "तस्य" इत्यस्य अधिकारः "तस्य विकारः" ( ४।३।१३४ ) इति यावत् वर्त्तते।

## १४६३। वहेस्तुरणिट् च ॥ (वार्त्तिक)।

## टी—। संवोढुः स्वम् सांवहित्रम्।

The root वह् ( or rather सम्+वह् ), with the suffix तृच् after it, turns into a सेट् धातु (disregarding its अनिट characteristic) in order to have the suffix अण् affixed to it in the sense of "तस्य इदम्।"

मित—। अत्र "संवहेस्तुरणिट् च" इति भाषावृत्तिकारः। अयमर्थः—"वहेः" वहधातोः ( सम् पूर्व्वकस्य वहधातोः इति भाषावृत्तिकृत् ), "तुः" तृच् प्रत्यया-

न्तात् "अण्" अण्प्रत्ययः स्यात् तस्य इदम् इति एतस्मिन् विषये। "इट्"—कृते च अणि अयं धातुः "इट्" इति लभते। अनिट् खलु वह्धातुः। तेन सम्पूर्वकात् अस्मात् तृच्प्रत्यये कृते संवोढ़ा (संवोढ़ृ) इति रूपं स्यात्। परं यदा ईदृशात् तृच्प्रत्ययान्तात् सम्पूर्वकवह्धातोः "तस्य इदम्" इति विषये अण् स्यात्, तदा अयं "इट्" इतीदं अपि गृह्णाति, सेट् भवति इत्यर्थः। तेन "सम्+वह्+इ+तृच्" इति संवहितृ। तस्य संवोढुः स्वं धनं इति अण् सांवाहित्रम् धनम्। अणि परे "संवोढ़" इति प्रकृतिः इट्प्रत्ययेन "संवहितृ" इति रूपं परिगृह्णातीति सरलार्थः।

## १४६४। अग्नीधः शरणे रण् भत्वं च॥ (वार्त्तिक)।

### दो—। अग्निम् इन्धे अग्नीत्; तस्य स्थानम् आग्नीध्रम्। तात्स्थ्यात् सोऽपि आग्नीध्रः।

The suffix रण् is added to the word अग्नीध् and before the suffix the stem (प्रकृति i.e the word itself) is to be treated as "भ" and not a पद।

मित—। अग्निं इन्धे इति क्विप्प्रत्ययः तेन अग्नीध् इति रूपम्। तस्मात् अग्नीध् इति प्रातिपदिकात् "शरणे" तस्य शरणं स्थानम् इति विषये, रण्प्रत्ययः स्यात् परे च प्रत्यये अग्नीध् इत्यस्य पदत्वं नास्ति, अपितु भत्वम्। आग्नीध्रम् अग्निस्थानं अग्न्याधानस्थानम् इति भावः। अग्नीध् इत्यस्य भत्वस्वीकारात् किं फलम्? उच्यते—अस्य भत्वात् पदकार्यं नास्ति तेन "झलां जशोऽन्ते" (८।२।३९) इति जश्त्वं न स्यात्। "तात्स्थ्यात्" इति—तस्मिन् तिष्ठति इति तत्स्थः अग्नीध्रस्थः। तस्य भावः तात्स्थ्यः। तस्मात् तात्स्थ्यात् आग्नीध्रस्थानत्वात् इत्यर्थः। आग्नीध्रस्थाने वर्त्तमानत्वात् अग्निरपि आग्नीध्र इति संज्ञां भजते इति भावः।

## १४६५। समिधामाधाने षेण्यण्॥ (वार्त्तिक)।

### दो—। सामिधेन्यो मन्त्रः। सामिधेनी ऋक्।

The suffix घिनुण is attached to the word समिध् to imply the मन्त्र or ऋक् used in the gathering or placing ( आधाने ) of समिध् ( full faggot or firewood ) itself.

मित—। समिधाम् इन्धनानाम् आधाने स्थापने गम्ये इत्यर्थः समिध् इत्यस्मात् घिनुण् इति प्रत्ययः स्यात् घकारस्तथा णकारश्च इतौ; "इन्य" इत्येव तिष्ठति। समिधाम् आधानम् इति समिध्+घिनुण्=समिध्+इन्य=सामिधेन्यः। णकारित्वात् आदिस्वरवृद्धिः—घकारित्वात् स्त्रियाम् ङीप्। सामिधेन्यः मन्त्रः येन मन्त्रेण समिधाम् आधानं स्यात् स मन्त्रः इत्यर्थः। स्त्रियाम्=सामिधेनी ऋक्। यया ऋचा समिधाम् आधानं स्यात् सा ऋक् इत्यर्थः। ईपि ( ङीप् इति ) परे सामिधेन्य इत्यस्य उपधाभूतयकारो लुप्यते—"हलस्तद्धितस्य" (६।४।१५०) इति सूत्रेण।

## १४६६। रथाद्यत्॥४।३।१२१॥

## टी—। रथ्यं चक्रम्।

The suffix यत् is attached to the word रथ and we have the word रथ्य in the sense of "तस्य इदम्"।

मित—। तस्य इदमितिएतस्मिन् विषये रथशब्दात् यत् प्रत्ययो भवेत्। रथस्य इदं रथ्यं चक्रं युगं वा। रथाङ्गे एव अभिधेये रथ्यमिति प्रयुज्यते नान्यत्र अनभिधानात्। रथोत्तरपदादपि स्यात्—यथा परमरथ्यम्, उत्तमरथ्यम्। अयं अण् प्रत्ययस्य अपवादः।

## १४६७। पत्रपूर्व्वादञ्॥ ४।३।१२२॥

## टी—। पत्रम् वाहनम्। अश्वरथस्य इदम् आश्वरथम्।

The अञ् ( stands as a bar to the said यत् ) is attached to the word रथ coming after any word that implies a drawer or conveyer ( वाहनम् ) in the aforesaid sense.

मित—। पतन्ति तेन इति पत्रम् वाहनम्। यदा गच्छति पत्रं वै तदस्मांस्तार-

थिष्यतीति प्रयोगदर्शनात्। तस्य इदम् इति एतस्मिन् विषये पत्रवाचिशब्दपूर्वकात् रथशब्दात् अञ प्रत्यय एव इष्यते, न खलु यत्। अश्वरथस्य इदम् आश्वरथं चक्रम्।

१४६८। पत्राध्वर्युपरिषदश्च ॥ ४।३।१२३ ॥

दी—। अञ्। पत्राद्वाह्ये (वा)। अश्वस्य इदं वहनीयम् आश्वम्। आध्वर्यवम्। पारिषदम्।

In the aforesaid sense, the suffix अञ् is attached to a word expressive of some drawer or conveyer ( वाहनम् ), especially to imply the thing to be borne, aswellas to the words अध्वर्यु and परिषत्।

मित—। पूर्वोक्ते एव विषये पत्रवाचिशब्दात् अञ स्यात्, "वाह्ये" वहनीयवस्तुनि एव गम्यमाने, तथा अध्वर्युशब्दात् परिषत् शब्दाच्च अञ स्यात्। अश्वस्य इदं वहनीयम् आश्वम्। आश्वम् शकटम्। एवं औष्ट्रो भारः। अध्वर्यु इति यागे यजुर्वेदोक्तकर्मनिष्पादको व्रतिविशेषः। तस्य इदम् आध्वर्यवम् शकटम्। आध्वर्यवम् कर्म। परिषदाम् इदम् इति पारिषदम्। पारिषदः समयः। पारिषदो हासः।

१४६९। हलसीराट्ठक् ॥ ४।३।१२४ ॥

दी—। हालिकम्। सैरिकम्।

The suffix ठक् ( a bar to अण् ) is taken by the words हल and सीर।

मित—। हल सीर इति शब्दाभ्याम् तस्य इदम् इति एतस्मिन् विषये ठक् स्यात्। हलस्य ( लाङ्गलस्य ) इदं इति हालिकम्। सीरस्य ( लाङ्गलस्य ) इदम् इति सैरिकम्। कृषकः इत्यर्थे हालिकः इत्यस्य प्रयोगः सर्वदर्शनसंग्रहग्रन्थेपि दृश्यते।

१४७०। द्वन्द्वाद्वुन् वैरमैथुनिकयोः ॥४।३।१२५॥

दो—। काकोलूकिका। कुत्सकुशिकिका।

The suffix वुन् is added to a pair of words, entering into a द्वन्द्व-समास in the aforesaid sense to imply enmity or marriage relation.

मित—। द्वन्द्वात् कृतद्वन्द्वसमासात् शब्दयुगलात्। मैथुनिका विवाहः। वैरं शत्रुता। तस्य इदम् इति एतस्मिन्नेव विषये कृत-द्वन्द्वसमासात् शब्दयुगलात् वुन्प्रत्ययः स्यात् शत्रुतायाम् मैथुनिकायाम् वा गम्यमानायाम्। वैरे—यथा काकश्च उलूकश्च इति काकोलूकम्। येषां च विरोधः शाश्वतिकः (४।२।९) इति समाहारः। तस्य इदं वैरम् इति वुन् काकोलूकिका। "वैरस्य नपुंसकत्वेऽपि (वैर इति शब्दस्य क्लीवलिङ्गत्वे अपि) असौ स्वभावतः स्त्रीलिङ्गः" इति काशिका। तेन वुन् इति प्रत्यय-करणात् अनन्तरमेव स्त्रियाम् आप् इकारागमश्च "प्रत्ययस्थात्कात् पूर्वस्यात इदाप्यसुपः" (७।३।४४) इति सूत्रेण। एवम् अश्वाश्च महिषाश्च इति पूर्ववत् समाहारे अश्वमहिषम्; तस्य इदं वैरम् इति वुन्—कृते च वुन्प्रत्यये यत् पदं जायते तस्य स्वाभाविकस्त्रीलिङ्गत्वात् स्त्रियाम् आप्। इकारागमश्च पूर्ववत् तेन अश्वमहिषिका इति रूपम्। मैथुनिकायाम्—"कुत्स" इति। कुत्स इति ऋषिः। तद्भावजाताः कुत्साः। एवं कुशिकः इति ऋषिः। तद्गोत्रीयाः कुशिकाः। कुत्सानां कुशिकानां च या मैथुनिका सा कुत्सकुशिकिका। आदौ कुत्सकुशिकाः इति द्वन्द्वसमासः। पश्चात् वुन्—ततः स्त्रीलिंगविधिस्तेन कुत्सकुशिकिका इतिरूपम्। स्त्रीलिंगत्वं तु मैथुनिका इत्यस्य विशेषणत्वात् एव इति ज्ञेयम्। एवं अत्रीणाम् भारद्वाजानां या मैथुनिका सा अत्रिभारद्वाजिका।

दो—। वैरे देवासुरादिभ्यः प्रतिषेधः (वा)। दैवासुरम्।

वैरे गम्यमाने देवासुरादीनाम् वुन्प्रत्ययः न स्यात्। देवाश्च असुराश्च इति देवासुराः। एषां विरोधस्य नैमित्तिकत्वमाश्रित्य न समाहारः। देवासुराणाम् इदम् वैरम् इति अण् तेन दैवासुरम्। एवं "आदि" पदेन राक्षोऽसुरं वैरम्।

ननु तर्हि कथं "देवासुरम् अभूद्युद्धम् पूर्णमब्दशतम् पुरा" इति श्रीश्रीचण्डी

न्यन्त्र्ये दृश्यते ? समाधत्ते—देवाश्च असुराश्च प्रहर्त्तारो यस्मिन् युद्धे तदिति वाच्ये 'अर्श आदिभ्योऽच्' (५।२।१२७) इति सूत्रविहितेन अच्प्रत्ययेन सिद्धम् इति पाणिनीयकुशला: श्रीमन्त: श्रीशचन्द्रचक्रवर्त्तिन: ।

१४७१ । गोत्रचरणाद् वुञ् ॥४।३।१२६ ॥

दो— । औपगवकम् । चरणाद्धर्म्माम्नाययोरितिवक्तव्यम् (वा) । काठकम् ।

The suffix वुञ् is attached to words expressive of गोत्र and चरण in the aforesaid sense ; but as regards चरण, the word, newly formed, must needs be a name for धर्म or आम्नाय ।

मित— । गोत्रम् इति अपत्यस्य ग्रहणम् । चरणमित्यस्य च । न खलु तयो: स्वरूपयो: । तेन अयमर्थ:—तस्य इदम् इति एतस्मिन् विषये गोत्रवाचिभ्य: प्रातिपदिकेभ्यस्तथा चरणवाचिभ्य: प्रातिपदिकेभ्य: वुञ्प्रत्यय: स्यात् ; परं चरणवाचिनां तु अयं विशेष: यत् धर्मे आम्नाये च गम्यमाने प्रत्यय: इष्यते । धर्म:—धर्मशास्त्रं स्मृतिशास्त्रं संहितादिरूपम् । आम्नाय:—वेद: । अणोऽपवाद: अयं प्रत्यय: । छप्रत्ययस्तु परत्वात् बाध्यते । गोत्रात्—उपगु: इति कश्चित् गोत्रप्रवर्त्तक: ऋषि: । तस्य इदं—औपगवम् । एवं ग्लुचुकायनि:—ग्लौचुकायनिकम् । वशिष्ठ: —वाशिष्ठम् । चरणात्—कठानाम् इदम् इति काठकम् । कठगोत्रप्रवर्त्तक: ऋषि: । काठकं वेदशाखाविशेष: । एवं कालापकम् । पैप्पलादकम् । मौदकम् ।

१४७२ । संघाङ्कलक्षणेष्वञ्यञिञामण् ॥ ४।३।१२७ ॥

दो— । घोषग्रहणमपि कर्त्तव्यम् (वा) । अञ् । वैद: संघोऽङ्को घोषो वा । वैदं लक्षणम् । यञ्—गार्ग:, गार्गम् । इञ्—दाक्ष:, दाक्षम् । परस्परासंबन्धोऽङ्क:, साक्षात्तु लक्षणम् ॥

In the sense of "तस्य इदम्" the suffix अण् is added to words formed with any of the suffixes अञ्, यञ् or इञ् to imply संघ (assembly), अङ्क (sign) or लक्षण (characteristic) or घोष: (renown).

मित—। संघ: संहति:। अङ्क: चिह्नम्। लक्षणम्—स्वभाव:। घोष:—ख्याति: शब्दो वा।

ननु अङ्कलक्षणयो: कोविशेष इति चेत् उच्यते। "परस्परासंबन्धोऽङ्क:"—अङ्केन सह अङ्कधारिण: आत्मीयत्वं नास्ति। यथा कश्चित् गवाधिकारी कस्मिंश्चित् गवि अङ्क: (चिह्नं); स च अङ्को गवि तिष्ठन्नपि, यथा गलकम्बलं तस्य गो: स्वं स्यात्, तादृशं खलु गो: "स्व" न भवति। अत: उच्यते—परस्परासंबन्धोऽङ्क:। साक्षात् लक्षणम्। लक्षणेन सह लक्षणिन: [लक्ष्यस्य] साक्षात् सम्बन्धोऽस्ति। अतएव लक्षणं खलु "लक्ष्यभूतस्यैव चिह्नभूतं स्वम् यथा विद्या विदानाम्" इति काशिका।

सूत्रार्थस्तु—संघ, अङ्क, लक्षण घोष इति एषाम् एकतरस्मिन् एव गम्यमाने अञ् प्रत्ययान्तात् यञ् प्रत्ययान्तात् च प्रातिपदिकात् अण् प्रत्यय: स्यात् तस्य इदम् इति एतस्मिन् विषये। पूर्वस्य वुञ् प्रत्ययस्य अपवाद:। अञ् प्रत्ययान्तात्—विदानाम् अयं संघ:, अङ्क: घोषो वा वैद: संघ:, अङ्क: घोष:। एवं विदानाम् इदं लक्षणं वैदं लक्षणम्। यञ् प्रत्ययान्तात् यथा—गर्गाणाम् अयं संघ: अङ्क: घोषो वा गार्गम्। गर्गानां लक्षणम् गार्गम्। इञ् प्रत्ययान्तात्— दाक्षीणाम् अयं संघ: अङ्क: घोषो वा दाक्ष:। दाक्षीणाम् लक्षणम्—दाक्षम्। अण् प्रत्ययान्तानाम् स्त्रियां तु ङीप् स्यात् "टिड्ढाण्—" [४।१।१५] इति सूत्रेण। वैदी विद्या तु विदानाम् लक्षणम्, अपिच अण् इति प्रत्ययस्य णित्वात् आदिस्वरवृद्धि:। वृद्धौ च सत्याम् आदिस्वरस्य, "वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" [६।३।३९] इति सूत्रेण वैदी विद्या अस्य इति बहुव्रीहौ वैदी इत्यस्य पुंवद्भावप्रतिषेधस्तेन वैदीविद्य: इति रूपम्।

## १४७३। शाकलाद्वा। ४।३।१२८॥

दी—। अण् दीर्घेऽर्थे। पक्षे चरणत्वाद् वुञ्। शकलेन प्रोक्तमधीयते शाकलाः। तेषां संघोऽङ्को घोषो वा शाकलः शाकलकः। लक्षणे क्लीवता।

In the self same sense, अण् is optionally added to the word शकल; and as शाकल is a name for चरण, वुञ् is also allowable by "गोत्रचरणाद्वुञ्" [ ४।३।१२६ ]।

मित—। संघअङ्क लक्षण घोष इति एषाम् यस्मिन् कस्मिंश्चिदपि अर्थे गम्यमाने शाकल इति चरणवाचिप्रातिपदिकात् अण्प्रत्ययः विकल्पेन स्यात "तस्य इदम्" इति एतस्मिन् विषये। अणोऽप्रातिपक्षे "गोत्रचरणाद्वुञ्" [ ४।३।१२६ ] इति वुञ् स्यात्।

शाकलः इति ऋषिः। तेन प्रोक्तम् अधीयते इति शाकलाः। तेषां संघः अङ्कः घोषो वा शाकलः—अण्। शाकलकः—वुञ् वा। "लक्षणे क्लीवता"—लक्षणे गम्ये अस्य नपुंसकत्वम् इष्टम्—यथा शाकलं लक्षणं शाकलकं लक्षणम्।

१४७४। छन्दोगौक्थिक याज्ञिक बह्वृच नटाञ्ञ्यः ॥४।३।१२९॥

दी—। छन्दोगानां धर्म्म आम्नायो वा छान्दोग्यम्। औक्थिक्यम्। याज्ञिक्यम्। बाह्वृच्यम्। नाट्यम्। "चरणाद्धर्म्माम्नाययो"रित्युक्तम् तत् साहचर्य्यान्नटशब्दादपि तयोरेव।

The suffix ञ्य is affixed to the words छन्दोग, औक्थिक, याज्ञिक, बह्वृच and नट in the sense of "तस्य इदम्", provided the thing implied is either धर्म [ scripture or characteristic ] वा आम्नाय [ the vedas or such treatise ].

मित—। संघादयः अर्था अत्र नानुवर्त्तन्ते तेन अयमर्थः—तस्य इदम् इति एतस्मिन् विषये छन्दोग, उक्थिक याज्ञिक बह्वृच नट इति एतेभ्यो ञ्यप्रत्ययः स्यात्। वुञः अणश्च अपवादः। छन्दोगादयः चत्वारः चरण-वाचिशब्दाः। अतस्तेभ्यः

"चरणाद्धर्म्माम्नाययोरिति वक्तव्यम्" इत्यनेन धर्म्मे आम्नाये वा गम्ये प्रत्ययः इष्यते। नटशब्दस्तु न चरणवाची—तथापि चरणवाचिछन्दोगादीनाम् साहचर्य्यात् अस्मादपि धर्म्मे आम्नाये गम्ये प्रत्यय इष्टः इति ज्ञेयम्। छन्दोगानां धर्म्म आम्नायो वा छान्दोग्यम्। छान्दोग्यम् इति कस्याश्चित् उपनिषदः आख्या ; कस्यचित् ब्राह्मणस्य च। छान्दोग्य-ब्राह्मणम्। छान्दोग्योपनिषत्। औक्थिकानां धर्म्म आम्नायो वा औक्थिक्यम्। याज्ञिकानां धर्म्म आम्नायो वा याज्ञिक्यम्। बह्वृचाणां धर्म्म आम्नायो वा बाह्वृच्यम्। नटानां धर्म्मः आम्नायो वा नाट्यम्। नाट्यमिति भरतादिमुनिप्रणीतं शास्त्रम् अभिनय-विधानकम्। धर्म्मचरणयोरिति किम्? छन्दोगानां कुलम् इति छान्दोगं कुलम्। अत्र अण् एव न खलु ञ्यः।

## १४७५। न दण्डमाणवान्तेवासिषु ॥ ४।३।१३० ॥

**टी—। दण्डप्रधानाः माणवास्तेषु शिष्येषु च वुञ् न स्यात्। दाक्षा दण्डमाणवाः शिष्या वा।**

When दण्डमाणवाः or शिष्याः (disciples) are implied, the suffix वुञ् is not added ( to words expressive of गोत्र or चरण )। दण्डमाणवः = people leaning against stick while going.

मित—। दण्डप्रधानाः माणवा इति दण्डमाणवाः। दण्डशब्दस्य कोऽर्थः राजदण्डो वंशदण्डो वा? काशिकायां भाषावृत्तौ तथा श्रीमता दीक्षितेनापि न किञ्चित् विशिष्य उक्तम्। मन्यामहे वंशदण्ड एव। तथा सति ये माणवाः वंशदण्डम् अवलम्ब्य व्रजन्ति त एव दण्डमाणवाः इति आयाति। अन्तेवासिनः शिष्याः। सूत्रार्थस्तु—दण्डमाणवाः शिष्या वा इति एतयोर्गम्यमानयोः वुञ्प्रत्ययो न स्यात्। केभ्यः? गोत्रचरणवाचिभ्यः इति वाच्यम्। तयोरेव इत्यनुवर्त्तनात्। दाक्षा दण्डमाणवाः शिष्या वा। एवम् माहकाः। अत्र अण् एव न वुञ्। दक्षाणाम् महकानाम् वा दण्डमाणवाः लागुड़िकाः ( लाठियाल इति गौड़ीयाः ) दाक्षाः माहकाः।—एवं दक्षाणाम् महकाणां वा शिष्याः दाक्षाः माहकाः, एवं गौकक्षाणां दण्डमाणवाः शिष्याः वा गौकक्षाः इति।

१४७६। रैवतिकादिभ्यश्छः ॥ ४।३।१३१ ॥

टी—। तस्य इदमित्यर्थे। वुञोऽपवादः। रैवतिकीयः। वैजवापीयः।

In the sense तस्य इदम्, the suffix छ is attached to रैवतिक and others (falling within the category of रैवतिक)।

मित—। रैवतिक इति एवमादिभ्यः प्रातिपदिकेभ्यः तस्य इदम् इति एतस्मिन् विषये छ-प्रत्ययः स्यात्। वुञोऽपवादः। रैवतिकादयः शब्दाः गोत्रप्रत्ययेन निष्पन्नाः। अतएव "गोत्रचरणाद्वुञ्" (४।३।१२१) इति प्राप्तो वुञ् अनेन छप्रत्ययेन वाध्यते। रैवतिकानाम् अयम् इति रैवतिकीयः। वैजवापीनाम् अयमिति वैजवापीयः। रैवतिकादिर्यथा—रैवतिक, वैजवापि, स्वापिशि, क्षैमवृद्धि, गौरग्रीवि, औदवापि, औदवाहि—इति।

१४७७। कौपिञ्जलहास्तिपदादण् वाच्यः ॥ (वार्त्तिक)।

टी—। कुपिञ्जलस्य अपत्यम्—इहैवनिपातनादण्। तदन्तात् पुनरण्। कौपिञ्जलः। गोत्रवुञोऽपवादः। हस्तिपादस्य अपत्यं हास्तिपदस्तस्यायं हास्तिपदः।

The suffix अण् (a bar to वुञ्) is attached to the two words कौपिञ्जल and हास्तिपदः।

मित—। तस्य इदम् इति विषये कौपिञ्जल तथा हस्तिपाद इति एताभ्याम् अण् प्रत्ययः स्यात्। प्रातिपदिकयोर्गोत्रवाचित्वात् "गोत्रचरणाद्वुञ" (४।३।१२६) इति प्राप्तस्य वुञोऽपवादः। कुपिञ्जलस्य अपत्यम् पुमान् इति कौपिञ्जलः। अण् प्रत्ययेन निष्पन्नः। तस्य अयम् इति पुनरपि अण् कौपिञ्जलः। हस्तिपादस्य अपत्यं पुमान् इति अण् हास्तिपदः। तस्य अयमिति हास्तिपदः—पुनरपि अण्।

१४७८। आथर्वणिकस्येकलोपश्च ॥४।३।१३३॥

**दो—। अण् स्यात्। आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा। चरणाद्वुञोऽपवादः।**

The suffix अण् is attached to the word आथर्वणिक, in the sense of तस्य इदम् and the suffix being attached to it, causes the elision of "इक" the last part of the word.

मित—। तस्य इदम् इति एतस्मिन् विषये, आथर्वणिकइति चरणवाचिशब्दात् अण् प्रत्ययः स्यात्; प्रत्ययसन्नियोगेन शब्दस्य "इक" इति अन्तिमांशश्च लोपं गच्छेत्। अयं प्रत्ययः "गोत्रचरणाद्वुञ्" इति विहितस्य वुञ् प्रत्ययस्य अपवादः। प्रातिपदिकस्य चरणवाचित्वात् धर्मे आम्नाये वा गम्ये एव प्रत्ययः इष्टः। तेन आथर्वणिकस्य अयं धर्म्म आम्नायो वा इति अण्=आथर्व्वणम्। इकलोपश्च।

समाप्ताः शैषिकाः॥

## १४७८। तस्यविकारः॥४।३।१३४॥

**दो—। अश्मनो विकारे टिलोपो वक्तव्यः (वा)। अश्मनो विकारः—आश्मः। भास्मनः। मार्त्तिकः।**

suffixes are attached to words in the sense of, तस्य विकार i. e. to imply things, produced out or made of the substances denoted by the said words. The base अश्मन् elides its टि portion when अण् ( विकारार्थक ) follows.

मित—। तस्य इति षष्ठीसमर्थात् विकार इति एतस्मिन् विषये यथाविहितं प्रत्ययः स्यात्। विकारस्तु अन्यथाभावः। "प्रकृतेरवस्थान्तरं विकारः" इति काशिका। स च द्विविधः—विवर्त्तः परिणामश्च। अतात्त्विकोऽन्यथाभावः विवर्त्तः। तात्त्विकोऽन्यथाभावस्तु परिणामः। यथा—जलस्य विवर्त्तः वुद्वुद एवं दुग्धस्य परिणामो हि दधि। अत्र विकारशब्देन विवर्त्तः परिणामश्च उभाविव गृह्यते।

अश्मन् उपलं प्रस्तर: इति यावत्। तस्य विकार इति अण् प्रत्यय:। प्रत्यये परे "अश्मनो विकार उपसंख्यानम्" (६।४।१४४ वार्त्तिकम) इति विकारे गम्ये अश्मन् इत्यस्य टिलोप:। तथासति आश्म इति रूपम्। आश्म: प्रासाद:। प्रस्तररचित: प्रासाद इत्यर्थ:। "यत्रापमाश्मनप्रख्यं सेतुं धत्तेऽन्यदुर्वहम्" इति प्रयोगात् विकारार्थे टिलोपस्तु पाक्षिक एव इति काशिका। तेन पक्षे आश्मन इत्यपि स्यात्। विकारादन्यस्मिन्नर्थे तु केवलम् "आश्मन:" इति रूपम्। भस्मनो विकार इति भास्मन:। मृत्तिकाया विकार इति मार्त्तिक:। उभयत्र अण्।

## १४८०। अवयवे च प्राण्योषधिवृक्षेभ्य: ॥ ४।३।१३५ ॥

**वृ—। चाद्विकारे। मयूरस्य अवयवो विकारो वा मायूर:। मौर्वं काण्डं भस्म वा। पैप्पलम्।**

Suffixes are added to words expressive of a creature, a plant or a tree in the sense of तस्य विकार or तस्य अवयव:—that is to imply anything born out of it or any limb relative to these.

[ Later on अञ् with be said to be the fixed suffix with reference to creatures in these senses ].

मित—। अवयवे तथा विकारे च गम्ये प्राणिवाचिभ्य ओषधिवाचिभ्यस्तथा वृक्षवाचिभ्य: प्रातिपदिकेभ्यो यथाविहितं प्रत्यय: स्यात्। तत्र "प्राणिरजतादिभ्योऽञ्" (४।३।१५४) इति सूत्रेण प्राणिवाचिभ्य: अञ् एव स्यात् इति वक्ष्यति। मयूरस्य विकार: अवयवो वा इति अञ् मायूर:। एवं कापोत:। तैत्तिर:। सर्व्वत्र अञ्। ओषधिभ्य:—मुर्व्वाया: अवयव: (काण्डम्) इति मौर्व्वम् काण्डम्। अत्र अण्। मुर्व्वाया: विकार: (भस्म) इति मौर्व्वं भस्म। वृक्षेभ्य:—पिप्पलस्य अवयव: विकारो वा पैप्पलम्। एवम् कारवीरं माल्यम्। कारवीरं भस्म।

## १४८१। बिल्वादिभ्योऽण् ॥ ४।३।१३६ ॥

टी—। वैल्वम्।

The suffix अण् is attached to the word बिल्व and others of the बिल्वादि—class in the sense of तस्य विकार or तस्य अवयव।

मित—। विकारे अवयवे च गम्ये बिल्व इत्येवमादिभ्यः अण्प्रत्ययः स्यात्। अयं कुत्रचित् योग्यस्य अञ्प्रत्ययस्य कुत्रचित् वा विहितस्य मयट्प्रत्ययस्य अपवादः। बिल्वस्य अवयवो विकारो वा वैल्वः। वैल्वम् भस्म। एवं व्रैहः। व्रीहेर्विकारः अवयवो वा। एवं मुद्गस्य अवयवः विकारो वा मौद्गः। बिल्वादिर्यथा—बिल्व, व्रीहि, काण्ड, मुद्ग, मसूर, गोधूम, इक्षु, वेणु, गवेधुका, कार्पासी, पाटली, कर्कन्धू, कुटीर इति।।

१४८२। कोपधाच्च ॥ ४।३।१३७ ॥

टी—। अण्। अञोऽपवादः। तर्कु—तार्कवम्। तैत्तिडीकम्।

In the sense of विकार or अवयव, the suffix अण् ( a bar to अञ्) is added to words endowed with a penultimate क।

मित—। येषां प्रतिपदिकानां उपधायाम् ककारो विद्यते, तेभ्यः अण्प्रत्ययः स्यात् विकारे अवयवे च गम्यमाने। अञोऽपवादः। तर्कुः—(टाकु इति गौड़ीयाः। तक्लि इति गुर्ज्जराः)। तस्य विकारः इति तार्कवम्। तित्तिड़ीक इति—अस्य विकारोऽवयवो वा तैत्तिड़ीकम्। एवं वार्त्ताकु—वार्त्ताकवम्। तिन्तिड़ीक—तैन्तिड़ीकम्। मधुक—माधुकम्। मण्डूक—माण्डूकम्। दर्दुरक—दार्दुरकम्।

१४८३। त्रपुजतुनोः षुक् ॥ ४।३।१३८ ॥

टी—। आभ्यामण् स्याद्विकारे, एतयोः षुगागमश्च। त्रापुषम्। जातुषम्।

In the sense of तस्य विकारः, the suffix अण् is added to

the words त्रपु and जतु ; and before these and the suffix षुक् is inserted.

मित—। "तस्य विकारः" इति एतस्मिन् विषये त्रपु जतु इति एताभ्याम् अण् प्रत्ययः स्यात्; तत्सन्नियोगेन च एतयोः षुक् इति आगमः स्यात्। उकारः उच्चारणार्थः। कित्वात् "आद्यन्तौ टकितौ" (१।१।४६) इति प्रातिपदिकस्य अन्ते एव षकारस्य स्थितिः। त्रपुणो विकारः इति त्रापुषम्। जतुनो विकार इति जातुषं गृहम्। अयं प्रत्ययः "ओरञ्" (४।३।१३९) इति विहितस्य अञ्प्रत्ययस्य अपवादः।

## १४८४। ओरञ्॥ ४।३।१३९॥

## दी—। दैवदारवम्। भाद्रदारवम्।

The suffix अञ् is added to words, ending in उ or ऊ in the sense of तस्य विकारः or तस्य अवयवः ; it is a bar to अण्।

मित—। ये प्रातिपदिकाः उवर्णान्तास्तेभ्यः विकारार्थे अवयवार्थे च अञ् प्रत्ययः स्यात्। अणोऽपवादः। देवदारु इति वृक्षः। तस्य अवयवो विकारो वा इति दैवदारवम्। भद्रदारु इति वृक्षः। अस्य अवयवो विकारो वा इति भाद्रदारवम्। "अनुदात्तादेश्च" (४।३।१४०) इति सूत्रेण अनुदात्तादेरञ् विहितः। ये अनुदात्तादय उवर्णान्तास्तेभ्यः खलु तेनैव अञ् स्यात्। ये खलु उवर्णान्ताः अपि च नहि अनुदात्तादयस्तेभ्य एव अञ् विधानार्थम् अस्य आरम्भ इति ज्ञेयम्।

## १४८५। अनुदात्तादेश्च ॥४॥३॥१४०॥

## दी—। दाधित्थम्। कापित्थम्।

In the sense of विकार or अवयव, the suffix अञ् is added to a word that is अनुदात्तादि i. e. the first syllable of which is अनुदात्त।

मित—। ये प्रातिपदिका अनुदात्तादयः तेभ्यो विकारार्थे अवयवार्थे च

अञ् स्यात्। अणोऽपवादः। दधित्थस्य विकार इति दाधित्थम्। कपित्थस्य विकार इति कापित्थम्। एवं माहित्थम्।

## १४८६। पलाशादिभ्यो वा ॥४।३।१४१॥

दी—। पालाशम्। कारीरम्।

The suffix अञ् is optionally added to words—that fall within the category of पलाशादि in the sense of विकार or अवयव।

मित—। पलाशादिभ्यो वा अञ्प्रत्ययः स्यात् विकारे अवयवे वा गम्ये। पक्षे अण्। पलाशस्य वृक्षस्य विकारोऽवयवो वा इति पालाशम्। एवं करीरस्य अवयवो विकारो वा इति कारीरम्। अञि अणि च समभेव रूपम्। तर्हि कथं प्रत्ययद्वयस्य एव विधानम्? "स्वरे भेदः" इति भावावृत्तिः। पलाशादि र्यथा—पलाश, खदिर, शिंशपा, स्यन्दन, करीर, शिरीष, यवास, विकङ्कत, पुलाक, इति।

ननु सूत्रे विकल्पव्यवस्था कथम्? उच्यते—पलाश, खदिर, शिंशपा स्यन्दन इति चत्वारः अनुदात्तादयः। अत एषां अञ् इत्यस्य नित्यं प्राप्ते अनेन विभाषा, तथा अन्येषाम् अञ्प्रत्ययस्य अप्राप्ते विभाषाकथनम्।

## १४८७। शम्याःष्लञ् ॥ ४।३।१४२ ॥

दी—। शामीलं भस्म। षित्वान्ङीष्। शामिली स्रुक्।

The suffix ष्लञ् is added to the word शमी in sense of विकार or अवयव।

मित—। विकारे अवयवे च गम्ये शमीशब्दात् ष्लञ्प्रत्ययः स्यात्। अणोऽपवादः। शमी तरुविशेषः। तस्य विकार इति शामीलम्। शामीलं भस्म। एवं तस्य अवयव इति शामीलम्। स्त्रियाम् तु शामीली—"षिद्गौरादिभ्यश्च" ( ४।१।४१ ) इति सूत्रेण; प्रत्ययस्य षकारेत्त्वात्। शामीली स्रुक्। स्रुक् यज्ञपात्रविशेषः।

१४८८ । मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः
॥ ४।३।१४३ ॥

टी—। प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः नतु भक्ष्याच्छादनयोः । अश्ममयम् । आश्मनम् । अभक्ष्येत्यादि किम् ? मौद्गः सूपः । कार्पासम् आच्छादनम् ।

The suffix मयट् may be optionally affixed to any word in the sense of विकार or अवयव, especially in classical sanskrit (See Kasika as well as Bhasavritti) except in the sense of भक्ष्य (eatables) or आच्छादन (clothing).

मित—। भक्ष्यात् तथा आच्छादनात् अन्यस्मिन् खलु विकारे अवयवे च गम्ये प्रातिपदिकेभ्यः मयट्प्रत्ययो वा स्यात् । भाषायाम् इति वक्तव्यम् । अश्मनो विकारः अवयवो वा अश्ममयं गृहम । पक्षे आश्मनम् आश्मं वा । अश्मनो विकारे पाक्षिकस्य एव टिलोपस्य विधानात् । एवं दूर्वामयं—दौर्वम् । मूर्वा-मौर्वम् मूर्वामयम । भक्ष्ये इति किम् ? मुद्ग इति भक्ष्यद्रव्यम् । तस्य विकार इति मौद्गः सूपः । अत्र "बिल्वादिभ्योऽण्" ( ४।३।१३६ ) इति अण् एव । आच्छादने इति किम् ? कर्पासी इत्यस्य विकार इति कार्पासम् आच्छादनम् । अत्रापि बिल्वादित्वात् अण् । भाषायाम् इति किम् ? वैल्वः खादिरो वा यूपः । यूपस्य वैदिकसाहित्यविषयत्वात् नात्र मयट् अपितु अण् एव ।

१४८९ । नित्यं वृद्धशरादिभ्यः ॥ ४।३।१४४ ॥

टी—। आम्रमयम् । शरमयम् ।

वृद्ध words and words belonging to the शरादि class take मयट in the aforesaid sense.

मित—। वृद्धेभ्यः प्रातिपदिकेभ्यस्तथा शर इत्येवमादिभ्यो नित्यमेव मयट् स्यात् विकारे अवयवे च गम्ये । अभक्ष्याच्छादनयोरिति तथा भाषायाम् इत्यपि ज्ञेयम् ।

वृक्षेभ्यस्तावत् आम्रमयम्, एवं शालमयं, शाकमयम्। शरादि यथा—शर, दर्भ, तृण, सोम, मृत्, कुटी, वल्वज इति। शरमयं दर्भमयम्, तृणमयम्, सोममयम्, कुटीमयम् वल्वजमयम, मृन्मयम।

ननु मृन्मयम् अत्र कथं न णत्वमितिचेत्—उच्यते। मृदो विकार इति मृद् इत्यस्य मयटि परे ङस् इति प्रत्ययस्य लुपि अपि "प्रत्ययलोपे प्रत्ययलक्षणम्" आश्रित्य मयटि परे मृत् इत्यस्य पदत्वम् तकारस्य च पदान्तत्वम्। ततः "झलां जशोऽन्ते" (८।२।३९) इति तकारस्य दकारः। ततः "यरोऽनुनासिकेऽनुनासिको वा" (८।४।४५)" इति सूत्रस्थेन "प्रत्यये भाषायां नित्यम्" इत्यनेन दस्थाने नित्य-नकारः। ततः "पूर्वत्रासिद्धम्" (८।२।१) इति नकारस्य असिद्धत्वेन दकारत्वात् पदान्ते "नलोपः प्रातिपदिकान्तस्य" (८।२।७) इति नकारस्य नलोपः। तथा सति "पदान्तस्य" (८।४।३७) इति अस्यापि असिद्धत्वात् दकारत्वात् एव "रषाभ्याम्" (८।४।१) इति न णत्वम्—इति भाषावृत्तिटिप्पन्यां श्रीयुक्तश्रीचन्द्रचक्रवर्त्तिनः।

**टी—। एकाचो नित्यम् (वा) ॥ त्वङ्मयम्। वाङ्मयम्। कथं तर्हि—आप्यम् अम्मयम् इति। तस्येदम् इत्यणन्तात् स्वार्थे ष्यञ्।**

मित—। शरादिभ्योऽन्येभ्य एकस्वरविशिष्टेभ्यः अपि नित्यं मयट् स्यात्। त्वचः अवयव इति त्वङ्मयम्। वाचः विकार इति वाङ्मयम्।

ननु कथं तर्हि अपां विकार इति अम्मयम् आप्यम् इति रूपद्वयमेव दृश्यते? उच्यते—अत्र आदौ अपाम् इदम इति अण "तस्येदम" (४।३।१२०) इति सूत्रेण। तेन आपम् इतिरूपम्। ततः आपम एव आप्यम इति अण प्रत्ययान्तात् "आप" इत्यस्मात् स्वार्थे ष्यञ इति बोध्यम।

**१४८८। गोश्च पुरीषे ॥ ४।३।१४६ ॥**

**टी—। गोः पुरीषं गोमयम्।**

The suffix मयट् is added to the word "गो" in the sense of "cowdung."

मित— । पुरीषं विष्ठा । गवां पुरीषे गव्यं गोशब्दात् मयट् स्यात् । पुरीषे किम् ? गव्यं पयः । पुरीषं न अवयवो नापि विकारस्तेन अस्य सूत्रस्य सृष्टिः । विकारे अवयवे च गव्यं प्रत्ययं पश्चात् वक्ष्यति ।

१४८० । पिष्टाच्च ॥ ४।३।१४७ ॥

**टी— । मयट् स्याद्विकारे । पिष्टमयं भस्म । कथं पैष्टी सुरेति । सामान्यविवक्षायाम् तस्येदम् इति अण् ।**

In the senses of तस्य विकारः, मयट is the only suffix that is added to the word पिष्ट ।

मित— । तस्य विकार इति एतस्मिन् विषये पिष्टशब्दात् नित्यं मयट् प्रत्ययः स्यात् । पिष्टस्य विकारः इति पिष्टमयं भस्म ।

ननु कथं तर्हि पैष्टी सुरा इति प्रयोगः ? सामान्यविवक्षायाम् "तस्येदम्" ( ४।३।१२० ) इति अण् । सामान्यविवक्षायाम् इत्यस्य कोऽर्थः ? पिष्टेन सह यदा पिष्टसंपृक्तस्य वस्तुनः अवयवावयविसम्बन्धो वा प्रकृतिविकृतिसम्बन्धो वा व्यज्यते तदा नित्यमेव मयट् । पैष्टी सुरा—अत्र पिष्टेन सह सुरायाः न कश्चित् ईदृशोविशिष्टः सम्बन्धो विवक्षितः—अपि तेन सह तस्याः कश्चित् सम्बन्धोऽस्तीति सम्बन्धमात्रं खलु वक्तुमिष्टम् । तेन अत्र विकारं वा अवयवं वा इति सम्बन्धविशेषम् अनुद्दिश्य यदा सम्बन्धसामान्यमेव उद्दिष्टम्, तदा अत्र "तस्य इदम्" ( ४।३।१२० ) इति सम्बन्धसामान्य-विवक्षायाम् ( सम्बन्धमात्राभिप्राये ) अण्प्रत्ययः कृतः इति ज्ञेयम् ।

१४८१ । संज्ञायां कन् ॥ ४।३।१४८ ॥

**टी— । पिष्टादित्येव । पिष्टस्य विकारविशेषः पिष्टकः । पूपोऽपूपः पिष्टकः स्यात् ।**

In the sense of विकार, the suffix कन् is added to the word पिष्ट provided the word newly formed stands as a particular class-name ( संज्ञा ) ।

मित—। तस्य विकार इति एतस्मिन्नेव विषये पिष्ट इति प्रातिपदिकात् कन्-प्रत्ययः स्यात् संज्ञायां गम्यमानायाम्। मयट्प्रत्ययस्य अपवादः। पिष्टस्य कश्चित् विशिष्टः विकारः इति कन् पिष्टकः अपूपः इति।

**१४८२। व्रीहेः पुरोडाशे ॥ ४।३।४८ ॥**

**टी—। मयट् स्यात्। बिल्वाद्यणोऽपवादः। व्रीहिमयः पुरोडाशः। व्रैहमन्यत्।**

The suffix मयट् is added to the word व्रीहि to imply पुरोडाश produced out of it.

मित—। व्रीहेर्विकारः पुरोडाशो यदा गम्यमानः स्यात्, तदा व्रीहिशब्दात् मयट् प्रत्यय एव स्यात्। अयं प्रत्ययः "बिल्वादिभ्योऽण्" (४।३।१३६) इति बिल्वाद्यन्तर्गत-व्रीहिशब्दात् विकारे गम्ये विहितस्य अणोपवादः। अयमाशयः—यदा तु व्रीहे-र्विकारः पुरोडाशात् अन्यत् किञ्चित् वस्तु तदा व्रैहम्।

**१४८३। असंज्ञायाम् तिलयवाभ्याम् ।४।३।१५०॥**

**टी—। तिलमयम्। यवमयम्। संज्ञायाम् तु—तैलम्। यावकः।**

The suffix मयट् is taken by the two words तिल and यव after them in the sense of तस्य विकार, or तस्य अवयव provided the words thus formed never stand as a particular class name ( संज्ञा )।

मित—। विकारे अवयवे च गम्ये तिल यव इति प्रातिपदिकाभ्याम् मयट्-प्रत्ययः स्यात् असंज्ञाविषये। यदा कृतप्रत्ययाभ्याम् एताभ्यां संज्ञा गम्यते तदा तु मयट्प्रत्ययो न स्यात् इति भाव। तिलस्य विकारोऽवयवो वा तिलमयम्। तिलमयं भस्म। एवं यवस्य अवयवो विकारो वा यवमयः। यवमयं पिष्टम्। असंज्ञायाम् इति किम्? तिलस्य स्नेहः इति तैलम् "तस्येदम्" (४।३।१२०) इति अण्। तैलं हि स्नेहद्रव्यविशेषस्य संज्ञा। यवस्य विकार इति अण् यावः।

यावः एव यावकः इति स्वार्थे कन् "यावादिभ्यः कन्" ( ५।४।२९ ) इति सूत्रेण। यावकः रञ्जनद्रव्यविशेषः। तथाहि श्रीचण्डीदासपदावल्याम्—

"चरणकमले मल्लतोड़ल सुन्दर यावक रेखा"—[ गौड़ीयभाषायाम् ]

१४८४। तालादिभ्योऽण् ॥ ४।३।१५१ ॥

टी—। अञ्मयटोरपवादः ॥ तालाद्धनुषि (वा) ॥ तालं धनुः। अन्यत् तालमयम्। ऐन्द्रायुधम्।

In the sense of विकार as well as अवयव, the suffix अण् is affixed to the word ताल and others falling within the category of तालादि।

मित—। ताल इत्येवमादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययः स्यात् विकारे अवयवे च गम्ये। अञ्प्रत्ययस्य मयट्प्रत्ययस्य च अपवादः। तालशब्दात् धनुषि एव गम्ये प्रत्ययः इष्टः। तालस्य विकार इति तालं धनुः। तथाहि श्रीमहाभारते— "जानामि ते गाण्डीवं तालमात्रम्" इति अर्ज्जुनमुद्दिश्य सुयोधनवचनम्। धनुषि इति किम्? तालस्य विकार इति तालमयं भस्म। इन्द्रायुधस्य अवयवः इति ऐन्द्रायुधम् अङ्गम्। तालादिर्यथा—ताल ( धनुष्येव), वार्हिण, इन्द्रायुध, इन्द्रालिश, इन्द्रादृश, चाप, श्यामाक, पीयुक्षा, चाप, स्थानेचय इति कश्चित्।

१४८५। जातरूपेभ्यः परिमाणे ॥ ४।३।१५२ ॥

टी—। अण्। बहुवचनात् पर्य्यायग्रहणम्। हाटकः तापनीयः सौवर्णो वा निष्कः। परिमाणे किम्? हाटकमयी यष्टिः।

In the sense of विकार, the suffix अण् is attached to words, expressive of gold, provided the विकार implies nothing but some particular amount of measure.

मित—। जातरूपं सुवर्णम्। जातरूपेभ्यः इति बहुवचननिर्द्देशात् सर्व्वेषाम् एव सुवर्णवाचिनां शब्दानामत्र ग्रहणम्। तेन अयम् अर्थः—सर्व्वेभ्य एव सुवर्णवाचि-प्रातिपदिकेभ्यः विकारे गम्यमाने अण् प्रत्ययः स्यात्, स विकारश्चेत् परिमाणात् नान्यः। परिमाणाख्ये विकारविशेषे एव प्रत्यय इष्टः इति भावः। हाटकं स्वर्णम्, एवं तापनीयं सुवर्णं इत्यादि। हाटकस्य तापनीयस्य सुवर्णस्य वा परिमाणविशेषः विकारः हाटकः तापनीयः सौवेर्णो वा निष्कः, अत्र अण्। निष्कः सुवर्णपरिमाणविशेषः सुवर्ण-मुद्राविशेषः इति यावत्, एवम् जातरूपस्य विकारः परिमाणविशेषः इति अण् जात-रूपं कार्षापणम्। अयं प्रत्ययः मयडादीनाम् अपवादः। परिमाणे इति किम्? हाटकस्य विकारो इयं यष्टिरिति हाटकमयी यष्टिः, अत्र मयट् एव।

ननु कथं तर्हि "तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिः" इति मेघदूते? अत्र मल्लिनाथः—"काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिर्निवासदण्डः"। अत्र अपरिमाणेपि विकारे गम्ये अण् स्यात्। महाकविप्रयुक्तत्वात् साधुत्वम्; यद्वा—"तस्येदम्" इति अण्। यद्वा सूत्रस्य प्रायिकत्वं मन्तव्यम्। यद्वा अपवाद-विषयेपि क्वचित् उत्सर्गस्य अपि प्रयोगोदृश्यते "पतिना नीयमानायाः पुरःशक्रो न दृश्यति"। "सखिना वानरेन्द्रेण" इत्यादिवत् इति दिक्। अत्र भाषावृत्तिकृताम् आशयः परसूत्रे मया वक्तव्यः।

## १४८६। प्राणिरजतादिभ्योऽञ्॥ ४।३।१५२॥

## टी—। शौकम्। वाकम्। राजतम्।

The suffix अञ् is attached to words expressive of living animals as well as to words coming under the head रजतादि।

मित—। प्राणिवाचिभ्यस्तथा रजतादिभ्यश्च विकारे अवयवे च गम्ये अञ् प्रत्ययः स्यात्। रजतादिर्यथा—रजत, सीस, लौह, उदुम्बर, नीप, दारु, रोहितक, विभीतक, कपोतदारु, पीतदारु, तीव्रदारु त्रिकण्टक, कण्टकारि। शुकस्य अवयवः शौकम् पक्षम्, वकस्य अवयवः वाकम् मुखम्। रजतस्य विकारः राजतं पात्रम्। अनुदात्तादेश्च (४।३।१४०) इति अनु-दात्तादेरञ् प्रत्ययो विहितः। तर्हि

अत्र ये प्राणिवाचिनः तथा रजतादयश्च अनुदात्तादयः तेभ्यः पूर्व्वेणैव अञ्; ये खलु अनुदात्तादयः न भवन्ति, अपिच प्राणिवाचिनः उत रजतादिषु अन्तर्भुक्तास्तेभ्यो -ऽनेन अञ् इति बोध्यम्।

ननु तर्हि रजत कण्टकारि इत्यादीनाम् अनुदात्तादीनाम् पूर्व्वेणैव अञ प्रत्यये सिद्धे कथं रजतादिषु तेषां परिगणनं कृतमिति चेत् उच्यते। तेभ्यो मयट् माभूदिति ज्ञापनार्थमेव। प्राणिवाचिनाम् उदाहरणान्तराणि—कापोतम, मायूरम, शैवम्, तैत्तिरम्। रजतादीनां च—सैसम, लौहम्, औदुम्बरम्।

ननु ये अनुदात्तादयः रजतादिषु अन्तर्भूताः (यथा रजत कण्टकारि प्रभृतयः), तेभ्यो मयट् माभूत्; अपितु ये खलु नैव अनुदात्तादयः अपिच रजतादिषु अन्तर्भुक्ताः (यथा लौहप्रभृतयः) तेभ्यस्तथा ये खलु प्राणिवाचिनः तेभ्योऽपि "मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः" (४।३।१४३) इति सूत्रेण विकल्पेन मयट् स्यात् उत न स्यात्? समाधत्ते—स्यादेव। कथम्? श्रूयताम्—अस्मिन् सूत्रे "एतयोः" इति विकारार्थम् तथा अवयवार्थं पूर्वोद्दिष्टमपि भूय एव निर्द्दिष्टम् ज्ञापयति यत् विकारावयवौ प्रकृताविव। ये विशेषप्रत्ययाः "प्राणि रजतादिभ्योऽञ्" इत्येवमादयस्तद्विषयेऽपि स्यात्। कपोतमयम् लोहमयम्। लौहमिति"—काशिका। अयमाशयः—विकारार्थे तथा अवयवार्थे ये विशेषप्रत्ययाःविहिताः, तेषाम् प्रत्ययानां स्थाने पाक्षिको मयट् प्रत्ययः स्यात्। तथाहि "प्राणि—" इति सूत्रेण कपोत इति प्राणिवाचकात् विकारे अवयवे च अञ् स्यात्। तथा सति ईदृशे एव अर्थे मयट् अपि स्यात्। तेन कापोतम् कपोतमयम् इति उभयमेव साधु। तथा लोह इति रजतादिषु अन्तर्भुक्तः कश्चित् शब्दः। तस्मात् अञ् स्यात्—तथा मयट् अपि स्यात्—तेन लौहम् लोहमयम् इति द्वयमेव साधु। भाषावृत्तिकारोऽपि एवमाह। रजत इति शब्दस्तु रजतादिषु पठितोऽपि अनुदात्तादित्वेन अस्मात् अञ् एव राजतम्, न खलु मयट्।

भाषावृत्तिकारः काञ्चन इति सुवर्णवाचकम् प्रातिपदिकम् रजतादिषु एव गणयति। तेन "प्राणिरजतादिभ्योऽञ्" इति सूत्रस्य परत्वात् "जातरूपेभ्यःपरिमाणे" [४।३।१५३] इति सूत्रात् बलीयस्त्वम् उररीकृत्य अपरिमाणे अपि विकारे काञ्चन

इत्यस्मात् अञ् प्रत्ययमेव साधु मन्यमानः "पुरीम् द्रष्टाथ काञ्चनीम्", "काञ्चनी वासयष्टिः" इति उदाहरणद्वयं प्रदर्शितवान्। वयं तु भाषावृत्तिकृताम् आशयमपि समर्थयामहे इति सर्व्वमवदातम्।

१४८७। ञितश्च तत्प्रत्ययात् ॥४।३।१५५॥

टी—। ञिद् यो विकारावयव-प्रत्ययस्तदन्तादञ् स्यात्तयोरेवार्थयोः। मयटोऽपवादः। शामीलस्य शामीलम्। दाधित्थस्य दाधित्थम्। ञितः किम्? बैल्वमयम्।

In the sense of विकार as well as अवयव, the suffix अञ् is added to words which themselves are formed with any suffix that elides ञकार in the same sense i. e. in the sense of विकार and अवयव।

मित—। विकारे अवयवे च गम्ये, ये ञकारेत्—प्रत्ययाः प्रातिपदिकेभ्यः विधीयन्ते, तत्-प्रत्ययान्तेभ्यः शब्देभ्यः पुनरपि विकारार्थे अवयवार्थे च अञ् प्रत्ययः स्यात्। अयं मयट् प्रत्ययस्य अपवादः, यो मयट् "मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः" (४।३।१४३), "नित्यं वृद्धशरादिभ्यः" (४।३।१४४) इति एताभ्याम विधीयते।

ननु केते ञित्प्रत्यया इति चेत् उच्यन्ते। "ओरञ्" (४।३।१३९) तथा "अनुदात्तादेश्च" (४।३।१४०), पलाशादिभ्योवा (४।३।१४१) इति अञ् प्रत्ययः ; तथा "शम्याः ष्लञ्" (४।३।१४२) इति ष्लञ् प्रत्ययः ; एवम् "प्राणिरजतादिभ्योञ्" (४।३।१५४) इति अञ् प्रत्ययः, अपि च "उष्ट्रात् वुञ्" (४।३।१५७) इति वक्ष्यमाणो वुञ् प्रत्ययः, "एण्याढञ्" (४।३।१५९) इति ढञ्, उमार्णयोर्वा (४।३।१५०) इति ; किञ्च "कंसीयपरशव्ययो यञञौ लुक् च" (४।३।१६८] इति वक्ष्यमाणौ यञ्-अञ् प्रत्ययौ ; एते खलु विकारार्थे अवयवार्थे च विहिताः ञित्प्रत्ययाः। एतेषाम् अन्यतमप्रत्ययान्तानाम् प्रातिपदिकानाम् भूयोपि विकारे तथा अवयवे च गम्ये मयड् बाधकोञ् प्रत्ययः स्यात् इति निष्कर्षः। शमी इति वृक्षविशेषः

तस्य अवयव इति शामील: काण्ड: । "शम्याष्लञ्" [ ४।३।१४२ ] इति ष्लञ् । तस्य शामीलस्य काण्डस्य विकार: इति अनेन अञ् शामीलं भस्म, शमीवृक्षस्य अवयवीभूतो य: काण्डस्तस्य एव विकार: इदम् भस्म इति बोध्यम् , एवं दधित्थस्य अवयवो दाधित्थ:—"अनुदात्तादेश्च" [ ४।३।१४० ] इति अञ् । तस्य दाधित्थस्य विकार: इति अनेन प्रकृतेन सूत्रेण पुनरपि अञ् तेन दाधित्थं भस्म , एवं कपित्थ: वृक्षविशेष: [ कयेत्बेल इति गौड़ीया:, कथ इति हिन्दीभाषायाम, wood apple इति आङ्गला:], तस्य कपित्थस्य अवयव इति कापित्थ:—'अनुदात्तादेश्च" [४।३।१४०] इति अञ् । तत: कापित्थस्य विकार इति प्रकृतेन सूत्रेण भूयोपि अञ् तेन कापित्थम् भस्म । एवम् देवदारु इति वृक्ष: । तस्य अवयव इति दैवदारव— अञ् "ओरञ्" [ ४।३।१३९ ] इति सूत्रेण । ततस्तस्य विकार: इति अनेन प्रकृतेन पुनरपि अञ तेन दैवदारव: यूप: । एवम पलाश इति वृक्ष: । तस्यावयव इति अञ —पलाशादिभ्यो वा [ ४।३।१४४ ] इति सूत्रेण—तेन पालाश: । तस्य विकारो भस्म इति प्रकृतेन अनेन भूयोऽपि अञ् तेन पालाशं भस्म । कपोतस्य अवयव इति कापोत:—अञ् "प्राणिरजादिभ्योऽञ्" इति सूत्रेण । तस्य विकार: इति कापोतम् भस्म अत्र अञ् अनेन प्रकृतेन सूत्रेण ! एवं उष्ट्रस्य अवयवो औष्ट्रक: । "उष्ट्राद्वुञ्" ( ४।३।१५७ ) इति वक्ष्यमाणसूत्रेण । तत: औष्ट्रकस्य विकारो भस्म इति औष्ट्रकम् भस्म । पुनरपि अनेन अञ् । उमाया: अवयव इति औमक:—"उमोर्णयोर्वा" ( ४।३।१५० ) इति वुञ् । तस्य विकारो भस्म इति औमकम्—अञ् प्रकृतेन । एणी हरिणी । तस्या अवयव इति ऐणेय:—"एण्या ढञ्" ( ४।३।१५९ ) इति ढञ् । ऐणेयस्य विकारो भस्म इति ऐणेयम्—प्रकृतेण अञ् । कंसीयस्य विकार: इति कांस्य: "कंसीय—४।२।१६८" इत्यादिना यञ् । तस्य अवयव: इति अञ्—कांस्य:—अनेन प्रकृतेन अञ् । ञकारित् प्रत्ययान्तेभ्य एव अञ् स्यात्—नान्यत्र । तस्य प्रत्युदा-हरणं यथा—विल्व: इति वृक्ष: । तस्य अवयव: इति वैल्व: "विल्वादिभ्योऽण्" इति अण् प्रत्यय: । नहि अण्प्रत्यय: ञित—तेन वैल्वस्य विकार: इति न अञ् अपितु मयट् "नित्यं वृद्धशरादिभ्य:" ( ४।३।१४४ ) इत्यनेन—तेन वैल्वमयम् । वैल्वमयं भस्म ।

१४८८। क्रीतवत् परिमाणात् ॥४।३।१५६॥

दी—। प्राग्वतेष्ठञित्यारभ्य ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्ते तथैव विकारेऽतिदिश्यन्ते। अणादीनामपवादः। निष्केण क्रीतम् नैष्किकम्। एवं निष्कस्य विकारोऽपि नैष्किकम्। शतस्य विकारः शत्यः। शतिकः।

Suffixes that are attached to words implying some kind of measure, in various senses, such as तेन क्रीतम् and the like illustrated in or sanctioned by the rules—beginning with "प्राग्वतेष्ठञ्" (५।१।१८), are added to the self-same words—in the sense of विकार also. These suffixes bar the suffix अण् and others.

मित—। क्रीतवत् क्रीत इव, 'तेन क्रीतम्" (५।१।३७) इत्यर्थे विहितप्रत्ययः इव इत्यर्थः। परिमाणात् परिमाणाभिधायिप्रातिपदिकात्। न खलु परिमाणशब्दो ह्यत्र रूढिवृत्तिवर्त्तन परिमाणविशेषमेव गृह्णाति अपि तु संख्यामपि। अत्र सूत्रस्य अयमाशयः—परिमाणविशेषवाचिनस्तथा संख्याभिधायिनश्च प्रातिपदिकात् (५।१।१८) "प्राग्वतेष्ठञ्" इति सूत्रात् आरभ्य ये प्रत्ययाः येन उपधिना (येन निमित्तेन—यस्मिन् अर्थे किञ्च—तेन क्रीतम् (५।१।३७) इत्यादौ विषये) विहितास्तेऽपि तेभ्य एव प्रातिपदिकेभ्यः विकारे (विकारार्थे—विकारे गम्यमाने) अतिदिश्यन्ते विधीयन्ते व्यवस्थाप्यन्ते इति यावत्। एते प्रत्ययाः अणादीनाम् प्रत्ययानाम् अपवादीभूताः। [उपाधिः निमित्तम—तथाहि उत्तररामचरिते—"न खलु वहिरुपाधीन् प्रीतयः संश्रयन्ते]। सरलार्थस्तु—"परिमाणात् क्रीत इव प्रत्यया भवन्ति तस्य विकारे इति एतस्मिन् विषये"—इति काशिका। "परिमाणवाचिनः विकारे क्रीतार्थवत् प्रत्ययो वाच्यः" इति भाषावृत्तिः—निष्कः इति सुवर्णादीनाम् परिमाणविशेषः। निष्केण क्रीतम् नैष्किकम्। अत्र ठक् प्रत्ययः। "तेन क्रीतम्" (५।१।३७) इति एतस्मिन् विषये "असमासे निष्कादिभ्यः" (५।१।२०) इति निष्कशब्दात् ठक्। अतएव निष्क इति

परिमाणवाचिनः शब्दात् विकारे एव अयं ठक्प्रत्ययो भवितुम् अर्हति—तेन निष्कस्य विकारो नैष्किकम्। एवं शतेन क्रीतम् इति वाक्ये तु "तेन क्रीतम्" (५।१।३७) इति विषये "शताच्च ठन्यतावशते" (५।१।२१) इति सूत्रेण ठन् यत् प्रत्ययौ च स्याताम्। तेन ठनि—शतिकम्; यति—शत्यम् इति रूपद्वयम्। किञ्च एतौ प्रत्ययौ विकारे अपि शतशब्दात् परिमाणाभिधायिनो भवितुम् अर्हतस्तेन शतस्य विकारः=शतिकः, शत्यः। एवम् सहस्रेण क्रीतम् इति वाक्ये "तेन क्रीतम्" (५।१।३७) इति विषये "शतमानविंशतिकसहस्रवसनादण्" [ ५।१।२७ ] इति अण्, साहस्रम्। अतएव सहस्रस्य विकारोऽपि साहस्रम्। [ अपिच "लुक् च क्रीतवत्। द्विसहस्रः। द्विसाहस्रः" इति भाषावृत्तिः। अयमर्थः—"अध्यर्द्धपूर्व्वद्विगोर्लुगसंज्ञायाम्" इति [ ५।१।२८ ] सूत्रविहितस्य द्विगुसमासात् परस्य असंज्ञायाम् क्रीताद्यर्थे विहितस्य प्रत्ययस्य लुक् च अत्र विकारार्थेऽपि अतिदिश्यते। तेन द्वयोः सहस्रयोः समाहारः इति द्विसहस्रम (द्विगुसमासः)। द्विसहस्रेण क्रीतम इति पूर्व्ववत् अण्=द्विसाहस्रम। तस्य च अण् प्रत्ययस्य "अध्यर्द्ध—" ५।१।२८ इत्यादिना नित्यमेव लुकि प्राप्ते "विभाषा कार्षापणसहस्राभ्याम्" [ ५।१।२९ ] इति विकल्पः—तेन द्वि-सहस्रः द्वि-साहस्रः इति रूपद्वयम्। अतएव द्वि-सहस्रस्य विकारः इति द्वि-सहस्रः, द्वि-साहस्रः इत्यत्रापि रूपद्वयम्। एवं द्वयोः निष्कयोः समाहारः द्विनिष्कम्। "तेन क्रीतम" [ ५।१।३७ ] इत्यर्थे "असमासे निष्कादिभ्यः" [ ५।१।२० ] इति समासे ठञ्। द्विनैष्किकम्। अस्य ठञ्प्रत्ययस्य च "द्वित्रिपूर्व्वान्निष्कात्" [ ५।१।३० ] इति विकल्पेन लुक्—तेन द्विनिष्कम् इत्यपि रूपम्। अतएव द्वि-निष्कस्य विकारः इत्यर्थे अपि द्वि-निष्क-स्तथा द्विनैष्किकः इति रूपद्वयम् ]।

१४८८। उष्ट्राद्वुञ्॥ ४।३।१५७॥

टी—। प्राण्यञोऽपवादः। औष्ट्रकः।

The suffix वुञ् is added to the word उष्ट्र in the sense of विकार or अवयव।

मित—। विकारे अवयवे च गम्ये उष्ट्रशब्दात् वुञ्प्रत्ययः स्यात्। अयं

प्रत्यय: "प्राणिरजतादिभ्योऽञ्" (४।३।१५४) इति प्राणिवाचिभ्योविहितस्य अञ् प्रत्ययस्य अपवाद: ।

१५०० । उमोर्णयोर्वा ॥ ४।३।१५८ ॥

टी— । औमम् । औमकम् । और्णम् । और्णकम् । वुञ्-भावे यथाक्रममणञौ ।

The suffix वुञ् is optionally attached to the words उमा and ऊर्णा in the aforesaid sense.

मित— । विकारे अवयवे च गम्ये उमाशब्दात् ऊर्णाशब्दाच्च वुञ् प्रत्ययो वा स्यात् । वुञोऽप्राप्तिपक्षेतु उमाशब्दात् अण् स्यात् औमम् ; ऊर्णाशब्दाच्च अञ् स्यात्— और्णम् ।

१५०१ । एण्या ढञ् ॥ ४।३।१५९ ॥

टी— । ऐणेयम् । एणस्य तु ऐणम् ।

The suffix ढञ् [ a bar to अञ् ] is attached to the word एणी in the aforesaid sense.

मित— । एणी हरिणी तथाहि—"एणी गर्भादलसगमनाश्रावके: रुद्धपादा" इति एणी इति शब्दात् विकारे अवयवे च गम्ये ढञ्प्रत्यय: स्यात् । "प्राणिरजता-दिभ्योऽञ्" [ ४।३।१५४ ] इति विहितस्य अञ्प्रत्ययस्य अपवाद: । एण्या: विकार: इति ढञ् ऐणेयं मांसम् । एण्या अवयव इति ऐणेयं पदम्, ऐणेयी जङ्घा । एणी इति स्त्रीलिङ्गनिर्द्देश: कथम् ? पुंलिङ्गे माभूत् इति ज्ञापयितुम् । एण: हरिण: । तस्य विकार: अवयवो वा ऐणम—अत्र अञ् एव । ऐणं मांसम् ।

१५०२ । गोपयसो र्यत् ॥ ४।३।१६० ॥

टी— । गव्यम् । पयस्यम् ।

In the aforesaid sense the suffix यत् is attached to the words गो and पयस् ।

मित—। विकारे अवयवे च गम्ये गो पयस् इति एताभ्याम यत् स्यात्। गो: विकार: गव्यं दुग्धम् एवं पयस: विकार: पयस्यम्। पय: दुग्धं जलं वा।

१५०३। द्रोश्च ॥४।३।१६१॥

दी—। द्रुमः तस्य विकारोऽवयवो वा द्रव्यम्।

The suffix यत् is attached to the word द्रु in the aforesaid sense.

मित—। द्रु: द्रुम: वृक्ष: इति। तस्य विकार: अवयवो वा द्रव्यम्। द्रव्यम् मूलं द्रव्यं काष्ठम।

१५०४। माने वय: ॥ ४।३।१६२ ॥

दी—। द्रोरित्येव। द्रुवयम्। यौतवं द्रुवयम् पाय्यम् इति मानार्थकं त्रयम्।

The suffix वय is attached to the word द्रु in the sense of some measurement.

मित—। द्रुशब्दात् माने वयप्रत्यय: स्यात्। मान: परिमाणविशेष:। काशिकाकारस्तु "माने" इत्यस्य अर्थ: "विकारविशेषे माने" इति मत्वा वय-प्रत्ययं यत्प्रत्ययस्य बाधकम् आह।

१५०५। फले लुक् ॥ ४।३।१६३ ॥

दी—। विकारावयवप्रत्ययस्य लुक् स्यात् फले। आमलक्या: फलम् आमलकम्।

Suffixes used in the aforesaid sense elide,. provided fruits are implied.

मित—। फले गम्ये, प्रत्ययस्य लुक् स्यात्। विकारे अवयवे च गम्यमाने ये प्रत्यया विहिता तेषां लुक स्यात्, यो विकार: अवयवो वा स चेत् फलम्

एव भवतिइत्यर्थः, "फलितस्य वृत्तस्य फलम् अवयवो भवति विकारश्च पल्लवितस्यैव पल्लवः" इति काशिका। आमलक्याः फलम (फलिताया आमलक्या, अवयवः फलम) इति अण्—"अवयवे च प्राण्योषधिवृत्तेभ्यः" (४।३।१३५) इति सूत्रेण। अस्य अणप्रत्ययस्य अनेन लुक्—तेन आमलकी इति स्थितिः। ततः "लुक् तद्धितलुकि" [ १।२।४९ ]—[ तद्धित लुकि सति स्त्रीप्रत्ययस्य उपसर्जनस्य लुग् भवति ] इति सूत्रेण आमलकीति ङीषप्रत्ययस्यालुक् तथा सति आमलकम् इति रूपम्। आमलकम् फलम। [ एवं बदरी इति वृत्तस्य अवयवो विकारो वा फलम इति बदरम्। कदल्याः फलं कदलम। वकुलस्य फलं वकुलम्। ]

१५०६। प्लक्षादिभ्योऽण् ॥ ४।३।१६४ ॥

टी—। विधानसामर्थ्यान्न लुक्। प्लाक्षम्।

The suffix अण् is attached to the word प्लक्ष and other coming under the head प्लक्षादि।

मित—। प्लक्ष इत्येवमादिभ्यः प्रातिपदिकेभ्यः फले विकारत्वेन अवयवत्वेन वा विवक्षिते अण् प्रत्ययः स्यात्। अयं "प्राण्योषधिवृत्तेभ्यः" [ ४।३।१३५ ] इति विहितस्य बाधकः। प्रत्ययस्य "फले लुक्" (४।३।१३३) इति लुक् न स्यात्—लुग्विधिम् आदौ प्रोच्य पश्चादेव तस्य अण्प्रत्ययस्य विशिष्य विधानात्। परत्वात् अयं विधिः लुग्विधिं बाधते इति भावः। प्लक्षः अश्वत्थो वृक्षः। तस्य फलम् इति प्लाक्षम्। प्लक्षादिर्यथा—प्लक्ष, न्यग्रोध, अश्वत्थ, इङ्गुदी, शिग्रु, बृहती, ककुभ इत्यपि इति भाषावृत्तिः। [ अश्वत्थस्य फलम् आश्वत्थम्। एवं काकुभम्। वार्हतम् इत्यादि ]

१५०७। न्यग्रोधस्य च केवलम् ॥७।३।५॥

टी—। अस्य न वृद्धिरैचागमश्च। नैयग्रोधम् ॥

The word न्यग्रोध standing by itself—takes no Briddhi substitute of its first vowel; to the contrary, an ऐकार is inserted between the नकार and गकार of the word; thus the word

is transformed into नैयग्रोध—before a Taddhita suffix that elides अकार, णकार or ककार।

मित—। "न य्वाभ्याम् पदान्ताभ्याम् पूर्वौ तु ताभ्यामैच्" इति (७।३।३) सूत्रम्। अस्य अर्थस्तु—"यकारवकाराभ्याम् उत्तरस्य अचाम् आदेरचः स्थाने वृद्धि र्न भवति—ताभ्याम् तु यकारवकाराभ्याम् पूर्व्वम् ऐजागमो भवतो ञिति णिति किति च तद्धिते परतः"—काशिका। ततः परं "द्वारादीनां च" (७।३।४), ततश्च इदम् सूत्रं वर्त्तते। अत्र "न य्वाभ्याम्—" इत्यस्य अनुवृत्तिरस्ति तेनं अस्य सूत्रस्य अयमर्थः—"न्यग्रोधशब्दस्य केवलस्य यकारात् उत्तरस्य अचाम् आदेरचः स्थाने वृद्धि र्न भवति, तस्माच्च पूर्व्वम् ऐकारागमो भवति"—काशिका। अतएव न्यग्रोधस्य विकारः इति प्लक्षादित्वात् अण्। अणि परे नकारस्य तथा यकारस्य च मध्ये ऐकारस्य आगमः स्यात्—तेन नैयग्रोधम् इति रूपम्। नैयग्रोधं फलम्। नैयग्रोधः चमसः। न्यग्रोधः वटवृक्षः। "केवलस्य" इति किम्? न्यग्रोधमूले भवाः शालय इति अण् "तत्रभवः" (४।३।५३) इति सूत्रेण। तेन न्याग्रोधमूलाः शालयः इति। अत्र न ऐकारागमः अपितु वृद्धिरेव।

१५०८। जम्ब्वा वा ॥ ४।३।१६५ ॥

**टी—। जम्बूशब्दात् फले अण् वा स्यात्। जाम्बवम्। पक्षे ओरञ्—तस्यलुक्-जम्बु।**

To imply fruits, the suffix अण् is optionally added to the word जम्बू। जम्बू—black berry; (जाम इति गौड़ीयाः)।

मित—। फले वाच्ये जम्बूशब्दात् अण् वा स्यात्। जम्ब्वाः जम्बूवृक्षस्य फलम् इति अण् जाम्बवम्, जाम्बवं फलम्। अत्रापि अण्प्रत्ययस्य विधानसामर्थ्यात् "फले लुक्" (४।३।१३३) इति न लुक्। अण्प्रत्ययस्य अप्राप्तिपक्षे तु "ओरञ्" (४।३।१३९) इति अञ्। तस्य च "फले लुक्" (४।३।१६३) इति अञ् प्रत्ययस्य लुक्, तेन जम्बु इति रूपम्, जम्बुफलं, जम्बूनि फलानि।

१५०९। लुप् च ॥ ४।३।१६६ ॥

टी—। जम्ब्वाः फलप्रत्ययस्य लुप् वा स्यात्। लुपि युक्तवत्। जम्ब्वाः फलं जम्बूः।

The suffix joined to the word जम्बू to imply its fruit, optionally elides. [ This rule specially sanctions the elision of अण् ]

मित—। फले वाच्ये जम्बू इति प्रातिपदिकात् विहितस्य प्रत्ययस्य लुप् स्यात्। जम्बूशब्दात् तावत् ओरञ ( ४।३।१३९ ) इति अञ् विधीयते। तस्य च "फले लुक्" ( ४।३।१६३ ) इति "लुक्" स्यात्। अपि च जम्बूशब्दात् "जम्ब्वा वा" ( ४।३।१६५ ) इत्यनेन वैकल्पिकः अण्प्रत्ययश्च स्यात्। विधानसामर्थ्यात् तस्य लुक् न स्यात्। अञ्प्रत्ययस्य लुकि—जम्बु फलम्, अण्प्रत्यये परे जाम्बवं फलम् इति। अनेन सूत्रेण फलप्रत्ययस्य "लुप्" स्यात् इति कथयति, किं नामप्रत्ययस्य लुप् स्यात्? अञः लुकि "जम्बुफल" इति भवति। तथैव स्यात्, तर्हि किमनेन इति चेत्—नैवम्। लुग्लुपयोर्युक्तवद्भावकृतो विशेषः।" लुकि युक्तवत् न स्यात् परं "लुपि युक्तवत् स्यात्" तथाहि सूत्रं ( १।२।५१ ) "लुपि युक्तवद् व्यक्तिवचने।" "लुपि" लुवर्थे "युक्तवत्" प्रकृत्यर्थवत् "व्यक्तिवचने" लिङ्गसंख्ये स्याताम् इति। जम्बू इति वृक्षवाची शब्दस्तु स्त्रीलिङ्गः। तस्य फलम् इति अण्, तस्य लुप्। लुपि सति—( यत् वाच्यं नपुंसकलिङ्गं—तम् अनादृत्य एव ) प्रकृतिवत् लिङ्गवचने; तेन जम्बूः इति अभिधेये अपि फले स्त्रीलिङ्गे एव प्रयोगः स्यात्। लुकि तु तथा न स्यात् इति लुक्लुपयोर्विशेषः। स्पष्टमेव लिख्यते—जम्ब्वाः फलं इति अभिधेये—

(१) जाम्बवं फलं [ जम्ब्वा वेति सूत्रेण अण् ]—बहुवचने जाम्बवानि फलानि।

(२) जम्बूः फलं [ अणः—"लुप्चे"ति सूत्रेण लुप्। लुपि युक्तवद्भावः ] बहुवचने तु जम्बूः फलानि। फलानि इत्यस्य बहुत्वे अपि "जम्ब्वाः" इति प्रकृतेरेकत्ववलात् जम्बूः इति एकवचनमेव।

(३) जम्बु फलं [ अञ्प्रत्ययः—तस्य च फले लुक् इति लुक्, न युक्तवद्भावः ]। बहुवचने तु जम्बूनि फलानि।

दी—। फलपाकशुषामुपसंख्यानम्। (वार्त्तिक)।

Suffixes attached to words expressive of annuals or biennuals—to imply their fruits—elide; the elision passing by the term लुप् and not लुक्।

मित—। "फल—"इति—फलानां पाकः पक्वता इति फलपाकः। तेन शुष्यन्ति इति फलपाकात्शुषधातोःक्विपप्रत्ययः—फलपाकशुष्। तेषाम् इति फलपाकशुषाम्। ये वृक्षाः ओषधयश्च पक्वतायाम् एव गतेषु सर्वेषु फलेषु, शुष्यत् म्रियन्ते ते फलपाकशुषः—यथा व्रीहियवादयः। तेषाम् "यवादीनां प्रत्ययस्य लुप स्यात्" फले अभिधेये। व्रीहिः धान्यम्। व्रीहीनाम् फलानि इति अण्प्रत्ययः "अवयवे प्राग्वौषधि वृक्षेभ्यः [४।३।१३५] इति सूत्रेण। तस्य लुप, लुपि च युक्तवद्भावः—अत एव व्रीहिः इति रूपम्। बहुवचने व्रीहयः। मुद्गः—(मुग इति गौड़ीयाः) मुद्गानां फलानि इति पूर्ववत् अण। तस्य लुप—युक्तवद्भावश्च, तेन मुद्गः इति रूपम्। बहुवचने मुद्गाः, व्रीहयः फलानि, मुद्गाः फलानि, एवं यवानां फलानि यवाः, तिलानां फलानि तिलाः, एवं गोधूमाः, माषाः।

दी—। पुष्पमूलेषु बहुलम्। (वार्त्तिक)।—

मल्लिकायाः पुष्पं मल्लिका। जात्याः पुष्पं जाती। विदार्य्या मूलं विदारी। बहुलग्रहणान्नेह—पाटलानि पुष्पाणि साल्वानि मूलानि। बाहुलकात् क्वचिल्लुक्। अशोकम्। करवीरम्।

Suffixes attached to words expressive of flower plants or rootplants often (बहुलम्) elide, to imply flowers or roots; the elision passing by the term लुप। [The word "root plant" is purposely used—only for the sake of clearness; the word root is alone to suffice. Root means:—

[i] the part of a plant which is fixed in the earth, and which draws up sap from the soil;

[ii] an edible root;

[iii] a growing plant together with its root (Chamber's Twentieth century dictionary of the English Language). Here the third sense is implied and the root is enough to bring out the real meaning of "मूल" ( मूलेषु ) in the sutra ]. The word बहुलम् means often i.e. in many a case the suffix elides ; sometimes it does not and sometimes the suffix elides passing by the term लुक् and not लुप्।

नित— । "पुष्पलतावाचिप्रातिपदिकेभ्यस्तथा मूलविशेषवाचिशब्देभ्यश्च विहितस्य विकारावयवयोः प्रत्ययस्य लुप् स्यात्" । लुपि सति युक्तवद्भावश्च । मल्लिका इति काचित् पुष्पलता, तस्याः पुष्पं मल्लिका, बहुवचने मल्लिकाः, युक्तवद्भाववशात् अभिधेये-ऽपि पुष्पे अयं स्त्रीलिङ्ग एव प्रयुज्यते । तथाहि श्रीमद्भागवते—"भगवानपि ताः रात्रीः शारदोत्फुल्लमल्लिकाः" । जाती इति पुष्पलताविशेषः । तथाहि "स्फुरति जातीलता कुसुमाकारे ।" तस्याः पुष्पं जाती । अयमपि युक्तवद्भावत्वात् स्त्रीलिङ्ग एव प्रयुज्यते, एवं नवमल्लिकायाः पुष्पं नवमल्लिका ।

मूलवाचिभ्यः विहितस्य यथा—विदारी इति मूलविशेषः । तस्याः विदार्य्याः मूलम् इति विदारी । अत्रापि युक्तवद्भाववशात् स्त्रीलिङ्ग एव प्रयोगः, एवं अंशुमत्याः मूलम् अंशुमती । बृहत्याः मूलं बृहती । कुत्रापि प्रत्ययस्य लुप् न स्यात् यथा—पटलस्य पुष्पाणि इति अण् "अवयवे प्राण्योषधिवृक्षेभ्यः" ( ४।३।१३५ ) इति सूत्रेण । तस्य न लुप्—तेन पाटलं पुष्पम् । पटलानि पुष्पाणि । सल्वानां ( शल्वानां वा ) मूलमिति पूर्ववत् अण् तस्य न लुप् तेन साल्वम (शाल्वं) मूलम् । साल्वानि (शाल्वानि) मूलानि ।

अपिच सूत्रे बहुलम् इत्यस्य ग्रहणात् क्वचित् पुष्पे मूले च अभिधेये पुष्पमूल-वाचिभ्यो विहितस्य प्रत्ययस्य "लुक्" ( न खलु "लुप्" ) अपि स्यात्—यथा अशोकस्य पुष्पम् इति अशोकम् । लुकि च न युक्तवद्भावः । तेन अशोकस्य पुंलिङ्गत्वे अपि अत्र फलवाचित्वात् क्लीवत्वम् एव । करवीरस्य पुष्पं इति करवीरम् । अत्रापि लुकि च न युक्तवद्भावः—तेन पुंलिङ्गस्यापि करवीरशब्दस्य फलवाचित्वात् क्लीवत्वम । तथाहि मृच्छकटिके "कण्ठेन बद्धां करवीरमालां", करवीरघटिताम् मालामित्यर्थः ।

एवं कदम्बस्य पुष्पं कादम्बम्—अत्र लुक् एव। [अपिच बहुलग्रहणात् क्वचित् फले अभिधेये अपि "फले लुक्" ( ४।३।१६३ ) इति लुक् न स्यात्—यथा वैल्वानि फलानि अत्र "विल्वादिभ्योऽण्" ( ४।३।१३६ ) इति विहितस्य अणो न लुक् ]

१५१० । **हरीतक्यादिभ्यश्च ॥ ४।३।१६७ ॥**

**टी— । एभ्यः फलप्रत्ययस्य लुप् स्यात् । हरीतक्यादीनाम् लिङ्गमेव प्रकृतिवत् । हरीतक्याः फलानि हरीतक्यः ।**

Suffixes attached to the word हरीतकी and some others coming under the हरीतक्यादि class to imply fruits, elide ; the elision passing by the name लुप् ( and not लुक् ) ।

मित— । हरीतकी इत्येवमादिभ्यः प्रातिपदिकेभ्यः फले अभिधेये विहितस्य अणादेः प्रत्ययस्य लुप् स्यात् ; "फले लुक्" ( ४।३।१६३ ) इति विहितस्य लुक् इत्यस्य अपवादः ।

ननु लुकि प्राप्ते कथं लुपो विधानमितिचेत्—"युक्तवद्भावे सति स्त्रीप्रत्ययश्रवणे च विशेषः" इति प्रदर्शयितुम् एव ।

पुनरपि चोदयति—ननु तर्हि "लुपि युक्तवद्व्यक्तिवचने" [ १।२।५१ ] इति सूत्रेण हरीतक्यादीनां फलप्रत्ययस्य लुपि सति युक्तवत् [ प्रकृतिवत् ] व्यक्तिवचने [ लिङ्ग वचने ] एव स्याताम्—तत् किं भवेदिति समाधत्ते—"हरीतक्यादीनाम् व्यक्ति" रिति काशिकाभाषावृत्तिकर्तौ । हरीतक्यादीनां फलप्रत्ययस्य लुपि सति प्रकृतिवत् व्यक्तिरेव [ लिङ्गमेव ] स्यात्, न खलु वचनम्—अतएव उक्तम् श्रीमता दीक्षितेन "हरीतक्यादीनां लिङ्गमेव प्रकृतिवत्"—न खलु वचनमपि इति ज्ञेयम् । हरीतकी इति वृक्षविशेषः—स्त्रीलिङ्गान्तः शब्दः । तस्याः फलम् इति अण् प्रत्ययः—"अवयवे प्राण्योषधिवृक्षेभ्यः" [ ४।३।१३५ ] इति सूत्रेण । तस्य अण् प्रत्ययस्य अनेन लुप् ; लुपि सति प्रकृतिवत् लिङ्गमेव—तेन हरीतकी फलम् इति । बहुवचने तु हरीतक्याः फलानि इति हरीतक्यः फलानि । अत्र "हरीतक्याः" इति प्रकृतेः एक-वचनान्तत्वेऽपि "फलानि" इति अभिधेयस्य बहुत्वम् अनुसृत्य हरीतक्यः इति बहुवचने एव प्रयोगः—यतः हरीतक्यादीनाम् वचनं प्रकृतिवत् न स्यात् । परं "फलानि"

इत्यस्य क्लीवत्वे अपि हरीतक्यइत्यस्य स्त्रीत्वं हरीतकी इति प्रकृतेर्लिङ्गस्य एव प्रत्यये वर्त्तमानत्वात्।

हरीतक्यादिर्यथा—हरीतकी, कोषातकी, द्राक्षा, शेफालिका, कण्टकारिका, नखरञ्जनी [नखरजनी इति केचित्], शष्कण्डी, दाड़ी, दोडी, श्वेतपाकी, अर्जुनपाकी, काला, ध्वाङ्क्षा, गर्गरिका, पिप्पली, चिञ्चा, गभीका।

एवं कोशातक्याः [ कोषातक्याः ] फलं कोशातकी [ कोषातकी ]। द्राक्षायाः फलं द्राक्षा, नखरजन्याः फलं नखरजनी, शेफालिकायाः फलं शेफालिका, कण्टकारिकायाः फलं कण्टकारिका इत्यादयो द्रष्टव्याः।

**१५११। कंसीयपरशव्ययोर्यञञौ लुक् च ॥ ४।३।१६८ ॥**

**टी—। कंसीयपरशव्यशब्दाभ्यां यञञौ स्तश्छयतोश्च लुक्। कंसाय हितम् कंसीयम्, तस्य विकारः कांस्यम्। परशवे हितम् पारशव्यम्। तस्य विकारः पारशवः।**

In the sense of विकार, the suffix यञ is added to the word कंसीय ( itself formed with the suffix छ affixed to कंस ) and the suffix अञ is added to the word परशव्य ( itself formed with the suffix यत्—affixed to the word परशु ); the छ suffix by which कंसीय is formed, as will as the यत् suffix, by which the word परशव्य is formed—elide before यञ and अञ respectively; the elision passing by the denomination लुक् [ and not लुप् ].

मित—। कंसाय हितम् इति वाक्ये कंसशब्दात् छप्रत्ययः, "प्राक्क्रीताच्छः" [ ५।१।१ ] इति सूत्रेण। अस्यार्थः—"तेन क्रीतम्" [ ५।१।३७ ] इति सूत्रम्, अस्मात् सूत्रात् प्राक् 'तस्मै हितम्' इत्येवमर्थे छप्रत्ययः स्यात्। अतएव कंसाय हितम् इति छप्रत्ययस्तेन कंसीयम् इति रूपम्, एवं परशवे हितम् इति वाक्ये "उगवादिभ्यो यत्" [ ५।१।२ ] इति शब्देन परशु-इत्यस्य उवर्णान्तत्वात् अस्मात् तस्मै हितम् इत्यर्थे छस्य अपवादको यत्प्रत्ययः स्यात्, तेन परशवे हितम् इति यत्—ततः परशव्यम् इति

कंसीय इति कृत-छ-प्रत्ययान्तशब्दात् यञ्प्रत्ययस्तथा परशव्यइतिकृतयत्-प्रत्ययान्तशब्दात् अञ्प्रत्ययश्च स्याताम् "तस्य विकारः" इति एतस्मिन्नर्थे ; तथा यञ् अञ् इति यथाक्रमं विहितयोः प्रत्यययोः सन्नियोगेन च कंसीय इति शब्दस्य छ-प्रत्ययस्य एवम् परशव्य इति शब्दस्य यत् प्रत्ययस्य च लुक् स्यात्, (लुक्—न खलु लुप)। तेन नैव युक्तवद्भावः इति बोद्धव्यम्। कंसीयस्य विकारः इति यञ—यञि परे छ-प्रत्ययस्य लुक् तथा सति कंस यञ इति स्थितिः, ततः आदिस्वर वृद्धौ कांस्यम् इति रूपम्। एवं परशव्यस्य विकारः इति परशव्यशब्दात् अञ, अञि परे यत्प्रत्ययस्य लुक; तथा सति परशु अञ इति स्थितिः, ततः पारशवः इति रूपम्।

ननु परशव्य इत्यस्मात् "अनुदात्तादेश्च" [ ४।४।४० ] इति सूत्रेण अञ्प्रत्यये सिद्धे कथं सूत्रेऽस्मिन् अस्य ग्रहणमिति चेत् अञि परे यत्प्रत्ययस्य लुग्विधानार्थमेव इति ज्ञेयम्।

पुनरपि चोदयति—ननु "यस्येति च" [ ६।४।१४८ ] इति सूत्रेण लोपे कृते "हलस्तद्धितस्य" [ ६।४।१५० ] इति यलोपः स्यात्, तर्हि किमनेन सूत्रेण इति चेत्—नैवम्, हलस्तद्धितस्य इति सूत्रे "ईति परतो लोपो भवति"—न तस्य प्रसङ्गः खलु अत्रास्ति इति सर्व्वमनवदातम्।

इति प्राग्दीव्यतीयाः समाप्ताः।

## १५१२। प्राग्वहतेष्ठक्॥ ४।४।१॥

## टी—। तद्वहतीत्यतः प्राक् ठगधिक्रियते।

There is the rule "तद्वहतिरथयुगप्रासङ्गम्" [ ४।४।७६ ], and the sufiix ठक will be applicable in all cases coming within the range of this very rule.

मित—। "तद्वहतिरथयुगप्रासङ्गम" [ ४।४।७६ ] इति सूत्रं वक्ष्यति। "प्राक वहतेः" इति—यस्मिन् सूत्रे "वहति" इति संश्रूयते, तस्मात् प्राक्, ये अर्थाः क्रमशः वक्ष्यन्ते, तेषु "ठक्" इति प्रत्ययः अधिकृतः स्यात् इति बोध्यम्। उदाहरणं यथा—सूत्रकारो वक्ष्यति—"तेन दीव्यति खनति जयति जितम्" ( ४।४।२ ) इत्यत्र। अतएव अक्षैः दीव्यतीति एतस्मिन्नर्थे ठक् स्यात्—आक्षिकः।

टी—तदाहेति माशब्दादिभ्य उपसंख्यानम् ॥ (वार्त्तिक)। मा शब्दः कारि इति य आह स माशब्दिकः।

The three words माशब्द, नित्यशब्द and कार्य्यशब्द—commonly known as माशब्दादि must be included among those—who take the suffix ठक् after them; these three take the same suffix in the sense of "तत् आह" (utters it).

मित—। "तत् आह" = तत् प्रवक्ति—इति एतस्मिन् विषये "माशब्दादिभ्यः" माशब्द, नित्यशब्द, कार्य्यशब्द इति त्रिभ्यः "उपसंख्यानम्" ठक् प्रत्ययस्य परिगणनं कर्त्तव्यम्। माशब्दः इति आह यः स माशब्दिकः। एवं नित्यशब्दः इति य आह स नैत्यशब्दिकः, कार्य्यशब्द इति य आह स कार्य्यशब्दिकः। कारि इति यत् श्रीमद्दीक्षितकर्त्ता दृश्यते तस्य अर्थस्तु—न शब्दः अकारि इति। मा शब्दः अकारि इति य आह स माशब्दिकः।

१५१४। स्वागतादीनां च ॥ ४।३।८६॥

टी—। ऐच् न स्यात्। स्वागतम् इत्याह स्वागतिकः। स्वाध्वरिकः, स्वाङ्गस्य अपत्यं स्वाङ्गिः। व्यङ्गस्य अपत्यं व्याङ्गिः। व्याड़स्य अपत्यं व्याड़ि। व्यवहारेण चरति इति व्यवहारिकः। स्वपतौ साधु स्वापतेयम्।

The words that fall within the category of स्वागतादि never have an "ऐच्" (ऐ or औ) inserted within their body; to the contrary, the first of all the vowels—containd by the said words undergoes lengthening before a Taddhita suffix that elide ञ or ण or क।

मित— स्वागत इत्येवमादीनाम् एच् इत्यागमो नस्यात्; अपितु तेषु स्थितानाम् अचां मध्ये आद्यस्य अचः वृद्धिरेव स्यात् ञिति, णिति, किति च तद्धितप्रत्यये परे। स्वागतम् इत्याह इति ठक्—स्वागतिकः।

स्वागतादि र्यथा—स्वागत, स्वध्वर, स्वङ्ग, व्यङ्ग, व्यवहार:, स्वपति। स्वध्वरेण चरति इति "चरति" (४।४।८) इति सूत्रेण ठक्—स्वाध्वरिक:। न ऐच: आगम:। परम् अचां मध्ये आद्यस्य अच:—अत वृद्धिरेव। स्वङ्गस्य अपत्यम् पुमान् इति "अत इञ्" (४।१।९५) इति इञ्। पूर्ववत् आद्यस्य अचो वृद्धिरेव, एवं व्यङ्गस्य अपत्यम् पुमान् इति पूर्ववत् इञ—आदिस्वरवृद्धिश्च तेन व्यङ्गि:। व्याड़स्य अपत्यं पुमान् इति व्याड़ि:—पूर्ववत् एव सिद्ध:। व्यवहारेण चरति इति व्यव- । हारिक:—"चरति"(४।४।८) इति ठक् आदिस्वरवृद्धि:। स्वपतौ ढञ स्वापतेयम् ढञ तु—"पथ्यतिथि वसति स्वपते ढंञ" (४।४।१०४) इति सूत्रेण।

## आह्नौ प्रभूतादिभ्य:। (वा)। प्रभूतमाह प्राभूतिक:। पार्य्याप्तिक:।

In the sense of "तदाह" the suffix ठक् is added to the words प्रभूत and पर्य्याप्त and the like.

मित—। तदाह इत्यर्थे प्रभूतादिभ्य: (प्रभूत पर्य्याप्त इतेश्ताभ्याम्) ठक् स्यात्। प्रभूतमाह प्राभूतिक:। पर्य्याप्तमाह पार्य्याप्तिक:।

## पृच्छतौ सुस्नातादिभ्य:॥ (वा) सुस्नातं पृच्छति सौस्नातिक:। सौखशयनिक:—अनुशतिकादि:।

In the sense of ततपृच्छति—the self same suffix is added to the words coming under the head सुस्नातादि।

मित—। तत् पृच्छति इति एतस्मिन् विषये सुस्नात सुखरात्रि सुखशयन इति एतेभ्य: ठक् स्यात्। सुस्नातम् पृच्छति इति सौस्नातिक:। तथाहि "सौस्नातिको यस्य भवत्यगस्त्य:"। अपि भवत: स्नानं सुष्टु संभूतमिति य पृच्छति स सौस्नातिक:। सुखशयनं पृच्छति सौखशायनिक:। अपि भवत: सुखशयनम् आसीत इति य: पृच्छति स इत्यर्थ:, एवं सुखरात्रिम् पृच्छति इति सौखरात्रिक:। अपि भवत: सुखरात्रि: अभूत इति य: पृच्छति स एव।

ननु सुखशयन इत्यस्य पूर्व पदस्य उत्तरपदस्य च द्वयोरेव वृद्धिः कथं स्यात इति चेत—उच्यते ?—"अनुशतिकादीनां च" ( ७।४।२० ) इति सूत्रेण।

**गच्छतौ परदारादिभ्यः ।(वा) ॥ पारदारिकः । गौरुतल्पिकः ।**

In the sense of तत् गच्छति, the suffix ठक् is added to words belonging to the परदारादि class.

मित—। तत् गच्छति" इति एतस्मिन् अर्थे परदार इत्येवमादिभ्यः ठक् स्यात। परस्य दाराः इति परदाराः तान् गच्छति इति ठक पारदारिकः। गुरोः तल्पम् इति गुरुतल्पम्। गुरुशय्याइत्यर्थः। तत गच्छति इति ठक गौरुतल्पिकः। परदारादि यथा—परदार, गुरुतल्प। वस्तुतस्तु स्वागतादिः, प्रभृतादिः, सुस्नातादिः तथा परदारादिः—एते चत्वारः आकृतिगणा एव।

## १५१५। तेन दीव्यति खनति जयति जितम् ॥ ४।४।२ ॥

**दी।—अक्षै दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितम् आक्षिकम्।**

To denote the agent of the verbs दीव्यति ( plays or shines ) खनति (digs or execrates) जयति (to conquer—to defeat ) and जित् (everpowered or vanquished), the suffix ठक is attached to the words expressive of instruments of the actions implied by the aforesaid verbs.

मित—। तेन इति तृतीयासमर्थात् दीव्यति [ क्रीड़ति, शोभते ], खनति, जयति जितम् इति एतेषु एव अर्थेषु ठकप्रत्ययो भवेत। अक्षैर्दीव्यति इति अक्षशब्दात ठक—आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षै जयति इति आक्षिकम्। अक्षैर्जितम् इति आक्षिकम्। आक्षिकं धनम्। एवं शलाकेन दीव्यति इति शालाकिकः। हलेन खनति हालिकः। कुद्दालेन खनति कौद्दालिकः। मुद्गरेण जयति मौद्गरिकः। शलाकया जितं शालाकिकं द्रव्यम्। सूत्रे "तेन" इति

कथनात् कर्त्तृत्वम्, तेन देवदत्तेन जितम् इति प्रत्ययो न स्यात। कथमिति चेत— अनभिधानान्। प्रसिद्धम् करणम् एव अत्र अभिप्रेतम् तेन अङ्गुल्या खनति इति एतस्मिन् विषये प्रत्ययो न स्यात—अंगुल्याः खननत्वस्य करणत्वम् अप्रसिद्धमेव। अवतद्धितप्रत्ययः दीव्यति खनति जयति जितम् इति आख्यातस्य अर्थे एव विहितः। आख्यातस्तु विधा प्रधानम्। तथापि अत्र विहितस्तद्धितप्रत्ययः स्वभावादेव साधन-प्रधानः [ करणप्रधानः ]—तेन आक्षिकः इत्यत्र दीव्यति इत्यस्य अर्थात "अक्षैः" इत्यस्य एव अर्थः प्राधान्येन भासते। एवं कौद्दालिकः इत्यत्रापि "खनति" इत्यस्य अर्थात "कुद्दालेन" इति साधनस्य अर्थः खलु प्राधान्येन भासते एवं सर्व्वत्र बोध्यम्। "प्रत्ययार्थे संख्याकालयोरेव विवक्षा" इति काशिका। तेन आक्षिकः इत्यत्र अक्ष-साधनवर्त्तमानक्रीड़ाशीलः इति अर्थः। एवम् आक्षिकं धनम् इत्यत्र तु अक्षसाधना-तीतक्रीड़ा जितम् धनम् इत्येवार्थं आयाति।

१५१६। संस्कृतम् ॥ ४।४।३ ॥

टी—। दध्ना संस्कृतम् दाधिकम्। मारीचिकम्।

The suffix ठक is added to the word, expressive of some condiment with which some particular article of food is said to be seasoned.

मित—। तेन इति अनुवर्त्तते। ततोयमर्थः—तेन इति तृतीयासमर्थात संस्कृतम् इति एतस्मिन् विषये ठकप्रत्ययः स्यात। विद्यमानस्य एव वस्तुनः उत्कर्षाधानं संस्कारः। दध्ना संस्कृतं दाधिकम् अन्नम्। एवं मरीचेन संस्कृतम मारीचिकं खाद्यम्। एव शार्ङ्गवेरेण संस्कृतं शार्ङ्गवेरिकम्। पूर्व्वसूत्रात अस्य सूत्रस्य पृथक् करणं तु परसूत्रेण सह अस्य सम्पर्कं स्थापयितुमेव।

१५१७। कुलत्थकोपधादण् ॥ ४।४।४ ॥

टी—। ठकोऽपवादः। कुलत्थैः संस्कृतम् कौलत्थम्। तैन्तिड़ीकम्।

In the aforesaid sense the suffix अण [ and not ठक ] is attached to the word कुलत्थ as well as to words possessed of a penultimate क ।

मित— । कुलत्थ इति शब्दात् तथा ककारोपधात् प्रातिपदिकात् च तेन संस्कृतम इति एतस्मिन् विषये अणप्रत्ययो भवति । ठकप्रत्ययस्य अपवादः । कुलत्थम (कलाइ इति गौड़ीयाः) । तैः संस्कृतं कौलत्थम अन्नम । एवं तिन्तिड़ीकः इति अम्ल द्रव्यविशेषः । तैः संस्कृतम इति तैन्तिड़ीयकम् ।

१५१८ । तरति ॥ ४।४।५ ॥

दी— । उडुपेन तरति इति औड़ुपिकः ।

In the sense of तरति [ i.e. floats, crosses ], the suffix ठक is attached to the word expressive of some vehicle.

मित— । तेन इति तृतीयासमर्थात "तरति" इति एतस्मिन् विषये ठक स्यात । तरति प्लवते इत्यर्थः—"तितीर्षुं दुस्तरं मोहात उड़ुपेनास्मि सागरम्" इत्यत्र योऽर्थः विवक्षितः स एव अर्थः तरतीत्यस्य बोध्यः । उडुपेनतरति इति ठक औडुपिकः । एवं काण्डप्लवेन तरति काण्डप्लविकः । काण्डप्लवः वृक्षकाण्ड निर्मितो जलयानविशेषः एवं तृणप्लवेन तरति इति तार्णप्लविकः । शरप्लवेन तरति शारप्लविकः ।

१५१९ । गोपुच्छात् ठञ् ॥ ४।४।६ ॥

दी— । गौपुच्छिकः ।

In the aforesaid sense the suffix ठञ [ and not ठक ] is attached to the word गोपुच्छ ।

मित— । गोपुच्छेन तरतीति एतस्मिन् विषये गोपुच्छशब्दात् ठञप्रत्ययः स्यात । ठक इत्यस्य अपवादः । गोपुच्छेन तरति इति गौपुच्छिकः । ठक्ठञोः स्वरे एव भेदः ।

१५२० । नौद्व्यचष्ठन् ॥४।४।७॥

टी— । नाविकः । घटिकः । बाहुभ्याम् तरति बाहुका स्त्री ।

In the sense of तेन तरति, the suffix ठन् is added to the word नौ as well as to words—containing two vowels.

मित— । नौ इति शब्दात् तथा द्विस्वरसनाथात् प्रातिपदिकात् च ठन् इति प्रत्ययः स्यात् तेन तरतीति एतस्मिन् विषये । नावा तरति इति नौशब्दात् ठन् नाविकः । द्व्यचः—घटेन तरति इति घटिकः । बाहुभ्याम् तरति इति बाहुकः । कुम्भेन तरति कुम्भिकः, प्लवेन तरति इति प्लविकः । अयं प्रत्ययः ठक् प्रत्ययस्य अपवादः । प्रत्ययस्तु अत्र ठन् एव न खलु "ष्ठन्", सूत्रे यः षकारो दृश्यते स तु नौद्व्यचः + ठन् इति सन्धौ कृते सति आदौ "विसर्जनीयस्य सः" (८।३।३४) इति विसर्गस्थाने सकारः स्यात् । ततः "ष्टुनाष्टुः" (८।४।४०) इति सकारस्य षत्वम् । अतएव ठन् इति प्रत्यये षकारस्य अनुबन्धत्वाभावः, तेनैव हि षित्वात् स्त्रीलिङ्गे "षिद्गौरादिभ्यः—" (४।१।४०) इति ईकारो न स्यात् । अतः बाहुभ्याम् तरति या स्त्री सा बाहुका । स्त्रियाम् "अजाद्यतष्टाप्" (४।१।४) इति आप् एव ।

१५२१ । चरति ॥४।४।८॥

टी— । तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति हास्तिकः । शाकटिकः । दध्ना भक्षयति दाधिकः ।

The suffix ठक् is added to words in the sense "तेन चरति"—the verb meaning to move ( to walk ) or to grate ( and hence to eat ).

मित— । तेन चरति इति एतस्मिन् विषये तृतीयासमर्थात् ठक् प्रत्ययो भवेत् । चरति—इति चर गतौ भक्षणे च इति धातोः तिपि रूपम् । गतौ—यथा रथेन

चरति। भक्षणे यथा—तृणे गौः चरति। अतएव गच्छति भक्षयति इति एतदर्थद्वये वाच्ये सति तृतीयासमर्थात् ठक् स्यात् इति स्पष्टार्थः। हस्तिना चरति गच्छति इति हास्तिकः। शकटेन चरति गच्छति इति शाकटिकः। दध्ना चरति भुङ्क्ते इति दाधिकः।

## १५२२। आकर्षात् ष्ठल्॥ ४।४।९॥

**टी—। आकर्षो निकषोपलः। आकषादिति पाठान्तरम्। तेन चरति आकर्षिकः। षित्वान्ङीष्। आकर्षिकी।**

The suffix ष्ठल् is added to the word आकर्ष। आकर्षः—tauchstoue.

मित—। आकर्ष इति एतस्मात्—"तेन (आकर्षेन) चरति" इति एतस्मिन् विषये ष्ठल् प्रत्ययः स्यात्। आकर्ष इति स्थाने आकष इति केचिन्मन्यन्ते। आकर्षेण चरति इति आकर्षिकः। आकर्षः निकषोपलः उच्यते। निकषोपलः सुवर्णपरीक्षार्थम् व्यवहृतः प्रस्तर-विशेषः। [कोष्ठीपाथर इति गौड़ीयाः—touch-stone इति आङ्गलाः]। ष्ठल् इति प्रत्यये लकारस्य स्वरप्रक्रियायाम् एव उपयोगिता षकारस्य तु स्त्रीप्रत्ययप्रकरणे। तेन "षिद्गौरादिभ्यश्च" (४।१।४०) इति स्त्रियाम् ङीष = आकर्षिकी।

## १५२३। पर्पादिभ्यः ष्ठन्॥ ४।४।१०॥

**टी—। पर्पेण चरति इति पर्पिकः। पर्पिकी। येन पीठेन पङ्गवश्चरन्ति स पर्पः। अश्विकः। रथिकः।**

The suffix ष्ठन् is attached to the word पर्प and others—belonging to the पर्पादि class; पर्प means the staff leaning against which the lame walk on foot.

मित—। पर्प इत्येवमादिभ्यः ष्ठन् प्रत्ययः स्यात् तेन चरति इति एतस्मिन् विषये। ठकोऽपवादः। प्रत्ययस्तु ष्ठन् न खलु "नौद्व्यचष्ठन्" (४।४।७) इति वत् ठन्। तेन प्रत्ययस्य षित्वात् स्त्रियाम् ङीष् स्यात्। नकारस्य तु स्वर-

प्रक्रियायाम् एव उपयोगिता। पर्पेण चरति इति पर्पिकः। स्त्रियाम् पर्पिकी। पर्प शब्दस्यार्थस्तु: प्रोक्तः श्रीमता दीक्षितेन। पीठेन दण्डेन इति। पर्पादि र्यथा—पर्प, अश्व, रथ, अश्वत्थ, जाल, न्यास, व्याल, पादः, पत्, पद्म। अश्वेन चरति इति अश्विकः, स्त्रियां अश्विकी। रथेन चरति इति रथिकः—स्त्रियाम् रथिकी। एवम् जालेन चरति इति जालिकः। पद्भ्याम् चरति इति पदिकः।

१५२४। श्वगणाट्ठञ्च ॥ ४।४।११ ॥

दी—। चात् ष्ठन् ॥

The suffix ठञ् as well as ष्ठन् is added to the word श्वगण in the aforesaid sense.

मित—। शुनां गणः समूहः इति श्वगणः। अस्मात् कृते च प्रत्यये यद्रूपम् स्यात् तस्य साधने सूत्रान्तरस्य अपेक्षा अस्ति इति सूत्रयति—

१५२५। श्वादेरिञि ॥ ७।३।८ ॥

दी—। ऐच् न। श्वभस्त्रस्य अपत्यं श्वाभस्त्रिः। श्वादंष्ट्रिः। तदादिविधौ चेदमेव ज्ञापकम्। इकारादौ इति वाच्यम्। (वा)। श्वगणेन चरति इति श्वागणिकः। श्वागणिकी। श्वगणिकः। श्वगणिकी।

Before इञ any compound word having श्व for its first member, is not to have ऐच् inserted within its own body;—(which was required by the rule "द्वारादीनां च" (७।४।८); the (suffix) इञ् is only an उपलक्षण, and hence it signifies that not only before इञ् but before any suffix which has इ for its first letter the present rule holds good.

मित—। "द्वारादीनां च" (७।४।४) इति सूत्रेण ज्ञाप्यते यत् द्वार इत्येवमादीनां यकारवकाराभ्याम् अचाम् आदेरचः स्थाने वृद्धि र्न स्यात्, अपितु आभ्याम् पूर्वौ ऐचागमौ भवतः, ञिति णिति किति च तद्धिते परतः। यकारादेरिकारः स्यात्, वकारादेस्तु उकारः स्यात्। द्वारादीनां मध्ये श्वन् इत्यस्य पाठोऽस्ति। अनेन

सूत्रेण ज्ञाप्यते यत्—"इञि" परे सति "श्वादेः" श्व इति यस्य पदस्य आदौ दृश्यते तस्य एच् न स्यात्। यथा श्वभस्त्रस्य अपत्यम् पुमान् इति इञ् "अत इञ्" (४।१।९५) इति सूत्रेण। श्वाभस्त्रिः। श्वदंष्ट्रस्य अपत्यम् पुमान् इति पूर्ववत् इञ् श्वादंष्ट्रिः। उदाहरणद्वये न ऐचागमः परम् आदिस्वरस्य वृद्धिरेव।

द्वारादिगणे श्वन् इति पठ्यते। अतएव श्व इति पूर्वकस्य अपि प्रातिपदिकस्य द्वारादिवत् कार्य्यं भवितुमर्हतीति प्राप्ते ज्ञापयति "तदादिविधौ" श्व इति पदस्य आदौ विद्यते तस्मात् परे प्रत्ययविधौ कर्त्तव्ये सति "इदमेव ज्ञापकम्" इदमेव अनेन ज्ञापितम् यत् तत्र श्वादिपूर्वकप्रातिपदिकस्य न हि द्वारादिवत् कार्य्यं स्यात्। "इकारादौ इति वाच्य"मिति। इञ् इति उपलक्षणम् एव। कस्य? इकारादि-प्रत्ययस्य इति वाच्यम्। तथाहि भाषावृत्तिकारः—"इञीतीकारादुपलक्षणम्" इति। अयमर्थः—सूत्रे "इञि" इत्यनेन ज्ञापयति यत् इक्प्रभृतयः ये केचित् इकारादि-प्रत्ययाः सन्ति, तेषु यस्मिन् कस्मिन्नपि परे सति श्वादिपूर्वकस्य प्रातिपदिकस्य द्वारादि-वत् कार्य्यं न स्यात्। तेनठञ् ठन् इति प्रत्ययद्वयस्थाने जाते इक् इति परे न द्वारादिवत् कार्य्यम्। श्वगणेन चरति इति ठञ्। ठञ् इति अस्य ञित्वात् आदि-स्वरवृद्धिः, ठस्थाने इक इति आदेशः, तेन श्वागणिकः इतिरूपम्। स्त्रियां तु श्वागणिकी, "टिड्ढाण—" (४।१।१५) इति सूत्रेण ङीप्, एवं श्वगणेन चरति इति ष्ठन्—श्वगणिकः। स्त्रियां तु ङीष् श्वगणिकी—["षिद् गौरादिभ्यश्च" (४।१।४१) इति]।

## १५२६। पदान्तस्यान्यतरस्याम् ॥७।३।९॥

## टी—। श्वादेरङ्गस्य पदशब्दान्तस्य ऐच्वा। श्वापदस्य इदम् श्वापदम्। शौवापदम्।

The rule "श्वादेरिञि" optionally holds good with reference to the compound word the first member of which is श्वन् and the second member is पद।

मित—। "पदान्तस्य" पद इति यदा श्वन् इत्यस्य अन्ते भवति, तदा "अन्य-

तरस्याम्"—द्वारादिवत् कार्य्यं विकल्पेन स्यात्। श्वपद इत्यस्मात् द्वारादिवत् यत् कार्य्यम् ऐच् इत्यस्य आगमः स तु वैकल्पिक एव इति भावः। शुनः पदानीव पदानि यस्य स श्वापदः। तस्य श्वापदस्य इदम् इति अण् "तस्येदम्" (४;४।१२०) इति सूत्रेण। तेन ऐच् प्रतिषेधे श्वापदम् इतिरूपम्; ऐचः आगमे तु शौवापदम् इति। अत्र श्वापद इति अङ्गस्य शकारवकारयो मध्ये औकारस्य आगमः।

१५२७। वेतनादिभ्यो जीवति ॥४।४।१२॥

टी—। वेतनेन जीवति वैतनिकः। धानुष्कः।

In the sense of "तेन जीवति"—i.e. lives by that, the suffix ठक् is attached to the word that stands for the name of the means of living, provided the word expressive of means is included in the category of वेतनादि words।

मित—। तेन इति अनुवृत्तम्। अतएव अयमर्थः—तेन इति तृतीयासमर्थेभ्यः वेतनप्रभृतिभ्यः प्रातिपदिकेभ्यः जीवति जीविकाम् अर्ज्जयति इति एतस्मिन्नर्थे ठक्-प्रत्ययः स्यात्। वेतनेन जीवति इति वैतनिकः कर्म्मकरः इत्यर्थः। धनुषा जीवति इति धानुष्कः व्याधः, योद्धा वा। जालेन जीवति इति जालिकः। वाहैः जीवति इति वाहिकः। वृत्त्या जीवति इति वार्त्तिकः। दण्डेन जीवति इति दाण्डिकः। धनुर्दण्डेन जीवति इति धानुर्दण्डिकः। वेतनादिर्यथा—वेतन, धनुः, दण्ड, धनुर्दण्ड, वाह, जाल, वृत्ति, अर्द्धवाह, वेस, सुख, प्रेषण, उपवेश, उपवस्ति, शय्या, उपनिषद, उपदेश, स्फिच्, पाद, उपस्थान, उपहस्त, उपस्थ, शक्ति।

१५२८। वस्नक्रयविक्रयाट्ठन् ॥ ४।४।१३ ॥

टी—। वस्नेन मूल्येन जीवति वस्निकः। क्रय-विक्रय ग्रहणम् संघातविगृहीतार्थम्। क्रय-विक्रयिकः। क्रयिकः। विक्रयिकः।

In the aforesaid sense, the suffix ठन् is added to the words वस्न, क्रय, विक्रय and क्रय-विक्रय। वस्न means price.

मित—। वस्न-क्रयविक्रयाभ्याम् ठन् स्यात् तेन जीवतीति एतस्मिन् विषये। वस्नेन जीवति इति वस्निकः। वस्न—मूल्यम् इत्यर्थः। क्रय-विक्रयेन जीवति क्रय-विक्रयिकः। "क्रय-विक्रय—" इति—क्रय-विक्रय इति शब्दद्वयस्य पृथक् पृथक् ग्रहणम् तथा एकत्र च ग्रहणं स्यात्।

१५२८। आयुधाच्छ च ॥४।४।१४॥

दी—। चाट्ठन्। आयुधेन जीवति आयुधीयः। आयुधिकः।

The suffix छ as well as ठन् is added to the word आयुध in the aforesaid sense.

मित—। आयुधेन जीवति इति एतस्मिन् विषये आयुधशब्दात् छप्रत्ययः, तथा सूत्रस्थस्य चकारस्य बलात् ठन्प्रत्ययश्च भवेताम्।

१५३०। हरत्युत्सङ्गादिभ्यः ॥ ४।४।१५ ॥

दी—। उत्सङ्गेन हरति औत्सङ्गिकः।

In the sense of "हरति"—i.e. carries from one place to other, the suffix ठक् is added to the word उत्सङ्ग and others falling within the category of उत्सङ्गादि।

मित—। हरति नयति देशान्तरं प्रापयति इत्यर्थः। एतस्मिन् विषये उत्सङ्ग एवमादिभ्यः तृतीयासमर्थेभ्यः ठक् प्रत्ययः स्यात्। उत्सङ्गेन हरति औत्सङ्गिकः। वस्तु उत्सङ्गे कृत्वा देशान्तरं प्रापयति यः स औत्सङ्गिकः। उडुपेन हरति इति औडुपिकः। उडुपे द्रव्यं स्थापयित्वा यो देशान्तरं प्रापयति स औडुपिकः। उत्सङ्गादि यथा—उत्सङ्ग, उडुप, उत्पूत, पिटक, उत्पुट, उत्पन्न, पिटाक।

१५३१। भस्त्रादिभ्यः ष्ठन् ॥ ४।४।१६ ॥

दी—। भस्त्रया हरति भस्त्रिकः। षित्वान्ङीष्—भस्त्रिकी।

In the said sense the suffix ष्ठन् is affixed to the word भस्त्रा and others falling within the category of भस्त्रादि ।

मित— । भस्त्रा इत्येवमादिभ्यः तृतीया-समर्थेभ्यः ष्ठन्प्रत्ययः स्यात् "हरति" इति एतस्मिन् विषये । भस्त्रया हरति इति ष्ठन् भस्त्रिकः । ष्ठन् इति प्रत्ययस्य षित्त्वात् "षिद् गौरादिभ्यश्च" (४।१।४१) इति स्त्रियाम् ङीष्—भस्त्रिकी । भस्त्रादिर्यथा —भस्त्रा, भरट, भरण, शीर्षभार, शीर्षेभार, अंसभार, अंसेभार ।

१५३२ । विभाषा विवधात् ।। ४।४।१७ ॥

दी— । विवधेन हरति विवधिकः । पक्षे ठक् वैवधिकः । एकदेशविकृतस्य अनन्यत्वात् वीवधादपि ष्ठन् । वीवधिकः । विवधिकी । विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्त्तते ।

The suffix ष्ठन्—as well as ठक् is attached to the word विवध—( and also to the word वीवध ) in the aforesaid sense ; both these words here imply ( i ) a yoke to carry burdens and ( ii ) a highway.

मित— । विवध इति प्रातिपदिकात् तृतीयासमर्थात् "हरति" इति एतस्मिन् विषये ष्ठन्प्रत्ययः स्यात् विकल्पेन ; पक्षे ठक् । विवधेन हरति इति ष्ठन् विवधिकः । षित्वात् स्त्रियाम् ङीष्—विवधिकी । पक्षे ठक—वैवधिकः । एकदेशविकृतम् अनन्यवत् भवति इति न्यायः स्वीक्रियते । तेन वीवध इति एकदेशविकृतस्य (ह्रस्वस्य स्थाने दीर्घम् ईकारम् धारयतः ) विवधशब्दस्य अपि इयं व्यवस्था । अतएव वीवधेन हरति इति ष्ठन्—वीवधिक—वीवधिकी ; पक्षे ठक्—वैवधिकः । शब्दद्वयस्य अर्थः श्रीमता दीक्षितेन स्फुटीकृतः । तथाहि—"पर्य्याहारश्च मार्गश्च विवधौ वीवधौ च तौ" इति अमरः । "विवधो वीवधश्चापि पर्य्याहारे ऽध्वभारयोः" इति विश्वः । पर्य्याहारः उभयतोबद्धशिक्यस्कन्धवाह्यकाष्ठविशेषः ।

१५३३ । अण् कुटिलिकायाः ।।४।४।१८ ॥

दी—। कुटिलिका व्याधानां गतिविशेषः, कर्मारोपकरणभूतं लोहं च। कुटिलिकया हरति मृगान् अङ्गारान् वा कौटिलिको व्याधः कर्मारश्च।

In the aforesaid sense, the suffix अण् is added to the word कुटिलिका। कुटिलिका—a kind of movement—usually resorted to by hunters in sniping; also an ironrod used by blacksmith.

मित—। हरतीति एतस्मिन् विषये कुटिलिकाशब्दात् तृतीयासमर्थात् अण् प्रत्ययः स्यात्। कुटिलिका व्याधानां वक्रगतिविशेषः। कुटिलिकया हरति (हन्ति) मृगान् इति अण् कौटिलिकः व्याधः। कुटिलिकया लोहमय्या यष्ट्या हरति (गृह्णाति) अंगारान् इति अण कौटिलिकः कर्मारः। कुटिलिकया (चातुर्य्येण) हरति (आकर्षति), पुमांसम् इति कौटिलिकी वेश्या।

१५२४। निर्वृत्तेऽक्षद्यूतादिभ्यः ॥ ४।४।१९ ॥

दी—। अक्षद्यूतेन निर्वृत्तम् आक्षद्यूतिकम् वैरम्।

In the sense of निर्वृत्त (performed—incurred etc) the suffix ठक् is attached to the word अक्षद्यूत and others falling within the category of अक्षद्यूतादि।

मित—। तेन निर्वृत्तम् इति एतस्मिन् विषये अक्षद्यूत इति एवमादिभ्यः तृतीयासमर्थेभ्यः ठक् प्रत्ययः स्यात्। निर्वृत्तम्—साध्यम्, उत्पन्नमिति यावत्। अक्षद्यूतेन निर्वृत्तम् इति आक्षद्यूतिकम् वैरम्। जानुप्रहृतेन निर्वृत्तम् इति जानुप्रहृतिकम् जङ्घोपघातेन निर्वृत्तम् जाङ्घोपघातिकम् कार्य्यम्। गतागतेन निर्वृत्तम् गतागतिकम् प्रेम। अक्षद्यूतादिर्यथा—अक्षद्यूत, जङ्घोपघात, जानुप्रहृत, गतागत, यातोपयात, अनुगत, जङ्घाप्रहृत, कण्टकमर्द्दन, पादस्वेदन, जङ्घाप्रहृत।

१५२५। क्त्रेर्मम्नित्यम् ॥ ४।४।२० ॥

**टी—। क्त्रिप्रत्ययान्तप्रकृतिकात् तृतीयान्तात् निर्वृत्ते अर्थे मप् स्यात् नित्यम्। कृत्या निर्वृत्तम् इति कृत्रिमम्। पक्त्रिमम्।**

The suffix मप् is always added to words themselves formed with the suffix क्त्रि—in the aforesaid sense; [by "always", it is to be noted that words formed with the suffix क्त्रि are never used by themselves—but are always followed by मप्।]

मित—। "ड्वितः क्त्रिः" (३।३।८८) इति सूत्रम्। अस्य अर्थस्तु—येषां धातूनाम् डकारानुबन्धो दृश्यते धातुपाठे, तेभ्यो धातुभ्यो डकारेद्भ्यः क्त्रिप्रत्ययःस्यात्। क्त्रिप्रत्ययान्तशब्दाः केवलं न प्रयुज्यन्ते, तर्हि तेषां का गतिः? सा तु अस्मिन् सूत्रे कथ्यते। तेन निर्व्वृत्तम् इति एतस्मिन् विषये क्त्रिप्रत्यायान्तात् प्रातिपदिकात् नित्यं मप् स्यात्। "नित्यम्" इत्यनेन ज्ञाप्यते यत् कृतमप्प्रत्ययान्ता एव क्त्रिप्रत्ययान्ताः शब्दाः प्रयुज्यन्ते। डुकृञ्करणे इति धातुः। अस्य डकारानुबन्धस्य धातोः डकार इत्। अतएव अस्मात् "ड्वितः क्त्रिः" (३।३।८८) इति क्त्रिप्रत्ययः स्यात्। परम् अयं क्त्रिप्रत्ययान्तः शब्दः केवलं न प्रयुज्यते। तथा सति कृत्या निर्व्वृत्तम् इति एतस्मिन् विषये अस्मात् मप् स्यात्—तेन कृत्रिमम् इति। कृत्रिमम् कृत्या निर्व्वृत्तम् करणात् जातम् इत्यर्थः। एवम् डुपचष् पाके इति धातुः। क्त्रिप्रत्ययः। ततः पाकेन निर्व्वृत्तम् इति एतस्मिन् विषये मप्—तेन पक्त्रिमम् इति रूपम्। एवम् डुवप् वपने इति धातुः। क्त्रिप्रत्ययः। ततः मप्—तेन उप्त्रिमम्।

**टी—। भावप्रत्ययान्तादिमप् वक्तव्यः॥ (वा)॥ पाकेन निर्वृत्तम् पाकिमम्। त्यागिमम्।**

The suffix इमप् is attached to words—themselves formed with a suffix used in भाववाच्य।

मित—। भाववाच्ये विहितैः प्रत्ययैः निष्पन्नेभ्यः शब्देभ्यः इमप् प्रत्ययः स्यात् तेन निर्वृत्तम् इति विषये। पचधातोर्भाववाच्ये घञ्—पाकः। पाकेन निष्पन्नं पाकिमम्। त्यज् धातोर्भावे घञ् त्यागः। त्यागेन निष्पन्नं त्यागिमम्। एवं कृधातोर्भावे घञ्—कारः। तेन निष्पन्नं कारिमम्। सिच् धातोर्भावे घञ्—सेकः। तेन निष्पन्नम् सेकिमम्। दह् धातोर्भावे घञ्—दाहः, दाहिमः। पृधातोर्भावे क्तः पूर्णः। पूर्णिमः। कुट् धातोर्भावे क्तः कुट्टः। कुट्टिमः। पाकिमम् फलम्। सेकिमा लता। दाहिमा कृष्णरेखा। कुट्टिमा भूः।

## १५३६। अपमित्ययाचिताभ्याम् कक्कनौ ॥ ४।४।२१ ॥

**दी—। अपमितेर्ति ल्यबन्तम्। अपमित्य निर्वृत्तम् आपमित्यकम्। याचितेन निर्वृत्तम् याचितकम्।**

The suffixes क and कन् are respectively added to अपमित्य and याचित in the aforesaid sense.

मित—। अपमित्य इति मेङ् इति धातोर्ल्यप् प्रत्ययेन सिद्धम्। याचित इति याचधातोः क्तप्रत्ययेन सिद्धम्। एताभ्याम् यथासंख्यम् कक् कन् इति प्रत्ययौ स्तः तेन निर्वृत्तमिति एतस्मिन् विषये। अपमित्य निर्वृत्तमिति आपमित्यकम्। आपमित्यकं धनम्। याचितेन निर्वृत्तम् इति याचितकं मण्डनम्।

## १५३७। संसृष्टे ॥ ४।४।२२ ॥

**दी—। दध्ना संसृष्टम् दाधिकम्।**

In the sense of "संसृष्ट" ( mixed up) the suffix ठक् is added to the name of the thing with which something is mixed up.

मित—। तेन संसृष्टमिति एतस्मिन् अर्थे तृतीयासमर्थात् ठक् प्रत्ययो भवेत्। संसृष्टम् एकीभूतम् अभिन्नं मिश्रितम् इत्यर्थः। दध्ना संसृष्टं दाधिकम् अन्नम्। एवं मरिचेन संसृष्टम् मारिचिकम्। एवं गौड़िकम् पयः। पैप्पलिकम्।

१५३८। चूर्णादिनिः ॥ ४।४।२३ ॥

दी—। चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः।

The suffix इनि ( a bar to ठक् ) is attched to the word चूर्ण, in the said sense.

मित—। तेन संसृष्टम् इति एतस्मिन् विषये चूर्णशब्दात् इनिः प्रत्ययः स्यात्। ठकोऽपवादः। चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः। चूर्णिनो धानाः।

१५३९। लवणाल्लुक् ॥ ४।४।२४ ॥

दी—। लवणेन संसृष्टो लवणः सूपः। लवणं शाकम्।

The suffix ठक्, attached to the word लवण in this sense, elides.

मित—। तेन संसृष्टम् इत्यर्थे लवणशब्दात् विहितस्य ठक्प्रत्ययस्य लुक् स्यात् लुकि न युक्तवद्भावः। अतएव लवणः सूप इति पुंलिंगम्। लवणा यवागूः इति स्त्रीलिंगम्। लवणं शाकम् इति क्लीवलिंगम्। अत्र लवणशब्दः द्रव्यवाची ( it denotes a substance, it is a substantive and not an adjective ) न खलु गुणवाची ( i.e. लवण means salt and not saline ).

१५४०। मुद्गादण् ॥ ४।४।२५ ॥

दी—। मौद्ग ओदनः।

The suffix अण् is attached to the word मुद्ग in the self-same sense.

मित—। तेन संसृष्टम् इत्यर्थे मुद्गशब्दात् अण्प्रत्ययः स्यात्। ठकोऽपवादः। मुद्गेन संसृष्टः मौद्गः ओदनः। मौद्गी यवागूः।

१५४१। व्यञ्जनैरुपसिक्ते ॥ ४।४।२६ ॥

दी—। ठक्। दध्ना उपसिक्तं दाधिकम्।

The suffix ठक् is attached to the name of a व्यञ्जन ( condiment ), with which an article of food is seasoned.

मित—। तेन उपसिक्तम् इति एतस्मिन् विषये व्यञ्जनवाचिभ्यः शब्देभ्यः ठक् प्रत्ययः स्यात्। दध्ना उपसिक्तम् दाधिकम् अन्नम्। सूपेन उपसिक्तं सौपिकम्। व्यञ्जनैरिति किम्? उदकेन उपसिक्तः ओदनः—अत्र न प्रत्ययः।

ननु "संसृष्टम्" उपसिक्तम् इत्यनयोः कोभेद इति चेत् उच्यते। संसृष्टम् मिश्रितम्। दध्ना संसृष्टम् अन्नम् तु दधिमिश्रितम् अन्नम्। दध्ना उपसिक्तम् अन्नं तु दध्ना सह एकत्रीकृत्य पक्वम् अन्नम्।

१५४२। ओजःसहोऽम्भसा वर्त्तते ॥ ४।४।२७ ॥

दी—। ओजसा वर्त्तते औजसिकः शूरः। साहसिकश्चौरः। आम्भसिको मत्स्यः।

The suffix ठक् is attached to the word ओजस्, सहस् and अम्भस् in the sense of "तेन वर्त्तते" ( stands by that ).

मित—। तेन वर्त्तते इति विषये ओजस्, सहस्, अम्भस्, इति एतेभ्यः तृतीयासमर्थेभ्यः ठक् प्रत्ययः स्यात्।

१५४३। ततप्रत्यनुपूर्व्वमीपलोमकूलम् ॥४।४।२८॥

दी—। द्वितीयान्तात् अस्मात् वर्त्तते इति एतस्मिन् अर्थे ठक् स्यात्। क्रिया-विशेषणत्वात् द्वितीया। प्रतीपं वर्त्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः।

The suffix ठक् is attached to the words ईप, लोम and कूल coming after प्रति or अनु in the sense of "तत् ( तादृशम् ) वर्त्तते" i. e. is situated in that way or stands likewise.

N. B—ईप is—अप् changed to ईप by the application of the rule "द्व्यन्तरुपसर्गेभ्योपईत्" ( ६।३।९७ )।

मित—। तेन इति अत्र नानुवर्त्तते। तत् इति द्वितीयासमर्थविभक्तिः। द्वितीयान्तात् प्रतिपूर्व्वकात् अनुपूर्व्वकात् वा ईपशब्दात्, लोमशब्दात्, तथा कूलशब्दात् च—तत् ( तादृशम् ) वर्त्तते इति एतस्मिन् अर्थे ठक् प्रत्ययः स्यात्।

ननु वृतधातुरकर्म्मकस्तर्हि कथं तत् इति द्वितीयाविभक्त्यन्तं पदं तस्य कर्म्म स्यात्? उच्यते—तत् इति नैव कर्म्मणि द्वितीया अपितु क्रियाविशेषणे द्वितीया। तत् इत्यस्य तादृशम् इत्येव अर्थः। तत् यथा तथा—तादृशम् यथा तथा वर्त्तते इत्यर्थः। प्रतीपम् वर्त्तते इति ठक्—प्रातीपिकः। अन्वीपं वर्त्तते आन्वीपिकः। प्रतिलोम वर्त्तते प्रातिलोमिकः। अनुलोम वर्त्तते आनुलोमिकः। प्रतिकूलं वर्त्तते प्रातिकूलिकः। अनुकूलं वर्त्तते आनुकूलिकः। तथाहि—"तां प्रातिकूलिकां मत्वा" —इति भट्टिकाव्ये। "आनुकूलिकतया हि नराणाम्"।

### १५४४। परिमुखं च ॥ ४।४।२८॥

**टी—। परिमुखं वर्त्तते पारिमुखिकः। चात् पारिपार्श्विकः।**

In the sense of "तादृशम् वर्त्तते" ( lies likewise ) the suffix ठक् is attached to the word परिमुख—( and also to the word परिपार्श्वम् )

मित—। तादृशं वर्त्तते इति अर्थे परिमुखशब्दात् ठक् स्यात्। परिमुखं वर्त्तते इति पारिमुखिकः। सूत्रे यश्चकारः—स अनुक्तसमुच्चयार्थः। तेन परिपार्श्वम् इत्यस्मात् अपि ठक् पारिपार्श्विकः।

### १५४५। प्रयच्छति गर्ह्यम् ॥४।४।३०॥

**टी—। द्विगुणार्थं द्विगुणं तत् प्रयच्छति द्वैगुणिकः। त्रैगुणिकः।**

In the sense of प्रयच्छति ( offers or gives ) the suffix ठक् is added to the name of a thing-given provided the giving of the same is blamable.

मित—। प्रयच्छतीति विषये द्वितीयासमर्थं तत् गर्ह्यम् निन्दनीयं भवति चेत्। द्विगुणार्थं द्रव्यं द्विगुणम्। तत् प्रयच्छति इति द्वैगुणिकः। द्विगुणं तु अल्पकालत्वात् गर्ह्यं स्यात्। एवं त्रैगुणिकः। त्रिगुणार्थं द्रव्यं त्रिगुणम्। अल्पकालत्वात् गर्ह्यः। तत् प्रयच्छति इति ठक् त्रैगुणिकः। त्रैगुणिको धनी। यो धनी त्रिगुणम् एव अर्थं अल्पकालेन लभ्यम् अधमर्णाय धनं प्रयच्छति स त्रैगुणिकः धनी।

टी—। वृद्धेर्वृधुषिभावो वक्तव्यः॥ वार्धुषिकः।

मित—। ठक् प्रत्यये परे वृद्धिशब्दस्थाने वृधुषि इति स्यात्। वृद्धिम् गर्ह्याम् (उद्दिश्य) प्रयच्छति इति वार्धुषिकः कुसीदजीवी इत्यर्थः। गर्ह्यम् इति किम्? द्विगुणम् प्रयच्छति अधमर्णः। अत्र अधमर्णपक्षेनकापि निन्दा, तेन प्रत्ययाभावः।

१५४६। कुसीद-दशैकादशात् ष्ठन् ष्ठचौ॥ ४।४।३१॥

टी—। गर्ह्यार्थाभ्याम् आभ्याम् एतौ स्तः प्रयच्छतीत्यर्थे। कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत् प्रयच्छतीति कुसीदिकः। कुसीदिकी। एकादशार्थत्वात् एकादश ते च ते वस्तुतो दश चेति विग्रहेऽकारः समासान्त इहैव सूत्रे निपात्यते। दशैकादशिकः। दशैकादशिकी। दशैकादशान् प्रच्छतीत्युत्तमर्ण एवेहापि तद्धितार्थः।

The suffix ष्ठन् and ष्ठच् are added respectively to the words कुशीद and दशैकादश in the aforesaid sense. ( See Tika also ).

मित—। कुशीदं वृद्धिः। तदर्थं प्रदत्तं द्रव्यम् अपि कुसीद इति संज्ञां भजति। एकादशार्थाः दश दशैकादश। एकादश आदातुम् प्रदत्तः दश इति दशैकादश इत्यर्थः। "एकादशार्थत्वात्—इति", एकादशार्थत्वात् एकादश इत्येव आदातुं ये प्रदत्ताः ते एकादश। ते च वस्तुत. दश एव इति विग्रहे दशैकादश इति अकारान्तः समासघटितं शब्दः निपातनेन सिध्यति। ईदृशात् दशैकादशशब्दात् तथा कुसीदशब्दात्

च "प्रयच्छति गर्ह्यम्" इत्यस्मिन् विषये यथासंख्यं ष्ठन् ष्ठच् इति प्रत्ययौ स्तः। कुसीदं गर्ह्यं प्रयच्छति इति कुसीदिकः—उत्तमर्णः। षित्वात् स्त्रियाम् ङीष्— कुसीदिकी। अत्र ष्ठन्। एकादशार्थान् दश प्रयच्छति इति दशैकादशिकः। स्त्रियां—दशैकादशिकी। अत्र ष्ठच।

ननु ष्ठन् ष्ठच् इत्यनयोः कोभेद इति चेत्—उच्यते। स्वरे भेदः। "ञ्नित्यादिर्नित्यम्" (६।१।१९७) इति ष्ठन्नन्त आद्युदात्तः। चित्त्वात् (६।१।१६३) इति सूत्रेण ष्ठजन्तस्तु अन्तोदात्तः। प्रत्ययावेतौ ठकः अपवादभूतौ।

## १५४७। उञ्छति ॥४।४।३२॥

### टी—। बदराणि उञ्छति इति बादरिकः।

The suffix ठक् is added to words in the senses of "उञ्छति-तत्" ( gleaning that ) i.e. the suffix is added to the object of gleaning in order to denote the person, that gleans.

मित—। तत् इति अनुवृत्तम्। तदिति द्वितीयासमर्थात् उञ्छति इति विषये ठक् प्रत्ययः स्यात्। बदराणि उञ्छति इति बादरिकः। उञ्छशब्दस्य अर्थस्तु—भूमौ पतितस्य एकैकस्य कणस्य उपादानम्। कनान् उञ्छति काणिकः। श्यामाकम् उञ्छति श्यामाकिकः। शाकान् उञ्छति शाकिकः।

## १५४८। रक्षति ॥४।४।३३॥

### टी—। समाजं रक्षति सामाजिकः।

To denote the protector, the sufiix ठक् is attached to the object protected.

मित—। तत् इति द्वितीयासमर्थात् रक्षति इति एतस्मिन् विषये ठक् स्यात्। समाजं रक्षति इति सामाजिकः। सन्निवेशं रक्षति इति सान्निवेशिकः।

## १५४९। शब्ददर्दुरं करोति ॥४।४।३४॥

### टी—। शब्दं करोति शाब्दिकः। दार्दुरिकः।

The suffix ठक् is attached to the words शब्द and दर्दुर—to denote the person—that does the same.

मित—। द्वितीया समर्थाभ्याम् शब्द दर्दुर इति एताभ्याम् करोति इति विषये ठक् स्यात्। शब्दं करोति इति शाब्दिक:—पटह:। अत्र शब्दस्य अर्थ: ध्वनि:। शब्दं करोति शाब्दिक: छात्र: वैयाकरणो वा। दर्दुरं करोति इति दार्दुरिक: कुम्भकार:। दर्दुर: भेक:।

१५५०। पक्षिमत्स्यमृगान् हन्ति ॥ ४।४।३५ ॥

**दी—। स्वरूपस्य पर्य्यायानां विशेषाणां च ग्रहणम्—मत्स्य पर्य्यायेषु मीनस्यैव। पक्षिणो हन्ति पाक्षिक:। शाकुनिक:। मायूरिक:। मात्स्यिक:। मैनिक:। शाकुलिक:। मार्गिक:। हारिणिक:। सारङ्गिक:।**

The suffix ठक् is added to the words पक्षि, मत्स्य and मृग, to the synonyms of all these and also to words expressive of any particular kind of bird, fish or deer (or any beast), to denote the person that habitually kills these.

मित—। पक्षिन् मत्स्य मृग इति एतेभ्य: द्वितीयासमर्थेभ्य: हन्तीति एतस्मिन् विषये ठक् प्रत्यय: स्यात्। पक्षिणो हन्ति पाक्षिक:। मत्स्यान् हन्ति मात्स्यिक:। मृगान् हन्ति मार्गिक:, एतेषां पर्य्यायशब्देभ्योऽपि अयं स्यात्। यथा पक्षिपर्य्यायात्—शकुनान् हन्ति इति शाकुनिक:। मत्स्यपर्य्यायात्—मत्स्यपर्य्याये मीनशब्दस्य ग्रहणं—तेन मीनान् हन्ति इति मैनिक:; मृगपर्य्यायात्—हरिणं हन्ति इति हारिणिक:। पक्षिमत्स्यमृगानाणाम् विशेषवाचिभ्योऽपि प्रातिपदिकेभ्य: अयं स्यात् यथा पक्षिविशेषवाचिभ्य:—मयूरं हन्ति इति मायूरिक:। तित्तिरिं हन्ति इति तैत्तिरिक:। मत्स्य विशेष-वाचिभ्यो यथा—शकुलं ( मत्स्यविशेषं ) हन्ति इति शाकुलिक:। शफरं हन्ति इति शाफरिक:। मद्गुरं हन्ति इति माद्गुरिक:। प्रोष्टं हन्ति इति प्रौष्टिक:। मृगविशेषवाचिभ्य:—सारङ्गं ( चित्रमृगं ) हन्ति

इति सारंगिकः। काशिकायां भाषावृत्तौ च मृग इति शब्दस्य पशु इत्येतदर्थः गृहीतः। तेन शूकरं (सूकरं) हन्ति इति शौकरिकः (सौकरिकः) इत्यपि तत्र तत्र दृश्यते।

## १५५१। परिपन्थं च तिष्ठति ॥ ४।४।३६ ॥

**टी—। अस्मात् द्वितीयान्तात् तिष्ठति हन्ति चेत्यर्थे ठक् स्यात्। पन्थानं वर्जयित्वा व्याप्यवा तिष्ठति पारिपन्थिकश्चौरः। परिपन्थं हन्ति इति पारिपन्थिकः।**

The suffix ठक् is attached to the word परिपन्थ in the sense of "तिष्ठति" ( stands ) or हन्ति ( kill ), to denote the agent.

मित—। परिपन्थशब्दात् द्वितीयासमर्थात् "तिष्ठति", तथाभूतस्य—चकारबलात् "हन्ति" इत्येव च विषये ठक् स्यात्। परिपन्थशब्दः अव्ययीभावसमासनिष्पन्नः अतएव निपातनादेव साधुः, "अपपरी वर्जने" (१।४।८८) इति परि इति अव्ययं वर्जनद्योतकम्। "अपपरिवहिरञ्चवः पञ्चम्या" (२।१।१२) इति सूत्रेण परि पथः इति विग्रहे परिपन्थम् इति निपातनेन रूपम्। अतएव पन्थानं वर्जयित्वा तिष्ठति इति एतस्मिन् अर्थे ठक् पारिपन्थिकः चौरः। पन्थानं वर्जयित्वा अपथे एव गुप्तः तिष्ठति पथिकानां द्रव्यम् अपहर्त्तुम् इति पारिपन्थिकः। यद्वा पन्थानं परिगतः इति परिपन्थः "कुगतिप्रादयः" (२।२।१८) इति सूत्रेण प्रादिसमासः—निपातनादेव परिपन्थः इतिरूपम्। तेन पन्थानं व्याप्य तिष्ठति इति एतस्मिन् अर्थे ठक् पारिपन्थिकश्चौरः। पन्थानं सर्व्वत्र एव (पथिकद्रव्यं हर्त्तुम्) तिष्ठति इति पारिपन्थिकः चौर इत्यर्थः। हन्तीति विषये अपि—यथा परिपन्थं हन्ति इति पारिपन्थिकः चौर एव। "परिपन्थम्" इति द्वितीयाविभक्तिप्रदर्शनेन ज्ञापयति यत् परिपथशब्दपर्य्याय-परिपन्थशब्दोऽपि अस्ति। अयं शब्दः निपातनेनसिद्धः। अयं विषयान्तरे अपि प्रयोक्तव्यः।

## १५५२। माथोत्तरपदपदव्यनुपदं धावति ॥४।४।३७ ॥

**टी—। दण्डाकारो माथः दण्डमाथः। दण्डमाथं धावति दाण्डमाथिकः। पादविकः। आनुपदिकः।**

The suffix ठक् is attached to words ending in माथ, as well as to the word पदवी and अनुपद—in the sense of धावति i.e. to denote the person running through either of these.

मित—। माथशब्दो यस्य प्रातिपदिकस्य अन्तभागे तिष्ठति तस्मात्, तथा पदवी अनुपद इति एताभ्याम् च धावतीति एतस्मिन् विषये ठक् प्रत्ययः स्यात्। माथः पन्थाः। दण्डाकारः माथः दण्डमाथः। दण्डमाथं धावति इति दाण्डमाथिकः। एवं गुल्कमाथं धावति गौल्कमाथिकः। पदवीं धावति पादविकः। अनुपदं धावति आनुपदिकः।

## १५५३। आक्रन्दाट् ठञ्॥ ४।४।३८॥

## टी—। अस्माट् ठञ् स्यात् ठक् च धावतीत्यर्थे। आक्रन्दं दुःखिनां रोदनस्थानं धावति इति आक्रन्दिकः।

The suffix ठञ् as well as ठक् is attached to the word आक्रन्द in the aforesaid sense.

मित—। आक्रन्दति अत्र इति आक्रन्दः—दुःखिनां रोदनस्थानम्। यद्वा आक्रन्दः द्वादशराजमण्डलान्तर्गत नृपतिविशेषः। आक्रन्दशब्दात् द्वितीयासमर्थात् धावतीति एतस्मिन् विषये ठञ् प्रत्ययः स्यात्; सूत्रस्थचकारबलात् ठक् अपि। आक्रन्दं धावति इति ठञ्—आक्रन्दिकः; ठक्—आक्रन्दिकः। अनयोर्विकल्पत्वे सति कुतो भेद इति चेत्?—स्वरे विशेषः। ठञ् प्रत्ययान्तशब्दस्तु "ञ्नित्यादिर्नित्य"मित्याद्युदात्तः (६।१।१९७); ठगन्तशब्दः पुनः "ठगन्तः कितः" इति (६।१।१६५) इति अन्तोदात्तः।

## १५५४। पदोत्तर-पदं गृह्णाति॥ ४।४।३९॥

## टी—। पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः।

The suffix ठक् is attached to words the last member of which is पद—in the sense of गृह्णाति i.e. to imply the agent that takes anything denoted by the self same words.

मित—। पद इति शब्द उत्तरपदं यस्य तस्मात् प्रातिपदिकात् द्वितीयासमर्थात् ठक् प्रत्ययः स्यात् गृह्णातीति एतस्मिन् विषये। पूर्व्वं पदं गृह्णाति इति पौर्व्व-पदिकः। उत्तर-पदं गृह्णातीति औत्तर-पदिकः। प्रतिपदं गृह्णाति इति प्रातिपदिकम्।

ननु पदान्तात् (प्रातिपदिकात्) ठक् स्यात् इति नोक्ता कथं पदोत्तरपदात् प्रातिपदिकात् ठक् स्यात् इति गौरवेण उक्तम्? उच्यते। वहुच् प्रत्ययनिष्पन्नात् "ईषत् पदं वहुपदम्" इत्यस्मात् अयं प्रत्ययो माभूदिति ज्ञापनार्थमेव। अत्र "पद" इत्यस्य अन्तस्थितत्वेपि न तस्य उत्तरपदत्वं—यतः वहु इति न पूर्व्वपदम् अपितु प्रत्यय एव।

## १५५५। प्रतिकण्ठार्थललामं च ॥ ४।४।४० ॥

**टी—। एभ्यो गृह्णात्यर्थे ठक् स्यात्। प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः। आर्थिकः। लालामिकः।**

In the aforesaid sense, the suffix ठक् is added to the words प्रतिकण्ठ, अर्थ and ललाम।

मित—। प्रतिकण्ठ अर्थ ललाम इति एतेभ्यः द्वितीयासमर्थेभ्यः गृह्णातीति एतस्मिन् विषये ठक् स्यात्। कण्ठे इति प्रतिकण्ठम् "अव्ययं विभक्ति—" (२।१।६) इति विभक्त्यर्थे अव्ययीभावः। प्रतिकण्ठं गृह्णातीति प्रातिकण्ठिकः वल्लभः। कण्ठे इत्यत्र अवच्छेदे सप्तमी। अर्थं गृह्णातीति आर्थिकः। ललामं भूषणम्। ललामं गृह्णातीति लालामिकः।

## १५५६। धर्मं चरति ॥ ४।४।४१ ॥

**टी—। धार्म्मिकः। अधर्म्माच्चेति वक्तव्यं (वा)। आधर्म्मिकः।**

The suffix ठक् is attached to the word धर्म्म (also to अधर्म्म) in the sense of चरति i.e. performing, practising.

मित—। धर्म्मशब्दात् द्वितीयासमर्थात् चरतीति विषये ठक् प्रत्ययः स्यात्। चरति आसेवते इत्यर्थः। धर्म्मं चरति इति धार्म्मिकः। धर्म्मसेवी इत्यर्थः। अधर्म्माच्च स्यात् अधर्म्मं चरति इति आधर्म्मिकः।

ननु अधार्म्मिक आधर्म्मिक इत्यनयोः कोभेद इति चेत् उच्यते। अधार्म्मिको धार्म्मिकात् अन्यः। स तु धर्म्मविषये उदासीनः एव। परं आधर्म्मिकः अधर्म्मसेवी।

## १५५७। प्रतिपथमेति ठञ्च ॥ ४।४।४२ ॥

## दी—। प्रतिपथमेति प्रातिपथिकः।

The suffix ठन् as well as ठक् are added to the word प्रतिपथ in the sense of एति (गच्छति) i.e. to denote one who goes thereby.

मित—। पन्थानं प्रति इति प्रतिपथं, "लक्षणेनाभिप्रती आभिमुख्ये" (२।१।१४) इति समासः। "ऋक्पूरब्धूःपथामानक्षे" (५।४।७४) इति समासान्तः। तथाहि "प्रतिपथ-गतिरासीत् वेगदीर्घीकृताङ्गः"—इति कुमारे। प्रतिपथ इति प्रातिपदिकात् द्वितीयासमर्थात् एति (गच्छति) इति एतस्मिन्नर्थे ठन्प्रत्ययः स्यात्। सूत्रस्थ चकारात् ठक् अपि। प्रतिपथं गच्छतीति ठन् प्रतिपथिकः। ठक्—प्रातिपथिकः।

## १५५८। समवायान् समवैति ॥ ४।४।४३ ॥

## दी—। सामवायिकः। सामूहिकः।

In the sense of समवैति—i.e. uniting, joining or identifying, the suffix ठक् is attached to the word expressive of समवाय congregation or parts (with which one is to identify one's ownself).

मित—। समवायान् इति बहुवचनेन समवाय—पर्य्यायशब्दाः लक्षीकृताः। समवायः समूहः। समवैति संगच्छते—आगत्य तदेकदेशीभवति इत्यर्थः। समवाय-वाचिभ्यः प्रातिपदिकेभ्यः द्वितीयासमर्थेभ्यः समवैति इति एतस्मिन्नर्थे ठक्प्रत्ययः स्यात्। समवायं समवैति इति सामवायिकः। समूहं समवैति इति सामूहिकः। समाजं समवैति सामाजिकः। समुदायं समवैति सामुदायिकः। सन्निवेशं समवैति सान्निवेशिकः।

१५५९। परिषदो ण्यः ॥ ४।४।४४ ॥

दो—। परिषदं समवैति पारिषद्यः।

In the aforesaid sense the suffix ण्य (a bar to ठक्) is added to the word परिषत्।

मित—। समवायान् समवैति इति एतस्मिन् अर्थे परिषत् इति शब्दात् ण्य-प्रत्ययः स्यात्। ठकोऽपवादः।

१५६०। सेनाया वा ॥४।४।४५॥

दो—। ण्यः स्यात् पक्षे ठक्। सैन्याः। सैनिकाः।

The suffix ण्य as well as ठक् is added to the word सेना (army) in the aforesaid sense.

मित—। समवायान् समवैति इति विषये सेनाशब्दात् ण्यः स्यात्, विकल्पेन; पक्षे ठक् च। सेनां समवैति इति ण्यः—सैन्यः; ठक्-सैनिकः।

[N. B.—सेना = Army; सैन्य or सैनिकः—a Soldier]

१५६१। संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ४।४।४६ ॥

दो—। ललाटं पश्यति लालाटिकः सेवकः। कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशः लक्ष्यते। कौक्कुटिको भिक्षुः।

The suffix ठक् is attached to the words ललाट and कुक्कुट in the sense of पश्यति, i.e. to denote the agent of seeing or observing the same, provided the word thus formed stands for a particular class name.

मित—। ललाटकुक्कुट्यौ इति एताभ्याम् द्वितीयासमर्थाभ्याम् पश्यतीति एतस्मिन् अर्थे ठक्प्रत्ययो भवति, प्रत्ययान्तशब्देन संज्ञा चेत् गम्यते। ललाटं पश्यति इति लालाटिकः सेवकः। "सर्व्वावयवेभ्यो ललाटं दूरे दृश्यते", यो भृत्यः दूरादेव स्वामिनः ललाटमेव पश्यति, न तु तम् उपगम्य तस्य कार्य्ये व्याप्रियते स एव

लालाटिकः सेवकः। कुक्कुटीति शब्देन कुक्कुटीपादपतनयोग्यं स्वल्पस्थानम् ज्ञेयम्। कुक्कुटीम् (ईदृशं स्थानम्) पश्यति इति कौक्कुटिकः भिक्षुः। यो भिक्षुरविक्षिप्तदृष्टिः सन् कुक्कुटीपादपतनयोग्ये अपि स्वल्पस्थाने चक्षुः संयम्य चलति स उच्यते कौक्कुटिकः।

## १५६३। तस्यधर्म्म्यम्॥ ४।४।४७॥

**टी—। आपणस्य धर्म्म्यम् आपणिकम्।**

The suffix ठक् is attached to words to denote धर्म्म्य i. e. the porper duty—the right function of those expressed by the said words.

मित—। तस्य इति षष्ठीसमर्थात् धर्म्म्यम् इति एतस्मिन्नर्थे ठक् प्रत्ययो भवेत्। धर्म्म्यम् धर्म्मात् अनपेतम् न्यायाचार-युक्तम् इत्यर्थः। धर्म्मं न्याय्यम्, आचार इति भाषावृत्तिः। आपणस्य धर्म्म्यम् आपणिकम्। शुल्कस्य धर्म्म्यं शौल्किकम्। शुल्कशालायाः धर्म्म्यं शौल्कशालिकम्। आकरस्य धर्म्म्यम् आकरिकम्। गुल्मस्य धर्म्म्यं गौल्मिकम्।

## १५६४। अण् महिष्यादिभ्यः॥ ४।४।४८॥

**टी—। महिष्याधर्म्म्यं माहिषम्। याजमानम्।**

In the aforesaid sense the suffix अण् is added to the word महिषी and others passing off by the name of महिषादि।

मित—। महिषी इत्येवमादिभ्यः अण्प्रत्ययः स्यात् तस्य धर्म्म्यम् इति एतस्मिन् अर्थे। ठकोऽपवादः। महिष्याः धर्म्म्यं माहिषं मूल्यम्। यजमानस्य धर्म्म्यं याजमानम्। पुरोहितस्य धर्म्म्यं पौरोहितम्। प्रजापतेर्धर्म्म्यं प्राजापतम्। प्रजावत्याः धर्म्म्यं प्राजावतम्। महिष्यादिर्यथा—महिषी, प्रजापति, प्रजावती, यजमान, पुरोहित, प्रलेपिका, विलेपिका, अनुलेपिका, मणिपाली, अनुचारक, होतृ।

## १५६५। ऋतोऽञ्॥ ४।४।४९॥

**टी—। यातुर्धर्म्म्यं यात्रम्।**

In the aforesaid sense, words ending in ऋकार, take the suffix अञ्।

मित—। ऋकारान्तेभ्यः शब्देभ्यः तस्य धर्म्यमिति एतस्मिन् अर्थे अञ् प्रत्ययो स्यात्। अयं ठकोऽपवादः। यात—स्वामिनः भ्रातुः पत्नी। यद्वा यातृगन्ता—याधातोः तृच्प्रत्ययेन निष्पन्नं रूपम्। तस्यधर्म्यं यातम्—अञ्प्रत्ययः। एवं होतुः धर्म्यं हौतम्। पोतुः धर्म्यं पौतम्। उद्गातुः धर्म्याम् औद्गातम्।

**टी—। नराच्चेति वक्तव्यम्। (वा)॥ नरस्य धर्म्या नारी।**

मित—। नरशब्दात् च पूर्व्वोक्ते एव अर्थे अञ् स्यात्। नृशब्दात् च इति भाष्यवृत्तिः—तेन नुः धर्म्या नारी। अयं जातिवाचकशब्दः इति आगमः। तथाहि "नरजातौ स्त्रियां नारी इति"।

**टी—। विशसितुरिड्लोपश्चाञ् च वक्तव्यः॥ विशसितुः धर्म्यम् वैशस्तम्।**

मित—। विपूर्व्वकात् शस्धातोः तृच्प्रत्ययेन यो विशसितृ इति शब्द उत्पद्यते, तस्मात् अनेन तस्य धर्म्यम् इति विषये अञि सति "इटः" लोपः स्यात्।

**टी—। विभाजयितुर्णिलोपश्चाञ् च वाच्यः॥ विभाजयितुः धर्म्यं वैभाजितम्।**

मित—। विपूर्व्वकात् भज्धातोः णिच्प्रत्ययस्ततः तृच—तेन विभाजयितृ इति रूपम्। अस्मात् अनेन अञि कृते णिचः लोपः स्यात्। अत्र णिच्प्रत्ययस्य एवलोपः न खलु इटश्चापि। इट् अत्र खलु तिष्ठति तेनैव वैभाजितम् इत्यत्र इकारः श्रूयते।

**१५६६। अवक्रयः॥ ४।४।५०॥**

**टी—। षष्ठ्यन्तात् ठक् स्यादवक्रये अर्थे। आपणस्य अवक्रयः आपणिकः। राजग्राह्यं द्रव्यम् अवक्रयः।**

In the senses of अवक्रय—i.e. tax, the suffix ठक् is attached to words.

मित—। तस्य इति। तस्य इति षष्ठीसमर्थात् अवक्रय इति एतस्मिन् अर्थे ठक् प्रत्ययः स्यात्। अवक्रीणीते अनेन इति अवक्रयः पिण्डकः—यः खलु राजग्राह्यं द्रव्यम् भवति। आपणस्य अवक्रयः आपणिकः। शुल्कस्य अवक्रयः शौल्किकः। शौल्किकः पिण्डः—शुल्कस्य पारिभाषिकं मूल्यम्। एवं आकरिकः। गौल्मिकः।

ननु अवक्रयोऽपि धर्म्यमेव तर्हि किम् अनेन सूत्रेण। मैवम् "लोकपीड़या धर्मातिक्रमेणावक्रयो भवती"ति काशिका। नृपतिः कदाचित् अन्याय्यमेव अवक्रयं गृह्णातीति न तस्य सदैव धर्म्यम्।

१५६७। तदस्य पण्यम् ।।४।४।५१।।

दो—। अपूपाः पण्यम् अस्य आपूपिकः।

To denote a person dealing in something, the suffix ठक is attached to the word expressive of the object of dealing in.

मित—। तदिति प्रथमासमर्थात् अस्य इति पण्यर्थे ठक् प्रत्ययः स्यात्, यत् खलु प्रथमासमर्थं तच्चेत् षष्ठ्यर्थस्य पण्यं भवति। अपूपाः पिष्टकाः पण्यम् अस्य इति आपूपिकः। एवं मोदकाः पण्यम् अस्य मौदकिकः। शष्कुला पण्यम् अस्य शाष्कुलिकः।

१५६८। लवणाट् ठञ् ।।४।४।५२ ।।

दो—। लावणिकः।

The suffix ठञ (a bar to the suffix ठक्) is attached to the word लवण in the aforesaid senses.

मित—। तदस्य पण्यमिति विषये लवणशब्दात् ठञ् स्यात्।

१५६९। किसरादिभ्यःष्ठन् ।। ४।४।५३ ।।

टी—। किसरं पण्यमस्य किसरिकः। षित्वान् ङीष्—किसरिकी। किसर, उशीर, नलद इत्यादि। किसरादयः सर्व्वे सुगन्धिद्रव्यविशेषवाचिनः।

The suffix ष्ठन्—a bar to ठक्, is attached to the word किसर and others passing by the name किसरादि in the aforesaid sense.

मित—। किशर नलद उशीर इत्येवमादिभ्यः प्रातिपदिकेभ्यः तदस्य पण्यम् इति एतस्मिन् अर्थे ष्ठन्प्रत्ययः स्यात्। ठकोऽपवादः। किसरादिर्यथा—किसर, नरद, नलद, सुमंगल, तगर, गुग्गुलु, उशीर, हरिद्रा, हरिद्रायणी, हरिद्रु, स्थागल, पर्णी। किसरादयः सर्व्वे गन्धद्रव्यविशेषवाचिनः। किसरस्थाने किशर इति काशिका भाषावृत्तिश्च।

१५७० । शलालुनोऽन्यतरस्याम् ।।४।४।५४।।

टी—। ष्ठन् स्यात् पक्षे ठक्। शलालुकः। शलालुकी। शालालुकः। शालालुकी। शलालुः सुगन्धिद्रव्यविशेषः।

In the aforesaid sense, the suffix ष्ठन् is optionally attached to the word शलालु ; शलालु is also a kind of scent.

मित—। तदस्य पण्यमिति एतस्मिन्नर्थे शलालुशब्दात् अन्यतरस्याम् ( विकल्पेन) ष्ठन्प्रत्ययः स्यात्। शलालुः पण्यम् अस्य इति शलालुकः—ष्ठन् स्त्रियां शलालुकी। ष्ठन् इत्यस्य अप्राप्तिपक्षे ठक्—तेन शालालुकः, स्त्रियां शालालुकी, शलालुशब्दोऽपि गन्धद्रव्यविशेषवाची।

१५७१ । शिल्पम् ।। ४।४।५५ ।।

टी—। मृदङ्गवादनम् शिल्पमस्य मार्दङ्गिकः।

To imply the person, who is to deal in some forte, the suffix ठक् is attached to the word that stands for the (said) forte.

मित— । तदस्य शिल्पम् इति । तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठक् प्रत्ययः स्यात्, यत् प्रथमासमर्थं शिल्पं चेत् तद्भवति । शिल्पं कौशलम् । नैपुण्यमिति । मृदङ्गः वाद्ययन्त्रविशेषः । लक्षणावृत्त्या मृदङ्गशब्दः मृदङ्गवादने वर्त्तते । मृदङ्गः मृदङ्गवादनं शिल्पम् अस्य इति मार्दङ्गिकः । पणवः पणववादनम् शिल्पम् अस्य इति पाणविकः ।

१५७२ । मड्डुकझर्झरादणन्यतरस्याम् ॥ ४।४।५६ ॥

टी— । मड्डुकवादनम् शिल्पम् अस्य माड्डुकः माड्डुकिकः । झार्झरः । झार्झरिकः ।

The suffix अण् is optionolly attached to the words मड्डुक and झर्झर ।

मित— । मड्डुक झर्झर इति वाद्ययन्त्रविशेष-वाचिनौ । एताभ्याम् अन्यतरस्याम् ( विकल्पेन ) अण्प्रत्ययो भवति तदस्य शिल्पम् इति एतस्मिन् विषये । अण्प्रत्ययस्य अप्राप्तिपक्षे ठक्—तेन माड्डुकिकः, झार्झरिकः, अत्रापि शब्दद्वयं लक्षणावृत्त्या तत्तद्वादने वर्त्तते ।

१५७३ । प्रहरणम् ॥ ४।४।५७ ॥

टी— । तदस्येत्येव । असिः प्रहरणम् अस्य इति आसिकः । धानुष्कः ।

To denote the person that uses some kind of missile ( weapon ), the suffix ठक् is attached to the word expressive of the said missille.

मित— । तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठक्प्रत्ययो भवति, यत् प्रथमासमर्थम्, तच्चेत् प्रहरणं भवति, असिः प्रहरणम् अस्य इति आसिकः । धनुः प्रहरणम् अस्य इति धानुष्कः । प्रासः प्रहरणम् अस्य इति प्रासिकः । पाशः प्रहरणम् अस्य पाशिकः । चक्रः प्रहरणम् अस्य इति चाक्रिकः ।

१५७४ । परश्वधाट् ठञ् च ॥ ४।४।५८ ॥

टी— । पारश्वधिकः ।

The suffix ठञ् is optionally attached to the word परश्वध in the aforesaid sense.

मित— । परश्वधः इति प्रहरणवाचिशब्दविशेषः । अस्मात् पूर्व्वोक्ते एव विषये ठञ् प्रत्ययः ठक् च भवतः । परश्वधः प्रहरणम् अस्य इति ठञ् पारश्वधिकः । ठक् —पारश्वधिकः । ठक्ठञोः नैव रूपे भेदः—अपि तु स्वरे ।

१५७५ । शक्तियष्ट्योरीकक् ॥ ४।४।५९ ॥

टी— । शाक्तीकः । याष्टीकः ।

The suffix ईकक् is attached to the words शक्ति and यष्टि in the aforsaid sense.

मित— । पूर्व्वोक्ते एव विषये शक्ति यष्टि इति एताभ्याम् ईकक् प्रत्ययः स्यात् । ठकोऽपवादः । शक्तिः प्रहरणमस्य शाक्तीकः । यष्टिः प्रहरणमस्य याष्टीकः ।

१५७६ । अस्ति-नास्ति-दिष्टं मतिः ॥ ४।३।१४६ ॥

टी— । तदस्येत्येव । अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः । नास्तीति मतिर्यस्य स नास्तिकः । दिष्टम् इति मतिर्यस्य स दैष्टिकः ।

The suffix ठक् is attached to the words अस्ति, नास्ति and दिष्ट in order to imply the person who has faith or belief in the next world—with reference to the words अस्ति and नास्ति ।

मित— । तदिति प्रथमासमर्थेभ्यः अस्ति नास्ति, दिष्टम् इति एतेभ्यः शब्देभ्यः षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् प्रथमासमर्थं मतिश्चेत् तद्भवति । अस्ति इति

मतिरस्य आस्तिकः, नास्ति इति मतिरस्य नास्तिकः। दिष्टम् इति मतिरस्य दैष्टिकः। मति मननम् विशासः इति यावत्। अस्ति इत्यस्मात् नास्ति इत्यस्मात् च "मतिः" इत्येव खलु विषये प्रत्ययो न इष्यते, अपितु परलोकः अस्ति, परलोकः नास्ति इति एतस्मिन् विषये एव। तेन अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः, नास्ति परलोकः इत्येवं मतिर्यस्य स नास्तिकः। दिष्टम् प्रमाणानुपातिनी मतिर्यस्य स दैष्टिकः। अस्ति नास्तीति शब्दौ तिङन्तौ, इति केचित्। सूत्रबलात् तिङन्ताभ्याम् एव एताभ्याम् प्रत्ययः। तिङन्तप्रतिरूपकौ निपातौ एतौ इति अन्ये। यथा अस्मि इति अस्मदर्थे निपातोदृश्यते, असि इति युष्मदर्थे निपातो दृश्यते तद्वत् एव एतौ इति बोध्यम्।

१५७७। शीलम् ॥४।४।६१॥

दी—। अपूपभक्षणम् शीलमस्य आपूपिकः।

To denote a person, possessed of some special feature ( or some particuler character ), the suffix ठक् is added to the word expressive of that special feature ( particular character or habit ).

मित—। तदस्य इति। तदिति प्रथमासमर्थात् अस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत् प्रथमासमर्थं शीलं चेत् तद्भवति। शीलं स्वभावः। अपूपभक्षणम् पिष्टकखादनम् शीलं स्वभावः यस्य स आपूपिकः। एवं मोदकभक्षणम् शीलम् अस्य इति मोदकिकः। शष्कुलभक्षणम् शीलम् अस्य इति शाष्कुलिकः। अपूप मोदक शष्कुल इति शब्दाः अत्र लक्षणावृत्त्या तत्तद्भक्षणे वर्त्तते।

१५७८। छत्रादिभ्योणः॥ ४।४।६२॥

दी—। गुरोर्दोषाणामावरणम् छत्रम्, तच्छीलमस्य छात्रः॥

In the aforesaid sense the suffix अण् is added to the word छत्र and others, passing by the name of छत्रादि।

मित—। तदस्य शीलमिति एतस्मिन् विषये छत्र इत्येवमादिभ्यः शब्देभ्यः अण् इति प्रत्ययः स्यात्। ठकोऽपवादः। छादनात् आवरणात् छत्रम्। गुरोर्दोषाणामावरणम् छत्रम्। तच्छीलमस्य इति छात्रः णप्रत्ययः। गुरुकार्येषु अवहितः तच्छिद्रावरणप्रवृत्तः शिष्य एव छात्रः। छत्रादि र्यथा—छत्र, शिक्षा, बुभुक्षा, पुरोह, स्था, चुरा, उपस्थान, ऋषिः, कर्मन्, विशुधा, तपस्, तस्य, अनृत, शिविका, प्ररोह, तितिक्षा, कृषि, विशिका, विशिखा, भक्षा, उदस्थान, पुरोडा, विक्षा, चुक्षा, मन्द्र। अत्र छत्रादिगणे स्थाशब्दः पठ्यते स उपसर्गपूर्व्वोऽपि ग्राह्यः—यथा आस्था, अवस्था संस्था इत्यादयः। चुरा शीलमस्य इति चौरः। तपः शीलमस्य इति तापसः। शिक्षा शीलम् अस्य इति शैक्षः।

१५७८। कार्मस्ताच्छील्ये ॥ ६।४।१७२ ॥

**टी—। कार्म इति ताच्छीलिके णे टिलोपो निपात्यते। कर्मशीलः कार्मः। नस्तद्धित इत्येव सिद्धे अण् कार्य्यं ताच्छीलिके णेऽपि। तेन चौरी तापसी इत्यादि सिद्धम्। ताच्छीलिके किम्? कार्मणः।**

The टि of the word कर्मन् elides, whenever a suffix is added to it in the sense of ताच्छील्य i. e. तत् शीलम् अस्य ; this suffix is, of course, no other than the suffix ण sanctioned by the rule छत्रादिभ्यो णः ( ४।४।६२ )

मित—। ताच्छील्ये कार्म इति टिलोपः स्यात्। अयमर्थः—छत्रादिभ्यो णः ( ४।४।६२ ) इति सूत्रेण तत् शीलम् अस्य इति एतस्मिन्नर्थे कर्मन् इत्यस्मात् ण इति प्रत्यये विहिते सति कर्मन् इत्यस्य टिलोपः स्यात् ; तथा सति कार्म इतिरूपं प्रसक्तम्। कर्म शीलम् अस्य इति कार्मः—णप्रत्यये कृते, सम्भूते च टिलोपे इदं रूपम्। कर्मशीलः एव कार्मः।

ननु "नस्तद्धिते" ( ६।४।१४४ ) इति सूत्रेणैव टिलोपः स्यात्—तर्हि किम् अनेन सूत्रेण इति चेत्—उच्यते। ज्ञापकार्थम् इदम्। सूत्रमेतत् ज्ञापयति यत् तत्शीलम्

अस्य इति विषये णप्रत्यये विहिते सति अण् प्रत्ययवत् णप्रत्ययस्य फलं जायते । तथाहि अणप्रत्ययान्तानां स्त्रियां "टिड्ढाणञ्—" ( ४।१।१५ ) इति सूत्रेण ङीप् स्यात्— यथा कुम्भकारः कुम्भकारी । अत्र "कर्मण्यण्" इति (३।२।१) अण् । औपगव औपगवी । एवम् णप्रत्ययान्तानामपि अणप्रत्ययान्तवत् स्त्रियाम् ङीप् स्यात् चौरः—चौरी । तापस—तापसी । उक्तं च काशिकायाम् "णोऽपि क्वचिदण्कृतं कार्यं भवति—चौरी, तापसी ।" तत्शीलम् अस्य इत्यर्थे एव विहिते प्रत्यये टिलोपः स्यात् कर्मन् इत्यस्य नान्यस्मिन्नर्थे । तेन कर्मणः अयम् कार्मणः अत्र न टिलोपः ।

१५८० । **कर्माध्ययने वृत्तम् ॥४।४।६३॥**

**टी— । प्रथमान्तात् षष्ठ्यर्थे ठक् स्यादध्ययने वृत्ता या क्रिया सा चेत् प्रथमान्तस्य अर्थः । ऐकान्यिकः । यस्य अध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः ॥**

To denote the person making some irrelevancy or mistake in reproducing (or saying) his lessons, the suffix ठक् is affixed to the word that stands for the said mistake.

मित— । तदस्य कर्माध्ययने वृत्तमिति । अध्ययने तत् कर्म अस्य वृत्तमिति वाक्यार्थः । अतएव तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठक्प्रत्ययो भवति, यत् प्रथमासमर्थं सा चेत् अध्ययने वृत्ता या क्रिया सैव । एकम् अन्यत् ( अध्ययने अपपाठलक्षणं कर्म वृत्तम्) अस्य इति ठक्—ऐकान्यिकः । एकम् अन्यत् इति विग्रह-वाक्यं कृत्वा आदौ "तद्धितार्थोत्तरपदसमाहारे च" ( २।१।५१ ) इति समासः. ततश्च ठक्प्रत्ययः । अध्ययने नियुक्तोयश्छात्रः परीक्षाप्रदानकाले एकवारम् विपरीतोच्चारण-रूपम् स्खलितम् ( अपपाठम् ) करोति स ऐकान्यिकः । एवं द्वे अन्ये ( अध्ययने अपपाठलक्षणे कर्मणी वृत्ते ) अस्य इति द्वैयन्यिकः । त्रीणि अन्यानि ( अध्ययने अपपाठलक्षणानि कर्माणि वृत्तानि ) अस्य इति त्रैयन्यिकः । उभयत्र "न य्वाभ्याम् पदान्ताभ्याम् पूर्वौ तु ताभ्याम् ऐच्" ( ७।३।३ ) इति ऐजागमः ।

१५८१ । **बह्वच् पूर्वपदाट् ठच् ॥ ४।४।६४ ॥**

दी—। प्राग्विषये। द्वादशान्यानि कर्माण्यध्ययेन वृत्तान्यस्य द्वादशान्यिकः। द्वादशापपाठा अस्यजाता इत्यर्थः।

In the aforesaid sense, the suffix ठञ् ( and not the suffix ठक्) is added, provided the first member of the compound word ( to which the suffix is going to be affixed ) contains more than one vowel.

मित—। तदस्य कर्म अध्ययने वृत्तम् इति एतस्मिन्नर्थे बहुस्वरवर्णयुक्तं पूर्व्वपदं यस्य तस्मात् बहुस्वरयनाद्यपूर्व्वपदात् प्रातिपदिकात् ठञ्प्रत्ययः स्यात्। ठकोऽपवादः। द्वादश अन्यानि कर्माणि अध्ययने वृत्तानि अस्य इति ठञ्—द्वादशान्यिकः। परीक्षा प्रदानकाले द्वादश अपपाठाः अस्य जाताः इति भावः। एवम् त्रयोदश अन्यानि कर्माणि अध्ययने वृत्तानि अस्य इति त्रयोदशान्यिकः। एवं चतुर्द्दशान्यिकः।

ननु अन्यत् इति यत् वृत्तम् उच्यते तत् खलु कीदृशमिति चेत् उच्यते। उदात्तं कर्त्तव्ये योऽनुदात्तम् करोति स "अन्यत् करोति" इति उच्यते। ठक् इति निषिध्य ठञ् इति यत् विहितं तस्य किं फलम्? उच्यते—त्रयोदशान्यिकः चतुर्द्दशान्यिक इत्यादौ आदिस्वरस्य वृद्धिर्नभवतीति फलम्।

१५८२। हितं भक्षाः ॥४।४।६५॥

दी—। अपूपभक्षणं हितम् अस्मै आपूपिकः।

To denote the persen to whom some articles of food are conducive to health, the suffix ठक् is added to the word expressive of the said article of food.

मित—। भक्षद्रव्यवाचिनः प्रथमासमर्थात् ठक्प्रत्ययः स्यात्, तत् भक्षद्रव्यं हितं भवति यस्मै तस्मिन्नेव वाच्ये। आपूपिकः। एवं मौदकिकः, शाष्कुलिकः। मोदकभक्षणं हितम् अस्मै इति अर्थे। शष्कुलभक्षणं हितमस्मै इत्यर्थे च।

१५८३। तदस्मै दीयते नियुक्तम् ॥ ४।४।६६ ॥

टी—। अग्रभोजनम् नियतम् दीयते अस्मै आग्रभोजनिकः।

To denote the person to whom something is regularly given, the suffix ठक् is added to the word expressive of the thing given.

मित—। तदिति प्रथमासमर्थात् अस्मै इति चतुर्थ्यर्थे ठक् प्रत्ययोभवेत्, यत् प्रथमासमर्थं तच्चेत् नियुक्तं दीयते। नियुक्तं नियतम्। यद्वा नियुक्तं दीयते नियोगेन दीयते इत्यर्थः। नियोगेन अव्यभिचारेण। अव्यभिचारो नियोग इति काशिका। अग्रभोजनम् नियुक्तम् ( नियतम् ) दीयते अस्मै इति आग्रभोजनिकः। एवं प्रथमकल्पः नियुक्तं दीयते अस्मै इति प्राथमकल्पिकः—( The man to whom preference is always given ).

१५८४। आणामांसौदनाट् टिठन्॥ ४।४।६७॥

टी—। आणा नियुक्तं दीयते अस्मै आणिकः। आणिकी। मांसौदनग्रहणं संघातविगृहीतार्थम्। मांसौदनिकः। मांसिकः। औदनिकः।

The suffix टिठन् ( a bar to the suffix ठक् ) is attached to the words आणा, मांसौदन, मांस and ओदन in the aforesaid sense.

मित—। तदस्मै नियुक्तं दीयते इति एतस्मिन्नर्थे आणा मांसौदन इति एताभ्याम् टिठन्प्रत्ययः स्यात्। आणाः नियुक्तं दीयते अस्मै आणिकः। मांसौदनं नियुक्तं दीयते अस्मै इति मांसौदनिकः। टिठन् इति प्रत्यये इकारः उच्चारणार्थः। टकारस्तु स्त्रियां ङीबर्थः तेन आणिकी। मांसौदनिकी इति। "मांसौदनग्रहणम्—" इति—सूत्रे मांसौदनमिति यद् गृहीतम् तस्य पृथक् ग्रहणम् अपि कर्त्तव्यम्। तेन मांसः नियुक्तं अस्मै दीयते इति मांसिकः। ओदन नियुक्तं दीयते अस्मै औदनिकः। टिठन्प्रत्ययः ठक् प्रत्ययस्य अपवादः।

ननु ठञ् टिठन् इति प्रत्यययोः न कश्चित् विशेषोऽस्ति, तर्हि कथं न ठञ् इति उक्तम्? अत्र काशिका समाधत्ते—यदा मांसम् ओदनम् इति पृथग् गृहीतं भवति, तदा ओदनशब्दात् टिठन् इति प्रत्यये परे आदिस्वरस्य वृद्धिर्नस्यात्। सा तु ठञ्प्रत्यये परे दुर्व्वारा एव। अतएव ओदनिकः इति रूपं टिठन्प्रत्यये परे। स्त्रियाम् ओदनिकी। परं एतन्न दीक्षितेन स्वीकृतमिति प्रतिभाति। भाषावृत्तिकारोऽपि नैतत् उररीकरोति तत्रापि ओदनिकः इति रूपं दृश्यते।

१५८५। भक्तादणन्यतरस्याम् ॥ ४।४।६८ ॥

दी—। पक्षे ठक्। भक्तम् अस्मै नियुक्तं दीयते भाक्तः। भाक्तिकः।

In the aforesaid sense, the suffix अण् is optionally attached to the word भक्त।

मित—। तदस्मै नियुक्तं दीयते इति विषये भक्त इत्यस्मात् अन्यतरस्याम् (विकल्पेन) अण् स्यात्। तथाहि अमरकोषे—"भिस्सा स्त्री भक्तमन्धोऽन्न"मिति।

१५८६। तत्र नियुक्तः ॥ ४।४।६९ ॥

दी—। आकरे नियुक्तः आकरिकः।

To denote the person employed in any situation; the suffix ठक् is added to the word, expressive of the said situation.

मित—। तत्र इति सप्तमीसमर्थात् नियुक्तः इति एतस्मिन् विषये ठक्प्रत्ययः स्यात्। नियुक्तः अधिकृतः, व्यापारितः। द्वारे नियुक्तः दौवारिकः। अत्र "न य्वाभ्याम्—" [ ७।३।३ ] इति ऐचः आगमः। आपणे नियुक्तः आपणिकः।

१५८७। अगारान्ताट्ठन् ॥ ४।४।७० ॥

दी—। देवागारे नियुक्तः देवागारिकः।

In the aforesaid sense, the suffix ठन् (a bar to ठक्) is

added to a word ending in अगार ( i. e. to a compound word the last member of which is अगार ),

मित—। केवलात अगारशब्दात ठक् एव—न तु ठन्—तेन अगारे नियुक्तः आगारिकः।

१५८८। अध्यायिन्यदेशकालात् ॥ ४।४।७१ ॥

दी—। निषिद्धदेशकालवाचकात् ठक् स्यादध्येतरि। श्मशाने अधीते श्माशानिकः। चतुर्दश्याम् अधीते चातुर्दशिकः।

To denote the person—who studies in some wrong place or time, the suffix ठक् is added to the word that stands for the name of such time or place.

मित—। अध्यायिनि अध्येतरि। अदेशकालादिति—देशश्च कालश्च इति देशकालम् समाहारद्वन्द्वसमासः—"जातिरप्राणिनाम्" [ २।४।६ ] इति सूत्रेण। यद्वा-देशसहितः कालः। अप्रशस्तो देशकालः अदेशकालः। तस्मात्। अप्रशस्तदेश-कालवाचकात इत्यर्थः। यो देशः य कालश्च शास्त्रेण अध्ययनपक्षे निषिद्धौ सदेशः स कालश्च अत्र ग्राह्यौ। तथाहि अध्येतरि अभिधेये सति, अध्ययनविषये शास्त्रनिषिद्ध ' देशकालवाचकात सप्तमीसमर्थात ठकप्रत्ययः स्यात। अदेशवाचकात तावत्—श्मशाने अधीते इति श्माशानिकः। चतुष्पथे अधीते इति चातुष्पथिकः। श्मशानं चतुष्पथश्च अध्ययनविषये शास्त्रेण प्रतिषिद्धे। अतएव ते अप्रशस्तस्थाने भवतः। अ-काल-वाचकात्—तावत—चतुर्दश्याम् अधीते चातुर्दशिकः। एवं अमावास्यायाम् अधीते आमावास्यिकः। अष्टम्याम् अधीते इति आष्टमिकः। एतास्तिथयः अध्ययन-पक्षे प्रतिषिद्धाः—अतएव अप्रशस्तकालत्वात अकाल इति संज्ञां भजन्ते। अदेशकालात इति किम्? स्रुघ्ने अधीते—अत्र प्रत्ययाभावः। नहि स्रुघ्नविषयः अध्ययनविषये शास्त्रेण प्रतिषिद्धः। पूर्वाह्णे अधीते—अत्रापि नप्रत्ययः—पूर्वाह्णस्य अध्ययनविषये शास्त्रेण अप्रतिषिद्धत्वात्।

१५८९। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ॥४।४।७२॥

दी—। तत्रैतेव। वंशकठिने व्यवहरति वांशकठिनिकः। वंशा वेणवः कठिना यस्मिन् देशे स वंशकठिनस्तस्मिन् देशे या क्रिया यथानुष्ठेया तां तथैव अनुतिष्टतीत्यर्थः। प्रास्तारिकः। सांस्थानिकः।

To denote the person—that follows some popular custom or manners, the suffix ठक् is attached to the words—ending in कठिन, as well as to the words प्रस्तार and संस्थान,

मित—। तत्र व्यवहरति इति एतस्मिन् विषये कठिनान्तप्रातिपदिकात तथा प्रस्तारशब्दात् संस्थानशब्दाच्च ठकप्रत्ययो भवति। "व्यवहारः क्रियातत्वं—यथा लौकिक-व्यवहारः" इति काशिका। वंशा वेणवः कठिनाः (सन्ति) यस्मिन् देशे स वंशकठिनः देशः; तस्मिन् देशे या क्रिया जनैरनुष्ठेया, तां क्रियां यथावत् अनुतिष्ठति यः जनस्तस्मिन् अभिधेये सति कठिनान्तप्रातिपदिकात् वंशकठिन इत्यस्मात् ठक् प्रत्ययो भवति—तेन वांशकठिनिकः। एवं वृक्षकठिने व्यवहरति इति वार्क्ष-कठिनिकः। प्रस्तारे व्यवहरति इति प्रास्तारिकः। संस्थाने व्यवहरति इति सांस्थानिकः। वृक्षकठिने प्रस्तारे संस्थाने च यथा व्यवहर्त्तव्यम् तथैव व्यवहरतीति बोध्यम्।

१५८० । निकटे वसति ॥ ४।४।७३ ॥

दी—। नैकटिको भिक्षुः।

The suffix ठक् is attached to the word निकट, to denote the person, that resides hard by.

मित—। निकटशब्दात् सप्तमीसमर्थात् वसतीत्यस्मिन्नर्थे ठक् प्रत्ययो भवेत्। निकटे वसति इति नैकटिको भिक्षुः। शास्त्रविधिम् अनुसृत्य एव यो निकटे वसति, तस्मिन् एव अभिधेये अयं विधिरिष्टः। अस्ति च शास्त्रम् यत् "आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यम्" इति। ग्रामात् क्रोशव्यवधानं तु निकटमेव।

१५८१ । आवसथात् ष्ठल् ॥ ४।४।७४ ॥

दी— । आवसथे वसति आवसथिकः । षित्वात् ङीष् । आवसथिकी ।

The suffix ष्ठल् is attached to the word आवसथ to denote the person—that resides there.

मित— । आवसथ इत्यस्मात् सप्तमीसमर्थात् वसतीति विषये ष्ठल् इति प्रत्ययः स्यात् । स्त्रियां आवसथिकी—"षिद्गौरादिभ्यश्च" ( ४।१।४१ ) इति ङीष् ।

दी— । आकर्षात् पर्पादेः भस्त्रादिभ्यः कुसीदसूत्राच्च । आवसथात् किसरादेः षितः षडेते ठगधिकारे । षडिति सूत्रषट्केन विहिता इत्यर्थः । प्रत्ययास्तु सप्त ।

In the province of the ठक् suffix, six rules sanction seven suffixes—that elide षकार ।

मित— । (१) आकर्षात् ष्ठल् [ ४।४।९ ], (२) पर्पादिभ्यः ष्ठन् [ ४।४।१० ], [३] भस्त्रादिभ्यः ष्ठन् [ ४।४।१६ ], [४] कुसीद-दशैकादशात् ष्ठन्ष्ठचौ [ ४।४।३१ ], [५] आवसथात् ष्ठल् [६] "किसरादिभ्यः ष्ठन्" विहिताः—ते च सर्व्वे षितः । अतएव तत्तत् प्रत्ययान्तेभ्यः स्त्रियां ङीष् स्यात् ।

इति ठकोऽवधिः समाप्तः ।

१५८२ । प्राग्घिताद्यत् ॥ ४।४।७५ ॥

दी— । तस्मै हितमित्यतः प्राक् यदधिक्रियते ॥

The suffix यत् is sanctioned by all the rules coming hereafter till before the rule "तस्मै हितम्" ( ५।१।५ ).

मित— । प्राक् हितात् यत् इति सन्धिच्छेदः । हितात् हितशब्दश्रवणात् प्राक् पूर्व्वं यत्—यत्प्रत्ययः स्यात् । "तस्मै हितम्" [ ५।१।५ ] इति सूत्रे यत्

"हित" इति सूत्रे—ततपर्य्यन्तं यानि सूत्राणि सन्ति, तैः सर्व्वैरेव "यत्" इति प्रत्ययो विधीयते इति। इतः परम् "तस्मै हितम्" इति सूत्रात् प्राक् च स्थितेषु सर्व्वेषु एव सूत्रेषु यत्—प्रत्ययाधिकारो वर्त्तते इति सरलार्थः।

**१५८३। तद्वहति-रथयुगप्रासङ्गम् ॥ ४।४।७६ ॥**

**दी—। रथं वहति रथ्यः। युग्यः। वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः। तं वहति प्रासङ्ग्यः।**

The suffix यत् is attached to the words रथ, युग and प्रासंग to imply those that draw or carry the same.

मित—। तदिति द्वितीयासमर्थात् रथशब्दात् युगशब्दात् प्रासङ्गशब्दात् च वहतीति एतस्मिन् विषये ठक् प्रत्ययो भवेत्। रथं वहति इति रथ्यः। तथाहि शिशुपालवधे—"सूर्य्यस्य रथ्याः परितः स्फुरन्ती"ति। रथ्यो वोढ़ा रथस्य इति अमरकोषे। रथसीताहलेभ्यः यत्प्रत्ययविधौ तदन्तविधिरपि ज्ञेयः—अतएव रथान्तात् अपि प्रातिपदिकात् यत्प्रत्ययः स्यात्। तेन परमरथं वहतीति यत्—परमरथ्यः। युगं वहति इति युग्यः। प्रासङ्गं वहतीति प्रासङ्ग्यः। प्रासङ्गशब्दस्यार्थस्तु दीक्षितेन विवृतः। भाषावृत्तिकारस्तु द्विगुसमासनिष्पन्नादेव रथशब्दात् यत् प्रत्ययं स्वीकरोति न तु केवलरथशब्दात्—तेन द्विरथ्यः त्रिरथ्यः इति उदाहरणे प्रदत्तम्। एतन्न समीचीनं भाति।

**१५८४। धुरो यड्ढकौ ॥ ४।४।७७ ॥**

**दी—। हलि चेति दीर्घे प्राप्ते—**

The suffix यत् as well as the suffix ढक् is attached to the word धुर् in the aforesaid sense.

मित—। वहतीति एतस्मिन्नर्थे द्वितीयासमर्थात् धुर् इत्यस्मात् यत्प्रत्ययस्तथा ढक् प्रत्ययश्च स्याताम्। तेन धुर्+यत् इति स्थितम्। ततः "हलि च" [८।२।७७] इति उकारस्य दीर्घत्वं प्रसक्तम्। तत् वारयति—

१५८५ । न भकुर्छुराम् ॥८।२।७८॥

टी— । भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात् ।

The penultimate vowel of words ending in रकार or वकार is not lengthened—provided the same pass by the term भ ; the penultimate vowel of कुर् as well as of छुर् is also not lengthened.

मित— । रकारान्तस्य वकारान्तस्य च भस्य तथा कुर्, छुर् इत्येतयोश्च उपधायाः दीर्घो न भवति, तेन धुर् इत्यस्य उकारस्य न दीर्घत्वं धुर् इत्यस्य भसंज्ञात् "यचि भम्" [ १।४।१८ ] इति सिद्धम् । अतः धुरं वहति इति धुर्य्यः । ढक्—धौरेयः । [ कुर्=कुर्य्यात् ; छुर छुर्य्यात्—उभयत्र उपधायाः न दीर्घत्वम् । ]

१५८६ । खः सर्व्वधुरात् ॥ ४।४।७८ ॥

टी— । सर्वधुरं वहति इति सर्वधुरीणः ।

The suffix ख is added to the word सर्व्वधुर ( सर्व्वधुरा ) in the aforesaid sense.

मित— । सर्वा धूरिति सर्वधुरा, "ऋक्पूरब्धूःपथामानक्षे" [ ५।४।७४ ] इति सूत्रेण समासान्तः अप्रत्ययः—ततः धूः इत्यस्य स्त्रीलिङ्गत्वात् सर्वधुरा इति स्त्रीलिङ्गे एव प्रयोगः न्याय्यः, अतएव सर्वधुरां वहति इत्येव पाठः साधीयान्—स च काशिकायां भाषावृत्तौ च दृश्यते । सूत्रस्य अयमर्थः । सर्वधुराशब्दात् द्वितीयासमर्थात् वहतीति एतस्मिन्नर्थे खप्रत्ययः स्यात । सर्वधुरां वहति इति सर्वधुरीणः ।

खः सर्वधुरायाः इत्येव स्त्रीलिङ्गे निर्द्देश एव कर्त्तव्ये सति यत्तु सूत्रे खः सर्वधुरात इति पुंलिंगे निर्द्देशः स तु "सर्वधुर" इति प्रातिपदिकमात्रमेव अपेक्ष्य इति ज्ञेयम् ॥ "खः" इति योगविभागात् उत्तरधुरा दक्षिणधुरा इति एताभ्याम् अपि खप्रत्ययः स्यात तेन उत्तरधुरां वहति उत्तरधुरीणः ; दक्षिणधुरां वहति इति दक्षिणधुरीणः । किञ्च धुरं वहति इति ख प्रत्यये धुरीणः स्यात इति केषाञ्चिन्मतं भाषावृत्तिकारेण उपन्यस्तम् । तथाहि भाषावृत्तौ "धुरीणश्चेत्यन्ये" इति ।

१५८७। "एकधुराल्लुक् च" ॥ ४।४।७९ ॥

दी—। एकधुरं वहति एकधुरीणः। एकधुरः।

The suffix ख is attached to the word एकधुर (एकधुरा), in the said sense and the suffix optionally elides.

मित—। एका धुरिति एकधुरा—पूर्ववत् समासान्तः; अस्मात् द्वितीया-समर्थात् वहतीति एतस्मिन्नर्थे खप्रत्ययः स्यात; तस्य च विकल्पेन लुग् भवति। अत्रापि एकधुरां वहति इत्येव पाठः साधीयान्। एकधुरां वहति इति एकधुरीणः। पक्षे प्रत्ययस्य लुक्—एकधुरः। लुक् एव नतु लुप्—तेन न युक्तवद्भावः।

१५८८। शकटादण् ॥ ४।४।८० ॥

दी—। शकटं वहति शाकटो गौः।

In the aforesaid sense, the suffix अण् is attached to the word शकट।

मित—। द्वितीया-समार्थात् शकटशब्दात् वहतीत्येतस्मिन् विषये अण्प्रत्ययो भवति।

१५८९। हलसीराट्ठक् ॥ ४।४।८१ ॥

दी—। हलं वहति हालिकः। सैरिकः।

The suffix ठक् is attached to the words हल and सीर in the said senses.

मित—। द्वितीयासमर्थाभ्यां हलसीर इति एताभ्यां ठक्प्रत्ययो भवेत् वहतीति विषये। हल इति तदन्तविधिरपि कर्त्तव्यः—तेन द्विहलं वहतीति द्वैहलिकः। द्विसीरं वहति इति द्वैसीरिकः। त्रिसीरं वहति इति त्रैसीरिकः इति भाषावृत्तिकारः।

१६००। संज्ञायां जन्याः ॥ ४।४।८२ ॥

दी—। जनी वधूः। तां वहति प्रापयति जन्या।

The suffix यत् is attached to the word जनी, in the aforesaid sense, provided the word thus formed stands as a (particular) class name (i.e. as designation of something).

मित—। वहतीति विषये जनीशब्दात् द्वितीयासमर्थात् यत्प्रत्ययः स्यात्—प्रत्ययान्तशब्देन चेत् संज्ञा गम्यते। जनीः वधूः। तां वहति इति यत् जन्या। जामातुः वयस्या। साहि विवाहेषु जनीं जामातृ-समीपं प्रापयति।

१६०१। विध्यत्यधनुषा ॥ ४।४।८३ ॥

**दी—। द्वितीयान्ताद्विध्यतीत्यर्थे यत् स्यात्, न चेत्तत्र धनुः करणम्। पादौ विध्यन्ति पद्याः शर्कराः।**

The suffix यत् is attached to the word, expressive of something, which is pierced provided धनु is not the instrument of piercing.

मित—। द्वितीयासमर्थात् प्रातिपदिकात् विध्यति इति विषये यत्प्रत्ययः स्यात् नो चेत् तत्र वेधनस्य करणं धनुर्भवेत्। पादौ विध्यन्ति इति पद्याः शर्कराः। "पादः पत्" ( ६।४।१३० ) इति पादस्थाने पत् इति आदेशः। एवं ऊरव्याः कण्टकाः। "वान्तो यि प्रत्यये" ( ६।१।७९ ) इति अवादेशः। अधनुषा इति किम्? चौरं विध्यति धानुष्कः। पादौ विध्यति धनुषा।

. धनुष् प्रतिषेधेन तादृशी एव व्यधनक्रिया लक्षिता, यादृश्याम् खलु धनुषः करणत्वं न सम्भवति। तेन चौरं विध्यति, शत्रुं विध्यति देवदत्तः इत्यादिषु अपि प्रत्ययः न स्यात्। कथम्? एतेषु धनुषः करणत्वस्य सम्भवात्।

१६०२। धनगणं लब्धा ॥ ४।४।८४ ॥

**दी—। तृन्नन्तमेतत्। धनं लब्धा धन्यः। गणं लब्धा गण्यः।**

The suffix यत् is added to the word धन and गण to denote the gainer of the some.

मित—। लब्ध्वा इति लभ्धातोः क्त्वाप्रत्ययेन सिद्धं रूपम्। तेन "न लोकाव्यय-निष्ठाखलर्थतृनाम्" ( २।३।६९ ) इति सूत्रेण अस्य योगे "धनगण" इति द्वितीयैव न तु षष्ठी। तेन सूत्रस्यायमर्थः—द्वितीयासमर्थात् धनशब्दात् गणशब्दात् च लब्धा इति एतस्मिन् विषये यत् प्रत्ययो भवेत्। धनं लब्धा धन्यः बालकः। गणं लब्धा गण्यो मृगः।

१६०३। अन्नाण्णः॥ ४।४।८५॥

टी—। अन्नं लब्धा आन्नः।

The suffix ण is attached to the word अन्न in the said sense.

१६०४। वशं गतः॥ ४।४।८६॥

टी—। वश्यः—परेच्छानुचारी॥

The suffix यत् is added to the word वश (control) to denote the person that is under the same.

मित—। द्वितीयासमर्थात् वशशब्दात् "गतः" इति एतस्मिन् विषये यत् प्रत्ययो भवति। वशं गतः वश्यः। वश्यः परेच्छानुचारी—विधेयः इत्यर्थः। तथाहि—'वश्यः सर्वोजनः स्त्रीणाम्"।

१६०५। पदमस्मिन् दृश्यम्॥ ४।४।८७॥

टी—। पद्यः कर्द्दमः। नातिशुष्कः इत्यर्थः।

The suffix यत् is attached to the word पद to denote the thing upon which the same (i. e पद = foot-print) is visible.

मित—। पद इति प्रातिपदिकात् प्रथमासमर्थात् "दृश्यते अस्मिन्" इति सप्तम्यर्थे यत् प्रत्ययः स्यात्। पदं दृश्यम् अस्मिन् इति पद्यः कर्द्दमः। पद्यः पन्थाः। नातिशुष्कः नातिद्रवो वा। पदशब्देन लक्षणया अत्र पदचिह्नमेव बोध्यम्। अतएव उक्तं काशिकायाम् "शक्यते यस्मिन् पदं द्रष्टुं प्रतिमुद्रोत्पादनेन स पद्यः कर्द्दमः, कर्द्दमस्यावस्था उच्यते।" इति।

१६०६ । **मूलमस्यावर्हि** ॥ ४।४।८८ ॥

**दी— । आवर्हणम् आवर्हः उत्पाटनम् तदस्यास्तीति आवर्हि, मूलम् आवर्हि येषां ते मूल्याः मुद्गाः ।**

The suffix यत् is attached to the word मूल, to denote the thing which is plucked only by eradicating the मूल ( root ), i. e, by uprooting.

मित— । वृह उद्यमे इति धातुः । आङ्पूर्वकात् वृह्धातोर्घञ् प्रत्ययेन आवर्हः । आवर्हः उत्पाटनम् अस्ति इति इन् प्रत्ययेन आवर्हि, मूल इति शब्दात् प्रथमासमर्थात् "आवर्हि" इति ईदृशगुणसम्पन्नात् षष्ठ्यर्थे यत्प्रत्ययो भवेत् । मूलम् आवर्हि येषां ते मूल्याः मुद्गाः । मूल्याः माषाः । येषां मूलम् आवृह्यते उत्पाट्यते ते मूल्याः । मूलोत्पाटनेन विना गृहीतुं न शक्यन्ते इति भावः । यद्वा कोमलत्वात् येषां मूलम् ग्रहणमात्रेण उत्पतति ते मूल्याः ।

१६०७ । **संज्ञायां धेनुष्या** ॥४।४।८९॥

**दी— । धेनुशब्दस्य षुगागमो यत्प्रत्ययश्च स्वार्थे निपात्यते संज्ञायाम् । धेनुष्या बन्धके स्थिता ।**

The suffix यत् is attached to the word धेनु, with a षुक् inserted between the stem and the suffix ; the word thus irregularly formed is धेनुष्या and it stands as a class name or designation ; धेनुष्या—the cow pledged to the creditor.

मित— । धेनुशब्दात यत्प्रत्ययः स्यात, षुक् इति आगमश्चापि स्वार्थे नाम्नि गम्यमाने । धेनुष्या । इदं निपातनसिद्धं रूपम् । "धेनुष्या गौर्महिषी वा यावत् या दुग्धे बन्धके स्थिता ।" इति भाषावृत्तिः । "या धेनुरुत्तमर्णाय ऋणप्रदानात् दोहनार्थं दीयते सा धेनुष्या । पीतदुग्धेति यस्याः प्रसिद्धिः । धेनुष्यां भवते ददामि" इति काशिका ।

१६०८। गृहपतिना संयुक्ते ञ्यः ॥ ४।४।९० ॥

टी—। गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योऽग्निः।

The suffix ञ्य is attached to the word गृहपति in the sense of तेन संयुक्तम् i. e. attached to him or presumed by him.

मित—। तृतीयासमर्थात् गृहपतिशब्दात् संयुक्तम् इति एतस्मिन् विषये ञ्यप्रत्ययो भवति। गृहपतिना संयुक्तो गार्हपत्यः। गार्हपत्यः अग्निरिति संज्ञायामेव एतदपि इति मन्तव्यम्। तेन गृहपतिना संयुक्तो न अन्यः कश्चित् गार्हपत्यः स्यादिति।

१६०९। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्य्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ॥ ४।४।९१ ॥

टी—। नावा तार्य्यं नाव्यम्। वयसा तुल्यो वयस्यः। धर्मेण प्राप्यं धर्म्यम्। विषेण वध्यो विष्यः। मूलेन आनाम्यं मूल्यम्। मूलेन समो मूल्यः। सीतया समितं सीत्यं क्षेत्रम्। तुलया संमितं तुल्यम्।

The suffix यत् is attached to the words नौ, वयः, धर्म, विष, मूल, सीता and तुला in the sense of तार्य्य ( navigable ), तुल्य ( equal ), प्राप्य ( accessible ), वध्य (deserving death), आनाम्य ( fit to be bent down ), सम ( equal ), समित ( rendered fit ) and संमित ( properly weighed or measured ) respectively.

मित—। नौ, वयः, धर्म, विष, मूल, मूल, सीता, तुला इति एतेभ्यः अष्टाभ्यः तृतीयासमर्थेभ्यः यथासंख्यं तार्य्यम्, तुल्यं, प्राप्यं, वध्यम्, आनाम्यं, समं, समितं, संमितम् इति एतेष्वर्थेषु यत्प्रत्ययो स्यात्। नावा तार्य्यं नाव्यम् उदकम्, तथाहि "नाव्यं पयः केचिदतारिषुर्भुजैः"। सीतया समितं सीत्यम् क्षेत्रम्। सीतया हलफलकेन। समितं संगतं कर्षणयोग्यम्। "द्विसीत्यं त्रिसीत्यम्" इत्यादयोऽपिस्युरिति

भाषावृत्तिकारः। "रथसीताहलेभ्यः यद्विधौ तदन्तविधिः" (३।१।७२, वार्त्तिक) अतएव बहुसीत्यम्, उत्तरसीत्यम् इत्यादयः अपि। तुलया संमितं तुल्यम् कनकम्। संमितं समानं सदृशं, "यथा तुला (scale) परिच्छिनत्ति परमेवम् तदपि"— इति काशिका।

१६१० । धर्मपथ्यर्थन्यायादनपेते ॥ ४।४।९२ ॥

दी—। धर्मादनपेतम् धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम्।

The suffix यत् is attached to the words धर्म, पथिन् and न्याय to denote the person or thing, that is not swerving from the same.

मित—। धर्म, पथिन् अर्थ न्याय इत्येतेभ्यः पञ्चमीसमर्थेभ्यः यत्प्रत्ययो भवति अनपेत इति एतस्मिन् विषये। अनपेतम् अस्खलितम्।

१६११ । छन्दसोनिर्मिते ॥ ४।४।९३ ॥

दी—। छन्दसा निर्मितं छन्दस्यम्। इच्छया कृतमित्यर्थः।

The suffix यत् is attached to the word छन्दस् (meaning will or intention) to denote the thing done or produced

मित—। छन्दस् इति एतस्मात् तृतीयासमर्थात् निर्मितम् इति एतस्मिन् अर्थे यत्प्रत्ययः स्यात्। छन्दसा निर्मितं छन्दस्यम्। छन्दस्यं जगत् इति भाषावृत्तिः। निर्मितः कृतः उत्पादितः। छन्दस् इच्छा, इच्छया उत्पादित इत्यर्थः।

१६१२ । उरसोऽण् च ॥ ४।४।९४ ॥

दी—। चाद् यत्। उरसा निर्मितः पुत्र औरसः। उरस्यः।

The suffix अण्, as well as the suffix यत् is attached to the word उरस् in the aforesaid sense.

मित—। उरस् इति एतस्मात् तृतीयासमर्थात् निर्मितमिति एतस्मिन् विषये अण्प्रत्ययो भवेत्; सूत्रस्थस्य चकारस्य बलात् यत् च। उरसा निर्मितः पुत्रः औरसः। यत्=उरस्यः पुत्रः। उरस्य औरसः इति शब्दद्वयं पुत्रे एव अभिधेये प्रयुक्तम् स्यात्—नान्यत्र इति ज्ञेयम्।

१६१३। हृदयस्य प्रियः ॥ ४।४।८५ ॥

टी—। हृद्यो देशः। हृदयस्य हृल्लेखेति हृदादेशः।

The suffix यत् is attached to the word हृदय to denote the thing, dear to the heart. [ Now see Tika ].

मित—। हृदयशब्दात् षष्ठीसमर्थात् प्रिय इति एतस्मिन्नर्थे यत्प्रत्ययो भवति। ततः "हृदयस्य हृल्लेखयदण्लासेषु" (६।३।५०) इति सूत्रेण हृदयशब्दस्थाने "हृत्" इति आदेशः। तेन हृद्यमिति। हृद्यो देशः। हृद्यं वनम्। "पुत्रेऽन-भिधानम्" इति भाषावृत्तिः। तेन "हृदयस्य प्रियः पुत्रः इति इह न भवती"ति काशिका।

१६१४। बन्धने चर्षौ ॥ ४।४।८६ ॥

टी—। हृदयशब्दात् षष्ठ्यन्तात् बन्धने यत् स्याद् वेदे अभिधेये। हृदयस्य बन्धनं हृद्यो वशीकरणमन्त्रः ॥

The suffix यत् is affixed to the word हृदय to denote a vedic text that binds,—i. e. holds or control.

मित—। बध्यते येन तद् बन्धनं तु अत्र प्रत्ययस्य अर्थः। ऋषि वेदः। "अप्लुत वदुपस्थिते" (६।१।१२९) इति सूत्रे च ऋषिशब्दस्य वेदः इति अर्थः श्रीमता दीक्षितेन उररीकृतः। बन्धनम् इति शब्दोऽत्र ऋषिरिति शब्दस्य विशेषणीभूतः। तेन सूत्रस्यायमर्थः—हृदयशब्दात षष्ठीसमर्थात बन्धने ऋषौ अभिधेये यत् स्यात। बन्धनं वशीकरणम्। तेन बन्धनविषये वशीकरणविषये यः ऋषिः वेदः वेदमन्त्रः इति यावत, तस्मिन अभिधेये सति हृदयशब्दात षष्ठीसमर्थात यतप्रत्ययो भवति

इति भाव:। हृदयस्य बन्धन ऋषि: = हृद्य:, वशीकरणमन्त्र:। "परहृदय येन बध्यते वशीक्रियते स वशीकरणमन्त्रो हृद्य इत्युच्यते" इति काशिका।

**१६१५। मत-जन-हलात् करणजल्पकर्षेषु ॥ ४।४।९७ ॥**

**टी—। मतं ज्ञानं तस्य करणं भाव-साधनं वा मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षः हल्यः।**

The suffix यत् is attached to the words मत, जन and हल to denote the करण (instrument) of मत, जन as well as of कर्ष [ploughing] of हल।

मित—। षष्ठी-समर्थेभ्य: मत जन हल इति एतेभ्य: यत्प्रत्यय: स्यात यथा-संख्यं करणम् जल्प: कर्ष: इति एतेष्वेव अर्थेषु। मन् धातो: क्तप्रत्ययेन सिद्धं मतम्। ज्ञानम् इत्यर्थ:। मतस्य ज्ञानस्य करण मत्यम्। करणं साधनम्। यद्वा कृधातो: भावे ल्युट् इति करणं कार्य्यम्। तेन मतस्य करणम् कार्य्यं इति मत्यम्। भावसाधनम् कार्य्यम् इत्यर्थ:। जनस्य जल्प: जन्य:। जनानां जल्पनाविषयीभूत: इत्यर्थ:। हलस्य कर्ष: हल्य:। कर्ष: कर्षणम्। "स्य सीता हलो: यद्विधौ तदन्त विधि:" (२।१।७२, वार्त्तिक)। अतएव द्विहलस्य कर्ष: द्विहल्य:—त्रिहलस्य कर्ष: त्रिहल्य:।

**१६१६। तत्र साधुः ॥४।४।९८॥**

**टी—। अग्रे साधुः अग्र्यः। सामसु साधु सामन्यः। ये चाभावकर्मणोरिति प्रकृतिभावः। कर्मण्यः। शरण्यः।**

The suffix यत is attached to words in the sense of तत्र साधु i. e. well up or expert in subjects—denoted by the self-same words.

मित—। तत्र इति सप्तमीसमर्थात प्रातिपदिकात साधु: इति एतस्मिन्नर्थे यत प्रत्यय: स्यात। साधु इत्यस्य योग्य: प्रवीणो वा अर्थ:—न तु उपकारक:, उपकारक

इत्यर्थे तु योर्थे "तस्मै हितम्" ( ५।१।५ ) इत्यनेन प्रत्ययौ विधीयेते। अग्रे साधुः इति अग्र्यः। अग्रे स्थातुम् योग्यः इत्यर्थः। सामसु साधुः प्रवीणः इति सामन्यः विप्रः। एवं ब्रह्मणि साधुः ब्रह्मण्यः। वंशे साधुः वंश्यः। कर्मणि साधुः योग्यः इति कर्मण्यः। शरणे साधुः योग्यः इति शरण्यः।

ननु यत् इति प्रत्यये परे "नस्तद्धिते" ( ६।४।१४४ ) इति सूत्रेण सामन् कर्मन् इत्यादीनां टिलोपः प्रसक्तः—स्रत कथमत्र न दृश्यते इति चेत्—उच्यते। "ये चाभ कर्मणोः" ( ६।४।१६८ ) इति सूत्रबलेन यकारादौ तद्धितेऽभावकर्मणोरर्थयोरन् प्रकृत्या भवति—तेन अत्र टिलोपाभावः। [ अभावकर्मणोरिति किम्? राज्ञः भावः कर्म वा राज्यम्—अत्र टिलोपः ]।

**१६१७। प्रतिजनादिभ्यः खञ् ॥ ४।४।९९ ॥**

**दी—। प्रतिजनं साधुः प्रातिजनीनः। सांयुगीनः। सार्व-जनीनः। वैश्वजनीनः।**

In the aforesaid sense, the suffix खञ् [ a bar to यत ] is attached to the word प्रतिजन and others passing by the name प्रतिजनादि।

मित—। तत्र साधुः इति एतस्मिन्नर्थे प्रतिजन इति एवमादिभ्यः प्रातिपदिकेभ्यः खञ-प्रत्ययो भवति। जने जने इति प्रतिजनं, "अव्ययं विभक्ति—" (२।१।६) इति सूत्रेण अव्ययीभावः। प्रतिजने साधुः प्रातिजनीनः। जने जने साधुरित्यर्थः। संयुगे साधुरिति सांयुगीनः। सर्व्वजने साधुः सार्व्वजनीनः। विश्वजने साधुः वैश्व-जनीनः। इदंयुगे साधुरिति ऐदंयुगीनः।

प्रतिजनादिर्यथा—प्रतिजन, सर्व्वजन, विश्वजन, संयुग, इदंयुग, समयुग, परयुग, परकुल, परस्यकुल, अमुष्यकुल, पञ्चजन, महाजन।

**१६१८। भक्ताण्णः ॥ ४।४।१०० ॥**

**दी—। भक्ते साधवः भाक्ताः शालयः।**

The suffix ण [ as a bar to यत ] is attached to the word भक्त in the aforesaid sense.

मित— । तत्र साधुरिति एतस्मिन् विषये भक्त इति एतस्मात् णप्रत्ययः स्यात् । यत्प्रत्ययस्य अपवादः । भक्तम् अन्नम् । भक्ते अन्ने साधुरिति भाक्तः । भाक्ताः शालयः ।

१६१८ । परिषदो ण्यः ॥ ४।४।१०१ ॥

टी— । पारिषद्यः । परिषद इति योग विभागाण्णोऽपि । पारिषदः ।

The suffix ण्य is attached to the word परिषद् in the aforesaid sense. [ See Tika also ].

मित— । परिषद् इत्यस्मात् ण्यप्रत्ययः स्यात् तत्र साधुरिति एतस्मिन् विषये । परिषदि साधुः पारिषद्यः । अत्र योगविभागः क्रियते । तथाहि—परिषदो ण्यः इति सूत्रे परिषदः ण्यः इति अंशद्वयं एकसूत्रे युक्तम् विद्यते तस्य विभागः स्वीक्रियते । तेन "परिषदः" इति एकं सूत्रम् स्यात् । तस्य अर्थस्तु—परिषत् इत्यस्मात् णप्रत्ययः स्यात् पूर्व्वोक्ते विषये—अतएव परिषदि साधुरिति णः, तेन पारिषदः इतिरूपम् । ततः "ण्यः" इति द्वितीयं सूत्रम् । तस्य अर्थस्तु—परिषद् इत्यस्मात् पूर्व्वोक्ते विषये ण्यप्रत्ययः स्यात् । परिषदि साधुः इतिण्यः पारिषद्यः । इत्थम् योगविभागेन पदद्वयं सिध्यति । काशिकाभाषावृत्तिकृतौ अपि एवम् स्वीकुरुतः ।

१६२० । कथादिभ्यष्ठक् ॥४।४।१०२ ॥

टी— । कथायां साधुः काथिकः ।

In the aforesaid sense, the suffix ठक is attached to the word कथा and some others passing by the name कथादि ।

मित— । तत्र साधुरिति एतस्मिन् विषये कथा इत्येवमादिभ्यः प्रातिपदिकेभ्यः ठक् प्रत्ययः स्यात् । कथादि यथा—कथा, विकथा, वार्त्ता, वितण्डा, विश्वकथा,

कुटचित् ( कुटविट् ), जनवादः, जनेवादः, वृत्ति, संग्रह, गुण, गण, आयुर्व्वेद, संकथा, संग्रह।

## १६२१। गुडादिभ्यष्ठञ् ॥ ४।४।१०३ ॥

## टी—। गुडे साधुर्गौडिक इक्षुः। साक्तुका यवाः।

The affix ठञ is attached to the word गुड़ and others passing by the term or falling under the category or list of गुड़ादि, in the aforesaid sense.

मित—। तत्र साधुरिति एतस्मिन् विषये गुड इत्येवमादिभ्यः प्रातिपदिकेभ्यः ठञ् प्रत्ययो भवेत्। यत्-प्रत्ययस्य अपवादः। गुडे साधुः गौड़िकः इक्षुः, सक्तौ साधुः साक्तुको यवः, संग्रामे साधुः सांग्रामिको भटः, प्रवासे साधुः प्रावासिको वणिक्, कुल्माषे साधुः कौल्माषिकाः यवाः। गुड़ादिर्यथा—गुड़, कल्माष, प्रवास, सक्तु, संग्राम, अपूप, मांसादन, इक्षु, वेणु, संघात, निवास, उपवास, संक्राम, संवाह।

## १६२२। पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ ४।४।१०४ ॥

## टी—। पथि साधु पाथेयम्। आतिथेयम्। वसनं वसतिस्तत्र साधुर्वासतेयी रात्रिः। स्वापतेयं धनम्।

In the aforesaid sense, the affix ढञ is attached to the words पथिन् अतिथि, वसति and स्वपति।

मित—। तत्र साधुरिति एतस्मिन् विषये—पथिन् अतिथि, वसति स्वपति इति एतेभ्यः ढञ् प्रत्ययः स्यात्, पथि साधुः पाथेयम् ( provender ), अतिथौ साधुः आतिथेयम्। वस् धातोरौणादिकसूत्रविहितेन अतिप्रत्ययेन सिद्धं स्यात् वसति इति, वसतिः वसनं वासःइत्यर्थः, तथाहि मेघदूते "यक्षश्चक्रे जनक-तनया स्नानपुण्योदकेषु, स्निग्धच्छायातरुषु वसतिं राम-गिर्य्याश्रमेषु"। तत्र साधुः इति वासतेयम्, तत्र साधुः इति ढञ्—स्त्रियां "टिड्ढाण—" ( ४।१।१५ ) इति सूत्रेण ङीप्, तेन वासतेयी रात्रिः, स्वपतौ साधुः इति स्वापतेयः। स्वापतेयं धनम्।

१६२३। सभाया यः ॥ ४।४।१०५ ॥

टी—। सभ्यः ॥

The suffix य is added to the word सभा in the aforesaid sense.

मित—। ननु य—यतोः को विशेष इति चेत् ? स्वरे एव विशेषः ।

१६२४। समान-तीर्थे वासी ॥ ४।४।१०६ ॥

टी—। साधुरिति निवृत्तम् । वसतीति वासी । समाने तीर्थे गुरौ वसतीति सतीर्थ्यः ।

The suffix यत is attached to the word समान-तीर्थ, to denote the person, that puts up there [ i. e with the same teacher or preceptor ].

मित—। तत्र साधुरिति नात्र अनुवर्त्तते, वसति इति वस् धातोर्णिनिप्रत्ययेन सिद्धं वासी इति, तेन सूत्रस्यायमर्थः:—समानतीर्थ इति प्रातिपदिकात् सप्तमी-समर्थात् वासी इति एतस्मिन् विषये यत्-प्रत्ययो भवति, समानः तुल्यः इत्यर्थः, तीर्थः गुरुः, ["तीर्थं दर्शनं गुरुश्च" इति भाषावृत्तिकारः] समानतीर्थे वासी इति यत्=सतीर्थ्यः समानोपाध्यायः, "सतीर्थ्यास्त्वेकगुरवः" इति भाषावृत्तिः, "तीर्थे ये" ( ६।३।८७ ) इति सूत्रेण समानशब्दस्य सभावः ।

१६२५। समानोदरे शयित ओचोदात्तः ॥ ४।४।१०८ ॥

टी—। समानोदरे शयितः स्थितः समानोदर्य्यो भ्राता ।

The suffix यत is attached to the word समानोदर—in the sense of तत्र शयितः—i. e. to denote the person that was once there [ or rather that has been issued out of समानोदर—the same foetus ] and the ओकार of समानोदर is to be pronounced with an उदात्त accent.

मित—। शयितः इति शीङ् धातोः कर्त्तरि क्त, स्थितः इत्यर्थः। तेन सूत्रस्य अयमर्थः—समानोदरशब्दात् सप्तमीसमर्थात् शयितः (स्थितः) इति अर्थे (यत्रत्र शयितः तस्मिन्नभिधेये इति भावः) यत्प्रत्ययः स्यात्; किञ्च कृते च प्रत्यये यः शब्दो जायते—तस्य ओकारस्य उदात्तो भवति। समानोदरे शयितः स्थितः समानोदर्य्यः भ्राता—सहोदरः इत्यर्थः।

१६२६। **सोदराद्यः ॥ ४।४।१८ ॥**

**टी—। सोदर्य्यः। अर्थः प्राग्वत् ॥**

In the aforesaid sense, the suffix य is attached to the word सोदर।

N. B.—See also our Note under the rule "विभाषोदरे"।

मित—। सोदरशब्दात् सप्तमीसमर्थात् तत्र शयित इति एतस्मिन्नर्थे यप्रत्ययो भवति। समानोदरे शयितः इति यः—सोदर्य्यः। "अर्थः प्राग्वत्"—सोदर्य्यः इत्यस्य अर्थस्तु सहोदरः भ्राता इति यावत्। "विभाषोदरे" (६।३।८८) इति सूत्रेण यप्रत्यये परे समानोदर इति शब्दस्य समान इति अङ्गस्य वैकल्पिकः सभावः। "ओ चोदात्तः"—इति पूर्व्वसूत्रात् अत्र नानुवर्त्तते तेन सोदर्य्यः इत्यत्र यकारे स्वरः। यकार उदात्तः इत्यर्थः।

इति प्राग्घितीयाः ॥

१६२७। **प्राक् क्रीताच्छः ॥५।१।१॥**

**टी—। तेन क्रीतम् इत्यतः प्राक् छोऽधिक्रियते।**

The suffix छ is to be applied here till before (or up to) the rule "तेन क्रीतम्" [५।१।३७]।

मित—। "तेन क्रीतम्" (५।१।३७) इति सूत्रं वक्ष्यति। ततपूर्व्वपर्य्यन्तम् "छः" छप्रत्ययः।

१६२८। **उगवादिभ्यो यत् ॥ ५।१।२ ॥**

दी—। प्राक् क्रीतादित्येव। उवर्णान्तात् गवादिभ्यश्च यत् स्यात्। छस्य अपवादः। "नाभिनभं च"॥ नभ्योऽक्षः। नभ्यम् अञ्जनम्। रथनाभावेवेदम्। शुनः संप्रसारणम् वा दीर्घत्वम्। (वा)। शुन्यम्। ऊधसोऽनङ् च। ऊधन्यः।

The suffix यत् [a bar to छ] is attached to words ending in उकार as well as to the word गो and some others passing by the term गवादि in the same sense as छ is attached to words of the "प्राक् क्रीत" class; i. e. in the sense of तस्मै हितम् and the like. (See below also).

मित—। प्राक् क्रीतात् उवर्णान्तेभ्यः प्रातिपदिकेभ्यस्तथा गो इत्येवमादिभ्यः यत्प्रत्ययो भवति प्राक् क्रीतीयेषु एव अर्थेषु। छप्रत्ययस्य अपवादः अयम्। "तेन क्रीतम्" (५।१।३७) इत्यस्मात् प्राक् "तस्मै हितम्" (५।१।५) इत्यादिषु येषु येषु खलु अर्थेषु प्रातिपदिकेभ्यश्छप्रत्ययो विहितस्तेषु एव अर्थेषु उवर्णान्तात् प्रातिपदिकात् तथा गो इत्येवमादिभ्यः शब्देभ्यः छप्रत्ययस्य अपवादः यत्प्रत्ययो विधीयते इति सरलार्थः। उवर्णान्तात्—शङ्कवे हितम् इति शङ्कुशब्दात् यत्—शङ्कव्यं दारु। गवादिभ्यः यथा—गोभ्यः हितम् इति गव्यम्। गवादिर्यथा—गो, हविस्, अक्षर, विष, बर्हिस्, अष्टका, स्खदा, युग, मेधा, स्रुच्, कूप, खद, दर, असुर, अध्वन्, क्षर, वेद, बीज, दीप्त।

दी—। "नाभि नभं च"॥

मित—। एतदपि गवादिषु मन्तव्यम्। तेन नाभिशब्दात् "तस्मै हितम्" इति एतस्मिन्नर्थे यत्प्रत्ययः स्यात्; नाभिशब्दस्य च नभम् इत्यादेशो भवति। नाभये हितः नभ्यः अक्षः। नाभये हितं नभ्यम् अञ्जनम्। अत्र नाभिशब्देन रथनाभिरेव ज्ञेयः। नभ्यं काष्ठम्। यस्तु शरीरावयव-वाचको नाभिशब्दस्तस्मात् "शरीरावयवाद्यत्" (५।१।६) इति यत्प्रत्ययः स्यात्। परं तत्र न नाभिस्थाने नभम् इति आदेशः स्यात्। तेन नाभये हितं नाभ्यं तैलम्।

**टी—। शुनः सम्प्रसारणं वा च दीर्घत्वम् ॥**

मित—। शुन् इति शब्दोऽपि गवादिषु पठ्यते। एतस्मात् तस्मै हितम् इति विषये यत्प्रत्ययः स्यात्। क्कते च प्रत्यये शुन् इत्यस्य संप्रसारणं भवति, किञ्च व-स्थाने आदिष्टस्य उकारस्य च विकल्पेन दीर्घत्वमपि स्यात्। शुने हितम् इति यत् = शुन्यं—शून्यम्। सूत्रे चकार ग्रहणात् तस्य च अनुक्तसमुच्चयार्थत्वात् "नस्तद्धिते" (६।४।१४४) इति नकारस्य नलोपः अनुक्तः अपि नलोपाभावः अत्र स्वीकरणीयः, (सूत्रस्थ चकारस्य बलेन) इति भावः।

**टी—। ऊधसोऽनङ् च ॥**

मित—। ऊधस् इत्यपि गवादिषु। अतएव एतस्मादपि तस्मै हितमिति विषये यत् स्यात्। परे च प्रत्यये अस्य स्थाने अनङ् इति स्यात् तेन ऊधन्यः इति। ऊधन्यः कूपः। "ङिच्च"—(१।१।५३) इति सूत्रेण अनङ् इत्यस्य ङित्त्वात् अन्त्यादेशः।

**१६२८। कम्बलाच्च संज्ञायाम् ॥ ५।१।३ ॥**

**टी—। यत्स्यात्। कम्बल्यम् ऊर्णापलशतम्। संज्ञायां किम्? कम्बलीया ऊर्णा।**

The suffix यत [ a bar to छ ] is attached to the word कम्बल provided the word, thus formed stands as a particular class name.

मित—। कम्बल इति प्रातिपदिकात् प्राक्क्रीतीयेषु एव अर्थेषु (प्राक्क्रीताच्छः इत्यस्मात् पूर्व्वं येषु येषु अर्थेषु छप्रत्ययः इष्टः, तेषु एव अर्थेषु) यत्प्रत्ययः स्यात् संज्ञायां विषये। संज्ञायां विषये कम्बलविशेषनाम्नि गम्यमाने इत्यर्थः।

ननु अत्र कस्मिन् अर्थे यत्प्रत्ययो विहितः संज्ञायाम्? उच्यते—तदर्थं विकृतेः प्रकृतौ (५।१।१२) इति विकृतिवाचकात् गम्यमानायांसंज्ञायाम् यत्। संज्ञायाम् इति किम्? कम्बलाय हिता इति कम्बलीया ऊर्णा। अत्र "तस्मै हितम्" (५।१५) इति सूत्रेण छ एव।

१६३० । विभाषा हविरपूपादिभ्यः ॥ ५।१।४ ॥

टी—। आमिक्ष्यं दधि। आमिक्षीयम्। पुरोडाश्यास्तण्डुलाः। पुरोडाशीयाः। अपूप्यम्। अपूपीयम्।

The suffix यत is optionally added to the words expressive of a particular kind of हविः [ butter ], as well as to the word अपूप and ethers falling under the class अपूपादि।

मित—। हविर्विशेषवाचिभ्यस्तथा अपूप इत्येवमादिभ्यः प्रातिपदिकेभ्यः प्राक् क्रीतीयेषु एव अर्थेषु विकल्पेन यत् स्यात्; तत्प्रत्ययस्य अप्राप्तिपक्षे छप्रत्ययः। हविस् इति शब्दस्तु "उ-गवादिभ्यो यत्" (५।१।२) इति सूत्रप्रोक्तेषु गवादिषु पठ्यते तेन अस्मात् नित्यमेव यत्। हविषे हितम् इति हविष्यम्। आमिक्षा इति हविर्विशेषवाची [छाना इति गौड़ीयाः]। तस्यै हितमित्यर्थे यत् आमिक्ष्यम्। छ—आमिक्षीयम्। पुरोडाश इति हविर्विशेषवाची। तस्मै हितम् इत्यर्थे अस्मात् यत्—पुरोडाश्यम्, छ—पुरोडाशीयम्। अपूपा-दिर्यथा—अपूप, तण्डुल, अभ्यूष, अभ्योष, पृथुक, अभ्येष, अर्गल, मुसल, यूप, कटक, कर्णवेष्टक, किण्व, प्रदीप, स्थूण, पाप, पत्र, अवोष, ओदन, दीप, इर्गल। एवं तण्डुलाय हितम् इति यत् तण्डुल्यम्, तण्डुलीयम्। अपिच—"अन्नविकारेभ्यश्च", अन्नस्य ये विकारास्तेऽपि अपूपादिषु पठ्यन्ते—अत स्तेभ्योऽपि यत्प्रत्ययो विकल्पेन भवति, सुरा इति शब्दस्तु मद्ये वर्त्तते, सुरा तु अन्नस्य विकारः, सुरायै हिता इति यत् सुर्याः, छ—सुरीयाः। सुरीयाः सुर्याः वा तण्डुलाः। "हलिच" (८।२।७७) इति प्रसक्तस्य सुर्यास्य सुरीयस्य इति पदद्वयस्य उकारस्य दीर्घत्वम् "नभकुर्छुराम्" (८।२।७९) इति सूत्रेण वार्य्यते।

१६३१। तस्मै हितम् ॥ ५।१।५ ॥

टी—। वत्सेभ्यो हितो वत्सीयो गोधुक्। शङ्कवे हितम् शङ्कव्यं दारु। गव्यम्। हविष्यम्।

Suffixes are added to words in the sense of तस्मै हितम् i. e. to denote the thing, beneficial or useful to the objects expressed by the said words.

मित—। तस्मै इति चतुर्थीसमर्थात् हितम् इति एतस्मिन्नर्थे यथाविहितम् प्रत्ययो भवति। हितम् प्रयोजनीयम् उपकारको वेति अर्थः। वत्सेभ्यो हित इति वत्सीयो गोधुक्, अत्र "प्राक्क्रीताच्छः" (५।१;१) इति छप्रत्ययः। गोधुक्—यो गां दोग्धि स एव, गोदोहनकारो इत्यर्थः। शङ्कु इति प्रातिपदिकम्। शङ्कवे हितम् इति शङ्कव्यम् दारु, अत्र "उगवादिभ्यो यदि"ति (५।१।२) यत्, गवे हितं इति गव्यम्—अत्रापि अनेनापि सूत्रेण यत्। हविषे हितम्—हविष्यम्, हविष् इत्यस्य गवादिषु पाठात् यत्, एवम् अवत्साय हितम् अवत्सीयम्, अपूपाय हितम् अपूपीयम्, अपूप्यं च। पटवे हितम्—पटव्यम्, पशवे हितं पशव्यं, वत्सेभ्योहितं वत्सीयम् नवनीतम् इति भाषावृत्तिकारः।

१६३२। शरीरावयवाद्यत्॥५।५।६॥

**टी—। दन्त्यम्। कण्ठ्यम्। नस् नासिकायाः—नस्यम्। नाभ्यम्।**

The suffix यत is attached to words expressive of the limb of any creature.

मित—। शरीरं प्राणिकायः, शरीरस्य प्राणिकायस्य योऽवयवः, तद्वाचिभ्यः प्रातिपदिकेभ्यः यत्प्रत्ययो भवति तस्मै हितम् विषये, छस्य अपवादः अयं प्रत्ययः। दन्ताय हितम् दन्त्यम्। कण्ठाय हितं कण्ठ्यम्। नासिकायै हितं नस्यम्। "नस् नासिकाया यत्"। नस् इति नासिकास्थाने आदेशः। "यतु वर्णे नगरयोर्नेति वक्तव्यम्"—तेन नासिक्यः वर्णः, नासिक्यं नगरम्। नाभये हितं नाभ्यं तैलम्। शरीरस्य अवयववाचित्वात् न "नभम्" इति आदेशः। ओष्ठाय हितं ओष्ठ्यम्। मूर्द्ध्ने हितम् मूर्द्धन्यम्॥ रथाच्च इति भाषावृत्तिः। रथाय हिता रथ्या प्रतोली।

१६३३। ये च तद्धिते॥५।१।६१॥

**टी—। यादौ तद्धिते परे शिरश्शब्दस्य शीर्षन्नादेशः स्यात्। शीर्षण्यः। तद्धिते किम्? शिरः इच्छति शिरस्यति।**

The base शिरस् is turned into शीर्षन् before any Taddhita suffix beginning with यकार।

मित—। "शीर्षंश्छन्दसि" इति (६।१।६०) सूत्रम्, तदनु सूत्रमिदं वर्त्तते; पूर्व्वसूत्रात् शीर्षन् इति -अनुवृत्तम्। अतएव सूत्रस्य अयमर्थः—ये यकारादौ तद्धिते तद्धित-प्रत्यये परे सति शीर्षन् इति आदेशः स्यात् शिरस् इत्यस्य स्थाने, यस्य तद्धितप्रत्ययस्य आदिवर्णः यकारोभवति, तस्मिन् तद्धितप्रत्यये परे सति सिरस् इति शब्दस्थाने शीर्षन् स्यादिति फलितार्थः, शिरसि भव इति शीर्षण्यः, अत्र यत्-प्रत्ययः—"शरीरावयवात—" (४।३।५५) इति सूत्रेण। शीर्षण्यः स्वरः, शीर्षण्यः मुख्यः इत्यर्थः। अत्र "नस्तद्धिते" (६।४।१४४) इति शीर्षन् इत्यस्य नकारस्य लोपः प्रसक्तः। स च "ये चाभावकर्म्मणोः" (६।४।१६८) इति सूत्रेण निवारितः। तद्धिते इति किम्? शिरः इच्छति इति नामधातुप्रक्रियाविहितः क्यच्—["सुप आत्मनः क्यच्" (३।१।८) इति] तेन शिरस्यति इतिरूपम्।

शरीरावयवाद्यत् इति (५।१।६) यत्प्रत्ययः प्राक्क्रीतीयानां मध्ये हितार्थे विहितः, प्रकरणाल्लभ्यते। भाषावृत्तिकारस्तु यद्यपि प्रत्ययस्य अर्थं नोवाच परं दृष्टान्त-प्रदर्शने तु दण्डेभ्यो (दन्तेभ्यः) हितम् दण्ड्यं (दन्त्यं) इतीव कथयामास। काशिकाकारस्तु अस्य व्याख्याने "शरीरावयववाचिनः प्रातिपदिकाद्यत् प्रत्ययो भवति, तस्मै हितम् इति एतस्मिन् विषये" इति कथितवान्। भवार्थे तु—शरीरावयवाच्च (४।३।५५) इति सूत्रेण यत्प्रत्ययोऽप्यत्र साधुः स्यात्।

**टी—। वा केशेषु॥ शीर्षण्याः शिरस्या वा केशाः।**

The base शिरस् is optionally changed to शीर्षन् before a Taddhita suffix beginning with य, provided "hair" is denoted by the word newly formed.

मित—। केशे गम्यमाने शिरस् इत्यस्य स्थाने शीर्षन् इति आदेशः विकल्पेन स्यात् यादौ तद्धिते परे। शिरसि भवाः शिरस्याः शीर्षण्याः वा केशाः। "शरीरा-वयवाच्च" (४।३।५५) इति यत्प्रत्ययः।

**टी—। अचि शीर्ष इति वाच्यम्। (वा)। अजादौ तद्धिते शिरसः शीर्षादेशः। स्थूलशिरसः इदम् स्थौलशीर्षम्।**

The base शिरस् is changed to शीर्ष before any Taddhita suffix beginning with vowel.

मित—। अचि परे अजादौ तद्धिते परे इत्यर्थः। शीर्षः इति आदेशः। स्थूलं शिरः यस्य स इति बहुव्रीहिसमासे स्थूलशिराः इति पदम्, तस्य स्थूलशिरसः इदम् इति अण्प्रत्ययः—"तस्येदम्" (४।३।१२०) इति सूत्रेण—तेन स्थौलशीर्षम्, स्थौलशीर्षम् वपुः, एवम् हस्तिशिरसोऽपत्यं पुमान् इति इञ् प्रत्ययः—"बाह्वादिभ्यश्च" (४।१।९६) इति सूत्रेण—तेन हास्तिशीर्षिः इति रूपम्। मृगशिरसा युक्ता तिथिः मार्गशीर्षी तिथिः, "नक्षत्रेण युक्तः कालः (४।२।३) इति अण् प्रत्ययः॥ "टिड्ढाण—" (४।१।१५) इति स्त्रियाम् ङीप्।

ननु का अस्य सूत्रस्य सार्थकता—शीर्षन् इति आदिष्टस्य रूपस्य अपि "नस्तद्धिते" (६।४।१४४) इति नकारलोपेन शीर्ष इत्येव तिष्ठेत् ?—नैवम्। शीर्षन् इति आदेशे सति "अन्" (६।४।१६७) इति सूत्रेण शीर्षन् इति आदिष्टस्य रूपस्य प्रकृतिभाव एव प्रसक्तः स्यात्—तथा सति नलोपो न स्यात्—तच्च अनिष्टम्—इति एतत् कृतम्।

## १६३४। खलयवमाषतिलवृषब्रह्मणश्च ॥५।१।७॥

**टी—। खलाय हितम् खलयम्। यव्यम्। माषयम्। तिल्यम्। वृषयम्। ब्रह्मण्यम्। चाद्रथ्या।**

The suffix यत is added to the words enumerated in the sutra to imply the thing that is beneficial or useful to the objects expressed by the self-same words.

मित—। खल यव माष तिल वृष ब्राह्मण इति एतेभ्यः तस्मै हितम् इति एतस्मिन् अर्थे यत्प्रत्ययः स्यात्, "वृषभ्यो हितम्, ब्राह्मणेभ्यो हितम् इति वाक्यमेव भवति (यत् प्रत्ययः न स्यादित्यर्थः)। क्त-प्रत्ययोऽपि न भवति—अनभिधानात्." इति काशिका। सूत्रस्थ-चकारः अनुक्तसमुच्चयार्थः, सूत्रे अनुक्तम् अपि वस्तु चकारः

समुच्चिनोति तेन रथ इत्यस्मादपि यत् स्यात्। रथाय हिता रथ्या प्रतोली, इदं प्रागेव उक्तमस्माभिः।

१६३५। अजाविभ्याम् थ्यन् ॥५।१।८॥

टी—। अजथ्या यूथिः। अविथ्या।

In the aforesaid sense, the suffix थ्यन् is added to the words अज and अवि।

मित—। अज अवि इति एताभ्याम् थ्यन् प्रत्ययो भवति तस्मै हितम् इति एतस्मिन्नर्थे। अजाय हिता अजथ्या यूथिः, अजथ्या भूमिः, अवये हिता अविथ्या।

१६३६। आत्मन् विश्वजन भोगोत्तर-पदात् खः॥ ५।१।१० ॥

The suffix ख is attached to the words enumerated in the sutra in the aforesaid sense.

मित—। आत्मन् विश्वजन इति एताभ्याम् शब्दाभ्याम् तथा भोगोत्तरपदात् (यस्य प्रातिपदिकस्य अन्तभागे भोग इति तिष्ठति) तस्माच्च तस्मै हितम् इति एतस्मिन् विषये ख-प्रत्ययो भवेत्, छस्य अपवादः। भोगः शरीरम् इति काशिका, तन्मतानुयायी भाषावृत्तिकारश्च। तथा सति भुज्यते अनेन इति करणवाच्ये घञ् प्रत्ययेन सिद्धः भोगशब्दः। आत्मने हितम् इति ख-प्रत्ययः। "नस्तद्धिते" (६।४।१४४) इति आत्मन् इत्यस्य नकारस्य लोपे प्रसक्ते सति सूत्रयति—

१६३७। आत्माध्वानौ खे॥ ६।४।१६९ ॥

टी—। एतौ खे प्रकृत्या स्तः। आत्मने हितम् आत्मनीनम्। विश्वजनीनम्। कर्मधारयादेव इष्यते (वा)। षष्ठीतत्पुरुषात् बहुव्रीहेश्च छ एव। विश्वजनीयम्।

The words आत्मन् and अध्वन् suffer no change [i. e. do not elide नकार ], before the suffix ख। (See Tika also).

मित—। खप्रत्यये परे सति आत्मन् अध्वन् इति एतौ प्रकृतिभावेन एव तिष्ठतः। एतयोः किञ्चिद्रूपान्तरं न स्यात्, "नस्तद्धिते" इति सूत्रेण नलोपो न

स्यादिति फलितार्थः। आत्मने हितम् आत्मनीनम्, अध्वानम् अलङ्गामी इति अध्वनीनः। यः सुष्टु पंथानम् गच्छति स अध्वनीनः। खप्रत्यये इति किम्? आत्मानं प्रति प्रत्यात्मम्। प्रगतम् अध्वानम् इति प्राध्वम्। प्रत्यात्मम् इत्यत्र—लक्षणे-नाभिप्रतीआभिमुख्ये (२।१।१४) इति अव्ययीभावसमासे सति "अनश्च" (६।४।१०८) इति समासान्तष्टच् प्रत्ययः। प्राध्वम् इत्यत्र "उपसर्गादध्वनः" (५।४।८५) इति अच् प्रत्ययः। विश्वजनेभ्यो हितम् इति विश्वजनीनम्। "यन्मया विश्वजनीन-मुच्यते"। विश्वः जनः इति विश्वजनः कर्म्मधारयसमासः। एतस्मादेव कर्म्मधारय-समाससिद्धात् विश्वजनपदात् खप्रत्ययः इष्यते। विश्वः सर्व्वः इत्यर्थः, विश्वस्य भूमण्डलस्य धरित्र्या इति यावत् जनः विश्वजनः षष्ठीतत्पुरुषः। अस्मात् न खःस्यात् परम् छ एव तेन विश्वजनाय हितम् विश्वजनीयम्। विश्वः जनो यस्य स विश्वजनः इति बहुव्रीहिसमासः। अस्मादपि न खः प्रत्यत छएव, तेन विश्वजनाय हितं विश्वजनीयम्॥

## दी—। पञ्चजनादुपसंख्यानम्॥ पञ्चजनीनम्।

The suffix ख is added to the word पञ्चजन in the aforesaid sense.

मित—। कर्म्मधारयसमाससिद्धादेव पञ्चजनात् ख-प्रत्ययः स्यात्। पञ्चजनः इति कर्म्मधारय—"दिक्संख्ये संज्ञायाम्" (२।१।५०) इति सूत्रेण। पञ्चजनाय हितम् इति खः पञ्चजनीनम्। "गायनवादक-नर्त्तक-दासीभण्डरतः खलु पञ्चजनीनः"। भण्डः परिहासचतुरः (buffoon). गायनवादकनर्त्तक दासी भण्डेषुरत इत्यर्थः। पञ्चानां जनानां समाहारः इति पञ्चजनम्—द्विगुः। पात्रादित्वात् न स्त्रीलिङ्गम्। पञ्चजनाय हितं पञ्चजनीयम्, अत्र छएव न खप्रत्ययः, द्विगुसमासत्वात्। एवम् पञ्चभ्यः जनेभ्यः हितम् इति तद्धितार्थद्विगुसमासे अपि पञ्चजनीयम्।

## दी—। सर्व्वजनात् ठञ् खश्च॥ सार्व्वजनिकः। सर्व्वजनीनः।

The suffix ठञ as well as the suffix ख is added to the word सर्व्वजन।

मित—। सर्व्वोजन: इति सर्व्वजन: कर्म्मधारयसमाससिद्धात् सर्व्वजनशब्दात् तस्मै हितम् इति विषये ठञ् स्यात्, खश्च स्यात्। सर्व्वजनाय हितम्—इति ठञ्—सार्व्वजनिकम्। ख—सर्व्वजनीनम्। कर्म्मधारयात् अन्यत्र—सर्व्वेषां जन: सर्व्वजन: इति षष्ठीतत्; सर्व्व: जनो यस्य स सर्व्वजन इति बहुब्रीहि:। उभाभ्याम् एव छ स्यात्—न ठञ् नापि ख:। तेन सर्व्वजनीयम् इति रूपम्।

**दी—। महाजनात् ठञ्॥ माहाजनिक:।**

The suffix ठञ is be added to the word महाजन।

मित—। महाजन इति कर्म्मधारयनिष्पन्नोग्राह्य:। प्रकरणवशात्। बहुब्रीहिसमास-सिद्धात् तु छ एव स्यात्, महान् जन: यस्य स महाजन:, तस्मै हितं महाजनीयम्।

**दी—। मातृभोगीण:। पितृभोगीण:। राजभोगीन:। आचार्य्यादणत्वं च (वा)। आचार्य्यभोगीन:।**

मित—। मातुर्भोग: शरीरम् इति मातृभोग:। तस्मै हित इति ख:—मातृ-भोगीण:। पितृभोगीण:। उभयत्र भोगोत्तरपदात् खप्रत्यय:। भोगोत्तर-पदादिति किम्? मात्रे हित:—मात्रीय:, पित्रे हित: पित्रीय:,—उभयत्रापि छ एव। राज्ञ: भोग: इति राजभोग:,—तस्मै हित: इति राजभोगीन:। आचार्य्यस्य भोग: आचार्य्यभोग:। तस्मै हित: आचार्य्यभोगीन:। भोगोत्तरपदाभ्याम् राजाचार्य्याभ्याम् खप्रत्यय: स्यात्; केवलाभ्याम् राजाचार्य्याभ्याम् न ख: नापि छ: स्यात्; राज्ञे हितम्, आचार्य्याय हितम् इति वाक्यमेव स्यात् न प्रत्यय:। आचार्य्यभोगीन: इत्यत्र "आचार्य्यादणत्वञ्च" (४।१।४८, वार्त्तिक) इति णत्वाभाव:।

**१६३८। सर्वपुरुषाभ्याम् णढञौ॥ ५।१।१०॥**

**दी—। सर्वाण्णोवेति वक्तव्यम्। (वा)। सर्वस्मै हितम् सार्वम्, सर्वीयम्।**

The suffix ण and the suffix ढञ are attached to the words सर्व and पुरुष respectively in the aforesaid sense.

मित—। तस्मै हितमिति एतस्मिन्नर्थे सर्वपुरुष इति एताभ्याम् यथासंख्यम् णप्रत्ययः ढञ्प्रत्ययश्च स्याताम्। छप्रत्ययस्य अपवादः। सर्वशब्दात् णः स्यात् सर्वस्मै हितम् इति सार्वम्। पुरुषाय हितम् इति ढञ् पौरुषेयम्। सर्व इत्यस्मात् णप्रत्ययः विकल्पेन स्यादिति वक्तव्यम्। तेन सर्वस्मै हितम् इत्यर्थे छप्रत्ययोऽपि स्यात् सर्वीयम्।

**दी—। पुरुषाद्वधविकारसमूहतेनकृतेषु। (वा)। भषयाकार-प्रयोगात्तेनेत्यस्यद्वन्द्वमध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। तस्येदमिति अणि प्राप्ते। पुरुषस्य विकारः पौरुषेयः। प्राणिरज-तादिभ्योऽञ् इत्यञि प्राप्ते। समूहेऽपि अणि प्राप्ते। "एकाकिनो-ऽपि परितः पौरुषेय वृता इवे"ति माघः। तेन कृते ग्रन्थेऽणि प्राप्ते अग्रन्थे तु प्रासादादौ अप्राप्त एवेति विवेकः।**

To imply वध, विकार, समूह and तेन कृतम्, the suffix ढञ is attached to the word पुरुष।

मित—। वध विकार समूह तेनकृतम् इति एतेष्वेव अर्थेषु पुरुषशब्दात् ढञ्प्रत्ययः स्यात्। पुरुषस्य वधः इति अर्थे गम्ये पुरुषशब्दात् ढञ् पौरुषेयः वधः। "तस्येदम्" (४।३।१२०) इति पुरुषशब्दात् अत्र अण्प्रत्यये प्राप्ते तस्य अपवादः ढञप्रत्ययः विहितः। पुरुषस्य विकार इति अर्थे ढञ्। अत्र विकारे गम्ये सति "प्राणिरजतादिभ्योऽञ्" (४।३।१५४) इति अञ् प्रत्ययः प्राप्तः; तस्य अपवादः ढञ् अनेन विहितः, पुरुषाणाम् समूहः इति अर्थे अपि ढञ्—पौरुषेयः—समूहः, अत्रापि "तस्यसमूहः" (४।२।३७) इति प्रसक्तस्य अण्प्रत्ययस्य अपवादः। तथाहि शिशुपालवधकाव्ये "एकाकिनोऽपि परितः पौरुषेयवृता इव", पौरुषेयवृताः पुरुषसमूहैः परिवेष्टिताः इत्यर्थः। अथ समूहार्थे पुरुषशब्दात् ढञ्प्रत्ययस्य

उदाहरणम्। पुरुषेण कृतः ग्रंथः इति विषये ठञ् तेन पौरुषेयो ग्रंथः "कृते ग्रंथे" (४।३।११६) इति सूत्रेण अत्र अण्प्रत्यये प्रसक्ते सति, तस्य अपवादः ठञ् प्रत्ययः विहितः, किञ्च पुरुषेण कृतः प्रासादः इत्यर्थे "कृते ग्रंथे" इत्यनेन प्रत्ययो नेष्टः—प्रासादस्य अग्रंथत्वात्, परम् अस्मिन्नपि अर्थे पुरुषशब्दात् अनेन ठञ् स्यात्—तेन पौरुषेयः प्रासादः।

ननु "पुरुषाद्वध विकार समूह कृतेषु" इति अनेनैव इष्टसिद्धौ कथं "तेन" इति अंशस्य अत्र सन्निवेशः? भाष्यकारः भगवान् पतञ्जलिः एवं कृतवान्—तदनुसरणेन च श्रीमता दीक्षितेनापि इत्थम् लिखितं स्पष्टार्थम्।

## १६३८। माणवचरकाभ्याम् खञ्॥ ५।१।११॥

**टी—। माणवाय हितम् माणवीनम्। चरकायहितं चारकीणम्।**

The suffix खञ्—[ a bar to छ ] is added to the words माणव and चरक in the aforesaid sense.

मित—। माणव चरक इति एताभ्याम् तस्मै हितम् इति एतस्मिन् विषये खञ् प्रत्ययः स्यात्; छस्य अपवादः। माणवाय हितं माणवीनम्। चरकाय हितं चारकीणम्।

## १६४०। तदर्थं विकृतेः प्रकृतौ॥ ५।१।१२॥

**टी—। विकृतिवाचकात् चतुर्थ्यन्तात् तदर्थायां प्रकृतौ वाच्यायाम् छप्रत्ययः स्यात्। अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि, प्राकारीया इष्टकाः। शङ्कव्यं दारु।**

The suffix छ [ or any other suitable suffix ] is added to words implying विकृति [ effect ], to denote the corresponding प्रकृति [ the material cause ] of the self-same विकृति।

मित—। प्रकृतिरुपादानकारणम्। विकृतिः प्रकृतेरेव अवस्थान्तरम्; यस्मात् किञ्चित् जायन्ते सा प्रकृति र्यथा सुवर्णं, यत् खलु जायते सा विकृति र्यथा कुण्डलम्।

प्रकृतौ अभिधेयायाम् सत्याम्, विकृतिवाचिनः प्रातिपदिकात् छ-प्रत्ययः स्यात्। छ-प्रत्यय इति स्थाने तु यथाविहितः प्रत्ययः स्यादिति काशिका—भाषावृत्तिकारौ। काष्ठेभ्यः अङ्गाराणि जायन्ते—अतः काष्ठानि खलु प्रकृतिपद-वाच्यानि—अङ्गाराणि तु विकृतिसंज्ञकानि, काष्ठे वाच्ये अङ्गारात् छ-प्रत्ययः स्यात्। तेन अङ्गारेभ्यः एतानि इति छः अङ्गारीयाणि काष्ठानि। अङ्गारेभ्यः इत्यत्र चतुर्थी तु तादर्थ्ये। एवं प्राकारः इष्टकात् जायते अतः स विकृतिः। प्राकाराय एते इति छः—प्राकारीयाः इष्टकाः। शङ्कवे इदं इति "उगवादिभ्यो यत्" (५।१।२) शङ्कव्यं दारु। शङ्कुः खलु दारुण एव जायते अतः विकृतिः। एवं यूपीयं दारु, पिचुः तुला (cotton) —तदर्थः कार्पासः पिचव्यः कार्पासः। विकृतेरिति किम्? उदकार्थः कूपः। कूप उदकस्य प्रकृतिः परम् उदकं न कूपस्य विकृतिः—कूपस्य उदकस्य मध्ये तु अतात्त्वभेदात्। अतएव अत्र न प्रत्ययः। प्रकृतौ इति किम्? असयर्था कोशी, असि लौहस्य विकृतिर्भवति—परं कोशी तत्र न प्रकृतिः। (कोशी = scabbard)। अत इदं बोध्यं—न खलु प्रकृतिविकृतिसंभवमात्रे एव प्रत्ययः परं तु विकृतार्थायाम् प्रकृतौ गम्यमानायां विकारवाचिनः प्रत्ययः।

## १६४१। छदिरुपधिबलेर्ढञ्॥ ५।१।१३॥

**टी—। छादिषेयाणि तृणानि। वालेयास्तण्डुलाः। उपधि-शब्दात् स्वार्थे इष्यन्ते उपधीयते इति उपधिः रथाङ्गं। तदेव औपधेयम्।**

The suffix ढञ [a bar to छ] is attached to the words छदिस्, उपधि and बलि provided they stand as विकृतिः and their respective material causes [प्रकृतिः] are implied.

Or—"These take ढञ in the sense तदर्थम् the word so formed qualifying the प्रकृति (the thing transformed of which छदिस etc are the विकृति transformation.)"

मित—। विकृतार्थायाम् प्रकृतौ वाच्यायाम् विकृतिवाचिभ्यः छदिस्, बलि उपधि इति एतेभ्यो ढञ्प्रत्ययः स्यात्। छ-प्रत्ययस्य अपवादः। छदिभ्य एतानि इति छादिषेयाणि तृणानि। छदिः ऊर्द्धावरणं ( root )। बलये एते इति ढञ्— बालेयाः तण्डुलाः। उपधीयते इति उपधिः रथाङ्गम्। उपधिशब्दात् स्वार्थे एव अयं ढञ्प्रत्ययः स्यात्। उपधिरेव औपधेयम्। उपधि रथदारु औपधेयमपि तदिति फलितार्थः।

१६४२। ऋषभोपानहोर्ञ्यः ॥ ५।१।१४ ॥

टी—। छस्य अपवादः। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। चर्मण्यप्ययमेव पूर्वविप्रतिषेधेन। औपनह्यं चर्म।

The suffix ञ्य is attached to the words ऋषभ and उपानह्, provided they stand as विकृति and their respective material causes are implied.

मित—। विकृतार्थायाम् प्रकृतौ गम्यमानायाम् विकृतिवाचिभ्याम् ऋषभ उपानह् इति एताभ्याम् ञ्यप्रत्ययः। ऋषभोऽहयः। तस्मै अयं इति ञ्यः—आर्षभ्यः वत्सः। उपानहे अयं इति औपानह्यः मुञ्जः। मुञ्ज ईषीकावरणम्। चर्म अपि उपानहप्रकृति भवेत् तेन चर्मणि गम्ये अपि उपानहो ञ्यः स्यात्—औपानह्यं चर्म। "चर्मणोऽञ्" [ ५।१।१५ ] इति अञ्प्रत्ययो न स्यात्, उपानह अन्यस्मिन् विषये खलु तस्य सूत्रस्य प्रवृत्तिः।

१६४३। चर्मणोऽञ् ॥५।१।१५॥

टी—। चर्मणो या विकृतिस्तद्वाचकात् अञ् स्यात्। वध्र्यै इदं वाध्रं चर्म। वारत्रं चर्म।

The अञ [ a bar to छ ] is attached to words, expressive of any sort of विकृति of चर्म [ i, e. anything made out of चर्म ], to imply the material cause [ i. e. चर्म itself ].

मित—। विकृतार्थायां प्रकृतौ अभिधेयायां चर्मणो या विकृतिस्तद्वाचकात् प्रातिपदिकात् अञ् प्रत्ययः स्यात्। ढञः अपवादः। वध्र्यै इदं वार्ध्रं चर्म, वर्ध्रौ चर्मरज्जुः। वरत्रायै इदमिति वारत्रं चर्म, वरत्रापि चर्मरज्जुः, उपानह् इत्यस्मात् तु पूर्वेणैव ञ्यः—तेन औपानह्यं चर्म इति प्रागुक्तम्।

१६४४। तदस्य तदस्मिन् स्यादिति ॥ ५।१।१६ ॥

टी—। प्राकार आसाम् इष्टकानां स्यात् प्राकारीया इष्टकाः। प्रासादीयं दारु। प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः। इति-शब्दो लौकिकीं विवक्षाम् अनुसारयति। तेनेह न—प्रासादो देवदत्तस्य स्यादिति ?

To imply thing [ material ], with which some particular object bears any sort of relation, or upon which some particular object is capable of standing or being erected, suitable suffixes are attached to the words that are expressive of that particular object.

मित—। तत् इति प्रथमासमर्थः। अस्य इति प्रत्ययार्थम्। स्यादिति प्रकृति-विशेषणं अस्मिन् इत्यपि प्रत्ययार्थः। अत्र वाक्यद्वयं वर्त्तते—[१] तदस्य स्यादिति [२] तदस्मिन् स्यादिति। तदस्य स्यादित्यस्य अर्थस्तु—तत् इति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति—यत्तु प्रथमासमर्थं "स्यात्" चेत् तद्भवति। तदस्मिन् स्यादित्यस्य अर्थः—तदिति प्रथमासमर्थात् अस्मिन् इति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यत्तु प्रथमासमर्थं स्यात् चेत् तद्भवति। अतएव सूत्रस्य अयं फलितार्थः: —प्रथमासमर्थात् प्रातिपदिकात् षष्ठ्यर्थे सप्तम्यर्थे च यथायोग्यं प्रत्यय इष्यते, यत्तु प्रथमासमर्थं "स्यात्" चेत् तद्भवति, [ स्यात् इति सम्भावनायां लिङ्—"संभावनेऽलमिति चेत् सिद्धाप्रयोगे" [ ३।३।१५४ ] इति सूत्रेण]। अलमिति चेत्—पर्याप्त-मिति एतस्मिन्नर्थे सम्भावनायां लिङ् स्यात्। यद्वा स्यादिति सम्भावनाद्योतकम्

अव्ययं, "स्यात् अस्ति" कथञ्चित् अस्ति "स्यात् नास्ति" कथञ्चित् नास्ति इति जैन-दर्शने दर्शनात्। षष्ठ्यर्थः सम्बन्धार्थः। सप्तम्यर्थः अधिकरणार्थः। प्राकारः आसाम् इष्टकानां स्यात् [ सम्भवेत् ] इति प्राकारीया इष्टकाः। अत्र षष्ठ्यर्थे [ इष्टके ] गम्ये प्रथमासमर्थात् [ प्राकारात् ] छ-प्रत्ययः, एवं प्रासादः अस्य दारुणः स्यात् [ सम्भवेत् ] इति छप्रत्ययः प्रासादीयं दारु, एवमपि षष्ठ्यर्थे प्रथमा-समर्थात् प्रत्ययः। प्राकारोऽस्मिन् [ देशे ] स्यात् [ सम्भवेत् ] इति प्राकारीयो देशः। अत्र सप्तम्यर्थे प्रथमासमर्थात् छप्रत्ययः, एवं प्रासादः अस्यां भूमौ सम्भवेत् इति प्रासादीया भूमिः।

ननु "तदर्थं विकृतेः प्रकृतौ" ( ५।१।१२ ) इत्यनेन एव इष्टसिद्धौ किम् अनेन सूत्रेण इति चेत्—मैवम्। अत्र प्रकृतिविकृतिभावः तथा तादर्थ्यं च न विवक्षिते। किं तर्हि—योग्यतामात्रम् एव अत्र विवक्षितम्, अतएव अयं पूर्वसूत्रस्य विषयो न भवति।

सूत्रे "इति" शब्दः दृश्यते—तस्य तु विवक्षा एव अर्थः। विवक्षा हि अत्र लौकिकी विवक्षा एव। तेन प्रासादो देवदत्तस्य स्यादिति प्रत्ययो न स्यात्। लोके हि इष्टकादयः एव प्रासादयोग्यतायाम् विवक्षिता।

**१६४५। परिखाया ढञ् ॥ ५।१।१७ ॥**

**टी—। पारिखेयी भूमिः ॥**

The suffix ढञ् is added to the word परिखा in the aforesaid sense.

मित—। तदस्य तदस्मिन् स्यादिति एतस्मिन् विषये परिखाशब्दात् ढञ्प्रत्ययः स्यात्। छस्य अपवादः। परिखा अस्याम् ( भूम्याम् ) स्यात् ( सम्भवेत् ) इति ढञ्—पारिखेयी भूमिः। "टिड्ढाणञ्—" (४।१।२५) इति स्त्रियां ङीप्। परिखा-निर्माणयोग्या भूमिरित्यर्थः।

छयतोः पूर्णोऽवधिः ॥

१६४६। प्राग्वतेष्ठञ् ॥५।१।१८॥

दी—। तेन तुल्यमिति वतिं वक्ष्यति ततः प्राक् ठञ् अधिक्रियते।

The suffix ठञ् is to be added in the senses, spoken of in all the sutras that precede the rule—तेन तुल्यं क्रिया चेद्वतिः (५।१।११५)।

मित—। "तेन तुल्यं क्रिया चेद्वतिः" (५।१।११५) इति सूत्रं वक्ष्यति आचार्यः, तत्र सूत्रे "वतिः" इति संशब्द्यते। "वतेः" तस्मात् "वति" इति संशब्दनात् "प्राक्" पूर्व्वम् "ठञ्" प्रत्ययः ज्ञेयः। "वति" इति संशब्दनात् प्राक् स्थितेषु सूत्रेषु ये अर्थाः प्रोच्यन्ते, तेष्वेव अर्थेषु ठञ्प्रत्ययो वेदितव्यः। यथा वक्ष्यति "तेन क्रीतम्" (५।१।३७) इति सूत्रम्। अस्मिन् क्रीतार्थे ठञ् स्यात्—गोपुच्छेन क्रीतम् गौपुच्छिकम्। वक्ष्यति "पारायणतुरायणचान्द्रायणं वर्त्तयति" (५।१।७२) इति सूत्रम्। तत्र "वर्त्तयति" इत्यस्मिन्नर्थे ठञ् स्यात्। पारायणं वर्त्तयति पारायणिकः।

१६४७। आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥ ५।१।१९ ॥

दी—। तदर्हतीत्यभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते गोपुच्छादीन् वर्ज्जयित्वा ॥

The suffix ठक् a bar to ठञ् should be added in the sense spoken of by all the sutras upto तदर्हति (५।१।६३) (inclusive), except to the words गोपुच्छ as well as to words expressive of number or measure.

मित—। आ अर्हात् अगोपुच्छ संख्या परिमाणात्—ठक् इति पदच्छेदः। आ इति अभिविधिं द्योतयति, "आङ् मर्य्यादाभिविध्योः" (२।१।१३) इति सूत्रबलात्, "पञ्चम्यपाङ् परिभिः" (२।३।१०) इति आ अर्हात् इत्यत्र आ योगे पञ्चमी।

आ अर्हात् = अर्हम् अभिव्याप्य इत्यर्थः। "अर्हात्" तदर्हतीति ( ५।१।६३ ) नवं यत् "अर्ह" इति संशब्दनं तस्मात्; "आ" तत् अर्ह शब्दसंशब्दनम् अभिव्याप्य; तदर्हतीति ( ५।१।६३ ) सूत्रम् यावत् इत्यर्थः "ठक्" ठञ प्रत्ययस्य अपवादः ठक् इति प्रत्ययः वेदितव्यः; "अगोपुच्छ संख्या परिमाणात्" गोपुच्छ इति शब्दम्, तथा संख्यावाचकं परिमाणवाचकं च प्रातिपदिकम् वर्जयित्वा। एतेभ्यः ठञ् एव स्यादित्यर्थः। तथाहि —"तदर्हतीति" ( ५।१।६३ ) पर्य्यन्तेषु 'क्रीतम्" "निमित्त" "ईश्वरः" "विदितः" "वापः" "तदस्मिन्" "तद्धरति" "तद्वहति" "तदावहति" "सम्भवति" "अवहरति" "पचति" "सोऽस्य"-"तदस्य"-"तदर्हति" इति एतेषु एव अर्थेषु ठञ्प्रत्ययस्य अपवादः ठक्प्रत्ययः भवेदिति वक्तव्यः। किञ्च गोपुच्छात् तथा संख्यावाचकात् परिमाणवाचकात् "प्राग्वतेष्ठञ्" ( ५।१।१८ ) इति ठञ् एवस्यात्। यथा—क्रीतार्थे निष्केण क्रीत इति ठक् नैष्किकः, गोपुच्छात् तु गोपुच्छेन क्रीतः गौपुच्छिकः इति ठञ्। संख्यावाचकात्—सप्तत्या क्रीतः साप्ततिकः—ठञ्। परिमाणवाचकात्—प्रस्थेन क्रीतः प्रास्थिकः—ठञ्। ठक् ठञ् इति प्रत्ययद्वयस्य स्वरे एव भेदो वर्त्तते।

## १६४८। असमासे निष्कादिभ्यः ॥ ५।१।२० ॥

**दी—। आर्हादितिप्रतत्तेन क्रीतमिति यावत् सप्तदशसूत्रीम् अनुवर्त्तते। निष्कादिभ्योऽसमासे ठक् स्यात् आर्हीयेष्वर्थेषु। नैष्किकम्। समासे तु ठञ्।**

The suffix ठक् ( a bar to ठञ ) is attached to the word निष्क and also to others passing by the term निष्कादि, provided they ( the said words ) stand by themselves i. e. do not enter into a compound.

मित—। निष्कादि यथा—निष्क, पण, वाह, द्रोण, पाद, माष, षष्टि। एतेभ्यः ठक्प्रत्ययः स्यात् असमासविषये आर्हीयेषु एव अर्थेषु। आर्हीयेषु इति केषु केषु अर्थेषु? "आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्" ( ५।१।१९ ) इत्यारभ्य "तेन क्रीतम्" ( ५।१।३७ ) इति सूत्रम् यावत् ये ये अर्थाः प्रक्रान्ताः तेषु तेषु अर्थेषु।

आर्हात् ( आ-अर्हात् ) इति तु "असमासे निष्कादिभ्यः" इत्यस्मात् "तेन क्रीतम्" ( ५।१।३७ ) इति यावत् ये सप्तदश सूत्राणि वर्त्तन्ते तेषां प्रत्येकम् एव अभिसंबध्नाति। निष्केण क्रीतम् इति नैष्किकम्। समासे तु ठञ् एव स्यात्।

१६४८। परिमाणान्तस्यासंज्ञाशाणयोः ॥ ७।३।१७ ॥

टी—। उत्तर-पद-वृद्धिः स्यात् ञिदादौ। परमनैष्किकः। असमासग्रहणं ज्ञापकं भवति-इतः प्राक् तदन्तविधिरिति। तेन सुगव्यम्। यवापूप्यम्। इतः ऊर्द्धं तु संख्यापूर्वपदानां तदन्त-ग्रहणं प्राग्वतेरिष्यते तच्चालुकि। पारायणिकः। द्वै-पारायणिकः। अलुकिइति किम्? द्वाभ्याम् शूर्पाभ्याम् क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीते शूर्पाट्ञ् माभूत्। किंतु ठञ्। द्विशौर्पिकम्।

The first of all the vowels contained by a word expressive of some measure itself added, as a last member, to a word, ( expressive of some number ? ) takes its Briddhi substitute before a Taddhita suffix eliding ञकार, णकार, or ककार, except in the case of the self-same words standing as a class-name, as well as excepting the word शाण—standing as a second number of a numerical word.

मित—। संख्यावाचक-शब्दस्तु यस्य पूर्व्वपदम् भवति, परिमाणवाचक-शब्दस्तु यस्य उत्तरपदं भवति, तादृशस्य समस्तस्य पदस्य यत् उत्तरपदम् तस्य अचां मध्ये य आदिरच् तस्य वृद्धिःस्यात् तद्धिते ञिति, णिति, किति च परतः; संज्ञायां विषये ( संज्ञायां गम्यमानायां ) एतत् कार्य्यं न स्यात्; किञ्च यदा शाण इति परिमाण-वाचकं प्रातिपदिकम् उत्तरपदं स्यात् तदापि तस्य आदिस्वरवृद्धिर्नस्यात्। द्वाभ्यां

निष्काभ्यां क्रीतम् इति समासे ठञ् द्वि-नैष्किकम्। एवम् द्वाभ्याम् सुवर्णाभ्याम् क्रीतं द्वि-सौवर्णिकम्। "तेन क्रीतम्" ( ५।१।३० ] इति विषये ठञ्। परम-निष्केण क्रीतं इति परमनैष्किकम्—ठञ्।

ननु अत्र किञ्चित् विचार्य्यम् प्रतीयते। अस्य सूत्रस्य विवृतौ दीक्षितः पठति "उत्तर-पदवृद्धिः स्यात् ञिदादौ।" कस्य वृद्धिरिति आकाङ्क्षायाम् परिमाणान्तस्य इति आयाति। परिमाणान्तस्य इति अत्रपृच्छ्यते परिमाणं कस्य अन्ते तिष्ठति—अत्र नीरवः श्रीमान् दीक्षितः। उदाहरणप्रदर्शने तु परम-नैष्किकः इति दृश्यते। अत्र निष्क इति परिमाणवाचकं तु परम इत्यस्य अन्ते तिष्ठति। "परिमाणा-न्तस्य—" इति सूत्रं तु "वर्षस्याभविष्यति" [ ५।१।१६ ] इत्यतः पश्चात् तिष्ठति—तत् पूर्व्वम् अस्ति "संख्यायाः संवत्सरसंख्यस्य च" [ ५।१।१५ ] इति सूत्रम्। काशिका—भाषावृत्तिकारमते तु "संख्यायाः" इत्यंशस्य अस्मिन्नपि सूत्रे अनुवृत्तिः—तेन संख्यायाः परस्थितस्य परिमाणान्तस्याङ्गस्य वृद्धिः स्यात्; उदाहरणप्रदर्शने तु द्विनैष्किकम् इति उक्तम् उभाभ्याम्। असमासे निष्कादिभ्यः [ ५।१।२० ] इत्यत्र तु प्रत्युदाहरणे भाषावृत्तिकृता द्विनैष्किकम् इति उक्तम्। अतः भाषावृत्तौ न काचिदसङ्गतिर्वीक्ष्यते. परम् "असमासे निष्कादिभ्यः" [ ५।१।२० ] इत्यत्र प्रत्युदाहरणे "परमनैष्किकम्" इति दृश्यते काशिकायाम्। तत् कथं संगच्छते? नहि परम् इति संख्यावाचकः कश्चित् शब्दः, [सुधिभिर्विभाव्यमेतत्]। दीक्षित-वृत्तौ परमनैष्किकः इति भवेन्नाम। वयं तु अस्यव्याख्याने संख्यायाः परस्य परिमाणान्तस्य अङ्गस्य वृद्धिः स्यात् इति काशिका-भाषावृत्तिमतमनुसृत्य लिखितवन्तः। यस्य समस्तपदस्य उत्तर पदं तु परिमाणवाचकं भवति, तस्य उत्तर-पदस्य एव अचां मध्ये आद्यस्य अचो वृद्धिः स्यात् ञिति णिति किति च तद्धितप्रत्यये परे, संज्ञा-विषयं तथा शाण इति परिमाण-वाचकम् उत्तर-पदं च वर्ज्जयित्वा—इत्येव व्याख्याने खलु परमनैष्किकः इत्यस्य उदाहरणं संगतं स्यात्। संज्ञाविषये इति किम्? पञ्च कपालानि परिमाणम् अस्य इति विग्रहे ठक् प्रत्ययः। पाञ्चकपालिकम्। शाणे इति किम्? द्वाभ्याम् शाणाभ्याम् क्रीतम् इति द्वैशाणम्। "द्वित्रिपूर्व्वादण् च" [ ५।१।३६ ] इति अण् प्रत्ययोऽत्र।

भवतु तावत्। असमासे निष्कादिभ्यः इत्यत्र असमास इति तु ज्ञापकमेव। किं ज्ञाप्यते अनेन ? एतत् ज्ञाप्यते—यत् "अस्मात् सूत्रात् प्राक् खलु तदन्तविधिः स्वीकार्यः।" अतएव यथा गवे हितम् इति तस्मै हितमिति विषये "उ-गवादिभ्यो यत्" [ ५।१।२ ] इति सूत्रेण यत् प्रत्ययः स्यात् एवं सुगवे हितं सुगव्यम् इति समासान्तात् अपि गोशब्दात् यत् स्यात्। इत्थम् अतिसुगव्यम्। अतिगव्यम्। अन्यत्र—दन्ताय हितम् इति "शरीरावयवाद्यत्" ( ५।१।६ ) इति यत् दन्त्यम्। एवं तथैव दन्तानां राजा इति "राजदन्तादिषु—" ( २।२।६१ ) इत्यादि सूत्रनिष्पन्नात् राजदन्त शब्दादपि यत्—राजदन्त्यम्। अपरं च-विभाषा हविरपूपादिभ्यः ( ५।१।४ ) इति अपूप्यं—अपूपीयम्। यत् छ इति प्रत्ययौ स्तः विकल्पेन, अनयैव रीत्या समासात् यवापूप इत्यस्मात् एतौ अपि। तेन यवापूप्यं यवापूपीयम्। अस्मात् सूत्रात् परस्मिन् स्थितानां केषाम् तदन्तविधिः स्वीकरणीयः ? इति आकाङ्क्षायाम् उत्तरं पठति— "इतः ऊर्द्ध्वं तु" इत्यादिना। "इतः ऊर्द्ध्वम्" अस्मात् "असमासे—" ( ५।१।२० ) इत्यादि सूत्रात् ऊर्द्ध्वम् परम् "तु" केवलं "संख्यापूर्व्वपदानाम्" येषां समस्तपदानाम् पूर्व्वस्मिन् पदे संख्यावाचकः शब्दस्तिष्ठति तेषाम् "तदन्तग्रहणम्" तदन्तविधिः— समासान्तत्वेऽपि प्रत्ययविधिरिति यावत्, "प्राग्वतेः" तेन तुल्यं क्रिया चेद्वति ( ५।१।११५ ) इति सूत्रात् प्राक् "इष्यते" अभिलष्यते उररीक्रियते इति यावत्; "तच्चालुकि" लुगन्तायास्तु प्रकृतेर्नेष्यते इति काशिका। येभ्यः विहितस्य प्रत्ययस्य लुक् स्यात्—तेषांसंख्यापूर्व्वपदानामपि तदन्तविधिर्नास्तीति फलितार्थः। उदाहरणं यथा— पारायणं वर्त्तयति इति ठञ् "पारायण तुरायण चान्द्रायणं वर्त्तयति" (५।१।७२) इति सूत्रेण—तेन पारायणिकः। संख्यापूर्व्वपदादपि अयं विधिः तेन—द्विपारायणं वर्त्तयति इति ठञ्—द्वैपारायणिकः। इत्थं त्रैपारायणिकः। अलुकि इति किम् ? द्विशूर्पेण क्रीतम् इति विग्रहे तदन्तविधिप्रतिषेधात् "शूर्पादञन्यतरस्याम्" ( ५।१।२६ ) इति अञ् न स्यात्। कथं तदन्तविधिप्रतिषेधः ? "अध्यर्द्ध—पूर्व्वाद् द्विगोर्लुगसंज्ञायाम्" ( ५।१।२८ ) इति द्विगोः परस्य आर्हीयस्य प्रत्ययस्य लुग् भवति। ततः सामान्यविहितः ठञ् प्रत्ययः स्यात् तेन द्विशूर्पेण क्रीतं द्विशौर्पिकम्। ननु ठञ् प्रत्ययस्य लुग् कथं न स्यात्। "ठञो द्विगुं प्रति अनिमित्तात् लुगभावः"

इति काशिका। अत्र न तद्धितार्थद्विगुः। अनेन सह ठञ् इत्यस्य न कोऽपि सम्पर्कः—अतस्तस्य न लोपः। द्वाभ्यां शूर्पाभ्याम् क्रीतम् इति "अध्यर्द्ध—" [ ५।१।२८ ] इति सूत्रेण तद्धितार्थद्विगुसमासे सति प्रत्ययस्य लुग् तेन द्वि-शूर्पम्। अत्र तद्धितप्रत्ययलुकि न तदन्तविधिः तेन तदन्तविधेरभावात् "द्वि" इत्यस्य इकारस्य न वृद्धिः।

१६५०। अर्धात् परिमाणस्य पूर्वस्य तु वा ॥ ७।३।२६ ॥

टी—। अर्धात् (? परस्य) परिमाण-वाचकस्य उत्तर-पदस्य आदेरचोवृद्धिः पूर्वपदस्य तु वा ञिति णिति किति च। अर्ध-द्रोणेन क्रीतं अर्धद्रौणिकम्। आर्धद्रौणिकम्।

The first of all the vowels contained by a word expressive of some measure or amount, itself forming the second member of a compound, the first member of which is the word अर्ध takes its Briddhi substitute before a Taddhita suffix eliding its ञ, ण, or क; and the first vowel of the word अर्ध itself, optionally takes the same under same circumstances.

मित—। अर्ध इति प्रातिपदिकात् परस्य परिमाण-वाचिनः उत्तरस्य अर्धात् परस्थितं यत् उत्तरपदम् परिमाणवाचकं तस्य इत्यर्थः अचां मध्ये आद्यस्य अचः वृद्धिः स्यात् ञिति णिति किति च तद्धितप्रत्यये परतः। किञ्च पूर्व्वस्य पूर्व्वपदस्य अर्ध इत्यस्य अचाम् आदेरचश्च वृद्धिः स्यात् विकल्पेन पूर्व्वोक्ते प्रत्यये परतः। अर्ध-द्रोणेन क्रीतम् इति क्रीतार्थे ठञ्। अर्धद्रौणिकम्—उत्तर पदस्य वृद्धिः—पूर्व्व-पदस्य न वृद्धिः। आर्धद्रौणिकम् उभयस्य च वृद्धिः। एवम् अर्धकौड़विकम—आर्धकौड़विकम्। परिमाणस्य इति किम्? अर्धक्रोशः प्रयोजनम् अस्य इति आर्धक्रौशिकम्।

१६५१। नातः परस्य ॥ ७।३।२७ ॥

टी—। अर्धात् परस्य परिमाणाकारस्य वृद्धि र्न पूर्वपदस्य तु वा ञिदादौ। अर्धप्रस्थिकम्। आर्धप्रस्थिकम्॥ अत: किम्? आर्धकौड़विकम्। अर्धखार्य्यां भवा अर्धखारी। अर्धखारीभार्य्य: इत्यत्र वृद्धिनिमित्तस्य इति पुंवद्भावनिषेधो न स्यात्।

The first अकार occuring in a word implying some measure or amount itself happening to be the second member of a compound, the first member of which is the word अर्ध, does not take its Briddhi substitute before a Taddhita suffix eliding ञ, ण or क; the अकार of the first nember अर्ध, optionally takes the same. (See Tika for the rest).

मित—। अर्धात् परस्य परिमाणवाचिन: शब्दस्य य आद्य अकारस्तस्य वृद्धिर्नस्यात् ञिति णिति किति च तद्धितप्रत्यये परत:, पूर्व्वपदस्य [अर्धस्य इत्यस्य] आदेरचो वृद्धिस्तु वा स्यात्। अर्धप्रस्थेन क्रीतम् इति क्रीतार्थे ठञ्—अर्धप्रस्थिकम्। अकारस्य इति किम्? अर्ध-कुड़वकेन क्रीतम्—इति आर्धकौड़विकम्।

ननु सूत्रे "अत:" इति त-परकरणं कथम्? उच्यते। अर्धखार्य्यां भवा इति अर्धखारी, "तत्रभव:" [४।३।५३] इति अण्—स्त्रियां ङीप्। एवमपि अर्धखारी भार्य्या यस्य स अर्धखारीभार्य्य:। अत्र "वृद्धिनिमित्तस्य तद्धितस्यारक्तविकारे" [६।३।३९] इति सूत्रेण पुंवद्भावप्रतिषेध: स्यात् उत न स्यात् इति वितर्के उच्यते—स्यात्। अत्र अण्प्रत्यय: वृद्धिनिमित्तो न इति न वक्तुं शक्यते। ननु अर्धखारी इत्यत्र खकारात् पर: आकारस्तु स्वाभाविक:—अस्य वृद्धिस्तु आकार एव—माभूत् तस्य वृद्धिजन्यं रूपान्तरं परं अण् इति प्रत्ययस्तु वृद्धिनिमित्तं इति पुंवद्भावप्रतिषेध: स्यात्। यत्र हि तद्धिते वृद्धि: प्रतिषिध्यते स वृद्धिनिमित्तं न भवतीति पुंवद्भावो न प्रतिषिध्यते। यथा वैयाकरणी भार्य्या अस्य वैयाकरण-भार्य्य:। अत्र तु न तथा तेन नात्र पुंवद्भाव—प्रतिषेध: इति सर्वम् अवदातम्।

१६५२। शताच्च ठन्यतावशते ॥५।१।२१॥

टी---। शतेन क्रीतं शतिकम्। शत्यम्। अशते किम्? शतम् परिमाणमस्य शतकः संघः इह प्रत्ययार्थोवस्तुतः प्रकृत्यर्थान्न भिद्यते तेन ठन्यतौ न किन्तु कनेव। असमास इत्येव। द्विशतेन क्रीतं द्विशतकम्।

The suffix ठन् and यत् are added to the word शत in any of the आर्हीय sense—provided शत ( i. e. a collection or group of hundred ) is not implied.

मित—। शत इति प्रातिपदिकात् आर्हीयेषु अर्थेषु ठन् यत् इति प्रत्ययौ स्याताम्, अशते अभिधेये। "शतात्" अन्यस्मिन् अभिधेये सति इत्यर्थः। शतेन क्रीतम् शतिकम्—ठन्। शतिकः कम्बलः। शतेन क्रीतम्—शत्यम्—अत्र यत्। शत्यः अश्वः। परसूत्रेण यः कन्प्रत्ययः संख्या-वाचकात् विधीयते तस्य अपवादभूतौ एतौ प्रत्ययौ। अशते इति किम्? शतम् परिमाणम् अस्य इति शतकः सङ्घः। शतम् अध्यायाः परिमाणम् अस्य इति शतकं निदानम्। शतकम् काव्यम्। शतं श्लोकाः परिमाणमस्य काव्यस्य इत्यर्थः। एषु प्रत्ययस्य योऽर्थः स तु प्रकृतेरर्थात् न भिन्नः—तेन ठन्यतौ न स्याताम्—किन्तु परसूत्रेण कन् एव, शतकः सङ्घः इत्यादौ प्रत्ययस्य अर्थस्तु संघः—स च वस्तुतः शतमेव—अतः प्रकृतेरर्थात् शतपरिमाणात् स न भिद्यते। एवं शतकं निदानं—इहापि प्रत्ययस्य अर्थः ग्रन्थः—स च शताध्यायसनाथः—प्रकृतेरर्थात् शतपरिमाणात न भिद्यते अतः शतम् एव अत्र अभिधेयम् इति (कारणात्) न ठन् यतौ। सूत्रे यश्चकारः विद्यते स हि असमासे इत्येव अनुकर्षति—तेन असमासे ठन् यतौ। अतएव द्विशतेन क्रीतम् इत्यत्र कन् खलु स्यात्—द्विशतकम्। "प्राग्वतेः संख्यापूर्व-पदानां तदन्तग्रहणम् अलुकि" इति वचनम् अस्मिन् सूत्रे न फलति इत्येव सूत्रस्थेन चकारेण ज्ञाप्यते इति, अतएव द्विशतेन क्रीतम् इति संख्यापूर्वपदादपि ठन् यतौ न इति आशयः।

१६५३ । संख्याया अतिशदन्तायाः कन् ॥ ५।१।२२॥

टी—। संख्याया कन् स्यात् आर्हीयेऽर्थे नतु त्यन्तशदन्तायाः । पञ्चभिः क्रीतः पञ्चकः । बहुकः । त्यन्तायास्तु—साप्ततिकः । शदन्तायाः—चात्वारिंशत्कः ।

The suffix कन् is attached to words expressive of numbers in any of the आर्हीय senses—provided the selfsame numerical words do not end in ति ( as सप्तति ) or शत् ( as चत्वारिंशत् ); the suffix कन् here stands as a bar to ठञ् ।

मित—। "ति" इति येषां संख्याशब्दानाम् अन्ते तिष्ठति, "शत्" इति च येषां संख्याशब्दानां अन्ते तिष्ठति, तान् संख्याशब्दान् वर्जयित्वा अन्येभ्यः, संख्याशब्देभ्यः आर्हीये अर्थे कन्प्रत्ययः स्यात् । पञ्चभिः क्रीतः पञ्चकः । बहुभिः क्रीतः बहुकः, गणैः क्रीतः गणकः । अति इति किम् ? सप्तत्या क्रीतः साप्ततिकः—अत्र ठञ् । शत् इति किम्—चत्वारिंशता क्रीतः चात्वारिंशत्कः । अत्रापि ठञ् । एवं पाञ्चाशत्कः । डति प्रत्ययान्तानां तु अयं विधिः न स्यात्—तेन कतिभिः क्रीतः कतिकः । अत ति इति स्थितेऽपि कन् एव ।

१६५४ । वतोरिड् वा ॥ ५।१।२३ ॥

टी—। वत्वन्तात् कन् इड् वा स्यात् । तावतिकः । तावत्कः ।

Words ending in वत् and ( at the samtime ) expressive of numbers take the suffix कन् after them ( by the previous rule ); but an इट् is optionally inserted between the base and the suffix.

मित—। आर्हीयेषु अर्थेषु "वतोः" वत् इति येषां संख्याशब्दानामन्ते वर्त्तते तेभ्यः कन्प्रत्ययः स्यात् पूर्वसूत्रेण, परं शब्दानाम् कन्प्रत्ययस्य च मध्ये विकल्पेन

इट् इति आगमो भवति। तावता क्रीतः इति संख्यावाचकात् वत्वन्तात् तावत् इत्यस्मात् कन्—इट् च; तेन तावतिकः; इटः अप्राप्तौ—तावत्कः।

## १६५५। विंशतित्रिंशद्भ्याम् ड्वुन्नसंज्ञायाम्। ५।१।२४॥

टी—। योगविभागः कर्त्तव्यः। आभ्यां कन् स्यात्। असंज्ञायां ड्वुन् स्यात्। कनोऽपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः।

The suffix कन् is attached to the words विंशति and त्रिंशत्; the suffix ड्वुन् is attached to these two when a संज्ञा a proper name or a class name is not implied.

मित—। "योगविभागः कर्त्तव्यः—" सूत्रम् तु द्विधा विभाज्यम् इत्यर्थः। विंशति त्रिंशद्भ्याम् इत्येकः अंशः। तस्य अर्थस्तु—विंशतिः इत्यस्मात् तथा त्रिंशत् इत्यस्मात् च आर्हीयेषु अर्थेषु कन् स्यात्; "संख्याया अतिशदन्तायाः कन्" (५।१।२२) इत्यस्य प्रतिप्रसवोऽयं (counter-exception). विंशत्या क्रीतः विंशतिकः। त्रिंशता क्रीतः त्रिंशत्कः। सूत्रस्य द्वितीयांशस्तु—"ड्वुन् असंज्ञायाम्"। अस्यार्थः—असंज्ञायाम् विषये एताभ्याम् ड्वुन् इति प्रत्ययः स्यात्। कनोऽपवादः। विंशत्या क्रीतः इति ड्वुन्—तथा सति 'तिविंशतेर्डिति' इति (६।४।१४२) टिलोपः। तेन विंशकः इति रूपम्। त्रिंशता क्रीतः इति ड्वुन् "टेः" (६।४।१४३) इति टिलोपः तेन त्रिंशकः इतिरूपम्। विंशकः त्रिंशकः इति तु असंज्ञायाम्—अतएव विंशतिकः, त्रिंशत्कः इति संज्ञायामेव। त्रिंशतिकः इति यत्तु क्वचिद् वृत्तौ दृश्यते तत् प्रामादिकमेव।

## १६५६। कंसाट्टिठन्॥ ५।१।२५॥

टी—। टो ङीबर्थः। इकार उच्चारणार्थः। कंसिकः। कंसिकी।

The suffix टिठन् is attached to the word कंश in any आर्हीय sense.

मित—। कंस इत्यस्मात् आर्हीयेषु अर्थेषु टिठन् इति प्रत्ययः स्यात्। ठञ् प्रत्ययस्य बाधः, टिठन् इति प्रत्यये टकारस्तु स्त्रियां ङीप् इति सूचयति—"टिड्ढाणञ्" ( ४।१।१५ ) इति सूत्रेण। टकारात् पर इकार उच्चारणार्थः एव। नकारः स्वरार्थः। कंसेन क्रीतः इति टिठन्—कंसिकः पटः। स्त्रियां कंसिकी।

**टी—। अर्धाच्चेति वक्तव्यम्। (वा)। अर्धिकः—आर्धिकी।**

मित—। अर्ध इत्यस्मादपि आर्हीये अर्थे टिठन् स्यात्। अर्धेन क्रीतः अर्धिकः—अर्धिकी।

**टी—। कार्षापनाट्टिठन् वक्तव्यः। प्रतिरादेशश्च वा॥ (वा)॥ कार्षापणिकः। कार्षापणिकी। प्रतिकः। प्रतिकी।**

The suffix टिठन् is attached to the word कार्षापण; and the word is optionally substituted ( replaced ) by "प्रति"।

मित—। कार्षापण इत्यस्मात् आर्हीयेषु अर्थेषु टिठन् प्रत्ययः स्यात्; प्रत्यये च परे कार्षापण इत्यस्य स्थाने विकल्पेन "प्रति" इति आदेशो वा स्यात्, कार्षापणेन क्रीत इति कार्षापणिकः। स्त्रियां कार्षापणिकी। प्रत्यादेशेतु कार्षापणेन क्रीतः इति प्रतिकः। स्त्रियां प्रतिकी।

**१६५७। शूर्पादञन्यतरस्याम्॥ ५।१।२६॥**

**टी—। शौर्पम्। शौर्पिकम्।**

The suffix अञ् is optionally affixed to the word शूर्प।

मित—। आर्हीयेषु अर्थेषु शूर्प इत्यस्मात् अञ् प्रत्ययः स्यात् विकल्पेन; अञोऽप्राप्तिपक्षेतु ठञ्। शूर्पेण क्रीतम् इति शौर्पम्—अञ्। शौर्पिकम्—ठञ्।

१६५८। शतमानविंशतिक-सहस्रवसनादण् ॥ ५।१।२७ ॥

**टी—। एभ्यो अण् स्यात् ठञ्ठक्कनामपवादः। शतमानेन क्रीतम् शातमानम्। वैंशतिकम्। साहस्रम्। वासनम्।**

The suffix अण् is attached to the words शतमान, विंशतिक, सहस्र and वसन in the आर्हीय sense.

मित—। आर्हीयेषु अर्थेषु शतमान विंशतिक सहस्र वसन इति एतेभ्यः अण् स्यात्। शतमानेन क्रीतम् शातमानम्। अत्र विहितोऽण् ठञः अपवादः। विंशतिकेन क्रीतम् इति वैंशतिकम्—अत्र ठक्प्रत्ययस्य अपवादः अण्। सहस्रेण क्रीतम् इति साहस्रम् अत्र कन् प्रत्ययस्य अपवादः। वसनेन क्रीतम् इति वासनम्। अत्र अण्।

१६५९। अध्यर्द्ध-पूर्व्वाद्-द्विगोर्लुगसंज्ञायाम् ॥ ५।१।२८ ॥

**टी—। अध्यर्धपूर्व्वात् द्विगोश्च परस्य आर्हीयस्य लुक् स्यात्। अध्यर्धकंसम्। द्विकंसम्। संज्ञायां तु पाञ्चकलापिकम्।**

Any आर्हीय suffix, added to a compound word the first member of which is अध्यर्द्ध, elides, so does the same suffixes when after any द्विगु compound provided no propername or class-name is implied in any case.

मित—। अध्यर्द्धशब्दः पूर्व्वः यस्मिन् तस्मात् अध्यर्द्धपूर्वकात् प्रातिपदिकात् परस्य आर्हीयस्य प्रत्ययस्य लुक् स्यात् असंज्ञायां विषये; अपिच "द्विगोः" द्विगु-समासात् परस्य अपि आर्हीयस्य प्रत्ययस्य लुक् स्यात् असंज्ञायां विषये। अध्यर्द्धकंसेन क्रीतम् इति अध्यर्द्ध-कंसम्। अत्र विहितस्य ठञ् प्रत्ययस्य लुक्। द्विगोः—द्वाभ्याम् कंसाभ्याम् क्रीतम् इति द्विकंसम्, एवं त्रिकंसम्। एवम् अध्यर्द्धशूर्पेण

क्रीतम् इति अध्यर्द्धशूर्पम्। द्विशूर्पम्। त्रिशूर्पम्। असंज्ञायाम् इति किम्? संज्ञायाम् न स्यात्—तथाहि पञ्चभि: कलापिकाभि: क्रीतम् इति पाञ्चकलापिकम्। एवं पाञ्चकपालिक:।

१६६० । **विभाषा कार्षापणसहस्राभ्याम् ॥ ५।१।२९ ॥**

**टी—। लुग् वा स्यात्। अध्यर्धकार्षापणम्। अध्यर्ध-कार्षापणिकम्। द्विकार्षापणम्-द्विकार्षापणिकम्। औपसंख्यानिकस्य टिठनो: लुक्। पक्षे अध्यर्धप्रतिकम्। द्विप्रतिकम्। अध्यर्ध सहस्रम्। अध्यर्धसाहस्रम्। द्वि-सहस्रम्। द्वि-साहस्रम्।**

A suffix of the आर्हीय class that elides by the previous rule, elides optionally, when after the words कार्षापण and सहस्र।

मित—। अध्यर्धपूर्वात् द्विगोश्च कार्षापण-सहस्रान्तादुत्तरस्य आर्हीयस्य प्रत्ययस्य विकल्पेन लुक् स्यात्। पूर्वसूत्रेण लुकि नित्ये प्राप्ते अनेन विकल्प: विधीयते। अध्यर्धकार्षापणेन क्रीतम् अध्यर्धकार्षापणिकम् इति टिठन्। पक्षे लुक् अध्यर्धकार्षापणम्। द्वाभ्याम् कार्षापणाभ्याम् क्रीतम् इति टिठन्। द्विकार्षापणिकम्—पक्षे लुक् द्विकार्षापणम्। अध्यर्धसहस्रेण क्रीतम् अध्यर्ध-साहस्रम्—अण्। "शतमान—" (५।१।२७) इति सूत्रेण। पक्षे लुक्—अध्यर्ध-सहस्रम्। द्वाभ्याम् सहस्राभ्याम् क्रीतम् इति पूर्ववत् अण् द्विसाहस्रम्। पक्षे लुक् द्विसहस्रम्। "कार्षापणात् टिठन् वक्तव्य:" इति य: टिठन् प्रत्यय: विधीयते लुक्पक्षे तस्य लुक् स्यात्। लुक: अप्राप्तिपक्षे "प्रतिरादेशश्च वा" इति वैकल्पिक: प्रतिरादेश:। तेन अध्यर्धप्रतिकम्, द्विप्रतिकम्, इत्यपि स्यात्। द्वि-साहस्रम् अध्यर्धसाहस्रम् इत्यादौ उत्तरपदवृद्धिस्तु "संख्याया: संवत्सरसंख्यस्य च" (७।३।१५) इति सूत्रेण। अपिच—सुवर्ण-शतमानयोरुपसंख्यानम्॥ तेन अध्यर्ध सुवर्णम्—अध्यर्धसौवर्णिकम्। द्वि-सुवर्णम्—द्वि-सौवर्णिकम्। अध्यर्धशातमानम्

—अध्यर्धशतमानम्। द्वि-शतमानम्—द्वि-शतमानम्। "परिमाणान्तस्य—" (७।३।१७) इति सूत्रेण उत्तरपदवृद्धिः।

१६६१। द्वित्रिपूर्वान्निष्कात्॥ ५।१।३०॥-

टी—। लुग्वा स्यात्। द्वि-निष्कम्। द्वि-नैष्किकम्। त्रिनिष्कम्। त्रि-नैष्किकम्। बहुपूर्वाच्चेति वक्तव्यम्। (वा)। बहु निष्कम्। बहुनैष्किकम्।

A suffix of the आर्हीय class coming after निष्क preceded by द्वि, त्रि (and also) in a द्विगु compound, optionally elides.

मित—। द्विपूर्वकात् त्रिपूर्वकात् च निष्कशब्दात् द्विगु समास-निष्पन्नात् विहितस्य आर्हीयस्य प्रत्ययस्य विकल्पेन लुक् स्यात्; बहुपूर्वकात् च एष विधिः स्यात्। द्वाभ्याम् निष्काभ्याम् क्रीतम् द्वि-निष्कम्—प्रत्ययस्य लुक्। द्वि-नैष्किकम् प्रत्ययस्य (ठञ् प्रत्ययस्य) लुगभावः। "असमासे निष्कादिभ्यः" (५।१।२०) इति ठञ्। तस्यैव विकल्पेन लुक्। "परिमाणान्तस्य—" (७।३।१७) इति उत्तर-पद वृद्धिः, एवं त्रिभिर्निष्कैः क्रीतम् त्रिनिष्कम् त्रिनैष्किकम्। बहुभिर्निष्कैः क्रीतम् बहुनिष्कम् बहुनैष्किकम्।

१६६२। बिस्ताच्च॥ ५।१।३१॥

टी—। द्वि-त्रि-बहुपूर्वाद्बिस्तादार्हीयस्य लुग्वा स्यात्। द्वि-बिस्तम्। त्रिबिस्तम्। द्वि-बैस्तिकम् इत्यादि।

An आर्हीय suffix coming after बिस्त preceded by द्वि, त्रि or बहु (of course in a द्विगु compound) optionally elides.

मित—। द्विगुसमासघटितात् द्वि-त्रिबहुपूर्वात् च बिस्तात् विहितस्य आर्हीयस्य प्रत्ययस्य विकल्पेन लुग् भवति। द्वाभ्याम् बिस्ताभ्यां क्रीतं द्वि-बिस्तम्

अत ठञ्प्रत्ययस्य लुक्। द्विवैस्तिकम्। एवं त्रिविस्तम्—त्रिवैस्तिकम्। बहु-विस्तम्—बहुवैस्तिकम्।

१६६३। विंशतिकात् खः ॥ ५।१।३२ ॥

टी—। अध्यर्धपूर्वात् द्विगोरित्येव। अध्यर्धविंशति-कीनम्। द्विविंशतिकीनम्।

In an आर्हीय sense, the suffix ख is attached to the word विंशतिक when preceded by अध्यर्ध or when entering into a द्विगु compound.

मित—। अध्यर्धपूर्वकात् विंशतिकशब्दात् तथा कृतद्विगुसमासात् विंशतिकशब्दाच्च आर्हीयेषु अर्थेषु खप्रत्ययः स्यात्; विधानसामर्थ्यात् तस्य प्रत्ययस्य न लुक्। अध्यर्धविंशतिकीनम्। द्वि-विंशतिकीनम्। त्रिविंशति-कीनम्। अध्यर्धविंशतिकेन क्रीतम्, द्वाभ्याम् विंशतिकाभ्याम् क्रीतम् इत्यादयः प्रत्ययस्य अर्थाः।

१६६४। खार्य्या ईकन् ॥ ५।१।३३ ॥

टी—। अध्यर्द्धखारीकम्। द्वि-खारीकम्। केवलायाश्चेति वक्तव्यम्। (वा)। खारीकम्।

In an आर्हीय sense, the suffix ईकन् is attached to the word खारी preceded by अध्यर्ध, or entering into a द्विगु compound.

मित—। अध्यर्धपूर्वकात् खारीशब्दात् तथा कृतद्विगुसमासात् च एत-स्मात् आर्हीयेषु अर्थेषु ईकन् प्रत्ययो भवति। अध्यर्धखार्य्या क्रीतम् अध्यर्ध-खारीकम्। द्वाभ्याम् खारीभ्याम् क्रीतम् द्वि-खारीकम्। केवलात् अपि खारी-शब्दात् अयं स्यात् खार्य्या क्रीतम् इति खारीकम्॥ अपि च—एतादृशात् काकिनी-शब्दादपि अयं स्यात् अध्यर्धकाकिनीकम्। द्वि-काकिनीकम्। त्रि-काकिनीकम्। काकिन्या क्रीतम् इति काकिनीकम्—केवलादपि काकिनीशब्दाच्च।

१६६५। पण-पाद-माष-शताद्यत् ॥ ५।१।३४ ॥

टी—। अध्यर्धपण्यम्। द्विपण्यम्। अध्यर्धपाद्यम्। इह पादः पदिति न। "यस्येति" लोपस्य स्थानिवद्भावात्। पद्यत्यतदर्थे इत्यपि न। प्राण्यङ्गार्थस्यैव तत्र ग्रहणात्।

In an आर्हीय sense, the suffix यत् is added to the words पण, पाद, माष and शत when preceded by अध्यर्ध or when entering into a द्विगु compound.

मित—। अध्यर्धपूर्वकात् तथा कृतद्विगुसमासात् च पणशब्दात्, पादशब्दात्, माषशब्दात् शतशब्दाच्च आर्हीयेषु अर्थेषु यत्प्रत्ययो भवेत्। अध्यर्धपणेन क्रीतमिति अध्यर्धपण्यम्। द्वाभ्यां पणाभ्यां क्रीतमिति द्विपण्यम्। एवं त्रि-पण्यम् अध्यर्ध-माषेण क्रीतमिति अध्यर्धमाष्यम्। द्वाभ्याम् माषाभ्यां क्रीतमिति द्वि-माष्यम्। अध्यर्धशतेन क्रीतमिति अध्यर्धशत्यम्। द्वाभ्याम् शताभ्यां क्रीतमिति द्वि-शत्यम्। अध्यर्धपादेन क्रीतम् इति अध्यर्धपाद्यम्। द्वाभ्याम् पादाभ्याम् क्रीतम् इति द्विपाद्यम्। एवं त्रिपाद्यम्।

ननु अत्र "पादः पत्" (६।४।१३०) इति पदादेशः कथं न स्यात्? तथाहि द्विपाद इत्यस्मात् यत्! यति परे "यस्येति च" (६।४।१४८) इति अकारस्य लोपः तेन द्विपाद्+यत् इति स्थितिः। ततः "पादः पत्" (६।४।१३०) इति सूत्रेण लुप्ताकारो यः पादशब्दः, तदन्तस्य अङ्गस्य [ पाद इत्यन्तस्य अङ्गस्य इत्यर्थः ] भस्य "पत्" इत्ययमादेशो भवेच्चेत् ततः "द्विपाद" इति शब्दस्य स्थाने "द्वि-पत्" इति रूपे प्रसक्ते सति कथयति—"यस्येति" लोपस्य स्थानिवद्भावात् तत् न स्यात्। "यस्येति च" [ ६।४।१४८ ] इति सूत्रेण खलु द्विपाद इत्यस्य यति परे अन्त्यस्य अकारस्य लोपे सति "पादः पत्" [ ६।४।१३० ] इत्यनेन "पत्" इत्यस्य प्रसक्तिः स्यात्। परं तस्य अकार-लोपस्य स्थानिवत्ता स्वीक्रियते। तथा सति द्वि-पाद इति अकारस्य लोपेपि अकारः अस्त्येव इति मनसि स्मर्त्तव्यम्। तेन अकारस्य लोपजन्यं यत् कार्यं "पत्"

इति रूपान्तरं तत न स्यात्। अतएव द्विपाद्+यत्=द्विपाद्यम् इति रूपम्। एवं अध्यर्धपाद्यम्।

"पद्यत्यतदर्थे" [६।३।५३] इति सूत्रेण यत्प्रत्यये परे पत् इति आदेशः पादशब्दस्य स्थाने दुर्वार इति चेत् मैवम् तस्मिन् सूत्रे प्राणिनः शरीरस्य अवयवो यः पादः स एव गृह्यते। परं "पणपाद—" इत्यत्र सूत्रे तु परिमाणवाचिनः पादशब्दः गृहीतः। तेन पदादेशो न स्यात्।

१६६६। शाणाद्वा ॥ ५।१।३५ ॥

दी—। यत् स्यात् पक्षे ठञ्। तस्य लुक्। अध्यर्धशाण्यम्। अध्यर्धशाणम्।

The suffix यत् is optionally added to the word शाण when preceded by अध्यर्ध or when entering in a द्विगु compound, in the aforesaid sense.

मित—। आर्हीयेषु अर्थेषु शाण इत्यस्मात् अध्यर्धपूर्वकात् तथा कृतद्विगु-समासात् च विकल्पेन यत् प्रत्ययः स्यात्। यतोऽप्राप्तिपक्षे तु ठञ् स्यात्। तस्य पुनः ठञः "अध्यर्ध-पूर्व-द्विगोर्लुगसंज्ञायाम्" [५।१।२८] इति लुक् स्यात्। अध्यर्ध-शाणेन क्रीतम् इति अध्यर्धशाण्यम्—अत्र यत्। पक्षे अध्यर्धशानेन क्रीतमिति ठञ् "प्राग्वतेष्ठञ्" [५।१।१८] इत्यनेन अध्यर्धशाण+ठञ्। तस्य लुक् "अध्यर्ध—" [५।१।२८] इत्यनेन—अध्यर्धशाणम् इति रूपम्। एवं द्वाभ्याम् शाणाभ्याम् क्रीतमिति यत् द्वि-शाण्यम् पक्षे ठञ्—तस्य लुक् तेन द्विशाणम्। एवं त्रिशाण्यम् —त्रिशाणम्। शताच्चेति वक्तव्यम्—अध्यर्धशत्यम्—यत्। अध्यर्धशतम्—ठञ् तस्य च लुक्। द्विशत्यं—यत्। द्विशतम्—ठञ् तस्य च लुक्। एवं त्रिशत्यम् त्रिशतम्।

१६६७। द्वित्रिपूर्वादण् च ॥ ५।१।३६ ॥

दी—। शाणादित्येव। चाद्यत्। तेन त्रैरूप्यम्। परिमाणा-न्तस्यासंज्ञाशाणयोरिति पर्युदासात् आदिवृद्धिरेव। द्वैशाणम्।

**द्विशाणयम्। द्विशाणम्। इह ठञादयस्त्रयोदशप्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोऽर्थाश्चाकाङ्क्षितास्तदिदानीमुच्यते।**

The suffix अण् is optionally added to the word शाण coming after either द्वि or त्रि in any आर्हीय sense ; (for the rest see Tika).

मित—। द्वि-पूर्व्वकात् तथा त्रिपूर्व्वकात् च शाणात् आर्हीयेषु अर्थेषु अण् प्रत्ययश्च भवति। सूत्रे "च" इति कं समुच्चिनोति ? यत्प्रत्ययम् इति। तेन अस्मात् यत् अपि स्यात्। द्वाभ्याम् शाणाभ्याम् क्रीतम् इति अण्—द्वैशाणम्।

"परिमाणान्तस्यासंज्ञाशाणयोः" (७।३।१७) इति शाण इत्यस्य वर्ज्जनात् न उत्तरपदवृद्धिः अपितु आदिवृद्धिरेव। तेन द्वि इत्यस्य इकारस्य वृद्धिः। पक्षे यत् द्वि-शाण्यम्। पक्षे "अध्यर्ध—(५।१।२८)" इति सूत्रेण प्रत्ययस्य लुक्, तेन द्वि-शाणम्। एवं त्रैशाणम् अण्। त्रिशाण्यम्—यत्। त्रिशाणम्—प्रत्ययस्य लुक्। अतएव "त्रैरूप्य" रूपत्रयं भवति।

इह ठञ्प्रभृतयः त्रयोदशप्रत्ययाः कथिताः—तेषां "समर्थविभक्तयः" द्वितीयासमर्थात् तृतीयासमर्थात् किं वा चतुर्थीसमर्थात् उत अपरस्याः कस्या विभक्तेस्ते विधीयन्ते, अपिच कस्मिन्नर्थे ते विधेय इत्यादयः अधुना कथ्यन्ते।

## १६६८। तेन क्रीतम्॥ ५।१।३७॥

**टी—। ठञ्। गोपुच्छेन क्रीतम् गौपुच्छिकम्। साप्ततिकम्। प्रास्थिकम्। ठक्—नैष्किकम्।**

In the sense of क्रीतम् ( purchased ), a suitable suffix ( ठञ् etc ) is added to the word, expressive of something which semething is purchased.

मित—। तेन इति तृतीयासमर्थात् क्रीतम् इति एतस्मिन्नर्थे, प्राग् वतेष्ठञादयः ये त्रयोदशप्रत्ययाः सन्ति, तेषु यथायोग्यं कश्चित्प्रत्ययः स्यात्। ठञ्—यथा—गो-पुच्छेन क्रीतं गौपुच्छिकम्। सप्तत्या क्रीतं साप्ततिकम्। प्रस्थेन क्रीतं प्रास्थिकम्।

ठक्—निष्केण क्रीतं नैष्किकम्। ठन् शतेन क्रीतं—शतिकम्। यत्—शतेन क्रीतं शत्यम्। कन्—पञ्चभिः क्रीतं पञ्चकम्। द्वाभ्याम् क्रीतम् द्विकम्। त्रिभिः क्रीतं त्रिकम्। "संख्याया अतिशदन्तायाः कन्" (५।१।२२) इति सूत्रेण एषु कन्। सूत्रे "तेन" इति यत् तृतीयान्तं पदं दृश्यते, तत् तु मूल्यवचनस्य करणकारकस्य ज्ञापकम्। तेन देवदत्तेन क्रीतम्—पाणिना क्रीतम् इत्यादौ प्रत्ययो नेष्टः।

१६६८। इद् गोण्याः ॥ १।२।५०॥

दी—। गोण्या इत् स्यात्तद्धितलुकि ; लुकोऽपवादः। पञ्चभिः गोणीभिः क्रीतः पटः पञ्चगोणिः।

In case of a Taddhita suffix eliding, with reference to the word गोणी, an इकार, is added to the same.

मित—। "लुक् तद्धितलुकि" (१।२।४९) इति सूत्रादनन्तरमिदम्। तेनायमर्थः—"तद्धितलुकि" तद्धित-प्रत्ययस्य लुकि प्रसक्ते सति, गोणी इति शब्दस्य "लुक् तद्धितलुकि" इति प्राप्तस्य स्त्रीप्रत्ययस्य लुक् न स्यात्, अपितु अस्मात् "इत्" इकारादेशः स्यात्। पञ्चभिः गोणीभिः क्रीतः पटः इति तद्धितार्थद्विगुसमासः। "अध्यर्ध—" (५।१।२८) इति सूत्रेण प्रत्ययस्य लुक्। प्रत्ययस्य लुकि सति गोणी इत्यस्य इकारस्य स्त्रीप्रत्ययत्वात् लुक् प्रसक्तम्। तत् न स्यात् अपि तस्य स्थाने इकारः स्यात् तेन पञ्चगोणिः पटः॥ इद् गोण्याः इति योगविभागः। तेन पञ्चभिः सूचीभिः क्रीतः पञ्चसूचि, दशसूचि इत्यपि स्यात् इति काशिकाभाषावृत्तिकारौ।

१६७०। तस्य निमित्तं संयोगोत्पातौ ॥ ५।१।३८॥

दी—। संयोगः संबन्धः। उत्पात शुभाशुभसूचकः। शतिकः शत्यः वा धनपतिसंयोगः। शत्यम् शतिकं वा दक्षिणाक्षिस्पन्दनम्। शतस्य निमित्तम् इत्यर्थः।

Suitable suffixes are added to words to imply the cause of the same (i. e of the things denoted by the selfsame

words ), provided the cause is no other than संयोग ( connection, or better association ) or उत्पात (some incident fortelling or foreboding good or evil).

मित— । संयोगः संबन्धः—आकस्मिकः सम्बन्ध इत्यर्थः । उत्पातः शुभाशुभसूचकः । तथाहि—"उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या" इति स्थाने उत्पातशब्देन यदभिधीयते, तदपि अत्र ग्राह्यम् । "तस्य" इति षष्ठीसमर्थात् "निमित्तम्" इति एतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ; यत् खलु निमित्तं—स चेत् संयोग उत्पातो वा । शतस्य निमित्तम् धनपतिना संयोगः इति एतस्मिन्नर्थे षष्ठीसमर्थात् शतात् ठन्प्रत्ययः यत्प्रत्ययश्च "शतात् ठन् यतावशते" ( ५।१।२१ ) इति सूत्रेण । शतिकः धनपतिसंयोगः—ठन् । शत्यः धनपतिसंयोगः—यत् । शतस्य निमित्तं दक्षिणाक्षिस्पन्दनं—शतिकं शत्यं वा दक्षिणाक्षिस्पन्दनम् । दक्षिणाक्षिस्पन्दनरूपो य उत्पातः, स तु शतस्य शतमुद्रालाभस्य निमित्तं भवतीति दक्षिणाक्षिस्पन्दनं शतिकं शत्यं वा उच्यते । एवं सहस्रस्य निमित्तं अधमर्णसंयोगः इति साहस्रः अधमर्णसंयोगः । सहस्रस्य निमित्तम् दक्षिणाक्षिस्पन्दनम्—इति साहस्रं दक्षिणाक्षिस्पन्दनम् । सहस्रशब्दात् "शतमान—( ५।१।२७ )" इत्यनेन अण् ।

**टी— । वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानमिति वक्तव्यम् । (वा) । वातस्य शमनं कोपनं वा वातिकम् । पैत्तिकम् । श्लैष्मिकम् ।**

Suitable suffix ( ठक् ) is added to the words वात, पित्त and श्लेष्म to imply the cause that excites or suppresses these.

मित— । षष्ठीसमर्थेभ्यः वातपित्तश्लेष्मन् इति एतेभ्यः निमित्तम् इति एतस्मिन्नर्थे यथाविहितं प्रत्ययो भवेत् यत् खलु निमित्तं तच्चेत् एतेषां शमनं कोपनं वा । शमनं निवर्त्तकं, कोपनं उत्तेजकम् । वातस्य शमनं कोपनं वा इति ठक्—वातिकम् । पित्तस्य शमनं कोपनं वा पैत्तिकम् । श्लेष्मणः शमनं कोपनं वा श्लैष्मिकम् ।

**दी—। सन्निपाताच्चेति वक्तव्यम्॥ सान्निपातिकम्।**

The word सन्निपात takes the suffix ठक् after it to denote the cause that excites or suppresses it.

मित—। पूर्व्वोक्ते एव विषये सन्निपातशब्दादपि यथायोग्यं प्रत्यय: स्यात्। सन्निपातस्य कोपनं शमनं वा सान्निपातिकम्। तथाहि "विकारे सान्निपातिके" इति कुमारे द्वितीयसर्गे।

**१६७१। गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्॥ ५।१।३९॥**

**दी—। गोर्निमित्तं संयोग उत्पातो वा गव्य:। द्व्यच:— धन्य:। यशस्य:। स्वर्ग्य:। गोद्व्यचो किम्? विजयस्य वैजयिक:। असंख्येत्यादि किम्? पञ्चानां पञ्चकम्। सप्तकम्। प्रास्थिकम्। खारीकम्। आश्विकम्। आश्मिकम्।**

To imply the cause that is either an association or a portending of evil or good, the suffix यत् is attached to the word गो, as well as to words containing only two vowels, excepting those that stand for the name of a number or a measure ( or amount ), and the word अश्व and others passing by the term अश्वादि।

मित—। गोशब्दात्, तथा द्विस्वरवर्णमनायात् च शब्दात् षष्ठीसमर्थात् संयोगरूपे उत्पातरूपे वा निमित्ते गम्यमाने यत्प्रत्यय: स्यात्, संख्यावाचकात्, परिमाणवाचकात् च शब्दात्, तथा अश्व इति एवमादीन् च वर्ज्जयित्वा। गोशब्दात् गोर्निमित्तं संयोग: उत्पातो वा गव्य:। 'मेषराशौ शनिवारपंचको गोर्विनाशसूचक: उत्पातो वा गव्य:" इति भाषावृत्तिटीकायां सृष्टिधर:। मेषराशौ वैशाखे मासि शनिवारपंचक: पंचशनिवारसंयोग: गोनिमित्तत्वात् गव्य:। गोविनाशसूचक: उत्पातश्च गव्य:—इति भाव:। द्विस्वरविशिष्टात् यथा—धननिमित्तं संयोग उत्पातो वा धन्य:, "धन्या षड्ग्रहीति" सृष्टिधर:। षण्णां ग्रहाणां योग: इति

षड़्ग्रही समाहारद्विगु:। षड़्ग्रही धन्या धनविनाशसूचिका, "पञ्चां ग्रहाणां गुरुवर्ज्जितानाम् ऐक्यं महीनिर्धनतां प्रयाती"ति। एवं लग्ने चतुर्ग्रही धन्या। "तत्र जातस्य धनवृद्धिं करोतीत्यर्थ:" इति सुष्टिधर:। यशसो निमित्तं संयोग: उत्पातो वा यशस्य:। स्वर्गस्य निमित्तं संयोग उत्पातो वा स्वर्ग्य:। एवं आयुषो निमित्तं संयोग उत्पातो वा आयुष्य:। गोद्व्यच: इति किम्? विजयस्य निमित्तं संयोग: उत्पातो वा वैजयिक:। अत्र विजयशब्दस्तु न द्विस्वरविशिष्ट: अपितु त्रिस्वरविशिष्ट:—तेन अत्र न यत् अपितु ठञ्। संख्यावाचकशब्दवर्ज्जनम् इति किम्? पंचानां निमित्तं पंचकम्। सप्तानां निमित्त सप्तकम्। उभयत्र "संख्याया अतिशदन्ताया: कन्" (५।१।२२) इति कन्। परिमाणवाचकशब्दवर्ज्जनम् इति किम्? प्रस्थस्य निमित्तं प्रास्थिकम्। अत्र ठञ् एव। खार्य्या निमित्तम् इति खारीकम्—अत्र "खार्य्या ईकन्" (५।१।३३) इति ईकन्। अश्वादि इति किम्? अश्वस्य निमित्तम् इति आश्विकम्। अत्र ठक् एव। अश्मन: निमित्तं इति आश्मिकं ठक्। हस्तिन: निमित्त इति हास्तिकम्—अत्रापि ठक्। अश्वादि यथा—अश्व, अश्म, हस्तिन्, गण, ऊर्णा, उमा, वसु, वर्षा, भङ्ग, चण, गङ्गा।

अस्मिन् सूत्रे विहितो यत्प्रत्ययस्तु ठञ्प्रभृतीनामपवाद: इति ज्ञेयम्।

## टी—। ब्रह्मवर्च्चसादुपसंख्यानम्॥ ब्रह्मवर्च्चस्यम्।

In the aforesaid sense, the suffix यत् is added to the word ब्रह्मवर्च्चस।

मित—। पूर्व्वोक्ते विषये ब्रह्मवर्च्चसशब्दादपि यत् स्यात्। ब्रह्मवर्च्चसस्य निमित्तं गुरुणा संयोग: ब्रह्मवर्च्चस्यम्।

## १६७२। पुत्राच्छ च॥ ५।१।४०॥

## टी—। चाद्यत्। पुत्रीय:। पुत्र्य:।

The suffix, छ—as well as the suffix यत् is added to the word पुत्र, in the aforesaid sense.

मित—। पूर्व्वोक्ते विषये पुत्रशब्दात् छप्रत्ययः, सूत्रस्थचकारबलात् यत्प्रत्ययश्च स्याताम्। पुत्रस्य निमित्तं संयोग उत्पातो वा पुत्रीयः—छः; पुत्र्यः—यत्। द्विस्वरत्वात् नित्यं एव प्राप्ते अनेन छस्यापि विधानम्।

**१६७३। सर्वभूमि पृथिवीभ्यामणञौ॥ ५।१।४१॥**

**टी—। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः, पार्थिवः। सर्वभूमिशब्दः अनुशतिकादिषु पठ्यते।**

The suffix अण् is attached to the word सर्वभूमि, and the suffix अञ् is added to the word पृथिवी in the aforesaid sense.

मित—। पूर्व्वोक्ते एव विषये सर्व्वभूमिः पृथिवी इति एताभ्याम् यथासंख्यं अण् अञ् इति प्रत्ययौ स्याताम्। सर्व्वभूमेर्निमित्तम् संयोग उत्पातो वा इति अण् सार्व्वभौमः। सर्व्वभूमि इति शब्द अनुशतिकादिषु पठ्यते अतएव "अनुशतिकादीनां च" (७।३।२५) इति पूर्व्वपदस्य उत्तरपदस्य च अचाम् आदेरचो वृद्धिः। पृथिव्याः निमित्तं संयोग उत्पातो वा इति अञ्—पार्थिवः।

**१६७४। तस्येश्वरः॥ ५।१।४२॥**

**१६७५। तत्र विदित इति च॥ ५।१।४३॥**

**दी—। सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः। पार्थिवः।**

In the sense of तस्य ईश्वरः, as well as in the sense of तत्र विदितः, the suffix अण् is attached to सर्वभूमि and अञ् to पृथिवी; i. e. to denote the lord thereon or the person—noted therein, the suffixes अण् and अञ् are respectively attached to the words सर्वभूमि and पृथिवी।

मित—। तस्य इति षष्ठीसमर्थाभ्याम् सर्वभूमि पृथिवी इति एतभ्याम्

यथासंख्यम् अण् अञ् इति प्रत्ययौ ईश्वर इति एतस्मिन्नर्थे, अपिच तत्र इति सप्तमी-समर्थाभ्याम् सर्वभूमि पृथिवी इति एताभ्याम् यथासंख्यम् अण् अञ् इति प्रत्ययौस्तो विदित इति एतस्मिन्नर्थे। सर्वभूमेः ईश्वर सर्वभूमौ विदितो वा सार्वभौमः। पृथिव्या ईश्वरः पृथिव्यां विदितो वा पार्थिवः। विदितः प्रकाशित इत्यर्थः।

## १६७६। लोकसर्वलोकाट् ठञ्॥ ५।१।४४॥

**टी—। तत्र विदित इत्यर्थे, लौकिकः। अनुशतिकादित्वादुभय पदवृद्धिः—सार्वलौकिकः।**

To denote something or someperson, known therein, the suffix ठञ् is attached to the words लोक and सर्वलोक।

मित—। लोक सर्वलोक इति एताभ्याम् "तत्र" इति सप्तमीसमर्थाभ्याम् "विदितः" इति एतस्मिन्नर्थे ठञ् प्रत्ययः स्यात्। लोके विदितः इति ठञ्—लौकिकः। तथाहि "इह लौकिकवाक्येषु व्यभिचारोऽस्ति पुष्कलः"। सर्वलोके विदितः इति सार्वलौकिकः। सर्वलोकशब्दस्तु अनुशतिकादिषु पठ्यते तेन "अनुशतिकादीनां च" (७।३।२०) इति उभयपदवृद्धिः। तथाहि भट्टिकाव्ये "जिगाय तस्य जेतारं स रामः सार्वलौकिकः।"

## १६७७। तस्य वापः॥ ५।१।४५॥

**टी—। उप्यते अस्मिन् इति वापः क्षेत्रम्। प्रस्थस्य वापः प्रास्थिकम्। द्रौणिकम; खारीकम्।**

To denote the field thereof, suitable suffixes are added to words.

मित—। तस्य इति षष्ठीसमर्थात् "वापः" इति एतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। उप्यते अस्मिन् इति वप् धातोरधिकरणे घञ्प्रत्ययेन सिद्धम् पदं वापः इति। तस्य अर्थस्तु क्षेत्रम्। प्रस्थस्य वापः (क्षेत्रम्) इति प्रास्थिकम्—अत्र ठञ्। द्रोणस्य वापः क्षेत्रम् इति द्रौणिकम्—अवनिष्कादित्वात् ठक्। खार्याः वापः क्षेत्रम् इति खारीकम्—अत्र "खार्या ईकन्" (५।१।३३) इति ईकन्।

१६७८। पात्रात् ष्ठन् ॥ ५।१।४६ ॥

टी—। पात्रस्य वापः चेत्रम् पात्रिकम्। पात्रिकी चेत्रभक्तिः।

To denote the field thereof, the suffix ष्ठन् is attached to the word पात्र।

मित—। पात्र इति एतस्मात् षष्ठीसमर्थात् "वापः" इति एतस्मिन्नर्थे ष्ठन् इति प्रत्ययः स्यात्। पात्रशब्दस्तु परिमाणवाची ष्ठन्प्रत्ययस्तु ठञ् प्रत्ययस्य अपवादः। प्रत्यये षकारः स्त्रियां ङीष् इति ज्ञापयति। नकारस्तु स्वरार्थः। पात्रस्य वापः इति ष्ठन् पात्रिकम् चेत्रम्। स्त्रियां पात्रिकी चेत्रभक्तिः। भक्तिः विभागः। पात्रिकीभूमिः।

१६७९। तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ५।१।४७ ॥

टी—। वृद्धिर्दीयते इत्यादि क्रमेण प्रत्येकं सम्बन्धादिकवचनम्। पञ्चास्मिन् आयः लाभः शुल्क उपदा वा दीयते इति पञ्चकः। शतिकः। शत्यः। साहस्रः। उत्तमर्णेन मूल्यातिरिक्तं ग्राह्यं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भागः आयः। विक्रेता मूल्यादधिकग्राह्यं लाभः। रक्षानिर्वेशो राजभागः शुल्कः। उतकोच उपदा।

Suitable suffixes are attached to words expressive of something, in which is given either interest, gain, tax or bribe.

मित—। तदिति प्रथमासमर्थात् अस्मिन् इति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यत् प्रथमासमर्थं तच्चेत् वृद्धिरुत लाभः शुल्कः उत उपदा वा दीयते। वृद्धिः कुसीदः। आयः—ग्रामात् नगराद्वा यत् उत्तिष्ठते, अधीश्वरस्य कोषं

च गच्छति स एव आयः। लाभः—वाणिज्यात् वणिक् यत् लभते स लाभः। शुल्कः रक्षायोगात् राजा यत् प्रजाभ्य आदत्ते स शुल्कः। उपदा—उत्कोचः। पञ्च अस्मिन् वृद्धिर्दीयते, आयो दीयते, लाभो दीयते, शुल्को दीयते, उपदा वा दीयते इति पञ्चकः, एवं सप्तकः। "संख्यायाः अतिशदन्तायाः कन्" ( ५।१।२२ ) इति कन्। शतम् अस्मिन् वृद्धिः आयः लाभः शुल्कः उपदा वा दीयते इति शतिकः ; शत्यः। "शताच्च ठन्यतावशते" ( ५।१।२१ ] इति ठन् यतौ। सहस्रम् अस्मिन् वृद्धिः आयः लाभः शुल्कः उपदा दीयते इति साहस्रः। "शतमान-विंशतिक सहस्रवसनादण्" [ ५।१।२७ ] इति अण्।

**टी—। चतुर्थ्यर्थे उपसंख्यानम्। (वा)। पञ्चास्मै वृद्ध्यादि-र्दीयते पंचको देवदत्तः। समम्ब्राह्मणे दानमिति वदधिकरण-विवक्षा वा।**

मित—। संप्रदाने या चतुर्थीविभक्तिरिष्टा, तस्या अपि अर्थे अयं स्यात्—पंच अस्मै वृद्धिः आयः लाभः शुल्कः उपदा वा दीयते इति पञ्चकः देवदत्तः। शतिकः शत्यः वा विप्रः। "समम् अब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे" इत्यादौ अब्राह्मणे इत्यत्र यादृशी संप्रदाने अधिकरणत्वविवक्षा ; तादृशीम् अधिकरणविवक्षाम् स्वीकृत्य तदस्मिन्निति सूत्रेणैव इदं सिद्धं स्यात्, तथा सति पंच वृद्ध्यादिरस्मिन् दीयते इति पंचकः देवदत्तः इति वाक्यं भवेत्।

**१६८०। पूरणार्द्धाट् ठन्॥ ५।१।४८॥**

**टी—। यथाक्रमं ठक् टिठनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः तृतीयिकः। अर्धिकः। अर्ध-शब्दो रूपकसार्द्धे रूढः।**

In the aforesaid sense, the suffix ठन् is added to ordinal numerals—as well as to the word अर्द्ध।

मित—। तदस्मिन् वृद्ध्यायलाभशुल्कोपदादीयते इति एतस्मिन् विषये पूरणवाचकात् शब्दात् तथा अर्द्धशब्दात् च ठन् प्रत्ययः स्यात्। अयं ठक्

प्रत्ययस्य अपवादः। तथा अर्धाच्च इति [५।१।२५] विहितस्य टिठन् प्रत्ययस्य चापवादः। द्वितीया वृद्धिः उपदा तथा द्वितीयः आयः लाभः शुल्को वा अस्मिन् दीयते इति द्वितीयिकः, एवं तृतीयो वृद्ध्यादिरस्मिन् दीयते इति तृतीयिकः, एवं पंचमिकः सप्तमिकः। अर्द्धः वृद्ध्यादिरस्मिन् दीयते इति अर्द्धिकः। अर्धशब्दस्य कोऽर्थः ? रूपकस्य रौप्यमुद्रायाः अर्द्धे अर्द्धखण्डे रूढः, रूढ़िवृत्त्या अर्द्धशब्देन अर्द्धरौप्यमुद्रा ज्ञाप्यते। [ अर्द्ध =a half rupee price ] [ आधुलि इति गौड़ीयः ]।

१६८१। भागाद्यच्च ॥ ५।१।४८ ॥

**टी—। चाट्ठन्! भागशब्दोऽपि रूपकस्य अर्द्धे रूढ़ः। भागोवृद्ध्यादिरस्मिन् दीयते इति भाग्यं भागिकं शतम्। भाग्या भागिका विंशतिः।**

In the aforesaid sense, the suffix यत् as well as the suffix ठन् is added to the word भाग meaning a half rupee piece.

मित—। भागः रूपकस्य अर्द्धः। भागः वृद्ध्यायलाभशुल्कोपदा वा अस्मिन् दीयते इति एतस्मिन् अर्थे भागशब्दात् यत्प्रत्ययः, तथा सूत्रस्थचकारबलात् ठनप्रत्ययोऽपि भवेत्। भागो वृद्धिरायः लाभः शुल्कः उपदा वा अस्मिन् दीयते इति यत् भाग्यम्। ठन्—भागिकम्। ठञ् प्रत्ययस्य अपवादौ एतौ। भाग्यं भागिकं वा शतम्। भाग्या विंशतिः, भागिका वा विंशतिः।

१६८२। तद्धरति वहत्यावहति भाराद् वंशादिभ्यः ॥ ५।१।५० ॥

**टी—। वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत् प्रातिपदिकं तत्-प्रकृतिकात् द्वितीयान्तादित्यर्थः। वंशभारं हरति वहति आवहति वा वांशभारिकः। ऐक्षुभारिकः। भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरं भारभूतेभ्यो वंशादिभ्य इति। भारभूतान् वंशान् हरति वांशिकः। ऐक्षुकः।**

Suitable suffixes are added to the word भार—if joined to the word वंश or to some other word—that pass by the term वंशादि to denote the person that either takes away, steals, raises, or produces the things expressed by the said compound word which takes the suffix after itself.

This sutra admits of double interpretation—the second interpretation is—suitable suffixes are added to the word वंश—and some others passing by the term वंशादि to denote the person that either takes away, pilfers, raises, or produces the things expressed by the self same words, provided the said things ( expressed by the words ) serve as burden upon the person.

मित—। हरति चोरयति, यद्वा हरति देशान्तरं प्रापयति—नयतीत्यर्थः। वहति ऊर्द्ध्वम् उत्तोल्य धारयति। आवहति—उत्पादयतीत्यर्थः। वंशादिर्यथा वंश, कुटज, वल्वज, स्थूण, स्थूणा, अक्ष, अश्व, अश्मन्, श्लक्ष्ण, मूल, इक्षु, खड्ग, खट्वा। "भारात् वंशादिभ्यः"। वंशादिभ्यः—वंश इत्येवमादिभ्यः परस्थितात् भारात् भार इत्यस्मात्। सूत्रार्थः—तदिति द्वितीयासमर्थात् हरति, वहति, आवहतीति एषां कस्मिंश्चिदेव अर्थे यथायोग्यं प्रत्ययो भवति यत् खलु द्वितीयासमर्थं स चेत् वंश इत्येवमादिभ्यः परस्थितः भार इति शब्दः। वंशानां भारः वंशभारः। वंशभारं हरति वहति आवहति वा इति ठक् वांशभारिकः। इक्षुभारं वहति हरति आवहति वा इति ठक् ऐक्षुभारिकः। एवं वाल्वजभारिकः, कौटजभारिकः। भारात् इति किम्? वंशं हरति इति प्रत्ययो न स्यात्। वंशादिभ्यः इति किम्? व्रीहिभारं हरति अत्रापि प्रत्ययाभावः। सूत्रस्य द्वितीयाव्याख्या—तदिति द्वितीयासमर्थेभ्यः "वंशादिभ्यः" वंश इति एवमादिभ्यः "भारात्" भार-भूतेभ्यः वहतीत्यादिष्वर्थेषु यथाविहितं प्रत्ययः स्यात। अस्यां व्याख्यायाम् भारात् इति पदम् अर्थद्वारेण एव वंशादिभ्यः इत्यस्य विशेषणम्। भारात् वंशादिभ्यः—भारभूतेभ्यः ( भार-स्वरूपेभ्यः

इत्यर्थः ) वंश इत्येवमादिभ्यः। भारभूतान् वंशान् हरति वहति आवहति वा इति ठक्—वांशिकः, एवं ऐक्षवकः, कौटजिकः, वाल्वजिकः। भारादिति किम्? वंशं (नतु भारभूतम् वंशम्) हरति वहति आयच्छति वा इति प्रत्ययः न स्यात्। वंशादिभ्यः इति किम्? भारभूतान् व्रीहीन् हरति वहति आवहति वा इति प्रत्ययाभावः।

**१६८३। वस्नद्रव्याभ्याम् ठन्कनौ ॥ ५।१।५१ ॥**

**दी—। यथासंख्यस्तः। वस्नं हरति वहति आवहति वा वस्निकः। द्रव्यकः।**

The suffixes ठन् and कन् are attached to the words वस्न and द्रव्य respectively in the aforesaid sense.

मित—। द्वितीयासमर्थाभ्याम् वस्न द्रव्य इति एताभ्याम् हरति वहति आवहतिवा इत्येतेषु अर्थेषु यथासंख्यं ठन् कन् इति एतौ प्रत्ययौ स्याताम्। वस्नं हरति वहति आवहति वा वस्निकः। द्रव्यं हरति वहति आवहति वा द्रव्यकः।

**१६८४। संभवत्यवहरति पचति ॥ ५।१।५२ ॥**

**दी—। प्रस्थं संभवति प्रास्थिकः कटाहः। प्रस्थं स्वस्मिन् समावेशयतिइत्यर्थः। प्रास्थिकी ब्राह्मणी—प्रस्थम् अवहरति पचति वेत्यर्थः।**

Suitable suffixes are attached to words to imply the person that either fills up, pounds or cooks the things expressed by the said words.

मित—। संभवः आधेयस्य प्रमाणातिरेकः इति काशिका। अतएव संभवति पूरयति समावेशयति इत्यर्थः। अवहारः संहरणम् इति भाषावृत्तिः। उपसंहरणम् इति काशिका। अतएव अवहरति चूर्णयति इत्येवार्थः प्रतीयते। पचति पाकं करोति। संभवति अवहरति पचति इति एतेष्वेवार्थेषु द्वितीयासमर्थेभ्यः प्रातिपदिकेभ्यः यथाविहितं प्रत्ययो भवेत्। प्रस्थं संभवति इति प्रास्थिकः कटाहः।

प्रस्थम् स्वस्मिन् ( कटाहाभ्यन्तरे इत्यर्थः ) समावेशयति ! कटाहः आत्मनः अभ्यन्तरे प्रपूर्य्य प्रस्थान् स्थापयति इति कटाहः प्रास्थिकः उच्यते। यद्वा प्रस्थं पचति इति प्रास्थिकः कटाहः। अत्र ठञ् प्रत्ययः। प्रस्थं पचति, प्रस्थम् अवहरति वा इति ठञ्—स्त्रियां "टिड्ढाण—" ( ४।१।१५ ) इति ङीप्—प्रास्थिकी ब्राह्मणी ! एवं कुडवं पचति, अवहरति सम्भवति वा इति ठञ्—कौडविकः। खारीं सम्भवति अवहरति पचति वा इति "खार्य्या ईकन्" ( ५।१।३३ ) इति सूत्रेण ईकन् खारीकः।

**टी—। तत् पचतीति द्रोणादण् च॥ चाट्ठञ्। द्रोणं पचतीति द्रौणी। द्रौणिकी।**

मित—। पचतीति एतस्मिन्नर्थे द्रोणशब्दात् द्वितीयासमर्थात् अण् स्यात्; ठञ् च। द्रोणम् पचतीति अण् द्रौणः कटाहः। स्त्रियां ङीप् द्रौणी स्थाली। द्रोणं पचति इति ठञ् द्रौणिकः कटाहः। स्त्रियां ङीप् द्रौणिकी स्थाली। उभयत्र "टिड्ढाण—" ( ४।१।१५ ) इति ङीप्।

**१६८५। आढकाचित-पात्रात्खोऽन्यतरस्याम्॥ ५।१।५३॥**

**टी—। पक्षे ठञ्। आढकं सम्भवति अवहरति पचति वा आढकीना—आढकिकी। आचितीना—आचितिकी। पात्रीणा पात्रिकी।**

The suffix ख, as well as the suffix ठञ् may be added to the words आढक, आचित and पात्र in the aforesaid sense.

मित—। आढक आचित पात्र इति एतेभ्यः द्वितीयासमर्थेभ्यः "अन्यतरस्याम्" विकल्पेन खप्रत्ययः स्यात् सम्भवति अवहरति पचति इति एतेषु अर्थेषु; खप्रत्ययस्य अप्राप्तिपक्षे तु ठञ्। आढकं सम्भवति अवहरति पचति वा इति खः—आढकीनः स्त्रियां आढकीना। ठञ्—आढकिकः—स्त्रियां आढकिकी। आचितं सम्भवति अवहरति पचति इति खः—आचितीनः—स्त्रियां आचितीना। ठञ्—आचितिकः

स्त्रियां आचितिकी। पात्रं संभवति अवहरति पचति वा इति पात्रीणः—स्त्रियां पात्रीणा। ठञ्—पात्रिकः—स्त्रियां पात्रिकी।

१६८६। द्विगोष्ठंश्च ॥ ५।१।५४ ॥

दी—। आढ़काचितपात्रादित्येव। आढ़काद्यन्ताद्द्विगोः संभवत्यादिषु अर्थेषु ष्ठन् खौ वा स्तः। पक्षे ठञ्। तस्याध्यर्द्धेति लुक्। षित्वात् ङीष्। द्व्याढ़किकी। द्व्याढ़कीना। द्विगोरिति ङीप्। द्व्याढ़की। द्व्याचितिकी। द्व्याचितीना। अपरिमाणेति ङीप् निषेधात् द्व्याचिता। द्विपात्रिकी। द्विपात्रीणा। द्विपात्री।

The suffixes ष्ठन् and ख are optionally added (i. e. the three ष्ठन्, ख, and ठञ् are added ) to the words आढ़क, आचित and पात्र, entering into द्विगु compound in the aforesaid sense.

मित—। "द्विगोः" कृत-द्विगुसमासात्, आढ़काचितपात्रात् ष्ठन्प्रत्ययः स्यात् संभवति अवहरति पचति इति एतेष्वेव अर्थेषु ; तथा सूत्रस्थचकारबलात् खप्रत्ययोऽपि स्यात् ; अपिच पूर्व्वसूत्रात् अन्यतरस्याम् इति अत्र अनुवृत्तम्। तेन ष्ठन् ख इति एतयोर्वैकल्पिकत्वात् ठञ् प्रत्ययोऽपि स्यात् ; तस्य पुनः "अध्यर्द्धपूर्व्वद्विगोर्लुगसंज्ञायाम्" ( ५।१।२८ ) इति सूत्रेण लुक्। ष्ठन् ख इत्यनयोः खलु एतेन लुक् न स्यात्—विधानसामर्थ्यात्। ष्ठन् इति प्रत्यये षकारः स्त्रियाम् "षिद्गौरादिभ्यश्च" ( ४।१।४१ ) इति ङीष्। नकारस्य तु स्वरप्रक्रियायाम् उपयोगिता। द्वाभ्याम् आढ़काभ्याम् संभवति अवहरति पचति वा इति ष्ठन्—द्व्याढ़किकः। स्त्रियां द्व्याढ़किकी। खः—द्व्याढ़कीनः, स्त्रियां द्व्याढ़कीना। ठञ्—तस्य च लुक् तेन द्व्याढ़क—स्त्रियां द्व्याढ़की। द्विगोः ( ४।१।२१ ) इति स्त्रियां ङीप्। द्वाभ्याम् आचिताभ्याम् संभवति अवहरति पचति वा द्व्याचितिकः—ष्ठन्। स्त्रियां द्व्याचितिकी। खः—द्व्याचितीनः—स्त्रियां द्व्याचितीना। ठञ्—तस्य च लुक्—तेन द्व्याचित।

"अपरिमाणविस्ताचितकम्बलेभ्यो न तद्धितलुकि" (४।१।२२) इति ङीपः प्रतिषेधः तेन स्त्रियां द्व्याचिता। द्वाभ्याम् पात्राभ्याम् पचति संभवति अवहरति वा इति द्विपात्रिकः—ष्ठन्। स्त्रियां द्विपात्रिकी। खः—द्विपात्रीणः—स्त्रियां द्विपात्रीणा। ठञ्—तस्य लुक् द्विपात्र। 'द्विगोः" (४।१।२१) इति स्त्रियां ङीप्—द्वि-पात्री।

१६८७। कुलिजाल्लुक्खौ च ॥ ५।१।५५ ॥

टी—। कुलिजान्ताद्द्विगोः संभवतीत्यादिष्वर्थेषु लुक्खौ वास्तः। चात् ष्ठंश्च। लुगभावे ठञः श्रवणम्। द्विकुलिजी। द्वैकुलिजिकी। द्विकुलिजीना। द्विकुलिजिकी।

In the aforesaid sense, the suffix (of course ठञ्), attached to the word कुलिज entering into a द्विगु compound, optionally elides; whereas, the suffixes ख as well as ष्ठन् may be added to the same in the self same sense and under self-same condition; these, of course, do not elide.

मित—। द्विगोरित्येव। तेन कृतद्विगुसमासात् कुलिजशब्दात् संभवति, पचति अवहरति इति एतेषु अर्थेषु विहितस्य प्रत्ययस्य (ठञः इत्यर्थः) लुक् स्यात्, तथा अस्मात् खप्रत्ययोऽपि स्यात्; किञ्च सूत्रस्थचकारबलेन अस्मात् ष्ठन् प्रत्ययोऽपि भवेत्। तथाच "अन्यतरस्याम्" इति अत्रापि अनुवर्त्तते तेन लुक् खलु विकल्पेन भवति, तथा सति लुकः अप्राप्तिपक्षे ठञ्प्रत्ययस्तिष्ठति। द्वे कुलिजे संभवति अवहरति पचति वा इति ठञ्—तेन द्वैकुलिजिकः। स्त्रियां द्वैकुलिजिकी। ठञ्प्रत्ययस्य लुक्—द्विकुलिज। स्त्रियां तु "द्विगो" रिति (४।१।२१) ङीप् द्विकुलिजी। खप्रत्ययः—द्विकुलिजीनः—स्त्रियां द्विकुलिजीना। ष्ठन् प्रत्ययः—द्विकुलिजिकः—स्त्रियां द्विकुलिजिकी। खप्रत्यये कृते सति द्विकुलिजीना इति भवेत्, एतद्धि भाषावृत्तौ दृश्यते। परम् अत्र काशिकायां च द्वैकुलिजीना इति दृश्यते; तस्य साधुत्वं चिन्त्यम्।

१६८८। सोऽस्यांशवस्नभृतयः ॥ ५।१।५६ ॥

टी—। अंशो भागः। वस्नं मूल्यम्। भृति र्वेतनम्। पंच अंशो वस्नो भृतिर्वा अस्य पंचकः।

Proper suffixes are added to words to denote a part or price or wages of the thing expressed by the said words.

मित—। स इति प्रथमासमर्थात् प्रातिपदिकात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात्, यत् खलु प्रथमासमर्थं अंशो वस्नो भृतय श्चेत् ता भवन्ति। पञ्च अंशः वस्नः भृति र्वा अस्य इति पञ्चकः। अत्र "संख्याया अतिशदन्तायाः कन्" ( ५।१।२२ ) इति कन्। एवं सप्तकः। सहस्रं वस्नः भृतिरंशोवा अस्य इति "शतमान—" ( ५।१।२७ ) इत्यादिसूत्रेण अण्—साहस्रः। शतं वस्नः भृति रंशो वा अस्य इति शतिकः शत्यः वा, "शताच्च ठन्यतावशते" ( ५।१।२१ ) इति ठन् यतौ।

१६८९। तदस्य परिमाणम् ॥ ५।१।५७ ॥

टी—। प्रस्थं परिमाणमस्य इति प्रास्थिको राशिः।

Proper suffixes are affixed to words to denote the measure or amount of the thing, expressed by the said word.

मित—। तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवेत्। यत् खलु प्रथमासमर्थं तच्चेत् परिमाणमेव। प्रस्थं परिमाणमस्य इति ठञ् प्रास्थिकः राशिः। खारी परिमाणमस्य इति खारीकः—अत्र "खार्य्या ईकन्" ( ५।१।३३ ) इति ईकन्। शतम् परिमाणमस्य इति शत्यः—यत्; शतिकः—ठन्। सहस्रं परिमाणमस्य इति साहस्रः—अण्। वर्षशतम् परिमाणमस्य वार्षशतिकः यागः। अत्र ठञ्।

१६९०। संख्यायाः संज्ञासंघसूत्राध्ययनेषु ॥ ५।१।५८ ॥

टी—। पूर्व्वसूत्रम् अनुवर्त्तते। तत्र "संज्ञायां स्वार्थे

प्रत्ययो वाच्यः ।" (वा)। यद्वा द्व्येकयोरितिवत् संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः। पंचैव पंचकाः शकुनयः। पंच परिमाणमेषां इति वा। संघे—पंचकः। सूत्रे—अष्टकम् पाणिनीयम्। संघशब्दस्य प्राणिसमूहे रूढ़त्वात् सूत्रं पृथगुपात्तम्। पंचकम् अध्ययनम्। स्तोमे डविधिः। (वा)। पंचदश मन्त्राः परिमाणमस्य पंचदशस्तोमः। सप्तदशः। एकविंशः। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः।

Proper suffixes are added to numerical words to imply some measure (amount) with reference to a संज्ञा ( proper name or particular class name ), संघ ( group of animals ), सूत्र ( group of rules ) and अध्ययन ( study, reading ). (Rest easy).

मित—। तदस्य परिमाणम् इत्यस्य अनुवृत्तिः। "तदि"ति प्रथमासमर्थात् प्रातिपदिकात् संख्यावाचकात् "अस्य" इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवेत्—यत् खलु प्रथमासमर्थं संख्यावाचकं तच्चेत् संज्ञाविषयकं संघविषयकम्, सूत्रविषयकम्—अध्ययनविषयकम् वा परिमाणम्। संघविषयकं परिमाणं यथा—पञ्च परिमाणम् अस्य इति कन्—पंचकः संघः। सूत्रविषयकम्—अष्टौ अध्यायाः परिमाणम् अस्य सूत्रस्य इति अष्टकं पाणिनीयं सूत्रम्। एवं दशकम् वैयाघ्रपदीयम्। त्रिकं काशकृत्स्नम्।

ननु अध्यायसमूहः सूत्रसंघ एव तर्हि सूत्रस्य कथं पृथक् ग्रहणम् इति चेत्; मैवम्। प्राणिनां समूहे एव संघः प्रसिद्धः। तेनैव सूत्रस्य पृथगुपादानम्। पंच आवृत्तयः परिमाणम् अस्य अध्ययनस्य इति पंचकम् अध्ययनम्। संज्ञाविषये तु=स्वार्थे एव प्रत्ययः स्यात्। पंच एव इति कन् पंचकः। पंचकाः नकुलाः। पंचकाः शकुनयः। त्रिकाः शालङ्कायनाः। यद्वा "द्व्येकयोर्द्विवचनैकवचने" ( १।४।२२ ) इत्यत्र यथा द्विशब्देन द्वित्वं इति गृह्यते, एकशब्देन एकत्वमिति गृह्यते, तथा अत्रैव "संख्यामात्रवृत्तेः" संख्यामात्राभिधायिन पंच दश एवमादेः, "परिमाणिनि" पंच-

परिमाणविशिष्टे दशपरिमाणविशिष्टे इत्यादौ वाच्ये खलु प्रत्ययः स्यात्। पञ्च परिमाणमेषां शकुनीनाम् इति पंचकाः शकुनयः। अत्र परिमाण-शालिनि अभिधेये सति संख्यामात्रवाचकेभ्यः पंचदश एवमादिभ्यः प्रत्ययः इति भावः। "स्तोमे डविधिः"—सोमयागेषु छन्दोगैः क्रियमाणाः "पृष्ठ" "षड्ह" इत्यादिनाम्ना प्रसिद्ध स्तुतिः स्तोमशब्देन उच्यते। तस्मिन् स्तोमे अभिधेये सति संख्यावाचकात् डप्रत्ययः स्यात् परिमाणविषये। पंचदश मन्त्राः परिमाणम् अस्य (स्तोमस्य) इति पंचदशः स्तोमः। सप्तदश मन्त्राः परिमाणम् अस्य इति सप्तदशः स्तोमः। एकविंशतिः मन्त्राः परिमाणम् अस्य इति एकविंशः स्तोमः।

**१६८१। पङ्क्ति विंशति त्रिंशच्चत्वारिंशत्पंचाशत्-षष्टि सप्तत्यशीतिनवतिशतम्॥ ५।१।५८॥**

**टी—। एते रूढ़िशब्दा निपात्यन्ते।**

The words enumerated in the sutra are irregularly formed in the aforesaid sense.

मित—। तदस्य परिमाणम् इति एतस्मिन् विषये पङ्क्तिप्रभृतयः निपातनेन सिध्यन्ति। एते रूढ़िशब्दाः—अर्थविशेषे रूढ़ाः। यल्लक्षणेनानुत्पन्नं तत् सर्व्वं निपातनात् सिद्धम्। तथाहि पङ्क्तिश्छन्दः। अत्र पंचशब्दस्य टिलोपः, तथा ति-प्रत्ययश्च। विंशतिः—द्वौ दशतौ परिमाणम् अस्य संघस्य इति विंशतिः। त्रिंशत् इति कथं सिद्धम्? उच्यते—त्रयोदशतः परिमाणमस्य इति त्रिंशत्। चत्वारो दशतः परिमाणम् अस्य इति चत्वारिंशत्। पञ्च दशतः परिमाणम् अस्य इति पञ्चाशत्। षड् दशतः परिमाणम् अस्य इति षष्टिः। सप्तदशतः परिमाणमस्य इति सप्ततिः। अष्टौ दशतः परिमाणम् अस्य इति अशीतिः। नवदशतः परिमाणम् अस्य इति नवतिः। दश दशतः परिमाणम् अस्य इति शतम्। पङ्क्तिः इति क्रमसन्निवेशे अपि वर्त्तते—यथा ब्राह्मणपङ्क्तिः। पिपीलिकापङ्क्तिः। उदाहरणमात्रमेतत्। सहस्रादयः अपि एवं द्रष्टव्याः।

**१६८२। पंचद्दशतौ वर्गे वा॥ ५।१।६०॥**

टी—। पंच परिमाणम् अस्य पंचद्वर्गः। दशत्। पक्षे पंचकः। दशकः।

The words पञ्चत् and दशत् are irregularly formed to imply a वर्ग ( group ); these are optional and do not disallow the suffix कन्।

मित—। वर्गः गणः। तस्मिन् वर्गे अभिधेये सति पञ्चत् दशत् इति एते निपातनेन सिध्यतः, तदस्य परिमाणम् इति एतस्मिन् विषये। अत्र विकल्पविधिः। पञ्च परिमाणम् अस्य इति पञ्चत्। पंचत् वर्गः। कन्—पंचको वर्गः। दश परिमाणम् अस्य इति दशत् वर्गः। दशको वर्गः। "संख्यायाः" ( ५।१।२२ ) इति कन्प्रत्यये नित्यं प्राप्ते सति अनेन विकल्पः। विकल्पपक्षे पंचत् दशत् इति निपातनेन सिध्यति।

## १६८३। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ५।१।६२ ॥

टी—। त्रिंशदध्यायाः परिमाणम् एषां ब्राह्मणानां त्रैंशानि। चात्वारिंशानि ब्राह्मणानि।

In the sense of तदस्य परिमाणम्, the suffix डण् is attached to the words त्रिंशत् and चत्वारिंशत्, to denote the name of a particular kind of "Brahman" ( the prose portion of the vedas ).

मित—। ब्राह्मणं वेदानां कर्म्मकाण्डानां (मन्त्रव्यतिरिक्तः) गद्यभागः। "ब्राह्मणे" ब्राह्मणे अभिधेये सति "संज्ञायां" संज्ञाविषये "त्रिंशत् चत्वारिंशतोः" त्रिंशत् चत्वारिंशत् इति एताभ्याम् डण् प्रत्ययः स्यात्, तदस्य परिमाणम् इति एतस्मिन्नर्थे। ब्राह्मणविशेष- नाम्नि वाच्ये सति परिमाणविषये त्रिंशत् चत्वारिंशत् इति एताभ्याम् डण् प्रत्ययः स्यात् इत्यर्थः। त्रिंशत् अध्यायाः परिमाणम् एषां ब्राह्मणानाम् इति डण्—

वं शानि ब्राह्मणानि। चत्वारिंशदध्यायाः परिमाणमेषां चात्वारिंशानि ब्राह्मणानि। कानिचित् ब्राह्मणानि त्रिंशदध्यायसनाथानि कानिचित् च चत्वारिंशदध्याययुक्तानि तेनैव हि तानि तत्तत् संज्ञया आख्यायन्ते।

१६८४। तदर्हति॥ ५।१।६३॥

**दी—। लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्तात् ठञादयः स्युः। श्वेतच्छत्रम् अर्हति इति श्वैतच्छत्रिकः।**

Proper suffixes are added to words to imply the person that deserve the things, expressed by the said word.

मित—। तदिति द्वितीयासमर्थात् "अर्हति" योग्यो भवति, लब्धुं योग्यः भवतीति एतस्मिन् विषये ठञादयः यथायोग्यं प्रत्ययाः स्युः। श्वेतच्छत्रम् अर्हति इति श्वैतच्छत्रिकः। छत्रम् अर्हति इति छात्रिकः। शतम् अर्हति इति शत्यः शतिकश्च। अत्र यत्प्रत्ययः—ठन्प्रत्ययश्च। सहस्रम् अर्हति इति साहस्रः—अत्र अण्। वस्त्रयुग्मम् अर्हति इति वास्त्रयुग्मिकः—अत्र ठञ्।

१६८५। छेदादिभ्यो नित्यम्॥ ५।१।६४॥

**दी—। नित्यम् आभीक्ष्ण्यम्। छेदम् नित्यम् अर्हति छैदिकः वेतसः। छिन्नप्ररूढ़त्वात्।**

Proper suffixes are added to words of the छेदादि class, to denote the person or thing that always or ever deserve those expressed by the words of the छेदादि class.

मित—। नित्यम् आभीक्ष्ण्यम् सततम् इत्यर्थः। नित्यमिति प्रत्ययार्थविशेषणम्। नित्यम् अर्हतीति एतस्मिन् विषये छेद एवमादिभ्यः यथाविहितं प्रत्ययो भवेत्। छेदम् नित्यमर्हति इति छैदिकः। छैदिकः वेतसः। छिन्नप्ररूढ़त्वात् वेतसश्छिन्नश्छिन्नः एव प्ररोहति—अतः स छैदिकः। छेदादि यथा—छेद, भेद, द्रोह, वर्त्त, कर्ष, संप्रयोग, विप्रयोग, प्रेषण, विप्रकर्ष, दोह, नर्त्त, तीर्थ, संयोग, प्रयोग, विकर्ष, प्रकर्ष, संप्रश्न, विप्रश्न।

**दी—। विराग विरङ्गं च॥ विरागं नित्यम् अर्हति वैरागिकः। वैरङ्गिकः।**

मित—। नित्यमर्हति इति एतस्मिन् विषये विरागशब्दो विरङ्गादेशं लभते। विरागं नित्यम् अर्हति इति ठक् ( आर्हीयः ) वैरागिकः। वैरङ्गिकः।

१६८६। **शीर्षच्छेदाद्यच्च॥ ५।१।६५॥**

**दी—। शिरश्छेदं नित्यम् अर्हति शीर्षच्छेद्यः। शैर्षच्छेदिकः। यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते।**

The suffix यत् or any other suitable suffix is added to the word शीर्षच्छेद—in the aforesaid sense.

मित—। शिरसः छेदम् नित्यम् अर्हतीति विषये शीर्षच्छेदशब्दात् यत्-प्रत्ययः स्यात्। सूत्रस्थचकारबलात् यथाविहितं प्रत्ययश्चापि। स च ठक् एव। शिरश्छेदम् नित्यम् अर्हतीति इति यत्—शीर्षच्छेद्यः। पक्षे ठक्—शैर्षच्छेदिकः। यत् ठक् इति प्रत्ययद्वय-सन्नियोगेन "शिरस् छेदः" इति शिरस् इत्यस्य स्थाने निपातनेन शीर्ष इति भवति। तेन शीर्षच्छेद इति सूत्रे निर्देशः। तथाहि उत्तररामचरिते—"शीर्षच्छेद्यः स ते राजन्"।

१६८७। **दण्डादिभ्यो यत्॥ ५।१।६६॥**

**दी—। एभ्यो यत् स्यात्। दण्डम् अर्हति दण्ड्यः। अर्घ्यः। वध्यः।**

The suffix यत् is attached to the word दण्ड and others coming within the category of दण्डादि, to imply the person that deserves the thing or things expressed by the said words.

मित—। दण्डादिभ्यो द्वितीयासमर्थेभ्यः अर्हतीति एतस्मिन् विषये यत् प्रत्ययो भवति। यत् स्थाने य इति काशिकाभाषावृत्तिकारयोरपपाठः। ठकोऽपवादः। दण्डम् अर्हति इति दण्ड्यः। अर्घम् अर्हति इति अर्घ्यः। वधम् अर्हति इति वध्यः। तथाहि मनुस्मृतौ—अदण्ड्यान् दण्डयन् राजा, दण्ड्यान् चापि अदण्डयन्। दण्ड्यान् दण्डयोग्यान्। दण्डादिर्यथा—दण्ड, मुसल, मधुपर्क, कशा, अर्घ, मेघ, मेधा, सुवर्ण, कठ, धन, उदक, वध, युग, गुहा, भाग, इभ, भङ्ग।

## १६९८। पात्राद् घंश्च ॥ ५।१।६८॥

## टी—। चाद्यत् तदर्हतीत्यर्थे। पात्रियः। पात्र्यः।

In the aforesaid sense, the suffix घन् as well as the suffix यत is attached to the word पात्र।

मित—। पात्र इत्यस्मात् घन् स्यात्, सूत्रस्थचकारबलात् यत् च, तदर्हतीति एतस्मिन् विषये। ठक् ठञोरपवादः। "पात्रम् परिमाणम् अप्यस्ति" इति काशिका। पात्रम् अर्हति इति घन् पात्रियः। यत्-पात्र्यः।

## १६९९। कडङ्करदक्षिणाच्छ च ॥ ५।१।६९॥

## टी—। चाद्यत्। कडं करोतीति विग्रहे निपातनात् खच्। कडङ्करं माषमुद्गादिकाष्ठम् अर्हति इति कडङ्करीयो गौः। कडङ्कर्यः। दक्षिणाम् अर्हतीति दक्षिणीयः। दक्षिण्यः।

The suffix छ as well as the suffix यन् is attached to the words कडङ्कर and दक्षिणा in the aforesaid sense.

मित—। कड मदे इति पदमञ्जरीकृत् हरदत्तः। कडतीति कडः। कडं करोतीति विग्रहे निपातनेन खच् प्रत्ययः। तेन कडङ्कर इति सिध्यति। कडङ्कर शब्देन माषमुद्गादिकाष्ठम् उच्यते। कडङ्करबुसं क्लीवे इत्यमरः। कडङ्करशब्दात् तथा दक्षिणाशब्दाच्च अर्हतीति एतस्मिन् अर्थे छप्रत्ययो भवति, सूत्रस्थचकारबलात् यत् च। ठकोऽपवादः। कडङ्करम् अर्हतीति कडङ्कर्यः—यत्, कडङ्करीयः—छ।

काङ्करीयः काङ्कर्यो वा गौः। दक्षिणाम् अर्हति इति दक्षिणीयः—भिक्षुः। यत्= दक्षिण्यः ब्राह्मणः।

१७०० । स्थालीबिलात् ॥ ५।१।७० ॥

टी—। स्थालीबिलमर्हतीति स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः। पाकयोग्या इत्यर्थः।

In the aforesaid senses, the suffix छ as well as यत् is attached to the word स्थालीबिल।

मित—। स्थाल्याः बिलम् इति स्थालीबिलम् रन्धनपात्राभ्यन्तरम् इत्यर्थः। द्वितीयासमर्थात् स्थालीबिलशब्दात् अर्हतीति एतस्मिन् विषये छ प्रत्ययः, यत् प्रत्ययश्च। स्थालीबिलम् अर्हति इति छः—स्थालीबिलीयाः, यत्—स्थालीबिल्याः। स्थालीबिलीयाः स्थालीबिल्याः वा तण्डुलाः। पाकयोग्याः इत्यर्थः।

१७०१ । यज्ञर्त्विग्भ्यां घखञौ ॥ ५।१।७१ ॥

टी—। यथासंख्यं स्तः। यज्ञं ऋत्विजं वा अर्हति। यज्ञियः। आर्त्विजीनो यजमानः।

In the aforesaid sense, the suffix घ is attached to the word यज्ञ, and the suffix खञ् is attached to the word ऋत्विज्।

मित—। अर्हतीति एतस्मिन् विषये यज्ञशब्दात् घप्रत्ययः स्यात्, ऋत्विज् शब्दात् खञ् प्रत्ययो भवति। यज्ञम् अर्हतीति यज्ञियः ब्राह्मणः। अत्र खप्रत्ययः। ऋत्विजमर्हतीति खञ्—आर्त्विजीनो यजमानः।

टी—। यज्ञर्त्विग्भ्याम् तत्कर्मार्हतीत्युपसंख्यानम्। (वा)। यज्ञियोदेशः। आर्त्विजीनो ऋत्विक्।

The said suffixes are also affixed to the said words to imply the person, place or thing that deserve the कर्म्म (function) of a यज्ञ (sacrifice) or a ऋत्विग् (priest).

मित—। यज्ञकर्म्म अर्हतीति विषये यज्ञशब्दात्, तथा ऋत्विक्कर्म्म अर्हतीति विषये ऋत्विज्शब्दाच्च यथासंख्यं घ खञ् इति एतौ स्तः। यज्ञकर्म्म अर्हतीति यज्ञियः देशः। ऋत्विक् कर्म्म अर्हतीति आर्त्विजीनो ऋत्विक्।

॥ आर्हीयानां ठगादीनां द्वादशानां पूर्णोऽवधिः ॥

दी—। "अतः परं ठञेव"। [अस्मात् परं तु "प्राग्वतेष्ठञ्" (५।१।१८) इति ठञ् प्रत्ययः अधिक्रियते ]।

**१७०२। पारायणतुरायणचान्द्रायणं वर्त्तयति ॥५।१।७२॥**

**दी—। पारायणं वर्त्तयति इति पारायणिकश्छात्रः। तुरायणं यज्ञविशेषः। तं वर्त्तयति तौरायणिको यजमानः। चान्द्रायणिकः।**

The suffix ठञ् is attached to the words पारायण, तुरायण and चान्द्रायण to denote the person that practises those.

मित—। पारायण तुरायण चान्द्रायण इति एतेभ्यः द्वितीयासमर्थेभ्यः वर्त्तयतीति एतस्मिन्नर्थे ठञ् प्रत्ययो भवति। पारायणं वर्त्तयति अधीते इति पारायणिकः छात्रः। द्वि-पारायणिकः। त्रि-पारायणिकः। तुरायणं यज्ञविशेषः। तत् वर्त्तयति निर्व्वहतीति तौरायणिकः यजमानः। चान्द्रायणं वर्त्तयति पालयति इति चान्द्रायणिकः तपस्वी। [ 'वर्त्तयति' इति णिजन्तो भ्वादिस्तु गृह्यते। नात्र सर्वत्र कर्त्रभिप्रायविवक्षास्ति। अतो "णिचश्च" इति नात्मनेपदम् ]॥

**१७०३। संशयमापन्नः ॥ ५।१।७३ ॥**

**दी—। संशयविषयीभूतोऽर्थः सांशयिकः।**

The suffix ठञ् is attached to the word संशय— to denote the thing, that is an object of the same ( i. e. संशय— doubt ].

मित—। द्वितीयासमर्थात् संशयशब्दात् आपन्न इति एतस्मिन्नर्थे ठञ् प्रत्ययो भवति। संशयम् आपन्नः प्राप्तः इति सांशयिकः स्थाणुः। स च संशयविषयीभूतः— अयं नरो वा स्थाणु र्वेति।

१७०४। **योजनं गच्छति ॥ ५।१।७४ ॥**

टी—। **यौजनिकः।**

The suffix ठञ् is attached to the word योजन to denote the person that travels the same.

मित—। चतुर्भिः क्रोशैः योजनं स्यात। तृतीयासमर्थात् योजनशब्दात् गच्छतीति एतस्मिन् विषये ठञ् स्यात्। योजनं गच्छति इति यौजनिकः पान्थः।

टी—। **क्रोशशत-योजनशतयोरुपसंख्यानम् ॥ (वा) ॥ क्रोशशतं गच्छति क्रौशशतिकः। यौजनशतिकः।**

In the same sense, the suffix ठञ् is attached to the words क्रोशशत् and योजनशत।

मित—। पूर्व्वोक्ते विषये आभ्याम् ठञ् स्यात्; क्रोशशतं गच्छति क्रौशशतिकः दूतः। योजनशतं गच्छति यौजनशतिकश्चरः।

टी—। **ततोऽभिगमनमर्हतीति च वक्तव्यम् ॥ (वा) ॥ क्रोशशतादभि- गमनमर्हतीति क्रौशशतिको भिक्षुः। यौजनशतिकः आचार्य्यः।**

The suffix ठञ is attached to the words क्रोशशत and योजनशत, to imply the person—that deserves a welcome from these far places.

मित—। ततः इति पञ्चमीसमर्थाभ्याम् क्रोशशतम् योजनशतम् इति एताभ्याम् ठञ्प्रत्ययो भवति, अभिगमनम् अर्हतीति एतस्मिन्नर्थे। क्रोशशतात् अभिगमनम् प्रत्युद्‌यानम् अर्हति इति क्रौशशतिकः भिक्षुः। योजनशतात् अभिगमनम् अर्हतीति यौजनशतिकः आचार्य्यः।

१७०५। **पथः ष्कन् ॥ ५।१।७५ ॥**

टी—। **षो ङीषर्थः। पन्थानं गच्छति पथिकः। पथिकी।**

The suffix ष्कन् is added to the word पथिन् to denote the person, that travels the way.

मित—। पथिन् इति प्रातिपदिकात् द्वितीयासमर्थात् गच्छतीति एतस्मिन्नर्थे ष्कन् प्रत्ययो भवति। प्रत्यये षकारः स्त्रियां ङीष् इति सूचयति—"षिद्गौरादिभ्यश्च" (४।१।४१) इति सूत्रेण। नकारस्य स्वरप्रकरणे उपयोगिता। पन्थानं गच्छति इति पथिकः। "नस्तद्धिते" (६।४।१४४) इति टिलोपः। स्त्रियां पथिकी।

**१७०६। पन्थो ण नित्यम् ॥ ५।१।७६ ॥**

**टी—। पन्थानं नित्यं गच्छति पान्थः। पान्था।**

The suffix ण is attached to the word पथिन्—[ which is changed to पन्थ befor ण ], to imply the person that ever [ always ] travels the way.

मित—। नित्यं इति प्रत्ययार्थविशेषणम्; तेन नित्यं गच्छतीति एतस्मिन् विषये पथिन् इत्यस्मात् णप्रत्ययो भवेत्, पथिन् इत्यस्य स्थाने च पन्थादेशः स्यात्। पन्थानं नित्यं गच्छतीति पान्थः। पान्थः भिक्षां याचते। "पान्थः प्रसुप्तः युवा"। स्त्रियां टाप्—पान्था। नित्यमिति किम्? पन्थानं गच्छतीति पथिकः।

**१७०७। उत्तरपथेनाहृतं च ॥ ५।१।७७ ॥**

**टी—। उत्तरपथेन आहृतम् औत्तरपथिकम्। उत्तरपथेन गच्छति औत्तरपथिकः।**

The suffix ठञ् is attached to the word उत्तरपथ—to denote the thing, that is brought through the same, or to imply the person that travels there.

मित—। उत्तरपथेन आहृतं च अर्थे, चकारात् गच्छतीति एतस्मिन् अपि अर्थे च ठञ् प्रत्ययः स्यात्। उत्तरपथेन आहृतम् औत्तरपथिकम् दारु। उत्तरपथेन गच्छति इति औत्तरपथिकः दूतः। अत्रापि तृतीयैव समर्थविभक्तिः।

टी—। आहृतप्रकरणे वारिजङ्गलकान्तारपूर्वादुपसंख्यानम् ॥ वारिपथिकम्।

मित—। तेन आहृतम्, तेन गच्छतीति एतयोरर्थयो: वारिजङ्गलकान्तार—पूर्व्वात् पथिन् शब्दात् ठञ् प्रत्ययो भवति। वारिपथेन आहृतं वारिपथिकम्। वारिपथेन गच्छति वारिपथिक:। जङ्गलपथेनाहृतं—जाङ्गलपथिकम्। जङ्गलपथेन गच्छति जाङ्गलपथिक:। कान्तारपथेन आहृतं कान्तारपथिकम्। कान्तारपथेन गच्छति कान्तारपथिक:॥ अपिच अजपथशङ्कुपथाभ्याम् च इति वक्तव्यम्। अजपथेन आहृतं गच्छति वा आजपथिकम् आजपथिक:। शङ्कुपथेन आहृतं गच्छति वा पाङ्कपथिक'—शाङ्कुपथिक:। किञ्च "स्थलवारिभ्याम् पथो मधुकमरिचयोरण्"। स्थलपूर्व्वकात् पथिन्शब्दात् तथा वारिपूर्व्वकात् पथिन्शब्दात् अण्प्रत्यय: स्यात् आहृतमिति विषये, मधुके, मरिचे च गम्यमाने। स्थलपथेन आहृतं मधुकम् स्थालपथं मधुकं, स्थलपथेन आहृतं मरिचं स्थालपथं मरिचम्। वारिपथेन आहृतं मधुकं वारिपथं मधुकम्। वारिपथेन आहृतं मरिचं वारिपथं मरिचम्।

१७०८। कालात् ॥ ५।१।७८ ॥

टी—। व्युष्टादिभ्योऽणित्यत: प्रागधिकारोऽयम् ॥

This is an अधिकार सूत्र i.e. a rule that denotes jurisdiction or pervasion. The word कालात् i. e. "after words—expressive of any divison of time" is to be taken in connection with all the suceeding rules till the rule—व्युष्टादिभ्योऽण् [ ५।१।९७ ]

मित—। अधिकारसूत्रमिदम्। "कालात्" कालवाचकशब्देभ्य: इत्यस्य अधिकार: व्युष्टादिभ्योऽण् ( ५।१।९७ ) इति सूत्रं यावत् वर्त्तते।

१७०९। तेन निर्वृत्तम् ॥ ५।१।७९ ॥

टी—। अह्ना निर्वृत्तम् आह्निकम्।

The suffix ठञ् is attached to word expressive of any

divison of time, to denote something, completed within the said period of time.

मित—। तेनेति तृतीयासमर्थात् कालवाचिनः प्रातिपदिकात् "निर्वृत्तम्" इति एतस्मिन्नर्थे ठञ् प्रत्ययो भवति। अह्ना निर्वृत्तम् आह्निकम्। "अह्नष्टखोरेव" ( ६।४।१४५ ) इति नियमात् अत्र टिलोपो न स्यात्। निर्वृत्तम् सम्पन्नम्। मासेन निर्वृत्तम् मासिकम्। आर्द्धमासिकम्। द्वि-सांवत्सरिकम्—अत्र "संख्यायाः संवत्सर संख्यस्य च" ( ७।३।१५ ) इति उत्तरपदवृद्धिः।

१७१०। तमधीष्टोभृतोभूतोभावी ॥ ५।१।८० ॥

दी—। अधीष्टः सत्कृत्य व्यापारितः। भृतो वेतनेन क्रीतः। भूतः स्वसत्त्वया व्याप्तः कालः। भावी तादृश एव अनागतःकालः। मासम् अधीष्टः मासिकोऽध्यापकः। मासं भृतो मासिकः कर्मकरः। मासंभूतो मासिको व्याधिः। मासं भावी मासिक उत्सवः।

Proper suffixes [ or rather the suffix ठञ ] are added to words expressing any division of time, to denote the person who is respectfully engaged, or who is stipulated to work for wages for the said period of time, or to imply a thing, that existed [ or that had duration ] or will exist [ will last ] for the said time.

मित—। तमिति द्वितीयासमर्थात् कालवाचकप्रातिपदिकात् अधीष्टः भृतः भूतः भावी इति एतेष्वेव अर्थेषु यथाविहितं प्रत्ययः ( ठञ् प्रत्ययो वा ) भवति। अधीष्टः सत्कृत्य व्यापारितः—सत्कारपूर्वकम् कस्मिन्नपि कर्म्मणि नियोजितः। आदरपूर्वकम् किमपि कर्म्म कर्त्तुं नियोजितः इत्यर्थः। मासम् अधीष्टः मासिकः अध्यापकः। संवत्सरं अधीष्टः सांवत्सरिको गुरुः। मासं संवत्सरम् इत्यादौ "कालाध्वनोरत्यन्त संयोगे" ( २।३।५ ) इति द्वितीया। मासं संवत्सरं वा व्याप्य सादरम् अध्यापन-

कर्म्मणि नियोजितः इत्यर्थः। भृतो वेतनेन क्रीतः—वेतनप्रदानेन कर्म्मणि नियोजितः। मासं भृतः मासिकः कर्म्मकरः। संवत्सरं भृतः सांवत्सरिकः दासः। भृतः—स्वसत्त्वया व्याप्तकालः। स्वसत्त्वया भृतशब्देन विवस्तु अभिप्रेतम्, तस्यैव वस्तुनः सत्त्वया अस्तित्वेन व्याप्तः परिमितः कालः। अतीतकालः इत्यर्थः। वर्त्तमानध्वंस प्रतियोगित्वम् अतीतत्वम् इति सारमञ्जरी। मासं भूतो मासिकः व्याधिः। संवत्सरं सांवत्सरिकः व्याधिः। यो व्याधिः स्वसत्त्वया (व्याधिसत्त्वया आत्मनः अस्तित्वेन इत्यर्थः) मासं व्याप्तवान् स मासिकः व्याधिः—यो व्याधि संवत्सरं स्व-सत्त्वया व्याप्तवान् स सांवत्सरिको व्याधिः। भावी अनागतकालः। भविष्यत्कालः—वर्त्तमानप्रागभावप्रयोगित्वम् भविष्यत्त्वम् इति सारमञ्जरी। मासं भावी मासिकः उत्सवः; संवत्सरं भावी सांवत्सरिकः उत्सवः। य उत्सवः स्वसत्वया मास-परिमितं संवत्सर परिमितं वा कालं व्याप्स्यति (मासं संवत्सरं वा यावत् स्यास्यति) स उत्सवः मासिकः सांवत्सरिको वा।

### १७११। मासाद्वयसि यत्खञौ। ५।१।८१॥

### दी—। मासं भूतो मास्यः। मासीनः।

The suffixes यत् as well as खञ् are attached to the word मास to imply the age of something.

मित—। मासशब्दात् द्वितीयान्तात् भूतः इति विषये यत् प्रत्ययः स्यात्; खञ् प्रत्ययश्च वयसि गम्यमाने। ठञोऽपवादौ। मासं भूतो मास्यः—यत्। मासं भूतः मासीनः—खञ्। मास्यः गोवत्सः। मासीनः शिशुः। वयसि इति किम्? मासिकः कर्मकरः। भाषावृत्तिकृन्मते मासं भावी मास्यः इत्यर्थे अपि अयं विधिः स्यात्।

### १७१२। द्विगोर्यप्॥ ५।१।८२॥

### दी—। मासाद्वयसीत्यनुवर्त्तते। द्वौ मासौ भूतो द्विमास्यः।

The suffix यप् is added to the word मास, entering into a द्विगु compound, under the aforesaid condition.

मित—। मासाद्वयसि इत्यनुवृत्तम्। तेन अयमर्थ:—कृतद्विगुसमासात् मासशब्दात् भूत इति विषये यप्प्रत्यय: स्यात् वयसि गम्यमाने। द्वौ मासौ भूत: इति द्विमास्य: एवं त्रिमास्य:। मन्यामहे प्रत्ययोऽयं यत्खञ्प्रत्यययो: अपवाद:। यत्-यप्-प्रत्यययोस्तु स्वरे एव भेद: इत्यपि स्मर्त्तव्यम्।

**१७१३। षण्मासाण्ण्यच्च ॥ ५।१।८३ ॥**

**टी—। वयसि इत्येव। यवपि अनुवर्त्तते। चाट्ठञ्। षण्मास्य:। षाण्मास्य:। षाण्मासिक:।**

The suffix ण्यत्, as well as the suffix यप् ( also the suffix ठञ् ) is attached to the word षण्मास in the aforesaid sense.

मित—। षण्मासशब्दात् भूत इति विषये ण्यत् च स्यात् वयसि गम्यमाने। अत्र यप् अपि अनुवर्त्तते—तेन यवपि स्यात्; तथा सूत्रस्थचकारबलात् ठञ् अपि—अतएव पदत्रयं सिध्यति। षट् मासान् भूत: इति ण्यत्—षाण्मास्य:। यप्—षण्मास्य:। ठञ्—षाण्मासिक:।

**१७१४। अवयसि ठंश्च ॥ ५।१।८८ ॥**

**टी—। चाण्ण्यत्। षण्मासिको व्याधि:। षाण्मास्य:।**

The suffix ठन् as well as the suffix ण्यत् is attached to the word षण्मास—to imply anything other than age.

मित—। अवयसि अभिधेये षण्मासशब्दात् ठन् प्रत्ययो भवति—सूत्रस्थचकारबलात् ण्यत् च। षण्मासान् भूत: इति षण्मासिक: व्याधि:। अत्र ठन्। ण्यत्—षाण्मास्य: रोग:। [ भाषावृत्तिमते ठञपि स्यात्—तेन षाण्मासिक: इत्यपि ]।

**१७१५। समाया: ख: ॥ ५।१।८५ ॥**

**टी— । समाम् अधीष्टो भृतो भूतो भावी वा समीनः ॥**

The suffix ख is affixed to the word समा in all the four senses—अधीष्ट, भृत, भूत and भावी enumerated in the rule no 80 of this section of Panini.

मित— । द्वितीयासमर्थात् समाशब्दात् अधीष्टः, भृतः भूतः, भावी इति एतेषु अर्थेषु खप्रत्ययः स्यात्। समाम् अधीष्टः भृतः भूतः भावी वा समीनः । अयं ठञ्-प्रत्ययस्य अपवादः । केचित्तु "तेन निर्वृत्तम्" ( ५।१।७९ ) इति निर्वृत्तार्थे अपि खप्रत्ययमिच्छन्ति—तेन समया निर्वृत्त इति समीनः ।

**१७१६ । द्विगोर्वा ॥ ५।१।८६ ॥**

**टी— । समायाः ख इतिव । 'तेन परिजय्ये त्यतः प्राङ्' निर्वृत्तादिषु पंचस्वर्थेषु प्रत्ययाः । द्विसमीनः । द्वैसमिकः ।**

The suffix ख is optionally attached to the word समा—entering into a द्विगु—compound, in all the five aforesaid senses ( i. e. in the senses of निर्वृत्त, अधीष्ट, भृत, भूत and भावी ) ।

मित— । समायाः ख इति अनुवृत्तम् । तेनायम् अर्थः—कृतद्विगुसमासात् समाशब्दात् निर्वृत्तः अधीष्टः, भृतः, भूतो भावी इति एतेषु पञ्चसु अर्थेषु खप्रत्ययः विकल्पेन स्यात्; "समायाःखः" ( ५।१।८५ ) इति खप्रत्यये नित्ये प्राप्ते अनेन विकल्पविधानम् । द्विसमीनः—अवखः । द्वाभ्याम् समाभ्याम् [समाशब्दस्य एकत्वादौ अपि प्रयोग इष्टः ] निर्वृत्तम्, द्वे समे अधीष्टः भृतः भूतः भावी वा द्वि-समीनः । पक्षे ठञ् द्वै-समिकः । "तेन परिजय्यलभ्यकार्य्यसुकरम्" ( ५।१।९३ ) इति सूत्रात् प्राक् निर्वृत्तादिषु पञ्चसु अर्थेषु प्रत्ययाः वेदितव्याः ।

**१७१७ । रात्र्यहः संवत्सराच्च ॥ ५।१।८७ ॥**

**टी— । द्विगोरितिव । द्विरात्रीणः । द्वैरात्रिकः । द्व्यह्नीनः । द्वैयह्निकः । समासान्तविधेरनित्यत्वान्न टच् । द्विसंवत्सरीणः ।**

The suffix ख is attached to the words रात्रि, अहन् and संवत्सर, entering into a द्विगु compound in the aforesaid five senses; by dint of the च in the sutra, ठञ् may be optionally added to these.

मित—। द्विगोरित्यत्र अनुवर्त्तते। कृतसमासात् रात्रिशब्दात्, तादृशात् अहःशब्दात्, तथा एवम्भूतात् संवत्सरशब्दाच्च—निर्वृत्तादिषु पञ्चसु अर्थेषु खप्रत्ययः स्यात्; सूत्रस्थचकारबलात् ठञ् प्रत्ययोऽपि। द्वाभ्यां रात्रिभ्यां निर्वृत्तः। द्वे रात्री अधीष्टः भृतः भूतः भावी वा इति खः—द्विरात्रीणः; ठञ्—द्वैरात्रिकः। द्व्यह्नीनः—खः। द्वे अहनी अधीष्टो भृतो भूतो भावी वा द्व्यह्नीनः "अह्नष्टखोरेव" (५।४।१४६) इति सूत्रेण टिलोपः। द्वैयह्निकः—ठञ्।

ननु "राजाहःसखिभ्यष्टच्" (५।४।९१) इति टच्प्रत्ययाभावः अत्र कथम्? समासान्तविधिरनित्यः इति न्यायात्। द्वैयह्निकः—इत्यत्र "न य्वाभ्याम् पदान्ताभ्याम् पूर्वौ तु ताभ्यामैच्" (७।३।३) इति सूत्रेण ऐजागमः। "अल्लोपोऽनः" इति भसंज्ञायाम् अनः अकारलोपश्च। द्वि-संवत्सरीणः—अत्र खः। ठञ्प्रत्यये कृते तु किंरूपं स्यात्? अत्र सूत्रान्तरस्य अपेक्षा विद्यते—अतः सूत्रं कथयति—

**१७१८। संख्यायाः संवत्सरसंख्यस्य च॥ ७।३।१५॥**

**दी—। संख्याया उत्तरपदस्य वृद्धिः स्याद् ञिदादौ। द्विसांवत्सरिकः। द्वे षष्ठी भृतो द्विषाष्टिकः। संख्यायाः परिमाणान्तस्य इत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्य अग्रहणार्थम्। तेन द्वैसमिक इत्युत्तरपद-वृद्धिर्न।**

The first of all the vowels contained by the word संवत्सर or by any word, expressive of a particular number, takes its Briddhi substitute before any Taddhita suffix—eliding ञ, ण,

or क, provided the said word संवत्सर or the numerical words occur after another numerical word. For rest see Tika.

मित—। संख्यावाचकशब्दात् परस्थितस्य संवत्सरशब्दस्य तथा संख्यावाचकशब्दात् परस्थितस्य अन्यस्य अपि संख्यावाचकशब्दस्य अचां मध्ये आद्यस्य एव अचो वृद्धिः स्यात् ञिति णिति किति च तद्धितप्रत्यये परे सति। द्वाभ्याम् संवत्सराभ्याम् निर्वृत्तः, यद्वा—द्वौ संवत्सरौ अधीष्टो भृतो भूतो भावी वा इति ठञ् द्विसांवत्सरिकः। द्वे षष्टी भृतः द्वि-षाष्टिकः। एवं द्वि-साप्ततिकः, त्रि-साप्ततिकः।

ननु "परिमाणान्तस्यासंज्ञाशाणयोः" (७।३।१७) इति सूत्रेण संख्यावाचकात् शब्दात् परस्थितस्य परिमाणवाचकस्य प्रातिपदिकस्य अचां मध्ये आद्यस्य अचो वृद्धिः ञिति णिति किति च तद्धिते परे। संवत्सरशब्दोऽपि काल-परिमाणवाची अतः तेनैव सूत्रेण अस्य वृद्धिर्भवेत्—तर्हि कथम् अत्र सूत्रे संवत्सर इत्यस्य ग्रहणम् इति संशये सति समाधत्ते—"परिमाणग्रहणे"—इत्यादिना। "परिमाणग्रहणे" यदा परिमाणवाचकः शब्दः गृह्यते तत्र खलु "काल-परिमाणस्याग्रहणार्थम्" कालपरिमाणवाचिनः शब्दाः न गृह्यन्ते। कालपरिमाणवाचिनः प्रातिपदिकाः खलु नैव परिमाणवाचकशब्दानाम् अन्तर्भुक्ताः इत्यर्थः। तेन द्वाभ्याम् समाभ्याम् निर्वृत्तः, द्वे समे अधीष्टो, भृतो भूतो भावी वा इति ठञ्—द्वैसमिकः—अत्र वत्सरवाचिनः समाशब्दस्य परिमाणवाचकानां मध्ये गणनाभावात् न उत्तरपदवृद्धिः।

अत्र किञ्चित् प्रसङ्गतो वक्तव्यमस्ति—

"तदस्य परिमाणम्" इति (५।१।५७) सूत्रम्। तत्र षष्टिः जीवितपरिमाणमस्य षष्टिकः—कन्प्रत्ययः। अपिच द्वे षष्टी जीवितपरिमाणम् अस्य इति वाक्ये विहितस्य ठञ्प्रत्ययस्य "अध्यर्द्ध पूर्व्व—(५।१।५८)" इति सूत्रेण लुक्। पूर्व्वसूत्रे "सोऽस्यांशवस्नभृतयः" (५।१।५६) इति सोऽस्य निर्द्दिष्टम्। पुनरपि परसूत्रे तदस्य इति निर्द्दिश्यते। पुनरपि तदस्य इति निर्द्देशात् ज्ञाप्यते यत् अत्र "अध्यर्द्ध—" (५।१।२८) इति सूत्रेण ठञो लुकि प्रसक्ते अपि पुनरपि ठञ्। तस्य च ठञः विधानसामर्थ्यात् न लुक्। ततः "संख्यायाः संवत्सरसंख्यस्य च" इति उत्तरपदवृद्धिः—तेन द्वि-षाष्टिकः इतिरूपम्। एवं द्वि-साप्ततिकः। त्रि-साप्ततिकः।

१७१८। वर्षाल्लुक् च ॥५।१।८८॥

टी—। वर्षशब्दान्तात् द्विगोर्वा खः। पक्षे ठञ् वा च लुक्। त्रीणि रूपाणि। द्वि-वर्षीणो व्याधिः। द्वि-वार्षिकः। द्वि-वर्षः।

The suffix ख as well as the suffix ठञ् is added to the word वर्ष entering into a द्विगु compound in the five aforesaid senses; these two suffixes may optionally elide also.

मित—। निर्वृत्तादिषु पञ्चसु अर्थेषु कृतद्विगुसमासात् वर्षशब्दात् खप्रत्ययः विकल्पेन स्यात्; पक्षे ठञ् प्रत्ययः; प्रत्ययद्वयस्य च पक्षे लुक् अपि स्यात्। अतएव त्रीणि रूपाणि भवन्ति; द्वे वर्षे भृतः इति खः—द्वि-वर्षीणो व्याधिः। एवं त्रिवर्षीणो व्याधिः। द्वे वर्षे भृत इति ठञ्—द्विवार्षिकः। एवं त्रिवार्षिकः। द्वे वर्षे भृतःभृत इति ठञ् प्रत्ययः खप्रत्ययो वा तयोर्लुक्—द्विवर्षः।

ननु द्विवार्षिकः इत्यत्र उत्तरपदस्य कथं वृद्धिरिति प्रश्ने समाधानं प्रदातुं सूत्रम् उपन्यस्यति—

१७२०। वर्षस्याभविष्यति ॥७।३।१६॥

टी—। उत्तरपदस्य वृद्धिः स्यात्। द्वि-वार्षिकः। भविष्यति तु द्वैवर्षिकः। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न। गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्वि-वार्षिको मनुष्यः।

The first of all the vowels contained by the word वर्ष—coming after a word, expressive of some particular number, takes its Briddhi substitute before a Taddhita suffix that elides ञ, ण or क; provided the said suffix is affixed—not in the sense of future—i. e. provided the suffix be not an

indicator of any thing to come (i. e. any future occurence). See Tika also.

मित—। संख्यावाचकप्रातिपदिकात् परस्थितस्य वर्षशब्दस्य अचां मध्ये आद्यस्य अचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परे, स चेत् तद्धित-प्रत्ययो भविष्यत्यर्थे न स्यात्। द्वे वर्षे भूतः इति द्वि-वार्षिकः। द्वाभ्याम् वर्षाभ्याम् निर्वृत्तम् द्विवार्षिकम्। द्वे वर्षे भृतो ऽधीष्टो वा द्विवार्षिकः। एवं त्रिवार्षिकः। एवं बहुवार्षिकः। अभविष्यतीति किम्? द्वे वर्षे भावीति द्वै-वर्षिकः। द्वैवर्षिकं भक्तम्। एवं त्रैवर्षिकं धान्यम्।

तथाहि—यस्य त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये।
अधिकं वापि विद्यते स सोमं पातुमर्हति॥

द्वे वर्षे अधीष्टः, द्वे वर्षे भृतः इति वाक्यद्वये अभविष्यतीति प्रतिषेधः (उत्तर-पद-वृद्धि-निषेधः) न स्यात्। एतयोः भविष्यत्ता गम्यते नाम, परं तद्धितार्थविषये भविष्यत्ता न गम्यते। एतयोस्तु तद्धित-प्रत्ययः भविष्यत्यर्थे न विहितः इति भावः। द्वे वर्षे अधीष्टो भृतो वा कर्म्म करिष्यतीति द्विवार्षिकः मनुष्यः। अत्र गम्यमानेऽपि भविषत्यर्थे उत्तरपदवृद्धिप्रतिषेधो न स्यात्।

## १७२१। परिमाणान्तस्यासंज्ञाशाणयोः॥७।३।१७॥

**द्वौ—। द्वौ कुड़वौ प्रयोजनमस्य इति द्वि-कौड़विकः। द्वाभ्याम् सुवर्णाभ्याम् क्रीतम् द्विसौवर्णिकम्। द्वि-नैष्किकम्। असंज्ञेति किम्? पञ्च कपालाः परिमाणमस्य इति पाञ्च-कपालिकम्। तद्धितान्तः संज्ञा। द्वै-शाणम्। कुलिजशब्दमपि केचित् पठन्ति—द्वैकुलिजिकः।**

The first of all the vowels contained by a word expressive of some measure or amount, coming after numerical words takes its Briddhi substitute before a Taddhita suffix that

elides ञ ण or क ; this rule does not hold good with reference to the word शाण as well as in case of proper names or special class-names.

मित—। संख्यावाचकशब्दात् परस्थितस्य परिमाणवाचकस्य शब्दस्य अचां मध्ये आद्यस्य अचो वृद्धिः स्यात् ञिति णिति किति च तद्धितप्रत्यये परे ; शाणशब्दस्य तु एतत् न स्यात्, संज्ञायां विषयेऽपि एतन्न भवति। द्वौ कुड़वौ प्रयोजनमस्य इति ठञ् द्विकौड़विकः। द्वाभ्याम् सुवर्णाभ्याम् क्रीतम् इति ठञ् "तेन क्रीतम्" (५।१।३७) इत्यनेन = द्विसौवर्णिकम्। द्वाभ्याम् निष्काभ्याम् क्रीतम् इति "असमासे निष्कादिभ्यः" (३।१।२०) इत्यनेन द्विनैष्किकम्। अत्र संज्ञायां विषये न स्यात् इति किम् ? पञ्च कपालाः परिमाणमस्य इति ठञ् "तदस्य परिमाणम्" ( ५।१।५० ) इत्यनेन। तेन पाञ्चकपालिकम्। "तद्धितान्तः संज्ञा"—तद्धितान्तश्च अयं समुदायः संज्ञा। पाञ्चकपालिकम् इत्येव संज्ञा इत्यर्थः। द्वाभ्याम् शाणाभ्यां क्रीतम् द्विशाणम्। कुलिजशब्दादपि—द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः। अत्रापि पूर्वपदवृद्धिः। असंज्ञाशाणकुलिजानाम् इति केचित् पठन्ति—अतः कुलिजशब्दे परे सति द्वै-कुलिजिकः इति पूर्व्वपदवृद्धिः।

ननु द्वाभ्याम् सुवर्णाभ्याम् क्रीतम् इत्यत्र विहितस्य ठञः "अध्यर्द्ध—(५।१।२८)" इति सूत्रेण लुक् स्यात् तर्हि कथं द्विसौवर्णिकमिति रूपम् ? उच्यते "विभाषा कार्षापण—" इत्यत्र 'सुवर्ण-शतमानयोरुपसंख्यानम्' इति वचनेन लुक् विकल्प्यते। लुकोऽप्राप्तिपक्षे अयं विधिः, एवं द्वाभ्याम् निष्काभ्याम् क्रीतमित्यत्र "द्वि-त्रि-पूर्व्वात्—" ( ५।१।३० ) इति लुक् विकल्प्यते। किञ्च द्वाभ्याम् शाणाभ्याम् क्रीतम् इति स्थाने तु "द्वित्रिपूर्व्वादण् च" ( ५।१।३६ ) इति लुक् विकल्प्यते, तस्य अप्राप्तिपक्षे तु अण्।

## १७२२। चित्तवति नित्यम् ॥५।१।८८॥

**दी—। वर्षशब्दान्तात् द्विगोः प्रत्ययस्य नित्यं लुक् स्यात् चेतने प्रत्ययार्थे। द्विवर्षो दारकः।**

A suffix attached to the word वर्ष—entering into a द्विगु

compound, in any of the aforesaid five senses, elides—provided a living being is implied.

मित—। चित्तमस्य अस्ति इति चित्तवान्। सचेतनः इत्यर्थः। तस्मिन्, चित्तवति। चित्तवति सचेतने प्राणिनि अभिधेये सति क्रत-द्विगु-समासात् वर्षशब्दात् निर्वृत्तादिषु अर्थेषु विहितस्य प्रत्ययस्य नित्यमेव लुक् स्यात्। "वर्षाल्लुक् च" (५।१।८८) इति सूत्रेण लुकः विकल्पे प्राप्ते अनेन नित्यत्वं विधीयते। द्वे वर्षे भूतः इति विग्रहः दारकः। दारकः=पुत्रः। तथाहि श्रीश्रीगोपालध्याने—"पञ्चवर्षमतिदीप्तम्" इत्यादि। चित्तवति इति किम्? द्वि-वर्षीणो व्याधिः। व्याधेरचेतनत्वात् अत्र प्रत्ययस्य लुक् वैकल्पिकः। अतएव लुकोऽप्राप्तिपक्षे खप्रत्ययोऽपि।

**१७२३। षष्टिकाः षष्टिरात्रेण पच्यन्ते ।।५।१।९०।।**

**दी—। बहुवचनमतन्त्रम्। षष्टिको धान्यविशेषः। तृतीयान्तात् कन् रात्रशब्दलोपश्च निपात्यते।**

The suffix कन् is attached to the word षष्टिरात्र to denote some particular kind of paddy that ripens by sixty nights (षष्टिरात्र), and before the suffix the रात्र portion of षष्टिरात्र elides.

मित—। षष्टिरात्र इति तृतीयासमर्थात् कन्प्रत्ययो भवति पच्यन्ते इति एतस्मिन्नर्थे; प्रत्ययसन्नियोगेन "रात्र" इत्यस्य च लोपः स्यात्। षष्टिरात्रेण पच्यन्ते इति कन्—रात्रांशस्य लोपः—तेन षष्टिकाः धान्यविशेषाः। षष्टिकः इति धान्यविशेषस्य संज्ञा—तेन मुद्गादिषु नास्य प्रसङ्गः।

ननु सूत्रे बहुवचनदर्शनात् षष्टिकशब्दस्य एकवचने प्रयोगो माभूदिति चेत्?—नैवम्। बहुवचनम् अतन्त्रम् अनियामकम्। बहुवचनेन अयं बहुवचने एव प्रयोक्तव्यमिति नियमो न विधीयते—तेन षष्टिको व्रीहिरित्याहुः।

**१७२४। तेन परिजय्यलभ्यकार्यसुकरम् ।।५।१।९३।।**

दी—। मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्य्यं सुकरं वा मासिकम्।

The suffix ठञ is attached to words expressive of time, to imply the thing which is either परिजय्य ( capable of being subdued ), लभ्य ( capable of being gained ), कार्य्य ( fit to be performed ) or सुकर ( easy to be done ) within the said period of time.

मित—। तेन इति तृतीयासमर्थात् कालवाचकशब्दात् परिजय्यं (जेतुम् शक्यं), लभ्यं ( लब्धुं शक्यं ), कार्य्यं ( कर्त्तव्यं ) सुकरम् ( अनायाससाध्यम् ) इति एतेषु अर्थेषु ठञ प्रत्ययः स्यात्। मासेन परिजय्यः जेतुम् शक्यः मासिकः। मासिको व्याधिः—यो व्याधिः मासेन जेतुं शक्यः। एवं सांवत्सरिकः। मासेन लभ्यं मासिकम्। मासिकः पटः। मासेन कार्य्यं मासिकं चान्द्रायणम्। एवं मासेन सुकरं मासिकम्। मासिकः प्रासादः।

१७२५। तदस्य ब्रह्मचर्य्यम् ॥ ५।१।९४॥

दी—। द्वितीयान्तात् कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात्। अत्यन्तसंयोगे द्वितीया। मासं ब्रह्मचर्य्यम् अस्य स मासिको ब्रह्मचारी। आद्यमासिको ब्रह्मचारी। यद्वा प्रथमान्तात् अस्य इत्यर्थे प्रत्ययः। मासोऽस्य इति मासिकं ब्रह्मचर्य्यम्।

The suffix ठञ् is attached to words expressive of any particular divison of time, to denote the person who observed ब्रह्मचर्य्य ( the vow of a ब्रह्मचारी ) for the said period.

मित—। तदिति द्वितीयासमर्थात् कालवाचिनः प्रातिपदिकात् अस्य इति षष्ठ्यर्थे ठञ प्रत्ययः स्यात्, ब्रह्मचर्य्ये गम्यमाने। द्वितीयासमर्थात् इत्यत्र तु द्वितीया अत्यन्तसंयोगे एव, "कालाध्वनोरत्यन्तसंयोगे" (२।३।५) इति सूत्रेण। मासं

( मासं व्याप्य इत्यर्थः ) ब्रह्मचर्य्यम् अस्य इति मासिकः ब्रह्मचारी। मासशब्दात् ठञ्। एवं सांवत्सरिकः ब्रह्मचारी, आर्द्धमासिकः ब्रह्मचारी, [ब्रह्मचर्य्यं हि मुख्यतो वीर्य्यधारणमेव]।

सूत्रस्य अन्योऽर्थः सम्भवति—स च कथ्यते। तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठञ्प्रत्ययो भवति, यत् तत् अस्य इति निर्द्दिष्टं, ब्रह्मचर्य्यं चेत् तद्भवेत्। मासोऽस्य ब्रह्मचर्य्यस्य इति मासिकं ब्रह्मचर्य्यम्। अर्द्धमासोऽस्य ब्रह्मचर्य्यस्य इति आर्द्धमासिकं ब्रह्मचर्य्यम्। एवं सांवत्सरिकं ब्रह्मचर्य्यम्।

ननु सूत्रस्य यत् अर्थद्वयं सम्भवति, तयोरर्थयोः को भेद इति चेत् उच्यते। पूर्वम् प्रतिपादितो योऽर्थस्तत्र प्रत्ययस्य अर्थः स्यात् ब्रह्मचारी। मासिकः ब्रह्मचारी। पश्चात् प्रतिपादितो योऽर्थस्तत्र प्रत्ययस्य अर्थः स्यात् ब्रह्मचर्य्यं—मासिकं ब्रह्मचर्य्यम्।

**टी—। महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्यः उपसंख्यानम्। (वा)॥ महानाम्न्यो नाम विदामघवन्नित्याद्याः ऋचः। तासां ब्रह्मचर्य्यमस्य माहानाम्निकः। हरदत्तस्तु भस्याढ—इति पुंवद्भावान्महानामिक इत्याह।**

The suffix ठञ् is attached to the word महानाम्नी to denote the person, that practises the vow—connected with the hymn महानाम्नी।

मित—। "तासां ब्रह्मचर्य्यम् अस्य माहानाम्निकः"। महानाम्न्यः ऋचः, तत्—सहचरितं व्रतमपि महानाम्न्यः इति संज्ञां भजते। ताः महानाम्नीः चरति इति ठञ्, माहानाम्निकः। अतएव वाक्येन तासां ब्रह्मचर्य्यम् अस्य इत्येवार्थः प्रतीयते। हरदत्तः—काशिकावृत्त्यां पदमञ्जरीतिविवृतिर्दृश्यते तस्याः प्रणेता। स तु अत्र भस्याढे इति वार्त्तिकसूत्रेण (६।३।२५ वार्त्तिक) पुंवद्भावं स्वीकरोति तेन अत्र महानामिक इति पदम्। 'महानाम्न्यादयः—महानाम्नी, आदित्यव्रत, गोदान इत्यादि। आदित्यव्रतं चरति इति आदित्यव्रतिकः, गोदानं चरति इति गौदानिकः।

हरदत्तमते महानामिकः इत्यत्र भस्याढे इति पुंवद्भावप्राप्तौ ङीप्प्रत्ययो निवर्त्तते, ततः "नस्तद्धिते" (६।४।१४४) इति टिलोपः। [अपिच—अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः। अवान्तरदीक्षा तिलव्रत—एतेभ्यः पूर्वार्थे डिनिप्रत्ययः स्यात्। अवान्तरदीक्षां चरति इति डिनिः—अवान्तरदीक्षी। तिलव्रती, देवव्रती। डिनि इत्यत्र इकारः टिलोपार्थः। "किञ्च—अष्टचत्वारिंशतो ड्वुन् डिनिश्च वक्तव्यः। अष्टचत्वारिंशत् वर्षाणि व्रतं चरति इति ड्वुन् अष्टचत्वारिंशकः। डिनि—अष्टचत्वारिंशी विप्रः। विप्रः प्रतिवेदं द्वादशवर्षाणि व्रतं चरन् अष्टचत्वारिंशकः, अष्टचत्वारिंशी वा उच्यते। अन्यच्च—चातुर्मास्यानां यलोपश्च ड्वुन् डिनिश्च वक्तव्यः। चातुर्मास्यानि व्रतानि चरति इति ड्वुन् यलोपश्च चातुर्मासकः। डिनि यलोपश्च—चातुर्मासी।]

**दी—। चतुर्मासाण्ण्यो यज्ञे तत्रभव इत्यर्थे। (वा)। चतुर्षु मासेषु भवति चातुर्मास्यानि यज्ञकर्म्माणि।**

The suffix ण्य is added to the word चतुर्मास, to imply some sacrifice that lasts for four months.

मित—। चतुर्मास इति प्रातिपदिकात् सप्तमीसमर्थात् भवः इति एतस्मिन् विषये ण्यः प्रत्ययः स्यात् यज्ञे गम्यमाने। चतुर्षु मासेषु भवति इति चातुर्मास्यं यज्ञकर्म्म। चातुर्मास्यानि यज्ञकर्म्माणि। अत्र ण्यप्रत्ययः।

**दी—। संज्ञायामण्॥ चतुर्षु मासेषु भवति चातुर्मासी। पौर्णमासी। अण्णन्तत्वात् ङीप्।**

The suffix अण् is added to the words expressive of any division of time, to denote the name of a particular kind of sacrifice, that lasts for the said period.

मित—। कालवाचिनः प्रातिपदिकात् सप्तमीसमर्थात् भवः इति एतस्मिन्नर्थे अण् प्रत्ययः स्यात् यज्ञे गम्यमाने संज्ञायां विषये। चतुर्षु मासेषु भवति इति चातुर्मासी व्रतविशेषः। एवं पौर्णमासी, आषाढ़ी, कार्त्तिकी, फाल्गुनी,।

सर्वा: व्रतविशेषस्य संज्ञा । सर्व्वत्र च अण् प्रत्ययान्तत्वात् "टिड्ढाणञ्—" (४।१।१५) इति स्त्रियां ङीप् ।

**१७२६ । तस्य च दक्षिणा यज्ञाख्येभ्यः ॥ ५।१।९५ ॥**

**दी— । द्वादशाहस्य दक्षिणा द्वादशाहिकी । आख्या-ग्रहणादकालादपि । आग्निष्टोमिकी । वाजपेयिकी ।**

The suffix ठञ is added to the words, expressive of some sacrifice, to denote the दक्षिणा ( gift or remuneration ) of the said sacrifice.

मित— । तस्य इति षष्ठीसमर्थात् "यज्ञाख्येभ्यः" यज्ञविशेषवाचिनः, यज्ञनामाभिधायिनः इति यावत्, ठञ् प्रत्ययः स्यात् दक्षिणा इति एतस्मिन्नर्थे, द्वादशाहस्य दक्षिणा द्वादशाहिकी ।

ननु कालाधिकारमध्ये पठितत्वात् किम् कालविशेषव्यापित्वात् कालविशेषनाम्ना प्रसिद्धस्य यज्ञस्य अत्र ग्रहणम् उत सर्व्वेषाम् एव यज्ञानाम् अविशेषेण ? समाधत्ते— "आख्याग्रहणादिति" । "आख्या ग्रहणात्" सूत्रे यज्ञाख्येभ्यः इति आख्याशब्दस्य प्रयोगदर्शनात्, "अकालादपि" काल-विशेषनाम्नाप्रसिद्धात् यज्ञात् तथा तस्मात् इतरादपि यज्ञात् प्रत्ययः इष्टः, तेन अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी । वाजपेयिकी ।

**१७२७ । तत्र चदीयते कार्य्यं भववत् ॥ ५।१।९६ ॥**

**दी— । प्रावृषि दीयते कार्य्यं वा प्रावृषेण्यम् । शारदम् ॥**

Suffixes that are added to words in the sense of "तत्रभवः", are also to be attached to words expressing time in the sense of तत्र दीयते given or offered therien, or तत्र कार्य्यम्—fit to be performed therein.

मित— । तत्र इति सप्तमीसमर्थेभ्यः प्रातिपदिकेभ्यः कालवाचिभ्यः दीयते इति अर्थे कार्य्यम् इति अर्थे च "भववत्" तत्रभव इत्यर्थे यादृशाः प्रत्ययाः विहिताः

तादृशा एव प्रत्यया: भवन्ति । प्रावृषि दीयते, प्रावृषि कार्य्यं वा प्रावृषेण्यम् । "प्रावृष एण्यः" ( ४।३।१७ ) इति एण्यः । शरदि भव: इति शारदम्—अण्प्रत्यय: । अतएव शरदि दीयते, शरदि कार्य्यं वा इति अण् शारदम् । एवं मासिकम् । सांवत्सरिकम् ; वासन्तिकम्—वासन्तम् । हैमन्तिकं हैमनम् इत्यादयोपि ज्ञेया: ।

[काशिकाकार: अत्र योगविभागं स्वीकरोति । तथाहि तत्र च दीयते इत्येकोऽंश: । तत्र दीयते इत्यर्थे यज्ञाख्येभ्य: ठञ् स्यात् तेन अग्निष्टोमे दीयते—इति आग्निष्टोमिकं भक्तम् । राजसूये दीयते इति राजसूयिकम् ! वाजपेये दीयते इति वाजपेयिकम् । तत्रचदीयते इति प्रथमांशे यज्ञाख्येभ्य: इति पूर्व्वसूत्रानुवृत्तम् तेन ईदृशोऽर्थ: । एवं "कार्य्यं भववत्" इति सूत्रस्य द्वितीयांश: । अत्र च दीयते इति अनुवृत्तम् । अतएव 'तत्र च दीयते कार्य्यं भववत्" इत्यस्य योऽर्थ: प्राक् उक्त: स एव द्वितीयांशस्य अर्थ: ] ।

इति कालाधिकारस्य पूर्णोऽवधि: ॥

## १७२८ । व्युष्टादिभ्योऽण् ॥ ५।१।९७ ॥

**दी—। व्युष्टे दीयते कार्य्यंवा वैयुष्टम् । व्युष्ट, तीर्थ, संग्राम, प्रवास इत्यादि ।**

The suffix अण् is added to the word व्युष्ट and others coming under the व्युष्टादि class in the sense of तत्र दीयते or तत्र कार्य्यम् ।

मित—। तत्रेति सप्तमीसमर्थेभ्य: दीयते कार्य्यं इति अर्थे अण् स्यात् । व्युष्टं सूर्य्योदयकाल: । तत्र दीयते कार्य्यं वा इति अण् वैयुष्टम् । अत्र "न य्वाभ्याम्—" ( ७।३।३ ) इति ऐजागम: । नित्यं दीयते कार्य्यं वा नैत्यम् । व्युष्टादिर्यथा—व्युष्ट, तीर्थ, संग्राम, प्रवास निष्क्रमण, प्रवेशन, संभ्रम, आस्तरण, संघात, अग्निपद, पीलुमूल, उपसंक्रमण, उपवास ।

## १७२८ । तेन यथाकथाच-हस्ताभ्याम् णयतौ ॥ ५।१।९८ ॥

**दी—। यथाकथाचेत्यव्ययसंघातात्तृतीयान्तात् हस्तशब्दाच**

यथासंख्यं णयतौस्तः । अर्थाभ्याम् तु यथासंख्यं नेष्यते । यथाकथाच दीयते कार्यं वा याथाकथाचम् । अनादरेण देयं कार्यं वेत्यर्थः । हस्तेन दीयते कार्यं वा हस्त्यम् ।

The suffix ण as well as the suffix यत् are attached respectively to the words यथाकथाच and हस्त in the aforesaid sense. See Tika also.

मित— । तेन इति तृतीयासमर्थाभ्याम् यथाकथाच हस्त इति प्रातिपदिकाभ्याम् यथासंख्यं ण यत् इति स्यात् दीयते कार्यम् इति एतयोरर्थयोः । "अर्थाभ्याम् तु"—इत्यादि । दीयते कार्यम् इति अर्थयोस्तु यथासंख्यत्वं नास्ति तेन दीयते कार्यम् इति एतयोरर्थयोः प्रत्येकम् अभिसम्बन्धः । "यथाकथाच इति अव्ययसमुदायोऽनादरार्थकः" इति भाषावृत्तिः । यथाकथाच इत्यत्र तृतीयाविभक्त्यर्थमात्रम् नतु तृतीयासमर्थविभक्तिः—अव्ययत्वात् अस्मात् विभक्तिलुप्ता । यथाकथाच दीयते कार्यं वा इति ण—याथाकथाचम् । हस्तेन दीयते कार्यं वा हस्त्यम् ।

१७२८ । संपादिनि ॥ ५।१।९९ ॥

टी— । ठञ् । तेनेत्येव । कर्णवेष्टकाभ्याम् संपादि कार्णवेष्टकिकं मुखम् । कर्णालङ्काराभ्याम् अवश्यं शोभते इत्यर्थः ।

The suffix ठञ् ( according to some ष्ठञ् also ) is attached to words which goes to adorn or decorate other things.

मित— । तेन इत्येव । तेन इति तृतीयासमर्थात् संपादिनि अभिधेये सति ठञ् प्रत्ययः स्यात् । "गुणोत्कर्षः सम्पत्तिः । आवश्यकेणिनिः"—इति काशिका । अतएव सम्पादिनि इत्यस्य शोभिनि इत्येव अर्थः । कर्णवेष्टकाभ्याम् सम्पादि इति ठञ्—कार्णवेष्टकिकं मुखम् । यन्मुखं कर्णालङ्काराभ्याम् अवश्यं शोभते तत्

कार्णवेष्टकिकम् । एवं वस्त्रयुगाभ्याम् सम्पादि ( शोभि ) इति वास्त्रयुगिकं शरीरम् । "चन्दनेन सम्पादि शोभि इति चान्दनिकम् वपुश्चान्दनिकं यस्य कार्णवेष्टकिकं मुखं"—इति भाषावृत्तिकारः ।

**१७२० । कर्मवेषाद्यत् ॥५।१।१००॥**

**दी— । कर्मणा सम्पादि कर्मण्यं शौर्यम् । वेषेण सम्पादि वेष्यो नटः । वेषः कृत्रिमाकारः ।**

In the aforesaid sense, the suffix यत् is attached to the words कर्म and वेष ।

मित— । तृतीयासमर्थाभ्याम् कर्म वेष इति एताभ्याम् संपादिनि इति एतस्मिन् अर्थे ठञ्—प्रत्ययापवादः यत्प्रत्ययः स्यात् । कर्मणा संपादि कर्मण्यं शौर्यम् । कर्मण्यं शरीरम् । वेषेण सम्पादि वेष्यः नटः । वेषः कृत्रिमाकारः ; अभिनयोपयोगि वस्त्रादिकम् । तथाहि साहित्यदर्पणे "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः—आङ्गिकः वाचिकश्चैवमाहार्यः सात्विकः । आहार्यः अवस्थानुकारः वेषरचनादि" । [अत्र वेष इति स्थाने वेश इति भाषावृत्तिः । तत्र "वेश्या स्त्री, वेश्यं वपुः" इति दृश्यते] ।

**१७२१ । तस्मै प्रभवति सन्तापादिभ्यः ॥ ५।१।१०१ ॥**

**दी— । सन्तापाय प्रभवति सान्तापिकः । सांग्रामिकः ।**

The affix ठञ् is attached to words, passing by the term सन्तापादि, to denote the object that is able to cause सन्ताप ( oppression, pressure, torture ) or anything implied by the said words.

मित— । तस्मै इति चतुर्थीसमर्थेभ्यः सन्ताप इति एवमादिभ्यः प्रातिपदिकेभ्यः प्रभवति इति एतस्मिन् विषये ठञ् प्रत्ययः स्यात् । प्रभवति समर्थो भवति, शक्तः स्यात् । उभयार्थे चतुर्थी, "नमः स्वस्ति—" ( २।३।१६ ) इति सूत्रेण । सन्तापाय प्रभवति

सान्तापिकः। संग्रामाय प्रभवति सांग्रामिकः। सन्तापादि र्यथा—सन्ताप, संग्राम, सनाह, संयोग, संपराय, संपेष, निसर्ग, असर्ग, विसर्ग, उपवास, प्रवास, संघात, संमोदन सक्तु, मांस, ओदन, मांसौदन, सवेशन, निष्पेष, सर्ग, उपसर्ग, सेवास। सक्तवे प्रभवति शाक्तुकः। मांसाय प्रभवति मांसिक, ओदनाय प्रभवति औदनिकः। मांसौदनाय प्रभवति मांसौदनिकः।

१७३२। योगाद्यच्च ॥ ५।१।१०२ ॥

टी—। चाट् ठञ्। योगाय प्रभवति योग्यः, यौगिकः।

The suffix ठञ् as well as the suffix यत is attached to the योग, to denote the person who is fit for the same.

मित—। योगः संयोगः। यथा—योगः कर्म्मसुकौशलम् इति श्रीमद्भगवद्गीता, यद्वा—योगश्चित्तवृत्तिनिरोध इति पतञ्जलिः, 'संयोगविप्रयोगो योगः'—इत्यपरान्यत्र। योगाय प्रभवति इति विषये योगशब्दात् यत्प्रत्ययः, सूत्रस्थचकारबलात् ठञ्-प्रत्ययश्च; यत्—योग्यः; ठञ् यौगिकः।

१७३३। कर्मण उकञ् ॥ ५।१।१०३ ॥

टी—। कर्मणे प्रभवति कार्मुकम्।

In the aforesaid sense, the suffix उकञ् is attached to the word कर्मन्।

मित—। तस्मै प्रभवतीति अर्थे कर्मशब्दात् उकञ्प्रत्ययो भवेत्। ठञोऽपवादः। कर्मणे प्रभवति इति कार्मुकम्, कार्मुकं धनुः। "धनुषोऽन्यत्र न भवति—अनभिधानात्"—इति काशिका।

१७३४। समयस्तदस्य प्राप्तम् ॥ ५।१।१०४ ॥

टी—। समयः प्राप्तोऽस्य सामयिकम्।

The suffix ठञ् is attached to the word समय, to denote the thing, with reference to which, time is come or time is ripe.

मित—। समय इति प्रातिपदिकात् तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठञ्प्रत्ययः स्यात्, यत्खलु प्रथमासमर्थं तत् प्राप्तम् चेद् भवति। अत्र समय एव प्रथमासमर्थः अतः समय एव प्राप्तः इति एतस्मिन्नर्थे एव प्रत्ययः इष्टः। समयः प्राप्तः अस्य इति सामयिकम्। सामयिकम् कार्य्यम्—उपनतकालमित्यर्थः। ["किम् असामयिकं वितन्वता" इति भारविः]।

ननु समय इति प्रथमान्त एव सूत्रे दृश्यते। तर्हि—"तत्" इति प्रथमासमर्थ-विभक्तेः कथं पुनरुल्लेखः? उच्यते। परस्मिंतेषु सूत्रेषु अपि प्रथमासमर्थ-विभक्तिरनुवर्त्तते इति ज्ञापयितुमेव। "तदस्य" इत्यस्य अनुवृत्तिस्तु "तेन तुल्यं क्रिया चेद्वतिः" (५।१।११५) इति सूत्रात् प्राक् प्रवर्त्तते।

१७३५। ऋतोरण्॥ ५।१।१०५॥

दी—। ऋतुः प्राप्तोऽस्य इति आर्तवम्।

The suffix अण् is attached to the word ऋतु in the aforesaid sense.

मित—। तदस्य प्राप्तमिति अनुवर्त्तते। तदिति प्रथमासमर्थात् ऋतुशब्दात् अस्य इति षष्ठ्यर्थे अण्प्रत्ययः स्यात् "तदस्य प्राप्त"मिति एतस्मिन् विषये। ऋतुः प्राप्तोऽस्य आर्त्तवं पुष्पम्। आर्त्तवं फलम्॥ उपवस्त्रादिभ्योऽपि अत्रार्थे अण् स्यात् इति अन्यत्र।

१७३६। कालाद्यत्॥ ५।१।१०७॥

दी—। कालः प्राप्तोऽस्य इति काल्यं शीतम्।

In the aforesaid sense, the suffix यत् is attached to the word काल।

मित—। तदस्य प्राप्तमिति विषये कालशब्दात् यत स्यात्। कालः प्राप्तोऽस्य इति काल्यं शीतम्। काल्यं वस्त्रम्। कालः प्राप्तोऽस्याः काल्यागौः प्रजने।

१७३७। प्रकृष्टे ठञ्॥ ५।१।१०८॥

दी—। कालाट्ठञिति तदस्येति च। प्रकृष्टो दीर्घः कालोऽस्येति कालिकं वैरम्।

The suffix ठञ् is attached to the word काल to denote the thing, for which there is high time.

मित—। प्राप्तमिति नानुवृत्तम्। प्रकृष्टे प्रकर्षं गते काले इत्यर्थः। प्रकर्षं गतात् कालात् प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठञ्प्रत्ययो भवेत्। सूत्रे ठञ्-ग्रहणं विस्पष्टार्थमेव। प्रकृष्टः दीर्घः कालोऽस्य कालिकम् वैरम्। कालिकम् ऋणम्।

१७३८। प्रयोजनम्॥ ५।१।१०९॥

दी—। तदस्येत्येव। इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम्। प्रयोजनं फलं कारणं च।

The suffix ठञ् is attached to the words to imply things which stand in need of the object denoted by the said words.

मित—। तदिति प्रथमासमर्थात् अस्य इति षष्ठ्यर्थे ठञ्प्रत्ययःस्यात्; यत् खलु प्रथमासमर्थं तच्चेत् प्रयोजनं भवेत्। प्रयोजनम् इत्यस्य कोऽर्थः? प्रयोजनं फलं (कार्यं) कारणं च। इन्द्रमहः प्रयोजनमस्य इति ऐन्द्रमहिकम्। गङ्गामहः प्रयोजनम् अस्य इति गाङ्गामाहिकम्। उत्सवः प्रयोजनम् अस्य इति औत्सविकम्।

१७३९। विशाखाषाढादण्मन्थदण्डयोः॥ ५।१।११०॥

दी—। आभ्याम् अण् स्यात् प्रयोजनमित्यर्थे क्रमान्मन्थ-दण्डयोरर्थयोः। विशाखा प्रयोजनम् अस्य वैशाखो मन्थः। आषाढो दण्डः।

The suffix अण is attched to the words विशाखा and आषाढ

to respectively denote मन्थ ( churning ) and दण्ड ( stick ), that require the need of the said things viz विशाखा and आषाढ़ ।

मित—। तदस्य प्रयोजनम् इति एतस्मिन् विषये विशाखा आषाढ़ इति एताभ्याम् अण्प्रत्ययः स्यात्, मन्थे दण्डे च यथासंख्यं गम्यमाने। विशाखा प्रयोजनम् अस्य इति वैशाखः मन्थः। तथाहि "द्रुततरकरदक्षाः क्षिप्रवैशाखशैले"। आषढ़ः प्रयोजनमस्य इति आषाढ़ो दण्डः। [ "आषाढ़ः पलाशदण्डः" ]। तथाहि कुमारसम्भवे—"अथाजिनाषाढ़-धरः प्रगल्भवागिति"। यद्वा—"पूर्व्वाषाढ़ायां यतिभिर्द्दण्डो गृह्यते इति प्रयोजनम्"—इति भाषावृत्तिटीकायां सृष्टिधरः॥

**दी—। चूड़ादिभ्य उपसंख्यानम्॥ चूड़ा—चौड़म्। श्रद्धा—श्राद्धम्।**

मित—। चूड़ा इत्येवमादिभ्यः तदस्य प्रयोजनम् इत्यर्थे अण्प्रत्ययः स्यात्। चूड़ा प्रयोजनम् अस्य इति चौड़म्। श्रद्धा प्रयोजनमस्य इति श्राद्धम्। खट्वा प्रयोजनमस्य इति खाट्वः।

**१७४०। अनुप्रवचनादिभ्यश्छः॥ ५।१।१११॥**

**दी—। अनुप्रवचनम् प्रयोजनम् अस्य अनुप्रवचनीयम्।**

In the aforesaid sense, the suffix छ is attached to the words that pass by the term अनुप्रवचनादि ।

मित—। तदस्य प्रयोजनम् इति एवमर्थे अनुप्रवचन इत्यादिभ्यश्छप्रत्ययःस्यात्। ठञोऽपवादः। अनुप्रवचनम् प्रयोजनम् अस्य इति अनुप्रवचनीयम्। अनुप्रयोजनम् प्रयोजनमस्य अनुप्रयोजनीयम्। उत्थापनं प्रयोजनम् अस्य उत्थापनीयम्। अनुप्रवचनादिर्यथा—अनुप्रवचन, उत्थापन, अनुप्रयोजन, अनुप्रवेशन, प्रवेशन, संवेशन, अनुवेशन, अनुवचन, अनुवादन, अनुवासन, आरम्भण, आरोहण, अन्वारोहण, प्ररोहण। आकृतिगणोऽयम्॥ [ अपिच—

(१) पुण्याहवाचनादिभ्यो लुग् वक्तव्यः। विहितस्य प्रत्ययस्य लुक् स्यात्।

पुण्याहवाचनम् प्रयोजनम् अस्य इति पुण्याहवाचनम् कर्म। स्वस्तिवाचनम्। शान्तिवाचनम्।

(२) स्वर्गादिभ्यो यत्। एभ्यो यत् स्यात् पूर्व्वोक्ते विषये। स्वर्गः प्रयोजनम् अस्य स्वर्ग्यः। एवं यशस्यः, आयुष्यः, धन्यः, काम्यः। तथाहि श्रीमद्भागवते दशमस्कन्धे रासलीलायाम् "अस्वर्ग्यमयशस्यं फल्गु कृच्छ्रं भयावहम्। जुगुप्सितञ्च सर्व्वत्र ह्यौपपत्यं कुलस्त्रियाः"।

(३) विशिपुरिपदिरुहिप्रकृतेरनात्सपूर्व्वपदात्उपसंख्यानम्। सपूर्व्वपदात् पूर्व्वपदसनाथात् अनन्तात् "अन्" इति अन्तं गृहीत्वा वर्त्तमानात् विशि पूरि पदि रुहि इति धातुभ्यः निष्पन्नात् प्रातिपदिकात् तदस्य प्रयोजनम् इति विषये छः स्यात्। विशि—गेहानुप्रवेशनीयम्। पूरि-प्रपापूरणीयम्। प्रपा = प्रणाली। पदि-अश्वप्रपदनीयम्। गो-प्रपदनीयम्। रुहि अश्वारोहणीयम्। प्रासादारोहणीयम्। पादे स्थाने पति इति काशिका—अश्वप्रपतनीयम्। ]।

## १७४१। समापनात् सपूर्व्वात् ॥५।१।११२॥

**टी—। व्याकरणसमापनम् प्रयोजनम् अस्य इति व्याकरणसमापनीयम्।**

In the aforesaid sense, the suffix छ is affixed to the word समापन preceded by some other word.

मित—। तदस्य प्रयोजनम् इति एतस्मिन् विषये विद्यमानपूर्व्वपदात् समापनशब्दात् छ प्रत्ययोभवति। ठञोऽपवादः। व्याकरणसमापनम् प्रयोजनम् अस्य इति व्याकरणसमापनीयम्। छन्दःसमापनं प्रयोजनम् अस्य इति छन्दःसमापनीयम्। एवं व्रतसमापनम् प्रयोजनम् अस्य इति व्रतसमापनीयम् भोजनम्। कलहसमापनीयम् दानम्।

ननु सूत्रे "सपूर्व्वात्" इत्यनेनैव इष्टसिद्धौ कथं सपूर्व्वपदात् इति निर्द्देशः? उच्यते अनेन बहुच्प्रत्ययविशिष्टस्य समापनस्य अग्रहणं ज्ञाप्यते। ईषत्समापनम् इति बहुच्प्रत्ययः बहुसमापनम्। तस्मात्प्रत्ययो न स्यात् बहु इतास्य पदत्वाभावात्।

१७४२। ऐकागारिकट् चौरे ॥ ५।१।११३ ॥

**टी—। एकम् असहायम् अगारम् प्रयोजनम् अस्य मुमुषिषोः स ऐकागारिकश्चौरः।**

The word ऐकागारिकट् ( ऐकागारिकः ) is irregularly formed with the suffix ठञ् being attached to the word एकागार to denote a thief thereby.

मित—। मुमुषिषोः—मोषितुम् चोरयितुम् इच्छोः। चौरे अभिधेये सति, एकम् असहायम् अगारं प्रयोजनम् अस्य मुमुषिषोः चोरयितुम् इच्छोः इति एकागारशब्दात् ठञ् स्यात्; विहिते प्रत्यये ऐकागारिकट् इति पदं निपातनेन सिध्यति। ऐकागारिकः चौरः। टकारान्तत्वं स्त्रियां ङीप् इति द्योतयति तेन ऐकागारिकी।

१७४३। आकालिकडाद्यन्तवचने ॥ ५।१।११४ ॥

**टी—। समानकालावाद्यन्तौ यस्य इत्याकालिकः। समानकालस्य आकाल-आदेशः आशुविनाशीत्यर्थः। पूर्व्वं दिने मध्याह्नादौ उत्पद्य दिनान्तरे तत्रैव नश्वर इति वा।**

The suffix इकट् is attached to the word आकाल—a substitute for the word समानकाल, to frame irregularly the word आकालिकट ( आकालिक ), provided it denotes some thing which has got आकाल—i. e. समानकाल ( same time or little time ) in the beginning as well as in the end.

मित—। समानकालौ आद्यन्तौ यस्य स इति वाक्ये समानकालशब्दस्थाने आकाल इति आदेशः स्यात्, तस्मात् च इकट् इति प्रत्ययःस्यात्—तेन आकालिकट् इति ( निपातनेन ) सिध्यति। समानः तुल्य एव कालः यस्य स समानकालः। समानकालौ आद्यन्तौ यस्य स आकालिकट् आकालिकः इत्येव रूपम्—टकारान्तत्वात् स्त्रियां ङीप्। आकालिकः आशुविनाशी। यदैव जन्म तदैव लयः यस्य स आकालिकः। आकालिकी विद्युत्। "जन्मनातुल्यकालविनाशा"।

उत्पत्त्यनन्तरं विनाशिनी इत्यर्थः—इति काशिका। भाषावृत्तिकृन्मते तु "सोक-कालयोराद्यन्तयोर्वचनेऽयं निपात्यते। आकालिको मेघः" इति। कुमारसम्भवे च "आकालिकीं वीक्ष्य मधुप्रवृत्तिम्"। इममेव अर्थं मनसिकृत्य श्रीमता दीक्षितेन "पूर्व्वे दिने" इत्यादि उक्तम्। अतएव आकालिकः इत्यस्य अर्थस्तु सद्योविनाशी अल्प-कालस्थायी वा।

**दी—। आकालाट् ठंश्च॥ आकालिका विद्युत्।**

The suffix ठन् is as well added to the word आकाल।

मित—। अकाल इत्यस्मात् ठन् च स्यात्। आकालिका विद्युत्।

ठञः पूर्णोऽवधिः॥

## १७४४। तेन तुल्यं क्रिया चेद्वतिः॥ ५।१।११५॥

**दी—। ब्राह्मणेन तुल्यं ब्राह्मणवदधीते। क्रियाचेदिति किम्? गुणतुल्ये माभूत्। पुत्रेण तुल्यः स्थूलः।**

The suffix वति is attached to words, to imply some action that is equal with that of the object, expressed by the said words.

मित—। तेनेति तृतीयासमर्थात् तुल्यमिति एतस्मिन्नर्थे वतिप्रत्ययः स्यात्, यत् खलु तुल्यं सा चेत् क्रिया एव भवति। ब्राह्मणेन तुल्यम् अधीते क्षत्रियः इति वाक्ये ब्राह्मणवत् अधीते क्षत्रियः। अत्र ब्राह्मणेन इति तृतीयासमर्थात् वति-प्रत्ययः, अध्ययनक्रियायां तुल्यायां सत्याम्। क्षत्रियस्य यदध्ययनं तत्तु ब्राह्मणस्य अध्ययनेन एव तुल्यम्! "क्रियायाः तुल्यत्वं क्रियया एव सम्भवति" इति भाषावृत्तिः। ब्राह्मणवत् अधीते क्षत्रियः इत्यत्र ब्राह्मणकर्तृका या अध्ययन-क्रिया, सा तु ब्राह्मणे एव वर्त्तते—अतएव ब्राह्मणशब्दात् एव वतिप्रत्ययः। एवं पुत्रं मित्रवदाचरेत् इत्यत्र यथा मित्रेण तुल्यं पुत्रम् आचरेत् इति वाक्ये आचरणक्रियायास्तुल्यत्वम्। मित्रे यादृशम् आचरणम् कर्त्तव्यं पुत्रे अपि तादृशम् इत्येव अर्थः। मित्रकर्मका

या आचरणक्रिया सा पुत्रेऽपि प्रयोक्तव्या इति भावः। अतएव मित्रशब्दात् वतिः। एवं गुरुवत् गुरुपुत्रेषु प्रवर्त्तितव्यम्। गुरुणातुल्यं गुरुपुत्रेषु प्रवर्त्तितव्यम् इति भावः, गुर्व्वधिकरणका या प्रवर्त्तनक्रिया सा गुरुपुत्रेषु अपि आचरणीया इति गुरुशब्दात् वतिः। सूत्रे "क्रिया" इति कथं गृह्यते ? उच्यते क्रियासाम्ये एव प्रत्ययः स्यात्—तेन गुणसाम्ये, द्रव्यसाम्ये वा अयं न। गुणसाम्ये—पुत्रेण तुल्यः स्थूलः, पुत्रेण सह पिङ्गलः, अत्र स्थूलगुणसाम्ये पिङ्गलगुणसाम्ये च प्रत्ययो नेष्टः, द्रव्यसाम्ये यथा—पुत्रेण तुल्यो गोमान् अत्र गो इति द्रव्यस्य साम्ये सति प्रत्ययो नेष्टः।

**१७४५। तत्र तस्येव ॥ ५।१।११६ ॥**

**टी—। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवत् मैत्रस्य गावः।**

The suffix वति is attached to words expressive of some objects in which or of which, something bears comparison with another thing.

मित—। तत्र इति सप्तमीसमर्थात्, तथा तस्य इति षष्ठीसमर्थात् च प्रातिपदिकात् "इव" इति एतस्मिन्नर्थे (तुल्यार्थे इत्यर्थः) वतिप्रत्ययः स्यात्। मथुरायाम् इव स्रुघ्ने प्राकारः मथुरावत् स्रुघ्ने प्राकारः। पाटलिपुत्रे इव साकेते परिखा, पाटलिपुत्रवत् साकेते परिखा। चैत्रस्य इव मैत्रस्य गावः चैत्रवत् मैत्रस्य गावः। देवदत्तस्य इव यज्ञदत्तस्य दन्ताः शुक्लाः = देवदत्तवत् यज्ञदत्तस्य दन्ताः शुक्लाः।

**१७४६। तदर्हम् ॥ ५।१।११७ ॥**

**टी—। विधिमर्हति विधिवत् पूज्यते। क्रियाग्रहणम् मण्डूकप्लुत्या अनुवर्त्तते। तेनेह न राजानमर्हति छत्रम्।**

The suffix वति is added to words—to imply the same action (or something), that deserves the objects—denoted by the said words.

मित—। अर्हतीति अर्हम्। पचाद्यच्। योग्यम् इत्यर्थः। तदिति द्वितीया-समर्थात् "अर्हम्" इति एतस्मिन्नर्थे वतिप्रत्ययः स्यात्। यत् अर्हम् सा चेत् क्रिया एव। विधिम् अर्हति इति विधिवत् पूज्यते। "तेन तुल्यम्—"(५।१।११५) इत्यादि सूत्रात् अत्र सूत्रे मण्डूकप्लुतिन्यायेन क्रिया इति अनुवर्त्तते। तेन राजानम् अर्हति छत्रम् अत्र क्रियायाः अर्हत्वाभावात् नप्रत्ययः। काशिकाभाषावृत्तिकारौ एतत् न स्वीकुरुतः। तेन राजानम् अर्हति इति राजवत् पालनम् तथा राजानम् अर्हति इति राजवत् वृत्तम्, मुनिवत् चरितम्, ऋषिवत्, चत्रियवत् इत्यादि तन्मते स्यात्। विशिष्यस्य अपि अर्हत्वे प्रत्ययःस्यात् इति तयोराशयः। विप्रम् अर्हति दधीत्यत्र न स्यात्—अनभिधानादिति भाषावृत्तिकारः।

**१७४७। तस्य भावस्त्वतलौ ॥ ५।१।११८ ॥**

**दी—। प्रकृतिजन्यबोधे प्रकारः भावः। गोर्भावो गोत्वम्। गोता। त्वान्तं क्लीवं तलन्तं स्त्रियाम्।**

The two suffixes त्व as well as तल are attached to words to imply the भाव i. e. nature or identity of the objects, expressed by the said words.

मित—। भवतः अभिधानप्रत्ययौ अस्मात् इति भावः—इति काशिकाभाषा-वृत्तिकारौ। अभिधानं संज्ञा—प्रत्ययश्चबोधः। शब्दप्रवृत्तिनिमित्तं जात्यादिवस्तु-धर्म्मः भावशब्देन कथ्यते। अतएव उक्तं दीक्षितेन—'प्रकृतिजन्यबोधे प्रकारः भावः'। प्रकृतिर्वस्तुभावः। तज्जन्योयोबोधस्तत्र यः प्रकारः स एव भावः। भावः वस्तुनः असाधारणो धर्म्म इति सरलार्थः। प्रकारः विशेषणम्। प्रकारता—विशेषणता। प्रकार इति नैयायिकानां संज्ञाविशेषः। प्रकृतिजन्यबोधे वस्तुनः स्वरूपबोधे, वस्तुनः स्वधर्म्मबोधे च य प्रकारः यत् विशेषणम्—य खलुः तत् वस्तु विशेषयति इत्यरेभ्यो व्यावर्त्तयति पृथक्करोति इति यावत्—स एव भावः। अतएव वस्तुनो यो हि असाधारणधर्म्मः व्यावर्त्तकधर्म्मो वा स एव भाव इति फलितार्थः। यथा गौः इत्यस्य स्वरूपबोधे स्वधर्म्मबोधे च गोत्वं ( गोता वा ) इति तस्य असाधारणः धर्म्मः। स एव

भावः। गोत्वं हि गावं इतरेभ्यो व्यावर्त्तयति— नहि गोरन्यत्र गोत्वं विद्यते। भावस्तु असाधारणधर्म्मः, व्यावर्त्तकधर्म्मः, अवच्छेदक इत्यपि कथ्यते प्राज्ञैः। तस्य इति षष्ठीसमर्थात् भाव इति एतस्मिन्नर्थे त्व तल् इति प्रत्ययौ स्तः। गोः भावः गोत्वम्। त्वप्रत्ययान्ताः शब्दाः क्लीवे एव प्रयुज्यन्ते। गोः भावः गोता, तल्प्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे एव प्रयुज्यन्ते। अश्वस्यभावः अश्वत्वं अश्वता। शुक्लस्य भावः शुक्लत्वम् शुक्लता। रूपत्वं रूपता। क्रियात्वम् क्रियाता। रसत्वं रसता। एवं कृत्प्रत्यय-निष्पन्नात् अपि शब्दात्प्रत्ययः स्यात्—पाचकस्य भावः पाचकत्वम्। समासान्तात् —राजपुरुषत्वम्। तद्धितप्रत्ययान्तात्—दाक्षाकीणत्वम्। यदृच्छाशब्दात् स्वरूपमात्रे एवप्रत्ययःस्यात्—डित्थत्वं, डवित्थत्वम्। डित्थ काष्ठमयो गजः। एवं कुत्वं (कवर्ण त्वं इत्यर्थः), चुत्वं (चवर्गत्वं इत्यर्थः)।

१७४८। आचत्वात् ॥ ५।१।१२० ॥

**टी—। "ब्रह्मणस्त्वः" इत्यतः प्राक् त्व-तलौ अधिक्रियते। अपवादैः सह समावेशार्थं गुणवचनादिभ्यः कर्म्मणि विधानार्थं चेदम्। चकारो नञ्स्नञ्भ्याम् समावेशार्थः। स्त्रियाः भावः स्त्रैणम्। स्त्रीत्वम्। स्त्रीता। पौंस्नम्। पुंस्त्वम्। पुंस्ता।**

The scope of त्व as well as of तल् extends as far as the commencement of the sutra ब्रह्मणस्त्वः (५।१।१३६)। See Tika.

मित—। ब्राह्मणस्त्वः (५।१।१३६) इति सूत्रात् प्राक् त्व—तल् इति प्रत्ययद्वयस्य अधिकारस्तिष्ठति। तथाहि वदिष्यति "पृथ्वादिभ्य इमनिज्वा" (५।१।१२२) तत्र पृथु इत्येवमादिभ्य इमनिच् वा स्यात्, विकल्पपक्षे त्वतलौ स्याताम् तयोरधिकार-वशात्। अतएव पृथोर्भावः प्रथिमन्—इमनिच्, पृथुत्वं—त्व। पृथुता—तल्। एवं पटोर्भावः इत्यत्र "इगन्ताच्च लघुपूर्व्वात्" (५।१।१३१) इति अण्—पाटवम्। पक्षे त्वतलौ—पटुत्वं, पटुता। "पृथ्वादिभ्य इमनिज्वा" (५।१।१२२) इति तत्र तत्र सूत्रे त्व—तलोरपवादभूतैः प्रत्ययैः सह त्वतलोः समावेशः स्यादिति अनेन सूत्रेण ज्ञाप्यते। अपि च इदमपि अनेन ज्ञाप्यते—यत् "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च"

( ५।१।१२४ ) इति सूत्रेण प्रोक्ते कर्म्मणि च त्व-तलौ विधीयेते। आचत्वात् इति सूत्रस्थयकारो ज्ञापयति यत् नञ् स्नञ् इति एताभ्याम् सहापि त्व—तलोः समावेशः स्यात्। तेन स्त्रियाः भावः इति नञ्—स्त्रैणम्। त्व—स्त्रीत्वं, तल—स्त्रीता। पुंसोभाव इति स्नञ्—पौंस्नम्। त्व—पुंस्त्वम्। तल—पुंस्ता। "स्त्री-पुंसाभ्याम् नञ्स्नञौ भवनात्" ( ४।१।८७ ) इति नञ्स्नञोः विधानम्। गुणवचनादिभ्यः कर्म्मणि च त्व-तलौ स्याताम्—यथा जड़स्य क्रिया जड़त्वं जड़ता। कृशस्य क्रिया—कृशता—कृशत्वम्। अतष्यञ्प्रत्ययेन सहतयोः समावेशः—ष्यञ्प्रत्ययस्य उदाहरणं—जाड्यम्, कार्श्यम्।

**१७८५। न नञ्पूर्व्वात्तत्पुरुषादचतुर-सङ्गत लवण-वट-युध-कतरसलसेभ्यः॥ ५।१।१२१॥**

**टी—। इतः परं ये भाव-प्रत्ययान्तास्ते नञ्तत्पुरुषान्नस्युः चतुरादीन् वर्जयित्वा। अपतित्वम्। अपटुत्वम्। नञ्पूर्व्वात् किम्? वार्हस्पत्यम्। तत्पुरुषात् किम्? नास्य पटवः सन्तीति. अपटुस्तस्य भाव आपटवम्। अचतुरेतिकिम्। आचतुर्य्यम्। आसङ्गत्यम्। आलवण्यम्। आवट्यम्। आयुध्यम्। आकतर्यम्। आरस्यम्। आलस्यम्।**

The suffixes, that are attached to words to imply the special nature of the objects, expressed by the said words, and that are going to be treated later on, are not to be attached to words, that have entered into a Tatpurusha compound with the particle नञ्, save in the cases of the words—enumerated in the sutra—they being अचतुर, असङ्गत, अलवण, अवट, अयुध, अकत, अरस, and अलस।

मित—। अस्मात् सूत्रात् परं ये प्रत्ययाःभावे विधीयन्ते, ते खलु कृतनञ्

तत्पुरुषात् प्रातिपदिकात् न स्युः ; चतुर, सङ्गत, लवण, वट, बुध, कत, रस, लस इति कृतनञ्तत्पुरुषान् शब्दान् वर्ज्जयित्वा। तथाहि "पत्यन्तपुरोहितादिभ्यः यक्" (५।१।१२८) इति पत्यन्तात् यक् विधीयते, बृहस्पते भाव: बार्हस्पत्यम्। एतत् नञ्-तत्पुरुषात् न स्यात्—तेन अपतेर्भाव: इति न यक्—अपितु त्व तलौ एव तेन अपतित्वम्, अपतिता। तथाहि "काले वारिधराणाम् अपतितया न शक्यते स्थातुमि"ति साहित्यदर्पणे। पटोर्भाव: इति "इगन्ताच्च लघुपूर्व्वात्" (५।१।१३१) इति अण् अपाटवम्। परं अपटोर्भाव: इत्यत्र अण् न स्यात्—तेन—अपटुत्वम्। अपटुता। एवम् अरमणीयत्वम्। अरमणीयता। नञ्पूर्व्वादिति किम्? बृहस्पतेर्भाव: इति यक्—बार्हस्पत्यम्। अत्र नञ्पूर्व्व-भिन्नत्वात् खलु बृहस्पति: इति पत्यन्तात् प्रातिपदिकात् यक्। एवं प्राजापत्यम्। न खलु नञ्पूर्व्वकानाम् निषेध:, अपितु नञ्तत्पुरुषाणाम्। तेन न अस्य पटव: सन्ति इति बहुव्रीहिसमासनिष्पन्नात् अपटुशब्दात् तस्य भाव: इति अण् स्यात् अपाटवम्। एवं न अस्य लघव: सन्ति इति अलघुस्तस्य भाव: इति अण्—अलाघवम्। अचतुरादिभ्य: इति किम्? अचतुरस्य भाव: इति आचतुर्य्यम्। असङ्गतस्य भाव इति आसङ्गत्यम्। अलवणस्य भाव: इति आलवण्यम्। अवटस्य भाव: इति आवट्यम्। अबुधस्य भाव: इति आबुध्यम्। अकतस्य भाव: इति आकत्यम्। अरसस्य भाव: इति आरस्यम्। अलसस्य भाव इति आलस्यम्। आलवण्यम् इत्यत्र "वर्णदृढादिभ्य: ष्यञ् च" (५।१।१२३) इति ष्यञ्—लवण इत्यस्य दृढादिमध्ये पठितत्वात्। आलस्यम् इत्यत्र ष्यञ् "गुणवचनब्राह्मणा-दिभ्य: कर्म्मणि च" (५।१।१२४) इति सूत्रेण। अलस इत्यस्य ब्राह्मणादिगणे पाठात्। अचतुर, असङ्गत, अयुध, अवट, अकत, अरस, इति एतेभ्योऽपि ष्यञ् अनेनैव सूत्रेण, एतेषां गुणवचनत्वात्। युधस्थाने बुध इति भाषावृत्तिकृत् पठति।

## १७८६। पृथ्वादिभ्य इमनिज्वा ॥ ५।१।१२२ ॥

## टी—। वा वचनम् अणादिसमावेशार्थम्।

The suffix इमनिच् is attached optionally to the words that pass by the term पृथ्वादि।

मित—। पृथु इति एवमादिभ्यः प्रातिपदिकेभ्यः भावे गम्यमाने इमनिच् प्रत्ययः स्यात् वा। वा इत्यस्य विकल्प एव अर्थः। अतएव इमनिच् इत्यस्य अप्राप्तिपक्षे अण् इत्यादीनां प्रत्ययानां समावेशः। त्व-तलौ तु "आ च त्वात्" (५।१।१२०) इत्यनेनैव समाविश्येते। यथा—तनु इति पृथ्वादिगणपठितः कश्चित् शब्दः। तस्मात् अनेन इमनिच् स्यात्—तेन तनिमा इति रूपम्। साधन-प्रणाली तु पश्चात् द्रष्टव्या। इमनिचः अप्राप्तिपक्षे "इगन्ताच्च लघुपूर्वात्" (५।१।१३१) इति अण्। तेन तानवम्। "आ च त्वात्" इति त्व-तलौ च—तेन तनुत्वम्, तनुता। अतएव चत्वारि रूपाणि सम्भवन्ति। पृथ्वादि यथा—पृथु, मृदु, महत्, पटु, तनु, लघु, बहु, साधु, वेणु बहुल, गुरु, दण्ड, खण्ड, चण्ड, बाल, अकिञ्चन, होत, पान, वत्स, मन्द, स्वादु, आशु, ह्रस्व, दीर्घ, प्रिय, क्षिप्र, ऋजु, क्षुद्र, अणु, पाक।

## १७८७। र ऋतो हलादेर्लघोः ॥६।४।१६१।

## टी—। हलादेर्लघोरृकारस्य रः स्यात् इष्ठेमेयस्सु ॥

Before any of the suffixes इष्ठन्, इमनिच् and ईयसुन्, the short ऋ of a word, itself beginning with a consonant, is changed into र।

मित—। इष्टन्, इमनिच् ईयसुन इति एतेषु प्रत्ययेषु परतः हलादेः प्रातिपदिकस्य यो लघुः ऋकारस्तस्य स्थाने रः स्यात। पृथोर्भावः इति इमनिच् पृथु इत्यस्य ऋकारस्य स्थाने रकारः तेन प्रथिमा। सम्पूर्णा साधन-प्रणाली परस्तु द्रष्टव्या। इष्ठन्—प्रथिष्ठ, ईयसुन्—प्रथीयान्। हलादेः इति किम्? ऋजु इति पृथ्वादिषु पठ्यते। ऋजोर्भावः इति इमनिच् ऋजिमा। इष्ठन्—ऋजिष्ठः। ईयसुन् ऋजीयस्। अत्र ऋजु इत्यस्य हलादित्वाभावात् न रकारादेशः। लघोः ऋकारस्य इति किम्? कृष्णस्यभावः इति इमनिच्—"वर्णदृढादिभ्यः ष्यञ् च" (५।१।१२३) इति। ततः इमनिचि परे कृष्णिमा इतिरूपम्। "संयोगे गुरुः" (१।४।११) इति वचनात् "ष्ण" इति संयुक्तवर्णे परतः ऋकारस्य गुरुत्वाङ्गीकारात्। इष्टन्—कृष्णिष्ठः। ईयसुन्—कृष्णीयान्। अपिच—

"पृथुं मृदुं, भृशं चैव कृशं च दृढ़मेव
परिपूर्व्वं वृढ़ं चैव षड़ेतान् र-विधौ स्मरेत्"—इति वचनात् पृथु, मृदु, भृश कृश, दृढ़ परिवृढ़ इति एतेषां षण्णामेव रकारादेशः तेन एभ्योऽन्यत्र न इति काशिका—भाषा-वृत्तिकारौ, तेन कृतस्य भावः इति कृतिमा—इमनिच्। इष्ठन्—कृतिष्ट, ईयसुन्—कृतीयान्। कुत्रापि न रकारादेशः।

१७८८। टेः॥ ६।४।१५५॥

टौ—। भस्य टे र्लोपः स्यात् इष्टेयमेसु। पृथोर्भावः प्रथिमा। पार्थवम्। म्रदिमा। मार्दवम्।

The टि (i. e. the last vowel of a word and the portion thereafter of a भ (i. e. a word standing before a Taddhita suffix beginning with a vowel or a यकार, standing before a suffix of the स्वादि list excepting the first five सु औट जस्, अम, औ) elides before the suffixes इष्ठन्, इमनिच् and ईयसुन्।

मित—। इष्ठन् इमनिच् ईयसुन् इति एतेषां कस्मिंश्चिदपि प्रत्यये परतः, "यचिभम्" (१।४।१८) इति भसंज्ञाप्राप्तस्य प्रातिपदकस्य टेः लोपः स्यात्। ततः पृथोर्भावः इति इमनिच्—रकारादेशात्—प्रथिमा इति रूपम्। एवं इमनिचि प्रथिमा, ईयसुनि प्रथीयान्। "पृथ्वादिभ्य इमनिज्वा" (५।१।१२२) इति सूत्रस्थेन वा-वचनेन अणादिप्रत्ययानां समावेशः—तेन पृथोर्भावः इति "इगन्ताच्च लघुपूर्व्वात्" (५।१।१३१) इनि अण् तथासति पार्थिवम्। एवम्—"आ च त्वात्" (५।१।१२०) इत्यनेन त्व-तलौ अपि समाविश्येते। तेन—पृथुत्वं पृथुता च। मृदोर्भावः इति इमनिच् अस्य पृथ्वादिषु पाठात् टेर्लोपः—रकारादेशः—तेन म्रदिमा। (इष्ठनि—म्रदिष्ठः, ईयसुनि म्रदीयान्। उभयत्र टेर्लोपः, रकारादेशश्च)। एवं मृदोर्भावः इत्यत्रापि पूर्व्ववत् अण्—मार्द्दवम्। तथाहि "मार्द्दवं ह्रीरचापलम्" इति श्रीमद्भगवद्गीतायाम्। त्व-तलौ च मृदुत्वं मृदुता। एवं पटोर्भावः पटिमा इमनिच्, पाटवम्—अण्। पटुत्वम्—त्व। पटुता—तल। इष्ठनि—पटिष्ठः। ईयसुनि—पटीयान्।

लघोर्भावः—लघिमा—इमनिच्। लाघवम्—अण्। लघुत्वं—त्व। लघुता—तल्। इष्ठन्—लघिष्ठः। ईयसुन्—लघीयान्।

**१७८८। वर्ण-दृढादिभ्यः ष्यञ् च ॥ ५।१।१२३ ॥**

**दे— । चादिमनिच्। शौक्ल्यम्। शुक्लिमा। दार्ढ्यम्। पृथु-मृदु-भृश-कृश-दृढ-परिवृढानामेव रत्वम्। द्रढिमा। षो ङीषर्थः। औचिती। याथाकामी।**

To imply भाव, the suffix ष्यञ् as well as the suffix इमनिच is added to words expressive of some particular colour, and also to words that pass by the term दृढादि।

मित— । वर्णविशेषाभिधायिभ्यः प्रातिपदिकेभ्यस्तथा दृढ इति एवमादिभ्यश्च तस्य भाव इति एतस्मिन्नर्थे ष्यञ् प्रत्ययः स्यात्; सूत्रस्थचकारबलात् इमनिच् अपि। शुक्लः इति वर्णविशेषः तस्य भावः इति ष्यञ् शौक्ल्यम्। इमनिच्—शुक्लिमा। त्वतलौ च शुक्लत्वम्। शुक्लता। कृष्णस्य भावः इति ष्यञ् कार्ष्ण्यम्। इमनिच्—कृष्णिमा। त्व—कृष्णत्वम्। तल्—कृष्णता। दृढस्य भावः इति ष्यञ्—दार्ढ्यम्। त्व-तलौ च—दृढता। द्रढिमा इति अत्र रकारादेशः "र ऋतोः—( ६।४।१६१ )" इत्यनेन। टेः ( ६।४।१५५) इति टि लोपश्च। परम् अयं रकारादेशः पृथु मृदु-भृश कृश-दृढ-परिवृढानामेव स्यात्—नान्येषां इति। एतच्च मितभाषिण्यां प्रागेव प्रकटीकृतम्। दृढादि यथा—दृढ, परिवृढ, भृश, कृश, वक्र, शुक्र, चक्र, आम्र, कृश, लवण, ताम्र, शीत, उष्ण, जड़, वधिर पण्डित मधुर, मूर्ख, मूक, स्थिर, बाल, तरुण मन्द दीर्घ, अम्ल, इत्यादि। एवं मधुरस्यभावः माधुर्य्यं, मधुरिमा, मधुरत्वं, मधुरता। अपिच (१) वेर्यातलाभमतिमनः शारदानाम्, (२) समो मतिमनसोरिति गणसूत्रद्वयम्, विजात, विलाभ, विमति, विमनस्, सम्मति, सम्मनस् इति एतेभ्यः इमनिच् ष्यञ च स्याताम्। विमनसोर्भावः इति वैमनस्यम्—ष्यञ्, विमनिमा—इमनिच्। ष्यञ् इति प्रत्यये षकारः इत्। स तु स्त्रियां ङीषप्रत्ययं ज्ञापयति "षिद्गौरादिभ्यश्च" (४।१।४०) इति सूत्रेण। तेन उचितस्य भावः इति परसूत्रेण ष्यञ् औचित्यम्। स्त्रियां

ङीप् औचिती ["हलस्तद्धितस्य" (६।४।१५०) इति यकारलोपः] यथाकामस्य भावः इति परसूत्रेण ष्यञ्—याथाकाम्यम्। स्त्रियाम्—ङीप्—याथाकामी। पूर्ववत् यकारलोपः। एवं आनुपूर्व्यम्—आनुपूर्वी। वैदग्ध्यं—वैदग्धी। [वैदग्ध्य culture, तथाहि गोड़ीयाः—वैदग्धी परीचितं—इति श्रीचैतन्यमङ्गले। (to test his culture)]।

## १७८० । गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ॥ ५।१।३२ ॥

**टी—। चाद्भावे। जड़स्य कर्म्मभावो वा जाड्यम्। मूढ़स्य भावः कर्म वा मौढ्यम्। ब्राह्मण्यम्॥ अर्हतो नुम् च। अर्हतो भावः कर्म वा आर्हन्त्यम्। आर्हन्ती। ब्राह्मणादिराकृतिगणः।**

The suffix ष्यञ् is attached to attributive words as well as to the words that pass by the term ब्राह्मणादि to imply their भाव (nature) or कर्म्म (action or duty). For rest see Tika.

मित—। गुणम् उक्तवन्त इति गुणवचनाः। गुणवाचकाः विशेषणाः इत्यर्थः। गणवचनेभ्यः प्रातिपदिकेभ्यः तथा ब्राह्मण इत्येवमादिभ्यः षष्ठीसमर्थेभ्यः ष्यञ्प्रत्ययः स्यात्, कर्म्मणि अभिधेये, सूत्रस्थचकारबलात् भावे च अभिधेये सति। कर्म्म क्रिया इत्यर्थः। जड़स्य भावः कर्म्म वा इति ष्यञ्—जाड्यम्। जड़स्वभावः इत्यर्थः इमनिच् च अस्य दृढ़ादिषुपाठात्—जड़िमा। त्व-तलौ च—जड़त्वं जड़ता। त्व-तलौ भावे कर्म्मणि च "आचत्वात्" (५।१।१२०) इति सूत्रेण। मूढ़स्य भावः कर्म्म वा मौढ्यम् (ष्यञ्)। त्व-तलौच—मूढ़त्वं मूढ़ता। एवं कृशस्य भावः कर्म्म वा इति कार्श्यम्—ष्यञ। त्व—कृशत्वम्। तल्—कृशता। भावे गम्ये इमनिच् च—अस्य दृढ़ादिषु पाठात्—क्रशिमा। रकारादेशः टिलोपश्च। एवं स्थौल्यं—स्थूलत्वं, स्थूलता। ब्राह्मणस्यभावः कर्म्मवा इतिष्यञ् ब्राह्मण्यम्। त्व—ब्राह्मणत्वम्। तल् ब्राह्मणता। दूतस्य कर्म्म भावः इति ष्यञ्—दौत्यम्। अपिच प्रातिपदिकग्रहणे लिङ्गविशिष्टस्य ग्रहणं—तेन दूतीनां कर्म्म इति ष्यञ् दौत्यम्। "आगत-प्रिय-सखैरभिदौत्यम्" ॥ अर्हतो नुम् च। ष्यञ् परे अर्हत् इत्यस्य नुमागमः स्यात्। तेन—अर्हतः भावः कर्म्म वा इति

ष्यञ्—नुमागमः = आर्हन्त्यम्। स्त्रियां—आर्हन्ती। "हलस्तद्धितस्य" (६।४।१५०) इति यलोपः। अर्हत्—जैनसन्न्यासी। ब्राह्मणादिर्यथा—ब्राह्मण, दूत, चपल, निपुण, चोर, कुशल, पित्तल, मधास्थ, दायाद, कवि, अचेतन, विदग्ध, उचित, अनुकूल, परिमण्डल, ईश्वर, साक्षिन्, आस्तिक, नास्तिक, मानुष, माणव, मूक, राजन्, अधिपति, अलस, पिशाच, गणपति, दीन, उदासीन, यथाकाम, प्रकाम, विश्वरूप, तरतम, अनृशंस, अनीकर, युवराज इत्यादयः। आकृतिगणोऽयम्।

## १७८१। यथातथयथापुरयोः पर्य्यायेण ॥ ७।३।७१ ॥

**टी—। नञः परयोरेतयोः पूर्व्वोत्तर-पदयोः पर्य्यायेणादेरचो वृद्धिर्ञिदादौ। अयथातथाभावः आयथातथ्यम्। अ-याथातथ्यम्। आ-यथापुर्यम्। अयाथापुर्यम्। आपाद-समासे भावकर्म्माधिकारः।**

The first vowel of the first part of the words अयथातथ and अयथापुर, (i. e. the initial अ of the words) as well as the first of all the vowels of the second part (i. e. the अ coming after य) takes, by turn, its Briddhi substitute before a Taddhita suffix that elides ञ, ण or क।

मित—। यथातथ यथापुर इत्येतयोर्नञ उत्तरयोः पर्य्यायेण अचाम् आदेरचो वृद्धिः स्यात् तद्धिते ञिति णिति किति वा परतः। तथाहि अयथातथ अयथापुर इति एतयोः सकृत् आद्यस्य अकारस्य वृद्धिः स्यात्; पक्षे यकारात् परस्थितस्य च अकारस्य वृद्धिः स्यात् ञिदादौ तद्धिते परतः। "यथाऽसादृश्ये" (२।१।७) इति सूत्रेण कृत-समासौ एतौ यथातथ—यथापुरौ। ततः नञ् समासः—तेन अयथातथम् अयथापुरम् इति रूपम्। एतद्द्वयं ब्राह्मणादिषु पठ्यते। अतएव अयथातथाभावः इति विषये ब्राह्मणादित्वात् ष्यञ्—पूर्व्वपदवृद्धिः—तेन आयथातथ्यम्। उत्तर-पदवृद्धिः—अयाथातथ्यम्। एवं आयथापुर्य्यम्। अयाथापुर्य्यम्। आपाद इति—भावे

कर्म्मणि च अभिधेये प्रत्यय-व्यवस्था पादपरिसमाप्तिं यावत्—"ब्रह्मण स्त्वः" (५।१।१३६) इति सूत्रं यावत् इत्यर्थः—इति ज्ञेयम्।

दी—। **चतुर्व्वर्णादीनां स्वार्थे उपसंख्यानम्॥ चत्वारो वर्णाः चातुर्वर्ण्यम्। चातुराश्रम्यम्। त्रैस्वर्यम्। षाड्गुण्यम्। सैन्यम्। सान्निध्यम्। सामीप्यम्। औपम्यम्। त्रैलोक्यमित्यादि।**

मित—। चतुर्व्वर्ण्यम् इत्येवमादिभ्यः स्वार्थे एव ष्यञ् विधीयते। चत्वारो वर्णाः एव इति ष्यञ्—चातुर्वर्ण्यम्। "चातुर्वर्ण्यम् मया सृष्टम्"—श्रीश्रीगीता। चत्वारः आश्रमाः चातुराश्रम्यम्। त्रीणि स्वराणि—त्रैस्वर्य्यम्। षड्गुणाः एव षाड्गुण्यम्। सेना एव सैन्यम्। सन्निधिः एव सान्निध्यम्। समीप एव सामीप्यम्। उपमा एव उपम्यम्। त्रयो लोकाः एव इति त्रैलोक्यम्। चतुर्वर्णादि यथा—चतुर्वर्ण, चतुराश्रम, त्रिस्वर, षड्गुण, सेना, सन्निधि, समीप, उपमा, त्रिलोक, अन्यभाव, युगपत्, तदर्थ, अनन्तर, सुख, इतिह, मणिक, सर्ववेद, चतुर्वेद। तथाहि अन्यभाव एव आन्यभाव्यम्। युगपदेव यौगपद्यम्। तदर्थ एव तादर्थ्यम्। सहित एव साहित्यम् [—"निर्दोषौ गुणसम्पन्नौ सालङ्कारौ रसान्वितौ। शब्दार्थौ सहितौ काव्यमतः साहित्यमुच्यते।"]। अनन्तर एव आनन्तर्य्यम्। सुख एव सौख्यम्। इतिह एव ऐतिह्यम्। मणिक एव माणिक्यम्। अपिच—

दी—। **सर्वे वेदाः सर्ववेदास्तानधीते सर्ववेदः। सर्वादेरिति लुक्। स एव सार्ववैद्यः—सार्ववैद्यः (?)।**

मित—। सर्ववेद इति यः शब्दश्चतुर्वर्णादिषु पठ्यते तस्य व्युत्पत्तिं प्रत्यय-व्यवस्थां च प्रदर्शयति। सर्वे वेदाः सर्ववेदाः इति कर्म्मधारयः। तान् अधीते इति सर्ववेदः। "सर्वादेः सादेश्च लुग्वक्तव्यः" (४।२।६०, वार्त्तिक) इति विहितस्य प्रत्ययस्य लुक्। सर्ववेदः एव इति ष्यञ् तेन सार्ववैद्यः। सार्ववैद्यः इत्यत्र उभयपदवृद्धिश्चिन्तनीया।

दी—। **चतुर्वेदस्योभयपदवृद्धिश्च। चतुरो वेदान् अधीते**

चतुर्वेदः। स एव चातुर्वैद्यः। चतुर्विद्यस्य इति पाठान्तरम्। चतुर्विद्य एव चातुर्वैद्यः।

मित—। चतुर्वर्णादिषु चतुर्वेद इति पठ्यते। ष्यञ् प्रत्यये परतः तस्य उभय-पदवृद्धिः स्यात्। चतुरो वेदान् अधीते इति चतुर्वेदः। अस्मात् विहितस्य प्रत्ययस्य "द्विगोर्लुक—" इति लुक्। चतुर्वेदः एव इति स्वार्थे ष्यञ् उभयपदवृद्धिः—तेन चातुर्वैद्यः। चतुर्वेदस्योभयपदवृद्धिश्च इति स्थाने चतुर्विद्यस्य उभयपदवृद्धिश्च इति पाठान्तरं दृश्यते। तथासति चतुर्विद्य एव इति स्वार्थे ष्यञ्—उभय-पदवृद्धिः—चातुर्वैद्यः।

१९८२। स्तेनाद्यन्नलोपश्च॥ ५।१।१२५॥

दी—। नेति संघातग्रहणम्। स्तेन चौर्ये—पचाद्यच्। स्तेनस्य भावः कर्म वा स्तेयम्। स्तेनादिति योगं विभज्य स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति।

To imply the nature ( भाव ) or function ( कर्म ) of a स्तेन ( thief ), the suffix यत् is attached to the said word ( स्तेन ) and before the suffix the न of स्तेन elides. Some authorities split this rule into two halves :—( i ) स्तेनात् ( ii ) यन्नलोपश्च and argue that by the first half, the suffix ष्यञ् is attached to स्तेन and by the second half, the suffix यत्—and before this यत् the न elides.

मित—। स्तेन इति कश्चित् धातुश्चौर्ये वर्त्तते। तस्मात् "पचाद्यच्" इति अच् प्रत्यये विहिते सति स्तेनः इति रूपं स्यात्। स्तेनः तस्करः। स्तेनस्य भावः कर्म वा इति गम्यमाने स्तेनशब्दात् यत्-प्रत्ययः स्यात्, प्रत्ययसन्नियोगेन च स्तेन इत्यस्य नकारो लुप्यते। अतएव स्तेनस्य भावः कर्म्म वा इति स्तेयम्। स्तेयं चौर्य्यम्। केचित् ( जयादित्य-प्रभृतयः ) सूत्रमिदं द्विधा विभजन्ति ; स्तेनात् इत्येकोऽंशः। यन्नलोपश्च इति द्वितीयोऽंशः। स्तेनात्—इत्यस्यार्थः—स्तेनशब्दात् भावे

कर्म्मणि वा गम्ये ष्यञ् स्यात्। तेन स्त्रैनस्य भावः कर्म्मवा इति स्त्रैन्यम्। यन्नलोपश्च इत्यस्यार्थस्तु पूर्वोक्ते अर्थे स्त्रैनशब्दात् यत् स्यात् नलोपश्च—तेन स्त्रैयम्। श्रीमतः दीक्षितस्यवृत्तौ "नेति संघात ग्रहणम्" इति यद्दृश्यते तस्य अर्थस्तु—यत् इति प्रत्ययः तथा नकारलोपश्च युगपदेवभवेत्।

१७८३। सख्युर्यः ॥ ५।१।१२६ ॥

टी—। सख्युर्भावः कर्म वा सख्यम्।

The suffix य is attached to the word सखि in the aforesaid sense.

टी—। दूत-वणिग्भ्याम् च। (वा)। दूतस्य भावः कर्म वा दूत्यम्। वणिज्यमिति काशिका। माधवस्तु वणिज्याशब्दः स्वभावात् स्त्रीलिङ्गः। भाव एव चात्र प्रत्ययो नतु कर्मणि इत्याह। भाष्ये तु दूतवणिग्भ्याम् चेति नास्त्येव। ब्राह्मणादित्वात् वाणिज्यमपि।

The suffix य is attached to the words दूत and वणिज् in the selfsame sense. For rest see Tika.

मित—। पूर्वोक्ते एव विषये दूतशब्दात् वणिज्शब्दात् च यत्स्यात्। दूतस्य कर्म्मभावो वा दूत्यम्। वणिजः कर्म्मभावो वा वणिज्यम्। एतत्तु काशिका-मतम्। माधवस्तु वणिज्या इति स्वाभाविकम् स्त्रीलिङ्गशब्दम् आह। [ तथा च विश्रुतचरिते "वणिज्यया वर्द्धयन्तः" ]। भाषावृत्तिकारोऽपि एवम्। भाष्ये तु एतत् न दृश्यते। वनिज् इत्यस्य ब्राह्मणादिषु पाठात् ष्यञ् च स्यात् एव—तेन वाणिज्यम्। एतत् काशिकाभाषावृत्तिकारौ अपि स्वीकुरुतः। दूतस्य भावः कर्म्म वा दौत्यं (ष्यञ्) इत्यपि।

१७८४। कपिज्ञात्योर्ढक्॥ ५।१।१२७ ॥

टी—। कापेयम्। ज्ञातेयम्।

In the aforesaid sense, the suffix ढक is attached to the words कपि and ज्ञाति ।

मित— । प्रागुक्ते विषये कपि ज्ञाति इति एताभ्याम् ढक् स्यात् । कपेः कर्म्म भावो वा कापेयम् । ज्ञातेर्भावः कर्म वा ज्ञातेयम् । तथाहि—"एतद्‌ध्यस्य कापेयं यदर्कमुपतिष्ठते ।"

**१७८५ । पत्यन्तपुरोहितादिभ्यो यक् ॥ ५।१।१२८ ॥**

**टी— । सैनापत्यम् । पौरोहित्यम् । राजाऽसे = राजशब्दोऽसमासे यकं लभते इत्यर्थः । राज्ञो भावः कर्म वा राज्यम् । समासेतु ब्राह्मणादित्वात् ष्यञ् । आधिराज्यम् ।**

In the aforesaid sense, the suffix यक् is attached to words ending in पति as well as to the words—that pass by the term पुरोहितादि ।

मित— । पति इति एतदन्तेभ्यः प्रातिपदिकेभ्यस्तथा पुरोहित एवमादिभ्यः यक् प्रत्ययः स्यात् पूर्वोक्ते विषये । पत्यन्तात्—सेनापतेर्भावः कर्म वा सैनापत्यम् । एवं प्राजापत्यम् गार्हपत्यम् । अधिपति—गणपतिशब्दौ ब्राह्मणादिषु द्रष्टव्यौ । पुरोहितस्यभावः कर्म वा पौरोहित्यम् । पुरोहितादि यथा—पुरोहित, राजाऽसे, ग्रामिक, पिण्डिक, संग्रामिक, कूपिक, वर्मिक, खण्डिक, सुहित, काल, मन्द, दण्डिक, वर्मिक, छविक, मिलिक, स्तनिक, कृषिक, पूतिक, पविक, प्रतिक, आजानिक, सत्तनिक, सूनिक, राक्षर, ग्राक्षर, नागर, पत्तिक, सूतक, सारथिक, जलिक, सूतिक, अजगिक, शर्मिक, चर्मिक, कर्मिक, शौलिक, मूलिक, तिलिका, कृषिक, पुतक, विह्निक, अञ्जातका, पथिक, पूजनिक. ग्रामिक, अजानिक, अविक, पर्पिक, आस्तिक, नास्तिक, संरत्न, चूड़िक, स्वरिक ॥ राजाऽसे इति—राजन् इति शब्दः असमासे एव पुरोहितादिषु पठ्यते तेन राज्ञः कर्म वा राज्यम् । समासे तु ब्राह्मणादिषु अस्य पाठः—तेन अधिको राजा अधिराजः, तस्यभावः कर्म वा आधिराज्यम् ।

## १७८६। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥ ५।१।१२९ ॥

**दी—। प्राणभृत्जाति—आश्वम्। औष्ट्रम्। वयोवचने—कौमारम्। कैशोरम्। (उद्गात्रादि)—औद्गात्रम्। औन्नेत्रम्। सौष्ठवम्। दौष्टवम्।**

In the aforesaid senses, the suffix अञ is attached to the words that stand for 'the names of a living species, or that denote some particular age; as well as to the words that pass by the term उद् गात्रादि।

मित—। प्राणान् बिभर्त्ति प्राणभृत् सचेतनः, प्राणिभृत् चासौ जातिश्चेति प्राणिभृज्जातिः सचेतनजातिरित्यर्थः। प्राणिभृज्जातिवाचिभ्यः वयोविशेष-वाचिभ्यः तथा उद्गातृ इत्येवमादिभ्यः प्रातिपदिकेभ्यश्च तस्य भावः कर्म वा इति एतस्मिन् अर्थे अञ् प्रत्ययः स्यात्। प्राणभृज्जातिवाचिभ्यः—अश्वस्य भाव; कर्म वा आश्वम्। उष्ट्रस्य भावः कर्म वा—औष्ट्रम्। वयोविशेषवाचिभ्यः यथा—कुमारस्य भावः कर्म वा कौमारम्। किशोरस्य भावः कर्म वा कैशोरम्। उद्गात्रादिभ्यः—उद्गातुः कर्म भावो वा औद्गात्रम्। उन्नेतुः भावः कर्म वा औन्नेत्रम्। सुष्ठोः कर्म भावो वा सौष्ठवम्। दुष्टोः भावः कर्म वा दौष्टवम्। उद्गात्रादि यथा—उद्गातृ, उन्नेतृ, सुष्ठु, दुष्ठु, प्रतिहर्त्तृ, प्रशास्तृ, होतृ, पोतृ, हर्त्तृ, रथगणक, पत्तिगणक, अध्वर्यु, वधू, सुभग, मन्त्र।

## १७८७। हायनान्त युवादिभ्योऽण् ॥ ५।१।१३० ॥

**दी—। द्वैहायनम्। त्रैहायनम्। यौवनम्। स्थाविरम्।**

The suffix अण् is added to the words that end in हायन, as well as to the words that pass by the term युवादि, in the aforesaid sense.

मित—। हायन इति एवमन्तेभ्यः प्रातिपदिकेभ्यस्तथा युवन् इत्येवमादिभ्यश्च अण् प्रत्ययो भवति तस्य भावः कर्म वा इति एतस्मिन् विषये। हायनान्तेभ्यः यथा—द्वि-हायनस्य भावः कर्म वा द्वैहायनम्। त्रि-हायनस्यभावः कर्म वा त्रैहायनम्। युवन् इत्येवमादिभ्यः यथा—यूनोः भावः कर्म वा यौवनम्, स्थविरस्य भावः कर्म वा स्थाविरम्। पुरुषस्य भावः कर्म वा पौरुषम्। युवादि यथा—युवन्, स्थविर, सुहृद्, दुहृद्, चपल, निपुण, कुशल, क्षेत्रज्ञ, पिशुन, कुतूहल, होत्र, यजमान, कमण्डलु, यात्र, श्रवण, कुस्त्री, सुस्त्री, सहृदय, सुभात्र, वृषल, दुर्भात्र, परिव्राजक, सब्रह्मचारिन्, कुतुक, कटुक, दुःस्त्री, दुहृदय, अनृशंस, अक्षेत्रज्ञ, [अपिच—हृदय पुरुष इति एतद्द्वयम् असमासे एव युवादिषु पठ्यते], श्रोत्रिय।

दी—। श्रोत्रियस्य यलोपश्च। (व)। श्रौत्रम्।

The word श्रोत्रिय, which is included in the युवादि list, elides its य before the suffix अण्।

मित—। श्रोत्रिय इति युवादिषु पठ्यते। अण् प्रत्यये परतोऽस्य यकारलोपः। श्रोत्रियस्य भावः कर्म वा श्रौत्रम्। श्रौत्रम् कर्म।

दी—। कुशल-चपल-निपुण-पिशुन-कुतुहल-क्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु च पठ्यन्ते। कौशल्यम्। कौशलम् इत्यादि।

१७९८। इगन्ताच्च लघुपूर्व्वात्॥ ५।१।१३१॥

दी—। शुचेर्भावः कर्म्म वा शौचम्। मौनम्। कथं काव्यम्? कविशब्दस्य ब्राह्मणादित्वात् ष्यञ्।

In the aforesaid sense, the suffix अण् is attached to words ending in इक (प्रत्याहार) provided the इक् itself is preceded by a letter, following a short vowel.

मित—। इक् यस्य अन्ते, तत्पूर्वश्च योलघुस्तस्मादण् स्यात् भावे कर्मणि वा

गम्ये । शुचि इति इगन्तः प्रातिपदिकः । इकारात् पूर्वो यो वर्णः शकारस्तस्मात् पूर्वं खलु उकारस्तिष्ठति—स च लघुः अतएव शुचेर्भावः कर्म वेति शुचिशब्दादण् =शौचम् । मुनेर्भावः कर्म वा मौनम् । पटु—पाटवम्, लघु—लाघवम्, गुरु—गौरवम् नगरी—नागरम्, हरीतकी—हारीतकम् । "आचत्वात्" ( ५।१।१२० ) इत्यनेन त्व-तलौ अपि—तेन लघुता, लघुत्वं, पटुता—पटुत्व, शुचिता—शुचित्वम् इत्यादयः । लघुपूर्वादिति किम् ? पाण्डोर्भावः कर्म वा पाण्डुता—अत्र त्व-तलौ एव न खलु अण् । कथम् इतिचेत ?—उकारात् पूर्वो योवर्णस्तिष्ठति स खलु संयुक्तवर्णः । अतएव "संयोगे गुरुः" ( १।४।११ ) इति सूत्रेण तत्पूर्ववर्णः अकारस्य गुरुसंज्ञां भजते । एवं कण्डुत्वं कण्डुता नात्र कण्डुशब्दात् अण् ।

ननु कवेः कर्म ( कवेः कृतिरित्यर्थः ) इति काव्यम् कथं सिध्यति ? कविशब्दस्य ब्राह्मणादिषु पठ्यते । तेन ष्यञ् ।

**१७८८ । योपधाद् गुरूपोत्तमाद्वुञ् ॥ ५।१।१३२ ॥**

**टी— । रामणीयकम् । आभिधानीयकम् । सहायाद्वा । (वा) । साहाय्यम् । साहायकम् ।**

In the aforesaid sense, thesuffix वुञ् is attached to words, that have got penultimate यकार, preceeded by a long vowel, provided the same occurs after at least three letters.

मित— । "विप्रभृतीनाम् अन्त्यम् उत्तमम् । तत्-समीपम् उपोत्तमम्" इति भाषावृत्तिः । गुरूपोत्तमाद् योपधात् वुञ् स्यात् भाव-कर्मणोः । अयमर्थः सूत्रस्य प्रतिभाति—तस्यभावः कर्म वेति अभिधेये सति, यस्य प्रातिपदिकस्य उपधायां यकारस्तिष्ठति तत् पूर्वं च गुरुवर्णो विद्यते, तस्मात् वुञ स्यात्, स चेत् गुरुवर्णः विप्रभृतीनां वर्णानाम् अन्ते स्थितोभवेत् । रमणीयस्य भावः कर्म वा इति रमणीयशब्दे यकारः उपधाभूतः ; तत्पूर्वं गुरुवर्णो दीर्घः ईकारस्य विद्यते, स च दीर्घः ईकारः र अ म अ न इति पञ्चभ्यः वर्णेभ्यः ( विसंख्याकात् वर्णात् अधिक-तरेभ्यः इत्यर्थः ) परमेव विद्यते, अतएव अस्मात् वुञ स्यात् । रामणीयकम् । तथाहि भारवी—

"पुरोपनीतं नृप रामणीयकम्"। अभिधानीयस्य भावः कर्म वा आभिधानीयकम्। एवं वसनीय—वासनीयकम्। आचार्य्य—आचार्य्यकम्। योपधात् इति किम्? विमानस्य भावः कर्म वा विमानत्वम्। गुरूपोत्तमादिति किम्? क्षत्रियस्य भावः कर्म वा क्षत्रियत्वम्। अत्र इकारः ह्रस्वः—अतएव न वुञ—प्रत्युत त्व-तलौ, क्षत्रियता। सहायशब्दात् वुञ वा स्यात्—सहायस्य भावः कर्म वा साहायकम्। वुञोऽप्राप्तिपक्षे, अस्य ब्राह्मणादिषु पाठम् उररीकृत्य ष्यञ। तेन साहाय्यम्। भागवृत्तिस्तु अत्र ष्यञं नेच्छति।

## १८०० । द्वन्द्व-मनोज्ञादिभ्यश्च ॥ ५।१।१३३ ॥

## टी— । शैष्योपाध्यायिका । मानोज्ञकम् ।

In the aforesaid sense the suffix वुञ is attached to words that have entered into a dwanda (द्वन्द्व) compound, as well as to those words, that pass by the term मनोज्ञादि ।

मित— । भावे कर्मणि च अभिधेये, कृत-द्वन्द्व-समासेभ्यः तथा मनोज्ञ इत्येवमादिभ्यश्च वुञ स्यात। कृतद्वन्द्वसमासेभ्यः यथा—शिष्यश्च उपाध्यायश्च शिष्योपाध्यायौ। तयोर्भावः कर्म्म वा इति वुञ् शैष्योपाध्यायिका। एवं पिता च पुत्रश्च पितापुत्रौ—तयोः कर्म्मभावो वा पितापुत्रिका। कुत्सश्च कुसिकश्च कुत्सकुशिकौ—कौत्सकुशिका। स्त्रीत्वम्—अभिधानात्। मनोज्ञादेर्यथा—मनोज्ञस्य कर्म्मभावो वा मानोज्ञकम्। कल्याणस्य भावः कर्म्म वा काल्याणकम्। मनोज्ञादि यथा—मनोज्ञ, कल्याण, प्रियरूप, अतिरूप, अमुष्यपुत्र, अमुष्यकुल, आढ्य, छात्र, छान्दस, मेधा, विट, कुलपुत्र, श्रोत्रिय, चोर, धूर्त्त, विश्वदेव, युवन्, ग्रामपुत्र, ग्रामखण्ड, ग्रामकुमार, शतपुत्र, कुशल, मेधाविन्, कुपुत्र, ग्रामषण्ड, ग्रामकुलाल, सुकुमार, बहुल, अवश्य। सारपत्र, तथाहि—प्रियरूपस्य भावः कर्म्म वा प्रैयरूपकम्। अभिरूपस्यभावः कर्म वा आभिरूपकम्। अमुष्यपुत्रस्यभावः कर्म वा आमुष्यपुत्रिका स्त्रीत्वम् अभिधानात्, एवं अमुष्यकुलस्यभावः कर्म वा आमुष्यकुलिका—अत्रापि आभिधानिकं स्त्रीत्वम्।

## १८०१ । गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ ५।१।१३४ ॥

टी—। अत्याकारोऽधिक्षेपस्तदवेतस्ते गोत्रचरणयोर्भाव-कर्म्मणी प्राप्तः। अवगतवान् वा। गार्गिकया श्लाघते। गार्ग्यत्वेन विकत्थते इत्यर्थः। गार्गिकया—अत्याकुरुते। गार्गिकामवेतः। काठकेन श्लाघते।

In the aforesaid sense, the suffix वुञ् is added to the words expressive of गोत्र or चरण, with reference to boasting ( श्लाघा ), censuring ( अत्याकार ) or obtaining ( तदवेत ) or knowing ( तदवेत ) only.

मित—। श्लाघा विकत्थनम्। आत्मप्रशंसा इति यावत्। अत्याकारः पराधिक्षेपः। अत्याकुरुते परान् अधिक्षिपति इत्यर्थः। तदवेतः—तत् अवेतः, तत्प्राप्तः; तत् ज्ञातः अवगतवान् इति वा। गोत्रवाचिभ्यः तथा चरणवाचिभ्यश्च प्रातिपदिकेभ्यः भावे कर्मणि वुञ् प्रत्ययः स्यात्, श्लाघायां पराधिक्षेपे तथा तत् प्राप्तः तत् ज्ञातो वा इति विषये। गोत्रवाचिभ्यः श्लाघाविषये यथा—गार्गिकया श्लाघते अयं विप्रः। अयं विप्रः गार्ग्यगोत्रीयः अतः गार्ग्यत्वेन श्लाघते इति गार्ग्यशब्दात् गोत्रवाचकात् वुञ् तेन गार्गिका, "आपत्यस्य तद्धितेऽनाति" ( ६।४।१५१ ) इति यलोपः। चरणवाचिभ्यः श्लाघायां यथा काठिकया वा काठकेन श्लाघते। कठत्वेन श्लाघते इत्यर्थः। चरणवाचिनः कठशब्दात् वुञ—तेन काठकं वा काठिका। अत्याकारे यथा—गार्गिकया अत्याकुरुते काठिकया अत्याकुरुते। आत्मने गार्ग्यत्वेन कठत्वेन वा परान् अधिक्षिपति। तदवेत इति विषये यथा—गार्गिकाम् अवेतः। काठिकाम् अवेतः। गार्ग्यत्वं कठत्वं वा प्राप्तः, गार्ग्यत्वं कठत्वं वा अवगतवान्। श्लाघादिभ्यः अन्यत्र विषये वुञ् न स्यात् यथा कठत्वं गार्ग्यत्वम् इति त्व-तलौ।

१८०२। होत्राभ्यश्छः॥ ५।१।१३५॥

टी—। होत्राशब्दः ऋत्विग्वाची स्त्रीलिङ्गः। बहुवचनात् विशेषग्रहणम्। अच्छावाकस्य भावः कर्म्म वा अच्छावाकीयम्। मित्रावरुणीयम्।

The suffix छ is attached in the aforesaid sense, to the words, that denote some kind of vedic priests ( होत्रा )।

मित—। होत्रा इति प्रातिपदिकम् स्त्रीलिङ्गे प्रयुज्यते, अस्य अर्थस्तु ऋत्विक्। होत्राभ्यः इति बहुवचनं स्वरूपविधिं निरस्यति, ज्ञापयति च यत् होत्राविशेषवाचिभ्यः प्रत्ययः स्यात्।

तस्य भावः कर्मवेति विषये होत्राविशेषवाचिभ्यः प्रातिपदिकेभ्यः छप्रत्ययः स्यात्; अच्छावाकः इति होत्राविशेषस्तस्यभावः कर्म वा अच्छावाकीयम्; मित्रावरुण इति ऋत्विग्विशेषः। तस्यभावः कर्म वा मित्रावरुणीयम्। एवं ब्राह्मणाच्छंसिन् इति ऋत्विग्विशेषः। तस्य भावः कर्म वा ब्राह्मणाच्छंसीयम्। एवं पोत्रा—पोत्रीयम्। त्वष्टा—त्वष्ट्रीयम्।

१८०३। ब्रह्मणस्त्वः ॥ ५।१।१३६ ॥

**वृ—। होत्रावाचिनो ब्रह्मशब्दात् त्वः स्यात्। छस्यापवादः। ब्रह्मत्वम्। नेति वाच्ये त्ववचनं तलोबाधनार्थम्। ब्राह्मण-पर्यायात् ब्रह्मणशब्दात्तु त्वतलौ। ब्रह्मत्वम्। ब्रह्मता।**

In the aforesaid sense, the suffix त्व is attached to the word ब्रह्मण् that stands for the name of a special kind of vedic priest.

मित—। 'होत्राभ्यः' इति पूर्व्वसूत्रात् अत्र अनुवर्त्तते। तेन अयमर्थः—होत्राविशेषवाची यो ब्रह्मन् इति शब्दस्तस्मात् भावे कर्मणि वा अभिधेये त्व-प्रत्ययः एव स्यात्। अयं छप्रत्ययस्य अपवादः। ब्रह्मणो भावः कर्म वा ब्रह्मत्वम्।

ननु "होत्राभ्यश्छो न तु ब्रह्मणः" इत्यनया रीत्या पूर्व्वसूत्रम् चेत् क्रियेत, तर्हि एकेनैव सूत्रेण इष्टसिद्धिरभविष्यत्; यतस्तर्हि ब्रह्मण् इत्यस्मात् छप्रत्यये निषिद्धे सति "आ च त्वात्" इति सूत्रबलात् "तस्यभाव स्त्व-तलौ" इति त्व-प्रत्यय एव विहितः स्यात्। तथा सति किम् अनेन सूत्रेण इति चेत् उच्यते? उद्गतोऽहि यन्यः आचष्टे अधिकं फलमिति न्यायात् सूत्रम् इदं किञ्चिदधिकं फलं दद्यात्।

तत् च इदम्—अत्र त्वप्रत्ययविधानेन ज्ञाप्यते यत् अस्मात् तल्प्रत्ययो न स्यात्। तेन ब्रह्मत्वम् इति त्व-प्रत्ययान्तम् एकमेव रूपम्।

अपिच ब्राह्मणवाची ब्रह्मशब्दोऽप्यस्ति। तत्र तु त्व-तलौ एव स्याताम्—तेन ब्रह्मणः ब्राह्मणस्य भावः कर्म वा ब्रह्मत्वम्। ब्रह्मता।

नञ्स्नञोरधिकारः समाप्तः।

## १८०४। धान्यानां भवने क्षेत्रे खञ्॥ ५।२।१॥

**दी—। भवन्ति अस्मिन् इति भवनम्। मुद्गानां भवनं क्षेत्रं मौद्गीनम्।**

The suffix खञ is attached to the words that stand for the name of a particular kind of paddy, to denote the fields where such "paddies" grow.

मित—। धान्यं शस्यविशेषः, अत्र भाषावृत्तिटीप्पन्यां श्रीमन्तः श्रीचन्द्रचक्रवर्त्ति-पादाः—"यवगोधूमधान्यानि तिलाः कङ्गुकुलत्थकाः। माषामुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः। गवेधुकाश्च नीवारा आढ़क्यश्च सतीनकाः। चणकाश्चीणकाश्चैव धान्यान्यष्टादशैव तु"॥ इति स्कान्दे। [यव is barley, गोधूम = wheat, धान्यव्रीहि (paddy), कङ्गु = प्रियङ्गु = काउनि = panick seed, मसूर = lentil, श्याम = श्यामाक, नीवार = आरण्यव्रीहि। आढ़की = रहरी = तुवरी; सतीनक = कलाय = कलड़ = सतीन = peas; चणक = छोला = वुट = gram. कोरदूषस्तु कोद्रव इत्यमरः = some grain. मतान्तरे कोद्रव is भङ्गा। कुलत्थ is some corn." इति]। भवनम्—उत्पत्तिस्थानम्। भवन्ति अस्मिन् इति भवनम् [भूधातोर्ल्युट् अधिकरणवाच्ये]। सूत्रार्थस्तु—धान्यानां धान्यविशेषवाचिनां भवने आलये अभिधेये सति, धान्यविशेषवाचिभ्यः प्रातिपदिकेभ्यः खञ्प्रत्ययः स्यात्, क्षेत्रं चेत् तद्भवनं भवति। मुद्गानां भवनं क्षेत्रम् इति मुद्गशब्दात् खञ् मौद्गीनम्। धान्यानां भवनं क्षेत्रम् धान्यीनम्। कुलत्थानां भवनं क्षेत्रं कौलत्थीनम्। कोद्रवानां भवनम् क्षेत्रं कौद्रवीणम्। धान्यानां इति किम्? तृणानां भवनं क्षेत्रम्—अत्र प्रत्ययो न।

चैवमिति किम्? मुद्गानां भवनम् कुसूलम्। धान्यानाम् इत्यत्र बहुवचनं धान्यविशेषाणाम् इत्यर्थं ज्ञापयति। तेन धान्यविशेषवाचिभ्यः प्रत्ययो विधीयते। धान्यमपि धान्यविशेषः इति स्कन्दपुराणात् ज्ञायते—तेन तस्मात् प्रत्ययः—अतः धान्यीनम् इतिरूपं भाषावृत्तौ दृश्यते।

१८०५। व्रीहिशालयोर्ढक्॥ ५।२।२॥

टी—। व्रैहेयम्। शालेयम्।

The suffix ढक् is attached to the word व्रीहि and शालि in the aforesaid sense.

मित—। व्रीहि शालि इति एताभ्याम् धान्यविशेषवाचिभ्याम् पूर्वोक्ते विषये ढक् स्यात्—नतु खञ्। व्रीहीनाम् भवनं चैतम् व्रैहेयम्। शालीनां भवनं चैतम् शालेयम्।

१८०६। यव—यवक—षष्टिकाद्‌ यत्॥ ५।२।३॥

टी—। यवानां भवनं चेत्रम्—यव्यम्। यवक्यम। षष्टिक्यम्।

In the aforesaid sense the suffix यत् is attached to the words यव यवक and षष्टिक।

मित—। पूर्वोक्ते विषये यव यवक षष्टिक इति एतेभ्यः धान्यविशेषवाचिभ्यः यत् स्यात् नतु खञ्।

१८०६। विभाषा-तिल-माषोमाभङ्गाणुभ्यः॥ ५।२।४॥

टी—। यदा स्यात्, पक्षे खञ्। तिल्यम। तैलीनम्। माषयम। माषीणम्। उम्यम्। औमीनम्। भङ्ग्यम्। भाङ्गीनम्। अणव्यम्। आणवीनम्।

The suffixes यत् is optionally added to the words तिल, माष, उमा, भङ्गा, and अणु। [ अत्र श्रीशचक्रवर्त्तिपादाः—माष = माषकलाय। "अतसी

-स्यादुमा क्षुमा" इत्यमरः, उमा = अतसी = तिसि = linseed. भङ्गा = कुसुम्भः = कोद्रव = काश्मीरादिजातशस्यविशेषः। भङ्गा मतान्तरे कार्पासः। अणु = चीणक = चीणाः" इति। चीणक is mentioned in the sloka quoted before from the skandapuranam. The name of कुसुम्भ (भङ्गा) is also to be seen in the sahityadarpanan—as "नीली कुसुम्भं मञ्जिष्ठा" ; also "कुसुम्भरागं तत्प्राहुः" ; Third chapter, slokas 195 and 197 ].

मित—। तिल माष उमा भङ्गा अणु इति एतेभ्यः धान्यविशेष-वाचिभ्यः यत् प्रत्ययो वा स्यात्; यत्प्रत्ययस्य अप्राप्तिपक्षे धान्यविशेषवाचिभ्यः "धान्यानां भवने क्षेत्रे खञ्" (५।२।१) इति खञ् एव।

ननु उमा भङ्गा इति एतद्द्वयम् नहि धान्यविशेषवाचि इति चेत् सत्यम्, परम् "उमाभङ्गयोरपि धान्यत्वम् आश्रितमेव" इति काशिका। तिलानां भवनं क्षेत्रम्—तलीनं—खञ्; तैल्यं—यत्। माष—माषीणं खञ्; माष्यं—यत्। उमा—औमीनम्—खञ्। उम्यं—यत्। भाङ्गीनम्—खञ्। भङ्ग्यम्—यत्। आणवीनम् —खञ्। अणव्यं—यत्।

## १८०७। सर्वचर्मणः कृतः खखञौ ॥ ५।२।५ ॥

**टी—। असामर्थ्येऽपि निपातनात् समासः। सर्वश्चर्मणा कृतः सर्वचर्मीणः-सार्वचर्मीणः।**

The suffix ख as well as the suffix खञ is attached to the word सर्वचर्मन् in the sense of "made of."

मित—। सर्वचर्मन् इति एतस्मात् तृतीयासमर्थात् प्रातिपदिकात् कृतम् इति एतस्मिन् विषये खञ् खप्रत्ययौ भवतः।

ननु सर्वं चर्म सर्वचर्म इति किं कर्मधारय-समासः? नहि। किं तर्हि? "सर्वशब्दस्तावत् प्रत्ययार्थेन कृतेन सम्बध्यते, न चर्मणा" इति काशिका। अतएव सर्वश्चर्मणा कृतः इति एतस्मिन्नेव अर्थे खप्रत्ययः—सर्वचर्मीणः; खञ्—सार्व-चर्मीणः।

ननु समासस्तु "समर्थ-पदविधिः" ( २।१।१ ) इति सूत्रात् समर्थानामेव पदानामेव इति नियमः, कथं तर्हि सर्व्वैः चर्म्मणा कृतः इति विग्रहे सर्वशब्दः चर्मशब्देन सह समासभावं प्राप्नोति इति चेत् सत्यम्। तत आह—"असामर्थ्येऽपि निपातनात् समासः", यद्यपि अत्र सामर्थ्याभावस्तथापि निपातनादेव समासः। यल्लक्षणेनानुत्पन्नम् तत् सर्व्वं निपातनात् सिद्धमिति निपातनम्। अतएव उक्तं काशिकायाम् "तत्रासमर्थसमासो द्रष्टव्यः"।

## १८०८। यथामुख-संमुखस्य दर्शनःखः ॥५।२।६॥

**टी—। मुखस्य सदृशम् यथामुखं प्रतिविम्बम्। निपातनात् सादृश्येऽव्ययीभावः। समं सर्वं मुखं संमुखम। समशब्दस्य अन्तलोपो निपात्यते। यथामुखं दर्शनो यथामुखीनः। सर्वस्य मुखस्य दर्शनः संमुखीनः।**

The suffix ख is attached to the words यथामुख and संमुख to denote "दर्शन"—something upon which reflection may be cast.

मित—। मुखस्य सदृशम् इति यथामुखम् अव्ययीभावः।

ननु "यथाऽसादृश्ये" ( २।१।७ ) इति असादृश्ये एव समास इष्टः, कथं तर्हि सादृश्ये? निपातनादेव इति। यथामुखं प्रतिविम्बम्। समं सर्व्वंमुखम् इति सम्मुखम्। समशब्दस्य अन्तिमस्य अकारस्य निपातनेनैव लोपः। समस्य सर्व्वपर्य्यायत्वम् यथा "आमि सर्वनाम्न सुटः" ( ७।१।५२ ) इति सूत्रे श्रीमान् दीक्षितः—"समः सर्व्वपर्य्यायः" इति। सूत्रस्य अर्थस्तु—यथामुखशब्दात् सम्मुखशब्दात् च षष्ठी-समर्थात् दर्शनम् इति एतस्मिन्नर्थे खप्रत्ययः स्यात्। दृश्यते अस्मिन् इति दर्शनः। आदर्शादिप्रतिविम्बाश्रयः प्रोच्यते। यथामुखं दर्शनः इति खः यथामुखीनः। भाषावृत्तौ तु यथामुखस्य दर्शनः यथामुखीनः इति दृश्यते। यथामुखीनः दर्पणः। तथाहि भट्टिकाव्ये "यथामुखीनः सीतायाः पुप्लुवे बहुलीभवन्" इति।

१८०६। तत् सर्वादेः पथ्यङ्गकर्मपत्रं व्याप्नोति ॥ ५।२।७ ॥

टी—। सर्वादेः पथ्याद्यन्तात् द्वितीयान्तात् खः स्यात्। सर्वपथान् व्याप्नोति सर्वपथीनः। सर्वाङ्गीनः। सर्वकर्मीणः। सर्वपत्रीणः।

The suffix ख is attached to the words पथिन्, अङ्ग, कर्म and पात्र, each ofthem coming after the word सर्व्व, to imply the thing that cause all these.

मित—। तदिति द्वितीया समर्थविभक्तिः। व्याप्नोति इति प्रत्ययस्य अर्थः। अतएव सूत्रार्थः—"तदि"ति द्वितीयासमर्थात् "सर्व्वादेः" सर्वपूर्वकात् "पथ्यङ्गकर्म-पात्र" पथिन् अङ्ग कर्म पात्र इति एवमन्तात् "व्याप्नोति" इति एतस्मिन् अर्थे खप्रत्ययः स्यात्। सर्व्वः पन्थाः सर्वपथः। "ऋक्पूरब्धूःपथामानक्षे" (५।४।७४) इति समासान्तः। सर्वपथं व्याप्नोति इति खः सर्वपथीनो रथः। सर्वाङ्गं व्याप्नोति इति सर्वाङ्गीनस्तापः। सर्वाङ्गीनं वासः। सर्वकर्म व्याप्नोति इति सर्वकर्मीणः पाणिः; सर्वकर्मीणः पुरुषः। सर्वपात्रम् व्याप्नोति सर्वपात्रीणः ओदनः। काशिका-भाषा-वृत्तिकारास्तु मूत्रकलेवरे पत्रमिति अधिकं पठन्ति; सर्वपत्रम् व्याप्नोति इति सर्वपत्रीणः सारथिः।

१८०७। आप्रपदं प्राप्नोति ॥ ५।२।८ ॥

टी—। पादस्य अग्रम् प्रपदम्। तन्मर्यादीकृत्य आप्रपदम्। आप्रपदीनः पटः।

The suffix ख is attached to the word आप्रपद in the sense to denote the piece of cloth that reached the same.

मित—। पादस्य अग्रभागः प्रपदम् उच्यते। प्रपदम् मर्यादीकृत्य इति विग्रहे "आङ् मर्यादाभिविध्योः" (२।१।१३) इति अव्ययीभावसमासः।

सूत्रार्थः—आप्रपद इति प्रातिपदिकात् द्वितीयासमर्थात् प्राप्नोति इति विषये

खप्रत्ययो भवति। आप्रपदम् प्राप्नोति इति आप्रपदीनः पटः। "शरीरेण सं वृहत्तापि पटस्य प्रमाणम् आख्यायते", [ आप्रपदीनः = Pant or trousers,]

१८०८। अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ५।२।९ ॥

दी—। अनुरायामे सादृश्ये च। अनुपदं बद्धा अनुपदीना उपानत्। सर्वान्नानिभक्षयति सर्वान्नीनो भिक्षुः। अयानयः स्थलविशेषः। तत्रेय अयानयीनः शारः।

The self-same suffix is added to the word अनुपद, to denote the thing that is fastened to it, to the word सर्वान्न to imply the person that eats the same, as well as to the word अयानय to denote the thing that is caused to move ( that is brandished right and left ) right and left being the meaning of the word अयानय।

मित—। अनुपदम् पदसदृशम्। "अव्ययं—" ( २।१।६ ) इति सूत्रेण सादृश्ये अव्ययीभावसमासः। यद्वा "यस्य च आयामः" ( २।१।१६ ) इति आयामि वाच्ये अव्ययीभावसमासः। अयः प्रदक्षिणम्। अयात् अन्यः अनयः। अनयः प्रसव्यम्। सव्यम् कथम्? अयानयः इत्यस्य अर्थस्तु "प्रदक्षिणप्रसव्य-गामिनाम् शाराणाम् ( शराणाम् ) यस्मिन् पर-शारैः पदानाम् असमावेशः" इति काशिका।

सूत्रार्थः—अनुपद, सर्वान्न अयानय इति एतेभ्यः शब्देभ्यः द्वितीयासमर्थेभ्यः यथासंख्यं बद्धा भक्षयति नेय इति एतेषु अर्थेषु खप्रत्ययः स्यात्। अनुपदम् बद्धा अनुपदीना। बद्धा इति निर्देशात् स्त्रीलिङ्गत्वम्। अनुपदीना पादप्रमाणा उपानत्। [ अनुपदीना—stockings ]. सर्वान्नानि भक्षयति इति सर्वान्नीनो भिक्षुः। अयानयं नेयः अयानयीनः शारः। "फलकशिरः स्थितः" इत्यर्थः। दीक्षितस्तु अयानयः स्थलविशेषः इति मत्वा अयानयीनः शार इति आह।

१८०९। परोवर-परम्पर-पुत्रपौत्रमनुभवति ॥ ५।२।१० ॥

टी—। परांश्चावरांश्च अनुभवतीति परोवरीणः। अवरस्य उत्त्वं निपात्यते। परांश्च परतरांश्चानुभवति इति परम्परीणः। प्रकृतेः परम्परभावो निपात्यते। पुत्रपौत्राननुभवति पुत्रपौत्रीणः। परम्परा-शब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिङ्गं, तस्मादेव स्वार्थे ष्यञि पारम्पर्य्यम्। कथं पारोवर्य्यवदिति। असाधुरेव। खप्रत्यय-सन्नियोगेनैव परोवरेति निपातनात्॥

The suffix ख is attached to the words परोवर, परम्पर, पुत्र-पौत्र to denote the person that feels these (i. e. sees these). For rest see Tika.

मित—। द्वितीयासमर्थेभ्यः परोवर परम्पर पुत्र-पौत्र इति एतेभ्यः अनुभवति इति एतस्मिन् अर्थे खप्रत्ययो भवति। परान् च अपरान् च अनुभवतीति खप्रत्ययः; प्रत्ययसन्नियोगेन च अवर इति अस्य अकारस्थाने उकारादेशत्वेन परोवरीणः इति। परान् च परतरान् च अनुभवति इति खः। प्रत्ययसन्निधानेन च "पर-परतर" इति प्रकृतेः "परम्पर" इति रूपं स्यात् निपातनेन—तेन परम्परीणः इति पदं सिध्यति। पुत्र-पौत्रान् अनुभवति इति खः—पुत्र-पौत्रीणः। तथाहि "लक्ष्मीं परम्परीणाम् त्वं पुत्र-पौत्रीणतां नय"।

ननु मन्त्रिपरम्परा मन्त्रं भिनत्ति इति परम्पराशब्दः प्रत्ययं विना अपि दृश्यते? सत्यम्। तत् अव्युत्पन्नं शब्दान्तरं स्त्रीलिङ्गे एव प्रयुज्यते। तस्मात् एव शब्दात् स्वार्थे ष्यञ्प्रत्यये विहिते सति पारम्पर्य्यमिति रूपं सिध्यति। कथं तर्हि पारोवर्य्यवदिति ष्यञ्प्रत्ययान्तः परोवरशब्दः प्रयुज्यते? एषशब्दः असाधुरेव मन्तव्यः, यतः खप्रत्ययसन्नियोगेनैव परावरशब्दस्य स्थाने परोवर इति रूपं स्यात्। एतस्मादन्यत्र न हि परोवर इति रूपं साधु भवितुमर्हति।

१८१०। अवारपारात्यन्तानुकामं गामी॥ ५।२।११॥

टी—। अवारपारं गामी अवारपारीणः। अवारीणः।

**पारीणः। पारावारीणः। अत्यन्तं गामी अत्यन्तीनः, भृशं गन्ता इत्यर्थः। अनुकामं गामी अनुकामीनः। यथेष्टं गन्ता (? इत्यर्थः)।**

The suffix ख is attached to the words अवार पार, अत्यन्त and अनुकाम to denote the person, that is very likely to travel अवारपार or run fast ( अत्यन्त ) or run enough ( अनुकाम )।

मित—। गमिष्यतीति गमी इनिप्रत्ययः, णिनौतुगामी। "भविष्यति गम्यादयः" (३।३।३) इति सूत्रेण प्रत्ययस्य भविष्यत्कालता विहिता। अत्र भाषावृत्तिः—"गामीति भविष्यन्निर्द्देशो वैचित्र्यार्थः। गन्तृमात्रे प्रत्ययः"। अतएव वर्त्तमान-गन्तरि, अतीत-गन्तरि, भविष्यद्गन्तरि वा, अभिधेये प्रत्ययः स्यादिति भषावृत्तिकृतामाशयः। सूत्रार्थस्तु—द्वितीयासमर्थेभ्यः अवारपारं इत्यादिभ्यो गामी इत्यर्थे खः—अवारपारीणः।

ननु अवारपारम् इत्यत्र "कर्त्तृकर्म्मणोःकृति" ( २।३।६५ ) इति षष्ठी भवितुमर्हति तर्हि कथमत्र द्वितीयासमर्थविभक्तिः स्यात्? उच्यते। "अकेनोर्भविष्यदाधमर्ण्ययोः" ( २।३।७० ) इति षष्ठीप्रतिषेधे सति द्वितीयासमर्थविभक्तिः स्यात्। अवारपार इति विपरीतम् अपि ग्राह्यं—तेन पारावारं गामी इति खः पारावारीणः। विगृहीतम् अपि ग्राह्यं—तेन अवारीणः, पारीणः। अत्यन्तं गामी इति खः अत्यन्तीनः। अत्यन्तं भृशं गन्ता इत्यर्थः। अत्यन्तम् अत्र क्रियाविशेषणे द्वितीया। अनुकामं गामी इति खः—अनुकामीनः। अनुकामं यथेष्टं गन्ता इत्यर्थः। अत्रापि क्रियाविशेषणे द्वितीया। तथाहि "अनुकामीनतां त्यज"। अनुकामीनता स्वेच्छा-गमनमित्यर्थः।

## १८११। समां समां विजायते ॥ ५।२।१२ ॥

**दो—। यलोपोऽवशिष्टविभक्तेरलुक् च पूर्वपदे निपात्यते। समांसमीना गौः। 'समांसमीना सा यैव प्रतिवर्षं प्रसूयते'। खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः॥ समां समां विजायते। समायां समायां वा।**

The suffix ख is attached to the word समांसमा to denote the female who conceives or delivers every year.

मित—। विजायते गर्भं धारयति, यद्वा विजायते गर्भं मुञ्चति, प्रसूते इत्यर्थः, समा अब्दः ; समांसमां इति वीप्सायां द्विरुक्तिः। द्वितीया तु अत्यन्तसंयोगे। समां समां विजायते गर्भधारणेन सकलापि समा व्याप्यते इत्यर्थः। समां समां विजायते इति एतस्मिन्नर्थे समांसमा इति एतस्मात् खप्रत्ययः स्यात् ; अपिच समांसमा इत्यस्य पूर्व्वपदे ( समाम् इत्यंशे ) विभक्तेः ( द्वितीया विभक्तेः) अलुक् स्यात्। तेन समांसमीनः इति रूपम्। समांसमीना गौः। समांसमीना वड़वा। समांसमीना प्रत्यब्दगर्भा। इयमेव व्याख्या-काशिकासम्मता ; परम् श्रीमान् दीक्षितः व्याख्यान्तरं स्वीकरोति। तस्य खलु अयम् आशयः—विजायते प्रसूते। गर्भमोचने हि विजिर्निर्वर्त्तते। समायां समायाम् इति वीप्सायां समायां इति द्विरुक्तात् प्रातिपदिकात् खप्रत्ययः स्यात्। खप्रत्ययसन्नियोगेन प्रकृतेः "समायां समा" इति स्थितिः। तथा सति "यलोपोऽवशिष्ट विभक्तेरलुक् च पूर्व्वपदे निपात्यते" ; पूर्व्वपदे "समायां समा" इति प्रकृतेः "समायाम्" इति अंशे यलोपः "समायां" इत्यस्य विभक्ति-चिह्नभूतानां यकारः आकारः अनुस्वारश्च इति एतेषां त्रयाणाम् मध्ये यकारस्य लोपः ; "अवशिष्ट विभक्तेः" आकारस्य अनुस्वारस्य च इत्यर्थः "अलुक्" लुगभावः "निपात्यते" निपातनेन जायते ; तेन पूर्व्वपदे समा आं इति स्थितम्। ततः सन्धिवलेन समां इति स्थितिः। एवं समांसमा इति प्रकृतिः स्थिता। तस्मात् खः—तेन समांसमीनः इति रूपम्। समांसमीना गौः। "प्रत्यब्दप्रसवा इत्यर्थः" इति भाषावृत्तिः। अपिच "खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः"—समायां समायां विजायते इत्यत्र खप्रत्ययस्य अवगमनात् प्रागेव यलोपः स्यात् विकल्पेन इति वाच्यम्। तेन समायां समायां विजायते इति वाक्यं स्यात्। एवं यलोपस्य वैकल्पिकत्वात् समां समां विजायते इत्यपि वाक्यं स्यात्। द्वितीयाम् इमां व्याख्यामपि काशिका प्रकरोति।

## १८१२। अद्यश्वीनावष्टब्धे ॥ ५।२।१३ ॥

**टी—। अद्य श्वो वा विजायते अद्यश्वीना वड़वा। आसन्नप्रसवा इत्यर्थः। केचित्तु विजायते इति नानुवर्त्तयन्ति। अद्यश्वीनम् मरणम्। आसन्नम् इत्यर्थः।**

The suffix ख is added to the word अद्यश्व an irregular compound, and in the aforesaid senses, and the word अद्यश्वीन is, at once, formed irregularly.

मित—। अद्यश्वीना अवष्टब्धे इति सूत्रच्छेदः। विजायते इति अनुवर्त्तते तेन सूत्रस्य अयमर्थः—"विजायते" इति एतस्मिन् विषये "अवष्टब्धे" आसन्नप्रसवे इति गम्यमाने "अद्यश्वीना"—अद्य श्वः इति प्रतिपदिकात् खप्रत्ययं विधाय, स्त्रीलिङ्गे अद्यश्वीना इतिरूपं जायते। अद्य श्वो वा विजायते इति अद्यश्वीना वड़वा; अद्यश्वीना गौः। अद्यश्वीना आसन्नप्रसवा इत्यर्थः।

ननु अद्यश्वो वा भविष्यति इति अद्यश्वीनं मरणम्। एवम् अद्यश्वीनो वियोगः इत्यादयः कथं साधवः स्युरिति प्रश्ने समाधत्ते—"केचित्" इत्यादिना। "केचित्" केचित् वैयाकरणाः "विजायते इति नानुवर्त्तयन्ति" विजायते इत्यंशस्य पूर्व्वसूत्रात् अस्मिन् सूत्रे अनुवृत्तिम् न उररीकुर्व्वन्ति। अवष्टब्धमात्रे खलु एवं स्यात् इति ते आहुः। तेनैव अद्यश्वीनं मरणम् इत्यादीनां साधुत्वम्; परं सूत्रे स्त्रीलिङ्गनिर्द्देशात् तत् न स्यात् इति भागवृत्तिर्घोषयति।

**१८१३। आगवीनः॥ ५।२।१४॥**

**टी—। आङ्पूर्वाद् गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्य्यन्तं यः कर्म करोति स आगवीनः।**

The suffix ख is attached to the irregularly compounded word आ गोः, and the word आगवीनः is at once formed, to denote the person who serves somebody till his cow ( pledged to the employer ) is returned.

मित—। आङ्पूर्व्वात् गोशब्दात् खप्रत्ययः स्यात् निपातनेन, आ तस्याः गोः प्रतिपादनात् कर्मकारिणि अभिधेये सति। आ गो ख इति आगवीनः। यो गवा भृतः कर्म करोति आ तस्याः गोः प्रत्यर्पणात् स आगवीनः। गोः प्रत्यर्पणं यावत् यः कर्म करोति स आगवीनः। [ N. B.—The idea is this :—a debtor

puts his cow as pledge in the house of a creditor ; he has to employ in the house of his crediter, till the cow is released ; such a man ( debtor ) is called आगवीनः ]

१८१४ । अनुग्वलं गामी ॥ ५।२।१५ ॥

टी— । अनुगु गोः पश्चात् पर्याप्तं गच्छति इति अनुगवीनो गोपालः ।

The suffix ख is attached to the word अनुगु to denote the person that runs after the cow.

मित— । अनुगु अलं गामी इति सूत्रच्छेदः । गोः पश्चात् इति अनुगु । "अव्ययं" इत्यादिना ( २।१।६ ) सूत्रेण पश्चात् इति अर्थे अव्ययीभावः । "गोस्त्रियोरुपसर्जनस्य" ( १।२।४८ ) इति ह्रस्वत्वम् । अलं पर्याप्तिवचने । अलं पर्याप्तं गमिष्यति इति अलंगामी । अत्र गन्तृमात्रे प्रत्ययः, तेन अलंगामी इत्यस्य अर्थः—यः पर्याप्तं गच्छति सः । अलंगामी इति एतस्मिन्नर्थे अनुगुशब्दात् खप्रत्ययः स्यात् । अनुगु ( गोः पश्चात् ) अलंगामी ( पर्याप्तं गच्छति ) इति खः—अनुगवीनः । अनुगवीनः गोपालः । गोपालः = गोरक्षकः ।

१८१५ । अध्वनो यत्-खौ ॥ ५।२।१६ ॥

टी— । अध्वानम् अलं गच्छति—अध्वन्यः । अध्वनीनः । "ये चाभावकर्म्मणोः", "आत्माध्वानौ खे" इति सूत्राभ्याम् प्रकृति-भावः ।

The suffix यत् and the suffix ख as well are added to the word अध्वन् in the aforesaid sense.

मित— । द्वितीयासमर्थात् अध्वन् इति प्रातिपदिकात् अलंगामी इति एतस्मिन् विषये यत्प्रत्ययः खप्रत्ययश्च स्याताम् । अध्वानम् अलं गच्छति इति यत् = अध्वन्यः । अध्वानम् अलं गामीति ख—अध्वनीनः ।

ननु प्रत्ययसन्नियोगेन "नस्तद्धिते" ( ६।४।१४४ ) इति नलोपः कथम् अत्र न स्यादिति चेत् ? उच्यते—"ये चाभावकर्मणोः (६।४।१६८) इति सूत्रेण यत्प्रत्यये परे प्रकृतिभावः, किञ्च "आत्माध्वानौ खे" ( ६।४।१६९ ) इति खप्रत्यये परे अपि अध्वन् इत्यस्य प्रकृतिभावः ।

१८१६ । अभ्यमित्राच्छ ॥ ५।२।१७ ॥

टी— । चात् यत्खौ—अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ।

The suffix छ as well as the suffixes यत् and ख are attached to the word अभ्यमित्र in the aforesaid sense.

N. B.—न मित्रम् = अमित्रः । The word is masc. by the लिङ्गानुशासनसूत्र "भावमित्र—" । This is Bhattoji's view. But Haradatta says that अमित्र is derived as अम ( धातु ) + इत्रच्—so it is masc.

मित— । अमित्रम् अभि ( अभिमुखम् ) इति अभ्यमित्रम् । "लक्षणेनाभिप्रती आभिमुख्ये" ( २।१।१४ ) इति समासः । अभ्यमित्रशब्दात् द्वितीयासमर्थात् अलं गामीति विषये छप्रत्ययः स्यात् ; अपिच सूत्रस्थचकारबलात् यत्प्रत्ययः खप्रत्ययश्च । अभ्यमित्रम् अलं गामी अभ्यमित्रीयः—अत्र छप्रत्ययः । अभ्यमित्र्यः—यत् । अभ्यमित्रीणः—खः । अस्य अर्थस्तु अमित्राभिमुखं सुष्ठु गच्छति यः सः ।

१८१७ । गोष्ठात् खञ् भूत-पूर्वे ॥ ५।२।१८ ॥

टी— । गोष्ठो भूतपूर्वः गौष्ठीनो देशः ।

The suffix खञ् is attached to the word गोष्ठ to imply the place which previously served the purpose of गोष्ठ ( grazing field ).

मित— । गावस्तिष्ठन्ति अत्र इति गोष्ठः । गोचारणभूमिः । गोष्ठशब्दात् खञ्प्रत्ययः स्यात् भूतपूर्व्वे—यस्मिन् देशे पूर्वं गोष्ठः आसीत् तस्मिन् देशे अभिधेये

सति—इत्यर्थः। गोष्ठः भूतपूर्वः यत्र स गोष्ठीनो देशः। यस्मिन् देशे पुरा गोष्ठः आसीत् सद्देशो गौष्ठीनः इत्यर्थः। भूतपूर्वग्रहणं किम्? गोष्ठः अधुना यत्र वर्त्तते इति प्रत्ययो न स्यात्।

१८१८। अश्वस्यैकाहगमः ॥ ५।२।१९ ॥

टी—। एकाह्नेन गम्यते इति ऐकाहगमः, आश्वीनोऽध्वा।

The suffix खञ् is attached to the word अश्व to denote the way, that a horse can cover (walk or run) in a single day.

मित—। एकम् अहः इति एकाहः। "उत्तमैकाभ्याम् च" (५।४।९०) इति समासः। एकाह्नेन गम्यते इति एकाहगमः। एकाहगम इति एतस्मिन्नर्थे अश्व-शब्दात् षष्ठीसमर्थात् खञ् प्रत्ययः स्यात्। अश्वस्य एकाहगमः अध्वा इति आश्वीनः अध्वा। "आश्वीनानि शतं पतिता" इति काशिका।

१८१९। शालीनकौपीने अधृष्टाकार्ययोः ॥ ५।२।२० ॥

टी—। शालाप्रवेशम् अर्हति शालीनः अधृष्टः। कूप-पतनमर्हति कौपीनं पापम्। तत् साधनत्वात् तद्वद् गोप्यत्वात् पुरुषलिङ्गमपि। तत्सम्बन्धात् तदाच्छादनमपि।

The suffix खञ् is attached to the words शाला and कूप and the words शालीन and कौपीन are irregularly formed in the senses of "meek" and "avoidable" respectively.

मित—। अधृष्टः अप्रगल्भः। अकार्यम् अकरणार्हं विरुद्धम् इत्यर्थः। शालाम् लक्षणया शालाप्रवेशम् अर्हति इति विषये "अधृष्टः अप्रगल्भः" इति गम्ये सति शालाशब्दात् खञ् प्रत्ययो निपात्यते शालीनः। शालीनः अधृष्टः अप्रगल्भः इत्यर्थः। शालीनः जड़ः, शालीना वधूः। "शशाक शालीनतया न वक्तुम्"। अपिच कूपम् लक्षणया कूपपतनं (कूपप्रवेशम् इति भाषावृत्तिः, कूपावतारम् इति काशिका) अर्हति इति विषये "अकार्यम्" करणानुचितम् इति गम्ये कूपशब्दात् खञ्प्रत्ययः निपात्यते—

कौपीनम्। कौपीनं पापम्। कौपीनम् अकार्य्यम्। पुरुषस्य लिङ्गं बहुशः पापं साधयति। तेन तत्साधनत्वात् पाप-साधनत्वात् (कौपीन-साधनत्वात्) इति यावत् पुरुष-लिङ्गमपि कौपीनमुच्यते। किञ्च पापं यथा गोप्यं तथा पुरुषलिङ्गमपि, तेनैव हेतुनाच पुरुषलिङ्गं कौपीनम् उच्यते। अपिच पुरुषलिङ्गसम्बन्धात् तस्य पुरुष-लिंगस्य यत् आच्छादनम् (वासः) तदपि कौपीनम् उच्यते।

१८२०। व्रातेन जीवति॥ ५।२।२१॥

**दी—। व्रातेन शरीरायासेन जीवति नतुबुद्धिवैभवेन स व्रात्यः।**

The suffix खञ् is attached to the word व्रात to denote the person that earns his living by व्रात (physical labour only).

मित—। "ये शरीरम् आयास्य जीवन्ति ते व्राताव्याधादयः तत् कर्म्मापि व्रातम्" इति भाषावृत्तिः। "व्रात-शब्दात् तृतीयासमर्थात् जीवतीति एतस्मिन्नर्थे खञ् प्रत्ययोभवति" इति काशिका। व्रातेन शरीरायासेन जीवति = नतु बुद्धिवैभवेन इति व्रातशब्दात् खञ्—तेन व्रातीनः। व्रातीनो विप्रः। "व्रातीनसंघाः प्रकटं नरेन्द्रैस्ते राक्षसाः सङ्कटमात्त नीता इति व्योषः"—भाषावृत्तौ।

१८२१। साप्तपदीनं सख्यम्॥ ५।२।२२॥

**दी—। सप्तभिः पदैरवाप्यते साप्तपदीनम्॥**

To imply सख्य (friendship), the suffix खञ् is attached to the word सप्तपद and the word साप्तपदीनम् is at once formed.

मित—। सप्तभिः पदैः (पादपातैः शब्दोच्चारणैर्वा) अवाप्यते इति विषये सख्यम् बन्धुत्वम् इति गम्ये सति सप्त-पदशब्दात् खञ् प्रत्ययः स्यात्—तेन साप्त-पदीनम् इति तद्धितार्थे द्विगुसमासनिष्पन्नं पदम् सिध्यति। साप्तपदीनं सख्यम् इत्यर्थः। तथा च कुमारे "सतां सन्नतगात्रि सङ्गतं साप्तपदीनमुच्यते"।

ननु साप्तपदीनः सखा, साप्तपदीनं मित्रम् इत्यादि-प्रयोगः कथं सङ्गच्छते ? उपचारात् सख्यवान् सखा अपि साप्तपदीनः सखा ।

**१८२२ । हैयङ्गवीनं संज्ञायाम् ॥ ५।२।२३ ॥**

**टी— । ह्योगोदोहस्य हियङ्गुरादेशः विकारार्थे खञ् च निपात्यते । दुह्यते इति दोहः क्षीरम् । ह्योगोदोहस्य विकारो हैयङ्गवीनं नवनीतम् ।**

The suffix खञ् is attached to the word ह्योगोदोह in the sense of विकार, i. e. some production out of it, and before the suffix, the stem is changed to हियंगु—so that the word हैयंगवीन is at once formed to mean some particular kind of clarified butter.

मित— । ह्यो गोदोहः इति ह्योगोदोहः सुप्सुपा । अस्मात् प्रातिपदिकात् "तस्य विकारः" इति एतस्मिन्नर्थे खञ्प्रत्ययः स्यात् संज्ञायाम्—प्रत्ययसन्नियोगेन च ह्योगोदोह इत्यस्य स्थाने हियंगु इति आदेशः निपात्यते । दुह्यते य स दोहः इति । कर्मणि वाच्ये घञ्प्रत्ययः—तेन दोहः इत्यस्य क्षीरम् इत्यर्थः । ह्यः (पूर्वदिने) गोदोहः इति सुप्सुपा इति कैयटः । तस्य ह्योगोदोहस्य पूर्व्वेद्युः भूतस्य गो-क्षीरस्य विकारः इति खञ् । ततः प्रकृतिस्थाने हियंगुरिति आदेशः । तेन हैयंगवीनम्=घृत-विशेषस्य संज्ञा—नवनीतम् इत्यर्थः । तेन एतस्मात् अन्यत्र न स्यात्, यथा ह्योगोदोहस्य विकार उदश्वित् इत्यत्र प्रत्ययो नेष्टः । नहि उदश्वित् घृत-विशेषः । ["हैयंगवीनमादाय" इति रघुवंशे] ।

**१८२३ । तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ ५।२।२४ ॥**

**टी— । पीलूनां पाकः पीलुकुणः । कर्णस्यमूलं कर्ण-जाहम् ।**

The suffix कुणप् is attached to the words that pass by the

term पील्वादि to imply the cooking of the same, and the suffix जाहच् is attached to the word कर्ण and others of the कर्णादि class to denote the root ( or source ) of the same.

मित— । तस्य इति षष्ठीसमर्थेभ्यः पीलु एवमादिभ्यः कुणप्‌प्रत्ययः स्यात् पाक इति एतस्मिन् विषये, तथा कर्ण एवमादिभ्यः जाहच्‌प्रत्ययः स्यात् मूलमिति एतस्मिन्नर्थे । पीलु फलविशेषः । श्रीवृन्दावनादौ लभ्यते । अस्य भक्षणकथा श्रीचैतन्यचरितामृते दृश्यते च । पीलूनां पाकः इति पीलुकुणः । कर्कन्धु बदरी । तस्य पाकः कर्कन्धु-कुणः । शम्याः पाकः शमीकुणः । पील्वादिर्यथा—पीलु, कर्कन्धु, शमी, करीर, कुवल, बदर, अश्वत्थ, खदिर । कर्णादिभ्यो यथा—कर्णस्य मूलम् कर्णजाहम्,"कर्णजाह-विलोचना ।" अक्ष्णः मूलमिति अक्षिजाहम् । कर्णादि र्यथा—कर्ण, नख, मुख, केश, पाद, भ्रू, गुल्फ, ओष्ट, शृंग, अक्षि, दन्त, पृष्ट, अंगुष्ट ।

## १८२४ । पक्षात्तिः ॥ ५।२।२५ ॥

**टी— । मूलग्रहणमात्रम् अनुवर्त्तते । पक्षस्य मूलं पक्षतिः ।**

The suffix ति is added to the word पक्ष to denote the मूल ( root—source or beginning ) of the same.

मित— । पूर्वसूत्रात् मूलम् इत्येव अनुवर्त्तते—नान्यत् । पक्षशब्दात् तिप्रत्ययः स्यात् तस्य मूलमित्येव अर्थे । पक्षस्य मूलं पक्षतिः । पक्षतिः पक्षस्य मूलं = प्रतिपत् । "चन्द्रलेखेव पक्षतौ" । विहगानां पक्षमूले अपि पक्षतिः प्रयुज्यते—"चञ्चत्पक्ष-तिभिः खगैः ।"

## १८२५ । तेन वित्तश्चुञ्चुप्चणपौ ॥ ५।२।२६ ॥

**टी— । पकारः प्रत्ययोरादौ लुप्तनिर्दिष्टस्तेन चस्य नेत्-संज्ञा । विद्यया वित्तः विद्याचुञ्चुः । विद्याचणः ।**

The suffix चुञ्चुप् as well as the suffix चण is (or—are)

attached to words to denote the person that is an adept in the subjects implied by the said words.

मित— । वित्तः प्रतीतः ज्ञातः इत्यर्थः । तेन इति तृतीयासमर्थात् वित्तः इति एतस्मिन्नर्थे चुञ्चुप् चणप् इति एतौ प्रत्ययौ भवतः । विद्यया वित्तः विद्याचुञ्चुः, विद्याचणः । वेदान्तेन वित्तः वेदान्तचुञ्चुः । केशेनवित्तः केशचणः । "रामोऽपि मायाचणमन्वचुञ्चुः" इति भट्टिकाव्ये ।

ननु "चुटू" ( १।३।७ ) इति सूत्रेण चुञ्चुप् चणप् इति प्रत्ययद्वयस्य आदिस्थितौ चकारौ इतौ भवितुम् अर्हतः । कथं तन्न स्यादिति चेत्—उच्यते—"यकारः" इत्यादि । प्रत्ययद्वयस्य आदौ यकारो लुप्तस्तिष्टति इति निर्द्दिष्टम् । तेन अत्र चकारस्य प्रत्ययादित्वाभावात् न इत् ।

## १८१६ । विनञ्भ्यां नानाञौ न सह ॥ ५।२।२७ ॥

**दी— । असहार्थे पृथग्भावे वर्त्तमानाभ्यां स्वार्थे प्रत्ययौ । विना । नाना ।**

The suffix ना is attached to the particle वि, and the suffix नाञ् to the particle न—both in the sense of separation.

मित— । न सह इति प्रकृतिविशेषणं न सह असहार्थः, पृथग्भावः इत्यर्थः । न सहः यो विः तथा न सहः यो ना, ताभ्याम् ना नाञ् इति प्रत्ययौस्तः । अतएव असहार्थे ( पृथग्भावे ) वर्त्तमानः यो "विः"—तस्मात् तथा असहार्थे वर्त्तमानः यो "ना", तस्मात् च स्वार्थे ना नाञ् इति प्रत्ययौ यथासंख्यं स्तः, विना, नाना । "धर्मं विना कुतः सुखम् ? नाना नारीं निष्फला लोकयात्रा" ।

## १८१७ । वेः शालच्छङ्कटचौ ॥ ५।२।२८ ॥

**दी— । क्रिया-विशिष्ट-साधन-वाचकात् स्वार्थे । विस्तृतम् । विशालम् । विशङ्कटम् ।**

The suffixes शालच् and शङ्कटच् are attached to the particle वि।

मित—। वि: इत्यस्मात् शालच्, शङ्कटच्, इति एतौ प्रत्ययौ स्त: स्वार्थे—विशालम्। विशङ्कटम्।

ननु वि: इत्यस्य कोऽर्थ: येन स्वार्थे प्रत्यय: इष्यते? उच्यते—"क्रियाविशिष्ट साधनवाचकात् स्वार्थे" इति, क्रिया-विशिष्ट-साधन-वाचकात् साधन-क्रियावचनात् उपसर्गात् स्वार्थे एतौ प्रत्ययौस्त:। वि = इत्यस्य विस्तृतम् इत्येव स्थितिरितिज्ञेयम्। तेन विस्तृतम् इति शालच्—विशालच्। शङ्कटच्—विशङ्कटम्। "वि:—विततार्थ:" इति भाषावृत्ति:।

## १८१८। संप्रोदश्च कटच्॥ ५।२।२९॥

## टी—। संकटम्। प्रकटम्। उत्कटम्। चाद्विकटम्।

The suffix कटच् is attached to सम् प्र उद, and also to वि।

मित—। सम् प्र उद् इति एतेभ्य: कटच् प्रत्यय: स्यात्, संकटम्, प्रकटम्, उत्कटम्। सूत्रे यश्चकारोदृश्यते, तस्य वलात् वि इत्यस्मादपि—तेन विकटम्। नि इत्यस्मादपि इति भाषावृत्तिस्तेन निकटम्।

## टी—। अलाबुतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्॥

मित—। रजसि वाच्ये अलाबु तिल उमा भंगा इति एतेभ्य: कटच् स्यात्। अलाबूनां रज: अलाबुकटम्, तिलकटम्, उमाकटम्, भंगाकटम्। अपिच—माषकटम्, अणुकटम् इति द्वयमपि स्यात् इति भाषावृत्ति:।

## टी—। गोष्ठजादय: स्थानादिषु पशुनामभ्य:॥ गवां स्थानं गोगोष्ठम्।

मित—। पशूनाम् नामवाचिभ्य: प्रातिपदिकेभ्य: गोष्टच् इत्येवमादय: प्रत्यया: स्यु: स्थानम् एवम् आदिषु अभिधेयेषु। तथाहि स्थाने गम्ये पशुवाचिभ्य: गोष्टच् स्यात् यथा गवां स्थानं गोगोष्टम्। महिषीनां स्थानं महिषीगोष्टम्। एवं उष्ट्रगोष्टम्। अविगोष्ठम्।

दी—। संघाते कटच् ॥ अवीनां संघातः अविकटः।

मित—। संघातः समष्टिः। संघाते अभिधेये सति, येषां संघातस्तेभ्यः कटच्प्रत्ययः स्यात्। अवि मेषः। अवीनाम् संघातः अविकटः। अविसमूहः इत्यर्थः। अविशब्दादेव कटच् स्यात् इति भाषावृत्तिः।

दी—। विस्तारे पटच् ॥ अविपटः।

मित—। विस्तारः प्रसारः। विस्तारे अभिधेये, यस्य विस्तारस्तद्वाचकात् शब्दात् पटच्प्रत्ययः स्यात्। अवीनां विस्तारः अविपटः।

दी—। द्वित्वे गोयुगच् ॥ द्वावुष्ट्रौ उष्ट्रगोयुगम्।

मित—। (पशूनाम्) द्वित्वे अभिधेये गोयुगच् इति प्रत्ययः स्यात्; द्वौ उष्ट्रौ इति गोयुगच् प्रत्ययः—तेन उष्ट्रगोयुगम्। द्वौ अश्वौ अश्वगोयुगम्। द्वौ गावौ गो-गोयुगम्।

दी—। षट्त्वे षड्गवच् ॥ अश्व-षड्गवम्।

मित—। (पशूनाम्) षट्संख्याकत्वे अभिधेये सति षड्गवच्प्रत्ययः स्यात्। अश्वानां षट्कम् अश्वषड्गवम्। हस्तिनां षट्कम् हस्तिषड्गवम्।

दी—। स्नेहे तैलच् ॥ तिलतैलम्। सर्षपतैलम्।

मित—। स्नेहे स्नेहमय-वस्तुनि ( oily substance ) अभिधेये सति, यस्य स्नेहः अभिधीयते तस्मात् तैलच्प्रत्ययः स्यात्। तिलस्य स्नेहः तिलतैलम्। सर्षपस्य स्नेहः सर्षपतैलम्। एरण्डस्य स्नेह एरण्डतैलम्। इङ्गुद्याः स्नेहः इंगुदी-तैलम्।

दी—। भवने क्षेत्रे शाकटशाकिनौ ॥ इक्षुशाकटम्। इक्षुशाकिनम्।

मित—। भवने क्षेत्रे यस्मिन् क्षेत्रे उत्पन्नः सन् इक्ष्वादिस्तिष्ठति तस्मिन् क्षेत्रे अभिधेये सति शाकट शाकिन इति प्रत्ययौ स्तः। इक्षूणां भवनं क्षेत्रम् इक्षु-

शाकटम्। इच् शाकिनम्। मूलकानां भवनं चेत्वम् मूलकशाकटम्। मूलकशाकिनम्।

१८१८। अवात् कुटारच्च ॥ ५।२।३० ॥

दी—। चात् कटच्। अवाचीनोऽवकुटारः। अवकटः।

The suffix कुटारच् as well as the suffix कटच् is added to अव।

मित—। अव इत्यस्मात् कुटारच्प्रत्ययः स्यात्; सूत्रस्थचकारबलात् कटच् प्रत्ययोऽपि। अवाचीनो अवकुटारः। अवकटः। क्रियाविशिष्टसाधनवाचकात् एव प्रत्ययो मन्तव्यस्तेन अवाचीनः ( अवकुटारः ) इति एवम्भूतं वाक्यं दर्शितम्।

१८२०। नते नासिकायाः संज्ञायां टीटञ्-नाटज्-भ्रटचः ॥ ५।२।३१ ॥

दी—। अवादित्येव। नतं नमनं। नासिकायाः नतं अवटीटम्। अवनाटम्। अवभ्रटम्। तद्योगात् नासिका अवटीटा। पुरुषोऽपि अवटीटः।

The suffix टीटञ्, नाटज् and भ्रटच् are added to अव to denote the hanging or bending state of nose; the nose itself or the owner of such nose may also be implied by the words thus formed.

मित—। नतम् नमनम्। नम्धातोर्भावे क्तप्रत्ययः। नासिकायाः नमने अभिधेये सति संज्ञायां विषये अव इत्यस्मात् टीटञ् नाटज् भ्रटच् इति प्रत्ययाः स्युः। नासिकायाः नतम् अवटीटम्, अवनाटम्, अवभ्रटम्। अपिच अवटीटम् अवनाटम् अवभ्रटम् इति एतेषां योगात् नासिका अपि अवटीटा वा अवनाटा वा इति कथ्यते। किञ्च एवम्भूतायाः नासिकायाः स्वामी पुरुषोऽपि अवटीटो वा अवनाटो वा अवभ्रटो वा उच्यते।

१८२१। नेर्विडज्विरीसचौ ॥ ५।२।३२ ॥

दी—। निविड़म्। निविरीसम्।

The suffix विड़च् as well as the suffix विरीसच् is ( or—are ) added to the particle नि।

मित—। नि इत्यस्मात् विड़च् विरीसच् इति प्रत्ययौ स्त:; निविड़म्; निविड़ं वस्त्रम्; निविड़ा: केशा:। निविरीसम्; "उरु निविरीसनितम्बभारखेदि"। अत्र नासिकाया: नते एवं वाच्ये प्रत्यय: इष्ट इति काशिका,। तादृशनासिकायोगात् पुरुषोऽपि निविड़:, निविरीस:; निविड़ा: केशा: निविड़म् वस्त्रम् इत्यादयस्तु उपमानात् भविष्यन्ति इति काशिकाया: मतम्।

१८२२। इनच्पिटच्चिकचि च ॥ ५।२।३३ ॥

दी—। नेरित्येव। नासिकाया नते अभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिकचि इत्यादेशौ च। कप्रत्ययचिकादेशौ च वक्तव्यौ॥ (वा)॥ चिकिनम्। चिपिटम्। चिक्कम्।

The suffix इनच् and पिटच् are attached to the particle नि to denote some inclination of the nose; before the suffix इनच् the particle नि is replaced by चिक and before पिटच, by चि; the suffix क is also affixed to नि in the self-same sense, and नि is replaced by चिक।

मित—। नासिकाया: नते अभिधेये नि इत्यस्मात् इनच् प्रत्यय: स्यात्; प्रत्ययसन्नियोगेन नि:इत्यस्य स्थाने चिक् इति आदेश:; नि इनच्=चिक् इन=चिकिन:। तथा पूर्व्वोक्ते विषये पिटच् प्रत्यय: अपि स्यात्; तस्मिन् परे नि: इत्यस्य स्थाने चि इति आदेश:; नि पिटच्=चिपिट=चिपिटम्; अपिच पूर्व्वोक्ते विषये कप्रत्ययोऽपि स्यात्—तथासति नि: इत्यस्य स्थाने चिक् इति आदेश:; नि क=चिक् क=चिक्कम्।

**टी—। क्लिन्नस्य चिल् पिल्लश्चास्य चक्षुषी। (वा)। क्लिन्ने चक्षुषी अस्य—चिल्लः। पिल्लः।**

मित—। अपि च "क्लिन्ने अस्य चक्षुषी" इति अभिप्रेते सति क्लिन्नशब्दात् ल-प्रत्ययः स्यात्; प्रत्ययसन्नियोगेन क्लिन्न इत्यस्य स्थाने चिल् इत्यादेशः तथा पिल् इत्यादेशश्च स्याताम्; क्लिन्ने अस्य चक्षुषी इति क्लिन्न-शब्दात् लप्रत्ययः; चिल् इति आदेशः—तेन चिल्लः इति रूपम्। पिल् इति आदेशः—तेन पिल्लः इति रूपम्।

**टी—। चुल् च॥ (वा)। चुल्लः।**

मित—। चुलादेशश्चापि स्यात्, क्लिन्ने चक्षुषी अस्य इति चुल्लः, चक्षुषोरेवा-भिधाने प्रत्यय इष्यते—तेन क्लिन्ने चक्षुषी इतिवक्तव्ये चिल्ले पिल्ले, चुल्ले इति एते साधवः स्युः; एतेषां योगात् पुरुषोऽपि चिल्लः पिल्लः चुल्लः वा इति एतदपि स्यात्।

**१८२३। उपाधिभ्यां त्यकन्नासन्नारूढयोः॥ ५।२।३४॥**

**टी—। संज्ञायामित्यनुवर्त्तते। पर्वतस्य आसन्नं स्थलम् उपत्यका। आरूढं स्थलम् अधित्यका।**

The suffix त्यकन् is attached to उप to denote the adjacent land ( vale, valley or dale ) of the mountain, and the same suffix is attached to अधि to denote the high land of mountains ( tableland, pleateaux ).

मित—। संज्ञायाम् इत्यस्य अनुवृत्तिः। अतएव अयमर्थः—संज्ञायां विषये उप अधि इति एताभ्याम् त्यकन् प्रत्ययः स्यात् यथासंख्यम् आसन्नः आरूढ इति एतयोरेव अर्थयोः। उप त्यकन् उपत्यका। पर्व्वतस्य आसन्नं स्थलम्। अधि त्यकन् अधित्यका—पर्व्वतस्य आरूढं स्थलम्। तथाहि "उपत्यकाद्रेरासन्नाभूमि-रूर्द्ध्वमधित्यका" इत्यमरः। अनयोः स्त्रीत्वम् अभिधानादेव।

ननु "प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" (७।३।४४) इति प्राप्तम् इत्वं कथं न स्यात्; उच्यते—संज्ञाधिकारादेव; तथाहि "न यासयोः" (७।३।४५) इति सूत्रे "यत्तदोः प्रतिषेधे त्यकन उपसंख्यानम्, उपत्यका, अधित्यका," इति काशिका; किञ्च समुद्रस्य अपि आसन्नाभूमिरुपत्यका इत्यपि वक्तुं शक्यं स्यात्। तथाहि भाषावृत्तौ "समुद्रस्यासन्ना भूमिरुपत्यका समुद्रस्य वनराजी। गिरिमधिरूढ़ाऽधित्यका गिरेः। समुद्रोपत्यका हैमी पर्वताधित्यका पुरीति भट्टिः।"

## १८२४। कर्मणि घटोऽठच्॥ ५।२।३५॥

**टी—। घटते इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः।**

The suffix अठच् is added to the word कर्मन् to denote the person that is expert in the same.

मित—। घटते अयम् इति घटधातोरच् प्रत्ययः—"नन्दि ग्रहि पचादिभ्यः—" (३।१।१३४) इति सूत्रेण। घटः साधुः कुशलः इत्यर्थः। कर्मशब्दात् सप्तमी-समर्थात् घटः इति एतस्मिन् विषये अठच् प्रत्ययः स्यात्। कर्मणि घटते इति कर्मन्-शब्दात् अठच्। "नस्तद्धिते" (६।४।१४४) इति नलोपः। "यस्येति च" (६।४।१४८) इति अकारलोपः—तेन कर्मठः इति।

## १८२५। तदस्य संजातं तारकादिभ्य इतच्॥ ५।२।३६॥

**टी—। तारकाः संजाता अस्य तारकितं नभः। आकृति-गणोऽयम्।**

The suffix इतच् is added to words that pass by the name तारकादि, to denote the things which are endowed with the objects, expressed by the said words of the तारकादि class.

मित—। तदिति प्रथमासमर्थेभ्यः तारका इति एवमादिभ्यः प्रातिपदिकेभ्यः अस्य इति षष्ठ्यर्थे इतच् इति प्रत्ययः स्यात्। तारकाः संजाताः अस्य इति तारकितं

नभः। तारकादिराकृतिगणः। केचित् तारकादिगणपठिताः लिख्यन्ते ऽत्र— तारका, पुष्प, सुख, दुःख, फल, कुसुम, मुकुल, कुड्मल, तन्द्रा, बुभुक्षा, पिपासा, ज्वर रोग, व्रण, व्याधि, लज्जा, उत्कण्ठा, विचार, प्रचार, वेग, श्रद्धा, भर, इत्यादयः। पुष्पितः वृक्षः, कुसुमित,—"फुल्लकुसुमित द्रुमदलशोभिनी"। बुभुक्षितः—"बुभुक्षितः किं न करोति पापम्," पक्षान्तरम्। अपिच गर्भादप्राणिनि—प्राणिनः अन्यस्मिन् अभिधेये सति, गर्भशब्दः अत्र पठ्यते, गर्भिताः शालयः। अप्राणिनि इति किम्? गर्भिणी गौः।

## १८२६। प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥ ५।२।३७॥

**दी—। तदस्येति अनुवर्त्तते। ऊरू प्रमाणमस्य इति ऊरुद्वयसम्। ऊरुदघ्नम्। ऊरुमात्रम्।**

The suffixes द्वयसच्, दघ्नच् and मात्रच् are added to words that stand for some measurement.

मित—। तदस्य इति अनुवर्त्तते। तदिति प्रथमासमर्थात् प्रातिपदिकात् अस्य इति षष्ठ्यर्थे द्वयसच् दघ्नच् मात्रच् इति प्रत्यया भवन्ति, यत् खलु प्रथमासमर्थं प्रमाणं चेत् तत् स्यात्। ऊरू प्रमाणमस्य इति ऊरुद्वयसम्। ऊरुदघ्नम्, ऊरुमात्रम्। एवं जानुप्रमाणमस्य जानुद्वयसम्, जानुदघ्नम्, जानुमात्रम्। ऊरुद्वयसम् वयः। जानुद्वयसी नदी। "गिरिकूटदघ्नः" इति भट्टी।

**दी—। प्रमाणे लः ॥ (वा)॥ शमः। दिष्टिः। वितस्तिः।**

मित—। लः इति लुकः पूर्वाचार्य्यैः विहिता संज्ञा। प्रमाणशब्दा इति ये प्रसिद्धास्तेभ्यः उत्पन्नस्य द्वयसच् दघ्नच् मात्रच् इति प्रत्ययस्य लुक् स्यात्। शमश्चतुर्द्दशांगुलः। शमः प्रमाणमस्य इति विहितस्य प्रत्ययस्य लुक् तेन शम इति दिष्टिः प्रमाणमस्य इति विहितस्य प्रत्ययस्य लुक् दिष्टिः। वितस्तिः प्रमाणमस्य इति विहितस्य प्रत्ययस्य लुक्—वितस्तिः। एवं हस्तप्रमाणमस्य इति हस्तः। मुष्टिः प्रमाणमस्य इति मुष्टिः।

**टी---। द्विगोर्नित्यम् ॥ द्वौ शमौ प्रमाणमस्य इति द्विशमम्।**

मित—। द्विगुसमासे प्रमाणवाचिभ्यः शब्देभ्यो विहितस्य द्वयसजादेः प्रत्ययस्य लुक् स्यात् नित्यम्। द्वौ शमौ प्रमाणम् अस्य इति द्विशमम्। एवं द्वि-वितस्ति, त्रिशमम्, त्रि-वितस्ति। द्वि-जानु जलम् इति भाषावृत्तिः। अतएव तन्मते द्विगुसमासे यथा प्रसिद्ध-प्रमाण-वाचिभ्यो विहितस्य प्रत्ययस्य लुक् स्यात्, तथा यत् किञ्चिदपि प्रमाणम् वक्ति यः शब्दः तस्मादपि विहितस्य प्रत्ययस्य लुक् स्यात्। द्विगु-समासे तन्मते अविशेषेणैव लुक् इति द्वि-जानु जलमिति दृष्टान्तप्रदर्शनेन प्रतीयते इति।

ननु "नित्यम्" इति कथं सूत्रे गृह्यते? उच्यते। "प्रमाण-परिमाणाभ्याम् संख्यायाश्चापि संशये मात्रच् वक्तव्यः" इति संशये विधीयमानस्य मात्रच् इति प्रत्ययस्य अपि द्विगुसमासे लुक् स्यात् इति ज्ञापयितुम्। यथा—अस्य परिमाणम् द्वे दिष्टी स्याताम् वा नवा इति द्वि-दिष्टिः—अत्र विहितस्य मात्रच् प्रत्ययस्य लुक्।

**टी—। प्रमाणपरिमाणाभ्याम् संख्यायाश्चापि संशये मात्रच् वक्तव्यः। (वा)॥ शममात्रम् प्रस्थमात्रम्। पञ्चमात्रम्।**

मित—। प्रसिद्ध-प्रमाण-वाचिभ्यः, परिमाण-वाचिभ्यस्तथा संख्यायाश्चापि संशये (संदिग्धविषये) मात्रच् प्रत्ययः स्यात्। उभयकोटिकं ज्ञानं संशयः। प्रमाण-वाचिनस्तावत्-शमः प्रमाणम् अस्य स्यात् न वा इति शममात्रम्। एवं हस्तमात्रम् दिष्टिमात्रम्। परिमाण-वाचिभ्यः—प्रस्थं परिमाणं स्यादस्य नवेति प्रस्थमात्रम्, एवं कुड़वमात्रम्। संख्यायाः—पञ्च परिमाणम् अस्य स्यान्नवेति पञ्चमात्रम्, एवं दशमात्रम्। "दशमात्रा गावः" इति काशिका।

**टी—। वत्वन्तात् स्वार्थे द्वयसज्मात्रचौ बहुलम्। (वा)। तावदेव तावद्द्वयसम्। तावन्मात्रम्।**

मित—। वतु प्रत्ययनिष्पन्नेभ्यः शब्देभ्यः स्वार्थे द्वयसज् मात्रच् इति एतौ

स:, तावदेव तावद्वयसम्—तावदेव तावन्मात्रम्। एतावदेव एतावद्वयसम्—एतावन्मात्रम्। बहुल ग्रहणात् अन्यत्रापि दृश्यते—तदेव तन्मात्रम्। चिदेव चिन्मात्रम्।

## १८२७। पुरुष-हस्तिभ्यामण् च ॥ ५।२।३८ ॥

**टी—। पुरुष: प्रमाणमस्य पौरुषम्। पुरुषद्वयसम्। हास्तिनम्। हस्तिद्वयसम्।**

The suffix अण् may, as well, be added to the words पुरुष and हस्तिन् when they stand for some measurement.

मित—। तदस्य इत्येव। प्रमाणे वर्त्तमानाभ्याम् पुरुष हस्तिन् इति एताभ्याम् अण्प्रत्यय: स्यात् षष्ठ्यर्थे। सूत्रस्थ—चकारबलात् द्वयसच्, दघ्नच्, मात्रच् इति त्रयमपि स्यात्। पुरुष: प्रमाणम् अस्य इति अण् पौरुषम्, पौरुषम् अम्भ:, पुरुषद्वयसम्। हस्ति प्रमाणम् अस्य इति अण् हास्तिनम्, "नस्तद्धिते" (६।४।१४४) इति नलोपस्य प्रसक्तौ "इनण्यनपत्ये" (६।४।१६४) इति प्रकृतिभाव:। हस्तिद्वयसम्। हस्तिदघ्नम्। हस्तिमात्रम्। द्विगोर्नित्यं लुक्—तेन द्विपुरुषम् उदकम्। त्रिपुरुषम् उदकम्। द्वि-हस्ति, त्रि-हस्ति, स्त्रियां द्वि-पुरुषी, त्रि-पुरुषी, द्वि-हस्तिनी, त्रि-हस्तिनी। द्विपुरुषा, त्रिपुरुषा इत्यपि—"पुरुषात् प्रमाणेऽन्यतरस्यामिति" (४।१।२४) सूत्रेण।

## १८२८। यत्तदेतेभ्य: परिमाणे वतुप् ॥ ५।२।३९ ॥

**टी—। यत्-परिमाणमस्य यावान्। तावान्। एतावान्।**

The suffix वतुप् is added to the words यद्, तद्, and एतद् in the sense of measurement.

मित—। तदस्य इति अनुवर्त्तते। यद् तद् एतद् इति एतेभ्य: प्रथमासमर्थेभ्य: परिमाणे वर्त्तमानेभ्यो वतुप् प्रत्यय: स्यात्। यत्-परिमाणमस्य इति यद्शब्दात् वतुप् तेन यावत् इति। पुंलिंगे यावान्, स्त्रियां यावती, क्लीवे यावत्। तत् परिमाणमस्य इति तावान्। एतत् परिमाणमस्य इति एतावान्।

वतुपि परे आकारादेशस्तु "आ सर्व्वनाम्नः" (६।३।८९) इति सूत्रेण भवति। सूत्रे परिमाणम् इति कथं गृह्यते—पूर्वसूत्रात् "प्रमाणे" इत्यस्मिन् अनुवर्त्तमाने सति। "प्रमाणग्रहणेऽनुवर्त्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात्" इति काशिका।

१८२८। किमिदंभ्यां वो घः॥ ५।२।४०॥

टी—। आभ्याम् वतुप् स्यात् वस्य च घः। कियान्। इयान्।

The suffix वतुप—added to the words इदम् and किम् in the aforesaid sense, changes its व into घ; (घ=इय)।

मित—। किम् इदम् इति एताभ्याम् प्रथमासमर्थाभ्याम् प्रमाणे वर्त्तमानाभ्याम् वतुपप्रत्ययः स्यात् षष्ठ्यर्थे; तथा वतुप इत्यस्य वकारस्य घकारादेशश्च भवति। किं परिमाणमस्य इति कियान्। स्त्रीलिंगे कियती। इदं परिमाणम् अस्य इति इयान्—स्त्रियां इयती। वतुपि परे "इदं किमोरीश्की" (६।३।९०) इति सूत्रेण किम् स्थाने की, इदं स्थाने ई (ईश्) इति भवतः। ततः की वान ई वान इति स्थिते सति वस्थाने घादेशः। घस्तु तद्धितविषये इयः। ततः ई इयान की इयान इति स्थिते सति "यस्येति च" (६।४।१४८) इति ईकारलोपः—तेन इयान कियान इति रूपद्वयम्।

१८३०। किमः संख्यापरिमाणे डति च॥ ५।२।४१॥

टी—। चाद्वतुप्। तस्य च वस्य घः स्यात्। का संख्या येषां ते कति—कियन्तः। त्वेपे तु न। का संख्या एषां दशानाम्।

The suffix डति as well as the suffix वतुप is added to the word किम् to denote the counting of members; and the व of वतुप is replaced by घ, i. e. इय। For rest see Tika.

मित—। संख्यायाः परिमाणं संख्यापरिमाणं संख्यापरिच्छेदः इत्यर्थः। संख्यापरिमाणे वर्त्तमानात् किम् इत्यस्मात् डतिप्रत्ययः स्यात्; तथा सूत्रस्थस्य चकारस्य

वलात् वतुप् अपि भवति ; वतुप्प्रत्ययस्य वकारस्थाने घ इति आदेशश्च वेदितव्यः। घस्थाने इयः स्यादिति बोध्यम्। का संख्या येषां ते कति। किम् शब्दात् डति प्रत्ययस्य डित्वात् टेर्लोपस्तेन कति इति रूपम्। अयं नित्य-बहुवचनान्तः। कति॰ ब्राह्मणाः। कति गुणिनः। का संख्या येषां ते कियन्तः। किम्शब्दात् वतुप्। साधनाप्रक्रिया तु पूर्ब्ववत्। कियन्तो ब्राह्मणाः, कियन्तः गुणिनः। निन्दायां गम्यमानायामेतत् न भवति ; अत आह 'चेपे तुन' इत्यादि। चेपे सति संख्यापरिमाण-मतात्त्विकम्।

## १८३१। संख्याया अवयवे तयप्॥ ५।२।४२॥

## दी—। पञ्चावयवा अस्य पञ्चतयं दारु।

The suffix तयप् is attached to any numerical words—that denotes some part ( or portion ) of some thing ( of the whole ).

मित—। तदस्य इति अनुवर्त्तते। अवयवे वर्त्तमानेभ्यः संख्यावाचिभ्यः तयप् प्रत्ययः स्यात् षष्ठ्यर्थे। "घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोस्तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" इति भाषापरिच्छेदकारिकातः अवयवैः सह अवयविनः समवायरूपः सम्बन्धो ज्ञायते। अतएव "अवयवा अवयविनः सम्बन्धिनः इति सामर्थ्यात् अवयवी प्रत्ययार्थो विज्ञायते" इति काशिका। अवयविनि अभिधेये सति अवयववर्त्तेः संख्यायास्तयप्प्रत्यय इष्ट इति भावः। पञ्च अवयवा अस्य इति पञ्चतयं दारु। चतुष्टयी रज्जुः।

## १८३२। द्वित्रिभ्याम् तयस्यायज् वा॥ ५।२।४३॥

## दी—। द्वयं—द्वितयम्। त्रयं—त्रितयम्।

The suffix तयप—when added to द्वि as well as to त्रि, is optionally changed to अयच्।

मित—। द्वि-त्रि इति एताभ्याम् पूर्व्वसूत्रेण तयप् स्यात्। तस्य तयपः स्थाने

विकल्पेन अयच् इति आदेशो भवेत्। द्वौ अवयवौ अस्य इति तयप् = द्वितयम्। त्रयः अवयवा अस्य इति तयप्—त्रितयम्। "माता मित्रं पिताचेति स्वभावात्ति त्रयं हितम्" इति। पक्षे तयपः स्थाने अयच् इति आदेशः—तेन द्वि अयच् इति स्थिते "यस्येति च" (६।४।१४८) इति इकारस्यलोपस्तेन द्वयम् इति रूपम्। एवं त्रयम्। स्त्रियां द्वयी, त्रयी, द्वितयी त्रितयी। तथाहि सर्व्वदर्शनसंग्रहे "अग्निहोत्रम् त्रयीविद्या"।

ननु अयच् इति प्रत्ययान्तरम् अकृत्वा कथं तयःस्थाने अयजादेशः कृत इति चेत् उच्यते। स्थानिनिर्द्दिेशार्थमेव तयस्थाने अयजादेशः। तेन अयचि तयपः स्थानिवत्त्वम् आश्रित्य "प्रथमचरमतयाल्प—" (१।१।३३) इति सूत्रेण जसि विकल्पेन सर्व्वनामसंज्ञा। अतएव जसि द्वये, द्वयाः इतिरूपद्वयम्। किञ्च त्रयी विद्या इति स्त्रियाम् ईकारः अपि तयनिबन्धनः इति काशिका।

## १८३३। उभादुदात्तो नित्यम् ॥ ५।२।४४ ॥

### दी—। उभशब्दात् तयपोऽयच् आदेशः स्यात्। सच आद्युदात्तः। उभयम्।

The suffix तयप, added to the word उभ, is always changed into अयच् giving rise to the word उभय—the first syllable of which is उदात्त।

मित—। किम् उभशब्दः संख्यावाची? भवति चेत्, तस्मात् "संख्याया अवयवे तयप्" (५।२।४२) इति सूत्रेण तयप् स्यात्। तथासति अस्य सूत्रस्य अयमर्थः—"उभात्" उभ इति प्रातिपदिकात् विहितस्तयप् "नित्य" नित्यमेव अयच् स्यात्; "उदात्तः"—अयचि विहिते यः शब्द उत्पद्यते स शब्दः (उभय इत्यर्थः) आद्युदात्तो भवति। इदमप्यत्र स्मर्त्तव्यम्—"उभादुदात्तो नित्यम्" इति नित्यग्रहणस्य इदं प्रयोजनम् वृत्तिविषये उभयशब्दस्य प्रयोगोमाभूत् उभशब्दस्यैव यथा स्यात् इति उभयत्र इत्यादि भवति इति कैयटः॥ अथ उभशब्दस्तु संख्यावाचीति न उररीक्रियते, तर्हि अयं सूत्रस्य योगविभागः कर्त्तव्यः। सच ईदृशः—

(१) उभात् (२) उदात्तो नित्यम्। उभादिति—"उभात्" उभ इति प्राति-

पदिकात् तयप् स्यात्। (२) उदात्तो नित्यमिति। "नित्यम्"—स च तयप् नित्यमेव अयच् स्यात्; अपिच "उदात्त:" आद्युदात्तश्च स्यात्, उभयम्। उभौ अवयवौ अस्य इति उभयो मणि:। "उभौ गुक्लरक्तौ अवयवौ यस्य इत्युभय:। उभयो मणि: कौस्तुभ इति केचित्" इति भाषावृत्तिटीपन्याम् श्रीशचन्द्रचक्रवर्त्तिन:। उभशब्द: द्विवचने एव प्रयुज्यते। उभयशब्दस्तु एकवचने बहुवचने नतु द्विवचने इति कैयट:। बहुवचने यथा—उभये देवमनुष्या: इति काशिका।

**१८३४। तदस्मिन्नधिकमिति दशान्ताड्ड:॥ ५।२।४५॥**

**दी—। एकादश अधिका अस्मिन् एकादशम्। "शत-सहस्रयोरेव इष्यते"॥ नेह—एकादश अधिका अस्यां विंशतौ। प्रकृतिप्रत्ययार्थयो: समानजातीयत्वमेव इष्यते। नेह—एकादश माषा अधिका अस्मिन् सुवर्णशते।**

The suffix ड is added to numerical words—ending in दश to denote either hundred ( शतं ) or thousand ( सहस्रम् ) which is expressded by the said numerical word. For rest see Tika.

मित—। "तदि"ति प्रथमासमर्थात् "दशान्तात्" यस्य संख्याशब्दस्य अन्ते दश इति तिष्ठति तादृशात् दशान्तात् प्रातिपदिकात् "अस्मिन्नि"ति सप्तम्यर्थे डप्रत्यय: स्यात्; यत् खलु प्रथमासमर्थं तच्चेत् अधिकमेव भवति। एकादश अधिका अस्मिन् इति एकादशम्। "शतसहस्रयोरेव इष्यते"—अस्मिन् इति सप्तम्यर्थे प्रत्यय: स्यात्, परं सप्तम्यर्थ: । तेन शतम् इति उत सहस्रम् इति वा भवितव्यम्—अन्यथा प्रत्ययो नेष्यते। अतएव एकादश अधिका: अस्मिन् शते इति एकादशं शतम्। एवं एकादशं सहस्रम्। द्वादशं शतम्। द्वादशं सहस्रम्। चतुर्द्दशं शतम्। चतुर्द्दशं सहस्रम् इत्यादय: भवेयु:। एकादश अधिका अस्याम् विंशतौ इति नप्रत्यय:। कथम्? अत सप्तम्यर्थस्तु विंशतिरेव. न खलु शतं न वा सहस्रम्। अत: प्रत्ययो नेष्ट:। दशान्तात् इति किम्? पञ्च अधिका: अस्मिन् शते इति प्रत्ययाभाव:। दशान्तात् इत्यत्र अन्त इत्यस्य ग्रहणं कथम्? दश अधिका अस्मिन् शते इति प्रत्ययो न स्यादिति

ज्ञापयितुम्। नहि "दश" इति दशान्तः भवितुमर्हति। "प्रकृति-प्रत्ययार्थयोरि"त्यादि—प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते। तेन एकादश कार्षापणा अधिका अस्मिन् कार्षापणशते एकादशम् कार्षापणशतम् इति स्यात्। अत्र प्रकृत्यर्थः कार्षापणः प्रत्ययार्थोऽपि स एव। परं एकादश माषा अधिका अस्मिन् सुवर्णशते इत्यत्र प्रत्ययो न स्यात्, अत्र प्रकृत्यर्थस्तु "माष", प्रत्ययार्थस्तु सुवर्णशतम् इति प्रकृत्यर्थप्रत्ययार्थयोरसमानजातीयत्वात्।

## १८३५। शदन्तविंशतेश्च ॥ ५।२।४६ ॥

**टी—। डः स्यादुक्तेऽर्थे। त्रिंशदधिका अस्मिन् त्रिंशं शतम्। विंशम्।**

In the aforesaid sense, the suffix ड is attached to numerical words that end in "शत" as well as to the word विंशति।

मित—। तदस्मिन्नधिकमिति अनुवर्त्तते। संख्याशब्दानाम् अन्ते शत् इति विद्यते तादृशात् 'शदन्तात्' प्रातिपदिकात् तथा विंशति इति संख्याशब्दाच्च तदस्मिन्नधिकम् इति विषये डप्रत्ययः स्यात्। अत्रापि शतसहस्रयोरेव। त्रिंशत् अधिकाः अस्मिन् शते इति डप्रत्ययः—त्रिंशंशतम्। त्रिंशं सहस्रम्। चत्वारिंशत् अधिकाः अस्मिन् शते इति चत्वारिंशं शतम्। चत्वारिंशम् सहस्रम्। एवं एकत्रिंशत् अधिकाः अस्मिन् शते एकत्रिंशंशतम्। एकत्रिंशं सहस्रम्। विंशतिः अधिका अस्मिन् शते इति विंशं शतम्। विंशं शतम्। विंशं सहस्रम्। तदन्ताच्च—तेन एकविंशतिः अधिका अस्मिन् शते एकविंशं शतम्। एकविंशंसहस्रम्। एवं द्वाविंशम्, शतम्। द्वाविंशम् सहस्रम्। संख्या-पूर्व्वस्य एव अयं विधिस्तेन—गोत्रिंशत् अधिका अस्मिन् गोशते, गोविंशतिरधिका अस्मिन् गोशते इत्यादौ प्रत्ययो न भवति।

## १८३६। संख्याया गुणस्य निमाने मयट् ॥ ५।२।४७ ॥

दी—। भागस्य मूल्ये वर्त्तमानात् प्रथमान्तात् संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद् यवानाम्। गुणस्य इति किम्? द्वौ व्रीहियवौ निमानमस्य उदश्वितः। निमाने किम्? द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन।

The suffix मयट is affixed to numerical words, standing for the value of some part of a thing to denote another thing, which is valued at (i. e whose value is determined by) the value of the part of the said thing.

मित—। "तदस्य संजातम् तारकादिभ्य इतच्" (५।२।३६) इत्यतः तदस्य इति अत्र अनुवर्त्तते। "तदिति प्रथमासमर्थात् संख्यावाचिनः प्रातिपदिकात् अस्येति षष्ठ्यर्थे मयट् प्रत्ययो भवति, यत्तत् प्रथमासमर्थं गुणस्य चेन्निमाने वर्त्तते। "गुणो भागः निमानं मूल्यम्"—इति काशिका। द्विमयम् उदश्वित् यवानाम्—एवं त्रिमयम्। चतुर्मयम्। "त्रिमयी द्राक्षा गुड़स्य" इति भाषावृत्तिः।

१८३७। तस्य पूरणे डट्॥ ५।२।४८॥

दी—। एकादशानां पूरण एकादशः।

The suffix डट is attached to words that stand for cardinal numerals, to denote ordinal numerals.

मित—। संख्यायाः इत्यनुवर्त्तते। ततः 'तस्य' इति संख्याशब्दस्य। पूर्य्यते अनेन इति पूरणम्। "येन संख्या संख्यानं पूर्य्यते संपद्यते तत्तस्याः पूरणम्; तस्य इति षष्ठीसमर्थात् प्रातिपदिकात् पूरण इति एतस्मिन्नर्थे डट् प्रत्ययः स्यात्। एकादशानां पूरण एकादशः। एकादशः सर्गः। त्रयोदशानां पूरणः इति त्रयोदशः। त्रयोदशः पुत्रः। एवं द्वादशः बालकः। विंशी कारिका। चतुर्द्दशी तिथिः।

१८३८। नान्तादसंख्यादेर्मट्॥ ५।२।४९॥

दी—। डटोमडागमः स्यात्। पञ्चानां पूरणः पञ्चमः। नान्तात् किम्? विंशः। असंख्यादेः किम्? एकादशः।

मट is affixed to डट—with reference to words denoting cardinal numerals, provided they end in नकार, and no other word, expressive of cardinal numerals, be prefixed to them by way of samasa.

मित—। "नान्तात्" नकारान्तात् संख्यावाचकात् शब्दात् "असंख्यादेः" डटो मट् इति आगमः स्यात्। पञ्चानां पूरणः इति डट्। मट् इति आगमः—तेन पञ्चमः इतिरूपम्। एवं सप्तानां पूरणः सप्तमः। दशानां पूरणः दशमः। नवमः। अष्टमः। "नान्तात्" इति किम्? विंशतेः पूरणं विंशः। विंशतेर्नान्तत्वाभावात् न मट्। "असंख्यादेः" इति किम्? एकादशानां पूरणः एकादशः। अत्र दशन् इत्यस्यनान्तत्वेऽपि एकाऽधिको दशन् एकादश इति संख्यापूर्व्वकत्वात् नात्र मट्।

१८३८। षट् कति कतिपयचतुरां थुक्॥ ५।२।५०॥

दी—। एषां थुगागमः स्याड्डटि। षण्णां पूरणः षष्ठः। कतिथः। कतिपयशव्दस्य असंख्यात्वेऽपि अतएव ज्ञापकात् डट्। कतिपयथः। चतुर्थः।

थुक is affixed to डट when added to the words षट, कति, कतिपय and चतुर।

मित—। षट् कति कतिपय चतुर इति एतेभ्यः विहितो यो डट् तस्मिन् परे सति थुक् इत्यस्य आगमः स्यात्। षण्णां पूरणः इति डट्। थुक् इत्यस्य आगमः—तेन षष्ठः इति रूपम्। साधनप्रक्रिया तु षष् डट्=षष् थुक् डट् थ् ततः थुक् इत्यस्य टिलोपस्तेन षष् थ् डट इति स्थितिः—ततः ष्टुनाष्टुः (८।४।४१) इति सूत्र ण षष् ठ् डट् इति। ततः षष्ठ् डट् इति—

ततः षष्ठः। डट् इत्यस्य अकार एव तिष्ठति=शिष्यते इत्यर्थः। कतिथः। कतिपयानां पूरणः इति कतिपयथः।

ननु कतिपय इति शब्दस्तु न संख्यावाची—तर्हि कथम् अस्मात् डट् इति चेत्—उच्यते अनेन सूत्रेण थुकागमस्य विधानेन ज्ञाप्यते यत् कतिपयशब्दस्य असंख्यावाचकत्वेऽपि अस्मात् डट् स्यात्। स्त्रियां कतिथी। कतिपयथी।

**टी—। चतुरश्छयतावाद्यक्षरलोपश्च॥ तुरीयः। तुर्य्यः।**

मित—। पूरणे गम्ये सति चतुर् इत्यस्मात् छ यत् इति प्रत्ययौस्तः; प्रत्ययसन्नियोगेन चतुर् इत्यस्य आद्यक्षरस्य लोपः स्यात्। चतुर्णाम् पूरणः इति छः—ईयादेशः—तेन तुरीयः। यत्—तुर्य्यः। उभयत्र चतुर् इत्यस्य आद्यक्षरलोपः।

**१८४०। बहुपूगगणसंघस्य तिथुक्॥ ५।२।५२॥**

**टी—। डटीत्येव। पूग-संघयोरसंख्यात्वेऽपि अतएव डट्। बहुतिथः इत्यादि।**

तिथुक is affixed to डट when added to बहु, पूग, गण, and संघ।

मित—। बहु पूग-गण-संघ इति एतेषां डट्प्रत्यये परे तिथुक् इत्यस्यागमः स्यात्। बहूनां पूरणः बहुतिथः। बहुतिथे गते काले इत्यादयः प्रयोगाः द्रष्टव्याः। गणानां पूरणः गणतिथः। पूग संघ इति द्वौ यद्यपि न संख्यावाचकौ तथापि अत्र तिथुगागम-विधानेन एताभ्याम् डट् स्यात् इति ज्ञापितम्। पूगानां पूरणः पूगतिथः। संघानां पूरणः संघतिथः। तथाहि "भिन्दन् संघतिथान् द्विषः"इति।

[ किञ्च बह्वीनां पूरणीति वाक्ये "भस्याढे तद्धिते पुंवद्भावो वक्तव्यः" (६।३।३५, वार्तिक) इति वार्त्तिकेण पुंवद्भावः। ततस्तिथुगागमः—तेन बहुतिथी इति रूपम्।।]

**१८४१। वतोरिथुक्॥ ५।२।५३॥**

दी—। डटोऽपवादः । यावतिथः ।

इथुक is affixed to डट—when added to words ending in वतु।

मित—। वतु इत्यन्ताः शब्दाः संख्यावाचकाः। तेन एभ्यः डट् विहितः—"तस्य पूरणे डट्" (५।२।४८) इत्यनेन। डटि परे वत्वन्तानाम् इथुक् इति आगमः स्यात्। यावतां पूरणः इति डट्—ततः इथुक्—तेन यावतिथः इति रूपम्। तावतां पूरणः तावतिथः। एतावतां पूरणः एतावतिथः।

१८४२। द्वेस्तीयः॥ ५।२।५४ ॥

दी—। डटोऽपवादः। द्वयोः पूरणः द्वितीयः।

In the aforesaid sense (i.e. to imply ordinal numeral), the suffix तीय—( and not डट ) is attached to the word द्वि।

मित—। तस्य पूरण इति एतस्मिन्नर्थे द्विशब्दात् तीयप्रत्ययः स्यात्। डटो बाधः। द्वयोः पूरणः द्वितीयः।

१८४३। त्रेः संप्रसारणं च ॥ ५।२।५५ ॥

दी—। तृतीयः।

The suffix तीय is added to त्रि in the aforesaid sense, and before the suffix the word त्रि undergoes संप्रसारण।

मित—। पूर्व्वोक्ते विषये त्रि इत्यस्मात् तीयप्रत्ययः स्यात्, प्रत्ययसन्नियोगेन अस्य संप्रसारणं च भवति। त्रयाणां पूरणः तृतीयः।

ननु तृतीय इत्यत्र संप्रसारणे सति "हलः" (६।४।२) इति सूत्रेण ऋकारस्य दीर्घत्वं प्रसक्तम्। तत् कथं नात्र दृश्यते इति चेत्—उच्यते। "ढ्रलोपे पूर्व्वस्य दीर्घोऽणः" (६।३।१११) इति सूत्रात् "अणः" इत्यस्य अनुवृत्तिः "हलः" (६।४।२) इति सूत्रे अस्ति ; तेन अणः इत्यत्र दीर्घत्वं स्यात्। अतएव तृतीय इत्यत्र ऋकारस्य न दीर्घत्वम्।

**१८४४। विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥५।२।५६॥**

**टी—। एभ्यो डटस्तमडागमो वा स्यात्। विंशतितमः। विंशः। एकविंशतितमः। एकविंश।**

तमट् is optionally affixed to डट्—when added to words expressive of cardinal numerals विंशति and the like.

मित—। विंशतिः इति एवमादिभ्यः, "तस्य पूरणे डट्" (५।२।४८) इति विहितस्य डटः तमट् इति आगमो वा स्यात्। विंशतेः पूरणः—विंशतितमः, विंशः। एकविंशतेः पूरणः एकविंशतितमः, एकविंशः। एवं त्रिंशत्तमः—त्रिंशः। विंशतिशब्देन लौकिकाः संख्याशब्दा एव ग्राह्याः—न खलु "पङ्क्ति विंशति—" (५।१।५९) इति सूत्रपठिताः।

**१८४५। नित्यं शतादिमासार्द्धमाससंवत्सराच्च ॥ ५।२।५७॥**

**दी—। शतस्य पूरणः शततमः। मासादेरतएव डट। मासतमः।**

तमट् is permanently ( नित्यं ) affixed to डट् when added to the words standing for any cardinal numeral beginning with शत ( hundred ), as well as to the words मास अर्द्धमास and संवत्सर।

मित—। शत एवमादिभ्यः संख्यावाचक-शब्देभ्यस्तथा मास अर्द्धमास संवत्सर इति एतेभ्यो विहितस्य डटो नित्यं तमड् इत्यस्य आगमः स्यात्।

ननु मास अर्द्धमास संवत्सर इति एतेभ्यः डट् केन विधीयते ? उच्यते। अत्र तमट् इत्यस्य आगमविधानेन डट्प्रत्यय एतेभ्यः स्यादिति बोध्यम्। शतस्य पूरणः शततमः। एकशतस्य पूरणः एकशततमः। एवं सहस्रतमः। द्वि-सहस्रतमः। लक्षतमः। 'सप्तलक्षतमः। मासस्य पूरणः मासतमः दिवसः—संक्रान्तिदिवसः इत्यर्थः। अर्द्धमासस्य पूरणः अर्द्धमासतमः दिवसः। एवं संवत्सरतमः दिवसः।

१८४६। षष्ठ्यादेश्चासंख्यादेः ॥ ५।२।५८ ॥

टी—। षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। एकषष्ठः, एकषष्टितमः।

तमट् is permanently affixed or added to words standing for cardinal numerals, beginning with षष्टि, provided the same are not joined to any other numerical words by way of samasa.

मित—। षष्टि इति एवमादिभ्यः संख्याशब्दपूर्वत्वरहितेभ्यो विहितस्य डटः तमट् इत्यस्य आगमो नित्यं स्यात्। नित्यमिति पूर्वसूत्रादत्र अनुवर्त्तते। "विंशत्यादिभ्यस्तमडन्यतरस्याम् (५।२।५६) इति तमटः विकल्पे प्राप्ते अनेन नित्यत्वं विधीयते। षष्टि सप्तति अशीति नवति इति एतेभ्य एव विहितस्य डटः नित्यं तमट् स्यादिति भावः। षष्ठेः पूरणः षष्टितमः। एवं सप्ततितमः। अशीतितमः। नवतितमः। असंख्यादेः—इति किम्? संख्यापूर्वकेभ्यो विहितस्य डटः "विंशत्यादिभ्यः—" इति तमटः वैकल्पिकत्वमेव। अतएव एकषष्टेःपूरणः एकषष्ठः, एकषष्टितमः। डट् प्रत्ययः अत्र समाप्तिं गतः।

१८४७। मतौ छः सूक्तसाम्नोः ॥ ५।२।५९ ॥

टी—। मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम्। वारवन्तीयं साम।

To imply सूक्त (hymn) or सामन्, the suffix छ is attached to a word that is contained by the said सूक्त or साम।

मित—। मतौ इति मत्वर्थोऽभिप्रेतः। मत्वर्थे मतुप् प्रत्ययस्य अर्थे (तदस्यास्त्यस्मिन्निति यावत्) प्रातिपदिकात् छप्रत्ययः स्यात्, सूक्ते सामनि च अभिधेये सति। अच्छावाक इति शब्दोस्मिन् सूक्ते अस्ति इति छप्रत्ययः—तेन अच्छावाकीयं सूक्तम्। मित्रावरुण इति शब्दोऽस्मिन् सूक्ते अस्ति इति मित्रावरुणीयम् सूक्तम्। वारवन्त इति

शब्दोऽस्ति अस्मिन् साम्नि इति वारवन्तीयम् साम। यज्ञायज्ञशब्दः अस्मिन्नस्तीति यज्ञायज्ञीयम् साम। अत्र अच्छावाक इत्यादयः शब्दाः अनुकरणशब्दा एव—तेन ते स्वरूपमात्रप्रधानाः (न खलु अर्थप्रतिपादनपराः), तथापि विधानबलात् तेभ्यः प्रत्ययः स्यात्। अतएव ईदृशः प्रत्ययः अनेकपदादपि सिध्यति यथा "अस्य वाम" इति शब्दद्वयम् अस्मिन् अत्र सूक्ते इति छः—अस्यवामीयं सूक्तम्। कयाशुभि इति शब्दद्वयम् अस्ति अस्मिन् सामनि इति कयाशुभीयम् साम।

## १८४८। अध्यायानुवाकयोर्लुक् ॥ ५।२।६० ॥

**टी—। मत्वर्थस्यछस्य। अतएव ज्ञापकात् तत्रछः। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभाण्डः। गर्दभाण्डीयः।**

The aforesaid suffix optionally elides when they signify any अध्याय ( chapter ) or अनुवाक ( a particular chapter of the vedas ).

मित—। मतौ छः इति अनुवर्त्तते। मत्वर्थे विहितो यश्छप्रत्ययः, अध्याये अनुवाके गम्यमाने तस्य लुक् वा स्यात्।

ननु केन सूत्रेण पुनरध्यायानुवाकयोः प्रत्ययः ? इदमेव लुग्वचनं छप्रत्ययविधानं ज्ञापयति इति बोध्यम्। अतएव "ज्ञापकात् तत्र छः" इत्युक्तं श्रीमता दीक्षितेन। पुनरपि चोदयति—प्रत्ययस्य लुक् चेत्, तद्विधानस्य का सार्थकता ? सत्यम्। परं विधानसामर्थ्यात् लुक् विकल्पेन एव स्यात्। अतएव अयमेव सरलार्थः—मत्वर्थे प्रातिपदिकेभ्यश्छप्रत्ययः स्यादध्यायेऽनुवाके वा वाच्ये; तस्य प्रत्ययस्य च विकल्पेन लुक् स्यात्। गर्दभाण्ड इति शब्दः अस्मिन् अस्ति इति छ— गर्दभाण्डीयः अनुवाकः अध्यायो वा। प्रत्ययस्य लुक्—गर्दभाण्डः अनुवाकोऽध्यायो वा। एवं फलितस्तम्भः—फलितस्तम्भीयः।

## १८४९। विमुक्तादिभ्योऽण् ॥ ५।२।६१ ॥

टी— । मत्वर्थेऽण स्यादध्यायानुवाकयोः । विमुक्तशब्दोऽस्मिन्नस्तीति वैमुक्तः । दैवासुरः ।

The suffix अण् is attached to the words-passing by the name विमुक्तादि, to imply an अनुवाक or अध्याय ( chapter ).

मित— । विमुक्त एवम् आदिभ्यः प्रातिपदिकेभ्यः अण्प्रत्ययः स्यात् मत्वर्थे, अध्याये अनुवाके वा गम्यमाने । विमुक्तशब्दः अस्मिन्नस्तीति अण्—वैमुक्तः, वैमुक्तः अध्यायः अनुवाको वा । देवासुरशब्दोऽस्मिन्नस्तीति अण्—दैवासुरः अध्यायोऽनुवाको वा । विमुक्तादिर्यथा—विमुक्त, देवासुर, वसुमत्, सत्वत, उपसद्, दशार्ह पयस, हविर्धान, महित्री, सोमापूषन्, अग्नाविष्णू, वृत्रहन् इड़ा, रक्षोसुर, सदसत्, परिषादक, परिसारक, वसु, मरुत्वत्, पत्नीवत्, महीतल, दशार्ण वयस्, पतवि, सोम, हेतु, सुवर्ण सत्त्ववत्, उर्वशी ।

१८५० । गोषदादिभ्योवुन् ॥ ५।२।६२ ॥

टी— । मत्वर्थेऽध्यायानुवाकयोः । गोषदकः । इषेत्वकः ।

The suffix वुन् is attached to गोषद and others—called गोषदादि in the aforesaid sense.

मित— । मत्वर्थे गोषद एवमादिभ्यो वुन् स्यात् अध्याये अनुवाके वा वाच्ये । गोषदशब्दः अस्मिन् अस्ति इति गोषदकः—अध्यायोऽनुवाको वा । इषेत्व इति शब्दोऽस्मिन्नस्तीति इषेत्वकः अध्यायोऽनुवाको वा । मातरिश्वन् इति शब्दः अस्मिन् अस्तीति मातरिश्वकः । गोषदादिर्यथा—गोषद, इषेत्व, मातरिश्वन्, देवस्यत्वा, देवीरापः, कृष्णास्याखरेष्टः । देवींधियम्, रक्षोहन्, अञ्जन, प्रभूत, प्रतूर्त, कृशानु ।

१८५१ । तत्रकुशलः पथः ॥ ५।२।६३ ॥

टी— । वुन् स्यात् । पथिकुशलः पथकः ।

The suffix वुन् is attached to the word पथिन्—to imply the person, that is expert in travelling.

मित—। तत्रेति सप्तमीसमर्थात् पथिन् इति प्रातिपदिकात् वुन्प्रत्ययो भवति, कुशल इति एतस्मिन्नर्थे। पथि कुशलः पथकः। नस्तद्धिते (६।४।१४४) इति टिलोपः। [ पथिक इति बालमनोरमायां दृश्यते। तत् खलु चिन्त्यम् ]

१८५२। आकर्षादिभ्यः कन् ॥ ५।२।६४ ॥

**दी—। आकर्षे कुशलः आकर्षकः। आकषादिभ्य इति रेफ-रहितो मुख्यः पाठः। आकषो निकषः।**

The suffix कन् is affixed to the word आकर्ष ( आकष ) and others known as आकर्षादि in the aforesaid sense ( i. e. expert in those ).

मित—। तत्र इति कुशल इति च अनुवर्त्तते। तत्रेति सप्तमीसमर्थेभ्यः आकर्ष इत्येवमादिभ्यः कुशल इति अस्मिन्नर्थे कन्प्रत्ययो भवति। आकर्षे कुशलः इति कन् आकर्षकः। आकर्ष स्थाने आकष इति पाठं तु साधीयांसं मन्यते श्रीमान् दीक्षितः। आकषः निकषः ( touch stone—कष्टिपाथर )। जये कुशलः जयकः। आकर्षादिर्यथा—आकर्ष, जय, त्सरु, पिचण्ड, पिशाच, पिपासा, अशनि, अश्मन्, विचय, चय, आचय, अयं, नय, निपाद, गद्गद, दीप, ह्रद, ह्राद, शकुनि, विजय। दीपे कुशलः इति दीपकः, राग- विशेषः।

१८५३। धनहिरण्यात् कामे ॥ ५।२।६५ ॥

**दी—। काम इच्छा। धने कामो धनको देवदत्तस्य। हिरण्यकः।**

The suffix कन् is attached to the words धन and हिरण्य to imply the desire of somebody for these.

मित—। तत्र इति कन् इति च अनुवर्त्तते। तत्र इति सप्तमीसमर्थाभ्याम् धन हिरण्य इति एताभ्याम् काम इति अस्मिन्नर्थे कन् प्रत्ययो भवति। कामः इच्छा

अभिलाषः इत्यर्थः। धने कामोऽभिलाषः धनकः। धनको देवदत्तस्य। हिरण्ये कामोऽभिलाषः हिरण्यकः देवदत्तस्य। "देहेऽपिनिःस्पृहस्य मुमुक्षोर्धनकः कुतः" इति।

१८५४। स्वाङ्गेभ्यः प्रसिते ॥ ५।२।६६ ॥

**दी—। केशेषु प्रसितः केशकः। तद्रचनायां तत्परः इत्यर्थः।**

The suffix कन् is attached to words—expressive of any part of a body, to imply the person, who has got marked dexterity with reference to these.

मित—। तत्र इति कन् इति चानुवर्त्तते। तत्रेति सप्तमीसमर्थेभ्यः स्वाङ्गवाचिभ्यः प्रसित इति एतस्मिन्नर्थे कन् प्रत्ययो भवति। प्रसितः प्रसक्तः तत्पर इत्यर्थः। केशेषु प्रसितः इति कन् केशकः। केश-रचनायां तत्परः। एवं नखेषु प्रसितः नखकः—नखच्छेदे पटुरित्यर्थः। दन्तेषु प्रसितः दन्तकः—दन्तमार्ज्जने दक्षः इत्यर्थः। स्वाङ्गेभ्य इति बहुवचननिर्द्देशात् "स्वाङ्ग-समुदाय-शब्दादपि यथा स्यात्। दन्तौष्ठकः। केशनखकः।" इति काशिका।

१८५५। उदराट्ठगाद्यूने ॥५।२।६७॥

**दी—। अविजिगीषौ ठक् स्यात्। कनोऽपवादः। बुभुक्षया अत्यन्तपीड़ित उदरे प्रसित औदरिकः। आद्यूने किम्? उदरकः। उदरपरिमार्ज्जनादौ प्रसक्त इत्यर्थः।**

To denote a glutton, the suffix ठक् is attached to the word उदर।

मित—। आद्यूनः अविजिगीषुः। उदरशब्दात् सप्तमीसमर्थात् ठक् प्रत्ययः स्यात् प्रसित इति एतस्मिन्नर्थे, यः खलु प्रसितः स चेत् आद्यूनः एव। उदरेऽविजीषुर्भण्यते (आद्यूनः) इति काशिका। बुभुक्षया अत्यन्तपीड़ितः सन् यः खलु

उदरे प्रसितः स औदरिकः—अत्र उदरशब्दात् ठक्। अयं ठक् पूर्वसूत्रविहितस्य कन् प्रत्ययस्य अपवादः। आद्यूने इति किम्? उदरे उदरपरिमार्जनादौ प्रसितः इति उदरकः—पूर्व्व सूत्रेण कन्।

**१८५६। सस्येन परिजातः ॥ ५।२।६७ ॥**

**दी—। कन् स्वर्य्यते नतु ठक्। सस्यशब्दो गुणवाची न तु धान्यवाची। शस्येनेति पाठान्तरम्। सस्येन गुणेन परिजातः संवद्धः सस्यकः साधुः।**

The suffix कन् is attached to the word सस्य ( or शस्य ) to denote the thing which is resplendent ( with merits and the like ).

मित—। शस्य इति पाठान्तरम्। सस्येन ( शस्येन वा ) इति तृतीयासमर्थात् सस्यशब्दात् (शस्यशब्दात् वा) "परिजातः" सम्पन्नः इति एतस्मिन्नर्थे कन् प्रत्ययो भवति। सूत्राणाम् क्रमवशात् अत्र ठक् प्राप्तः सतु न स्यात्? तदेवाह—"कन स्वर्य्यते"—पूर्व्वाचार्य्यैः अत्र कन् प्रत्यय एव स्वर्य्यते नतु ठक्—( स्वरितत्वेन प्रतिज्ञायते। ततः स्वरितेनाधिकारः इति कन् वाधिक्रियते )। परिजातः—अत्र "परि सर्व्वतोभावे वर्त्तते। यो गुणैः संवद्धो जायते। यस्य किंचिदपि वैगुण्यं नास्ति तस्य इदम् अभिधानम्"—इति काशिका। सस्यशब्दोऽत्र गुणवाची एव नतु धान्यवाची। सस्येन गुणेन परिजातः संवद्धः सस्यकः साधुः। सस्यकः शालिः। सस्यको वत्सः। सस्येन गुणेन परिजातः सम्पन्नोऽयं सस्यको मुनिः आकरशुद्धः इत्यर्थः।

**१८५७। अंशं हारी ॥ ५।२।६८ ॥**

**दी—। हारीत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः।**

The suffix कन् is attached to the word अंश to denote the man who is entitled to it.

मित—। हारी इति हधातोर्णिनिप्रत्ययेन सिध्यति स च प्रत्ययः "आवश्यकाधमर्ण्ययोर्णिनिः" ( ३।३।१७५ ) इति सूत्रेण आवश्यकार्थे विहितः। अतएव अस्य योगे "कर्तृकर्मणोः कृति" (२।३।३५) इति प्राप्ता षष्ठी "अकेनोर्भविष्यदाधमर्ण्ययोः" ( २।३।७० ) इति सूत्रेण वार्य्यते। सूत्रार्थस्तु—अंशम् इति द्वितीयासमर्थात् अंश इत्यस्मात् हारीति एतस्मिन् अर्थे कन् स्यात्। अंशहारी इति अंशको दायादः। अंशकः पुत्रः।

## १८५८। तन्त्रादचिरापहृते ॥ ५।२।७० ॥

## टी—। तन्त्रकः पटः। प्रत्यग्रः इत्यर्थः।

The suffix कन is added to the word तन्त्र to denote the thing ( of course, a piece of cloth )—which has been newly woven ( or brought ).

मित—। तन्त्रशब्दात् पञ्चमीसमर्थात् कन्प्रत्ययो भवति अचिरापहृत इत्यस्मिन् अर्थे। अचिरापहृतः स्तोक-कालापहृत इति काशिका। तन्त्रात् अचिरापहृतः तन्त्रकः पटः। प्रत्यग्रः इत्यर्थः। प्रत्यग्रः नवः। "तन्त्रको नवकर्पटः" इति भाषावृत्तिः। तन्त्रकः प्रावारः।

## १८५९। ब्राह्मणकोष्णिके संज्ञायाम् ॥ ५।२।७१ ॥

## टी—। आयुधजीविनो ब्राह्मणा यस्मिन् देशे स ब्राह्मणकः। अल्पम् अन्नं यस्यां सा उष्णिका यवागूः। अन्नशब्दस्य उष्णादेशो निपात्यते।

The suffix कन् is attached to ब्राह्मण and अन्न and the words ब्राह्मणक and उष्णिका—standing as proper names ( or particular class names) are irregularly formed.

मित—। ब्राह्मणशब्दात् कन् स्यात् संज्ञायां विषये; तेन ब्राह्मणक इति रूपम्। यस्मिन् देशे अस्त्रजीविनः ब्राह्मणाः प्रतिवसन्ति स देशो ब्राह्मणक इत्युच्यते। एवं

अल्पम् अन्नं यस्यां सा इति वाक्ये अन्नशब्दात् कन् स्यात् ; प्रत्ययसन्नियोगेन च अन्नस्य स्थाने उष्ण इति आदेशो निपातनेन जायते। तेन उष्णिका इति रूपम्। उष्णिका यवागूः।

**१८९०। शीतोष्णाभ्याम् कारिणि ॥ ५।२।७२ ॥**

**टी—। शीतं करोति इति शीतकोऽलसः। उष्णं करोतीति उष्णकः शीघ्रकारी।**

The suffix कन् is affixed to the words शीत and उष्ण—to denote, respectively, the persons, that do anything tardily or immediately.

मित—। शीतं उष्णम् इति क्रियाविशेषणम् अनयोः क्रिया-विशेषणत्वात् द्वितीया समर्थविभक्तिः। सूत्रार्थस्तु—शीत उष्ण इति एताभ्याम् द्वितीयासमर्थाभ्याम् कारिणि अभिधेये सति, कन्प्रत्ययः स्यात्। शीतं शिथिलं करोति इति शीतकः अलसः जड़ः इत्यर्थः। उष्णं शीघ्रम् करोति इति उष्णकः शीघ्रकारी दक्षः इत्यर्थः।

**१८९१। अधिकम् ॥ ५।२।७३ ॥**

**टी—। अध्यारूढ़-शब्दात् कन् उत्तरपदलोपश्च।**

The suffix कन् is attached to the word अध्यारूढ़ and the word अधिक is irregularly formed.

मित—। अधिपूर्व्व रुह् धातोः कर्त्तरि कर्म्मणि वा क्तः तेन अध्यारूढ़ इति रूपम्। तस्मात् अध्यारूढ़शब्दात् कन् प्रत्ययः स्यात्। प्रत्ययसन्नियोगेन अस्य उत्तरपदः आरूढ़ इति अंशः लोपं गच्छति, तेन अधिकम् इति पदं सिध्यति। "अधिकः द्रोणः खार्य्याम् ; अधिका खारी द्रोणेन"—इति काशिका ;

**१८९२। अनुकाभिकाभीकः कमिता ॥ ५।२।७४ ॥**

**टी—। अन्वभिभ्याम् कन् ॥ अभेः पाक्षिको दीर्घश्च ॥ अनुकामयते अनुकः। अभिकामयते अभिकः। अभीकः।**

The suffix कन् is attached to अनु and अभि to denote the person that cherishes or desires ; the इ of अभि is optionally lengthened.

मित—। अनु अभि इति एताभ्याम् कन् प्रत्ययः स्यात् "कमिता" इति एतस्मिन् अर्थे। कमिता कामयिता यः कामयते स इत्यर्थः। अनु कामयते यः स इति अनुकः। अभि कामयते यः स अभिकः। अभि इत्यस्य इकारस्य विकल्पेन दीर्घत्वं तेन अभीक इत्यपि।

१८६३। पार्श्वेनान्विच्छति ॥ ५।२।७५ ॥

टी—। अनृजुरुपायः पार्श्वः। तेनान्विच्छति पार्श्वकः।

The suffix कन् is attached to the word पार्श्व to denote the person that adopts crooked measures.

मित—। अनृजुः उपायः पार्श्वः। अनृजुः असरलः कुटिलः इत्यर्थः। पार्श्व-शब्दात् तृतीयासमर्थात् कन् प्रत्ययो भवति अन्विच्छतीति अस्मिन् अर्थे। पार्श्वेन कुटिलेन उपायेन अर्थान् अन्विच्छति इति पार्श्वशब्दात् कन्—पार्श्वकः। पार्श्वकः शठः ; मायावी जालिको वा।

१८६४। अयःशूलदण्डाजिनाभ्याम् ठक्ठञौ ॥५।२।७६॥

टी—। तीक्ष्ण उपायोऽयःशूलं तेनान्विच्छति आयःशूलिकः साहसिकः (? इत्यर्थः)। दण्डाजिनं दम्भः तेन अन्विच्छति दाण्डाजिनिकः।

The suffixes ठक् and ठञ् are attached to the words अयःशूल and दन्डाजिन in the aforesaid sense.

मित—। अयःशूलः तीक्ष्ण उपायः। दण्डाजिनं दम्भः। तीक्ष्णोपायवाचिनः अयःशूलशब्दात् तथा दम्भवाचिनः दण्डाजिनशब्दाच्च ठक् ठञ् इति प्रत्ययौ स्तः "तेन अन्विच्छति" इति एतस्मिन्नर्थे। अयःशूलेन अन्विच्छति आयःशूलिकः साहसिकः तीक्ष्णकारी इत्यर्थः। दाण्डाजिनिकः दाम्भिकः इत्यर्थः।

१८६५। तावतिथं ग्रहणमिति लुग्वा ॥ ५।२।७७ ॥

टी—। कन् स्यात्, पूरणप्रत्ययस्य च लुग्वा। द्वितीयकम् द्विकं वा ग्रहणं देवदत्तस्य। द्वितीयेन रूपेण ग्रहणम्। तावतिथेन गृह्णातीति कन् वक्तव्यो नित्यं चलुक् (वा)। षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः। पञ्चकः।

The suffix कन् is added to words themselves formed with a suffix used in the sense of पूरण, and the कन् optionally elides, provided acceptance (ग्रहण) of something is implied by the said words. For rest see Tika.

मित—। तावतां पूरणं तावतिथम्। गृह्यतेऽनेन इति ग्रहणम्। एतत् प्रकृतिविशेषणम्। पूरण इति अर्थे विहितेन प्रत्ययेन निष्पन्नात् प्रातिपदिकात् ग्रहणम् इत्येव अर्थस्य द्योतकात् स्वार्थे कन् प्रत्ययः स्यात् तथा कन् प्रत्ययसन्नियोगेन च पूरणप्रत्ययस्य विकल्पेन लुक् स्यात्। द्वितीयेण रूपेण ग्रन्थं गृह्णाति इति द्वितीयकं ग्रहणम्—द्विकम् ग्रहणम्। एवं तृतीयकं—त्रिकं वा ग्रहणम्। चतुर्थकं चतुष्कम्। सूत्रे "इति" शब्दस्य या अवस्थितिः सा ज्ञापयति यत् ग्रन्थविषये एव ग्रहणे अयमिष्टः नान्यविषये खलु इति काशिकाकृदाशयः। "तावतिथेन गृह्णातीति कन् वक्तव्यो नित्यं च लुक्"—तावतिथेन गृह्णातीति ग्रहीतरि अभिधेये सति पूरणप्रत्ययान्तात् प्रातिपदिकात् कन् प्रत्ययः स्यात्। तथा कन् प्रत्ययसन्नियोगेन च पूरणप्रत्ययानां लुक् स्यात्। षष्ठेन रूपेण गृह्णाति इति षट्को देवदत्तः। षष्ठ शब्दात् कन् प्रत्ययः प्रत्यये परे "षट्कति—" ( ५।२।५१ ) इत्यादि सूत्रेण विहितस्य थुक् इत्यस्य च नित्यं लुक्। एवं पञ्चमेन रूपेण गृह्णातीति पञ्चकः। पञ्चकः मेधावी। अत्र कन् प्रत्ययपरे "नान्तादसंख्यादेर्मट्" ( ५।२।४९ ) इति मटो लुक् तेन पञ्चकः इतिरूपम्। एवं चतुष्कः।

१८६६। स एषां ग्रामणीः ॥ ५।२।७८ ॥

दी—। देवदत्तो मुख्योऽस्य देवदत्तकः। त्वत्कः। मत्कः।

The suffix कन् is added to words expressive of a leader, to denote the thing over which leadership is established.

मित—। स इति प्रथमासमर्थात् एषामिति षष्ठ्यर्थे कन्प्रत्ययो भवति, यत् खलु प्रथमासमर्थं स चेत् ग्रामणीः एव भवति। ग्रामणीः नेता मुख्यः इति यावत्। देवदत्तो ग्रामणीः ( मुख्यः ) अस्य ग्रामस्य इति देवदत्तको ग्रामः। यज्ञदत्तः ग्रामणीः नेता एषां जनानां यज्ञदत्तकाः जनाः। त्वमेव ग्रामणीः अस्य इति त्वत्कः ग्रामः। अहमेव ग्रामणीः अस्य इति मत्कः ग्रामः। दृष्टान्तद्वये "त्वमावेकवचने" ( ७।२।९० ) इति युष्मदस्मदोः स्थाने यथासंख्यं त्वत् मत् इति आदेशाः। तथा च भट्टिः— "न तन्मतं मत्कमिति ब्रुवाणः"।

१८६७। शृङ्खलमस्य बन्धनं करभे॥ ५।२।७९॥

दी—। शृङ्खलकः करभः।

The suffix कन् is attached to the word शृङ्खल to imply a young camel ( करभ ) which is chained.

मित—। प्रथमासमर्थात् शृङ्खलशब्दात् अस्य इति षष्ठ्यर्थे कन् स्यात्; यत् प्रथमासमर्थं तत् चेत् शृङ्खलं भवेत्, योहि षष्ठ्यर्थः सचेत् करभ एव स्यात्। शृङ्खलं बन्धनमस्य करभस्य इति शृङ्खलकः करभः। करभः उष्ट्रशिशुः।

१८६८। उत्क उन्मनाः॥ ५।२।८०॥

दी—। उद्गतमनस्क-वृत्तेरुच्छब्दात् स्वार्थे कन्। उत्क उत्कण्ठितः।

The suffix कन् is attached to the उत् standing for उन्मनाः and the word उत्क is formed giving the same meaning as उन्मनाः।

मित—। उद्गतं मनः यस्य न उद्गतमनाः—उद्गतमनस्कः। "शेषाद्विभाषा" (५।४।१५४) इति वैकल्पिकः कप्। अपिच उन्मनाः—उन्मनस्कः इति द्वयमपि "प्रादिभ्यो धातुजस्य वाच्यः वाचोत्तरपदलोपश्चेति" वचनात्। "उन्मनाः" उद्गतमनस्कः इत्येव अर्थे वर्त्तमानात् "उत्" इत्यस्मात् स्वार्थे एव कन्प्रत्ययःस्यात् तेन उत्क इति पदं सिध्यति। उत्कः उन्मनाः—उत्कण्ठितः उत्सुकः इति यावत्। "उत्को देवदत्तः उत्कःप्रवासी" इति काशिका। मेघदूते च "तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः" इति।

१८९८। काल-प्रयोजनाद्रोगे ॥ ५।२।८१ ॥

**दी—। कालवचनात् प्रयोजनवचनाच्च कन् स्याद्रोगे। द्वितीयेऽह्नि भवो द्वितीयको ज्वरः। प्रयोजनं कारणं रोगस्य फलं वा, विषपुष्पैर्जनितो विषपुष्पकः। उष्णम् कार्य्यमस्य उष्णकः। रोगे किम् ? द्वितीयो दिवसोऽस्य।**

To imply a particular disease, the suffix कन् is attached to words expressive of any division of time with reference to the said disease, as well as to words denoting the cause or the effect of the same.

मित—। कालवाचिभ्यः तथा प्रयोजनवाचिभ्यश्च प्रातिपदिकेभ्यः यथायोगं समर्थ-विभक्तियुक्तेभ्यः कन्प्रत्ययो भवति रोगे अभिधेये सति। प्रयोजनं खलु रोगस्य कारणं फलं वा। कारणम् निदानं फलं कार्य्यम् लक्षणम् इति यावत्। द्वितीये अह्नि भवो ज्वरः इति द्वितीयकः ज्वरः। चतुर्थे दिने भवः रोगः चतुर्थको रोगः। दिवसे सम्भवति सार्थकः व्याधिः। प्रयोजनवाचिभ्यः—विषपुष्पैर्जनितो ज्वरः विषपुष्पकः। काशपुष्पैर्जनितो व्याधिः काशपुष्पकः। "तापेन भाविना प्रयुक्तस्तापकः। शीतकः।" इति भाषावृत्तिः। एषु उदाहरणेषु प्रयोजनं खलु निदानम्। उष्णकः ज्वरः। शीतम् कार्य्यम् अस्य इति शीतको ज्वरः। उदाहरणद्वये प्रयोजनं हि फलम्। रोगे इति

किम्? द्वितीयो दिवसः अस्य उत्सवस्य इति न प्रत्ययः—उत्सवस्य रोगत्वाभावात्।

१८७०। तदस्मिन्नन्नं प्राये संज्ञायाम्॥ ५।२।८२॥

**टी—। प्रथमान्तात् सप्तम्यर्थे कन् स्यात् यत् प्रथमान्तमन्नं चेत्प्रायविषयं तत्। गुड़ापूपाः प्रायेण अन्नमस्यां गुड़ापूपिका पौर्णमासी।**

The suffix कन् is attached to words, expressive of objects, that very often plays the part of food (i. e. which constitute the principal food stuff) in some particular period of time.

मित—। "तत्" इति प्रथमासमर्थात् प्रातिपदिकात् "अस्मिन्" इति सप्तम्यर्थे कन्प्रत्ययः स्यात्। यत् खलु प्रथमासमर्थम् अन्नं चेत् प्रायेण (वाहुल्येन) तद्विषयम्। "प्रायो वाहुल्यम्" इति काशिका। अयं खलु संज्ञाविषये एव। गुड़मिश्राः अपूपाः इति गुड़ापूपाः इति शाकपार्थिवादित्वात् समासः—यद्वा गुड़ेन अपूपाः गुड़ापूपाः इति तृतीयातत्पुरुष एव—"भक्ष्येण मिश्रीकरणम्" (२।१।३५) इति वचनात्। गुड़ापूपाः प्रायेण अन्नम् अस्यां तिथौ इति गुड़ापूपिका पौर्णमासी तिथिः।

इयं पौर्णमासीविशेषस्य संज्ञा। एवं तिलापूपाः प्रायेण अन्नमस्यां तिथौ इति तिलापूपिका पौर्णमासी तिथिः। इयमपि पौर्णमासीविशेषस्य संज्ञा। [मन्यामहे अस्मिन् सूत्रे पूर्व्वसूत्रात् काल इत्यस्य अनुवृत्तिरस्ति। स च कालः अत्र विभक्तिविपरिणामप्रणाल्या काले इति सप्तम्यन्तः स्यात्। तेन अत्र सूत्रे यः सप्तम्यर्थः स काल एव भवितुमर्हति न खलु स्थानम्; अत्र, काशिकायाम् भाषावृत्तौ च नैव कुत्रापि स्थानम् अभिहितम् परम् सर्व्वत्रैव काल एव अभिधेयपदम् प्रापित इति दिक्।]

**टी—। वटकेभ्य इनिर्वाच्यः। वटकिनी।**

In the aforesaid sense the suffix इनि is added to the word वटक।

मित—। वटक इति शब्दात् पूर्व्वोक्त-विषये इनिप्रत्ययः स्यात्। वटकम् प्रायेण अन्नम् अस्याम् इति वटकिनी पौर्णमासी। इयमपि संज्ञा।

१८७१। कुल्माषादञ्॥ ५।२।८३॥

टी—। कुल्माषाः प्रायेण अन्नमस्याम् कौल्माषी।

In the aforesaid sense the suffix अञ् is attached to the word कुल्माष।

मित—। पूर्व्वोक्ते एव विषये कुल्माषशब्दात् अञ् स्यात्; कुल्माषः प्रायेण अन्नम् अस्यां तिथौ इति कौल्माषी पौर्णमासी तिथिः। इयमपि संज्ञायाम्। कुल्माषः मुद्गः। अञ् इति प्रत्ययस्य ञित्वात् आदिस्वर-वृद्धिः स्वरार्थमपि च ञित्-करणम्।

१८७२। श्रोत्रियञ्छन्दोऽधीते॥ ५।२।८४॥

टी—। श्रोत्रियः। वेत्यनुवृत्तेश्छान्दसः।

The suffix घन् is attached to the word छन्दस् to imply the person who studies the same, and the word श्रोत्रिय is irregularly formed; अञ् may also be added to the same, giving rise to the word छान्दसः।

मित—। छन्दः वेदः। छन्दोऽधीते इति छन्दसाम् अध्येतरि अभिधेये सति, छन्दस् इत्यस्मात् घन् प्रत्ययः स्यात्; प्रत्ययसन्नियोगेन च छन्दस् इत्यस्य स्थाने श्रोत्र इति आदेशः। प्रत्यये नकारस्तु स्वरार्थ एव। तेन छन्द अधीते इति श्रोत्रियः। श्रोत्रियः ब्राह्मणः। "तावतिथं ग्रहणमिति लुग्वा" (५।२।७७) इति सूत्रात् वा इति अत्र अनुवर्त्तते, तेन घन्प्रत्ययस्य वैकल्पिकत्वे सति "कुल्माषादञ्" (५।२।८३) इति अञः प्रसक्तिस्तेन छन्दोऽधीते इति अञ्—छान्दसः। छान्दसो ब्राह्मणः।

१८७३। श्राद्धमनेन भुक्तमिनिठनौ॥ ५।२।८५॥

दी—। श्राद्धी। श्राद्धिकः।

The suffix इनि as well as the suffix ठन् are attached to the word श्राद्ध to imply the person that dines on the occasion of the same ( or who eats the food stuff of sradh ).

मित—। श्रद्धया आचरितम् यत् तत् श्राद्धम्। लक्षणया वृत्त्या श्राद्धशब्देन श्राद्धद्रव्याणि कथ्यन्ते। श्राद्धम् श्राद्धद्रव्यम् अनेन भुक्तम् इति भोक्तरि अभिधेये सति श्राद्धशब्दात् इनि ठन् इति प्रत्ययौ स्तः। इनि—श्राद्धी। ठन्—श्राद्धिकः।

१८७४। पूर्वादिनिः॥ ५।२।८६॥

दी—। पूर्वं कृतम् अनेन पूर्वी।

The suffix इनि is attached to the word पूर्व to imply the agent who has done some act previously.

मित—। पूर्वसूत्रात् अनेन इति अनुवर्त्तते। 'अनेन' इति हि अनुक्त कर्त्ता। क्रिया कुत्र ? नच क्रियामन्तरेण कर्त्ता सम्भवति अतः स कर्त्ता अत्र क्रियापेक्षः कर्त्तव्यः। तेन इदमत्र बोध्यं—यां काचित् क्रियाम् अध्याहृत्य पूर्वशब्दात् इनिप्रत्ययः स्यात्, अध्याहृतायाः क्रियायाः कर्त्तरि अभिधेये सति। पूर्वं कृतम् अनेन इति पूर्व शब्दात् इनिः—पूर्वी। पूर्वम् अनेन अशितं—गृहीतं—गतं भुक्तं पीतं वा इति इनिः पूर्वी। द्विवचने पूर्विणौ। बहुवचने पूर्विणः।

१८७५। स-पूर्वाच्च॥ ५।२।८७॥

दी—। कृतपूर्वी।

The self same suffix is attached to the self same word even when it becomes the last member of a compound word.

मित—। सपूर्वाच्च पूर्वादिनिः इति योजना। "विद्यमानं पूर्वं यस्मादिति सपूर्वम्"—इति काशिका। "सपूर्वात्" पूर्वपदसनानात् "च" पूर्व इत्यस्मात पूर्वोक्ते विषये इनिः स्यात्। कृतं पूर्वम् अनेन इति सुप्सुपा-समासं कृत्वा पश्चात्

इनिः विधीयते—तेन कृतपूर्वी। कृतपूर्वी कटान्। एवं भुक्तं पूर्वम् अनेन इति आदौ सुप्सुपा समासं कृत्वा पश्चादिनिः तेन भुक्तपूर्वी। भुक्तपूर्वी ओदनम् कटान् ओदनम् इति एतयोः कर्म्मणि द्वितीया न कथम् ? स्मर्त्तव्या अत्र श्रीमतो दीक्षितस्य उक्तिः—["कर्त्तृकर्म्मणोः कृति" ( २।३।३५ ) इत्यत्र] "कृतिकिम् ? तद्धिते माभूत् कृतपूर्वी कटम्"।

## १८७६। इष्टादिभ्यश्च ॥ ५।२।८८ ॥

## दी—। इष्टम् अनेन इष्टी। अधीती।

The suffix इनि is attached to words that pass by the term इष्टादि to imply the agent।

मित—। अनेन इति अनुवर्त्तते। अनेन इति कर्त्तरि अभिधेये सति इष्ट इति एवमादिभ्यः शब्देभ्यः इनिप्रत्ययः स्यात्। इष्टम् अनेन इति इष्टी। इष्टी यागे। अधीतम् अनेन इति अधीती व्याकरणे। पूर्त्ती श्राद्धे। गृहीती। निराकृती। "कृती श्रुती बहुमतेषुधीमान्" इति भट्टिः। इष्टादि यथा—इष्ट, पूर्त्त, अधीत, उत्सादित, निगदित, गृहीत, निराकृत परिवादित, निकथित, संकलित, निपठित, संकल्पित, अनुष्ठित, विकलित, संरचित, निपतित, पठित, परिकलित, अर्च्चित, परिचित, पूजित, परिगणित, उपगणित, अवकीर्ण, पथित, आयुक्त, आम्नात, श्रुत, आसेवित, अपवारित, उपकृत, निराकृत, अवकल्पित, उपाकृत, अनुयुक्त, उपनत, अनुगुणित, अनुपठित, व्याकुलित, निगृहीत, परिगदित, निषादित, परिरचित। भट्टिकार-माधव-मल्लिनाथादि-मते अत्र गणे "कृत" शब्दोपि पठनीयः। तेन कृती इति। किन्तु कृधातोः नपुंसके भावे क्ते सति मत्वर्थीयइनिप्रत्ययेनापि कृती इति लभ्यते। इदमप्यत्र स्मर्त्तव्यम्—अधीती व्याकरणे—इष्टी यज्ञे—इत्यादौ व्याकरणे यज्ञे इति एतेषु या सप्तमी सा खलु "क्तस्येन्विषयस्य कर्म्मण्युपसंख्यानम्" ( २।३।३६, वार्त्तिक ) इति सूत्रेण सिध्यति।

## १८७७। छन्दसि परिपन्थिपरिपरिणौ पर्य्यवस्थातरि ॥ ५।२।८९ ॥

## दी—। लोकेतु परिपन्थिशब्दो न न्याय्यः।

The suffix इनि is attached to the words परिपन्थ and परिपर and the words परिपन्थिन् and परिपरिन् are irregularly formed in the sense of an opponent; these are vedic words.

मित—। पन्थानं परिगतः इति परिपन्थः—अयं निपातनेन सिध्यति। एवं परं परिगतः परिपरः। पर्य्यवतिष्ठते इति पर्य्यवस्थाता। "पर्य्यवस्थता प्रतिपक्षः सपत्न उच्यते" इति काशिका। तथाच भारविः— "अस्तकः पर्य्यवस्थाता जन्मिनः सन्ततापदः"। पर्य्यवस्थातरि प्रतिपक्षे अभिधेये सति, परिपन्थशब्दात् तथा परिपरशब्दाच्च इनिप्रत्ययः स्यात्—तेन परिपन्थिन् परिपरिन् इति शब्दौ जायेते। एतौ तु वेदे एव प्रयुज्यते—यथा "मा त्वा परिपरिणो विदन् | मा त्वा परिपन्थिनो विदन्"—इत्यादि। अतएव एतयोर्लौकिकसाहित्ये प्रयोगो न न्याय्यः इति श्रीमतां दीक्षितानाम् आशयः। परं परिपन्थिन् इत्यस्य प्रयोगः लौकिकसाहित्ये मनोः सप्तमाध्याये (१०७ श्लोके) गौड़ीयभाषायाम् च दृश्यते इति मन्यामहे।

१८७८। अनुपद्यन्वेष्टा ॥ ५।२।९०॥

दी—। अनुपदम् अन्वेष्टा अनुपदी।

The suffix इनि is attached to the word अनुपद to imply the person that runs (or seeks) after (the heels of) animals.

मित—। अन्वेष्टा इति वाच्ये अनुपदशब्दात् इनिः स्यात्। पदस्य पश्चात् अनुपदम्। अनुपदम् अन्वेष्टा इति अनुपदादिनिः—अनुपदी। अनुपदी गवाम्। अनुपदी उष्ट्राणाम्। "मृगस्यानुपदी रामः"।

१८७९। साक्षाद् द्रष्टरि संज्ञायाम् ॥ ५।२।९१॥

दी—। साक्षात् द्रष्टा साक्षी।

The suffix इनि is attached to the word साक्षात् to denote the person who is an eye witness.

मित—। साक्षात् शब्दोऽव्ययम्। तस्मात् इनिः स्यात् द्रष्टरि वाच्ये संज्ञाचेत्। साक्षात् द्रष्टा इति इनिः—साक्षी। साक्षिणौ। साक्षिणः।

ननु संज्ञायाम् इत्यस्य ग्रहणेन किं ज्ञाप्यते ? इतिचेत्—श्रूयताम्। ऋणदानादिक्रियायाम् यो दाता स दानकर्मणः द्रष्टा, ग्रहीता अपि च तस्य द्रष्टा। एताभ्याम् अन्योऽपि कश्चित् द्रष्टा दानकाले तिष्टति परं "संज्ञाग्रहणात् उपद्रष्टा एव उच्यते—न दाता ग्रहीता वा" इति काशिका। उपद्रष्टा यः समीपे तिष्टन् ऋणदानादिक्रियां पश्यति स एव।

१८८०। क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥ ५।२।९२ ॥

**दी—। क्षेत्रियो व्याधिः। शरीरान्तरे चिकित्स्यः। अप्रतीकार्य्यः इत्यर्थः।**

The suffix घच् is attached to the word परक्षेत्र in the sense of "to be treated therein" and the word क्षेत्रिय is irregularly formed.

मित—। परम् अन्यत् क्षेत्रं शरीरमिति परक्षेत्रम् शरीरान्तरम्। जन्मान्तरशरीरम् इत्यर्थः। तथाहि श्रीभगवदुक्तिः—"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते"। "परक्षेत्रे" अन्यस्मिन् जन्मनि धृते कलेवरे "चिकित्स्यः" प्रतीकार्य्यः इति एतस्मिन् विषये परक्षेत्रशब्दात् सप्तमीसमर्थात् घच् प्रत्ययोभवति, प्रत्ययसन्नियोगेन च "पर" इत्यस्य लोपः—अतएव क्षेत्रियच् इति रूपम्। चकारः स्वरार्थः। क्षेत्रियो व्याधिः। क्षेत्रियः परक्षेत्रे प्रतीकार्य्यः नैव अस्मिन् जन्मनि तेन अप्रतीकार्य्यः इत्यर्थः। क्षेत्रियः कुष्ठव्याधिः—असाध्यः इत्यर्थः। [सूत्रस्य व्याख्यान्तरं काशिकायां दृश्यते—तच्चात्र लिख्यते। "अथवा क्षेत्रियं विषम्। यत् परक्षेत्रे परशरीरे (अन्यस्य शरीरे इत्यर्थः) संक्रमस्य चिकित्स्यं। अथ वा क्षेत्रियाणि तृणानि। यानि सस्यार्थं क्षेत्रे जातानि चिकित्स्यानि नाशयितव्यानि। अथवा क्षेत्रियः पारदारिकः। (परदारगामी इत्यर्थः)। परदाराः परक्षेत्रं, तत्र चिकित्स्यः निग्रहीतव्यः। सर्व्वं चैतत् प्रमाणम्"]।

१८८१। इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥ ५।२।९३ ॥

दी—। इन्द्र आत्मा, तस्य लिङ्गं करणेन कर्त्तुरनुमानात्। इतिशब्दः प्रकारार्थः। इन्द्रेण दुर्जयमिन्द्रियम्।

The suffix घ is attached to the word इन्द्र giving irregularly to the rise of the word इन्द्रिय, to imply something that is either the instrument of इन्द्र or is observed, created, or offered by इन्द्र।

मित—। इन्द्रशब्दात् षष्ठीसमर्थात् घप्रत्ययः स्यात्, लिङ्गमिति एतस्मिन्नर्थे, तथा तृतीयासमर्थादपि इन्द्रशब्दात् घप्रत्ययः स्यात् "दृष्टम्" "सृष्टम्," "जुष्टम्," "दत्तम्" इति एतेष्वर्थेषु, सर्वत्र खलु प्रत्ययसन्नियोगेन घप्रत्ययो निपात्यते। लिङ्गं करणं साधनं हेतुरिति यावत्। इन्द्रस्य लिङ्गं करणम् इति इन्द्रियम्—घप्रत्ययः। चक्षुरादिषु करणेषु अयं शब्दो रूढः। "इन्द्रः मायाभिः पुरुरूप ईयते" इति वेदोक्तिदर्शनात् इन्द्रशब्दस्य आत्मा एव अर्थः। इन्द्रस्य आत्मनः लिङ्गम् करणम् इति इन्द्रियम्। "करणेन कर्त्तुरनुमानात्"—कर्त्रधीनं करणम्; अतएव यत्र यत्र करणम् अस्ति तत्र तत्र कर्त्ता अपि अस्ति इति अनुमीयते। आत्मा नैव अस्माकम् प्रत्यक्षगोचरः। एवं सति चक्षुरादिभिः एकादशभिः करणैः अनुमीयते; यत् चक्षुरादीनि अचेतनान्यपि प्रवर्त्तन्ते, तत् आत्मनः एव शक्तिप्रभावतः। अतएव एतानि खलु आत्मनोऽनुमाने करणानि लिङ्गानि इति यावत्। सांख्यतत्त्वकौमुद्यामपि ईदृशी व्याख्या दृश्यते। अपि च ऋग्वेदे—"जनयन्त्यः इन्द्रियं"। अत्र सायनः—इन्द्रियम् इन्द्रवीर्य्यम्। आत्मा खलु इन्द्रियद्वारेणैव स्वशक्तिं प्रकटयति इति चक्षुरादीनि इन्द्रियाणि उच्यन्ते—अलमति विस्तरेण। इन्द्रेण आत्मना दृष्टम् इन्द्रियम् इन्द्रेण आत्मना सृष्टम् इन्द्रियम्। इन्द्रियम् आत्मना कृतेन शुभेन अशुभेन वा कर्म्मणा उत्पन्नमित्यर्थः। इन्द्रेण आत्मना जुष्टं सेवितम् इन्द्रियं चक्षुरादिद्वारेण विज्ञानोत्पादनादिति बोध्यम्। इन्द्रेण आत्मना विषयेभ्यः दत्तम् यथा यथा ग्रहणाय इति इन्द्रियम्। सूत्रे इतिशब्दः दृश्यते स च प्रकारार्थः; तेन "सति सम्भवे व्युत्पत्तिरन्यापि कर्त्तव्या, रूढेरनियमादिति"—इति काशिका।

अतएव इन्द्रेण दुर्जयम् इन्द्रियम् इति अर्थान्तरं कल्पयति धीमान् दीक्षितः। सूत्रे वाशब्दस्तु प्रत्येकमभिसंबध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयति। रूढिशब्दानां व्युत्पत्तेरनियमः—अतएव सुष्ठूक्तं भाषावृत्तिकृता—"संज्ञाशब्दानां व्युत्पत्तेरनियमदर्शनार्थोऽयं योगः"।

## १८८२। तदस्यास्त्यस्मिन्निति मतुप्॥ ५।२।९४॥

**दी—। गावोऽस्यास्मिन् वासन्ति गोमान्। भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः।**

The suffix मतुप् is attached to words to denote the persons or things that are possessed of the objects expressed by the said words.

मित—। तदिति प्रथमासमर्थविभक्तिः। अस्ति इति प्रकृतिविशेषणम्। अस्य अस्मिन् इति द्वयमपि प्रत्ययार्थः। सूत्रार्थस्तु अयमेव—तदिति प्रथमासमर्थात् प्रातिपदिकात् अस्य इति षष्ठ्यर्थे अस्मिन् इति सप्तम्यर्थे वा मतुप् प्रत्ययो भवति, यत् खलु प्रथमासमर्थम् "अस्ति" चेत् तद्भवति—तस्यविद्यमानता चेत् स्यादित्यर्थः। गावोऽस्य अस्मिन् वा सन्ति इति गोमान्। सूत्रे य इतिशब्दोऽस्ति, स अर्थनियमं ज्ञापयति। को वा अर्थनियम इति आकाङ्क्षाम् पूरयति इयं कारिका। कारिकायाम् प्रकाशितेषु एव अर्थेषु मतुप्प्रभृतयः—इनि विन् मतुप् इत्यादयः—प्रयुज्यन्ते। भूमा प्राचुर्य्यम्। भूम्नि तावत्—( भूम्ना प्राचुर्य्येण ) गावः अस्य सन्ति इति गोमान्। निन्दायाम्—कुष्ठम् अस्य अस्ति इति कुष्ठी। "उपस्थकुष्ठिनी वेश्या" इति। प्रशंसायाम्—( प्रशस्तं ) रूपम् अस्य अस्ति इति रूपवान्। रूपवती कन्या। नित्ययोगे—क्षीरम् ( नित्यमेव ) अस्य अस्ति इति क्षीरी वृक्षः। अतिशायने—( अतिशयितं) उदरम् अस्या अस्ति इति उदरिणी कन्या। संसर्गे—दण्डेन सह अस्य संसर्गः अस्ति इति दण्डी, एवं छत्री। अस्तिविवक्षायाम्—अस्तिमान्।

## १८८३। रसादिभ्यश्च॥ ५।२।९५॥

**दी—। मतुप्। रसवान्। रूपवान्। अन्यमत्वर्थीय-**

निवृत्त्यर्थं वचनम्। रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह—गुणात्; एकाचः—स्ववान्। गुणग्रहणं रसादीनां विशेषणम्।

The suffix मतुप् is attached to the words, that pass by the term रसादि in the aforesaid sense. The word गुण in the रसादि list specifies the words रस etc; that is रस etc take मतुप् only when they are गुणवाचक।

मित—। रस इत्येवमादिभ्यः पूर्व्वोक्ते विषये मतुप् स्यात्।

ननु पूर्व्वसूत्रेणैव मतुप् सिध्यति तर्हि कथं पुनरस्य सूत्रस्य सृष्टिरितिचेत् उच्यते —"अन्य—" इत्यादिना। एभ्यः मतुप्प्रत्ययं विहाय अन्ये मत्वर्थीयाः प्रत्ययाः इनि-प्रभृतयो न स्युरिति वचनार्थमेव। रसादयः श्रीमता एव उक्ताः; रसः अस्य अस्ति इति रसवान्। रूपम् अस्य अस्ति इति रूपवान्, वर्णवान्, गन्धवान्, स्पर्शवान्, शब्दवान्, स्नेहवान्। एकस्वरविशिष्टा अपि रसादिषु पठ्यन्ते—तेन स्वं धनम् अस्य अस्ति इति स्ववान्। "भाष्यकारस्य तु सूत्रस्यास्य प्रत्याख्यानम् अभिमतम्। रसिको राजा। रूपिणोऽमरसः। स्पर्शी वायुरित्यादि दर्शनात्" इति भाषावृत्तिः। अत्र काशिका— "रसादिभ्यः पुनर्वचनम् अन्यनिवृत्त्यर्थम्। अन्ये मत्वर्थीयामा भुवन्निति। कथं रूपिणी कन्या; रसिको दारकः? प्रायिकमेतद्वचनम्। अथवा गुणादित्यत्र पठ्यते। तेन ये रसनेन्द्रियादिग्राह्या गुणास्तेषामत्र पाठः। इह माभूत्—रूपिणी। रूपिक इति। अत्र शोभा योग्यता गम्यते। रसिको नट इत्यत्र भावयोगः" ॥ रस, रूप, गन्ध, स्पर्श, शब्द, स्नेह—गुणात्। एकाचः। अत आह—"गुणग्रहणं रसादीनां विशेषणम्"। श्रीमता दीक्षितेन तु शेषोक्तं मतम् आश्रित्य स्ववृत्तौ गुणात् इति पठित्वा "गुणग्रहणम् रसादीनां विशेषणम्" इति उक्तवान्। अस्य अयमाशयः—चक्षुषोर्विषयः रूपम्। जिह्वायाः रसः। नासिकायाः गन्धः। त्वचः स्पर्शः। कर्णयोराकाशः। स्नेहशब्दः रसवाची। एते गुणवाचकाः शब्दाः (इन्द्रिय-ग्राह्येभ्यः) गुणवाचकेभ्यः एव एतेभ्यः शब्देभ्यः मतुप् स्यात् नान्यः मत्वर्थीयः। अतएव साधूक्तं

"गुणात्", "गुणग्रहणम् रसादीनां विशेषण"मिति। "गुणात्" गुणवाचकात् एव एभ्यः प्रत्ययः इष्ट इत्यर्थः। गुणशब्देन (गुणवाचकत्वेन इत्यर्थः) रसादिशब्दाः विशिष्यन्ते। यदात एते इन्द्रियग्राह्यगुणवाचकाः न स्युस्तदा एभ्योन्ये मत्वर्थीयाः भवेयुः। रूपिणी, रूपिक इत्यत्र रूपशब्दो न इन्द्रिय-ग्राह्यगुण-वाची, परं तु शोभायोग्यता एताभ्याम् गम्यते। तेन प्रत्ययान्यद्वयं साधु। रसिको नटः इत्यत्र रसशब्दो भाववाची। न खलु जिह्व-ग्राह्यगुण-वाची। तथाहि साहित्यदर्पणे—"विभावेनानुभावेन व्यक्तः संचारिणा तथा, रसतामेति रत्यादिः स्थायिभावः सचेतसाम्"॥ रसिको नटः—अत्र रसशब्देन स्थायी भावो यो रसः स एव अभिमतः। एवं रूपिणी रूपिक इत्यादि स्थले यो रूपशब्दः—स तु शोभायाः अङ्गमेव वाचयति। यथा साहित्यदर्पणे "रूपयौवन लालित्यभोगाद्यैरङ्गभूषणम् शोभा प्रोक्ता"। इन्द्रियग्राह्यगुणवाचिभ्यः एभ्यः केवलं मतुप् स्यात्। अस्य एकम् उदाहरणम् उल्लिख्यते—"स्पर्शवद्विशेषगुणः" इति भाषापरिच्छेदटीकायाम् (मुक्तावल्याम्)। तदर्थस्तु—स्पर्शवताम् विशेषगुणः इत्यर्थः। स्पर्शवताम् स्पर्शशालिनाम् इतिभावः।

**१८८४। तसौ मत्वर्थे ॥ १।४।१९ ॥**

**दी—। तान्तसान्तौ भ-संज्ञौ स्तो मत्वर्थे प्रत्यये परे। वसोः संप्रसारणम्। विदुष्मान्।**

Words, ending in तकार or सकार, pass by the technical term भ, (i. e. should be taken as भसंज्ञक) when the suffix मतुप् or any other suffix bearing the same sense, is joined to them.

मित—। मतुप्प्रत्यये तथा मतुप्प्रत्ययस्य अर्थम् प्रकाशयति यः प्रत्ययस्तादृशे प्रत्यये च परे तकारान्तस्तथा सकारान्तश्च शब्दः भसंज्ञां भजते। विद्वान् अस्मिन् अस्ति इति वाक्ये विद्वस्शब्दात् मतुप्। मतुपि परे विद्वस् इत्यस्य अनेन भ-संज्ञा; अस्य सकारान्तत्वात्। ततः "वसोः संप्रसारणम्" (६।४।१३१)—वस्वन्तस्य भस्य सम्प्रसारणम् स्यादिति विद्वस् इत्यस्य भत्वात् संप्रसारणं भवेत् तेन विदुष्मान् इति रूपम्। सकारस्य षत्वं तु "इण्कोः" (८।३।५७) इत्यादिसूत्रेण।

दी—। **गुणवचनेभ्यो मतुपो लुगिष्टः ॥ (वा) ॥ शुक्लो-गुणोऽस्य अस्ति इति शुक्लः पटः। कृष्णः।**

मित—। गुणः पदार्थविशेषः। तथाहि भाषापरिच्छेदे—"द्रव्यंगुणस्तथा कर्म्म सामान्यं सविशेषकम्, समवायस्तथाभावः पदार्थाः सप्तकीर्त्तिताः। गुणः खलु द्रव्याश्रितः स्यात्। "गुणवचनेभ्यः" गुणवाचिभ्यः प्रातिपदिकेभ्यः "मतुपः" अस्त्यर्थे विहितस्य मतुप्प्रत्ययस्य "लुक्" "इष्टः" अभिप्रेतः शास्त्रकृतामिति शेषः। शुक्लः इति गुणवाची शब्दः। शुक्लोगुणोऽस्य अस्ति इति मतुपः लुक्=शुक्लः पठः। एवं कृष्णोगुणोऽस्य अस्ति इति मतुपः लुक्—कृष्णः पटः। इत्थं श्वेतः। शुक्लादयः शब्दाः गुणवाचिनः विशेष्याश्च यदा भवन्ति तदैव तेभ्योविहितस्य प्रत्ययस्य लुक्।

**१८८५। मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ ८।२।९ ॥**

दी—। **मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात् परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान्।**

The म of मतुप् is changed to व with reference to the words that have got either म, अ or आ as their last or penultimate letter except with reference to the words that are listed under यवादि class।

मित—। येषां प्रातिपदिकानाम् अन्ते उपधायां वा मकारः अवर्णो वा तिष्ठति, तेभ्योविहितस्य मतुपो मकारस्थाने वकारो भवति; परं यव इत्येवमादीनां तु तथा न स्यात्। किम् अस्य अस्ति इति किंवान्। "रसादिभ्यश्च" (५।२।९५) इति रसादिषु एकाच् विशिष्टस्यशब्दस्य पाठात् "किम्" इत्यस्मात् मतुप् स्यात् तस्य च मकारः अनेन वः इति भवति मकारान्तत्वात्। ज्ञानमस्य अस्ति इति ज्ञानवान—अकारान्तत्वात् मस्थाने वः। विद्या अस्य अस्ति इति विद्यावान्—

अस्य आकारान्तत्वात् म स्थाने वः। लक्ष्मीरस्य अस्ति इति लक्ष्मीवान्—मकारोपधत्वात्। यशस् अस्य अस्ति इति यशस्वान्—अकारोपधत्वात्। भाः अस्य अस्ति इति भास्वान् आकारोपधत्वात्। एवं शंवान्, शमीवान्, वृक्षवान्, खट्वावान्, पयस्वान् इत्यादयः। मादुपधायाः इतिकिम्? अग्निमान्, मतिमान्। अयवादेः इति किम्? यवादिभ्यः मतुप् एव स्यात्। यवः अस्य अस्ति इति यवमान्। भूमिरस्य अस्ति इति भूमिमान्। यवादिः—यव, भूमि, कृमि, ऊर्मि, ककुद, गरुत्, वशा, कुञ्चा, द्राक्षा, इक्षु, मधु, द्रुम, धूम, ध्रजि, हरित्, द्रु, भ्रजि, व्रजि इति आकृतिगणोऽयम्।

## १८८६। झयः ॥ ८।२।१० ॥

**टी—। झयन्तात् मतोर्मस्य वः स्यात्। अपदान्तत्वात् न जश्त्वम्। विद्युत्वान्।**

The म of मतुप् with reference to words that end in any of the letters contained in the प्रत्याहार "झय्" is changed to वकार।

मित—। झयः इति झय्प्रत्यहारः। झयः परस्य मतुपो मकारस्य वःस्यात्। विद्युत् अस्य अस्ति इति मतुप्; विद्युत् इत्यस्य झयन्तत्वात् अस्मात् परस्थितस्य मतुपः मस्थाने वकारस्तेन विद्युत् वतुप् इति स्थितिः। ततः विद्युत् इत्यस्य तान्तत्वात् "तसौ मत्वर्थे" (१।४।१९) इति सूत्रेण अस्य पदसंज्ञा गता—भसंज्ञा च स्वीकृता। तथा सति "झलां जशोऽन्ते" (८।२।३९) इति सूत्रेण विहितस्य जश्त्वस्य अत्र न प्राप्ति—स्तेन विद्युत्वान् इति। विद्युत्वान् बलाहकः। तथाहि मेघदूते—"विद्युत्वन्तं ललितवनिताः सेन्द्रचापम्"। एवं मरुत् अस्य अस्ति इति मरुत्वान्। "बभौ मरुत्वान् विकृतसमुद्रः" इति भट्टिकाव्ये। एवं हि उदश्वित्वान् घोषः। अग्निचित्वान् ग्रामः। किञ्च गरुत् अस्य अस्ति इति, ककुत् अस्य अस्ति इति उभयत्र यवादित्वात् मतुप्—तेन गरुत्मान्—ककुद्मान्। भ-संज्ञावशात् जश्त्वम् न।

## १८८७। संज्ञायाम् ॥ ८।२।११ ॥

टी—। मतोर्मस्य वः स्यात्। अह्वीवती, मुनिवती—शरादीनां चेति दीर्घः।

The म of मतुप् is changed to वकार with reference to words that are proper nouns.

मित—। संज्ञायां विषये ( नाम्नि अभिधेये सति ) मतोर्मस्य वः स्यात्। अह्नयः सन्ति अस्याम् नद्याम् इति अह्नीवती नदी। मुनयः सन्ति अस्यां नगर्य्याम् इति मुनीवती नगरी। एवं मणयः सन्ति अस्यां नद्याम् इति मणीवती नदी। शराः सन्ति अस्यां नद्याम् इति शरावती नदी। वापयः सन्ति अस्याम् इति वापीवती नगरी। सर्व्वत्र "नद्यां मतुप्" इति ( ४।२।८५ ) मतुप्। "शरादीनाञ्च" ( ६।३।१२० ) इति इकारस्य दीर्घत्वम्। शर अहि मुनि मणि कपि धून वंश गचि इति शरादिः। एवं वंशावती। धूमावती—दशसु महाविद्यासु अन्यतमा।

१८८८। आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ ८।२।१२ ॥

टी—। एते षट् संज्ञायां निपात्यन्ते। आसन्नशब्दस्य आसन्दीभावः। आसन्दीवान् ग्रामः। अन्यत्र आसन्नवान्। अस्थिशब्दस्य अष्ठीभावः। अष्ठीवान् नाम ऋषिः। अस्थिमान् अन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान् नाम राजा। चक्रवान् अन्यत्र। कक्ष्यायाः संप्रसारणम्। कक्षीवान् नाम ऋषिः। कक्ष्यावान् अन्यत्र। लवणशब्दस्य रुमण् भावः। रुमण्वान्नाम पर्व्वतः। लवणवान् अन्यत्र। चर्म्मणो नलोपाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवती अन्यत्र।

The words enumerated in the sutra such as आसन्दीवत् अष्ठीवत्, चक्रीवत्, कक्षीवत्, रुमण्वत् and चर्मण्वत् are irregularly formed to denote संज्ञा।

मित—। ग्रामे अभिधेये सति आसन्दीवत्, प्राग्अङ्गे अभिधेये सति अष्टीवत्, राजनि गम्ये सति चक्रीवत्, ऋषौ वाच्ये सति कक्षीवत्, पर्व्वते गम्यमाने रुमण्वत्, तथा नद्यां वाच्यायां चर्मण्वत् इति षट् शब्दाः संज्ञायाम् एव निपात्यन्ते। आसन्नम् अस्य अस्तीति मतुप् आसन्नशब्दस्य आसन्दीरूपधारणं तेन आसन्दीवान्। मतुप् प्रत्ययस्य मस्थाने वकारः पूर्व्वसूत्रेणैव सिद्धम्। अत्र सूत्रे प्रकृतिस्थाने आदेशाः खलु निपात्यन्ते। आसन्दीवत् अहिस्थलम् इति काशिका। अन्यत्र आसन्नवान्। आसन्नवत् गृहम्। आसन्दी इति कश्चित् शब्दोऽपि अस्ति यथा औदुम्बरी राजासन्दी भवतीति। मृच्छकटिकेऽपि च आसन्दिका इति शब्दो दृश्यते। आसन्दी-शब्दादपि विहितो मतुप्प्रत्ययः संज्ञायाम् विषये "संज्ञायाम्" (८।२।११) इति मस्थाने वत्वं प्राप्नोति। तर्हि कथम् आसन्नशब्दस्य अपि आसन्दीभावः क्रियते इति चेत्—उच्यते काशिकाकृद्भ्याम्—"आसन्दीवदित्येतत् प्रपञ्चार्थमिह पठ्यते" —इति। एवम् अस्थिशब्दस्य अष्टीभावः स्यात् संज्ञायाम्—तेन अस्थीनि सन्ति अस्य इति अष्टीवान्। "अष्टीवान् इति शरीरैकदेशस्य संज्ञा"—इति काशिका। उक्तं च समासप्रकरणे—"अचतुर—" (५।४।७७) इति सूत्रे उरु च अष्टीवन्तौ ऊर्व्वष्टीवम्। पदष्टीवम्। अन्यत्र अस्थिमान्। यथा—अस्थिमान् प्राणी। चक्रशब्दस्य चक्रीभावः। चक्रीवान् राजविशेषः। अन्यत्र चक्रवान् श्रीकृष्णः; कक्ष्या इति शब्दस्य निपातनेन संप्रसारणं स्यात्। कक्ष्या अस्य अस्ति इति कक्षीवान् नाम ऋषिः। अन्यत्र कक्षावान्। लवणम् अस्य अस्ति इतिमतुपि संज्ञायाम् विषये वतुप्—लवणशब्दस्य रुमन् इति भावः तेन रुमण्वान्—पर्व्वतविशेषः (संज्ञा वा)। अतः रुमण्वान् इति उदयनराजस्य कस्यचित् मन्त्रिणः संज्ञा भासविरचिते स्वप्नवासवदत्तम् इत्याख्ये नाटके वीक्ष्यते। अन्यत्र लवणवान् समुद्रः। केचित् तु वदन्ति यत्—रुमन् इति शब्दान्तरं विद्यते। तस्मादेव संज्ञायाम् मतुपि कृते सति प्रसक्तो नलोपो निपातनेनैव न स्यात् अपिच नकारस्य णत्वमपि निपात्यते। अत्र भाषावृत्तिटीपन्याम् श्रीमन्तः श्रीशचन्द्रचक्रवर्त्तिनः—"रुमा लवणाकर इति केचित्। तथाहि असम्बद्धार्थवाक्योदाहरणे भोजः—जरद्गवः कम्बलपादुकाभ्याम् द्वारे स्थितो गायति मङ्गलानि। तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लवणस्य

कोऽयं:'' इति सरस्वतीकण्ठाभरणे—[लघुनस्य कोऽयं इति पाठान्तरम्]। चर्म्माणि अस्य सन्ति इति मतुप् संज्ञायां मस्थाने वकार:—तेन चर्म्मन् वतुप् इति स्थिति:। तत: प्रसक्तो नलोपो निपातनेनैव न स्यात् चर्म्मन् इत्यस्य नकारस्य णत्वमपि निपात्यते—तेन चर्म्मण्वती इति। इयं नदीविशेषस्य संज्ञा। अस्य आधुनिकी संज्ञात् चम्बल इति। अन्यत्र चर्मवती।

१८८९। उदन्वानुदधौ च ॥ ८।२।१० ॥

**टी—। उदकस्य उदन्भावो मतौ संज्ञायां च। उदन्वान् समुद्र: ऋषिश्च।**

The word उदक in changed to उदन्—when the suffix मतुप् is attached to it to imply a proper name.

मित—। ''उदधौ'' समुद्रे अभिधेये सति तथा ''च'' संज्ञायाम् गम्यमानायाम् ''उदन्वान्'' उदकस्य उदन् इति भाव:—मतुप् प्रत्यये परे भवति। उदकम् अस्य अस्ति इति मतुप्—संज्ञायाम् (८।२।१) इति मस्थाने वकार: उदकस्य उदन् इति भावश्च तेन उदन्वान् इतिरूपम्। उदन्वान् नाम ऋषि:—''यस्य उदन्वत: पुत्र:'' इति काशिका। अन्यत्र उदकवान्। यथा—उदकवान् घट:।

१८९०। राजन्वान् सौराज्ये ॥ ८।२।१४ ॥

**टी—। राजन्वतीभू:। राजवान् अन्यत्र।**

The नकार of the word राजन् does not elide (though it should have in accordance with the rule ''नलोप:—''( ८२।७ ), before the suffix मतुप् and the word राजन्वान् is ( irregularly ) formed to mean a country blessed with good administration ( i. e. good ruler ).

मित—। संज्ञायां विषये मतुप्प्रत्यये परे राजन् इत्यस्य ''नलोप:—'' ( ८।२।७ ) इति प्रसक्त: नलोपो न स्यात्, सौराज्ये अभिधेये सति। शोभनो राजा

यस्मिन् इति स राजन्वान् देशः। राजन्वती भूः। भूः पृथ्वी। तथाहि रघुवंशे "राजन्वतीमाहुरनेन भूमिम्" इति। अन्यत्र राजवान्। तथाहि "सुराज्ञि देशे राजन्वान् स्यात्, ततोऽन्यत्र राजवान्"।

**१८८१। प्राणिस्थादातोलजन्यतरस्याम् ॥ ५।२।९६ ॥**

**टी—। चूड़ालः। चूड़ावान्। प्राणिस्थात् किम्? शिखावान् दीपः। आतः किम्? हस्तवान्। प्राण्यङ्गादेव—(वा)। नेह मेधावान्। प्रत्यय-स्वरेणैव सिद्धे अन्तोदात्तत्वे चूड़ालोऽसीत्यादौ स्वरितो वानुदात्ते पदादौ इति स्वरितबाधनार्थश्चकारः।**

In the sense of मतुप्, the suffix लच् is optionally added to words ending in आ, that stand for the limb of any animal. For rest see Tika.

मित—; "प्राणिस्थात्" प्राणिनि तिष्ठति यद्वस्तु तद्वाचकात्—प्राण्यङ्गवाचिनः इत्येव ज्ञेयं, "आतः" आकारान्तात् प्रातिपदिकात् "लच्" मतुपोऽर्थे लप्रत्ययो भवति "अन्यतरस्याम्" विकल्पेन; चूड़ा अस्य अस्ति इति चूड़ालः—लच्। चूड़ावान् मतुप। कर्णिका अस्य अस्ति इति सः—कर्णिकालः। मतुप् कर्णिकावान्। एवं शिरालः शिरावान्। जङ्घालः—जङ्घावान्। तथाहि भट्टिकाव्ये "शिरालजङ्घैः गिरिकूट दघ्नैः"। प्राणिस्थात् इति किम्? शिखा अस्य अस्ति इति शिखावान् प्रदीपः। नहि प्रदीपः प्राणी नवा शिखा अत्र प्राणिनि तिष्ठति। आकारान्तादिति किम्? हस्तवान्। अत्र मतुप् एव। प्राणिस्थात् इत्यनेन प्राण्यङ्गवाचिन एव प्रत्यय इष्टः,—न खलु प्राणिहितं वस्त्वन्तरं वाचयति यः शब्दस्तस्मादपि—तेन मेधा अस्य अस्ति इति मेधावान्। चिकीर्षावान्—जिहीर्षावान्। एतेषां प्राणिस्थितत्वेऽपि न प्राण्यङ्गवाचकत्वं तेन न लच् परं मतुप् एव।

ननु चूड़ाल इत्यादीनां प्रत्यय-स्वरेणैव अन्तोदात्तत्वं सिद्धम्। तर्हि कथं प्रत्ययस्य (लच् इत्यस्य) चकारेत्वं विधाय "चितः" (६।१।१६३), "तद्धितस्य" (६।१।१६४) इति सूत्राभ्याम् अन्तोदात्तत्वं प्रापयति इति चेत् उच्यते—सत्यं खलु "ह्रस्वनुड्भ्याम्

मतुप्'' इति मतुपः अन्तोदात्तत्वं स्यात्। परं चूडालोऽसि इत्यादौ असि इत्यस्य "धातोः" (६।१।१६२) इति अन्तोदात्तत्वम्। तथा सति "स्वरितो वानुदात्ते-ऽपदादौ" (८।२।६) इति सूत्रेण अनुदात्ते पदादौ परे (असि इति परे इत्यर्थः) चूडालः इति अन्तोदात्तेन सह एकादेशः स्वरितो विकल्पेन प्रसक्तः तन्माभूदिति लच् प्रत्ययस्य चकारेत् करणेन ज्ञाप्यते।

१८८२। सिध्मादिभ्यश्च ॥ ५।२।९७ ॥

टी—। लच् वा स्यात्। सिध्मलः। सिध्मवान्। अन्यतरस्यांग्रहणं मतुप् समुच्चयार्थं नतु प्रत्यय—विकल्पार्थम्। तेनाकारान्तेभ्य इनि ठनौ न।

In the aforesaid sense, the suffix ल is optionally added to the words that pass by the term सिध्मादि; the word अन्यतरस्याम् here got from the prior rule is to take up the affix मतुप् as well and not to allow option of other मत्वर्थीय affixes; see Tika also.

मित—। लजन्यतरस्यामिति पूर्व्वसूत्रादनुवर्त्तते। मतुप्प्रत्ययस्य अर्थे सिध्म एवमादिभ्यः प्रातिपदिकेभ्यश्च लच्प्रत्ययो भवति अन्यतरस्याम्। सूत्रस्थचकारः "प्राणि-स्थादातो" इति एतेन सह सिध्माद्यान् समुच्चिनोति। यथा प्राणिस्थादातो लच् स्यात् मतुप् प्रत्ययस्य अर्थे तथा सिध्मादिभ्योऽपि स्यादिति आशयः। अपिच "अन्यतरस्याम्" इति यदत्रानुवर्त्तते, तत् न खलु लच्प्रत्ययस्य वैकल्पिकत्वं सूचयति, परं तु मतुप्प्रत्ययेनैव लच् प्रत्ययस्य समुच्चयं ज्ञापयति—तेन सिध्मादिभ्यः लच् स्यात्, मतुबपि स्यादिति भावः। सिध्मलः, सिध्मवान्। "मादुपधायाश्च—" (८।२।९) इति मतुपो मस्थाने वकारः। सिध्मादि यथा—सिध्म, गडु, मणि, नाभि, जीव, बीज, वीणा, कृष्ण, निष्पाव, पांसु, सक्तु, हनु, मांस, परशु, पर्ण, उदक, प्रज्ञा, मण्ड, पार्श्व, गण्ड, सक्थि, ग्रन्थि, कर्ण, स्नेह, शीत, श्याम, पिङ्ग, पित्त, शुष्क, पृथु,

मृदु, मञ्जु, पक्ष, चटु, कपि, कण्डु, संज्ञा, श्री, कुश, धारा, श्लेष्मन्, कु, वर्म्मन्, पेश, पक्ष्मन्, कुण्ड। कानिचित् प्रसिद्धोदाहरणानि अत्र लिख्यन्ते—पेशल, पक्षाल, पृथुल, मृदुल, मञ्जुल, चटुल, कपिल, श्रील, कुशल, श्यामल, पिङ्गल, शीतल, मांसल।

ननु अत्र गणे ये अकारान्ताः पठ्यन्ते, तेभ्यः "अत इनि ठनौ" (५।२।११५) इनि ठनौ च भवताम्—लच् प्रत्ययप्रसङ्गे अन्यतरस्याम् इत्यस्य ग्रहणात् इतिचेत्। समाधत्ते—नैवम्। सिध्मादिभ्यः विहितस्य लच् प्रत्ययस्य प्रसङ्गे अन्यतरस्याम् इत्यस्य ग्रहणेन लचः नैव वैकल्पिकत्वम्—येन लचोऽप्राप्तिपक्षे अकारान्तेभ्यः पक्ष इत्यादिभ्यः इनिठनौ स्याताम्—अपितु अन्यतरस्याम् इति लच्-प्रत्ययेन सह मतुपं समुच्चिनोति तेन लच् प्रत्ययः—तस्य अप्राप्तिपक्षे तु मतुप् एव स्यात्—नान्यत् किञ्चित् इति सर्व्वम् अवदातम्। तेन पक्षलः—पक्षवान्, कुण्डलः—कुण्डवान्, इत्यादय एव साधवः। पक्ष्मन्—पक्ष्मलः। तथाहि पदाङ्कदूते—"दौत्यं कर्तुं सुरहरपदं लक्षणं पक्ष्मलाक्षो"।

## टी—। वातदन्त-बल-ललाटानामूङ् च ॥

मित—। वात दन्त बल ललाट इति एते सिध्मादिषु पठ्यन्ते। अतएव एभ्यो लच् स्यात्, प्रत्यये परे च एषाम् ऊङ् इत्यागमश्च भवेत्। वातूलः, दन्तूलः, बलूलः, ललाटूलः। गलादपि इति काशिकाभाषावृत्तिकारौ—तेन गलूलः। किञ्च—

(१) पार्ष्णिधमन्योर्दीर्घश्च। पार्ष्णि धमनि इति एतौ सिध्मादिषु पाठ्यौ, एताभ्याम् लच् स्यात्, प्रत्यये परे अनयोरिकारस्य दीर्घत्वं भजति—पार्ष्णीलः—धमनीलः।

(२) जटा घटा कालात् क्षेपे। क्षेपे निन्दायाम् एभ्यो लच् स्यात्—जटालः, घटालः, कालालः।

(३) क्षुद्रजन्तूपतापाच्च॥ क्षुद्रजन्तुवाचिभ्यस्तथा उपतापवाचिभ्यः शब्देभ्यः लच् प्रत्ययः स्यात्। उपतापः सन्तापजनकः व्याधिः। क्षुद्रजन्तुभ्यस्तावत्—यूकः—यूकालः। मक्षिका—मक्षिकालः। उपतापवाचिभ्यः—मूर्च्छा—मूर्च्छालः। विचर्चिका विचर्चिकालः। विपादिका विपादिकालः।

१८८३। वत्सांसाभ्याम् कामवले ॥ ५।२।९८ ॥

दी—। आभ्यां लच् स्यात् यथासंख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः।

The suffix लच् is (optionally) added to the words वत्स and अंस to imply a dotingperson (fond of one) and a strong one respectively.

मित—। कामः स्नेहः, कामवति स्नेहवान् इत्यर्थे वत्सशब्दात् लच स्यात्—तेन वत्सलः, वत्सलः पिता, एवं बलवान् इत्येव अर्थे अंसशब्दात् लच् स्यात् अंसलः बलवान्, अंसलो युवा। दीक्षितकृतौ यत् "वा" इति तत्तु नैव भाषावृत्तिकृत् नापिच काशिका उररीकरोति। काशिकामते अनयोरेव अर्थयोर्लच् नित्यमेव स्यात्—तेन अन्यत्र अंसवती गौः। अंसवान् दुर्बलः इत्यादयः एव भवेयुः।

१८८४। फेनादिलच्च ॥ ५।२।९९ ॥

दी—। चाल्लच्। अन्यतरस्याम् ग्रहणं मतुप् समुच्चयार्थमनुवर्त्तते। फेनिलः। फेनलः। फेनवान्।

The suffix इलच् as well as the suffixes लच् and मतुप् are added to the word फेन। [The word फेनिल occurs in Bengali also, as in "उत्तालतरङ्गमयी फेनिल नर्मदा।"]

मित—। अन्यतरस्यामिति अनुवर्त्तते। "फेनात्" फेनशब्दात् "इलच्" इलच् प्रत्ययो भवति मतुपोऽर्थे, "च" तथा लच् प्रत्ययोऽपि स्यात्, "अन्यतरस्याम्" अतः मतुप् भवति। फेनः अस्य अस्ति इति इलच्—फेनिलः, लच् फेनलः, मतुप फेनवान्।

१८८५। लोमादि—पामादि पिच्छादिभ्यः शनेलचः ॥ ५।२।१००॥

टी—। लोमादिभ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवान्। पामादिभ्यो नः—पामनः। अङ्गात् कल्याणे। अङ्गना॥ लक्ष्म्या अच्च। लक्ष्मणः॥ विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः। (वा)। विषुणः॥ पिच्छादिभ्यः इलच्। पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्।

In the aforesaid sense (i.e. in the sense of मतुप्) the suffix is attached to words known as लोमादि, न is affixed to words passing by the term पामादि and इलच् is added to words falling within the category of पिच्छादि।

मित—। मतुप्‌प्रत्ययस्य अर्थे लोमन् एवमादिभ्यः शः स्यात्, पामन् एवमादिभ्यः नः स्यात्, पिच्छ इत्यादिभ्यः इलच् स्यात्; तथा विकल्पेन मतुप् अपि एभ्यः सर्व्वेभ्यः स्यात्। लोमादिभ्यः शप्रत्ययः—यथा लोमानि अस्य सन्ति इति लोमशः—पक्षे लोमवान्, रोमाणि अस्य सन्ति इति रोमशः—पक्षे रोमवान्। लोमादिर्यथा—लोमन्, रोमन्, वल्गु, बभ्रु, कपि, मुनि, तरु, अरि, गिरि, कर्क, कपिरस्य अस्ति इति कपिशः, एवं गिरिशः। पामादिभ्यः नप्रत्ययः स्यात्—यथा पामानि अस्य सन्ति इति पामनः—पक्षे पामवान्, एवं श्लेष्मणः, हेमनः, वलिनः, वामनः। पामादि यथा—पामन्, वामन्, वेमन्, हेमन्, श्लेष्मन् कद्रु, वलि, सामन्, उष्मन्, कृमि, श्लेष्म इत्यादि इति काशिका। अपिच—अङ्गात् कल्याणे, कल्याणम् इति अभिधेये सति अङ्गशब्दात् न-प्रत्ययः स्यात्। कल्याणं शोभनम् अङ्गम् अस्याः अस्ति इति अङ्गना, स्त्रियामाप्, प्रशस्ताङ्गी इत्यर्थः। लक्ष्म्या अच्च—लक्ष्मीशब्दादपि नप्रत्ययः स्यात्, प्रत्यये परे तस्य शब्दस्य ईकार स्थाने अच् स्यात्, लक्ष्मीः अस्य अस्ति इति लक्ष्मणः,। "विष्वगिति", विषु अञ्चति इति विषुशब्दात् अञ्चधातोः क्विनि विष्वक् इति रूपं स्यात्, तस्मात् विष्वच् शब्दात् नप्रत्ययो भवेत् प्रत्यये परे सति, विषु अच् इति सन्धिकरणात् प्राक् यदैवम् रूपमासीत्, तस्य यत् उत्तरपदम् "अच्" इति तस्य लोपः स्यात्, तथासति विषुणः इति रूपम्। पिच्छादिभ्यः इलच् स्यात् यथा—पिच्छिलः,

पक्षे—पिच्छवान् ; उरस्—उरसिलः—पक्षे उरस्वान, एवं जटिलः—जटावान्, पिच्छादि यथा—पिच्छ, उरस्, ध्रुवक, ध्रुवक, वर्ण, उदक, पङ्क, प्रज्ञा ।

१८८६ । प्रज्ञाश्रद्धार्चाभ्योण: ॥ ५।२।१०१ ॥

टी— । प्राज्ञो व्याकरणे । प्राज्ञा । श्राद्धः । आर्च: वृत्तेश्च—वार्त्तः ।

The suffix ण is attached to the words प्रज्ञा, श्रद्धा, अर्चा and वृत्ति in the aforesaid sense.

मित— । प्रज्ञा श्रद्धा अर्चा वृत्ति इति एतेभ्यः मतुपोऽर्थे णप्रत्ययः स्यात्, मतुप् तु सर्व्वत्र समुच्चीयते । प्रज्ञा अस्य अस्ति इति प्राज्ञः प्रज्ञावान् । स्त्रियां तु प्राज्ञा । श्रद्धा अस्य अस्ति इति श्राद्धः—श्रद्धावान् । अर्चा अस्य अस्ति इति आर्चः— अर्चावान् । वृत्तिरस्य अस्ति इति वार्त्तः—वृत्तिमान् ।

१८८७ । तपःसहस्राभ्यां विनीनी ॥ ५।२।१०२ ॥

टी— । विनीन्योरिकारो नकारपरित्राणार्थः । तपस्वी । सहस्री । असन्तत्वात् अदन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा मा भूदिति । सहस्रात्तु ठनोऽपि बाधनार्थम् ।

In the aforesaid sense, the suffix विनि is attached to the word तपस् and the suffix इनि is attached to the word सहस्र । The final इकार in these affixes is to save the elision of न ( if final in these affixes) ; mark the affixing of विनि after तपस् here, but विनि owing to its असन्तत्व was due ; and सहस्र being अकारान्त इनि is due after it by 'अत इनिठनौ"—still this injunction suggests that the later sutra "अणच" should not bar this and सहस्र should not take ठन् being अकारान्त ।

मित— । मतुपोऽर्थे तपसशब्दात् विनिः तथा सहस्रशब्दात इनिप्रत्ययश्च ।

विनि इनि इत्यनयोरन्तिम इकारस्तु कथम् इति चेत ?—उच्यते "विनीन्यो"रित्यादिना, यथा ठनादिप्रत्यये प्रत्ययावयवभूतो नकारो लुप्यते तथा विनि इनि इत्यनयोरपि नकारो न लुप्यताम् ? —अन्तिम इकारः स्वयमेव इत् सन् ज्ञापयति यत् नैव नकारो लोपं याति इति एवमेव उक्तं श्रीमता दीक्षितेन—"विनीन्योरिकारो नकार-परित्राणार्थः" इति वाक्येन । तपोऽस्यास्मिन् वा विद्यते इति तपस्वी । तथाहि कुमारे—"तपस्विने तामकृचा करेण" । सहस्रम् अस्य अस्मिन वा अस्ति इति सहस्री । तथाहि पञ्चतन्त्रे "सहस्री वाञ्छति लक्षम्" ।

ननु "अस् माया-मेधास्रजो विनिः" ( ५।२।१२१ ) इति सूत्रेण तपस् शब्दात विनिप्रत्ययः सिध्यति—अस्य असन्तत्वात्; एवं सहस्रशब्दादपि "अत इनिठनौ" ( ५।२।११५ ) इति इनिः सिध्यति—अस्य अदन्तत्वात । तर्हि कथं सूत्रस्य अस्य पृथगुप-न्यासः ? उच्यते—अस्मात परं "अण् च" ( ५।२।१०३) इति सूत्रं विद्यते । तत्सूत्रेण एताभ्याम् विहितेन अण् प्रत्ययेन विनि इनि इति एतयो बाधा न स्यादिति ज्ञापयितु-मेव । किञ्च "अत इनिठनौ" ( ५।२।११५ ) इति प्रसक्तः ठनप्रत्ययः सहस्र-शब्दात न स्यादित्यपि सूचयितुम् च ।

## १८८८ । अण् च ॥ ५।२।१०३ ॥

## दी—। योग-विभाग उत्तरार्थः । तापसः । साहस्रः ।

In the aforesaid senses, the suffix अण is also attached to तपस् and सहस्र । For the significance of making this sutra a separate one—see Tika below.

मित—। तपस् सहस्र इति एताभ्याम् मतुपोऽर्थे अणप्रत्ययश्च भवति । तपः अस्य अस्मिन् वास्ति इति तापसः । सहस्रमस्मिन अस्य वा अस्ति इति साहस्रः ।

ननु अण इति प्रत्ययं पूर्व्वसूत्रे एव अन्तर्भाव्य एकमेव सूत्रम् रचितं भवेत चेत—लाघवं स्यात । तथासति कथं नाम अणप्रत्ययं पूर्व्वसूत्रात आच्छिद्य "अण् च" इति पृथक सूत्रं कृतम् इति चेत—समाधत्ते—योगविभाग इत्यादिना । "योगविभागः" "तपः सहस्राभ्याम् विनीनी" इति सूत्रात अण् प्रत्ययस्य न्याय्यं योगं विभज्य यत

अण् च इति पृथक्सूत्ररचनं तत् तु "उत्तरार्थं" परसूत्रे अपि अणप्रत्ययस्य अनुवृत्तिम् सूचयितुम्।

दी—। ज्योत्स्नादिभ्यः उपसंख्यानम्॥ ज्यौत्स्नः। तामिस्रः।

मित—। ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका इति ज्योत्स्नादिः। एभ्यो मतुपप्रत्ययस्य अर्थे अण् स्यात। ज्योत्स्ना विद्यते अस्मिन पक्षे ज्यौत्स्नः पक्षः, शुक्लः पक्षः इत्यर्थः। तमिस्रा विद्यते अस्मिन पक्षे इति तामिस्रः पक्षः कृष्णः पक्षः,। एवं कौण्डलः, कौतपः, वैसर्पः, वैपादिकः।

१८९९। सिकताशर्कराभ्याञ्च॥ ५।२।१०४॥

दी—। सैकतो घटः। शार्करः।

In the said sense, the said suffix अण् is taken by the words सिकता and शर्करा।

मित—। सिकता शर्करा इति प्रातिपदिकाभ्याम् मतुपोऽर्थे अण् प्रत्ययो भवति देशात् अन्यस्मिन वस्तुनि गम्यमाने। सिकताः अस्मिन सन्ति इति सैकतो घटः। बालुकानिर्म्मितो घटः इत्यर्थः। शर्करा अस्मिन अस्ति इति शार्करं मधु। देशे अभिधेये तु—

१९००। देशे लुबिलचौ च॥ ५।२।१०५॥

दी—। चादण् मतुप् च। सिकताः अस्त्यस्मिन् देशे सिकताः। सिकतिलः। सैकतः—सिकतावान्। एवं शर्करेत्यादि।

The suffixes इलच, अण्, मतुप are attached to the words सिकता and शर्करा to imply place; the suffixes may optionally elide as well.

मित—। "देशे" स्थाने इत्यर्थः। तस्मिन् अभिधेये सति "लुप्"—सिकता-

शर्कराभ्याम् विहितस्य प्रत्ययस्य लुप् स्यात्; "—इलचौ" आभाम् इलच् प्रत्ययश्च स्यात्, "च" अण् मतुपौ च स्तः। तर्हि "कस्य पुनरयं लुप्। मतुबादीनामन्यतमस्य, विशेषाभावात्" इति काशिका। सिकता अस्मिन् विद्यन्ते सिकता देशः। अत्र प्रत्ययस्य लुप्। सिकतिलो देशः—इलच्। सैकत;—अण्। सिकतावान् देशः —मतुप्। एवम् शर्करा विद्यते अस्मिन् देशे शर्करा देशः। अत्र प्रत्ययस्य लुप। "लुपि युक्तवद्व्यक्तिवचने" (१।२।५१) इति शर्करा देशः इत्यत्र शर्करा इत्यस्य स्त्रीत्वम्। शर्करिलः देशः—इलच्। शार्करः देशः—अण्। शर्करावान् देशः—मतुप्। देशे इति किम्? सैकतो घटः—शार्करं मधु। अण्। सिकतो देशः इति प्रामादिकः पाठः। भाषावृत्तिकारेणापि "सिकता देशः" इत्युक्तम्। यतः "लुपि युक्तवद्व्यक्तिवचने" (१।२।५१) इति निर्द्देशात् सिकताः अस्मिन् विद्यन्ते इति वाक्ये प्रत्ययस्य लुपि सति सिकता इत्यस्य स्त्रीत्वं बहुत्वमेव च न्याय्यम्।

## १८०१। दन्त उन्नत उरच्॥ ५।२।१०६॥

## दो—। उन्नताः दन्ताः सन्ति अस्य दन्तुरः।

The suffix उरच् is attached to the word दन्त to denote the person, that has long teeth.

मित—। उन्नत इति प्रकृतिविशेषणम्। दन्त शब्दात् उन्नतोपाधिकात् उरच् प्रत्ययो भवति मतुपोऽर्थे। उन्नताः दन्ताः सन्ति अस्य इति दन्तुरः। उन्नत इति किम्? दन्ताः सन्ति अस्य इति दन्तवान्।

## १८०२। ऊषसुषिमुष्कमधोरः॥ ५।२।१०७॥

## दो—। ऊषरः। सुषिरः। मुष्कोऽण्डः। मुष्करः। मधु माधुर्य्ये—मधुरः।

The suffix र is added to the words ऊष सुषि मुष्क and मधु in the aforesaid sense.

मित—। ऊष सुषि मुष्क मधु इति एतेभ्यः मतुपोऽर्थे रप्रत्ययः स्यात्। ऊषो

ऽस्मिन् विद्यते इति ऊषरं क्षेत्रम्। सुषिरम् आकाशम्। सुषिरं सच्छिद्रमित्यर्थः। सुषिरं काष्ठम्। मुष्कर: पशु:। मधुर: गुड़:। "सर्वत्र अभिधेयनियमं करोति। इह न भवति। ऊषोऽस्मिन् घटे विद्यते, मधु अस्मिन् घटे विद्यते इति"—काशिका। विशिष्ट एव अर्थे एते प्रयोक्तव्याः—न खलु यत्र कुत्रापि इति काशिकाकृतः-आशयः।

**दी—। र-प्रकरणे ख-मुख-कुञ्जेभ्यः उपसंख्यानम् ॥ (वा) ॥ खरः। मुखरः। कुञ्जोहस्तिहनुः। कुञ्जरः।**

The suffix र is added to ख, मुख and कुञ्ज in the selfsame sense.

मित—। ख मुख कुञ्ज इति एतेभ्यः मत्वर्थीयो रप्रत्ययः स्यात्। खम् अस्य अस्ति इति खरः। मुखमस्यास्तीति मुखरः। कुञ्जः हस्तिनो गण्डदेशः। सोऽस्यास्तीति कुञ्जरः।

**दी—। नग-पांसु पाण्डुभ्यश्च (वा)। नगरः। पांशुरः। पाण्डुरः। पाण्डुरशब्दस्तु अव्युत्पन्न एव।**

The suffix र is attached to नग, पांसु and पाण्डु also.

मित—। नग पांसु पाण्डु इति एतेभ्योऽपि रः स्यात्। नगरः। पांसुरः। पाण्डुरः। दीक्षितस्तु पाण्डुरशब्दम् अव्युत्पन्नं (अज्ञात-प्रकृतिप्रत्ययम्—primitive) मन्यते।

**दी—। कच्छ्वा ह्रस्वत्वं च ॥ (वा) ॥ कच्छुरः।**

The suffix र is added to the word कच्छ्वा in the same sense, and the आ of कच्छ्वा is shortened before the suffix.

मित—। कच्छ्वाशब्दात् रप्रत्ययः स्यात् मतुपोऽर्थे। प्रत्यये परे कच्छ्वायाः अन्ते अकारो भवति। कच्छ्वा अस्ति अस्य इति कच्छुरः।

**१९०३। द्युद्रुभ्यां मः ॥ ५।२।१०८ ॥**

**दी—। द्युमः। द्रुमः।**

The suffix म is added to the words द्यु and द्रु in the aforesaid sense.

मित—। द्रु द्यु इति एताभ्याम् मत्वर्थीयो मप्रत्ययो भवति। द्युमः। द्रुमः। एताभ्याम् मतुवपि भवितुमर्हतीति चेत्—न। "रूढ़िशब्दौ एतौ। रूढ़िषु च न मतुव् विकल्प्यते।" इति काशिका। द्रुमशब्दः वृचे रूढ़ः।

दो—। केशाद्वोऽन्यतरस्याम् ॥ ५।२।१०६ ॥

दो—। प्रकृतेनान्यतरस्याम् ग्रहणेन मतुपि सिद्धे पुनर्ग्रहणम् इनिठनोः समावेशार्थम्। केशवः। केशी। केशिकः। केशवान्।

The suffix व is optionally added to the word केश in the aforesaid sense. Besides व, इनि ठन्, and मतुप may be attached to the same.

मित—। केशशब्दात् मत्वर्थे वप्रत्ययः स्यात् अन्यतरस्याम्।

ननु "अन्यतरस्याम्" इति पूर्व्वेणैव प्रक्रान्तं—तेन यत्र यत्र मत्वर्थीयः प्रत्ययः तत्र तत्रापि मतुप् समुच्चीयते। तर्हि किम् पुनरत्र अन्यतरस्याम् इत्यस्य उल्लेखः इति चेत्? समाधत्ते—"प्रकृतेन" इत्यादिना। अत्र पुनरपि—मतुप् अन्यतरस्याम् इत्यस्य उल्लेखस्तु केशशब्दात् "अत इनिठनौ" (५।२।११५) इति इनिठनौ स्यातामिति ज्ञापयति। अतएव वप्रत्ययेन सह मतुप् पूर्व्वप्रसङ्गेनैव समुच्चीयते। सूत्रस्थः अन्यतरस्यामिति शब्दस्तु वप्रत्ययेन सह इनिठनौ समुच्चिनोति। तस्मात् केशशब्दात् चत्वारः प्रत्ययाः। (प्रशस्ताः) केशाः अस्य सन्ति इति वः—केशवः; इन्—केशी। ठन्—केशिकः। मतुप्—केशवान्।

दो—। अन्येभ्योऽपि दृश्यते। (वा)। मणिवो नागविशेषः। हिरण्यवो निधिविशेषः। अर्णसो लोपश्च (वा)।—अर्णवः।

The suffix व is seen to be attached to several other words,

मित—। अन्येभ्योऽपि केभ्यश्चित् प्रातिपदिकेभ्यः वप्रत्ययो मत्वर्थे दृश्यते। यथा मणिवः—नागविशेषः। मणिशब्दात् वः। हिरण्यवः—निधिविशेषः। अत्र हिरण्य-शब्दात् वः। एवं राजीवम् पद्म, इष्टकावः, कुञ्जावः, कररावः, कुसारवः। अर्णस् जलम्। अर्णस् शब्दात् वप्रत्ययो भवति, अस्य सकारलोपश्च—अर्णवः समुद्रः।

[ किञ्च—मेधारथाभ्याम् मिरन्निरचौ इति केचित्। मेधाशब्दात् इरन्—मेधिरः। रथशब्दात् इरच्—रथिरः। "रथिररथिकौ रथी" इत्यमरः। "रथिर is the owner of a car" इति भाषावृत्तिटीपन्याम् श्रीशचन्द्रचक्रवर्त्तिनः ]।

## १८०४। गाण्ड्यजगात् संज्ञायाम् ॥ ५।२।११० ॥

**दी—। ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डिवम्। गाण्डीवम्—अर्ज्जुनस्य धनुः। अजगवं पिनाकः।**

The suffix व is attached to गाण्डी or गाण्डि, and अजग in the aforesaid sense, to denote proper nouns ( names ).

मित—। गाण्डी अजगात् संज्ञायाम् इति सूत्रच्छेदः—यद्वा गाण्डि अजगात् संज्ञायाम् इति। उभयत्र हि "इको यणचि" ( ६।१।७७ ) इति तुल्यं प्रयुज्यते। अतएव गाण्डि गाण्डी इति उभयोरपि ग्रहणमुचितम्। गाण्डि गाण्डी अजग इति एतेभ्यः वप्रत्ययो भवति मत्वर्थीयः संज्ञायां विषये। संज्ञायां नाम्नि इत्यर्थः। गाण्डीवं गाण्डिवं वा। एतदर्ज्जुनस्य धनुषो नाम। तथाहि किरातार्ज्जुनीये महाकाव्ये—"अधिरोहति गाण्डिवं महेषौ" इति। महाभारते उद्योगपर्व्वणि च "जानामि ते गाण्डीवं तालमात्रम्"। अजगवं—पिनाकः। पिनाकः महादेवस्य धनुः। "अजो विष्णुः। को ब्रह्मा। तद्योगादजकवम् इत्यन्ये" इति भाषावृत्तौ।

## १८०५। काण्डाण्डादीरन्नीरचौ ॥ ५।२।१११ ॥

**दी—। काण्डीरः। अण्डीरः।**

The suffix ईरन is added to the word काण्ड, and ईरच is affixed to अण्ड in the aforesaid sense.

मित—। काण्डशब्दात् मत्वर्थीयः ईरन्—तथा अण्डशब्दात् मत्वर्थीयः ईरच् स्यात्। काण्डीरः—अण्डीरः। ईरन् ईरच् इति प्रत्यययोः स्वरे भेदः। काण्डीरः काण्डवान्। अण्डीरः अण्डवान्।

१८०६। रजःकृष्यासुतिपरिषदो वलच्॥ ५।२।११२॥

**टी—। रजस्वला स्त्री। कृषीवलः। वल इति दीर्घः। आसुतीवलः शौण्डिकः। परिषद्वलः पर्षदिति। पाठान्तरम्। पर्षद्वलम्।**

The suffix वलच् is attached to the words रजस् कृषि आसुति and परिषद् in the aforesaid sense.

मित—। रजस् कृषि आसुति परिषत् इति एतेभ्यः मत्वर्थीयो वलच् प्रत्ययः स्यात्। रजः अस्याः अस्ति इति रजस्वला। रजस्वला स्त्री। तथाहि महाभारते—"रजस्वलां नाथवतीमनाथवत्"। कृषिरस्य अस्ति इति कृषीवलः कर्षकः। "वले" (६।३।११८) इति दीर्घः। तथा च भारवि—"सुखेन लभ्यादधतः कृषीवलैः"। आसुतिरस्य अस्तीति आसुतीवलः शौण्डिकः। पूर्ववत् दीर्घः। परिषत् अस्य अस्तीति परिषद्वलो नृपतिः। या संप्रति प्राक् परिषद्वलानाम् इति भाषावृत्तौ उद्धृतम्; परिषद्वलान् महाब्रह्मैरितिच भट्टिकाव्ये। परिषत्इति स्थाने पर्षद् इति पाठान्तरम्। तथासति पर्षद्वलम् इति रूपं स्यात्। सर्व्वत्र विषयनियमः सम्बध्यते। तेन इह न भवति—रजोऽस्मिन् ग्रामे विद्यते इति।

**टी—। अन्येभ्योऽपि दृश्यते। (वा)। भ्रातृवलः। पुत्रवलः। शत्रुवलः। वल इत्यत्र संज्ञायाम् इत्यनुवृत्तेर्नेह दीर्घः।**

The suffix वलच is seen to be affixed to several other words as well.

मित—। अन्येभ्योऽपि केभ्यश्चित् प्रातिपदिकेभ्यः वलच् प्रत्ययो दृश्यते। यथा भ्राता अस्य अस्ति इति भ्रातृवलः। शत्रुरस्य अस्ति इति शत्रुवलः। पुत्रोऽस्य अस्तीति पुत्रवलः। एतेषु "वले" (६।३।११८) इति प्रसक्तं दीर्घत्वं न स्यात्। कथमिति

चेत्—उमाधत्ते। "वले" इति सूत्रे "संज्ञायाम्" इत्यस्य अनुवृत्ति "विंद्यते"। तेन संज्ञायाम खलु एषां दीर्घत्वं नान्यत्र। सर्वमेतत् समासप्रकरणेपि "वले" इतात्र द्रष्टव्यम्।

१८०७। दन्तशिखात् संज्ञायाम् ॥ ५।२।११३ ॥

दी—। दन्तावलो हस्ती। शिखावलः केकी।

The suffix वलच is added to the words दन्त and शिखा to denote some proper or particular class name.

मित—। दन्तशब्दात् तथा शिखाशब्दाच्च वलच् प्रत्ययो भवति मतुपोऽर्थे संज्ञायां गम्यमानायां सत्याम्। दन्त अस्ति अस्य इति दन्तावलो हस्ती। "वले" (६।३।११८) इति सांज्ञायां दीर्घः। दन्तावलं सैन्यं—काशिका। शिखा अस्य अस्ति शिखावलः केकी। केकी मयूरः। "शिखावलं नगरं। शिखावलं स्थूणा" इति काशिका।

१८०८। ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्-मलिनमलीमसाः ॥ ५।२।११४ ॥

दी—। मत्वर्थे निपात्यन्ते। ज्योतिष उपधालोपोनश्चप्रत्ययः। ज्योत्स्ना। तमसः उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतन्त्रम्। तमिस्रम्। शृङ्गादिनच्—शृङ्गिणः। ऊर्जसोवलच्—तेन बाधा माभूदिति विनिरपि—ऊर्जस्वी—ऊर्जस्वलः। ऊर्जोऽसुगागम इति वृत्तिस्तु चिन्त्या। ऊर्जस्वतीतिवदसुन्नन्तेनैवोपपत्तेः। गोशब्दान्मिनिः। गोमी। मलशब्दादिनच्। मलिनः। ईमसश्च। मलीमसः।

The eight words ज्योत्स्ना, तामिस्रा, शृङ्गिन्, ऊर्जस्वी, ऊर्जस्वल, गोमिन्, मलिन and मलीमस are irregularly formed in the sense of मतुप; these, of course, stand for class names.

मित—। ज्योत्स्ना प्रभृतयः सूत्र-पठिताः शब्दाः मतुपोऽर्थे संज्ञायां विषये निपातनेन सिध्यन्ति। ज्योत्स्ना चन्द्रप्रभा—स्त्रीत्वम् अभिधानात्।

ननु ज्योतिषः षकारः कथं दन्त्यत्वं गच्छति इतिचेत्?—उच्यते। "इण्कोः" (८।३।५७) इति सूत्रेण इकारात् परस्य सकारस्य षत्वं संजातम्। अतएव सकारस्य षत्वे इकारः खलु निमित्तम्। अधुना इकारः लोपं गच्छति—तथासति "निमित्ताभावे नैमित्तिकस्याप्यभावः" इति न्यायात् षकारस्य पुनरपि सकारत्वं संभृतमिति सर्व्वमवदातम्। तमिस्रा इति। तमिस्रा रात्रिः। ननु सूत्रे तमिस्रा इति स्त्रीलिङ्गे एव पाठः-तर्हि किम् लिंगान्तरे अस्य प्रयोगेन स्यादिति प्रश्ने समाधत्ते—"स्त्रीत्वमतन्त्रम्" इति। अत्र सूत्रे यत् तमिस्रा इत्यस्य "स्त्रीत्वं" दृश्यते तत्तु "अतन्त्रम्" अनियामकं, स्त्रीलिंगे एव अयं प्रयोक्तव्यः—नान्यत्र इति नियमं न करोति। तथा इति लिंगान्तरेऽपि अस्य प्रयोगोभवेत्—यथा तमिस्रं नभः। त्रंगिणः इति सर्वं मूले उक्तम्। ऊर्जस्वलः—वलच् प्रत्ययेन "अस्मायामेधास्रजोविनिः" (५।२।१२१) इति विनिप्रत्ययस्य वाधा माभूत्—तेन विनिरपि—ऊर्जस्वी। काशिकावृत्तौ दृश्यते "ऊर्जोऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ। ऊर्जस्वी। ऊर्जस्वलः"। तस्य तावत् अयमर्थः—उर्जः शब्दात् विनिः वलच् इति प्रत्ययौ स्याताम्। प्रत्यययोः सन्नियोगेन ऊर्जशब्दात् असुक् इत्यस्य आगमो भवति। तेन ऊर्जस्वी ऊर्जस्वल इति रूपद्वयम्। श्रीमान् दीक्षितस्तु नैतत् साधु न मन्यते। अस्य आयमाशयः—"ऊर्जोसुगागम इति वृत्तिस्तु चिन्त्या"। ऊर्जशब्दात् असुक् इत्यागमः स्यादिति यत् काशिकावृत्तौ दृश्यते तत्तु चिन्तनीयम्। कथम्? "ऊर्जस्वती इति"—ऊर्जस्वती इति शब्दो यथा असभागान्तात् ऊर्जस् इति शब्दात् मतुप्प्रत्ययेन सिध्यति तथा तस्मादपि असभागान्तात् ऊर्जस् शब्दात् विनिप्रत्ययेन ऊर्जस्वी, वलच्प्रत्ययेन ऊर्जस्वल इत्यपि सिध्यतः; तथा सति किम् निपातनेन असुगागमस्वीकारप्रयासेन? गोमिन् इति—गोशब्दात् मिनिप्रत्ययः। मलिनः इति। मलशब्दात् इनच् प्रत्ययः—तेन मलिनः। मलिनः कलङ्कितः। मलशब्दात् ईमसच् इति प्रत्ययः—तेन मलीमसः। तथा च रघौ "उपक्रोशमलीमसैः—"।

१८०८ । अत इनिठनौ ॥ ५।२।११५ ॥

टी— । दण्डी—दण्डिकः ।

The suffixes इनि and ठन are attached to words ending in अकार, in the sense of मतुप् ।

मित— । "अतः" अकारान्तात् प्रातिपदिकात् "इनिठनौ" इनिः ठन् इति प्रत्ययौ स्याताम् मतुपोऽर्थे । अत्र "अन्यतरस्याम्" इत्यस्य अधिकारः—तेन अकारान्तात् प्रातिपदिकात् मतुप् प्रत्ययोऽपि स्यात् । दण्डोऽस्य अस्ति इति दण्डी । अत्र इन् । दण्डोऽस्य अस्ति इति ठन्—दण्डिकः । ठन् स्थाने इक इति आदेशः । उदाहरणान्तराणि—छत्री छत्रिकः । तण्डुली तण्डुलिकः । कार्य्यी कार्यिकः । मतुप् च सर्वत्र—दण्डवान् छत्रवान्, तण्डुलवान्, कार्य्यवान्, । क्वचित् अनभिधानात् इनि ठनौ न स्याताम्—यथा खवान् व्याघ्रवान् इत्यादयः । एभ्यः मतुप् एव नखलु इनिठनौ । तथाहि कारिका—"एकाक्षरात् कृतो जातेः सप्तम्याञ्च नतौस्म तौ तद्धितानां विधानं यदभिधानमपेक्षते" इति ।

( क ) एकाक्षरशब्दात् इनिठनौ न स्याताम्—यथा खवान् । भवान् । खम् आकाशः । भं नक्षत्रम् । अत्र मतुप् एव ।

( ख ) "कृतः" कृदन्तप्रत्ययनिष्पन्नात् शब्दात् न स्याताम् तौ—यथा, कारकवान् । अत्र मतुप् एव ।

( ग ) जातेः जातिवाचकशब्दात् न स्याताम्—व्याघ्रवान् । वृक्षवान् । सिंहवान् ।

( घ ) सप्तम्यां—सप्तम्यर्थे मतुप् प्रत्यये विहिते सति मतुपः स्थले इनिठनौ न स्याताम्—यथा दण्डाः अस्याम् सन्ति इति दण्डवती शाला । अत्र मतुप् एव ।

क्वचित् एभ्यः इनिठनौ भवतः—यथा कृदन्तप्रत्ययनिष्पन्नात् शब्दात्—कार्य्यी हार्य्यी, कार्यिकः हार्यिकः । जातिवाचकात्—तण्डुली तण्डुलिकः । अतएव सुष्टूक्तं कारिकायां "तद्धितानाम् विधानं यदभिधानम् अपेक्षते" । सर्वत्रैव अभिधानापेक्षया करणविधिरिति ज्ञेयम् ।

ननु सूत्रे "अतः" इति तकारनिर्द्देशः कथम् ? उच्यते। "तपरस्तत्कालस्य" (१।१।७०) इति सूत्रात् ज्ञायते यत् अकारान्तात् एव इनिठनौ न खलु आकारान्तात् अपि। तेन खट्वावान्। लज्जावान् इत्यादौ इनिठनौ न।

१८१०। व्रीह्यादिभ्यश्च ॥ ५।२।११६ ॥

**दी—। व्रीही। व्रीहिकः। न च सर्व्वेभ्यो व्रीह्यादिभ्य इनिठनौ इष्येते। किं तर्हि। शिखामाला संज्ञादिभ्यः इनिः। यवखदादिभ्यः इकः। (वा) ॥ अन्येभ्य उभयम्।**

The suffixes इनि and ठन् are attached to the words falling within the category of व्रीह्यादि ; but something is to be noted in this connection that any and every word of the said class does not necessarily take both the suffixes ; but words such as शिखा माला संज्ञा take इनि ; words like यव खद take इक ( ठन ) ; whereas the remaining words of this class take both ; मतुप is course, may be added to all of them.

मित—। व्रीहि इत्येवमादिभ्यो मत्वर्थीयः इनिः तथा तादृशः ठन् च स्याताम्। व्रीहिरस्यास्ति इति व्रीही—इनिः। व्रीहिकः—ठन्। मतुप् तु सर्वत्र व्रीहिमान्। परमत्र कश्चित् नियमो ज्ञातव्यः—न खलु सर्वेभ्यः एव व्रीह्याद्यन्तर्गतप्रातिपदिकेभ्यः इनिठनौ उभावेव—स्याताम्। किं तर्हि ? शिखा माला संज्ञा इति एवमादिभ्य इनिरेव स्यात् न तु ठन्। केते ? शिखा, माला, संज्ञा, मेखला, वलाका, वीणा, गदा (?) वड़वा, अष्टका, पताका, कर्मन्, चर्मन्, हंस, एभ्यः इनिरेव। शिखी, माली, मेखली, वीणी, संज्ञी, कर्मी, चर्मी, हंसी, पताकी, वलाकी, वड़वी, अष्टकी, वर्मी इति च भाषावृत्तौ दृश्यते। पातकी इति च केचित्। मतुप् तु एभ्यः भवितुम् अर्हति—शिखावान्। मालावान् इत्यादयः। यव-खदादिभ्यः इक ( ठन ) एव स्यात्—न खलु इनिः। केते ? यव—खद, कुमारी, नौ। यवखदिकः, याविकः, कुमारिकः। मतुप् तु एभ्यः अवश्यमेव स्यात्—यवखदवान् इत्यादि। शिखामालादीनतया

यवखदादीन् वर्जयित्वा अन्येभ्यः व्रीह्यादिगण—पठितेभ्यः इनिठनौ उभावपि स्याताम्। ते यथा—व्रीहि, दंष्ट्रा, माया, शाला, अशीर्ष। दंष्ट्रा दन्तः, सोऽस्य अस्तीति दंष्ट्री, दंष्ट्रिकः, दंष्ट्रावान्। माया अस्य अस्तीति मायी, मायिकः, मायावान्; तथाहि भारविकाव्ये—भवन्ति मायाविषु ये न मायिनः"। अशीर्षी अशीर्षिकः, अशीर्षवान्। भाषावृत्तिकारस्तु मनीषाशब्दं शिखादिषु पठित्वा मनीषी इत्येवमाह।

ननु यदि ईदृशी एव व्यवस्था तर्हि कथं सूत्रे "व्रीह्यादिभ्यश्च" इति व्रीहिशब्दग्रहणम्? उच्यते। परसूत्रपठिते तुन्दादिगणे व्रीहिशब्दो गृह्यते। तत्र चकारेण इनिठनौ यथा विधीयेते।

## १८११। तुन्दादिभ्य इलच्च ॥ ५।२।११७ ॥

**टी—। चादिनिठनौ मतुप् च॥ तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। उदर, पिचण्ड, यव, व्रीहि। स्वाङ्गाद्विवृद्धौ॥ "विवृद्ध्युपाधिकात् स्वाङ्गवाचिनः इलजादयः स्युः"। विवृद्धौ कर्णौ यस्य स कर्णिलः। कर्णी। कर्णिकः कर्णवान्।**

The suffix इलच, is added to the words that pass by the denomination तुन्दादि। इनि, ठन, and मतुप may also be attached to this class.

मित—। "तुन्दादिभ्यः" तुन्द एवमादिभ्यः प्रातिपदिकेभ्यः "इलच्"। "च" तथा इनिठनौ मतुप् अपि एभ्यो भवन्ति। तुन्दिलः—इलच्, तुन्दी—इनि, तुन्दिकः—ठन्, तुन्दवान्—मतुप्। "तुन्दिलः स्थूलोदरः"। तथाहि महाकालध्याने—"महाकालं यजेद्देव्याः दक्षिणे धूम्रवर्णकम्। तुन्दिलम्" इत्यादि। तुन्दादिर्यथा—उदर—उदरिलः, उदरिकः, उदरी, उदरवान्। पिचण्ड—पिचण्डिलः पिचण्डी, पिचाण्डकः पिचण्डवान्; यविलः यविकः यवी यवमान्। व्रीहि—व्रीहिलः व्रीहिकः

व्रीही व्रीहिमान्। एवं खलु "स्वाङ्गात् विवृद्धौ"। अस्य व्याख्या—विवृद्ध्युपाधिकात् इति। विशिष्टा वृद्धिः विवृद्धिः। अधिकोन्नतिरित्यर्थः। "विवृद्ध्युपाधिकात् स्वाङ्गवाचिनः" विवृद्धिसनाथं स्वाङ्गं वाचयन्ति ये शब्दाः तेभ्यः "इलजादयः" इलच्प्रभृतयः प्रत्ययाः "स्युः" भवेयुः। समुदायेन (प्रत्ययान्तेन पदेन) चेत् अभिधेयस्य जनस्य अङ्गे काचित् विवृद्धिर्गम्यते इति भावः। विवृद्धौ कर्णौ यस्य स इति वाक्ये स इति अभिधेयस्य जनस्य अङ्गविशेषे कर्णे विवृद्धि गम्यते। अतएव कर्णशब्दात् इलजादयः—तेन कर्णिलः कर्णी कर्णिकः कर्णवान् इति चत्वारि रूपाणि। भाषावृत्तिकारस्तु विवृद्धौ मतुपं नेच्छति। तस्य उक्तिः—"स्वाङ्गाद् वृद्धौ च"। स्थूलकर्णः—कर्णी, कर्णिलः कर्णिकः। अवृद्धौ तु कर्णवान्। नन्वत्र, तुन्दादिगणे काशिकाकारो घटशब्दं पठति, भाषावृत्तिकृत् तत्र पिचिण्डशब्दमपि पठति। किञ्च तुन्दादिगणे यः व्रीहिशब्दः पठ्यते—तस्य अर्थग्रहणमपि कर्त्तव्यमिति काशिका भाषावृत्तौ मन्येते। अतएव व्रीहिवाचकात् शालिशब्दादपि एते प्रत्ययाः स्युः— शालिलः, शालिकः, शाली, शालिमान्।

## १८१२। एकगोपूर्व्वाट् ठञ् नित्यम्॥ ५।२।११८॥

### टी—। एकशतमस्यास्तीति ऐकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः।

The suffix ठञ and ठञ alone are attached to compound words the first member of which is either एक or गो।

मित—। एकपूर्वात् प्रातिपदिकात तथा गोपूर्वात च प्रातिपदिकात् नित्यमेव ठञ्प्रत्ययः स्यात मतुपोऽर्थे, नित्यग्रहणं प्रत्ययान्तरनिवृत्त्यर्थम् इति भाषावृत्तिकृत्। एकशतम् अस्य अस्ति इति ऐकशतिकः। एकसहस्रम् अस्य अस्तीति ऐकसहस्रिकः। गोः शतम अस्य अस्ति इति गौशतिकः। गोसहस्रम् अस्य अस्तीति गौसहस्रिकः। [अकारान्तात् एव प्रातिपदिकात अयं प्रत्ययः काशिकाकारेण इष्यते; तेन तन्मते एकविंशतिरस्य अस्तीति इकारान्तात् प्रातिपदिकात् न स्यात्। कथं तर्हि ऐकगविकः। एकः गौः इति "गोरतद्धितलुकि" (५।४।९२) इति सूत्रेण समासान्तात.

एकगवशब्दात एव ठञ्। कथं गोशकटिकः? शकटीशब्देनतुल्यार्थः शकटशब्दोऽपि अस्ति, तस्मादेव ठञ्। अयं प्रयासः कथम् इति चेत् ताभ्यामेव लिखितं "अवश्यं अतः इत्यनुवर्त्त्यम्।" "इन्द्रोपताप—" (५।२।११८) सूत्रे अस्मात सूत्रात अतः इति अनुवर्त्तते—इति। अपिच—अत्र "नित्यग्रहणं मतुपो बाधनार्थम्। कथम् 'एकद्रव्यवत्त्वात' इति?—नैवायं साधुः, एकेन वा द्रव्यवत्त्वात इति समाधेयम्।

१८१३। शतसहस्रान्ताच्च निष्कात्॥ ५।२।१२८॥

दो—। निष्कात् परौ यौ शतसहस्रशब्दौ तदन्तात् प्रातिपदिकाट् ठञ् स्यान्मत्वर्थे। नैष्कशतिकः। नैष्कसहस्रिकः।

The suffix ठञ is attached to the words शत and सहस्र when coming after the word निष्क in some compound.

मित—। यदा शतम् इति प्रातिपदिकम्—तथा सहस्रमिति प्रातिपदिकं च निष्कशब्देन सह समस्तं सत् उत्तरपदं भवति, तदा आभ्याम् मतुपोऽर्थे ठञ प्रत्ययो भवति। निष्कानां शतमिति निष्कशतम्। निष्कशतमस्यास्ति इति नैष्कशतिकः। निष्कानां सहस्रम् इति नैष्कसहस्रिकः। सुवर्णनिष्कशतम् अस्य अस्तीति अत्र तु प्रत्ययो नेष्ट—अनभिधानात।

१८१४। रूपादाहतप्रशंसयोर्यप्॥ ५।२।१२०॥

दो—। आहतं रूपम् अस्य अस्तीति रूप्यः कार्षापणः। प्रशस्तं रूपम् अस्य अस्तीति रूप्यो गौः। आहतेति किम्? रूपवान्।

The suffix यप is added to the word रूप in the sense of मतुप provided the said रूप implies that it is somewhat superb (प्रशंसा योग्य) or it is produced by striking against the posse-

sor of रूप (i. e. the said रूप (colour) is due to hammer-strike.)

मित—। "रूपात्" रूपशब्दात्। यप् इति प्रत्ययनाम। आहतप्रशंसयो रिति। आहत प्रशंसा इति च प्रकृतेः (रूपस्य) उपाधिद्वयं (विशेषणद्वयं)। तथाहि "आहतप्रशंसाविशिष्टार्थे वर्त्तमानात् रूपशब्दात यप्प्रत्ययो भवति मत्वर्थे"—इति काशिका। आहतं रूपम् अस्य अस्तीति रूप्यः कार्षापणः, एवं रूप्यः दीनारः, रूप्यः केदारः। आहतम् इत्यस्य कोऽर्थः? उच्यते, "निघातिकाताड़नादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते"—इति काशिका—[निघातिका—हातुड़ी hammer]। प्रशंसायाम्—प्रशस्तं रूपम् अस्य अस्तीति रूप्यो गौः, रूप्यः पुरुषः, आहतेति किम्? रूपम् अस्य अस्ति इति रूपवान्, नात्र रूपस्य आहतत्वम्।

दी—। अन्येभ्योऽपि दृश्यते। हिम्याः पर्वताः। गुण्याः ब्राह्मणाः।

This suffix is seen to be attached to some other words.

मित—। अयं यप् प्रत्ययो दृश्यते अन्येभ्योऽपि प्रातिपदिकेभ्यः। यथा—हिममवास्तीति हिम्यः; हिम्याः पर्वताः; गुणोऽस्यास्तीति गुण्यः; गुण्याः ब्राह्मणाः। एवं पद्म् अत्र अस्तीति पद्मम्; पद्मं श्लोकः; तथाहि "अर्थिनं गुण्यागण्य इति न व्यचारयत्—" अर्थी किं गुण्यः उत अगुण्यः इति न विचारितवान् इत्यर्थः।

१८१५। अस्मायामेधास्रजो विनिः॥ ५।२।१२१॥

दी—। यशस्वी। यशस्वान्। मायावी। व्रीह्यादि पाठादिनिठनौ। मायी। मायिकः। क्विन्नन्तात्कुः—स्रग्वी।

The suffix विनि is attached to words ending in अस्, as well as to the words माया, मेधा and स्रज।

मित—। असन्तात् प्रातिपदिकात् (यस्य प्रातिपदिकस्य अन्ते अस् इति विद्यते तस्मात्), तथा माया मेधा स्रज् इति एतेभ्यो मतुपोऽर्थे विनिः इतिप्रत्ययो

भवति। मतुप् तु सर्वत्र समुच्चीयते एव। असन्तात् तावत्—यशः अस्य अस्ति इति यशस्वी—अत्र विनिः, मतुप्—यशस्वान्। एवं पयः अस्य अस्ति इति पयस्वी, पयस्वान्। मायां—माया अस्य अस्ति इति मायावी। अयं व्रीह्यादिषु पठ्यते अतएव "व्रीह्यादिभ्यश्च" (५।२।११६) इति इनिठनौ च स्याताम्, इनि—मायी, ठन्—मायिकः। मेधा अस्य अस्ति इति मेधावी। स्रज् इति शब्दस्तु सृजधातोः क्विन् प्रत्ययेन सिद्धम्। स्रक् अस्य अस्ति इति विनिः। प्रत्यये परे "क्विन्प्रत्ययस्य कुः" (८।२।६२) इति सूत्रेण जकारस्थाने गकारः। तेन स्रग्वी इतिरूपम्।

ननु "एकगोपूर्व्वाट् ठञ् नित्यम्" (५।२।११८) इत्यत्र प्रत्ययस्यनित्यत्वग्रहणेन प्रत्ययान्तराणां मतुपादीनां निरासः स्यात। तर्हि अस्मात् परस्थितेषु सूत्रेषु मतुप् अपि समुच्चीयते इति कथं वक्तुम् शक्यम्—इति चेत्? उच्यते—"तसौ मत्वर्थे" (१।४।१९) इति सूत्रे भसंज्ञा-प्रदर्शनप्रसङ्गे पयस्वान् यशस्वान् इति उदाहरणद्वयं भाष्यकारेण भगवता पतञ्जलिना लिखितम्। असन्ताभ्यामपि एताभ्याम् विनिप्रत्ययस्य प्रसङ्गेन मतुपो दर्शनात् "एक-गोपूर्व्वाट् ठञ्" (५।२।११८) इति सूत्रात् परम् अपि मतुप् समुच्चीयते इति भाषावृत्तिकाराणाम् अनुमानम्। सरस्वान् सरस्वती इत्यत्र विनिप्रत्ययो न स्यात् अनभिधानात्।

## दी—। आमयस्योपसंख्यानं दीर्घश्च॥ आमयावी।

मित—। आमयः रोगः। आमयशब्दात् विनिः स्यात्, आमयस्य दीर्घत्वं च।

## दी—। शृङ्गवृन्दाभ्यामारकन्॥ शृङ्गारकः। वृन्दारकः॥

मित—। शृङ्ग वृन्द इति एताभ्याम् आरकन् प्रत्ययो भवति मतुपोऽर्थे। शृङ्ग-मस्यास्तीति शृङ्गारकः, वृन्दम् अस्य अस्तीति वृन्दारकः, स्त्रियां वृन्दारिका। तथाहि भट्टिकाव्ये—"योषिद्वृन्दारिका तस्य दयिता हंसनादिनी"।

## दी—। फलबर्हाभ्यामिनच्॥ फलिनः। बर्हिणः।

मित—। फल बर्ह इति एताभ्याम् मतुपोऽर्थे इनच् प्रत्ययो भवति। बर्हम् मयूरपुच्छम्। फलमस्य अस्तीति इति फलिनः। बर्हम् अस्य अस्तीति बर्हिणः। बर्हिणो मयूरः। आभ्याम् इनिप्रत्ययश्च दृश्यते—फली, बर्ही।

दो—। हृदयाच्चालुरन्यतरस्याम् ॥ इनठनौ मतुप् च। हृदयालुः। हृदयी। हृदयिकः। हृदयवान्।

मित—। हृदयशब्दात् आलुप्रत्ययो भवति अन्यतरस्याम् मतपोऽर्थे। अन्यतरस्याम् इति ग्रहणात् इनिठनौ मतुप्‌प्रत्ययं च सूचयति।

दो—। शीतोष्णतृप्रेभ्यस्तदसहने॥ शीतं न सहते शीतालुः। उष्णालुः। स्फायितंचीति रक्। तृप्रः पुरोडाशः। तं न सहते तृप्रालुः। तृप्रं दुःखमिति माधवः।

The suffix आलु is added to the words शीत उष्ण and तृप्र to imply the persons that does not stand these.

मित—। शीत उष्ण तृप्र इति एतेभ्यः आलुप्रत्ययः स्यात्, "तदसहने"—यः खलु एतानि न सहते तस्मिन् अभिधेये सति। "कुत्सायाम् अभिधानम्" इति भाषावृत्तिः। यः खलु एतानि न सहते तस्य निन्दा एव एतैः शब्दैः द्योत्यते इति भावः।

दो—। हिमाच्चेलुः।—हिमं न सहते इति हिमालुः।

The suffix आलु is also added to the word हिम in the self-same sense.

मित—। पूर्व्वोक्ते एव विषये हिमशब्दात् आलुप्रत्ययश्च स्यात्।

दो—। बलादूलः।—बलं न सहते बलूलः।

The suffix ऊलः is attached to the word बल in the said sense.

दो—। वातात् समूहे च॥—वातं न सहते वातस्य समूहो वा वातूलः॥

The suffix ऊल is added to the word वात in the aforesaid sense as well as in the sense of a collective amount of it.

दी—। तप्पर्वमरुद्भ्याम् ॥ पर्वतः। मरुत्तः।

The suffix तप् is added to the words पर्वन् and मरुत् in the latter sense ( i. e. to imply a collective number of them ).

मित—। तस्य समूहः इति एतस्मिन् विषये पर्व्वन्शब्दात् मरुत्शब्दात् च तप् प्रत्ययो भवति ; पर्व्वाणां समूहः पर्व्वतः ; मरुतां समूहः इति मरुत्तः।

१८१६। ऊर्णायायुस् ॥ ५।२।१२३ ॥

दी—। सित्वात् पदत्वम्। ऊर्णायुः। अत्र छन्दसीति केचिदनुवर्त्तयन्ति। युक्तं चैतत्। अन्यथा अहंशुभमोरित्यत्रैवोर्णा-ग्रहणं कुर्य्यात् ॥

The suffix युस् is added to the word ऊर्णा in the sense of मतुप्। Some rightly drag down "छन्दसि" in this sutra. ( Now see Tika).

मित—। ऊर्णाशब्दात् मतुपोऽर्थे युस्प्रत्ययो भवति। ऊर्णाः सन्ति अस्य इति ऊर्णायुः मेषकम्बलः। "सिति च" ( १।४।१६ ) इति सूत्रेण सकारेत् प्रत्यये परे पूर्व्वस्य पदसंज्ञाम् एव ज्ञापयति न खलु भ-संज्ञाम्। अस्मात् सूत्रात् पूर्व्वम् "बहुलं छन्दसि" ( ५।२।१२२ ) इति यत् सूत्रं तस्मात् अत्र छन्दसीत्यस्य अनुवृत्तिं केचिदत्र स्वीकुर्व्वन्ति। तथा सति ऊर्णायुः इति छन्दसि एव स्यात्। दीक्षितस्तु एतन्मतं साधु मन्यते। अन्यथा "अहं शुभमोर्युस्" ( ५।२।१४३ ) इति सूत्रे एव ऊर्णाशब्दम् अन्तर्भाव्य इष्ट-सिद्धिरभविष्यत्। यत् सूत्रकारेण तदकृत्वा पृथक् सूत्रमिदं रचितवान् तेनैव छन्दसि एव अस्य विषयो भवितव्यः इति श्रीमतां दीक्षितानामाशयः।

१८१७। वाचो ग्मिनिः ॥ ५।२।१२४ ॥

दी—। वाग्मी।

मित—। वाच्शब्दात् मतुपोऽर्थे ग्मिनि प्रत्ययः स्यात्। वाक् अस्य अस्ति इति वाग्मी—वाग्मिनौ, वाग्मिनः। अत्र भाषावृत्तिकारस्तु वाग्ग्मी इति द्वि-गकारं पठति।

१८१८। आलजाटचौ बहुभाषिणि ॥ ५।२।१२५ ॥

टी—। कुत्सित इति वक्तव्यम् ॥ (वा) ॥ कुत्सितं बहु-भाषते वाचालः। वाचाटः। यस्तु सम्यग् बहु भाषते स वाग्मीत्येव।

The suffix आलच्, as well as the suffix आटच् is added to the word वाच् to denote the person who talks much and consequently talks in vain ( or talks nonsense ).

मित—। यः खलु कुत्सितं बहु भाषते तस्मिन् अभिधेये सति, वाच्शब्दात् आलच् आटच् इति प्रत्ययौ स्तः। ग्मिनि-प्रत्ययस्य अपवादभूतौ एतौ, कुत्सितं बहु भाषते इति आलच्—वाचालः; आटच्—वाचाटः; यः खलु सम्यक् बहुभाषते स तु वाग्मी एव; तस्य वाचः कुत्सितत्वाभावात्।

१८१९। स्वामिन्नैश्वर्य्ये ॥ ५।२।१२६ ॥

टी—। ऐश्वर्य्य वाचकात् स्व—शब्दात् मत्वर्थे आमिनच्। स्वामी।

The suffix आमिनच् is added to the word स्व meaning ऐश्वर्य to denote the person who is prosperous.

मित—। स्वशब्दात् ऐश्वर्य्यवाचकात् आमिनच्प्रत्ययो भवति मत्वर्थे। स्वम् ऐश्वर्य्यम् अस्य अस्ति इति स्वामी—स्वामिनौ, स्वामिनः। ऐश्वर्य्यवाचकात् इति किम्? स्वः निजजनः अस्य अस्ति इति स्ववान्।

१८२०। अर्श आदिभ्योऽच् ॥ ५।२।१२७ ॥

टी—। अर्शांसि अस्य विद्यन्ते इति अर्शसः। आकृति-गणोऽयम्।

The suffix अच is added to words that pass by the denomination अर्श-आदि, in the sense of मतुप।

मित—। मतुप्प्रत्ययस्यैवार्थे अर्शस् इति एवमादिभ्यः अच् प्रत्ययो भवति। अर्शांसि विद्यन्ते अस्य इति अर्शसः, उरोविद्यते अस्य इति उरसः, अर्शआदि हि आकृतिगणः। केचित्शब्दास्तु अत्र लिख्यन्ते—अर्शस्, उरस्, अघ, तुन्द, चतुर, पलित, जटा, घटा, अभ्र, कर्द्दम, अम्ल, लवण, आम इत्यादयः। वर्णवाचिनः शब्दा अत्र स्मर्य्यन्ते यथा—मलिन, शुक्र, नील, काल, गोधूल। अङ्गहीनत्व-वाचकाः शब्दा अपि यथा—काण, खञ्ज। एते अच्प्रत्ययान्ताः यथा—मलिनः, कालः, काणः इत्यादि। किञ्च "यत्र अभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत् सर्व्वम् इह द्रष्टव्यम्—" इति काशिका। अत्र उदाहरणं यथा—पापं कलङ्कं, तदस्यास्तीति अच्—पापः कलङ्की, "पापोऽहम् पापकर्म्माहम्।"

**१८२१। द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः॥ ५।२।१२८॥**

**दी—। द्वन्द्वः। कटकवलयिनी। शङ्खनुपुरिणी। उपतापो रोगः। कुष्ठी। किलासी। गर्ह्यं निन्द्यम्। ककुदावर्त्ती। काकतालुकी। प्राणिस्थात् किम्? पुष्पफलवान् घटः। प्राण्यङ्गान्न। (वा)। पाणिपादवती। अत इत्येव। चित्रकललाटिकावती। सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम्।**

The suffix इनि is attached to words ending in अकार which have either entered into a द्वन्द्व compound or which are expressive of some disease or some censurable (or blameable) thing, provided the objects denoted by the द्वन्द्व compound or the said disease or blameable things occur in the person of living beings, but are not any part of their bodies.

मित—। "अतः इनिठनौ" (५।२।११५) इति सूत्रात् अतः इति अनुवर्त्तते, द्वन्द्वः द्वन्द्वसमासः, उपतापः रोगः, गर्ह्यं निन्द्यं, प्राणिस्थात् प्राणिस्थितात्।

सूत्रार्थो यथा—अकारान्तेभ्यः प्राणिस्थितवस्तुवाचिभ्यः द्वन्द्वसमासप्रविष्टशब्देभ्यः,

तथा अकारान्तेभ्यः प्राणिस्थितवस्तुवाचिभ्यः रोगनामभ्यः, एवम् अकारान्तेभ्यः प्राणिस्थितवस्तुवाचिभ्यः गर्ह्यविषयाभिधायिभ्यश्च शब्देभ्यो मतुप्प्रत्ययस्यैव अर्थे इनिः प्रत्ययः स्यात्। द्वन्द्वसमासप्रविष्टशब्देभ्यस्तावत्—कटकं च वलयश्च कटकवलयौ, तौ स्तोऽस्य इति इनिः—कटक-वलयी, स्त्रियां कटक-वलयिनी। शङ्खश्च नूपुरं च शङ्खनूपुरे, ते स्तोऽस्य इति इनिः—शङ्खनूपुरी, स्त्रियां शङ्खनूपुरिणी। उपतापवाचिभ्यः—कुष्ठम् अस्य अस्ति इति कुष्ठी। एवं रक्तपित्ती, चर्यी, कार्शी, शूली। उक्तं च "शूली कदन्नाशनात्"। अपिच—वासायाम् विद्यमानायाम् आशायाम् जीवितस्य च, रक्तपित्ती चर्यी कार्शी किमर्थमवसीदति। गर्ह्यं निन्दनीयं, तद्वाचिभ्यो यथा ककुदावर्त्तम् अस्य वर्त्तते इति ककुदावर्त्ती, काकतालुकम् अस्य वर्त्तते इति काकतालुकी। प्राणिस्थात् इति किम्? पुष्पं च फलं च पुष्पफले वर्त्तते अस्मिन् घटे इति पुष्पफलवान् घटः। नहि घटः प्राणी, अतएव नात्र इनिः परं मतुप् एव। एवम् पुष्पफलवान् तरुः। प्राणिनाम् अंगवाचिभ्यः प्रातिपदिकेभ्यः अयं प्रत्ययो नेष्यते; यथा पाणिश्च पादश्च पाणिपादम्, "द्वन्द्वश्चप्राणितूर्य्यसेनांगानामि"ति (२।४।२) समाहारः। तदस्य अस्ति इति न इनिः। पाणिपादम् इत्यस्य प्राण्यंगवाचित्वात्—अपितु मतुप् एव—तेन पाणिपादवान्, स्त्रियां पाणिपादवती। अकारान्तादेव इति किम्? चित्रं च ललाटिका च चित्रललाटिके। ते अस्मिन् स्त इति मतुप् एव—ललाटिका इत्यस्य आकारान्तत्वात्। तेन चित्रललाटिकावान्, स्त्रियां चित्रललाटिकावती, एवं मूर्च्छा अस्य अस्ति इति मूर्च्छावान्।

ननु "अतः इनिठनौ" (५।२।११५) इति सूत्रेणैव इनिप्रत्ययः सिध्यति तर्हि किमर्थम् अस्य सूत्रस्य उपन्यास इतिचेत्—उच्यते। एभ्य इनिरेव स्यात्—न तु ठन् अन्यः कश्चित् प्रत्ययो वा इति ज्ञापनार्थमेव पृथक्सूत्रकरणमिति टीकाकृतामाशयः। इदमपि कथं नवक्तव्यम्?—अदन्तादनेभ्यश्च एष्वर्थेष्वपि इनिरेवस्यात् इति अस्मदभिप्रायः इति सुधियो विभावयन्तु।

## १८२२। वातातीसाराभ्यां कुक् च॥ ५।२।१२९॥

दी—। चादिनिः। वातकी। अतीसारकी। रोगे चायम् इष्यते। नेह—वातवती गुहा। पिशाचाच्च॥ पिशाचकी।

The suffix इनि is added to the words वात and अतिसार; between the suffix and the base, कुक् is inserted.

मित—। वातो रोगविशेषः न तु वायुः। अतीसार इत्यपि रोगनाम। अत्र अतिसार इति काशिकाभाषावृत्तिकारौ पठतः। वात अतिसार इति एताभ्याम् इनिप्रत्ययो भवति मत्वर्थीयः, प्रत्ययसन्नियोगेन च एतयोः कुक् इति आगमः स्यात्। एतयोरुपतापवाचित्वात् पूर्वसूत्रेणैव इनिप्रत्यये सिद्धे सति कुक् इत्यस्य आगमं ज्ञापयितुम् अस्य सूत्रस्य अवतारणा, वातः अस्य अस्तीति वातकी। अतिसारोऽस्य अस्ति इति अतीसारकी। रोगवाचिनः एव वातशब्दात् प्रत्ययः इष्टः—तेन वातः वायुः बाहुल्येनैव अस्ति अस्याम् गुहायाम् इति वातवती गुहा। अत्र न इनिः—अपितु मतुप् एव। एवं च पिशाचशब्दादपि मत्वर्थीयः इनिप्रत्ययः इष्यते कुक् च। पिशाचः अस्य अस्ति अनुचरत्वेन इति पिशाचकी वैश्रवणः।

### १८२३। वयसि पूरणात्॥ ५।२।१३०॥

**दी—। पूरणप्रत्ययान्तात् मत्वर्थे इनिः स्याद्वयसि गम्ये। मासः संवत्सरो वा पञ्चमोऽस्य अस्तीति पंचमी उष्ट्रः। ठन्बाधनार्थमिम्। वयसि किम्? पंचमवान् ग्रामः।**

The suffix इनि is added to ordinal numerals, in the sense of मतुप to imply one's age.

मित—। "वयसि" वयसि गम्यमाने सति "पूरणात्" पूरणप्रत्ययान्तात् प्रातिपदिकात् इनिप्रत्ययः स्यात्। पञ्चमो मासः पञ्चमः संवत्सरो वा अस्य अस्तीति पञ्चमी उष्ट्रः एवं दशमी वृद्धः। नवमी गोवत्सः। "अत इनिठनौ" (५।२।११५) इत्यनेनैव सिद्धे खलु एभ्यो ठन् न स्यादिति ज्ञापयितुमेव अस्य अवतारणा। वयसि गम्ये इति किम्? पञ्चमः पञ्चमवर्णः अस्मिन् अस्ति इति पञ्चमवान् ग्रामः। अत्र पञ्चमशब्देन चातुर्वर्ण्यादिलक्षणः पञ्चमवर्णः कथ्यते। एवं पञ्चमः पञ्चमरागः (यस्य 'पा' इति सङ्केतः) अस्मिन् ग्रामरागे अस्ति इति पञ्चमवान् ग्रामः।

१८२४। सुखादिभ्यश्च ॥ ५।२।१३१ ॥

टी—। इनि मत्वर्थे। सुखी। दुःखी। माला क्षेपे—मालो।

The self same suffix only is added to words that pass by the denomination सुखादि।

मित—। सुख इत्येवमादिभ्यः मत्वर्थीयः इनिः स्यात्। सुखमस्यास्तीति सुखी। दुःखमस्यास्तीति दुःखी। क्षेपे निन्दायाम् तु मालाशब्दोऽत्र पठ्यते—माला अस्य अस्तीति माली। क्षेपे तु मालाशब्दात् मतुप् न स्यात्। क्षेपादन्यत्र तु मालाशब्दो व्रीह्यादिषु पठ्यते। तेन "व्रीह्यादिभ्यश्च" (५।२।११६) इत्यनेन तत्र इनिः ठन् मतुप् च स्युः। सुखादि यथा—सुख, दुःख, क्षेपे माला, कृच्छ्र, अलीक, अस्र, तृप्र (तृप्र), आम, करुणा, कृपण, सोढ़, शील, हल, प्रणय, प्रतीप, दल, कक्ष।

१८२५। धर्मशीलवर्णान्ताच्च ॥ ५।२।१३२ ॥

टी—। धर्माद्यन्तादिनिर्मत्वर्थे। ब्राह्मणधर्मी। ब्राह्मणशीली। ब्राह्मणवर्णी।

The suffix इनि is attached to words that end in धर्म, or शील or वर्ण, in the sense of मतुप।

मित—। अन्ताच्च इति अन्तशब्दः धर्मम् शीलम् वर्णम् एतत्त्रितयम् अभिसम्बध्यते। अतएव सूत्रार्थस्तु—धर्मान्तात् शीलान्तात् वर्णान्ताच्च प्रातिपदिकात् मतुप् प्रत्ययस्य अर्थे इनिप्रत्ययो भवति। ब्राह्मणस्य धर्मः ब्राह्मणधर्मः। सोऽस्य अस्तीति ब्राह्मणधर्मी। एवं द्विजधर्मी। ब्राह्मणस्य शीलम् इति ब्राह्मणशीलम्। तदस्यास्तीति ब्राह्मणशीली। एवं भिक्षुशीली। ब्राह्मणस्य वर्णमिति ब्राह्मणवर्णम्। तदस्यास्तीति ब्राह्मणवर्णी।

१८२६। हस्ताज्जातौ ॥ ५।२।१३३ ॥

टी—। हस्ती। जातौ किम्?—हस्तवान् पुरुषः।

The suffix इनि is added to the word हस्त provided the word thus formed stands for the name of some species (some kind of animal).

मित—। मतुप् प्रत्ययस्य अर्थे हस्तशब्दात् इनिप्रत्ययः स्यात्, प्रत्ययान्तेन पदेन चेत् जातिरभिधीयते।

१८२७। वर्णाद् ब्रह्मचारिणि ॥ ५।२।१३४ ॥

टी—। वर्णी।

The suffix इनि is added to the word वर्ण so that the newly formed word means a ब्रह्मचारी—(a student observing नियम).

मित—। वर्णशब्दात् इनिप्रत्ययो भवति, प्रत्ययान्तेन पदेन चेत् ब्रह्मचारी अभिप्रेतः। प्रशस्तं वर्णम् अस्य अस्ति इति इनिः—वर्णी, वर्णिनौ, वर्णिनः। "ब्रह्मचारी त्रैवर्णिकोऽभिप्रेतः। सहि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति नियममासेवते इत्यर्थः"—इति काशिका। स्मृतिरपि—"त्रैवर्णिको ब्रह्मचारी वर्णीति परिकीर्त्त्यते"। तथाहि किराते—"स वर्णिलिङ्गी विदितः समाययौ"। कुमारे च—"अथाह वर्णी विदितो महेश्वरः।" ब्रह्मचारिणि इति किम्? वर्णवान्।

१८२८। पुष्करादिभ्यो देशे ॥ ५।२।१३५ ॥

टी—। पुष्करिणी। पद्मिनी। देशे किम्? पुष्करवान् करी।

The suffix इनि is added to the words पुष्कर and others—called by the name पुष्करादि in the sense of मतुप to imply some space (or site).

मित—। पुष्करादि यथा—पुष्कर, पद्म, उत्पल, तमाल, कुमुद, नड, कपित्थ, बिस, मृणाल, कर्दम, शालूक, विगर्ह, करीष, शिरीष, यवास, प्रवाह, हिरण्य, कैरव, तरङ्ग, कल्लोल, पयस्, तट, पङ्कज, सरोज, राजीव, नालीक, अरविन्द, अम्भोज, कमल।

दी—। बाहूरूपूर्वपदाद्बलात् ॥ बाहुबली। ऊरुबली।

The suffix इनि is attached to the word बल if it follows either बाहु or ऊरु।

दी—। सर्वादेश्च। (वा)। सर्वधनी। सर्वबीजी।

The suffix इनि is attached to compound words that have सर्व as their first member.

दी—। अर्थाच्चासन्निहिते ॥ (वा)। अर्थी। सन्निहिते तु अर्थवान्।

The suffix इनि is added to the word अर्थ to denote the person who is without his pocket.

मित—। "अर्थात्" अर्थशब्दात् "च" एव मत्वर्थीयः इनिः स्यात् "असन्निहिते" अर्थस्य असन्निहितत्वे गम्यमाने सति। असन्निहितत्वम् अभावः। असन्निहितोऽर्थः धनम् अस्य इति अर्थी दरिद्रः। सन्निहिते तु—अर्थः सन्निहितोऽस्य अस्तीति अर्थवान् धनी। [परमेतन्न भाष्यसम्मतम्। अत्र अयमाशयः—धनवचनात् अर्थशब्दात् मतुप् स्यात् न तु इनिः—धनवान्। याच्ञावचनात् अर्थशब्दात् इनिठनौ भवतः—न तु मतुप्—तेन अर्थी अर्थिकः इति ]।

दी—। तदन्ताच्च। (वा)। धान्यार्थी। हिरण्यार्थी।

The suffix इनि is also added to words that end in अर्थ।

मित—। अर्थ इति येषां प्रातिपदिकानामन्ते तिष्ठति, तेभ्योऽपि मत्वर्थीयः इनिः स्यात्। धान्येन अर्थ इति धान्यार्थः। "तृतीया तत्कृतार्थेन गुणवचनेन" (२।१।३०) इति समासः। धान्यार्थः अस्य अस्तीति धान्यार्थी। हिरण्येन अर्थः इति हिरण्यार्थः। पूर्ववत् समासः। सोऽस्यास्तीति हिरण्यार्थी। एवं धनार्थी।

१८२८। बलादिभ्योमतुबन्यतरस्याम् ॥५।२।१३६॥

दी—। बलवान्। बली। उत्साहवान्। उत्साही।

The suffix मतुप् as well as the suffix इनि is added to words falling in the बलादि class.

मित—। बल इति एवमादिभ्यः मतुप् स्यात्, "अन्यतरस्याम्" इत्यस्य ग्रहणेन इनिरपि। बलमस्यास्तीति बलवान् बली। उत्साहः अस्य अस्तीति उत्साहवान् उत्साही। बलादि यथा—बल, उत्साह, उद्भास, उद्वास उद्दाम, शिखावल, देश, कुल, आराम, व्यायाम, आरोह, अवरोह, उपयाम, परिणाह, युद्ध। तथाहि कुमारे "परिणाहि रूपम्"। परिणाहो विशालता,—परिणाहवान्।

## १८३० । संज्ञायाम् मन्माभ्याम् ॥ ५।२।१३७ ॥

**टी—। मन्नन्तान्मान्ताच्चे निम त्वर्थे। प्रथिमिनी। दामिनी। होमिनी। सोमिनी। संज्ञायां किम्?—सोमवान्।**

The suffix इनि is affixed to words ending either in मन् or म, provided the words thus formed, stand as class names, ( i. e. as names of some particular class ).

मित—। मन् इति येषां प्रातिपदिकानाम् अन्तभागे दृश्यते। तथा म इति येषां च अन्ते तिष्ठति, तादृशेभ्यः प्रातिपदिकेभ्यः इनिप्रत्ययो भवति मत्वर्थीयः, समुदायेन चेत् संज्ञा गम्यते। मन भागान्तात्—प्रथिमन् विशालता। सोऽस्य अस्तीति प्रथिमिन्। "नस्तद्धिते" ( ६।४।१४८ ) इति नलोपः। स्त्रियां प्रथिमिनी। इयं काचित् संज्ञा। दामन् अस्य अस्तीति दामिन्—स्त्रियां दामिनी, इयं विद्युतः संज्ञा, एवं यामिनी, हेमिनी। मान्तात् तावत् होमः अस्य अस्ति इति होमिन् स्त्रियां होमिनी। इयमपि संज्ञा। सोमोऽस्य अस्तीति सोमिन् स्त्रियां सोमिनी। संज्ञायां किम्? सोमः सोमरसः अस्य अस्तीति सोमवान् यज्ञः, सोमवान् ब्राह्मणः। सोमश्चन्द्रः—सोमवत् आकाशम्।

## १८३१ । कंशंभ्याम् बभयुस्तितुतयसः ॥ ५।२।१३८ ॥

**टी—। कंशम् इति मान्तौ। कमित्युदक-सुखयोः। शम् इति**

सुखे। आभ्याम् सप्तप्रत्ययाः स्युः। युस् यसोः सकारः पदत्वार्थः। कंवः। कंभः। कंयुः। कंतिः। कंतुः। कंतः। कंयः। शंवः। शंभः। शंयुः। शंतिः। शंतुः। शंतः। शंयः। अनुस्वारस्य वैकल्पिकः परसवर्णः। वकार-यकारपरस्यानुनासिकौ वयौ॥

seven suffixes viz व, भ, युस्, ति, तु, त and यस् are attached to the words कं and शं in the sense of मतुप्।

मित—। कम् इति मकारान्तम् अस्य अर्थस्तु उदकं (जलं) तथा सुखम्। एवं शम् इति मकारान्तम्। अस्य अर्थस्तु सुखं, कल्याणं च। एतौ शब्दौ "स्वरादि निपातमव्ययम्" (१।१।३७) इति स्वरादिषु पठ्येते। एताभ्याम् शब्दाभ्याम् व, भ, युस्, ति, तु, त, यस् इति एते सप्तप्रत्ययाः मत्वर्थे स्युः। कम् जलम् अस्य अस्ति इति कंवः=मेघः। "मोऽनुस्वारः" (८।३।२३) इति अनुस्वारः। पक्षे "वा पदान्तस्य" (८।४।५९) इति विकल्पेन पर-सवर्णः। किञ्च अयं वकारः अन्तस्थ एव, "यो वा प्रत्ययसन्धिजः" इति वचनात्—अस्य वकारस्य प्रत्ययत्वात्; तथा सति वकारे परे पूर्वस्य अनुस्वारस्य स्थाने अनुनासिको वकार एव अतएव कँव्व इति रूपम्। एवं शँव्व इति रूपम्। [एतत् रूपद्वयं भाषावृत्तौ न दृश्यते, श्रीमतो दीक्षितस्य वृत्तौ अपि न। परम् "वकारयकारपरस्यानुनासिकौ वयौ" इति तस्य उक्तिबलात् रूपद्वयम् अस्माभिरनुमीयते। काशिकायाम् तु कम्व शम्व इति रूपद्वयं दृश्यते तत्तु प्रामादिकं मन्यामहे। नहि प्रत्ययवकारः खलु वर्गीयः येन तस्मिन् परे पर-सवर्णो म एव स्यात्]। भ-प्रत्ययः कंभः, कम्भः, शंभः, शम्भः, पूर्ववत् अनुस्वारः, पर-सवर्णश्च। युस् प्रत्ययः—कं युः। शं युः। "यचिभम्" इति (१।४।१८) प्राप्ता भसंज्ञा तु युस् प्रत्ययस्य सित्वात् "सिति च" (१।४।१६) इत्यनेन वाध्यते। अतएव युस् परे कं शं एतयोः पद-संज्ञा एव। तथासति पूर्ववत् अनुस्वारः। पक्षे अनुस्वारस्थाने परसवर्णः। यकारपरे अनुस्वारस्य स्थाने परसवर्णः अनुनासिक-

यकार एव स्यात्—तेन कय्युं, शय्युं इति रूपद्वयम् अनुमीयते। तथाहि "कुर्वाणा पश्यतः शंयून् इति"। तिः—कंतिः शंतिः। पक्षे परसवर्णः—कन्तिः, शन्तिः। तुः—कंतुः, शंतुः ; पक्षे कन्तुः, शन्तुः। यस्—कंयः, शंयः, प्रत्ययस्य सित्वात् पूर्वस्य पदसंज्ञा—तथा सति मस्थाने अनुस्वारः। पक्षे परसवर्णः—कय्यः, शय्यः।

## १८३२। तुन्दिवलिवटेर्भः ॥ ५।२।१३९ ॥

**टी—। वृद्धा नाभिस्तुन्दिः। मूर्द्धन्योपधोयमिति माधवः। तुन्दिभः। वलिभः। वटिभः। पामादित्वाद्वलिनोऽपि।**

The suffix भ is attached to the words तुन्दि, and वटि in the sense of मतुप्।

मित—। तुन्दि वलि वटि इति एतेभ्यो मत्वर्थे भः स्यात्। तुन्दिः वृद्धा-नाभिः, सा अस्य अस्ति इति तुन्दिभः। तुण्डिरिति माधवः। तथाहि "मूर्धन्योपधोऽयमि"ति माधवीयधातुवृत्तौ। वलिः अस्य अस्ति इति वलिभः। "दधाना वलिभं मध्यं—" वलिभं वलि-सनाथं, मध्यं कटिदेशं, दधाना धारयन्ती। वलिशब्दः पामादिष्वपि पठ्यते। अतएव "लोमादि पामादि—" ( ५।२।१०० ) इति नप्रत्ययोऽपि। तथा सति वलिनः इति रूपम्। वटिरस्य अस्तीति वटिभः वृक्षः।

## १८३३। अहंशुभमोर्युस् ॥ ५।२।१४० ॥

**टी—। अहमिति मान्तमव्ययमहङ्कारे। शुभमिति शुभे। अहंयुः। अहङ्कारवान्। शुभंयुः शुभान्वितः।**

The suffix युस् is added to the words अहम् and शुभम्।

मित—। अहमिति मकारान्तम् अव्ययम्—अस्य अर्थस्तु चहङ्कारः, शुभमित्यपि मकारान्तम् अव्ययम्—अस्य अर्थस्तु कल्याणम्, आभ्याम् मतुप्प्रत्ययस्यार्थे युस्प्रत्ययो भवति। अहम् अस्य अस्ति इति युस्। प्रत्ययस्य सित्त्वात् "सिति च" ( १।४।१६ ) इति अहम् इत्यस्य पदसंज्ञा न तु भ-संज्ञा। ततः "मोऽनुस्वारः" ( ८।३।२३ ) इति अनुस्वारः—अहंयुः। अहंयुः अहङ्कारवान्। शुभम् अस्य अस्ति इति

शुभंयुः। शुभं युः शुभान्वितः कल्याणवान् इति यावत्। उक्तं च भट्टौ "अहंयु-नाथः क्षितिपः शुभं युरुच्चैः"।

ननु अहंयुः शुभंयुः इत्यनयोः "वा पदान्तस्य" ( ८।४।५९ ) इति परसवर्णो न स्यादिति चेत् भवेन्नाम। परं भाषायां तादृशपदयोः प्रयोगो न—इति मत्वर्थीयाः—मतुप्प्रत्ययस्य अर्थे विहिताः प्रत्ययाः समाप्तिं गताः॥

१९३४। प्राग्दिशो विभक्तिः॥ ५।३।१॥

दी—। 'दिक्शब्देभ्य' इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्ति-संज्ञाः स्युः॥ अथ स्वार्थिकाः प्रत्ययाः॥ समर्थानामिति प्रथमा-दिति च निवृत्तम्। वेति त्वनुवर्त्तते एव।

The suffixes that are going to be spoken hereafter and will continue as far as the rule "दिक्शब्देभ्यः—" ( ५।३।२७ ), are termed विभक्ति—( i. e. will pass by the name विभक्ति )। For rest see Tika.

मित—। "दिशः"—"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देश-कालेष्वस्तातिः" ( ५।३।२७ ) इति सूत्रे यत् दिक् इति शब्दस्य श्रवणं तस्मात् पूर्वं यावत् तसिल् इत्यादयः ये प्रत्यया वक्ष्यन्ते, ते तु विभक्तिसंज्ञां भजन्ति। तथाहि वक्ष्यति "पञ्चम्यास्तसिल्" ( ५।३।७ )—कुतः, यतः, इत्यादयः। एते तसिलादयः विभक्ति-संज्ञकाः स्युः।

ननु एतेषां प्रत्ययानां विभक्तित्वे किं प्रयोजनमिति चेत्—उच्यते। "त्यदादीनामः" ( ७।२।१०२ ) इति विभक्तिपरे यदकारोऽन्तादेशः स्यात्, तदपत्र प्रयोजनम्। स्वर-प्रकरणविषयिणी उपयोगिता च क्वचापयस्ति—यथा "इदमो विभक्तिस्वरश्च" इति काशिका।

"अथ" अनन्तरं "स्वार्थिकाः" स्वार्थे एव विहिताः प्रत्यया उच्यन्ते। "समर्थानां प्रथमाद्वा" ( ४।१।८२ ) इति सूत्रे "समर्थानाम्" इत्यस्य, "प्रथमात्" इत्यस्य, "वा" इत्यस्य च इति त्रयाणामेवाधिकारः तद्धितप्रकरणे अस्ति। विज्ञापितम् तत्र यत्-समर्थानां मध्ये प्रथमं प्रत्ययप्रकृतित्वे निर्द्धार्य्यते। परम् अयम् अधिकारविधिः

स्वार्थिकप्रत्ययावधिरिति बोध्यम्। इतः परं स्वार्थिकप्रत्ययाः वक्ष्यन्ते। अतएव समर्थानाम् इत्यस्य तथा प्रथमादित्यस्य च अधिकारोऽस्मात् परं नास्त्येव। किन्तु 'वा' इत्यस्य अधिकारोऽस्मात् परमपि विद्यते—तेन तसिलादयः स्वार्थिकाः प्रत्ययाः विकल्पेन भवन्ति—यथा कुतः कस्मात्। कुत्र कस्मिन् इति।

ननु समर्थानाम् इत्यस्य प्रथमादित्यस्य च अधिकारो निवृत्तोऽत्र कथं नाम इति चेत्? उच्यते काशिकाकृता "इतः परं स्वार्थिकाःप्रत्ययास्तेषु समर्थाधिकारः प्रथम-ग्रहणम् च प्रतियोग्यपेक्षत्वान्नोपयुज्यते इति निवृत्तम्।"

## १८३५। किं सर्व्वनामबहुभ्योऽद्व्यादिभ्यः ॥५।३।२॥

## टी—। किमः सर्व्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधि-क्रियते॥

The suffixes—that are going to be treated of, up to the sutra "दिक् शब्देभ्यः—( ५ ३।२७ )" are to be attached to the words किम्, and all pronouns excluding द्वि, अस्मत्, युष्मत्, and भवत्।

मित—। "दिक् शब्देभ्यः—" ( ५।३।२ ) इति सूत्रात् पूर्व्वं यावत ये तसिलादयः प्रत्ययाः वक्ष्यन्ते, ते प्राग्दिशः प्रत्ययाः इति आख्यायन्ते। ते खलु किम् इत्यस्मात्, सर्वनामशब्देभ्यः, तथा बहु इत्यस्मात् च विधीयन्ते; परम् "द्व्यादिभ्यः" न विधीयन्ते। द्व्यादयः यथा—द्वि, युष्मत्, अस्मत्, भवत्, किम् इति पञ्च। एषु किम्-शब्दात् प्रत्यय इष्टः इति किमः ग्रहणमस्ति। अतएव द्वि, अस्मत्, युष्मत्, भवत् इति चतुर्भ्यः प्रत्ययो न विधीयते इति सरलार्थः। बहु शब्दश्च अत्र संख्यावाची न तु विपुलता-वाची। किम्शब्दात्प्रत्ययः यथा—क, कुत्र।

## १८३६। इदमो इश्॥ ५।३।३॥

## टी—। प्राक् दिशीये परे।

Before any of the प्राक् दिशीय suffix—( i. e. the suffixes to be treated of hereafter, ) the word इदम् is changed to इश्।

मित—। प्राक्‌दिशीये प्रत्यये परे सति, इदम्‌शब्दस्थाने इश्‌ इति स्यात्‌। अत्र शकार इत्—सत्‌ "अनेकाल्‌ शित्सर्वस्य" (१।१।५५) इति सर्वादेशं सूचयति।

१६३७। **एतेतौ रथोः ॥ ५।३।४ ॥**

**टी—। इदंशब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोऽपवादः।**

The word इदं is changed to एत before a प्राक्‌दिशीय suffix that begins with रकार, and to इत before a प्राक्‌दिशीय suffix that begins with a थकार।

मित—। रकारादौ प्राग्‌दिशीये प्रत्यये परे इदं शब्दस्य स्थाने एत इति आदेशः स्यात्‌; एवं थकारादौ प्राग्‌दिशीये प्रत्यये परे इदं शब्दस्य स्थाने इत इति आदेशः स्यात्‌। उभावेव इश्‌ प्रत्ययस्य अपवादभूतौ, सूत्रे रकारे योऽकारो दृश्यते, सत्‌ उच्चारणार्थ एव ज्ञेयः।

१६३८। **एतदोऽन्‌ ॥ ५।३।५ ॥**

**टी—। योग-विभागः कर्त्तव्यः। एतदः एतेतौस्तो रथोः। अन्‌। एतदइत्येव। अनेकाल्त्वात्‌ सर्वादेशः। नलोपः प्रातिपदिकान्तस्य।**

The word एतद्‌ is changed to एत before a प्राग्‌दिशीय suffix, beginning with a रकार, and to इत before a प्राग्‌दिशीय suffix beginning with a थकार; whereas it is changed to अन्‌ before any other suffix of the said class; the न, of course, elides by the rule "नलोपः प्रातिपदिकस्य" (८।२।७)"

मित—। सूत्रस्य अस्य योगविभागः कर्त्तव्यः। स तु इत्थमेव स्यात्‌—(१) एतदः। (२) अन्‌। "एतदः" इत्यस्य अर्थः—एतद्‌ इत्यस्य स्थाने एत इति

स्यात् रकारादौ प्राग्दिशीये प्रत्यये परे ; तथा इत इति स्यात् थकारादौ प्राग्दिशीये परे। "अन्" इत्यस्य अर्थः—एतत् इति शब्दस्य स्थाने "अन्" इति स्यात् थकारादेस्तथा रकारादेरन्यस्मिन् प्राग्दिशीये प्रत्यये परे। अन् इति प्रत्ययस्य "अनेकाल् शित् सर्वस्य" (१।१।५५) इति सूत्रेण सर्वादेशत्वं भवेत्। ततो नकारः खलु "नलोपः प्रातिपदिकस्य" इति (८।२।७) सूत्रेण लोपं गच्छति।

१८३९। सर्वस्य सोऽन्यतरस्यां दि॥ ५।३।६॥

टी—। प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात्।

The word सर्व is optionally changed to स—before a प्राग्दिशीय suffix that begins with द।

मित—। यस्य प्राग्दिशीयप्रत्ययस्य आदौ दकारस्तिष्ठति, तस्मिन् प्रत्यये परे सति, सर्वशब्दस्थाने विकल्पेन स इति आदेशः स्यात्। यथा दाप्रत्यये परे—सर्वदा, सदा। प्राग्दिशीये एव प्रत्यये परे—तेन सर्वं ददाति इति कृदन्त-क-प्रत्यये परे स्त्रियां सर्वदा ब्राह्मणी इत्यत्र न स्यात्।

१९४०। पञ्चम्यास्तसिल्॥ ५।३।७॥

टी—। पञ्चम्यन्तेभ्यः किमादिभ्य स्तसिल् स्याद्वा।

The suffix तसिल् is optionally attached to the words बहु and किम् and to all pronouns save those of the द्यादि list named in the rule (५।३।२) to denote the sense of the fifth case-ending.

मित—। "पञ्चम्याः" पञ्चम्यन्तेभ्यः किम् सर्वनाम बहुभ्यः "तसिल्" तसिल् इति प्रत्ययः स्यात विकल्पेन। द्यादिभ्योऽपि तसिल् न स्यादिति ज्ञेयः।

१९४१। कुतिहोः॥ ७।२।१०४॥

टी—। किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः।

**कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः। द्व्यादेस्तु द्वाभ्याम्।**

The pronoun किम् is changed to कु before a suffix that begins with तकार or हकार।

मित—। किम् इत्यस्य स्थाने कु इति भवति तकारादौ हकारादौ च विभक्तौ परतः। "तिहोः" इत्यत्र तकारे इकार उच्चारणार्थ एव। कस्मात् इति तसिल् प्रत्ययः—तकारादौ तसिल्प्रत्यये परे कु इत्यादेशः तेन कुतः इति रूपम्। तसिल् प्रत्यये लकारः इत्, इकारः उच्चारणार्थः, तस् इति तिष्ठति, विकल्पेन प्रत्ययः इष्टः अतः प्रत्ययस्य अप्रातिपदे पञ्चमी विभक्तिरेव स्यात्—तेन कस्मात् इति वैकल्पिकं पदं प्रदत्तं श्रीमता दीक्षितेन। एवं यस्मात् यतः, तस्मात् ततः, एतस्मात् अतः, "एतदोऽन्" ( ५।३।५ ) इति सूत्रेण अन् इति आदेशः। अस्मात् इतः। "इदम इश्" ( ५।३।३ ) इति इशादेशः। अमुष्मात् अमुतः, "अदसोऽसे र्दादुदो मः" (८।२।८०) इति अदस् शब्दस्य दकारात्उकारे सति दस्थाने मकारः। बहोः—बहुतः। द्व्यादेस्तु तसिल् प्रत्ययो नेष्टः—तेन एभ्यः विभक्तिरेव स्यात्—यथा द्वाभ्याम्।

## १९४२। तसेश्च ॥ ५।३।८ ॥

**टी—। किं सर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वरार्थं विभक्त्यर्थं च वचनम्।**

The suffix तस् is changed to तसिल्—( i. e. it should be as good as तसिल्, when added to किं, बहु, or any pronoun—save द्व्यादि)।

मित—। कर्म्मप्रवचनीयेन "प्रति" इत्यनेन योगे या पञ्चमी विभक्तिः "प्रतिनिधि प्रतिदाने च यस्मा"दिति ( २।४।११ ) सूत्रेण विहिता, यदन्तात् तसिः इति प्रत्ययो भवति "प्रतियोगे पञ्चम्यास्तसिः" ( ५।४।४४ ) इति सूत्रेण ; यथा प्रद्युम्नो वासुदेवतः प्रति, अभिमन्युरर्ज्जुनतः प्रति, अपिच "अपादाने चाहीयरुहोः" ( ५।४।४५ ) इति

सूत्रेण अपादाने या पञ्चमी विभक्तिः, तस्याः पञ्चम्याः विकल्पेन तसिप्रत्ययो भवति। यथा ग्रामतो ग्रामात् आगच्छति। परं यदा ईदृशस्तसिप्रत्ययः किंसर्वनामबहुभ्यो विहितः स्यात्, तदा अस्य तसेः स्थाने तसिल् इति आदेशो भवति—अयमेव सूत्रार्थः। उदाहरणानि—कुतः आगतः, यतः, ततः, बहुत आगतः।

ननु तसिस्थाने तसिल् इत्यस्य करणे का सार्थकता इति चेत्?—समाधत्ते—"स्वरार्थम्" इत्यादिना। "स्वरार्थं" स्वर एव तत्र प्रयोजनम्। अयमर्थः—तसिल् इति प्रत्यये लकार इत्, अतएव "लिति" (६।१।१९३) इति सूत्रेण प्रत्ययात् पूर्वम् उदात्तं स्यात्, एवं तसि इति प्रत्ययस्य स्थाने तसिल् इत्यस्य करणेन अत्रापि प्रत्ययात् पूर्वम् उदात्तं स्यात्, प्रत्ययात् पूर्वस्य उदात्तत्वमेव प्रयोजनं तेनैव हि तसिस्थाने तसिलादेश इति भावः। किञ्च "प्राग्दिशो विभक्तिः" (५।३।१) इति तसिप्रत्ययस्य विभक्तिसंज्ञां प्रापयितुम् अपि अस्य स्थाने तसिलादेशकरणम्।

**१९४३। पर्य्यभिभ्यां च॥ ५।३।९॥**

**दी—। आभ्यां तसिल् स्यात्। सर्वोभयार्थाभ्यामेव। परितः सर्वतः इत्यर्थः। अभितः—उभयतः इत्यर्थः।**

The suffix तसिल् is attached to परि—meaning all, as well as to अभि—meaning उभय।

मित—। सर्व इत्यर्थं प्रकाशयतः परिशब्दात् तथा उभय इत्यर्थं प्रकाशयतः अभिशब्दाच्च तसिल् प्रत्ययो भवति। परितः सर्वतः इत्यर्थः, अभितः उभयतः इत्यर्थः। तथाहि किराते—"विधाय रक्षान् परितः परेतान्"।

**१९४४। सप्तम्यास्त्रल्॥ ५।३।१०॥**

**दी—। कुत्र। यत्र। तत्र। बहुत्र।**

The suffix त्रल is added to pronouns ( save द्व्यादि )—to the words किं and सर्व to imply the sense of the seventh case-ending.

मित—। "सप्तम्याः" सप्तम्यन्तेभ्यः किंबहुसर्वनामभ्यः त्रल् प्रत्ययो भवति ; कस्मिन् इत्यर्थे कुत्र, यस्मिन् इति यत्र, तस्मिन् इति तत्र, बहौ इति बहुत्र।

१८४५। इदमो हः॥ ५।३।११॥

टी—। त्रलोऽपवादः। इशादेशः—इह।

The suffix ह standing as a bar to त्रल् is added to इदम्।

मित—। इदम् शब्दात् ह प्रत्ययः स्यात् सप्तम्यर्थे। त्रल् प्रत्ययस्य अपवादः ; अस्मिन् इति इदम् शब्दात् हः। "इदम इश्" (५।३।३) इति इशादेशः—तेन इह इति रूपम्।

१८४६। किमोऽत्॥ ५।३।१२॥

टी—। वा-ग्रहणमपकृष्यते। सप्तम्यन्तात् किमोऽद्वा स्यात्। पक्षे त्रल्।

The suffix अत् is added to the word किम् in the sense of त्रल्; by drawing in "वा" from a later Sutra त्रल् may also be attached to it.

मित—। "किमः" किम्शब्दात् "अत्" अत् इति प्रत्ययो भवति सप्तम्यर्थे ; किञ्च "वा ह च छन्दसि" (५।३।१३) इति परसूत्रात् "वा" इति अत्रापि अपकृष्यते आनीयते, तेन अत्प्रत्ययः स्यात् विकल्पेन ; अस्य अप्राप्तिपक्षे त्रल् एव स्यात्। कस्मिन्+अत्। अधुना सूत्रान्तरस्य अपेक्षा अस्ति। तत् च—

१९४७। क्वाति॥ ७।२।१०५॥

टी—। किमः क्वादेशः स्यादति। क्व। कुत्र।

Before the suffix अत्, किम् is replaced by क्व।

मित—। अत् इति प्रत्यये परे किम् शब्दस्य स्थाने क्व इति आदेशः स्यात्। अत् प्रत्यये तकार इत्, क्व। पक्षे त्रल्—कुत्र। मन्ये सूत्रकारभाष्यकारमते भाषायां किम्शब्दात् त्रल् नेष्यते। किन्तु भासकालिदासयोः प्राकृतच्छायायां "कुत्र" इति

दृश्यते। श्रीश्रीचण्डीग्रन्थे च "रूपञ्च शत्रुभयकार्य्यतिहारि कुत्र" इति, अमरकोषे "साहचर्य्याच्च कुत्रचि"दिति। काव्यमीमांसायाम्पि—"कविः कुत्रममेतिच"। नैषधस्य तृतीयसर्गे— "नान्यत्र कुत्रापि च साभिलाषम्" इति। अतः अभियुक्तप्रयोगात् भाषायां "कुत्र" इति साधु भवति—इति समर्थनीयम्। एतदपि कलापटीकायां कविराजेन दूषितं यथा—"कुत्रेति कैश्चिदिष्यते। तद् भाष्यकारस्यापि असाधु"॥

१६४८। वा ह च छन्दसि ॥ ५।३।१३ ॥

टी—। कुह स्थः कुह जग्मथुः।

In the vedic literature, suffix ह is optionally added to the word किम् in the sense of the seventh case-ending.

मित—। "छन्दसि" वैदिक-साहित्ये "वा" विकल्पेन "ह" इति प्रत्ययः "च" स्यात् किम्शब्दादिति। पक्षे अत्, त्रल् च। कस्मिन् इति कुह, कुह स्थः, कुह जग्मथुः, क्व—क्व ब्राह्मणस्य श्रावकाः। कुत्र-कुत्रचिदस्य सा दूरे।

१६४९। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ २।४।३३ ॥

टी—। अन्वादेशविषये एतदोश् स्यात्, स च अनुदात्तस्त्रतसोः परतः तौ च अनुदात्तौस्तः। एतस्मिन् ग्रामे सुखं वसामः। अथोऽत्राधीमहे। अतो न गन्तास्मः॥

When एतद् is used to refer to something about which something has been already stated, it is replaced by अश्; provided either of the suffixes त्र and तस् are added to it. The substitute अश together with the suffixes are अनुदात्त।

मित—। "अन्वादेशविषये" उक्तस्य पश्चादुक्तौ एतद् इति शब्दस्य स्थाने अश् इति आदेशः स्यात् त्रप्रत्यये तस् प्रत्यये च परतः। आदेशस्य शित्वात् "अनेकालशित् सर्व्वस्य" ( १।१।५५ ) इति सर्व्वादेशः। अपिच अयं अश् तथा त्रतस् इति प्रत्ययौ च सर्व्वे एव अनुदात्ता ज्ञेयाः। उदाहरणं यथा, एतस्मिन्—अत्र। एतस्मात् अतः।

१९५० । इतराभ्योऽपि दृश्यन्ते ॥ ५।३।१४ ॥

दो—। पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणात् भवदादियोग एव । स भवान् । ततो भवान् । तत्र भवान् । तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । एवं दीर्घायुः । देवानां प्रियः । आयुष्मान् ।

The suffix तस्, त्र, तसिल (and the like) may be used in the sense of any other case-ending than the fifth and seventh ones; they are often seen to be joined to words like भवत्, दीर्घायुः, आयुष्मत् and देवानां प्रियः ।

मित—। "इतराभ्यः" पञ्चमीविभक्तेस्तथा सप्तमीविभक्तेरन्याभ्यः विभक्तिभ्यः अपि—तस्, तसिल्, त्र इति एते प्रत्ययाः विहिताः दृश्यन्ते ; अपि च तादृशेषु चैतेषु एते प्रत्ययान्ताः शब्दाः खलु भवत्, दीर्घायुः, आयुष्मान्, देवानां प्रियः इति एतेषां अन्यतमेन सह युक्ताः भाषायां प्रयुज्यन्ते । उदाहरणानि—स भवान् । ततो भवान्, तत्रभवान् । स भवान्—अत्र स इति पदं विभक्तिरेव तिष्ठति । ततोभवान्—अत्र तसिल्प्रत्ययः । तत्रभवान्—अत्र त्रप्रत्ययः । तं भवन्तं, तेन भवता, तस्मै भवते, तस्मात् भवतः, तस्य भवतः, तस्मिन् भवति ; एवं ततो भवन्तं, ततो भवता, ततो भवते, ततो भवतः, ततो भवतः ततो भवति—तत्र भवान्, तत्र भवन्तं, तत्र भवता, तत्र भवते तत्र भवतः, तत्र भवतः, तत्र भवति—अत्र भवान्, अत्र भवन्तं, अत्र भवते, अत्र भवतः, अत्र भवतः, तत्र भवति—यथा, तत्र भवान् शङ्कराचार्यः, अत्र भवान् कविः कालिदासः। एवं दीर्घायुः, आयुष्मान्, देवानां प्रियः इति एतेषु अपि उदाहार्यम् । यथा—स दीर्घायुः, स आयुष्मान्, स देवानां प्रियः, देवानां प्रियः इति तु मूर्खे गम्यमाने अलुक्-समासः, परम् अत्र दीर्घायुरायुष्मतोर्मध्ये पाठात् देवानां प्रियः इत्यपि दीर्घायुःपर्य्यायः इति केचित् मन्यन्ते ।

१९५१ । सर्वैकान्यकिंयत्तदः काले दा ॥ ५।३।१५ ॥

**टी—। सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन् काले सदा। सर्वदा। एकदा। अन्यदा। कदा। यदा। काले किम्? सर्वत्र देशे।**

The suffix दा (standing as a bar to त्रल्) is attached to सर्व्व, एक, अन्य किम्, यत्, and तत्—to denote time.

मित—। "सप्तम्यास्त्रल्" (५।३।१०) इति सूत्रात् "सप्तम्याः" इति अनुवर्त्तते। अतएव सूत्रस्य अयमर्थः—सप्तम्यन्तेभ्यः सर्व, एक, अन्य, किम्, तद्, तद् इति एतेभ्यः काले वर्त्तमानेभ्यः दा इति प्रत्ययो भवति। सर्व्वस्मिन् काले इति सर्व्वदा। "सर्व्वस्य सोऽन्यतरस्याम् दि" (५।३।६) इति विकल्पेन स इति आदेशः, तेन सदा। एकस्मिन् काले एकदा, अन्यस्मिन् काले अन्यदा, कस्मिन् काले कदा, यस्मिन् काले यदा, तस्मिन् काले तदा। अयं दाप्रत्ययः त्रल्प्रत्ययस्य अपवादः। काले इति किम्? सर्वस्मिन् देशे सर्वत्र, अत्र त्रल् एव नतु दा।

**१८५२। इदमोर्हिल् ॥ ५।३।१६ ॥**

**टी—। सप्तम्यन्तात् काले इत्येव। ह्स्यापवादः। अस्मिन् काले एतर्हि। कालेकिम्? इह।**

The suffix र्हिल् (a bar to ह) is attached to इदम्—to imply time.

मित—। "सप्तम्याः" इति "काले" इति च अनुवर्त्तते। सप्तम्यन्तात् काले वर्त्तमानात् इदम्शब्दात् र्हिल्प्रत्ययो भवति। "इदमो हः" (५।३।११) इति ह प्रत्ययस्य अपवादः। अस्मिन् काले इति र्हिल्। "एतेतौ रथोः" (५।३।४) इति एत इति आदेशः। तेन एतर्हि इति रूपम्। तथाहि किराते—"भवन्तमेतर्हि मनस्विगर्हिते"। काले इति किम्? एतस्मिन् देशे इति हप्रत्यय एव—तेन इह।

**१८५३। अधुना ॥ ५।३।१७ ॥**

**टी—। इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थेऽधुनाप्रत्ययः स्यात्। इश्। यस्येति लोपः। अधुना।**

The suffix अधुना is attached to the word इदम् (which is consequently replaced by इश्) ending in the seventh case-ending and implying time.

मित— । सप्तम्यन्तात् काले वर्त्तमानात् इदम् शब्दात् अधुना इति प्रत्ययः स्यात् स्वार्थे । अस्मिन् काले इति योत्ये इदम् अधुना इति स्थितिः, ततः "इदम इश्" (५।३।३) इति सूत्रेण इश्, तेन इश् अधुना इति स्थितिः, शकारः इत्—तेन इ अधुना इति स्थितिः, ततः "यस्येति च" (६।४।१४८) इति इकारलोपः, तेन अधुना इति भवति । काशिकामते तु धुना इति प्रत्ययः—इदमो निपातनात् अश्भावश्च ।

**१९५४ । दानीं च ॥ ५।३।१८ ॥**

**दी— । इदानीम् ।**

The suffix दानीं is added to इदम् used in the seventh case-ending and implying time.

मित— । सप्तम्यन्तात् काले वर्त्तमानात् इदम् शब्दात् दानीं प्रत्ययोऽपि भवेत् ।

**१९५५ । तदो दा च ॥ ५।३।१९ ॥**

**दी— । तदा । तदानीम् । तदोदावचनमनर्थकम् विहितत्वात् ।**

The suffix दा as well as the suffix दानीं are added to the word तद् used in the seventh case-ending and implying time.

मित— । सप्तम्यन्तात् काले वर्त्तमानात् तद्शब्दात् दाप्रत्ययः स्यात्, दानीं प्रत्ययश्च । तस्मिन् काले तदा, तदानीम् । अत्र दाप्रत्ययविधानम् अनर्थकम् यतः "सर्वैकान्यकिंयत्तदः काले दा" (५।३।१२) इति प्रागेव दाप्रत्ययः तद्शब्दात् विहितः इति दीक्षितस्याशयः । किन्तु मन्ये दानींविधानेन दाप्रत्ययस्य बाधा मा भूत् इति पुनरपि अत्रसूत्रे दाविधानम् । काले इति किम् ? तस्मिन् स्थाने तत्र । अत्र "सप्तम्यास्त्रल्" (५।३।१५) इति त्रल् एव—न खलु दा दानीं वा ।

१९५६ । अनद्यतने र्हिलन्यतरस्याम् ॥ ५।३।२१ ॥

टी—। कर्हि । कदा । यर्हि । यदा । तर्हि । तदा । एतस्मिन् काले एतर्हि ।

The suffix र्हिल is optionally attached to pronouns ( save द्व्यादि ) as well as to the words किम् and बहु denoting the sense of the seventh case-ending and implying time which is other than the present day.

मित—। "अनद्यतने" अद्यतनात् अन्यस्मिन् कालविशेषे। तस्मिन् कालविशेषे वर्त्तमानेभ्यः किंसर्व्वनाम बहुभ्यः सप्तम्यन्तेभ्यः र्हिल् प्रत्ययो भवति "अन्यतरस्याम्" । कस्मिन् काले इति किम् शब्दात् र्हिल् । "किमः कः" ( ७।२।१०३ ) इति किम्शब्दस्थाने क इति आदेशः। तेन कर्हि इति रूपम्। अन्यतरस्याम् इति वचनात् र्हिल् प्रत्ययस्य अप्राप्तिपक्षे तु "सर्वैकान्य—( ५।३।१५ )" इति दा—कदा, यस्मिन् काले यर्हि यदा। तस्मिन् काले—तर्हि ; तदा। एतस्मिन् काले एतर्हि । अस्य वैकल्पिकं पदं नास्ति प्रत्ययान्तराभावात्।

१९५७ । सद्यःपरुत्परार्य्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥

टी—। एते निपात्यन्ते ।

The words enumerated in the sutra are irregulary formed.

मित—। सूत्रोल्लिखितानि पदानि निपातनेन सिध्यन्ति। तत्र इहैव उक्तम्।

टी—। समानस्य सभावो द्यस् चाहनि ॥ समानेऽहनि सद्यः ।

मित—। समाने अहनि इति वाक्ये समानशब्दस्य स्थाने स इति भवति ; तस्मात् द्यस् इति प्रत्ययो विधीयते—सद्यः इति पदं च तेन निपातनेन जायते।

दी—। पूर्वपूर्वतरयोः परः उदारीचप्रत्ययौ संवत्सरे ॥

मित—। संवत्सरे अभिधेये सति पूर्वशब्दात् उत् प्रत्ययः स्यात्, पूर्वशब्दस्य च स्थाने परः इति आदेशो भवति, एवं संवत्सरे गम्यमाने पूर्वतरशब्दात् आरि प्रत्ययः स्यात्, पूर्वतर शब्दस्य स्थाने च पर इति आदेशः ; यथा पूर्वस्मिन् संवत्सरे इति परुत्, पूर्वतरस्मिन् संवत्सरे इति परारि।

दी—। इदम इश् समसण् प्रत्ययश्च संवत्सरे ॥ अस्मिन् संवत्सरे ऐषमः ॥

मित—। संवत्सरे अभिधेये सति इदम्शब्दात् समसण प्रत्ययो भवति, इदम् शब्दस्य च स्थाने इशादेशः। अस्मिन् संवत्सरे इति इश् समसण् इति स्थितिः। समसण् इति प्रत्ययस्य णित्वात् इश् इत्यस्य इकारस्य वृद्धित्वेन ऐसमसण् इति स्थितिः। समसण् प्रत्यये णकार इत्। तत्पूर्वस्थितोऽकार उच्चारणार्थ एव—तेन ऐ समस् इति स्थितिः। ततः "इण्कोः" (८।३।५७) इति षत्वम्, तेन ऐषमः।

दी—। परस्मादेद्यव्यहनि ॥ परस्मिन् अहनि परेद्यवि।

मित—। पूर्वविषये परशब्दात् एद्यविप्रत्ययः स्यात्। परस्मिन् अहनि इति परेद्यवि।

दी—। इदमोऽश् द्यश्च ॥ अस्मिन्नहनि अद्य।

मित—। अहनि अभिधेये इदम्शब्दात् द्यप्रत्ययो भवति, इदम् स्थाने अशादेशश्च। अस्मिन् अहनि इति अद्य।

दी—। पूर्वादिभ्योऽष्टभ्योऽहन्येद्युस् ॥ पूर्वस्मिन् अहनि पूर्वेद्युः। अन्यस्मिन् अहनि अन्येद्युः उभयोरह्नोरुभयेद्युः। द्युश्चोभयाद्वक्तव्यः। उभयद्युः।

To imply some particular day, the suffix एद्युस् is added

to the following words :—पूर्व, अन्य, अन्यतर, इतर, अपर, अधर, उभय, and उत्तर।

मित— । अहनि अभिधेये सति, पूर्व अन्य अन्यतर, इतर अपर अधर उभय उत्तर इति एतेभ्यः एद्युस प्रत्ययो भवति, पूर्वस्मिन् अहनि पूर्वेद्युः। अन्यस्मिन् अहनि अन्येद्युः। अन्यतरस्मिन् अहनि अन्यतरेद्युः, इतरस्मिन् अहनि इतरेद्युः। अपरस्मिन अहनि अपरेद्युः। अधरस्मिन् अहनिअधरेद्युः उत्तरस्मिन् अहनि उत्तरेद्युः। उभयोः अह्नोः उभयेद्युः। उभयशब्दात् अहनि अभिधेये द्युस् प्रत्ययश्च भवति तेन उभयोः अह्नोः इति वाक्ये उभयद्युः इत्यपि स्यात्।

## १९५८। प्रकारवचने थाल्॥ ५।३।२३॥

## टी— । प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात् स्वार्थे। तेन प्रकारेण—तथा। यथा।

The suffix थाल् is added to pronouns ( save द्व्यादि ) as well as to किं and बहु—to imply "means" or "ways".

मित— । "किं सर्व्वनाम बहुभ्योऽद्व्यादिभ्यः" इत्यत्र अनुवर्त्तते। "सप्तम्याः" इति "काले" इति च नानुवर्त्तते। तेन सूत्रस्य अयमर्थः—"प्रकारवृत्तिभ्यः" प्रकारे वर्त्तमानेभ्यः—प्रकार इत्येवमर्थम् द्योतयद्भ्यः इति यावत्, "किमादिभ्यः" किं सर्वनामबहुभ्योऽद्व्यादिभ्यः "थाल्" प्रत्ययो भवति स्वार्थे। प्रकारस्य लक्षणम् उक्तम् काशिकायाम्—"सामान्यस्य विशेषो भेदकः प्रकारः। प्रकार इति हि प्रकृतेर्यद् विशेषणं न खलु प्रत्ययस्य—अतएव प्रकारवाचिभ्यः किमादिभ्यः थाल् स्यात् स्वार्थे इत्युक्तिः संगच्छते। तेन प्रकारेण इति तद् शब्दात् थाल्। "त्यदादीनामः" ( ७।२।१०२ ) इति अकारादेशः—तेन तथा इति रूपम्। येन प्रकारेण इति यथा, साधनप्रक्रिया तु पूर्ववत्, सर्वेण प्रकारेण सर्वथा। [ किञ्च इदमप्यत्र अवधेयम्—जातीयर्प्रत्ययोऽपि प्रकारे एव विधीयते। परं स तु स्वभावात् प्रकारवति वर्त्तते। यस्य प्रकारम् वाच्यं, तद्वस्तु एव अभिदधातीत्यर्थः। थाल्प्रत्ययः पुनः प्रकारमात्रे वर्त्तते। प्रकारमेव थाल् प्रत्ययः अभिदधाति न खलु प्रकारवद्वस्तु ]।

१९५९ । इदमस्थमुः ॥ ५।३।२४ ॥

दी— । थालोऽपवादः । एतदोऽपि वाच्यः ॥ अनेन एतेन वा प्रकारेण इत्थम् ।

The suffix थमु is attached to the word इदम् as well as to the word एतद् in the aforesaid sense. This suffix bars थाल् ।

मित— । प्रकारवाचिनः इदंशब्दात् तथा तादृशादेव एतद्शब्दाच्च थमु प्रत्ययो भवति स्वार्थे । यद्वा अयमेव अर्थः—इदंशब्दात् तथा एतद् शब्दात् च थमु प्रत्ययो भवति प्रकारे अभिधेये सति । थमु प्रत्यये उकार इत् । तस्य कथम् अत्र उच्चारणमिति चेत् मकारपरित्राणार्थः इति काशिका । अविद्यमाने हि उकारे अस्य प्रत्ययस्य मकारोऽपि "हलन्त्यम्" ( १।३।३ ) इति इत् अभविष्यत् । थमु इति प्रत्ययस्य आकृतौ तु थम् इति तिष्ठति ; उकार इत् भवति । अनेन प्रकारेण इति इदम् शब्दात् थम् । "एतेतौ रथोः" ( ५।३।४ ) इति इदं शब्दस्थाने "इत्" आदेशः । अतएव इत् थम् इति स्थितिः । ततः इत्थम् इति रूपम् । एतेन प्रकारेण इति एतद्शब्दात् थम् । "एतदोऽन्" ( ५।३।७ ) इति सूत्रे योगविभागात् एतद्शब्दस्थाने इत् इति आदेशः । ततः इत्थम् इति रूपम् । अयं थमुप्रत्ययः थाल् प्रत्ययस्य अपवादः ।

१९६० । किमश्च ॥ ५।३।२५ ॥

दी— । केन प्रकारेण कथम् ।

The suffix थमु is added to the word किम् in the aforesaid sense.

मित— । किम्शब्दात् प्रकारवचने थमु प्रत्ययः स्यात् । केन प्रकारेण इति किम् शब्दात् थमुः । किम् शब्दस्य स्थाने "किमः कः" ( ७।२।१०३ ) इति क इति आदेशः । ततः क थम् इति स्थिते सति कथम् इति रूपं भवति ।

दी— । इति विभक्तिसंज्ञकं प्रकरणं ।

The suffix,es that pass by the denomination विभक्ति end here.

मित—। ये खलु तद्धितप्रत्ययाः "प्राग्दिशो विभक्तिः" (५।३।१) इति सूत्रेण विभक्तिसंज्ञया आख्यातास्ते अत्र समाप्तिं गताः ॥

# अथ प्रागवीयप्रकरणम्

मित—। अनन्तरम् "इवे प्रतिकृतौ" (५।३।९३) इत्यस्मात् पूर्वम् प्रकरणमेकम् वक्ष्यति। एतत् तु प्रागिवीयप्रकरणम् इति संज्ञया आख्यायते इव-प्रत्ययात् प्रागवस्थितत्वात्। "अध्यायानुवाकयोर्लुक्" इति विकल्पेन इवशब्दात् छप्रत्ययः। एवमन्यत्रापि बोध्यम्।

**१८६१। दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ ५।३।२७ ॥**

**दी—। सप्तम्याद्यन्तेभ्यो दिशिरूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात्।**

The suffix अस्ताति is affixed (स्वार्थे) to words naturally expressive of some particular cardinal point of the horizon, provided they are used in either of the seventh, fifth or first case- endings, and stand for the name of a cardinal point or some space with reference to some particular direction or time.

मित—। दिशां शब्दाः दिक्शब्दाः। दिशि रूढाः शब्दा इत्यर्थः। ये शब्दाः स्वभावेनैव दिशं वाचयन्ति ते शब्दाः इत्यर्थः। "दिक्शब्देभ्यः" दिशि रूढाः ये शब्दास्तेभ्यः "सप्तमीपञ्चमीप्रथमाभ्यः" सप्तमान्तेभ्यः, पञ्चमान्तेभ्यस्तथा प्रथमा-

न्तेभ्यश्च "दिग्देश-कालेषु" दिग्देश-कालवृत्तिभ्यः—दिग्देशकाले वा वर्त्तमानेभ्यः इत्यर्थः "अस्ताति:" अस्ताति इति प्रत्ययो विधीयते "स्वार्थे" एषां अन्यतमे एव अर्थे गम्यमाने। सप्तम्यन्तात्—पुरस्तात् वसति, पञ्चम्यन्तात्—पुरस्तादागतः, प्रथमान्तात् पुरस्तात् रमणीयम्। दिक्शब्देभ्य इति किम्? ऐन्द्राम् दिशि वसति, नप्रत्ययः कृतः। यतो नहि ऐन्द्रीशब्दः दिशि रूढः। सप्तमीपञ्चमीप्रथमाभ्यः इति किम्? पूर्वं ग्रामं गतः। अत्र द्वितीयान्तात् दिग्वाचिनः पूर्वशब्दात् न प्रत्ययः। दिग्देशकालेषु वर्त्तमानेभ्यः इति किम्? पूर्वस्मिन् गुरौ वसति। नहि पूर्वऽशब्दोऽत्रदिग्देश-कालवाची। अस्ताति इत्यत्र अन्त्य इकारस्तु इत्।

## १९६२। पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥ ५।३।३९ ॥

**दी—। एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्तद्योगे चैषां क्रमात् पुर् अध् अव् इत्यादेशाः स्युः।**

The suffix असि is attached to the words पूर्व, अधर, and अवर used in either of the first, seventh and fifth case-endings, and these words are replaced by पुर्, अध्, and अव respectively.

मित—। सप्तमीपञ्चमीप्रथमान्तेभ्यः पूर्व अधर अवर इति एतेभ्यः असि प्रत्ययो भवति अस्तातिप्रत्ययस्यैवार्थे; प्रत्ययसन्नियोगेन च एषां स्थाने पुर्, अध्, अव् इति यथासंख्यम् आदेशाः भवन्ति। किं तर्हि असिप्रत्ययः अस्तातेरपवादः इति संशये सूत्रान्तरस्य अपेक्षास्ति; सूत्रं च उद्धरति—

## १९६३। अस्ताति च ॥ ५।३।४० ॥

**दी—। अस्तातौ परे पूर्वादीनां पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः। पुरस्तात्। अधः। अधस्तात्। अवः। अवस्तात्।**

The words पूर्व, अधर, and अवर are replaced respectively by पुर्, अध्, and अव्, before the suffix अस्ताति।

मित—। अस्तात् इति प्रत्ययस्य स्वरूपम्। अतएव अस्ताति इति सप्तम्यन्तम्। ततः सूत्रस्य अयमर्थः—"अस्ताति" प्रत्यये परतः, "च" एवं खलु पूर्व अधर अवर इति एतेषां स्थाने यथासंख्यम् पुर् अध् अव् इति आदेशो ज्ञेयः।

ननु एभ्यः पूर्वसूत्रेण असिप्रत्ययः स्यात् अस्ताति तु केन सूत्रेण इति चेत्?—अनेनैव; "अस्ताति च" इति प्रथमान्तनिर्द्देशोऽपि कर्त्तव्यः। तेन अयमपि अर्थः सूत्रस्य—पूर्व अधर, अवर इति एतेभ्यः "अस्ताति" इति प्रत्ययः "च" स्यात्, "च" इति अस्तातिप्रत्ययेन सह असिप्रत्ययम् समुच्चिनोति। तेन नहि असिप्रत्ययः अस्तातेरपवादः। एतेभ्यः उभावपि स्याताम्। [कथं "पुरतः" इति? अव्युत्पन्नमव्ययं स्वरादिगणे पठनीयम्। पुर अग्रगमने धातुस्तस्मात् इगुपधलक्षणे कप्रत्यये सति तसि इति नागेशः। दीक्षितस्तु मनोरमायाम् एतं शब्दम् अप्रामाणिकमित्याह। जगन्नाथोऽपि एतमपशब्दं प्राह।

**१९६४। विभाषाऽवरस्य ॥ ५।३।४१ ॥**

**दो—। अवरस्य अस्तातौ परेऽव् स्याद्वा। अवस्तात्। अवरस्तात्। एवं देशे काले च। दिग्रूढेभ्यः किम्? ऐन्द्र्यां वसति। सप्तम्यन्तेभ्यः किम्? पूर्वं ग्रामं गतः। दिगादिवृत्तिभ्यः किम्? पूर्वस्मिन् गुरौ वसति। "अस्तातिचे"ति ज्ञापकादसिरस्तातिं न बाधते।**

The word अवर is optionally changed to अव् before अस्ताति। Rest easy—see Tika under the rule "दिक् शब्देभ्यः—"।

मित—। अस्तातिप्रत्यये परतः अवरस्थाने अव् इत्यादेशः विकल्पेन स्यात्, पूर्व-सूत्रेण नित्यं प्राप्ते अनेन विकल्पविधानम्। असिप्रत्यये परतस्तु नित्यम् अवादेशः। दिग्रूढात् दिग्-वाचकात् प्रत्ययः एषु उदाहरणेषु विहितः। "एवं देशे काले" च "एवं" अनेनैव प्रकारेण "देशे" दिग्रूढात् देशवाचकात् अपि अयं प्रत्ययो विधीयते; 'काले च" एवं दिग्रूढात् कालवाचकात् अपि प्रत्ययविधानं ज्ञेयम्; उदाहरणं यथा—"रत्नच्छायाव्यतिकर इव

प्रेत्यमेतत् पुरस्तात्"—मेघदूते। अत्र दिशिरूढ़ात् देशवाचकात् सप्तम्यन्तात्पूर्व्व-शब्दात् अस्ताति प्रत्ययो भवति। "त्वया पुरस्तादुपयाचितो यः"—इति रघुवंशे। अत्र दिशिरूढ़ात् कालवाचकात् पूर्व्वशब्दात् सप्तम्यन्तादेव अस्तातिप्रत्ययः। किञ्च श्रीमद्दुर्गाध्ययने—"अधस्तान्महिषं तद्द्विशिरस्कं प्रदर्शयेत्"। अत्र दिशिरूढ़ात् देशवाचकात् सप्तम्यन्तात् अधरशब्दात् अस्तातिप्रत्ययः। दिशि रूढ़ेभ्यः इति किम्? ऐन्द्र्यां वसति। इन्द्रेन अधिष्ठिता यादिक् सा ऐन्द्री दिक्। पूर्व्वा दिक् इत्यर्थः। तस्याम् ऐन्द्र्याम् दिशि वसति इति सप्तम्यन्तात् ऐन्द्रीशब्दात् दिग्वाचकात् न अस्तातिप्रत्ययः; कथम् इति चेत्?—उच्यते। नहि ऐन्द्री शब्दः मुख्यया वृत्त्या (रूढिवृत्त्या वा) पूर्व्वस्यां दिशि वर्त्तते—तेनैवात्र प्रत्ययाभावः। इत्यादि प्राग् उक्तं सुगमंच। "अस्ताति चेति ज्ञापकात् असिरस्तातिं न बाधते"। अस्ताति च इति (५।३।४०) सूत्रं तु ज्ञापकम्। इदं ज्ञापयति यत्—विधान-सामर्थ्यात् अस्तातिप्रत्ययः असिप्रत्ययेन न बाध्यते। एतत्तु मया प्रागेव विस्पष्टीकृतम् इति अलम् विस्तरेणात्र।

## १९६५। दक्षिणोत्तराभ्यामतसुच्॥ ५।३।२८॥

### टी—। अस्तातेरपवादः। दक्षिणतः। उत्तरतः।

The suffix अतसुच् is added to the words दक्षिण and उत्तर in the aforesaid sanse by barring अस्ताति।

मित—। दक्षिण उत्तर इति एताभ्याम् दिशिरूढ़ाभ्याम् दिग्देशकाल-वृत्तिभ्याम् सप्तमीपंचमीप्रथमान्ताभ्याम् स्वार्थे (अस्तातेरर्थे इत्यर्थः) अतसुच् प्रत्ययो भवति। अयम् अस्तातिप्रत्ययस्यापवादः।

## १९६६। विभाषापरावराभ्याम्॥ ५।३।२९॥

### टी—। परतः। अवरतः। परस्तात्। अवस्तात्।

The suffix अतसुच् is optionally added to the words पर and अवर in the aforesaid sense.

मित—। सुगमा।

१९६७। अञ्चेर्लुक् ॥ ५।३।३० ॥

दो—। अञ्चत्यन्ताद्दिक्‌शब्दात् अस्तातेर्लुक् स्यात्। "लुक् तद्धितलुकि"। प्राच्यां प्राच्याः प्राची वा दिक्—प्राक्। उदक्। एवं देशे काले च।

The suffix अस्ताति attached to words that are derived from the root अञ्च् and that stand for the name of cardinal points, elide, consequently the feminine suffix affixed to such words also elide by the rule—लुक् तद्धितलुकि।

मित—। "अञ्चेः" अञ्च् धातोः निष्पन्नात् दिग्वाचकात् (दिशि रूढ़ात् दिग्देशकालेषु वर्त्तमानात् सप्तमीपंचमीप्रथमान्तात्) प्रातिपदिकात् विहितस्य अस्तातिप्रत्ययस्य "लुक्" स्यात्। प्र-पूर्व्वकात् अंच् धातोः क्विन् विहितः ततः प्राच् इति रूपम्। अस्य अर्थस्तु पूर्व्वादिक्। प्राच्यां दिशि वसति इति सप्तम्यन्तात्, तथा प्राच्याः दिशः आगतः इति पंचम्यन्तात्, एवम् प्राची दिक् रमणीया इति प्रथमान्तात् च प्राच् इति शब्दात् विहितः अस्तातिप्रत्ययः; स च अनेन लुक् भवति। ततः अस्तातीति तद्धितप्रत्ययस्य लुकि सति "लुक् तद्धित लुकि" (१।२।४९) इति सूत्रेण स्त्रीप्रत्ययस्य अपि लुग् भवेत्। तथासति प्राग् वसति, प्राग् आगतः, प्राग्रमणीयम् इति रूपं भवति। एवम् उदीच्याम् दिशि वसति इति उदक् वसति; उदीच्याः दिशः आगतः उदक् आगतः; उदीची दिक् रमणीया उदक् रमणीयम् इत्येवमेव रूपम्।

ननु "उद ईत्" इति (६।४।१३९) सूत्रेण उदः परस्य लुप्तनकारस्य भस्य अचतेः अकारस्य स्थाने ईकारो भवति—यथा उदीची। परं स्त्रीप्रत्ययस्य लुकोऽनन्तरम् तस्य—ईकारस्य उच्चारणं कथं न श्रूयते इति चेत्?—उच्यते—स्त्रीप्रत्ययस्य यो ईकारः तस्मिन् एव परतः अंचतेः भसंज्ञा स्वीक्रियते—अधुना तु स्त्रीप्रत्ययस्य लुकि सति निमित्ताभावे नैमित्तिकस्याभावात् अंचतेः भ-संज्ञा निवृत्ता। तथा सति

"उद इत" इति भ-संज्ञानिमित्तक: अकारस्थाने इकारोऽपि प्रतिष्ठते। तेन उदक्त वसति उदक्त आगत: उदक्त रमणीयम् इति स्थलत्रये उदक इति रूपमेव साधु, एवं देशे वर्त्तमानात काले वर्त्तमानादपि इष्टशात शब्दात् विहितस्य लुक्।

देशे वर्त्तमानात्—यथा प्राचिदेशे वसति इति प्राग् वसति। प्राच: देशात् आगत: इति प्राक आगत:। प्राक देश: रमणीय: इति प्राक् रमणीयम्।

काले वर्त्तमानात—प्राचि काले अवसत इति प्राग्वसत। प्राच: कालात् आगत: इति प्राग् आगत:। प्राङ्काली रमणीय: इति प्राग्रमणीयम्।

## १९६८। उपर्य्युपरिष्टात् ॥ ५।३।३१ ॥

**टो—। अस्तातिविषये ऊर्द्ध्वशब्दस्य उपादेश: स्यात्; रिल् रिष्टातिलौ च प्रत्ययौ। उपरि उपरिष्टाद्वा वसति, आगतो रमणीयम् वा।**

The suffixes रिल् and रिष्टातिल are attached to the word ऊर्द्ध in the sense अस्ताति, and before the suffixes the base is replaced by उप।

मित—। दिशिरूढात् दिग्देशकालेषु वर्त्तमानात सप्तमीपंचमीप्रथमान्तात् ऊर्द्धशब्दात अस्तातेरर्थे रिल् रिष्टातिल् इति प्रत्ययौ स्याताम्; प्रत्ययसन्नियोगेन च उर्द्धशब्दस्य स्थाने उप इति आदेश:। ऊर्द्ध्वायाम् दिशि वसति इति उपरि वसति। रिल्प्रत्यय:। उपरिष्टात् वसति—रिष्टातिल्प्रत्यय:। ऊर्द्ध्वाया: दिश: आगत :इति उपरि आगत:—उपरिष्टात् आगत:। ऊर्द्ध्वादिक् रमणीया इति उपरि रमणीयम्। उपरिष्टात् रमणीयम्।

## १९६९। पश्चात् ॥ ५।३।३२ ॥

**दो—। अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातिविषये।**

The suffix आति is added to the word अपर in the sense of अस्ताति, and before the suffix, the base is replaced by पश्च।

मित—। दिग्शिरूढ़ात् दिग्देशकालेषु वर्त्तमानात् सप्तमीपञ्चमीप्रथमान्तात् अपर इत्यस्मात् अस्तातिप्रत्ययस्यैव अर्थे आतिप्रत्ययो भवति ; प्रत्ययसन्नियोगेन च अपरशब्दस्याने पश्च इति आदेशः स्यात्। अपरस्यां दिशि वसति इति पश्चात् वसति। अपरस्याः दिशः आगतः इति पश्चादागतः। अपरा दिक् रमणीया इति पश्चात् रमणीयम्। किञ्च—

(क) पूर्व्वोक्ते एव विषये दिक्पूर्व्वपदस्य अपरस्यपश्चभावो वक्तव्यः। आतिश्च प्रत्ययः—यथा दक्षिणपश्चात्, उत्तरपश्चात्।

(ख) अर्द्धोत्तरपदस्य दिक्पूर्व्वपदस्य च अपरशब्दस्य पश्चभावो वक्तव्यः। यथा दक्षिणपश्चार्द्धः। उत्तरपश्चार्द्धः।

(ग) अर्द्धोत्तरपदस्य अपर इत्यस्य विनापि पूर्वपदेन पश्चभावो वक्तव्यः—यथा— पश्चार्द्धः।

## १८७०। उत्तराधरदक्षिणादातिः ॥ ५।३।३४ ॥

दी—। उत्तरात्। अधरात्। दक्षिणात्।

In the aforesaid sense, the suffix आति is attached to उत्तर, अधर, and दक्षिण।

मित—। दिग्शिरूढ़ेभ्यः दिग्देशकालेषु वर्त्तमानेभ्यः सप्तमीपञ्चमी प्रथमान्तेभ्यः उत्तर अधर दक्षिण इति एतेभ्यः आतिप्रत्ययो भवति अस्तातिप्रत्ययस्यैव अर्थे। उत्तरस्यां दिशि वसति इति उत्तरात् वसति। उत्तरस्याः दिश आगतः इति उत्तरात् आगतः। उत्तरा दिक् रमणीया इति उत्तराद्रमनीयम्। एवम् अधरस्याम् दिशि वसति इति अधराद्वसति।

## १८७१। एनवन्यतरस्यामदूरेऽपंचम्याः ॥ ५।३।३५ ॥

दी—। उत्तरादिभ्यः एनव् वा स्यात् अवध्यवधिमतोः सामीप्ये पंचमयन्तं विना। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्त्य दिक्शब्दमात्रादेनपमाहुः—पूर्व्वेण ग्रामम् अपरेण ग्रामम्।

The suffix एनप् is optionally attached to the words उत्तर, दक्षिण and अधर used in either the seventh or in the first case-ending ( but not in the fifth ), provided nearness between these and the objects referred to, is thereby implied. Some by not dragging 'उत्तर' etc, here wish एनप् after any दिक्शब्द।

मित—। "एनप्" एनप इति प्रत्ययः "अन्यतरस्याम्" विकल्पेन स्यात, उत्तर अधर दक्षिण इति एतेभ्यः सप्तम्यन्तेभ्यः प्रथमान्तेभ्यश्च नतु, पञ्चम्यन्तेभ्यः एभ्यः। "अदूरे"—अवधेः ( उत्तरादीनां इत्यर्थः ) अवधिमतः (येभ्यः उत्तरादित्वं इष्टं तेषां इत्यर्थः ) सामीप्ये गम्यमाने सति। अस्तातेरेवार्थे अयं प्रत्ययः अतएव अस्य अप्राप्तिपक्षे अस्तातिप्रभृतयः यथायोग्यं प्रत्यया भवन्ति। सप्तम्यन्तात्—उत्तरस्यां दिशि वसति इति उत्तरेण वसति—अत्र एनप्। पक्षे उत्तरात् वसति—अत्र पूर्व सूत्रेण आत्। तसिल् अपि उत्तरतो वसति। प्रथमान्तात्—उत्तरा दिक् रमणीयम् इति उत्तरेण रमणीयम्। उत्तरात् रमणीयम्। उत्तरतो रमणीयम्। तथाहि मेघदूते—तत्रागारम् धनपतिगृहानुत्तरेणास्मदीयम्। एवं दक्षिणेन वसति, दक्षिणतो वसति। दक्षिणात् रमणीयम्। दक्षिणेन रमणीयम्। दक्षिणतो रमणीयम्। तथाहि शाकुन्तले—अये! वृक्षवाटिकायाः दक्षिणेन आलाप इव श्रूयते। एवं अधरेण वसति; अधरात् वसति। अधस्तात् वसति। अधः वसति ["पूर्वावर—" ( ५।३।३९ ), तथा "अस्ताति च" ( ५।३।४० ) इति सूत्रद्वयेन]। एवम् अधरेण रमणीयम्। अधरात रमनीयम्। अधस्तात् रमणीयम्। अधः रमणीयम्। अपञ्चम्या इति किम्? उत्तरात् आगतः। अत्र आतिरेव। अदूरे इति किम्? उत्तरात् वसति। अत्र दूरत्वं गम्यते—तेन आतिरेव। केचित् तु अत्रसूत्रे उत्तरादीन् नानुवर्त्तयन्ति, किन्तु "दिक्शब्देभ्यः—(५।३।२७) इत्यस्मात दिग्वाचिनः एव शब्दान् अनुवर्त्तयन्ति—न तु उत्तरादीन्। अतएव तेषां मते तु पूर्वेण ग्रामं अपरेण ग्रामम् इत्यादयः साधवः स्युः।

१८७२। दक्षिणादाच्॥ ५।३।३६॥

**दी—। अस्तातेर्विषये। दक्षिणा वसति। अपंचम्या इत्येव दक्षिणादागतः।**

The suffix आच is added to the word दक्षिण in the aforesaid sense.

मित—। अदूरे इति निवृत्तम्। अपंचम्या इति अनुवर्त्तते। अतएव सूत्रस्य अयमर्थः—दिक्शब्दात् दिग्देशकालेषु वर्त्तमानात् सप्तम्यन्तात् प्रथमान्ताच्च "दक्षिणात्" दक्षिण इति शब्दात् "आच्" इति प्रत्ययो भवति अस्तातेरर्थे। दक्षिणस्यां दिशि वसति इति दक्षिणा वसति। दक्षिणा दिक् रमणीया इति दक्षिणा रमणीयम्। अपञ्चम्या इति किम्? दक्षिणस्याः दिशः आगतः इति दक्षिणात् आगतः—अत्र आति-प्रत्यय एव; यद्वा दक्षिणतः आगतः—अतसुच् प्रत्ययः। न च आच्।

**१८७३। आहि च दूरे ॥ ५।३।३७॥**

**दी—। दक्षिणाद् दूरे आहि स्यात् चादाच्। दक्षिणाहि। दक्षिणा।**

This suffix आहि as well as the suffix आच् is affixed to the word दक्षिणा—in the aforesaid sense, provided considerable distance between this (i. e. the direction दक्षिण) and the object with reference to which this word (i. e. दक्षिण) is used, is thereby implied.

मित—। अपञ्चम्या इति अत्र अनुवर्त्तते। सूत्रस्यायमर्थः—दिक्शब्दात् दिग्देशकालेषु वर्त्तमानात् प्रथमान्तात्सप्तम्यन्तात् वा दक्षिणशब्दात् "आहि" इति प्रत्ययो भवति, "च" चकारात् आच् प्रत्ययश्च, "दूरे"—दक्षिण इति अवधेस्तथा यस्मात् दक्षिणा तस्य अवधिमतश्च दूरत्वं चेत् गम्यते। दूरे दक्षिणस्यां दिशि वसति इति दक्षिणाहि वसति दक्षिणा वसति वा। दूरे दृश्यमाना दक्षिणादिक् रमणीया इति दक्षिणाहि रमणीयम् दक्षिणा रमणीयम्। दूरे इति

किम् ? सान्निध्ये दक्षिणस्यां दिशि वसति इति दक्षिणतो वसति—अत्र अतसुच् एव । अपंचम्या इति किम् ? दक्षिणत आगतः ।

१८७४ । उत्तराच्च ॥ ५।३।३८ ॥

टी—। उत्तराहि । उत्तरा ।

The suffix आच् as well as the suffix आहि is added to the word उत्तर in the aforesaid sense..

मित—। दूरे इति अपंचम्या इति च अनुवर्त्तते । अन्यत् सुगमम् । दूरे इति किम् ? सान्निध्ये उत्तरया दिशा प्रयाति इति उत्तरेण प्रयाति—अत्र एनप् एव । अपंचम्या इति किम् ? उत्तरात् आगतः—अत्र आतिप्रत्यय एव ।

१८७५ । संख्याया विधार्थे धा ॥ ॥ ५।३।४२ ॥

टी—। क्रियाप्रकारार्थे वर्त्तमानात् संख्याशब्दात् स्वार्थे धा स्यात् । चतुर्धा । पंचधा ।

The suffix धा is added to cardinal numerals, to denote "ways" ( means or lines ).

मित—। "संख्यायाः" संख्यावाचिभ्यः प्रातिपदिकेभ्यः "विधार्थे" विधा इति अर्थे [ विधा प्रकारः । सतु सर्वक्रियाविषय एव गृह्यते ] । अतएव सूत्रस्यायमर्थः—"संख्यायाः" संख्या-वाचिभ्यः प्रातिपदिकेभ्यः "विधार्थे" क्रियायाः प्रकारार्थे वर्त्तमानेभ्यः धा-प्रत्ययो भवति स्वार्थे । स्वार्थे इति वचनात् अनुमीयते यत् क्रिया-प्रकारत्वं प्रकृतौ ( अत्र संख्यायाम् ) एव वर्त्तते, प्रत्ययः ( अत्र धाप्रत्ययस्तु ) तस्य क्रियाप्रकारत्वस्य उद्बोधकम् । चतुष्प्रकारः इति चतुर्धा । पंचप्रकारः इति पंचधा । यथा—इयं नदी चतुर्धा विभक्ता सती समुद्रं गच्छति । द्विधा गच्छति । एकधा भुङ्क्ते ।

१८७६ । अधिकरणविचाले च ॥ ५।३।४३ ॥

टी— । द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात् । एकं राशिं पंचधा कुरु ।

The suffix धा is added to cardinal numerals to denote the divison of a thing ( or sometime—the unification of many things ).

मित— । अधिकरणं द्रव्यम् । तस्य विचालः संख्यान्तरापादनम् तत् तु एकस्य अनेकीकरणम् अनेकस्य एकीकरणम् । "अधिकरणविचाले" द्रव्यस्य संख्यान्तरापादने गम्यमाने "च" संख्यायाः धाप्रत्ययो भवति । एकं राशिं पंचधा कुरु । एकम् पनसम् अष्टधा विभाजय । अनेकम् फलम् एकधा कुरु ।

१८७७ । एकाद्धोध्यमुञन्यतरस्याम् ॥ ५।३।४४ ॥

टी— । ऐकध्यम् । एकधा ।

The suffix धा added to एक, is optionally replaced by ध्यमुञ् ।

मित— । "एकात्" एकशब्दात् परस्य "धो" धाप्रत्ययस्य "ध्यमुञ्" इति आदेशो भवति "अन्यतरस्याम्" विकल्पेन । अनेकं राशिम् एकधा कुरु ; अत्र धा । अनेकराशिम् ऐकध्यं कुरु—अत्र ध्यमुञ् । ध्यमुञ्प्रत्यये ञकारः इत् स तु आदिस्वरवृद्धिनिमित्तकः । उकारः उच्चारणार्थः । एकधा भुङ्क्ते । ऐकध्यं भुङ्क्ते ।

१८७८ । द्वित्र्योश्च धमुञ् ॥ ५।३।४५ ॥

टी— । आभ्याम् धा इत्यस्य धमुञ् स्याद्वा । द्वैधम्—द्विधा । त्रैधम्—त्रिधा ।

The suffix धा added to the words द्वि and त्रि is optionally replaced by धमुञ् ।

मित— । पूर्वसूत्रात् धा इति अनुवृत्तम् । स्वरे यश्कारो दृश्यते स तु

पूर्व सूत्रात् "अन्यतरस्याम्" इति अत्र सूत्रे अनुकर्षति। अतः सूत्रस्य अयमर्थः— "द्वित्र्योः" द्वि इत्यस्मात् तथा त्रि इत्यस्माच्च विधार्थे अधिकरणविचाले वा विहितस्य धा-प्रत्ययस्य स्थाने "च" विकल्पेन "धमुञ्" इति आदेशः स्यात्। द्विधा—अत्र धा। द्वैधम्—अत्र धमुञ्। त्रिधा—धा। त्रैधम्—धमुञ्॥

दी—। धमुञन्तात् स्वार्थे डदर्शनम्। पथि द्वैधानि।

The suffix ड is optionally seen to be attached to words to which धमुञ् has been already affixed—the sense not being threby altered ( स्वार्थे )।

मित—। "धमुञन्तात्" धमुञ्प्रत्ययान्तात् "स्वार्थे" "डदर्शनम्" डप्रत्ययः विहितो दृश्यते। पथि द्वैधानि संश्रयन्ते। पथि त्रैधानि संश्रयन्ते। द्वैधम् त्रैधम् इति एताभ्याम् धमुञ्प्रत्ययादनन्तरं डप्रत्ययो विहितः। प्रत्ययस्य डित्वात् टेर्लोपः।

१८७६। एधाच्च॥ ५।३।४६॥

दी—। द्वेधा। त्रेधा।

The suffix धा coming after द्वि or त्रि may also be replaced by एधाच्।

मित—। द्वि त्रि इति एताभ्यां विहितस्य धाप्रत्ययस्य स्थाने एधाच् इति आदेशो विकल्पेन स्यात्। द्वेधा, त्रेधा—अतएव त्रीणि रूपाणि—द्वेधा, द्वैधम्, द्विधा। त्रिधा, त्रैधम्, त्रेधा॥

१८८०। याप्ये पाशप्॥ ५।३।४७॥

दी—। कुत्सितो भिषक् भिषक्पाशः।

The suffix पाशप् is added to words to imply censure.

मित—। याप्यः कुत्सितः। याप्ये वर्त्तमानात् प्रातिपदिकात् स्वार्थे पाशप् प्रत्ययो भवतीति काशिका। यद्वा "याप्ये" याप्यः कुत्सितः इति विषये (कुत्सित इति

गम्यमाने ) प्रातिपदिकात् पाशप् प्रत्ययो भवति । याप्यो वैयाकरणः ( कुत्सितः वैयाकरणः ) इति वैयाकरण-पाशः । कुत्सितो भिषक् भिषकपाशः । एवं याज्ञिक-पाशः ।

ननु यो व्याकरणशास्त्रे प्रवीणः परं चारित्रेण दुःशीलः तस्मिन् गम्ये वैयाकरण-पाशः इति रूपम् भवितुमर्हतीति नवा इति विप्रतिपत्तिः । समाधानं तु—न स्यादिति । कस्मात् ? नहि अत्र वैयाकरणत्वं निन्द्यते परम् चारित्रमेव । तेनैव हेतुना । "यस्य गुणस्य सद्भावात द्रव्ये शब्द-निवेशस्तत्कुत्सायाम् प्रत्ययः" इति काशिका । अयमर्थः —यस्य गुणस्य वर्त्तमानतावशात् शब्दस्य संज्ञा निर्णीयते । तस्य एव कुत्सायाम् गम्यमानायाम् पाशप् प्रत्यय इष्टः । अत्र वैयाकरणत्वगुणसद्भावात कश्चित जनः वैयाकरण उच्यते । यदि तस्य वैयाकरणत्वं कुत्सायोग्यं स्यात तर्हि स वैयाकरण-पाशः इति कथयितुम् शक्यते । अन्यथा वैयाकरणत्वस्य कुत्सायोग्यत्वरहितत्वे दुःशीलत्वे अपि तस्य वैयाकरणपाश इति प्रत्ययो न स्यात । एवं यस्य चिकित्सा-शास्त्रज्ञानं कुत्सा-योग्यम् स एव भिषक्पाशः ।

## १९८१ । पूरणाद्भागे तीयादन् ॥ ५।३।४८ ॥

## दी— । द्वितीयो भागः द्वितीयः । तृतीयः । स्वरे विशेषः ।

The suffixes अन् is attached to words to which the suffix तीय in the sense of पूरण ( order ) has been already affixed, provided भाग (division) is thereby implied ; the adding of अन् does not affect the sense.

मित— । तीय इति यः पूरणप्रत्ययोऽस्ति, तदन्तात् प्रातिपदिकात् भागे वर्त्तमाने सति स्वार्थे अन् प्रत्ययो भवति । द्वितीयो भाग इति गम्ये द्वितीयः । तृतीयो भाग इति गम्ये तृतीयः ।

ननु का अस्य स्वार्थिकप्रत्ययस्य सार्थकता इति चेत् ?—समाधत्ते । "स्वरे

विशेषः", कृते तु अन्प्रत्यये स्वरविषये पार्थक्यम् उत्पद्यते तदेवात्र प्रयोजनम्। भागे इति किम्? द्वितीयो कनकः। तृतीया कन्या।

ननु पूरणविषयात् अन्यत्रिमर्थे तीयो न दृश्यते; मुखतीय इत्यादयस्तु अनर्थका एव। तथा सति कथम् अत्र पूर्वे "पूरणात्" इति पूरणशब्दस्य ग्रहणम् इति चेत्— उच्यते। परसूत्रे अस्य अनुवृत्तिम् द्योतयितुमिति।

**टी—। तीयादीकक् स्वार्थे वाच्यः। द्वैतीयीकः—द्वितीयः। तार्त्तीयीकः-तृतीयः।**

The suffix ईकक् is added to words to which तीय has already been added, without any alteration in the sense.

मित—। "तीयात्" तीयप्रत्ययान्तात् स्वार्थे ईकक् इति प्रत्ययो भवति। प्रत्ययस्य कित्त्वात् आदिस्वरवृद्धिः द्वितीयः—द्वैतीयीकः—ईकक्। तृतीयः—तार्तीयकः—ईकक्।

**टी—। न विद्यायाः॥ द्वितीया। तृतीया। विद्या इत्येव।**

मित—। विद्यायां गम्यमानायाम् ईकक् प्रत्ययो नेष्यते।

**१९८२। प्रागेकादशभ्योऽच्छन्दसि॥ ५।३।४९॥**

**टी—। पूरणप्रत्ययान्तात् भागेऽन्। चतुर्थः। पंचमः।**

The suffix अन् is attached to all ordinal numerals upto ten, without affecting the sense to imply "division" (भाग), save in the vedic literature.

मित—। "अच्छन्दसि"—छन्दस् वेदः। एतस्मादन्यत्र विषये। पूरणाद्भागे इति अत्र अनुवर्त्तते। अतएव सूत्रस्य अयमर्थः—"प्रागेकादशभ्यः" एकादश इति संख्यायाः प्राक् ये दशादयः संख्यावाचिनः शब्दाः वर्त्तन्ते तेभ्यः पूरणप्रत्ययान्तेभ्यः स्वार्थे अन्प्रत्ययो भवति भागे गम्यमाने अच्छन्दसि विषये—वैदिक-साहित्यात् अन्यस्मिन्

साहित्ये, लौकिकसाहित्ये इत्यर्थः। चतुर्थः भाग इति चतुर्थः—अन्प्रत्ययः। पञ्चमो भागः इति पञ्चमः—अन्। एवं सप्तमः, नवमः, दशमः, षष्ठः, अष्टमः। स्वर-भिन्नत्वम् एव अत्र प्रयोजनम्। प्रागेकादशभ्यः इति किम्? एकादशः। द्वादशः—नैव अन्। अच्छन्दसि इति किम्? पंचममिन्द्रियमस्यापाक्रामत् इति वैदिक-साहित्ये अन् न स्यात्। भागे इति किम्? चतुर्थः कनकः। पंचमी कन्या। न खलु अन्।

## १८८३। षष्ठाष्टमाभ्याम् ञ च ॥५।३।५०॥

**दी—। चादन्॥ षष्ठो भागः षाष्ठः—षष्ठः। आष्टमः। अष्टमः।**

The suffix अन् as well as the suffix ञ may be added to the words षष्ठ and अष्टम in the aforesaid sense.

मित—। भागे इति, अच्छन्दसि इति च अनुवर्त्तते। षष्ठ अष्टम इति एताभ्याम् भागे अभिधेये अच्छन्दसि विषये ञप्रत्ययो भवति; सूत्रस्थचकारबलात् अन्प्रत्ययोऽपि। ञ इति प्रत्ययस्य ञित्त्वादादिस्वरवृद्धिः। षष्ठो भागः इति षाष्ठः—ञप्रत्ययः। षष्ठः—अन्। अष्टमो भागः इति आष्टमः ञप्रत्ययः। अष्टमः—अन्।

## १८८४। मान-पश्वङ्गयोः कन्लुकौ च ॥ ५।३।५१ ॥

**दी—। षष्ठाष्टमशब्दाभ्याम् क्रमेण कन् लुकौ स्तो माने पश्वङ्गे च वाच्ये। षष्ठको भागः मानं चेत्—अष्टमो भागः पश्वङ्गं चेत्। अस्य अनौ वा लुक्। चकारात् यथाप्राप्तम्। षष्ठः। षाष्ठः। अष्टमः। आष्टमः। महाविभाषया सिद्धे लुग्वचनम् पूर्वत्र ञानौ नित्याविति ज्ञापयति।**

The suffix कन् as well as the suffixes अन् and ञ—are attached to the word षष्ठ to denote any divison in some particular measure; the suffixes अन् and ञ—that are added

to the word अष्टम by the previous rule, may optionally elide—if any part of the body of a beast is implied thereby.

मित—। षष्ठ इति शब्दात् कन्प्रत्ययौ भवति, तथा सूत्रस्थचकारबलात् पूर्व्वसूत्रेण विहितौ अन्ञौ च स्याताम्, मानस्य भागे अभिधेये सति; एवं अष्टम-शब्दात् पूर्व्वसूत्रेण विहितः अन्प्रत्ययः तथा ञप्रत्ययश्च लुग् भवति; सूत्रस्थचकार-बलात् प्रत्ययद्वयस्य स्थितिरपि भवति, पशोरङ्गस्य भागे एव गम्यमाने सति। षष्ठको भागः—अत्र कन्; यः खलु षष्टको भागः स चेत् परिमाणविशेषः स्यात्, तर्हि षष्टको भाग इति एवं वक्तुं शक्यं स्यात्। पक्षे सूत्रस्थचकारबलात् अन्—षष्टः; ञप्रत्ययश्च षाष्टः। अष्टमः भागः पशोरङ्गस्य इति विषये अष्टमशब्दात् विहितस्य अन् प्रत्ययस्य—ञप्रत्ययस्य चलुक्। पक्षे सूत्रस्थचकारबलात् अन्—ञप्रत्ययश्च। तेन अष्टमः—आष्टमः।

ननु अन् ञ इति एतयोः स्वार्थिकप्रत्यययोः लुक् स्यात् इति वचने का सार्थकता? अनुक्ते अपि लुकि नास्ति कापि हानिरिति चेत्?—समाधत्ते। "महाविभाषया सिद्धे" स्वार्थिक-प्रत्ययस्य स्वभावेनैव वैकल्पिकत्वे सिद्धे सति "लुग्वचनम्" अत्र अष्टमशब्दात् विहितयोः अन्ञप्रत्यययोः लुक् स्यादिति उक्तिस्तु—"पूर्व्वत्र" पूर्व्वसूत्रे "षष्टाष्टमाभ्याम् ञच" (५।३।५०) इति सूत्रे "आनौ" ञ अन् इति प्रत्ययौ "नित्यौ" न तु स्वार्थिक-त्वात् वैकल्पिकौ "इति" एवं तत्त्वं "ज्ञापयति" सूचयति। "षष्टाष्टमाभ्यां ञ च" (५।३५०) इति सूत्रे विहितौ अन् ञ इति प्रत्ययौ यद्यपि स्वार्थिकौ, तथापि एतयो-र्नित्यत्वम् एव ज्ञेयम्। कथम् तत् ज्ञायते? मानपश्वङ्गयोरिति अत्र अष्टन-शब्दात् विहितयोः प्रत्यययोर्लुककरणेन इति सर्वमवदातम्।

## १९८५। एकादाकिनिच्चासहाये ॥ ५।३।५२ ॥

## दी—। चात् कन्लुकौ। एकः। एकाकी। एककः।

The suffix आकिनिच् too is attached to the word एक to denote "ones own-self".

मित—। "एकात्" एकशब्दात् "असहाये" असहाय इति विषये अभिधेये

सति, "आकिनिच्" आकिनिच् इति प्रत्ययः "च" अपि भवति। सूत्रस्थचकारबलात् कन्प्रत्ययोऽपि स्यात् तथा प्रत्ययस्य लुक् अपि। अयं चकारः आकिनिच्प्रत्ययेन सह पूर्वसूत्रविहितौ कन्लुकौ समुच्चिनोति। एक एव इति आकिनिच् = एकाकी। एकाकी अहं तत्र गमिष्यामि। कन्—एककः। प्रत्ययलुक्—एकः। एक एव अभिमन्युः सप्तरथिनः आचक्राम। असहायग्रहणं कथम्? यदा एकशब्देन संख्या उच्यते—तदा माभूदिति ज्ञापनार्थम्।

## १८८६। भूतपूर्वे चरट्॥ ५।३।५३॥

**टी—। आढ्यो भूतपूर्वः आढ्यचरः।**

The suffix चरट् is added to the words to denote the previous existence (or former state) of the things implied by the said words.

मित—। पूर्वं भूत इति भूतपूर्वः। सहसुपेति समासः। भूतपूर्वः अतिक्रान्तकालवचनः इति काशिका। कस्यचित् वस्तुनो भूतपूर्वत्वे अभिधेये सति, तद्वस्तुवाचकात् प्रातिपदिकात् चरट्प्रत्ययो भवति। आढ्यो भूतपूर्वः आढ्यचरः। यः खलु पुरा आढ्यः (धनशाली) आसीत् अधुना तु न तथा स आढ्यचरः। एवं सुकुमारचरः। प्रत्ययस्यटित्त्वात् स्त्रियां ङीप्—आढ्यचरी। सुकुमारचरी। तथाहुक्तं वैष्णवाचार्य्यैः—अनर्पितचरीम् चिरात् करुणयावतीर्णः कलौ··· ।

## १८८७। षष्ठ्या रूप्य च॥ ५।३।५४॥

**टी—। षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च। कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः—कृष्णचरः। तसिलादिषु रूप्यस्य अपरिगणितत्वात् न पुंवत्। शुभ्रायाः भूतपूर्वः शुभ्रारूप्यः।**

In the aforesaid sense, the suffix रूप्य (as well as the suffix चरट्) is (or—are) added to words that is (or—are) bound to end in the sixth case-ending. For rest see Tika.

मित—। "षष्ठ्याः" षष्ठ्यन्तात् प्रातिपदिकात् भूतपूर्वे अर्थे "रूप्यः" रूप्य इति प्रत्ययो भवति, "च" चकारात् चरट् प्रत्ययोऽपि। कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः—रूप्य ; कृष्णचरः—चरट्। एवं देवदत्तस्य भूतपूर्वो गौः देवदत्तरूप्यः—देवदत्तचरः।

अत्र इदम् अवधेयम्। पूर्वसूत्रे प्रथमान्तात् चरट् प्रत्ययो विधीयते—भूतपूर्वे अर्थे। तत्र भूतपूर्वम् इति तु प्रकृतेरेव विशेषणम्। आढ्यशब्दात् चरट स्यात्—आढ्यः प्रकृतिः—चरट् प्रत्ययः। भूतपूर्वम् इति तु "आढ्य" इत्येवमेव विशेषयति। परमत्र सूत्रे तु चरट्, रूप्य इति तु प्रत्ययौ षष्ठ्यन्तप्रातिपदिकात् विधीयते—अत्र भूतपूर्वे एव। अत्र 'भूतपूर्वमिति तु प्रत्ययार्थस्य एव विशेषणम् न प्रकृतेः। कृष्णस्य भूतपूर्वो गौः इति कृष्णशब्दात् चरट्, रूप्य इति च स्याताम्—परम् अत्र भूतपूर्वत्वम् न खलु कृष्ण इत्यस्मिन् अस्ति, परम् कृष्णशब्दात् विहिते चरटि रूप्ये वा योऽर्थःप्रत्ययस्य अभिधीयते तस्यैव विशेषणम्। कृष्णचरः गौः कृष्णरूप्यः गौः—इति स्याने तु भूतपूर्वत्वं गौः इत्यस्यैव विशेषणम्॥ तसिलादिषु इति,—"तसिलादिष्वाकृत्वसुचः" (६।३।३५) इति सूत्रेण तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत् स्यात्। परिगणनं तत्र कर्त्तव्यम्। परं तत्र परिगणनप्रसङ्गे रूप्यप्रत्ययस्य परिगणनं नास्ति। अतएव रूप्यप्रत्यये परतः स्त्रीलिङ्गान्तप्रकृतेः पुंवद्भावो न स्यात् ; तेन शुभयाः भूतपूर्व्वः इति शुभारूप्यः।

## १९८८। अतिशायने तमबिष्ठनौ॥ ५।३।५५॥

**टी—। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेन आढ्यः आढ्यतमः। लघुतमो—लघिष्ठः।**

The suffixes तमप् and इष्ठन् are attached to words to denote the excessiveness of the things expressed by the said words ; i. e. in the sense of the superlative degree. the suffixes तमप् and इष्ठन् are attached to words.

मित—। अतिपूर्व्वक-शीधातोर्ल्युटि अतिशयनम् इतिरूपम्। अतिशयनमेव अतिशायनम्—निपातनादेव दीर्घः इति काशिका। अतिशायनम् अतिशयः उत्कर्षः

प्रकर्षः इति यावत्। "अतिशय-विशिष्टार्थ-वृत्तेः"—प्रकर्षाधिकसनाथे अर्थे वर्त्तमानात् प्रातिपदिकात् "स्वार्थे" "एतौ" तमप् इष्ठन् इति प्रत्ययौ "स्तः" भवतः। अतिशय-विशिष्टत्वं हि प्रकृतौ एव तिष्ठति। तस्मात् स्वार्थे प्रत्ययः विहितः सन् अतिशय-विशिष्टत्वम् इति अर्थं द्योतयति नाम। अयं जनः एषाम् जनानाम् अतिशयेन आढ्यः इति आढ्यतमः। कृष्णः माथुरेषु माथुराणां वा आढ्यतमः। अयम् एषु एषां वा अतिशयेन लघुः इति लघुतमः—तमप्। लघिष्ठः इष्ठन्। जनेषु जनानां वा याचकः लघिष्ठः—लघुतमो वा। एवं दर्शनीयतमः। सुकुमारतमः। तमप्प्रत्यये परे पुंवद्भावः—एषा नारीणाम् नारीषु वा अतिशयेन दर्शनीया इति दर्शनीयतमा एषा नारी। इयं रमणीयासु रमणीसु अतिशयेन पट्वी इतिवाक्ये कृते तमप् प्रत्यये पुंवद्भावो न स्यात्; कथमिति चेत्? उच्यते। "घरूपकल्प—" (६।३।४३) इत्यादिं सूत्रविहिता ह्रस्वव्यवस्था परत्वात् पुंवद्भावम् बाधते। तेन पट्वितमा इयं रमणी। अत्र ह्रस्वत्वमेव। अयमेषाम् अतिशयेन पटुः इति इष्ठन् पटिष्टः। किञ्च "यदा च प्रकर्षवतां पुनः प्रकर्षः विवक्ष्यते तदा आतिशयिकान्तादपरः प्रत्ययो भवत्येव। देवो वः सविता प्रापयतु श्रेष्ठतमाय कर्मणे। युधिष्ठिरः श्रेष्ठतमः कुरूणा"मिति काशिका। अपरः प्रत्ययः—आदौ इष्ठन् विहितश्चेत् तर्हि पुनः प्रकर्षे तमप् स्यादिति बोध्यम्।

## १८८६। तिङश्च ॥ ५।३।५६ ॥

## दो—। तिङन्तादतिशये द्योत्ये तमप् स्यात्।

This तमप् is also added to तिङन्त verbs in the aforesaid sense.

मित—। तिङन्तादपि अतिशायने गम्ये तमप्प्रत्ययो भवति। "ङ्याप् प्रातिपदिकात्" (४।१।१) इति सूत्रे प्रोक्तं यत् (आ-पञ्चमाध्याय-परि-समाप्तेः यत्) (वक्तव्यं) तत्तु ङ्याप्प्रातिपदिकादेव विहितं स्यात्। अनेन तिङन्तेभ्यः तमप् प्रत्ययो वारित आसीत् स तु अनेन विधीयते। तिङन्तात् इष्ठन् न स्यात्—तस्मा

गुणवचने एव नियमितत्वात्। सर्व्वे इमे पचन्तीति अयम् एषाम् अतिशयेन पचतीति पचतितमप् इति स्थितः। ततः सूत्रान्तरस्य अपेक्षा अग्रतो द्रष्टव्यम्।

१८८०। तरप्तमपौ घः ॥ १।१।२२ ॥

दी—। एतौ घ-संज्ञौ स्तः ॥

The suffixes तरप् and तमप् pass by the name घ।

मित—। "तरप् तमपौ" तरप् तमप् इति प्रत्ययौ "घः" घ इति संज्ञां भजेते। तत् फलं यथा—ब्राह्मणितमा इत्यत्र "घरूपकल्प—" (६।३।४३) इत्यादि सूत्रेण ह्रस्वत्वम्।

१८८१। किमेत्तिङव्यय—घादाम्वद्रव्यप्रकर्षे ॥ ५।४।११ ॥

दी—। किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्नतु द्रव्यप्रकर्षे। किंतमाम्। प्राह्णेतमाम्। पचतितमाम्। उच्चैस्तमाम्। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः।

The aforesaid घ (i. e. the suffixes तरप् and तमप्), when joined to the word किम्, to any word ending in एकार, or to any verb (तिङन्त) or to any indeclinable, takes the suffix आमु (i. e. आम्) after it—except in the case where the excellence of any object (द्रव्य) is implied.

मित—। किमेत्तिङव्ययघात् इति। किम् एत् तिङ् अव्यय घात् आमु अद्रव्य प्रकर्षे इति पदच्छेदः। किमेत्तिङव्ययघात् इति प्रकृतिः। आमु इति प्रत्ययः। किम् इत्यस्मात् एकारान्तात् प्रातिपदिकात् तिङन्तात् तथा अव्ययात् च विहितः यो घः (तरप् तमपौ), तदन्तात् प्रातिपदिकात् आमु इति प्रत्ययो भवति—द्रव्य-प्रकर्षं वर्ज्जयित्वा। आमु इति प्रत्यये उकारः इत्—स तु मकारपरित्राणार्थम् एव तिष्ठति।

ननु द्रव्यस्य स्वतः प्रकर्षो नास्ति तर्हि कथमुक्तं अद्रव्यप्रकर्षे इति चेत्?— सत्यम्।

यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति, तथापि गुणजन्यः क्रियाजन्यश्च प्रकर्षः द्रव्ये उपचर्य्यते। तादृशे स्थले अयं प्रतिषेधः। तर्हि कुत्र इयं व्यवस्था फलवती इति चेत्?—उच्यते। यदा क्रियायाः गुणस्य प्रकर्षो वर्त्तते न खलु स प्रकर्षः द्रव्ये उपचर्य्यते—तदैव अयम् आमुप्रत्ययः स्यात्। किम्—किंतमाम्। किंतराम्। ( किन्तमाम्, किन्तराम् इति च सन्धिसूत्रेण )। एकारान्तात्—प्राह्णेतमाम्। पूर्व्वाह्णेतराम्। तिङन्तात्—पचतितमाम्। जयतितराम्। अव्ययात्—उच्चैस्तराम्। नीचैस्तराम्। तथाहि—जयतितराम् जगन्मङ्गलं हरेर्नाम। अद्रव्यप्रकर्षे इति किम्? द्रव्यप्रकर्षेतु अयं न स्यात्। यथा—उच्चैस्तरः तरुः। नीचैस्तरः पर्व्वतः। अत्र उदाहरणद्वये द्रव्यस्य ( एकत्र तरोः, अन्यत्र वृक्षस्य ) प्रकर्षः विद्यते तेन न आमुः। स अतिशयेन पचति इति पचतितराम्।

**१९९१। द्विवचनविभज्योपपदे तरबीयसुनौ ॥५।३।५७॥**

**दी—। द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौस्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुर्लघुतरः। लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः।**

The suffixes तरप् and ईयसुन् are attached to words—when the excellence of either of the two is implied ( i. e. in the sense of the comparative degree ).

मित—। द्वयोरर्थयोर्वचनम् इति द्विवचनम्। विभज्यः विभक्तव्यः। निपातनात् यत् इति काशिका। द्वयोर्वस्तुनोर्मध्ये एकस्यातिशये अभिधेये सति, तथा उपपदे च विभक्तव्ये, सुबन्तात् तथा तिङन्तात् च तरप् ईयसुन् इति प्रत्ययौस्तः। तरप् इति तमपः बाधा। ईयसुन् इति इष्ठस्य बाधा। द्वौ इमौ लघु—अयम् अनयोः अतिशयेन लघुः इति लघुतरः। लघुतरोऽयं जनः। अत्र द्वयोरेकस्य अतिशयोऽभिप्रेतः। ईयसुन् =लघीयान्। एवं आढ्यतरः। सुकुमारतरः। पटीयान्। गरीयान् इत्यादयः। विभाज्योपपदे—उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसो वा, माथुराः पाटलीपुत्रेभ्यः आढतराः। पाटलिपुत्रेभ्यः इत्यत्र "पञ्चमीविभक्ते" ( २।३।४२ ) इति पंचमी।

अत्र निर्द्धारणाश्रया विभक्तिः ( विभागः ) विवृते । अतएव विभज्योपपदे इति अस्य उदाहरणम् एतत् । तिङन्तात् पचतितराम् । पूर्वसूत्रेण आमुः ।

१९९२ । अजादीगुणवचनादेव ॥ ५।३।५८ ॥

दी— । इष्ठनीयसुनौ गुणवचनादेव स्तः । नेह—पाचकतरः । पाचकतमः ।

The suffixes इष्ठन् are ईयसुन are attached only to adjective whereas तरप् and तमप् may be added to all.

मित— । तरप् तमप् इष्ठन् ईयसुन् इति चत्वारोऽतिशायने विहिताः प्रत्ययाः । एषु इष्ठन् ईयसुन् इति प्रत्ययौ तु अजादी । उभयोराद्यचरम् खलु अच् एव । "अजादी" प्रत्ययचतुष्टयानां मध्येयौ अजादी इष्ठन् ईयसुन् इति, तौ "गुणवचनादेव" गुणवाचकात् प्रातिपदिकात् नाम, विशेषणपदात् इत्यर्थः—स्याताम् । तरप् तमप् तु सर्वत्र । पटुः इति विशेषणपदम् । तस्मात्—पटीयान, पटिष्ठः । लघीयान, लघिष्ठः । गरीयान्, गरिष्ठः । पाचक इति विशेष्यपदः—तेन अस्मात तौ न स्यात ; तरप तमपौ तु स्यातामेव । पाचक-तरः । पाचक-तमः । उभावेव पाचकौ, अयम् अनयोरतिशयेन पाचकः इति पाचकतरः । सर्वे पाचकास्तेषु अयम अतिशयेन पाचका इति पाचक-तमः ।

१९९४ । तुश्छन्दसि ॥ ५।३।६० ॥

दी— । तृन्तृजन्तादिष्ठनीयसुनौ स्तः ।

The Suffixes इष्ठन and ईयसुन are added to words ending in तृ (whether these are adjectives or not) in the Vedic literature.

मित— । तुः इति तृ इत्यस्य पञ्चमीविभक्तिरूपम् । तृ-इति तृन तथा तृच् प्रत्ययस्य । तृन् प्रत्ययनिष्पन्नात तथा तृच् प्रत्ययनिष्पन्नाच्च प्रातिपदिकात छन्दसि विषये इष्ठन् ईयसुन् इति स्तः ।

१९९४ । तुरिष्ठेमेयःसु ॥ ६।४।१५४ ॥

दी—। तृशब्दस्य लोपः स्यादिष्ठेमेयःसु परेषु। अतिशयेन कर्ता करिष्ठः। दोहीयसी धेनुः।

Words ending in तृ lose its तृ portion when any one of the suffixes इष्ठन्, इमनिच् or ईयसुन् is added to it.

मित—। इष्ठन् इमनिच् ईयसुन् इति प्रत्ययेषु परतः तृन्प्रत्ययनिष्पन्नस्य प्रातिपदिकस्य तृ इत्यंशस्य लोपः स्यात्। अयम् अनयोरतिशयेन कर्त्ता इति करिष्ठः। "आसुतिं करिष्ठः"। एवं विजयिष्ठः वहिष्ठः इति वेदे दृश्यते। दोहीयसी (स्त्रियां) [दोहित्री इत्यर्थः] धेनुः। दुह्धातोस्तृच्—दोहिता इति वैदिकं रूपम्। ततः ईयसुन्। वर्त्तमानसूत्रेण तृचो निवृत्तिरपि।

१८९६। प्रशस्यस्य श्रः ॥ ५।३।६० ॥

दी—। अस्य श्र आदेशः स्यादजाद्योः।

The word प्रशस्य is replaced by श्र before the suffix इष्ठन् and ईयसुन्।

मित—। अजादी इति अनुवर्त्तते। तच्च विभक्तिविपरिणामरीत्या सप्तम्यां परिणमते। अजाद्योः इत्यर्थः। अजाद्योः इष्ठन् तथा ईयसुन् इति प्रत्ययद्वये परतः प्रशस्य इति स्थाने श्र इति आदेशो भवति।

१८९७। प्रकृत्यैकाच् ॥ ६।४।६३ ॥

दी—। इष्ठादिषु एकाच् प्रकृत्या स्यात्। श्रेष्ठः। श्रेयान्।

Before suffixes इष्ठन्, ईयसुन् and इमनिच्, the base that passes by the denomination भ and contains only one vowel, suffers no change.

मित—। इष्ठन्, इमनिच्, ईयसुन् इति एतेषु परतः यत् भ-संज्ञकम् एकाच् तत् प्रकृत्यैव तिष्ठति। सर्व्वे एव प्रशस्याः। अयमेषु अतिशयेन प्रशस्यः इति

वाक्ये प्रशस्य इष्ठ इति स्थितिः। पूर्वसूत्रेण आदेशः—तेन श्र इष्ठ इति स्थितिः। ततः "यस्येति च" (६।४।१४८) इति श्र इत्यस्य अकारलोपः प्रसक्तः ; टेः (६।४।१५५) इति सूत्रेण च टिलोपः प्रसक्तः। अतएव अकारस्य लोपे प्राप्ते सति अनेन प्रकृत्या अवस्थानं विधीयते। तेन नैव अकारस्य लोपः। तथा सति श्रेष्ठः इतिरूपम्। एवम् —श्रेयान्।

१९९८। ज्य च ॥ ५।३।६१ ॥

दी—। प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः ॥ ज्येष्ठः।

The base प्रशस्य is also replaced by ज्य before इष्ठन् and ईयसुन्।

१९९९। ज्यादादीयसः ॥ ६।४।१६० ॥

दी—। आदेः परस्य। ज्यायान् ॥

The ईकार of ईयसुन is replaced by आ when it comes after ज्य।

मित—। ज्यात् आत् ईयसः इति पदच्छेदः। "आत्" ज्य इत्यस्मात् परस्थितस्य "ईयसः" ईयसुन् इति प्रत्ययस्य "आत्" आकारः इति आदेशः स्यात्। इमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः इति वाक्ये ज्य ईयस् इति स्थितिः। ततः अनेन आकारादेशः—तेन ज्य आयस् इति स्थितिः—ततः ज्यायस् इति रूपम्। प्रथमैकवचने पुंलिङ्गे ज्यायान्।

२०००। वृद्धस्य च ॥ ५।३।६२ ॥

दी—। ज्यादेशः स्यादजाद्योः ॥ ज्येष्ठः ज्यायान्।

The word वृद्ध is also replaced by ज्य before the aforesaid suffix.

मित—। इष्ठनि ईयसुनि च परे वृद्धशब्दस्य स्थानेऽपि ज्य इति आदेशः स्यात्।

२००१। अन्तिकबाढयोर्नेदसाधौ ॥ ५।३।६३ ॥

टी—। अजाद्योः ॥ नेदिष्ठः—नेदीयान्। साधिष्ठः—साधीयान्।

Before the suffixes above spoken of, the base अन्तिक is replaced by नेद and बाढ by साध।

मित—। अन्तिक इति शब्दः नैकट्ये वर्त्तते; बाढ इति सुष्ठौ च। इष्ठनि ईयसुनि च अन्तिकस्थाने नेद इति। बाढस्थाने साध इति च भवति।

२००२। स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्राणां यणादिपरं पूर्व्वस्य च गुणः ॥ ६।४।१५६ ॥

टी—। एषां यणादिपरं लुप्यते। पूर्व्वस्य च गुण इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठ एवमीयसुन्। ह्रस्वक्षिप्रक्षुद्राणाम् पृथ्वादित्वात्—ह्रसिमा। क्षेपिमा। क्षोदिमा।

Before the suffixes इष्ठन् ईयसुन् and इमनिच्, the यण् ( i. e. यवरल—as the case may be ) of the words स्थूल, दूर, युव, ह्रस्व, क्षिप्र and क्षुद्र, elide and the vowels in these words takes the guna substitute. ह्रस्व etc take इमनिच् also being of पृथ्वादि class.

मित—। इष्ठनि, इमनिचि, ईयसुनि च परतः स्थूल, दूर, युव, ह्रस्व, क्षिप्र, क्षुद्र इति एतेषाम् अन्त्यं यण् लुप्यते; ततः यणः पूर्वस्थितस्य अचो गुणः स्यात्। स्थूल इष्ठन् इति स्थितिः। लकारस्य नाशः ऊकारस्य गुणः—तेन स्थो इष्ठ इति स्थितिः। यतः सन्धिबलेन स्थविष्ठः इति। एवं स्थवीयान्। एवं क्षोदिष्ठः—क्षोदीयान्। ह्रस्व क्षिप्र क्षुद्र इति शब्दाः पृथ्वादिषु पठ्यन्ते। अतएव "पृथ्वादिभ्य इमनिज् वा" (५।१।१२२) इति सूत्रेण एभ्य इमनिच् स्यात्। ह्रस्वस्य भावः ह्रसिमा इति। अन्यत् सुगमम्।

२००३। प्रिय-स्थिर-स्फिरोरुबहुलगुरुवृद्धतृप्र-दीर्घ-वृन्दारकाणां प्रस्थस्फ-वर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः ॥ ६।४।१५७ ॥

टी—। प्रियादीनां क्रमात् प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृन्दिष्ठः। एवमीयसुन्। प्रेयान्। प्रियोरुबहुल-गुरु-दीर्घाणां पृथ्वादित्वात् प्रेमेत्यादि।

Before the suffixes इष्ठन्, इमनिच् and ईयसुन्, the words प्रिय, स्थिर, स्फिर, उरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ and वृन्दारक—are replaced respectively by प्र, स्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप, द्राघि and वृन्द।

मित—। इष्ठनि इमनिचि तथा ईयसुनि च परतः प्रिय स्थिर स्फिर उरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारक इति एतेषां स्थाने यथाक्रमम् प्र स्थ स्फ वर् बंहि गर् वर्षि त्रप् द्राघि वृन्द इति आदेशाः स्युः। प्रिय—इष्ठनि प्रेष्ठः। ईयसुनि—प्रेयान्। एषां मध्ये प्रिय उरु बहुल गुरु दीर्घ इति एते पृथ्वादिषु पठ्यन्ते। अतएव एभ्यः पृथ्वादिभ्य इमनिज्वा (५।१।१२२) इति इमनिच् इष्यते। प्रिय—प्रेमा—इमनिच्।

२००४। बहोर्लोपो भू च बहोः ॥ ६।४।१५८ ॥

टी—। बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः। भूमा। भूयान्।

The first vowel of the suffixes इमनिच् and ईयसुन् elides when they are attached to बहु and the base is replaced by भू।

मित—। बहु इत्यस्य उत्तरयोरिमनिचः ईयसुनश्च लोपः स्यात्। तथा बहुस्थाने भूरिति आदेशोऽपि भवति। अयमनयोरतिशयेन बहुः इति वाक्ये बहु ईयसुन् इति स्थितिः। ततः भू ईयसुन् इति; ततः ईयसुन् इत्यस्य ईकारलोपः—तेन भूयस् इति स्थितः—भूयान्। एवं बहोर्भावः इति इमनिच् "पृथ्वादिभ्य इमनिज्वा"

इति सूत्रेण। बहु इमनिच् इति स्थितिः—ततः भू इमनिच् इति ; ततः इकारलोपः तेन भूमन् इति = भूमा। लोपः इत्यनेन इमनिचः ईयसुनश्च आद्यवर्णलोपो बोध्यः।

२००५। इष्ठस्य यिट् च ॥ ६।४।१५८ ॥

दी—। बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च। भूयिष्ठः।

The इकार of इष्ठ elides when attached to बहु ; and यिट् is inserted between the base and the suffix—बहु being replaced by भू।

२००६। युवाल्पयोः कनन्यतरस्याम् ॥ ५।३।६४ ॥

दी—। एतयोः कनादेशो वा स्यादिष्ठेयसोः। कनिष्ठः। कनीयान्। पक्षे यविष्ठः ; अल्पिष्ठः इत्यादि।

Before the suffix इष्ठन् and ईयसुन्—the bases युव and अल्प are optionally replaced by कन्।

मित—। इष्ठनि ईयसुनि च परतः "युवाल्पयोः" युवन अल्प इति एतयोः स्थाने "कन्" आदेशो भवति "अन्यतरस्याम्" विकल्पेन। सर्व्वे इमे युवानः ; अयम् एषु अतिशयेन युवा इति कनिष्ठः—पक्षे यविष्ठः। "स्थूल दूर—" (६।४।१५६) इत्यादि सूत्रेण वलोपः उकारस्य गुणश्च। द्वौ इमौ युवानौ अयमनयोरतिशयेन युवा इति कनीयान्। पक्षे यवीयान। सर्व्वे इमे अल्पाः। अयमेषु अतिशयेन अल्पः इति कनिष्ठः—पक्षे अल्पिष्ठः।

२००७। विन्मतोर्लुक् ॥ ५।३।६५ ॥

दी—। विनो मतुपश्च लुक् स्यादिष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेन त्वग्वान्—त्वचिष्ठः। त्वचीयान्।

Before the suffixes इष्ठन् and ईयसुन्, words that end in विन् or मतुप् ( that is words formed with these two suffixes ), lose विन or मतुप् portion.

मित—। इष्ठनि तथा ईयसुनि च परतः विन् प्रत्ययान्तानां मतुप प्रत्ययान्तानां शब्दानां लोपः स्यात्। स्रक् माला। सा अस्य अस्ति इति विन्—स्रग्वी। स्रज् शब्दात् विन प्रत्ययः। सर्वे इमे स्रग्विणः—अयम् एषाम् अतिशयेन स्रग्वी इति वाक्ये स्रग्विन शब्दात् इष्ठन। स्रग्विन् इष्ठ इति स्थितिः, अनेन विन् इत्यस्य लुक् तेन स्रज् विन इत्यस्मात् विन् निवर्त्तते। निमित्ताभावे नैमित्तिकस्य अपि अभावः इति पुनरपि गकार स्थाने जकारः—तेन स्रज् इष्ठः इति स्थितिः—तथासति स्रजिष्ठः इति रूपम्। क्वचिष्ठ इत्यत्र—"यचिभम्" (१।४।१८) इति पूर्वस्य पदत्वाभावात् "झलां जशोऽन्ते" ( ८।२।३९ ) इति सन्धिर्न स्यात्।

## २००८। प्रशंसायां रूपप्॥ ५।३।६६॥

## टी—। सुबन्तात्तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपम्।

The suffix रूपप् is attached to words ( including verbs ) in the sense of praising ; to imply some speciality the suffix रूपप् is added to words as well as to such verbal forms as pass by the denomination तिङन्त।

मित—। प्रशंसा स्तुतिः। तस्यां गम्यमानायाम् "रूपप" इति प्रत्ययो भवति ; कस्मात्? सुबन्तात् तथा तिङन्तादपि। तिङश्च (५।३।५३ ) इत्यस्मात् "तिङः" इति अत्र अनुवर्त्तते। काशिकामते तु प्रशंसा इति प्रकृतेरेवार्थम् विशेषयति अतएव तन्मते अयमेव अर्थः—प्रशंसाविशिष्टे अर्थे वर्त्तमानात् सुबन्तात् तथा तिङन्तादपि प्रातिपदिकात् स्वार्थे रूपप् प्रत्ययो भवति। स्वार्थिकाः प्रत्ययाः प्रकृतेरेव अर्थ-विशेषस्य द्योतकाः भवन्ति। प्रशस्तं पटुः इति पटुरूपः। प्रकृतेरर्थस्य कथञ्चित् वैशिष्ट्ये एव प्रशंसा भवति अतएव अयम् वृषलरूपो यः सुरां पलाण्डुना पिबति।

तिङन्तादपि अयं प्रत्ययः स्यात् यथा प्रशस्तं पचति इति पचतिरूपम्। प्रत्ययान्तानां सदैव क्लीवत्वं—एकवचनं च। पचतिरूपम् इत्यादयः।

२००९। ईषदसमाप्तौ कल्पब्देश्य-देशीयरः ॥ ५।३।६७ ॥

**टी—। ईषदूनो विद्वान् विद्वत्कल्पः। यशस्कल्पम्। यजुष्कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्।**

The suffixes कल्पप्, देश्य and देशीयर् are added to words (also to तिङन्त forms) in the sense of "a little inferior or a little below or a little short of".

मित—। असमाप्तिः असम्पूर्णता, ईषदसमाप्तिः स्तोकेन असम्पूर्णता—किञ्चिन्न्यूनत्वं इति यावत्। "ईषदसमाप्तौ" किञ्चिन्न्यूनत्वं इत्येव अर्थे अभिधेये सति, सुबन्तात् तथा तिङन्तात् कल्पप् देश्य देशीयर इति प्रत्ययाः भवन्ति। ईषदूनो विद्वान् इति विद्वत्कल्पः। विद्वद्देश्यः। विद्वद्देशीयः।

२०१०। विभाषा सुपो बहुच् पुरस्तात्तु ॥ ५।३।६८ ॥

**टी—। ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुज् वा स्यात् स च प्रागेव नतु परतः। ईषदूनः पटुः बहुपटुः। पटुकल्पः। सुपः किम्? यजतिकल्पम्।**

In the aforesaid sense, the suffix बहुच् may, also be added to words (but not to तिङन्त forms); and the said suffix takes its position before the base and not after it. Why do we say सुपः here? witness यजतिकल्पम् as without बहुच् (for it is not a सुप् but तिङ्)।

मित—। ईषदसमाप्तिविशिष्टे अर्थे वर्त्तमानात् सुबन्तात् बहुच् इति प्रत्ययो विकल्पेन भवति। अयं च प्रकृतेः प्रागेव तिष्ठति—नतु परतः। ईषदूनः पटुः बहुपटुः; पचेकल्पप् इत्यादयः। तिङन्तान्माभूत् ईषदूनं यजति इति बहुच् न स्यात्।

कल्पप् इत्यादयस्तु सुरेव यजतिकल्पम्। बहुच इति चकारस्य इत्वं अस्य अन्तोदात्तत्वं सूचयति।

तथाहि सूत्रम्—"चितः" (६।१।१६३) = अन्त उदात्तः स्यात्।

## २०११। प्रकारवचने जातीयर्॥ ५।३।६९॥

**दी—। प्रकारवति चायम्। थाल् तु प्रकारमात्रे। पटुप्रकारः—पटुजातीयः।**

The suffix जातीयर् is added to words which imply the प्रकार ( nature or speciatity ) of something ; [ प्रकारः—differention ].

मित—। प्रकारः—"सामान्यस्य भेदको विशेषः प्रकारः" इति काशिका। यत् किञ्चित् वैशिष्ट्यम् एकतोऽन्यम् व्यावर्त्तयति स एव प्रकारः इत्यर्थः। "प्रकारवचने" प्रकारस्य अभिधाने सति, सुबन्तादेव प्रातिपदिकात् जातीयर् इति प्रत्ययो भवति।

ननु प्रकारवचने थाल्प्रत्यय इष्यते—यथा, सर्व्वथा। को भेदोनयोः प्रत्यययोरिति चेदुच्यते। प्रकारमात्रे थाल् स्यात्। थाल्प्रत्ययस्तु प्रकारमेव गमयति—नैव यस्य प्रकारोऽस्ति तन्नाम वस्तु ; जातीयर् पुनः प्रकारवति अभिधेये सति विधीयते ; यस्य प्रकारः स एव अभिधीयते चेत्, जातीयं विधीयते इति सरलार्थः। पटुप्रकारः इति पटुजातीयः। मृदुप्रकारः इति मृदुजातीयः। एवं दर्शनीयजातीयः। स्त्रियां पटुजातीया इत्यादि।

## २०१२। प्रागिवात् कः॥ ५।३।७०॥

**दी—। "इवे प्रतिकृतौ" इत्यतः प्राक् काधिकारः।**

The suffix क is to pervade in all the sutras that precede "इवे प्रतिकृतौ" ( ५।३।९६ )

मित—। प्राक् इवात् कः इति पदच्छेदः। "इवात्"—"इवे प्रतिकृतौ" (५।३।९६) इति सूत्रस्थइवशब्दसंशब्दनात् "प्राक्"—याग् ऊर्द्धं वक्ष्यमाणेषु "क"

प्रत्ययोऽधिकृतो वेदितव्यः। वक्ष्यति—"अज्ञाते" (५।३।७३)। तत्र कप्रत्ययो भवति इति बोध्यम्। तिङन्तात् तु अयं प्रत्ययो नेष्यते।

## २०१३। अव्ययसर्वनाम्नामकच् प्राक् टेः ॥ ५।३।७१ ॥

## दी—। "तिङश्च" इत्यनुवर्त्तते।

The suffix अकच् is added to indeclinables, pronouns and तिङन्त forms in any one of the senses, spoken of before the rule इवे प्रतिकृतौ, and the suffix takes its position before the टि portion of the base.

मित—। तिङश्च इति (५।३।५६) अनुवर्त्तते। तिङन्तात्, अव्ययात् तथा सर्वनाम्नश्च अकच्प्रत्ययो भवति इवशब्दसंशब्दनात् प्राक् विहितेषु अर्थेषु (प्रागिवीयेषु अर्थेषु); स च प्रत्ययः टेः प्राक् एव तिष्ठति न तु परतः। अयं कप्रत्ययस्य अपवादः। तिङन्तात् यथा, जल्पति इत्यस्मात् अकच्—टेः प्राक् अस्य स्थितिस्तेन जल्पत् अकच इ इति परिस्थितिः, ततः जल्पतकि इति रूपम्। अव्ययात् यथा—उच्चैः—इत्यस्मात् अकच्—तेन उच्च अकच ऐः इति स्थितिस्ततः = उच्चकैः इत्येव। सर्वनाम्नः—सर्वे इति अस्मात् अकच्—तेन सर्व अकच ए इति स्थितिस्ततः सर्वके इति।

## २०१४। कस्यचदः ॥ ५।३।७२ ॥

## दी—। कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच् च।

The final ककार of indeclinables is replaced by दकार when the aforesaid suffix अकच is attached to them.

मित—। "कस्य" ककारस्य स्थाने "च" अकच्प्रत्ययसन्नियोगेन "दः" द इति आदेशो भवति।

ननु कस्य ककारस्य इति चेत्?—अव्ययस्य एव नतु सर्वनाम्नः—ककारान्तस्य सर्वनाम्नः असम्भवात्। ककारान्तस्य अव्ययस्य कस्थाने द इति भवति अकच्प्रत्यय-सन्नियोगेन—इति सरलार्थः। धिक् इति कान्तम् अव्ययम्। अस्मात् अकच—ध

अकच इक इतिस्थितिः ; अनेन अन्तिमस्य कस्य स्थाने इः—तेन ध अक इट् इति ; ततः धकिट् इति स्थितिः ; "वावसाने" इति (८।४।५६) सूत्रेण धकित् इत्यपिरूपम्।

२०१५। अज्ञाते ॥ ५।३।७३ ॥

दी—। **कस्यायमश्वोऽश्वकः। उच्चकैः। नीचकैः। सर्व्वके। विश्वके।**

Any suitable suffix (falling within the category of प्रागिवीय) may be affixed to words (including the तिङन्त forms), to denote something which is not particularly known (अज्ञाते अर्थे)।

मित—। "अज्ञातः" इत्यनेन विशेषेण अज्ञातः—सामान्येन तु ज्ञातः इति बोध्यम्। "अज्ञाते" विशेषेण अपरिचिते अर्थे वर्त्तमानात् प्रातिपदिकात् तथा तिङन्तादपि स्वार्थे यथायोग्यः प्रागिवीयः प्रत्ययः स्यात्। कस्य अयम् अश्वः अज्ञातः—अतएव अत्र अश्वशब्दात् कप्रत्ययः—तेन अश्वकः इति रूपम्। अश्वः इति स्वेन रूपेण ज्ञातः—परम् कस्य अयं अश्वः इति स्वस्वामिसम्बन्धेन अज्ञातः। अतएव स्वेन रूपेण सामान्यतः ज्ञाते, स्वस्वामिसम्बन्धेन विशेषेण अज्ञाते खलु अर्थे कप्रत्ययो विधीयते। उच्चैः इति अव्ययम्। अत्र अज्ञाते इति यथायोगम् अज्ञातता विज्ञेया। अस्मात् "अव्यय सर्वनाम्नामकच प्राकटेः" (५।३।७१) इति अकच।

दी—। **ओकार—सकार—भकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्॥ युवकयोः। आवकयोः। युष्मकासु। अस्मकासु। युष्मकाभिः। अस्मकाभिः। ओकारेत्यादि किम्? त्वयका। मयका।**

Before any सुबन्त suffix beginning with ओकार, सकार or भकार, the suffix अकच is placed before the टि portion of any pronoun.

मित—। यस्य सुप्प्रत्ययस्य आदौ ओकारस्तिष्ठति, सकारो भकारोवा तस्मिन् सुपि परतः सर्वनामप्रातिपदिकानां टेः प्रागेव अकच भवति। ओकारादौ सुपि

यथा—ओस्प्रत्ययः। युष्मद् शब्दस्य षष्ठ्यां सप्तम्यां द्विवचने—युवयोः इति रूपं स्यात्। "युवावौ द्विवचने" इति (७।२।९२) युव इति आदेशः। युव ओस् इति स्थितिः। ततः अकच्—तेन युव् अक् अ—ओस् इति स्थितिः। टेः प्राक् अकच्। ततः युवक ओस् इति। ततः योऽचि (७।२।८९) इति यकारादेशः—तेन युवकय् ओस् इति तथा सति युवकयोः इति रूपम्। एवं अन्यत्र। सकारादौ सुपि परे सर्व्वनाम्नः प्रातिपदिकस्य टेः प्राक् अकच् यथा—युष्मद्शब्दस्य सुप इति सप्तमीबहुवचन-विभक्तौ युष्मद् सुप इति स्थितिः। ततः युष्मदस्मदोरनादेशे (७।२।८६) इति युष्मा सु इतिस्थितिः ततः अकच—तेन युष्म अक आ—सु इति। ततः युष्मकासु इति रूपम्। एवं भकारादौ सुपि परे सर्व्वनाम्नः प्रातिपदिकस्य टेः प्राक् अकच। ओकार सकार भकारसुपि इति किम्? एभ्यः अन्यतरस्याम् विभक्तौ परतः सुबन्तस्य एव टेः प्राक् अकच।

टी—। अकच्प्रकरणे तूष्णीमः काम् वक्तव्यः॥ मित्वा-दन्त्यादचः परः। तूष्णीकाम् आस्ते।

The suffix काम्—equivalent to the suffix अकच is added to the indeclinable तूष्णीम्। Now see Tika.

मित—। तूष्णीम् इति अव्ययात् काम् इति प्रत्ययो भवति अकच प्रत्ययस्यैवार्थ, अकचोऽपवादः इति। काम् इति मित्—अतएव "मिदचोऽन्त्यात् परः" (१।१।४७) इति सूत्रेण अन्त्यात् अचः परतस्तस्य स्थितिः—तेन तूष्णी काम् म् इति स्थितिस्ततः तूष्णीकाम् इति रूपं, तूष्णीकाम् आस्ते, तूष्णीकां तिष्ठति।

टी—। शीले को मलोपश्च॥ तूष्णींशीलः तूष्णीकः। पचतकि। जल्पतकि। धकित्। हिरकुत्।

In the sense of तूष्णींशील (habitually taciturn) the suffix क is affixed to तूष्णीम्, the मकार of which elides in this case.

२०१६। कुत्सिते॥ ५।३।७४॥

टी—। कुत्सितोऽश्वः अश्वकः।

Any suitable suffix may be added to words to imply the blamablity ( censurablity—censure ) of the objects expressed by the said words.

मित—। कुत्सिते निन्दिते गर्हित इति यावत्। पदार्थस्य कुत्सितत्व द्योतयितुम् प्रातिपदिकात् यथायोग्यः प्रागिवीयः प्रत्ययः स्यात्। कुत्सितोऽश्व अश्वकः।

२०१७। संज्ञायां कन्॥ ५।३।७५॥

दी—। कुत्सिते कन् स्यात्तदन्तेन चेत् संज्ञा गम्यते। शूद्रकः। राधकः। स्वरार्थं वचनम्।

The suffix कन् instead of क, is attached to words to imply censure, provided the word thus formed, stands as a proper noun. कन् in place of क is for स्वर।

मित—। कुत्सितत्व द्योतयितुम् प्रातिपदिकात् कन्प्रत्ययः स्यात्, प्रत्ययान्तेन पदेन चेत् कस्यचित् संज्ञा गम्यते। कप्रत्ययस्य वाधा। कुत्सितो शूद्रोऽयम् इति शूद्रकः। अयं कस्यचित् नाम।

ननु कप्रत्ययेनैव इष्टसिद्धौ किमर्थं पुनरपि कन्प्रत्ययविधानमिति चेत्—समाधत्ते "स्वरार्थं वचनम्" इत्यनेन—स्वर प्रकरणे अस्य उपयोगिता अस्ति।

२०१८। अनुकम्पायाम्॥ ५।३।७६॥

दी—। पुत्रकः। अनुकम्पितः पुत्रः इत्यर्थः।

Any suitable suffix is to be added towords to imply that the objects expressed by the said words are objects of compassion.

मित—। कारुण्येन अभ्युपपत्तिः परस्य=अनुकम्पा इति काशिका। तस्यां अनुकम्पायां गम्यमानायां सुवन्तात् तिङन्ताच्च यथाविहितं प्रत्ययो भवति; अनुकम्पितः पुत्र—पुत्रकः, कप्रत्ययः; एवं अनुकम्पितो वत्सः—वत्सकः, बुभुक्षितकः। तिङन्तात् यथा—विश्वसितकि, स्वपितकि—आभ्याम् अकच।

२०१८। नीतौ च तद्युक्तात्॥ ५।३।७७॥

टी—। साम-दानादिरूपा सा नीतिस्तस्यां गम्यमानायां अनुकम्पायुक्तात् क-प्रत्ययः स्यात्॥ हन्त ते धानकाः। गुड़काः। एहकि। अद्धकि। पूर्वेण अनुकम्प्यमानात् प्रत्ययः। अनेन तु परम्परासम्बन्धेऽपीति विशेषः।

Suitable suffixes are added to words—which denote objects of compassion provided any one of the (four) means, (or ways or expedients), is therely implied. By the prior sutra क is attached to the person who is an object of pity, but this rule directs क after an article that is being given to an अनुकम्प्यमान person.

मित—। नीतौ इति। नीतिश्च चतुर्व्विधा—सामो दानं भेदो दण्डश्च। "नीतौ" सामादीनाम् अन्यतरस्याम् गम्यमानयाम "च तद्युक्तात्" अनुकम्पा-सनाथात् प्रातिपदिकात् यथाविहितम् प्रत्ययः (यथा कप्रत्ययः) स्यात्। हन्त ते धानकाः। हन्तते तिलकाः। हन्तते गुड़काः। एषु कप्रत्ययः। एहि इत्यर्थे कः—एहकि। अद्धि इत्यर्थे कः—अद्धकि। अत्र तिङन्तात्प्रत्ययः। सर्व्वत्र दानम् गम्यते—अनुकम्पा च। हे दरिद्र अत्र एहकि, अन्नम् अस्तु। अनुकम्प्यमानः अत्र दानेन तोष्यते।

ननु पूर्व्वेणैव सिद्धे किमर्थमिदमिति चेत् नैवम्। पूर्व्वसूत्रे यो जनः अनुकम्प्यमानः तस्मात् एव प्रत्यय इष्यते। अत्र सूत्रे तु अनुकम्प्यमानाय यत् वस्तु दीयते, तस्मात् एव प्रत्ययो विधीयते। अतएव पूर्व्वसूत्रे अनुकम्प्यमानवस्तुनः साक्षादेव प्रत्ययः अत्र तु परम्परासम्बन्धे इति सूत्रार्थयोर्विशेषः। एवम् अनुकम्प्यमानस्य वस्तुनः सम्बन्धी यो भेदवाचको दानवाचकः साम-वाचको वा शब्दस्तस्मादपि अनयैव रीत्या कप्रत्ययः स्यात्।

२०२०। बह्वचो मनुष्यनाम्नष्ठज्वा॥ ५।३।७८॥

टी—। पूर्वसूत्रद्वयविषये।

• The suffix ठच् is added, in the aforesaid sense, to words possessed of more than two vowels provided they stand for human names.

मित—। "बह्वचः" बहु-स्वर-विशिष्टात् प्रातिपदिकात् "मनुष्यनाम्नः" मनुष्य-नामधेयात् "ठच्" इति प्रत्ययो "वा" विकल्पेन भवति, अनुकम्पायां तथा नीतौ च गम्यमानायाम्। उदाहरणं तु पश्चात् द्रष्टव्यम्।

२०२१। घनिलचौ च ॥ ५।३।७९ ॥

टी—। तत्रैव।

In the aforesaid sense, two other suffixes घन् and इलच् may also be added.

मित—। पूर्वोक्ते विषये घन् इलच् इति एतौ प्रत्ययौ अपि स्याताम्। अतएव अस्मिन् विषये चत्वारः प्रत्ययाः-सुः—(१) ठच् (२) घन् (३) इलच् (४) सूत्रस्थ-चकार बलात् यथाप्राप्तमपि प्रत्ययः स्यादेव। उदाहरणं पश्चात् द्रष्टव्यम्।

क-प्रत्ययार्थस्य काचित् कारिका अस्ति सच अस्माभिरत्र समुद्ध्रियते। "अल्पाज्ञात-दया ह्रस्व कुत्सास्वक् स्यात् प्रयोगतः। अनुकम्पायुताश्नीतौ बहूनां जातिप्रश्नके" इति। अत्र अक् = क इत्यर्थः—श्रीरामतर्कवागीशकृतायाम् मुग्धबोध-टीकायाम् इयं दृश्यते।

२०२२। ठाजादावूर्ध्वं म् द्वितीयादचः ॥ ५।३।८३ ॥

टी—। अस्मिन्प्रकरणे यष्टोऽजादिप्रत्ययस्य, तस्मिन्प्रत्यये परे प्रकृतेर्द्वितीयादचः उर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तो देविकः। देवियः। देविलः। देवदत्तकः। अनुकम्पितो वायुदत्तो वायुदत्तकः। ठग्रहणमुक्तो द्वितीयत्वे क-विधानार्थम्। वायुकः। पितृकः।

Before the suffix ठ or any other suffix—beginning with a vowel (such as इलच्, or इय (घ) the base (to which these suffixes are to be attached ), lose its portion that comes after the second vowel of its body ( the body of the base )—so far as this chapter is concerned Here ठ only in the sutra in place of ठच्, indicates direction of क ( after 2nd उक् vowel ) in place of usual इक of ठक् ; see the rule" इसुसु क्—" ( ante ).

मित—। ठ अजादौ ऊर्द्ध्वम् द्वितीयात् अचः इति सूत्रच्छेदः। अस्मिन्प्रकरणे "ठ" इति प्रत्यये परे तथा "अजादौ" येषां प्रत्ययानाम् आदौ अच् तिष्ठति, तादृशे च प्रत्यये परतः, "द्वितीयादचः" प्रकृते यो द्वितीयः स्वरवर्णस्तस्मादुत्तरतः योऽंशः प्रकृतेरस्ति, तदंशो लुप्यते। अस्मिन् प्रकरणे क-प्रत्ययस्तथा अनुकम्पायां नीतौ च विहितं प्रत्ययान्तरं यत्र प्रकरणे विद्यते तस्मिन् प्रकरणे इत्यर्थः। अनुकम्पितः देवदत्तः इति ठच् प्रत्ययः "बह्वचः—" (५।३।७८) इति सूत्रेण ; ठच् स्थाने इक इति स्यात्। देवदत्त इक इति स्थितिः। अनेन द्वितीयस्वरवर्णात् उत्तरस्य दत्त इत्यंशस्य लोपः तेन देव इक इति स्थितिः—ततः देविकः इति। "यस्येति च" ( ६।४।१४८ ) इति सूत्रेण देव इत्यस्य अन्त्यस्य अकारस्यलोपः। पचे घन् इलच् इति प्रत्ययौ। देवदत्तशब्दात् घन् घनस्थाने इय। पूर्ववत् प्रक्रिया—तेन देवियः इति। देवदत्तशब्दात् इलच पूर्ववत् प्रक्रिया—तेन देविल इति रूपम्। पचे यथाप्राप्तं कप्रत्ययः—तत्र देवदत्तकः इति। एवम् अनुकम्पितः यज्ञदत्तः—इति क—यज्ञदत्तकः। घन्—यज्ञियः। इलच्—यज्ञिलः। ठच्—यज्ञिकः; अनुकम्पितो वायुदत्तः इति कप्रत्ययः—वायुदत्तकः।

अत्र सूत्रे ठच् इति अगृहीत्वा ठ इति गृहीतम्। तत् कथमिति चेत् समाधत्ते—"ठग्रहणम् उकौ द्वितीयत्वे" इति। अनेन ठग्रहणेन ज्ञाप्यते यत् यदा उक् एव द्वितीयस्वरवर्णत्वेन गृह्यते, तदा तदनन्तरम् "ठ" = इक इति अस्य प्रत्ययस्य स्थाने क इत्यादेशः जायते न तु इकः [इसुसुक्तान्तात् इति सूत्रं द्रष्टव्यम्]। यथा अनुकम्पितो

वायुदत्तः इति वायुदत्तशब्दात् इक इति प्रत्ययः। द्वितीयस्वरात् उत्तरस्य भागस्य लोपः—इकप्रत्ययस्थाने क इति आदेशः तथा सति वायुकः इति रूपम्। एवं अनुकम्पितः पितृदत्तः इति कप्रत्ययः—पितृदत्तकः। पक्षे घन् इलच् इक = पितृकः—पूर्ववत् प्रक्रिया।

ननु वह्वचो मनुष्यनाम्नष्ठज्वा इति सूत्रे वह्वचः इति किम्? अनुकम्पितो दत्तः इति दत्तकः, अनुकम्पितो गुप्तः इति गुप्तकः। अत्र उदाहरणद्वये प्रकृतेर्द्व्यच्त्वात् न ठच् घन् इलच् वा—प्रत्युत क एव। मनुष्यनाम्नः इति किम्? अनुकम्पितः भद्रबाहुः भद्रबाहुकः। अनुकम्पितो भद्रबाहुः भद्रबाहुकः। एतौ न मनुष्यनाम तेन नैव ठच्, घन्, इलच् वा। प्रत्युत क एव।

**टी—। चतुर्थादनच ऊर्ध्वस्य लोपो वाच्यः।**

If the first member of the base contains four vowels, then the portion coming after the fourth vowel elides before ठच् or other suffix beginning with a vowel.

मित—। यदि प्रकृतौ पूर्वपदे चत्वारः स्वरवर्णास्तिष्ठन्ति तर्हि चतुर्थात् स्वरवर्णात् उत्तरस्य अंशस्य लोपः स्यात् एतत् प्रकरणविहिते ठचि अजादौ च प्रत्यये परतः। अनुकम्पितः बृहस्पतिदत्तक इति ठच् बृहस्पतिकः। घन् बृहस्पतियः। इलच् बृहस्पतिलः। पक्षे यथाप्राप्तं कः बृहस्पतिदत्तकः॥

**टी—। अनजादौ च विभाषा लोपो वक्तव्यः। देवदत्तकः। देवकः।**

The portion of the base which is to elide before any suffix beginning with a vowel, optionally elides before a suffix that does not begin with a vowel.

मित— अस्मिन् प्रकरणे अजादौ प्रत्यये परतः प्रकृतेर्यस्य अंशस्य लोपो भवति, तस्य अंशस्य "अनजादौ" प्रत्यये परे "च" "विभाषा" विकल्पेन "लोपः" स्यात् इति "वक्तव्यः" वाच्यः। अनुकम्पितो देवदत्तः इति कप्रत्ययः—तेन देवदत्तकः—देवकः।

**दी—। लोपः पूर्वपदस्य च ॥ दत्तिकः। दत्तियः। दत्तिलः। दत्तकः।**

Before the suffix ठच् or any other suffix of this class whether beginning with vowel or not, the first member of a compound word may elide.

मित—। ठचि अजादौ तथा अनजादौ च एतत्-प्रकरणीये प्रत्यये परतः पूर्वपदस्यापि लोपः स्यात्; अनुकम्पितो देवदत्तः इति कप्रत्ययः। पूर्वपदस्य लोपः दत्तकः। ठच् दत्तिकः। इलच् दत्तिलः। घन् दत्तियः।

**दी—। विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः॥ देवदत्तः। दत्तः। देवः। सत्यभामा। भामा। सत्या।**

Either the first member or the last member of a compound word may optionally elide without any suffix being attached to it provided the aforesaid sense is thereby implied.

मित—। अनुकम्पायां गम्यमानायाम् प्रत्ययं विनापि पूर्वपदस्य उत्तरपदस्य वा लोपः स्यात्। अनुकम्पितो देवदत्त इति देवदत्तः। अत्र न प्रत्ययः। प्रत्ययं विना अपि अयमेव भवितुम् अर्हति। "विनाऽपि प्रत्ययम्" इति वचनात्। दत्तः—अत्र प्रत्ययाभावः पूर्वपदलोपश्च। देवः—अत्र प्रत्ययाभावः उत्तरपदलोपश्च। एवं सत्यभामा-अनुकम्पायां गम्यमानायां प्रत्ययं विनाऽपि स्वरूपेण अवस्थितिः। भामा अत्र पूर्वपद-लोपः। सत्या अत्र उत्तरपदलोपः। उत्तरपदलोपे सति सत्य इति तिष्ठति। परं अभिधेयस्य स्त्रीत्वात् अकारान्त-स्त्रीलिङ्गशब्दस्य च अभावात् स्त्रियां सत्या इति "अजाद्यतष्टाप्" (४।१।४) इति सूत्रेण सिध्यति। अननुकम्पायामपि एतद्वार्त्तिकं लोके प्रयुज्यते। तथा च भासः—"बलस्य त्वां भुजौ पाताम्" (बलस्य=बलदेवस्य), यद्वा अपि "अवानुगोदम्" इत्यादि।

**दी—। उवर्णात्त इलस्य च ॥ भानुदत्तः। भानुलः।**

The इ of the suffix इलच् when coming after उवर्ण, elides; or इलच् after उवर्ण, is replaced by ल।

दी— । ऋवर्णादपि ॥ सवित्रियः । सवितृलः ।

The aforesaid rule holds good with reference to words ending in ऋवर्ण।

दी— । चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ॥१॥

Before suffix whether beginning with a vowel or a consonant, the second member of the base coming after the fourth vowel elides optionally; the first member of the base—may also elide in stead of the last member ( the member after the fourth vowel); such rule holds good even where there no affix is added; whereas the इलच् coming after a base ending in उवर्ण is replaced by ल।

मित— । चतुर्थात् इति । "अनजादौ च" येषां प्रत्ययानाम् आदौ अचोऽन्यः वर्णोऽस्ति तादृशे प्रत्यये परतः—यथा अप्रत्यये परे । एवम् चकारात् अजादौ च परे येषां प्रत्ययानाम् आदौ अच् तिष्ठति तादृशे अपि प्रत्यये यथा—ठचि, घनि, इलचि वा, "चतुर्थात्" चतुर्थात् अचः ऊर्द्धस्य प्रकृतेः अंशस्य "लोपः" स्याद्वा । "पूर्व्वपदस्य च" पक्षे प्रकृतेः पूर्व्वपदस्यापि लोपः स्यात्; किञ्च "अप्रत्यये" विनाऽपि प्रत्ययं—यत्र प्रत्ययो न विधीयते तादृशेऽपि स्थले इत्यर्थः "तथैवेष्टः" तथा एव अभिप्रेतः, पूर्व्वपदस्य वा लोपः स्यात् पक्षे चतुर्थादूर्द्धस्य वा लोपः स्यादित्यर्थः । अपिच "उवर्णात्" उवर्णान्तात् प्रातिपदिकात् उत्तरस्य "इलस्य" "च" "लः" स्यादिति कारिकार्थः ।

२०२३ । प्राचामुपादेरडज्वुचौ च ॥ ५।३।८० ॥

दी— । उपशब्दपूर्वात् प्रातिपदिकात् पूर्व-विषये अडच्

वुच् एतौ स्तः। चाद् यथाप्राप्तम्। प्राचां ग्रहणं पूजार्थम्। अनुकम्पित उपेन्द्रदत्तः—उपड़ः। उपकः। उपिकः। उपियः। उपिलः। उपेन्द्रदत्तकः। षड़् रूपाणि।

According to old professors the suffix अडच् and वुच् are optionally also attached to words the first portion of which begins with उप, in the aforesaid sense.

मित—। प्राचां इति प्राचीनानां वैयाकरणानां मतमिदम्। अत आह—"प्राचाम् ग्रहणं पूजार्थम्"। पूर्ववत् सर्वम् अत्र सूत्रे अनुवर्त्तते—यथा अनुकम्पायाम्, नीतौ च तद्युक्तात्, वह्वचो मनुष्यनाम्नष्ठज्वा, घनिलचौ च इति। अतएव सूत्रस्य अयमर्थः—"प्राचां" प्राचीनानां वैयाकरणानाम् मते तु "उपादेः" उपपूर्व्वकात् प्रातिपदिकात्—(यस्य प्रातिपदिकस्य पूर्व्वभागे उपइति दृश्यते तस्मादित्यर्थः), वह्वचो मनुष्यनाम्नः अडच् वुच् इति एतौ प्रत्ययौ स्याताम्, तथा सूत्रस्य चकारवलात् यथाप्राप्तम्=घन् इलच् ठच् क इति एतेऽपि भवन्ति, अनुकम्पायाम् गम्यमानायाम् नीतौ च। अनुकम्पित उपेन्द्रदत्तः इति वाक्ये—अडच् प्रत्ययः; उपेन्द्रदत्त—अडच् इति स्थितिः। "ठाजा—" (५।३।८३) इति सूत्रेण उप इति द्वितीयादचः परस्य लोपः तेनः इन्द्रदत्तः इति लुप्यते उप इति तिष्ठति। उप अडच् इति स्थितिः "यस्येति च" (६।४।१४८) इत्यकारलोपस्तेन उपड़ः इति रूपम्। उपेन्द्रदत्तात् वुच् इति प्रत्ययः। पूर्ववत् लोपो वक्तव्यः इति लोपः—तेन उप वुच् इति स्थितिः। वुच् स्थाने अकस्तेन उपकः इति पूर्ववत् सिद्धम्। उपेन्द्रदत्तात् ठच्। "ठाजा—" इति लोपस्तेन उप ठच् इति तिष्ठति। ततः उप इक इति। ततः "यस्येति च" (६।४।१४८) इति पूर्व्वस्य अकारस्य लोपः—तेन उपिकः इति रूपम्। घन्प्रत्ययः—तेन उपेन्द्रदत्त घन् इति। पूर्ववत् लोपः—तेन उपइय इति—ततः उपिय इति। इलच्—पूर्ववत् लोपः—तेन उपिलः। क-प्रत्ययः—तेन उपेन्द्रदत्तकः। अनजादौ विभाषा लोपस्तेन लोपे सति उपक इत्यपि रूपम्। षड़् रूपाणि एकत्रीकृत्य लिख्यन्ते मया—

उपेन्द्रदत्तात् कः—उपेन्द्रदत्तकः ; उपकः ( अनजादौ च विभाषा लोपः )।

" वुच्—उपकः। ( अन्तोदात्तं रूपम् )।

" ठच्—उपिकः।

" घन्—उपियः।

" इलच्—उपिलः।

" अडच्—उपडः।

स्वरभेदम् अङ्गीकृत्य सप्त एव रूपाणि—अन्यथा षट् रूपाणि। कप्रत्ययान्त उपकः आद्युदात्तः ; वुच प्रत्ययान्त उपकः अन्तोदात्तः।

२०२४। जातिनाम्नः कन् ॥ ५।३।८१ ॥

**टी—। मनुष्यनाम्न इत्येव। जातिशब्दो यो मनुष्यनामधेयस्तस्मात् कन् स्यात् अनुकम्पायाम् नीतौ च॥ सिंहकः। शरभकः। रासभकः।**

The suffix कन् is attached to words which originally standing for class-names, are used to stand for the name of a human being.

मित—। "जातिशब्दः" जातिवाचकः शब्दः यः खलु मनुष्यस्य कस्यचित् नामनि व्यवह्रियते ; तस्मात् शब्दात् अनुकम्पायाम् नीतौ च कन् प्रत्ययः स्यात् ; यथा सिंह इति कश्चित् जातिवाचकः शब्दः ; स तु कस्यचित् जनस्य नाम ; अतएव अनुकम्पितः सिंह इति वाक्ये कन् स्यात्—सिंहकः। अनुकम्पितो व्याघ्रः व्याघ्रकः। अनुकम्पितः शरभः शरभकः। अनुकम्पितः रासभः रासभकः। काशिकाकारस्तु सिंह व्याघ्र इति शब्दाभ्याम् इलच् प्रत्ययमपि इच्छति यथा—सिंहिलः। व्याघ्रिलः।

**दो—। द्वितीयं सन्ध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः॥ अनुकम्पितः कहोड़ः कहिकः।**

In the case of the elision of a word's portion after the

second vowel, the second vowel too elides, provided it be a compound vowel ( i. e. एच् vowel ).

मित—। "ठाजादावूर्ध्वम् द्वितीयादचः (५।३।८३ ) इति सूत्रेण यदा द्वितीयादचः ऊर्ध्वस्य लोपप्रसङ्गः स्यात्, तदा द्वितीयोऽच् सन्ध्यक्षरं ( सन्धिजातम् स्वरवर्णम् ) चेत् तस्यापि लोपः। [ 'सन्ध्यक्षरम्' इत्यनेन एच्वर्णः गृह्यते। एचः सन्ध्यक्षरमिति प्राचां संज्ञा ]। अनुकम्पितः कहोड़ः इति वाक्ये "बह्वचो—" ( ५।३।७८ ) इति ठच्। "ठाजादा—" ( ५।३।८३ ) इति द्वितीयादचः ऊर्ध्वस्य लोपप्रसङ्गः। परम् अत्र यो द्वितीयोऽच् ओकारः स तु सन्ध्यक्षरमेव। अकारेण सार्द्धम् उकारस्य सन्धिम् कृत्वा ओकारम् उत्पादयन्ति वैयाकरणाः। अतएव अत्र ओकारस्य अपि लोपस्तेन आदौ कहोड़ ठच् इति स्थितिस्ततः कहोड़ इक इति। ततः कह् इक इति ततः कहिक इति रूपम्।

दी—। **एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः॥ वागाशीर्दत्तः वाचिकः।**

With reference to compound words, the first member of which contains a single vowel only, the first member only remains and the other portion elides.

मित—। येषां समस्तपदानां पूर्वपदम् एकस्वरविशिष्टम् भवति, एतत्प्रकरणविहितस्य लोपस्य प्रसङ्गे सति, तेषाम् उत्तरपदस्य एव लोपो भवति। अनुकम्पितः वागाशीर्दत्त इति ठच्। वाक् इति पूर्वपदे एकएव स्वरवर्णोयुक्तः अतएव अस्मात् उत्तरस्य लोपो भवति। तथा सति वाक् इक इति स्थितिः। ततः वाच् इक इतिस्थितस्ततः वाचिक इतिरूपम्।

ननु कथम् वाच् इक इति चेत्—उच्यते। "यचिभम्" (१।४।१८ ) इति वाक् इत्यस्य भसंज्ञायाम् सत्याम् "झलां जशोऽन्ते" ( ८।२।३९ ) इति जश्त्वं न—"चोः कुः" ( ८।२।३० ) इति कुत्वमपि न; अतएव वाच् इकइति स्थितिर्भवितुमर्हति। ततः वाचिक इतिरूपम्। एवम् अनुकम्पितः त्वगाशीर्दत्त इतित्वचिकः।

दी—। कथं षड्ङ्गुलिदत्तः षड्किक इति ? षषष्ठाजादि-वचनात् सिद्धम्। (वा)।

How the form षड्किक is established with इक ( ठ ) attached to षड्ङ्गुलिदत्त ? This is owing to the varttika that the member after षष् elides when ठ or अजादि affixes follow herein.

२०२५। शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ५।३।८४ ॥

दी—। एषां मनुष्यनाम्नां ठाजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात्॥ पूर्वस्य अपवादः। अनुकम्पितः शेवलदत्तः शेवलिकः। शेवलियः। शेवलिलः। सुपरिकः। विशालिकः। वरुणिकः। अर्यमिकः।

The words शेवल सुपरि विशाल वरुण and अर्यमा, when standing for humar names, elide the portion after the third vowel, before the suffix ठच and others—beginning with a vowel. This nullifies prior rules.

मित—। शेवल सुपरि विशाल वरुण अर्यमा इति एतेषां मनुष्यनाम्नां ठचि अजादौ च प्रत्यये परतः तृतीयादचः एव ऊर्ध्वं लुप्यते—न तु द्वितीयादचः। अत आह—"पूर्वस्यापवादः"। अन्यत् सुगमम्॥

२०२६। अजिनान्तस्योत्तरपदलोपश्च ॥ ५।३।८२ ॥

दी—। अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन् तस्य चोत्तरपदलोपः। अनुकम्पितो व्याघ्राजिनः व्याघ्रकः। सिंहकः।

The suffix कन् is attached to words ending in अजिन and standing for humar names—to imply endearment and then the उत्तरपद ( i. e. अजिन here ) elides.

मित—। संज्ञायां कन् तथा बह्वचो मनुष्यनाम्न इत्यस्मात् मनुष्यनाम्न इति चानुवर्त्तते। अजिनम् इति येषां प्रातिपदिकानाम् अन्ते तिष्ठति, तादृशेभ्यः मनुष्यनामभ्यः प्रातिपदिकेभ्यः कन्प्रत्ययो भवति संज्ञायाम्; प्रत्ययसन्नियोगेन अजिन इति अंशस्य लोपोऽपि जायते। व्याघ्राजिनः इति कस्यचित् मनुष्यस्य नाम। सोऽनुकम्पितः इति व्याघ्रकः। सिंहाजिनः इति कश्चित् मनुष्यः। अनुकम्पितः सिंहाजिनः इति सिंहकः। उभयत्र कन्—उत्तरपदलोपश्च।

## २०२७। अल्पे॥ ५।३।८३॥

## टी—। अल्पं तैलं तैलकम्।

Propersuffixes (such as क, अकच्) are attached to words to imply scantiness ( or slightness ) of the objects expressed by the said words.

मित—। अल्प इति परिमाणार्थद्योतकः शब्दः। एतत् प्रकृतेरेव विशेषणम्। पदार्थस्य अल्पत्वे अभिधेये सति, तत्पदार्थवाचकात् प्रातिपदिकात् यथाविहितं प्रत्ययाः स्युः। अल्पं तैलं तैलकम्। अल्पं घृतं घृतकम्। एवं सर्वकम्; विश्वकम्। तिङन्तादपि प्रत्यय इष्यते—पततकि, जल्पतकि। अव्ययादपि—नीचकैः; उच्चकैः।

## २०२८। ह्रस्वे॥ ५।३।८४॥

## टी—। ह्रस्वो वृक्षः वृक्षकः।

Proper suffixes (such as क etc) are attached to words to to imply the shortness (short stature) of the things expressed by the said words.

मित—। ह्रस्वःदीर्घप्रतियोगी। एतदपि प्रकृतेरेव विशेषणम्। पदार्थस्य ह्रस्वत्वे अभिधेये सति तत्पदार्थवाचकात् प्रातिपदिकात् यथायोग्यं प्रत्ययाः स्युः। ह्रस्वः वृक्षः वृक्षकः। [ वृक्षकः—a plant ], एवं ह्रस्वः प्लक्षः प्लक्षकः।

२०२९ । संज्ञायां कन् ॥ ५।३।८७ ॥

दी— । ह्रस्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् । पूर्वस्य अपवादः । वंशकः । वेणुकः ।

The suffix कन् is added to words to imply their denomination due to shortness ( short stature ).

मित— । "संज्ञायाम्" ह्रस्वत्वमेव यस्याः संज्ञायाः हेतुत्वम् गच्छति, तद्दस्याम् गम्यमानायाम् प्रातिपदिकात् कन् प्रत्ययो भवति ; विधिरेषःपूर्व्वस्य अपवादः । वंशकः—ह्रस्वो वंशविशेषः । वेणुकः—ह्रस्वः वेणुविशेषः । एवं ह्रस्वः दण्डविशेषः दण्डकः ।

२०३० । कुटीशमीशुण्डाभ्यो रः ॥ ५।३।८८ ॥

दी— । ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ।

The suffix र is added to words कुटी शमी and शुण्डा to imply their short stature.

मित— । ह्रस्वत्वे गम्यमाने सति कुटी शमी शुण्डा इति एतेभ्यः रप्रत्ययो भवति । कप्रत्ययस्य अपवादः । ह्रस्वा कुटी कुटीरः । ह्रस्वा शमी शमीरः । ह्रस्वा शुण्डा—शुण्डारः ।

ननु प्रत्ययानाम् स्वार्थिकत्वेपि कथं स्त्रीलिङ्गान्तानामेषां पुंस्त्वमिति चेत्—उच्यते । "स्वार्थिकत्वेऽपि पुंलिङ्गता लोकाश्रयत्वाल्लिङ्गस्ये"ति काशिका । तथाहि "क्वचित् स्वार्थिकाःप्रकृतितो लिङ्गवचनानि अतिक्रामन्ति" इति ।

२०३१ । कुत्वा डुपच् ॥ ५।३।८९ ॥

दी— । ह्रस्वा कुतूः कुतुपः । "कुतूः कृत्तेः स्नेहपात्रम्" ह्रस्वा सा कुतुपः पुमान् ॥

The suffix डुपच् is attached to the word कुतू—to imply its short stature ( the diminutive form of कुतू ) ।

मित—। कुतुरित्यावपनस्याख्या इति काशिका। "कुतूः कृत्तेः स्नेहपात्रम्"। कृत्तिः पशुचर्म्म। कृत्तेः स्नेहपात्रम्—चर्म्मस्य तैलादिभाजनम् इत्यर्थः। ह्रस्वत्वे गम्यमाने कुतूशब्दात् डुपच् इति प्रत्ययो भवति। ह्रस्वा कुतूरिति डुपच्; डित्वात् टेर्लोपः। चित्वात् अन्तोदात्तत्वम्। तेन कुतुप इति रूपम्। कुतुपः इति ह्रस्वं चर्म्म-निर्म्मितम् तैलादिपात्रम्।

२०३२। **कासूगोणीभ्यां ष्टरच् ॥ ५।३।९० ॥**

**टी—। आयुधविशेषः कासूः। ह्रस्वा सा कासूतरी। गोणीतरी।**

In the aforesaid sense, the suffix ष्टरच् is attached to the words कासू and गोणी।

मित—। कासू गोणी इति एताभ्याम् ष्टरच् प्रत्ययो भवति एतयोर्ह्रस्वत्वे गम्यमाने सति। कासू आयुधविशेषः। ह्रस्वा कासूः इतिष्टरच्—कासूतरी। ह्रस्वा गोणी इति गोणीतरी। अयं प्रत्ययः कप्रत्ययस्य अपवादः। प्रत्ययस्य षित्वात् स्त्रियाम् ङीष्।

२०३३। **वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥ ५।३।९१ ॥**

**टी—। वत्सतरः। द्वितीयं वयः प्राप्तः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तिनिमित्ततनुत्वे एवायम्।**

The suffix ष्टरच् (तर) is added to वत्स उक्षन् अश्व and ऋषभ to imply theirchildhood ( i.e. feebleness due to childhood ).

मित—। ह्रस्वत्वम् इति नानुवर्त्तते। वत्स उक्षन् अश्व ऋषभ इति एतेभ्यः ष्टरच् प्रत्ययः स्यात् तनुत्वे द्योत्यमाने सति। तनुत्वं क्षीणत्वम्। कस्य तनुत्वम् अभिप्रेतमिति चेत्?—"यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशः, तस्य तनुत्वे प्रत्ययः"—इति काशिका। अयमर्थः—कश्चित् गुणः कस्मिंश्चिद्वस्तुनि विद्यमानः सन् तस्य तद्गुणनिमित्तां काञ्चित् संज्ञां जनयति। यथा श्यामतनुः श्रीकृष्णे विद्यमानः सन् तस्य

श्याम इति संज्ञाम् उत्पादयति। तादृशस्य संज्ञाजनकस्य गुणस्य तनुत्वे द्योत्यमाने सति वत्सादिभ्यः ष्टरच्प्रत्ययौ वेदितव्यः। जातस्य प्रथमावस्था वत्सः। वत्सत्वं वालत्वम्। तस्य तनुत्वे सति द्वितीयं वयः प्राप्नोति—अतएव वत्स इत्यस्मात् ष्टरच् प्रत्ययः—वत्सतरः। वत्सतरः—यो वत्सः वालत्वम् अतिक्रम्य "द्वितीयं वयः प्राप्तः" स एव। तरुणः वृषः उक्षा। तस्य उक्षत्वस्य तनुत्वे तृतीयं वयः प्राप्तः—अतएव अस्मात् ष्टरच् उक्षतरः। उक्षतरः अतिक्रान्तयौवनः वृषः। ऋषभः अनड्वान्। तस्य तनुत्वम् वार्द्धक्यजनिता भारवहने मन्दशक्तिता। अस्मात् ष्टरच् ऋषभतरः। भारवहने मन्दशक्तिको वृषः इत्यर्थः। अश्वेन अश्वायाम् उत्पन्नोऽश्वः। तस्य तनुत्वम् अन्यपितृकता—अतएव अश्वेन गर्द्दभ्याम् उत्पन्नोयो जन्तुस्तस्मिन् अभिधेये अश्वशब्दात् ष्टरच्—अश्वतरः।

"प्रवृत्ति-निमित्ततनुत्वे अयम्"—अयमेव अर्थः मया प्राक् स्फुटीकृतः। अत्र यत् तनुत्वम् कथितं तत्तु शब्दस्य प्रवृत्तिनिमित्तम्। गुण-वाचकः शब्दः गुणवति प्रवर्त्तमानः सन् संज्ञाम् जनयति। तस्य गुणस्य एव तनुत्वे अत्र प्रत्यय इष्यते। अतएव तनुत्वं गुण-वाचकस्य शब्दस्य प्रवृत्ति-निमित्तमेव। वत्सतरादौ वत्सत्वगुणः तनुत्वमेव भजन् प्रवर्त्तते इति दिक्।

## २०३४। किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ॥ ५।३।९२ ॥

**दी—। अनयोः कतरो वैष्णवः। यतरः। ततरः। महाविभाषया—कः। यः। सः।**

The suffix डतरच् is added (optionally) to the words किम् यद् and तद् to imply singling out either of the two (i. e. one out of the two).

मित—। उद्देश्यतावच्छेदकधर्म्मशून्ये सामान्यधर्म्मावच्छिन्ने विधेयताभावः निर्द्धारणम् इति नैयायिकाः। जात्या क्रियया गुणेन संज्ञया वा समुदायात् एकदेशस्य पृथक्करणम् निर्द्धारणम्। "द्वयोः" इति समुदायनिर्द्देशः। एकस्य इति निर्द्धार्य-

मायस्य निर्द्देशः। इत्थं सूत्रार्थः—"द्वयोः" द्वयोर्वस्तुनोर्मध्ये "एकस्य" "निर्द्धारणे" सति, "किं यद् तद्" इति एतेभ्यः प्रातिपदिकेभ्यः "डतरच्" इति प्रत्ययो भवति। अनयोः कः खलु वैष्णव इति वाक्ये अनयोः कतरः वैष्णवः। किमशब्दात् डतरच्। प्रत्ययस्य टित्वात् टेर्लोपः, यद्शब्दात्—यतरः। तद्शब्दात्—ततरः। अनयोस्ततर आगच्छतु। भवतोः यतरस्तत्र गच्छतु। महाविभाषया प्रत्ययः विकल्पते—तेन यः, कः, सः इत्यपि स्युर्यथा—अनयोः कः खलु वैष्णवः। भवतो यः खलु स तत्र गच्छतु।

## २०३५। वा बहूनां जातिपरिप्रश्ने डतमच्॥ ५।३।९३॥

**दी—। बहूनां मध्ये एकस्य निर्द्धारणे डतमच् वा स्यात्। जातिपरिप्रश्न इति प्रत्याख्यातम् आकरे। कतमो भवतां कठः। यतमः। ततमः। वाग्रहणम् अकजर्थम्। यकः। सकः। महाविभाषया—यः। सः।**

The suffix डतमच् is added to किम्, यद् and तत् to imply singling out of one out of many. The inclusion of जातिपरिप्रश्न in the sutra is rejected in the भाष्य। "वा" in the sutra is to allow अकच् after the pronominal bases यद्, तद् etc.

मित—। बहूनां मध्ये एकस्य निर्द्धारणे गम्यमाने सति किम्, यद्, तद् इति एतेभ्यो डतमच् प्रत्ययो भवति। भवताम् कतमः कठः। किमशब्दात् डतमच्। सूत्रे वा इति दृश्यते। सतु "अव्यय—" (५।३।७१) इति सूत्रविहितस्य अकच् प्रत्ययस्यापि विधानमत्र विकल्पेन करोति। तेन यद्शब्दात् अकच् यकः। यको भवतां कठः। तद्शब्दात् सकः—एषु सकः आगच्छतु। "ओकार सकार भकारादौ सुपि सर्व्वनाम्नष्टेः प्रागकच्" इति सुबन्तस्य प्राक् टेः अकच्, नतु प्रातिपदिकस्य। महाविभाषया प्रत्ययस्य विकल्प इति यत् पूर्व्वसूत्रे प्रोक्तम् तत् अत्रापि अनुवर्त्तते—तेन प्रत्ययविकल्पः। तथा यः, सः, कः इत्यादयः। को भवताम् कठः। यो भवताम् कठः स एव अत्र आगच्छतु।

अत्र जातिपरिप्रश्नविषये एव किमादिभ्यः प्रत्ययो विहितः। परम् "जातिपरिप्रश्न" इति आकरेभाष्ये प्रत्याख्यातम्—सार्थकताऽभावात्। कौमुदीचिन्तिनापि तदेव अनुसृतम्।

दी—। किमोऽस्मिन् विषये डतरजपि॥ कतरः।

In the aforesaid subject, the suffix डतरच् may also be added to किम्।

मित—। "अस्मिन् विषये" वहूनाम् मध्ये निर्द्धारणविषये "किमः" किम्-शब्दात् डतरच् प्रत्ययोऽपि भवति। कतरो भवतां कलापः इति। "कतर-कतमौ जातिपरिप्रश्ने" (२।१।६३) इति सूत्रे जातिपरिप्रश्ने कतरशब्दः स्वीकृतः आचार्य्येण। सोऽत्र व्युत्पादितः।

२०३६। एकाच्च प्राचाम्॥ ५।३।९४॥

दी—। डतरच् डतमच्च स्यात्। अनयोरेकतरः मैत्रः। एषामेकतमः।

The suffixes डतरच् and डतमच् may also be attached to एक in the aforesaid sense.

मित—। "प्राचां" प्राचीनानां वैयाकरणानां मते "एकात्" "च" एकशब्दादपि द्वयोरेकस्य निर्द्धारणे डतरच्, वहूनाम् एकस्य निर्द्धारणे डतमच् इति प्रत्ययौ भवतः। अनयोरेकतरः मैत्रः। एषाम् एकतमः यादवः। पूर्व्ववत् प्रत्ययस्य विकल्प इष्यते तेन अनयोरेको मैत्रः। एषामेकः यादव इत्यपि च।

२०३७। अवक्षेपणे कन्॥ ५।३।९५॥

दी—। व्याकरणकेन गर्वितः। येनेतरः कुत्स्यते तद्विषोदाहरणम्। स्वतः कुत्सितं तु 'कुत्सिते' इत्यस्य (उदाहरणम्)।

The suffix कन् is added to words to imply censure. Here the example will be when कन् is to attach to a word by

which another is condemned; but कुत्सिते कन् is to be attached when कुत्सा of one's own is implied.

मित—। अवक्षिप्यते कुत्स्यते येन तदवक्षेपणम्। तस्मिन् अवक्षेपणे गम्यमाने सति, येन वस्तुना कश्चित् अवक्षिप्यते तद्वस्तुवाचिनः प्रातिपदिकात् कन् प्रत्ययः स्यात्। व्याकरणकेन त्वं गर्वितः। अत्र कुत्सा तु व्याकरणनाश्रित्य एव तेन तस्मादेव प्रत्ययः। अतएव सुष्ठूक्तं श्रीमता दीक्षितेन—"येन इतरः कुत्स्यते तदिहोदाहरणम्।" "येन" वस्तुना "इतरः" अन्यः कश्चित् "कुत्स्यते" निन्द्यते "तदिहोदाहरणम्" तस्मात् एव प्रत्ययं विधाय उदाहरणम् प्रदर्शितम्। "स्वतः कुत्सितं तु कुत्सिते इत्यस्य—" स्वतः "कुत्सितं तु" यत् पुनः आत्मनः कुत्सितं तत्र "कुत्सिते" इति (५।३।७४) सूत्रेणैव कन्प्रत्ययो भवति यथा कुत्सितोऽश्व अश्वकः। कुत्सितो देवदत्त- देवदत्तकः। एवं यज्ञदत्तकः।

इति स्वार्थिके प्रागिवीयप्रकरणम्॥

## २०३८। इवे प्रतिकृतौ॥ ५।३।९६॥

**दी—। कन् स्यात्। अश्व इव प्रतिकृतिः अश्वकः। प्रतिकृतौ किम्? गौरिव गवयः।**

The suffix कन् is added to words to denote the likeness (the prototype) of the objects, expressed by the said words.

मित—। प्रतिकृतिः प्रतिरूपकं प्रतिच्छन्दकं प्रतिमेति यावत्। इवे इवार्थे। इवार्थः सादृश्यार्थः। "इवे" इवार्थे सादृश्यार्थे इत्यर्थः "प्रतिकृतौ" प्रतिरूपके अभिधेये सति प्रातिपदिकेभ्यः कन् स्यात्। अश्व इव प्रतिकृतिः अश्वकः। एवम् उष्ट्रकः, गर्दभकः। प्रतिकृतौ इति किम्? गौरिव गवयः,—नहि गवयः गोः प्रतिरूपकम् अपितु गोसदृशः अन्यः कश्चित प्राणी।

२०३८। संज्ञायां च ॥ ५।३।८७ ॥

दी—। इवार्थे कन् स्यात् समुदायेन चेत् संज्ञा गम्यते। अप्रतिकृत्यर्थमारम्भः। अश्वसदृशस्य संज्ञा—अश्वकः। उष्ट्रकः।

The self same suffix is also added to words to imply semblance provided the word thus formed stands for particular class names.

मित—। "इवार्थे" सादृश्यार्थे गम्यमाने कन् स्यात् "संज्ञायाम्" समुदायेन चेत् संज्ञा गम्यते। पूर्वसूत्रे प्रतिकृतौ एव प्रत्ययः—अत तु सादृश्यमात्रे एव, संज्ञा चेत् समुदायेन गम्यते न खलु प्रतिकृतौ। अतश्चाह—"अप्रतिकृत्यर्थमारम्भः"। अश्वसदृशस्य जन्तुनः संज्ञा अश्वकः, उष्ट्रसदृशस्य उष्ट्रकः, एवं गर्दभकः।

२०४०। लुम्मनुष्ये ॥ ५।३।९८ ॥

दी—। संज्ञायां विहितस्य कनो लुप् स्यात् मनुष्ये वाच्ये। चञ्चा तृणमयः पुमान्। चञ्चेव मनुष्यश्चञ्चा। वध्रिका।

The कन् of the aforesaid nature, elides, provided the class name implied stands for human name only.

मित—। संज्ञायामिति यः कन् विहितः सतु समुदायेन मनुष्ये अभिधेये सति लुप् स्यात्। तृणनिर्मितः पुरुषः चञ्चा इति कथ्यते, चञ्चा इव मनुष्य इति संज्ञायाम् कन् विहितः। सतु अनेन लुप्यते तेन चञ्चा मनुष्यः। वध्रिका इव मनुष्यः इति वध्रिका। वध्रिका ब्राह्मणयष्टिका। एवं दासी, खरकुटी।

२०४१। जीविकार्थे चापण्ये ॥ ५।३।९९ ॥

दी—। जीविकार्थं यदविक्रीयमाणं तस्मिन् वाच्ये कनो लुप् स्यात्। वासुदेवः। शिवः। स्कन्दः। देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम्। अपण्ये किम्?—हस्तिकान् विक्रीणीते।

The suffix कन् elides, if thereby the means (or instruments) of livelihood other than any merchandise ( i. e. other than anything for sale ) is implied.

मित—। विक्रीयते यत् तत् पण्यम्। तस्मादितरदपण्यम्। "जीविकार्थे" जीविकायाः उपार्ज्जनार्थं अवलम्बितं यत् 'अपण्यम्' तस्मिन् अपि अभिधेये कन्प्रत्ययस्य लुप् स्यात्। वासुदेवः, शिवः, स्कन्दः, विष्णुः, आदित्यः—सर्व्वत्र विहितस्य कनो लुप्। एतेषां कोऽर्थः ? "देवलकानां" देव-सेविनाम् "जीविकार्थासु" जीविकार्ज्जनाय अवलम्बितासु 'देव-प्रतिकृतिषु' देव-प्रतिमासु इदम्। तथाहि वासुदेवः इति श्रीकृष्णस्य प्रतिमूर्त्तिं संप्रदर्श्य देवलकाः पथिकेभ्यः अर्घं गृहीत्वा स्वेषां जीविकाम् अर्ज्जयति। एवं शिवः—शिवप्रतिमा—शिवलिङ्गं च। स्कन्दः कार्त्तिकेयप्रतिमा। आदित्यः—सूर्य्यप्रतिमा। विष्णुः—विष्णुप्रतिमा। "इवे प्रतिकृतौ" ( ५।३।९६ ) इति प्रतिकृतौ गम्यमानायां यः कन् विहितः स अनेन लुप्यते इति बोध्यम्। अपण्ये इति किम् ? हस्तिकां विक्रीणीते। हस्तिशब्दात् "इवे प्रतिकृतौ" ( ५।३।९६ ) इति कन्—तेन हस्तिकः इति रूपम्। हस्तिकः हस्तिप्रतिमूर्त्तिः। हस्तिकान् विक्रीणीते हस्तिप्रतिमूर्त्तीः विक्रीय जीविकाम् अर्ज्जयति। एवम् अश्वकान् विक्रीणीते।

## २०४१। देव-पथादिभ्यश्च ॥ ५।३।१००॥

## दी—। कनो लुप् स्यात्। देवपथः। हंसपथः।

The suffix कन् attached to the word देवपथ and other passing by the denomination देव-पथादि—(either by the rule इवे प्रतिकृतौ or संज्ञायां च ) elides.

मित—। "इवे प्रतिकृतौ" ( ५।३।९६ ), "संज्ञायां च" ( ५।३।९७ ) इति सूत्राभ्यां विहितस्य देवपथ इति एवमादिकेभ्यः कन् प्रत्ययस्य लुप् स्यात्। देवपथः, हंसपथः। देवपथादिर्यथा—देवपथ, हंसपथ, वारिपथ, जनपथ, रथपथ, स्थलपथ, करिपथ, अजपथ, राजपथ, शतपथ, शङ्कुपथ, सिन्धुपथ, सिंहगति, उष्ट्रग्रीव; पथरज्जु, हस्त, इन्द्र, दण्ड, पुष्प, मत्स्य—आकृतिगणोऽयम्। तथाहि—"अर्च्चासु पूजनार्थासु

चित्रकर्म्मध्वजेषु च । इवे प्रतिकृतौ लोपः कनो देवपथादिषु ।" अस्य भावार्थो यथा—इवे प्रतिकृतौ इति सूत्रेण विहितस्य कनः एषु अभिधेयेषु लोपः स्यात्—(१) अर्चासु । अर्चा प्रतिमा—तस्यां गम्यमानायाम्, यथा—शिवः, विष्णुः ; (२) चित्रकर्म्मणि अभिधेये यथा—अर्जुनः, दुर्य्योधनः, (३) ध्वजेषु अभिधेयेषु यथा—कपिः, गरुड़ः, सिंहः, (४) देवपथादिषु विहितस्य च कनः लोपो स्यात् यथा—देवपथः ।

## २०४२ । वस्तेर्ढञ् ॥ ५।३।१०१ ॥

**दी—। इवेत्यनुवर्त्तते एव । प्रतिकृतौ इति निवृत्तम् । वस्तिरिव वास्तेयम् । वास्तेयी ।**

The suffix ढञ् is attached to the word वस्ति to imply similarity (इव)।

मित—। "इवे प्रतिकृतौ" ( ५।३।९६ ) इति सूत्रात् इवे इत्यनुवर्त्तते—प्रतिकृतौ इति तु नानुवर्त्तते । अतएव "इतः प्रभृति प्रत्ययाः सामान्येन भवन्ति प्रतिकृतौ चाप्रतिकृतौ च" इति काशिका । सूत्रार्थस्तु—"वस्तेः" इत्यस्मात् इवार्थे ( सादृश्यार्थे ) दीर्घ्ये ढञ् प्रत्ययोभवति । वस्तिरिव इति वास्तेयः । "टिड्ढाण—" ( ४।१।१५ ) इति स्त्रियां ङीप्=वास्तेयी ।

## २०४३ । शिलाया ढः ॥ ५।३।१०२ ॥

**दी—। शिलाया इति योगविभागाड्ढञपीत्येके । शिलेव शिलेयम् । शैलेयम् ।**

The suffix ढ as well as the suffix ढञ् is added to the word शिला in the aforesaid sense. This is by योगविभाग of this rule.

मित—। अस्य सूत्रस्य योगविभागः कर्त्तव्यः यथा—(१) शिलायाः (२) ढः । प्रथमांशस्य अर्थः—"शिलायाः" शिला इत्यस्मात् इवार्थे ढञ् स्यात् ; शिला इव शैलेयम् । अत्र ढञ् । शैलेयं दधि । ( २ ) "ढः"—शिलाशब्दात् इवार्थे ढः प्रत्ययोऽपि भवति ; शिला इव शिलेयम् दधि = अत्र ढः ।

२०४४। शाखादिभ्यो यः ॥ ५।३।१०३ ॥

दी—। शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः।

The suffix य is added to the word शाखा and other words called शाखादि in the aforesaid sense.

मित—। शाखा इति एवमादिभ्यो यप्रत्ययो भवति इवार्थे। शाखा इव शाख्यः। मुखमिव मुख्यः। जघनमिव जघन्यः। अग्र इव अग्र्यः। शरणमिव शरण्यः। शाखादिर्यथा—शाखा, मुख, जघन, अग्र, शरण, शृङ्ग, मेघ, अभ्र, चरण, स्कन्ध, स्कन्द, उरस्, शिरस्।

२०४५। द्रव्यं च भव्ये ॥ ५।३।१०४ ॥

दी—। द्रव्योऽयं ब्राह्मणः।

The suffix य is added to the word द्रु in the aforesaid sense giving rise to the word द्रव्य in the sense of भव्य, worthy.

मित—। भव्यः आत्मवान् इत्यर्थः। तस्मिन् अभिधेये सति द्रुशब्दात् इवार्थे यप्रत्ययः स्यात्। द्रव्यः अयं ब्राह्मणः। द्रव्योऽयम् राजपुत्रः। द्रव्योऽयं माणवकः। अभिप्रेतानाम् अर्थानाम् उपायभूत एव द्रव्य उच्यते इति काशिकाकृतामाशयः। [द्रव्यमयम् ब्राह्मणः इति पाठोपि दृश्यते। तन्न साधु इति मन्यामहे]।

२०४६। कुशाग्राच्छः ॥ ५।३।१०५ ॥

दी—। कुशाग्रमिव कुशाग्रीया बुद्धिः।

The suffix छ is added to the words कुशाग्र in the aforesaid sense.

मित—। इवार्थे कुशाग्रशब्दात् छप्रत्ययः स्यात्। कुशाग्रम् इव इति कुशाग्रीयः। सूक्ष्मत्वम् एव अत्र सादृश्यम्। कुशाग्रीया बुद्धिः। कुशाग्रीयं वस्त्रम्। कुशाग्रमिव

सूक्ष्मा बुद्धिः। कुशाग्रमिव सूक्ष्म वस्त्रम् इत्यर्थः। उक्तं च—"अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ"

२०४७। **समासाच्च तद्विषयात्॥ ५।३।१०६॥**

**टी—। इवार्थ-विषयात् समासाच्छः स्यात्। काकतालीयो देवदत्तस्य वधः। इह काकतालसमागमसदृशश्चौरसमागम इति समासार्थः। तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः। अजाकृपाणीयः। अतर्कितोपनत इति फलितोऽर्थः।**

In the aforesaid sense, the suffix छ is attached to words that are compounded in the sense of इव। In काकतालीयः देवदत्तस्य वधः there are two उपमानपक्ष (इवार्थ) :—one is—advent of चौर is like coincidence of crow and ताल and this is denoted in the समास here ; the second is—death of देवदत्त by thieves is accidental like the death of crow by falling of ताल, this is the प्रत्ययार्थ here.

मित—। "तद्विषयात्" इवार्थविषयात्। "तद्विषयात्" इवार्थविषयात् "समासात्" कृतसमासात् शब्दात् छप्रत्ययो भवति अपरस्मिन् इवार्थे अभिधेये सति। काकतालम् इव देवदत्तस्य वधः इति काकतालशब्दात् छ—काकतालीयो देवदत्तस्य वधः।

ननु काकतालम् इति किम् इवार्थे समासः ? अथकिम्। उक्तं च काशिकाकृता—"काकस्यागमनम् यादृच्छिकम्। तालस्य पतनं च, तेन तालेन पतता काकस्य वधः कृतः। एवमेव देवदत्तस्य तत्रागमनम्; दस्यूनां चोपनिपातः; तैश्च तस्य वधः कृतः। तत्र यो देवदत्तस्य दस्यूनां समागमः स काकतालसमागमसदृश इति द्वितीयम् उपमानम्। तत्र प्रथमे समासः, द्वितीये प्रत्ययः। "अतएव अत्र द्वौ एव इवार्थौ वर्त्तेते। काकागमनमिव तालपतनम् इति प्रथमे इवार्थे समासः—काकतालम्। केन सूत्रेण समासः ? अत्र काशिका—"समासश्चायमस्मादेव ज्ञापकात्। नह्यस्यापरं लक्षणमस्ति। सुप् सुपेति वा समासः। स च एवंविषय एव"। ततः काकतालम्

इव देवदत्तस्य वधः ( तत्र देवदत्तस्य इति कर्मणि षष्ठी ) इति द्वितीये इवार्थे प्रत्ययः —काकतालीयो देवदत्तस्य वधः ।

ननु काकागमनमिव तालपतनमिव इति विषये काकतालम् इति यः समासस्तत्र अर्थस्य बोधः कीदृशः इति चेत् उच्यते । "वृत्तिविषये काकतालशब्दौ काकताल-समवेतक्रियावाचिनौ" । काकशब्देन काकागमनं तालशब्देन च तालपतनम् खलु बोध्यमित्यर्थः । तत्र काकागमनम् देवदत्तस्य आगमनस्य उपमानम् । ताल-पतनम् च दस्युनाम् समागमस्य उपमानम् । तालेन यः काकस्य वधः स देवदत्तस्य दस्युभिः वधस्य उपमानम् । तस्मात् वधः काकतालीय इति कथ्यते । अतएव प्रोक्तं दीक्षितेन—'इह काकतालसमागमसदृशश्चौरसमागमः इति समासार्थः' । अयमर्थः—समासे इवार्थः वर्त्तते स प्रथमः इवार्थः । स च इत्थम्—काकतालसमागम इव चौर-समागमः । चौराणां देवदत्तस्य च समागमः इत्यर्थः । "तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः—" तत्प्रयुक्तश्चौरप्रयुक्तः काकमरणसदृशस्तु काकमृत्युतुल्यस्तु देवदत्तस्य मृत्युः इति प्रत्ययार्थः । अयं द्वितीयः इवार्थः ॥ अजाकृपाणीयः । अजाकृपाण इव इति छः । अतर्कितोपनतः । एवम् अन्धकवर्त्तकीयम् । अतर्कितोपनतं चित्रीकरणम् अन्धकवर्त्तकीयमुच्यते ।

२०४८ । शर्करादिभ्योऽण् ॥ ५।३।१०७ ॥

दी— । शर्करेव शार्करम् ।

The suffix अण् is attached to the words that pass by the term शर्करादि in the aforesaid sense.

मित— । शर्करा इति एवमादिभ्यः शब्देभ्यः अण् प्रत्ययः स्यादिवार्थे । शर्करा इव शार्करम् । कपालिका इव कापालिकम् । शर्करादिर्यथा—शर्करा, कपालिका, कपाठिका, पुण्डरीक, शतपत्र, गोलोमन्, गोपुच्छ, सिकता, नकुल, कनिष्ठिका, लोमन्, नराची ।

२०४९ । अङ्गुल्यादिभ्यष्ठक् ॥ ५।३।१०८ ॥

दी— । अङ्गुलीव आङ्गुलिकः । भरुजेव भारुजिकः ।

The suffix ठक् is attached to the words that are called अङ्गुल्यादि in the aforesaid sense.

मित—। अङ्गुली इत्येवमादिभ्यः प्रातिपदिकेभ्यः इवार्थे ठक् प्रत्ययो भवति। अङ्गुली इव आङ्गुलिकः। भरुजः (भरुजा) इव इति भारुजिकः। शष्कुली इव शाष्कुलिकः। अङ्गुल्यादिर्यथा—अङ्गुली, शष्कुली, भरुज, बभ्रु, मण्ड, मण्डर, मण्डल, हरि, कपि, मुनि, रुह, खल, उदश्वित्, गोणी, उरस्, कुलिश, शिखा।

**२०५० । एकशालायाष्ठजन्यतरस्याम् ॥ ५।३।१०९ ॥**

**दी—। एकशालाशब्दादिवार्थेठज्वा पक्षे ठक्। एकशालेव एकशालिकः। ऐकशालिकः।**

In the aforesaid sense, the suffix ठच् is optionally attached to the word एकशाला।

मित—। एकशालाशब्दात् इवार्थे ठच् वा स्यात्। पक्षेठक्। एकशाला इव इति ठच् एकशालिकः। ठक् ऐकशालिकः।

**२०५१ । कर्कलोहितादीकक् ॥ ५।३।११० ॥**

**दी—। कर्कः शुक्लोऽश्वः स इव कार्कीकः। लौहितीकः स्फटिकः।**

The suffix ईकक् is attached to words कर्क and लोहित in the aforesaid sense.

मित—। कर्क लोहित इति एताभ्याम् ईकक् स्यादिवार्थे। कर्कः श्वेतवर्णः अश्वः। स इव ( तेन सदृशः इत्यर्थः ) कार्कीकः। लोहित इव इति लौहितीकः स्फटिकः। "स्वयम् अलोहितोऽपि उपाश्रयवशात्तथा प्रतीयते"—इति काशिका।

**२०५२ । पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥ ५।३।११२ ॥**

**दी—। इवार्थो निवृत्तः। नानाजातीया अनियतवृत्तयो-**

ऽर्थकामप्रधानाः संघाः पूगास्तद्वाचकात् स्वार्थे ञ्यः स्यात्। लौहितध्वज्यः ॥

The suffix ञ्य is added to words denoting groups without altering the sense (स्वार्थे)।

मित—। स्वार्थे इति निवृत्तम्। पूगवाचकात् प्रातिपदिकात् अग्रामणीपूर्व्वात् स्वार्थे एव प्रत्ययो भवति। पूगाः संघाः। ते कीदृशाः ? "नानाजातीयाः" विविधाः "अनियतवृत्तयः" अनिर्द्दिष्टजीविकाः "अर्थकामप्रधानाः"—नतु धर्म्ममोक्षप्रधानाः "संघाः" एव पूगाः इति कथ्यते। लौहितध्वज इति पूगविशेषः। स एव इति स्वार्थे ञ्यः—लौहितध्वज्यः [ द्विवचने—लौहितध्वज्यौ, बहुवचने लोहितध्वजाः। "तद्राजस्य बहुषु तेनैवास्त्रियाम्" (२।४।६२) इति लुग् भवति। तद्राजसंज्ञातु एषां "ञ्यादयस्तद्राजाः" (५।३।११९) इति वक्ष्यमाणसूत्रेण भवति। एवं लोहध्वजः एव लौहध्वज्यः। शिविः एव इति शैब्यः। चातकः एव इति चातक्यः। बहुवचने यथाक्रमं लोहध्वजाः, शिवयः, चातकाः—इति काशिका]। अग्रामणीपूर्व्वात् इति किम् ? देवदत्तो ग्रामणीर्येषां त इमे देवदत्तकाः, एवं यज्ञदत्तकाः।

**२०५३। व्रातच्फञोरस्त्रियाम् ॥ ५।३।११३ ॥**

**दी—। व्राते—कापोतपाक्यः। च्फञ्—कौञ्जायन्यः। व्राध्नायन्यः।**

The self-same suffix (ञ्य) is attached in the self-same sense to words standing for व्रात ( a host or nomad tribe or marauding hordes ) and also to words that are themselves derived with the suffix च्फञ्।

मित—। व्रातवाचिभ्यः प्रातिपदिकेभ्यस्तथा च्फञ्प्रत्ययनिष्पन्नेभ्यश्च स्वार्थे ञ्यप्रत्ययो भवति—न तु स्त्रियाम्। व्रातास्तु नानाजातीयाः अनियतवृत्तयः उत्सेधजीविनः संघाः। व्रातवाचिनो यथा—कपोतपाक एव इति कापोतपाक्यः। द्विवचने कापोतपाक्यौ। बहुवचने कपोतपाका इति काशिका (पूर्वसूत्रटीका द्रष्टव्या)। एवं

व्रीहिमतःएव व्रैहिमत्यः, व्रैहिमत्यौ, बहुवचने—व्रीहिमताः। चफञप्रत्यय—निष्पन्नेभ्यः यथा—कौञ्जायनः एव कौञ्जायन्यः, कौञ्जायन्यौ—बहुवचने कौञ्जायनाः। अस्त्रियामिति किम् ? स्त्रियाम् तु कपोतपाकी—व्रीहिमती—कौञ्जायनी—ब्राध्नायणी।

२०५४। आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्
॥ ५।३।११४ ॥

दी—। वाहीकेषु य आयुध-जीवि-सङ्घस्तद्वाचिनः स्वार्थे ञ्यट्। चौद्रक्यः। मालव्यः। टित्वान्ङीप्—चौद्रकी। आयुधेति किम् ? मल्लाः। संघेति किम् ? सम्राट्। वाहीकेषु इति किम् ? शवराः। अब्राह्मणेति किम् ? गोपालकाः। शालङ्कायनाः। ब्राह्मणे तद्विशेषग्रहणम्। राजन्ये स्वरूप-ग्रहणम्।

The suffix ञ्यट् is attached without altering the sense to words denoting groups of mercinaries in the land of the Vahikas—except in the case of words that can stand for the name of brahmans and khatriyas. For rest see Tika.

मित—। आयुधजीविसंघात् ञ्यट् वाहीकेषु अब्राह्मण—राजन्यात् इति पदच्छेदः। आयुधैः अस्त्रैः जीवन्ति ये ते आयुधजीविनः। तेषां संघः इति आयुधजीविसंघः। वाहीकेषु इति अधिकरणेन आयुधजीविसंघो विशिष्यते। सूत्रार्थः—"वाहीकेषु" वाहीकदेशस्थितो य आयुधजीविसंघस्तस्मात् एव "आयुध जीविसंघवाचिनः शब्दात्"—वाहीकदेशीयायुधजीविसंघवाचिनः प्रातिपदिकात् इति यावत्, "अब्राह्मण राजन्यात्" ब्राह्मणराजन्यवर्ज्जितात् ञ्यट् प्रत्ययो भवति स्वार्थे। चुद्रकः इति वाहीकेषु कश्चिदायुधजीविसंघस्तस्मात् स्वार्थे ञ्यट्—चौद्रक्यः। द्विवचने चौद्रक्यौ। बहुवचने चुद्रकाः। तद्राजत्वात् प्रत्यय-लोपः। मालवः इति वाहीकेषु आयुधजीविसंघविशेषस्तस्मात् स्वार्थे ञ्यट्—मालव्यः, मालव्यौ, मालवाः। ञ्यट् इति प्रत्यये टकार इत् सन् स्त्रियां ङीप्प्रत्ययं ज्ञापयति अतएव स्त्रियां चौद्रकी। मालवी

—"हलस्तद्धितस्य" (६।४।१५०) इति सूत्रेण यलोपः। एवं कौण्डीवृसः—इत्यस्मात् स्वार्थे ञ्यट्, कौण्डीवृस्याः, कौण्डीवृस्यौ। कौण्डीवृसाः—प्रत्ययस्य लोपः, स्त्रियां कौण्डीवृसी। आयुधजीवि इति किम्? मल्लाः। मल्लानां संघो विद्यते नाम—परं नहि मल्लाः आयुधजीविनः—अतएव मल्लानां संघः आयुधजीविसंघः इति कथयितुम् न शक्यते तेनात्र न प्रत्ययः। संघ इति किम्? सम्राट्। सत्यं खलु सम्राट् आयुधेन राज्यपालनात् जीविकाम् अर्ज्जयति। परं सम्राट् इत्यत्र संघो नास्ति तस्मादत्र प्रत्ययो नेष्टः। वाहीकेषु इति किम्? शवराः, पुलिन्दाः। भवतुनाम शवरशब्दः पुलिन्दशब्दश्च आयुधजीविसंघवाची परं वाहीकेषु शवराः पुलिन्दाः वा न दृश्यन्ते अतएव अत्र नैव प्रत्ययः। अब्राह्मणेति किम्? गोपालकाः—गोपालकाः इति ब्राह्मणविशेषाः। अब्राह्मण इति तु ब्राह्मण-विशेषस्यएव ग्रहणम्। अतएव ब्राह्मण-विशेषवाचिनः गोपालकशब्दात् नप्रत्ययः। एवं शालङ्कायनाः। शालङ्कायनाः ब्राह्मण-विशेषाः। सूत्रे तु राजन्यशब्दस्य स्वरूपग्रहणम्। तेन राजन्यशब्दात् नप्रत्ययः—अतएव राजन्य इत्येव रूपं तिष्ठति—नास्मात् ञ्यट् प्रत्ययो भवति।

## २०५५। वृकाट्टेण्यण्॥ ५।३।११५॥

**दी—। आयुधजीविसङ्घवाचकात् स्वार्थे। वार्केण्यः। आयुधेति किम्? जातिशब्दान्माभूत्।**

The suffix टेण्यण् is attached without altering the sense to the word वृक that belongs to the आयुधजीविसंघ—class.

मित—। आयुधजीविसंघवाचकात् इति च अनुवर्त्तते। अतएव सूत्रार्थः—आयुधजीविसंघविशेषवाचिनः वृकशब्दात् स्वार्थे टेण्यण् प्रत्ययोभवति। प्रत्यये टकारः स्त्रियां ङीप् इति तथा णकारस्तु आदिस्वरवृद्धिरिति च ज्ञापयति। वृक—टेण्यण् इति स्थितिः—ततः वृक एण्यः इति स्थितिः। ततः आदिस्वरवृद्धित्वेन वार्क एण्य इति! ततः "यस्येतिच" (६।४।१४८) इत्यकारलोपः तेन वार्क् एण्य इति। तथा सति वार्केण्यः इति रूपम्। वार्केण्यौ। वहुवचने वृकाः—तद्राजत्वाद् प्रत्ययलोपः। आयुधजीविसंघात् इति किम्? जातिवाचकात् वृकशब्दात् माभूत्। "कामक्रोधौ

मनुष्याणां खादितारौ वृकाविव"। स्त्रियां वार्कैणी। "हलस्तद्धितस्य" (६।४।१५०) इति यलोपः।

२०५६। दामन्यादित्रिगर्त्तषष्ठाच्छः॥ ५।३।११६॥

दी—। दामन्यादिभ्यस्त्रिगर्त्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः स्यात्। त्रिगर्त्तः षष्ठो वर्गो येषां ते त्रिगर्त्तषष्ठाः।

आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी।
क्रौष्टुकि जालमानिश्च ब्रह्मगुप्तोऽथजानकिः। १।

दामनीयः। दामनीयौ। दामनयः। औलपि—औलपीयः। त्रिगर्त्तषष्ठाः—त्रैगर्त्तीयः। कौण्डोपरथीयः। दाण्डकीयः।

The suffix छ is added, without any alteration in the sense to the words दामनी and others passing by the denomination दामन्यादि and also to other six words beginning with त्रिगर्त्त (and thus passing by the term त्रिगर्त्तषष्ठ).

मित—। दामनी इत्येवमादिभ्यस्तथा त्रिगर्त्त इति अन्येभ्यः षड्भ्यश्च आयुधजीवि-संघवाचिभ्यः स्वार्थे छप्रत्ययः स्यात्। त्रिगर्त्तषष्ठः—त्रिगर्त्तः एव षष्टः वर्गः येषां शब्दानां ते त्रिगर्त्तषष्ठाः। केते? उच्यते—आहुरित्यादिना। तथाहि—कौण्डोपरथ, दाण्डकि, क्रौष्टुकि, जालमानि, ब्रह्मगुप्त, जानकि इति त्रिगर्त्तषष्ठाः। त्रिगर्त्त इति च गृहीत्वा अत्र सप्तशब्दाः गृह्यन्ते। अतएव सुष्टूक्तं काशिकया "येषामायुधजीविनां संघानां षड्न्तर्वर्गास्तत्र च त्रिगर्त्तः षष्ठः"। अत्र त्रिगर्त्त इति कश्चित् आयुधजीविनां संघस्तस्य च कौण्डोपरथ प्रभृतयः षट् अन्तर्वर्गाः सन्ति इति भावः। दामन्यादिर्यथा—दामनि, औलपि, वैजवापि, औदकि, औदङ्कि, आच्युतन्ति, आच्युतदन्ति, शाकुन्तकि, आकिदन्ति, औड़वि, काकदन्तकि, शावुन्तपि, सार्वसेनि, विन्दु, वैन्दवि, तुलभ, मौञ्जायनि, काकन्दि, सावित्रीपुत्र।

दामनिः एव इति स्वार्थे छः—दामनीयः। द्विवचने—दामनीयौ। बहुवचने

दामनयः—तद्राजत्वात् प्रत्ययस्य लोपः। एवं जानकीय जानिकीयः। [जानिक इति स्थाने तु जानकि इति काशिका]। बहुवचने यथासंख्यं—त्रिगर्त्ताः। जानिकाः (जानकयः) इत्यादयः। बहुवचने सर्व्वत्र प्रत्ययस्य लोपः।

२०५७। पर्श्वादि-यौधेयादिभ्यामणञौ॥ ५।३।११७॥

दी—। आयुधजीविसंघवाचिभ्य एभ्यः क्रमादणञौ स्तः स्वार्थे। पार्श्वः पार्श्वौ—पर्शवः। यौधेयः। यौधेयौ। यौधेयाः।

The suffixes अण् and अञ् are attached without any alteration in the sense to the words of the पर्श्वादि class as well as of the यौधेयादि class i.e.—which are names for mercenaries (persons living by weapons).

मित—। आयुधजीविसंघ-वाचिभ्यः पर्शु इति एवमादिभ्यस्तथा यौधेय इति एवमादिभ्यश्च प्रातिपदिकेभ्यः यथाक्रमं अण् अञ् इति प्रत्ययौ स्तः स्वार्थे। पर्श्वादिभ्यः अण्—यौधेयादिभ्यः अञ इत्यर्थः। पर्शु एव इति स्वार्थे अण्—पार्शवः। बहुवचने प्रत्ययस्य लोपः। यौधेय एव इति स्वार्थे अञ्—यौधेयः, यौधेयौ, यौधेयाः, एवं शौक्रेय शब्दात् अञ् शौक्रेयः। पर्श्वादि यथा—पर्शु असुर, रक्षस्, वाह्लीक, वयस्, मरुत् सत्वत्, दशार्ह, पिशाच, अशनि, विशाल, कार्षापण, वसु। तथाहि रक्षस्, राक्षसः, मारुतः, सात्वतः, दाशार्हः, पैशाचः, वैशाली नगरी। यौधेयादिर्यथा—यौधेय, कौशेय, शौक्रेय, शौभ्रेय, धौर्त्तेय, धार्त्तेय, ज्यावाणेय, त्रिगर्त्त, भरत, उशीनर, वार्त्तेय, जावाणेय। ४

२०५८। अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्॥ ५।३।११८॥

दी—। अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ् स्यात्। अभिजितोऽपत्यमाभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः।

The suffix यञ् is attached to the words अभिजित, विदभृत्, शालावत, शिखावत, शमीवत, उर्णावत् and श्रुमत्—after the suffix अण् has already been added to these.

मित—। अण्प्रत्ययान्तेभ्यः अभिजिदादिभ्यः सूत्रपठितेभ्यः प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति। अभिजितोऽपत्यम् इति अण्—"ऋष्यन्धक-वृष्णिकुरुभ्यश्च" (४।१।११४) इति सूत्रेण। ततस्तदन्तात् अनेन यञ्—आभिजित्यः। आभिजित्यौ। बहुवचने—आभिजिताः। विदभृतोऽपत्यम् इति अण् ततः यञ् वैदभृत्यः, वैदभृत्यौ, वैदभृताः, सर्व्वत्र बहुवचने यञ्प्रत्ययस्य लोपोभवति। अण् च तिष्ठति। अपिच अत्र योऽण् प्रोक्तः सतु गोत्रप्रत्ययस्य अण् एव—तेन अभिजितो मुहूर्त्तः इति आभिजितः मुहूर्त्तः इत्यत्र यञ्प्रत्ययो न स्यात्। आभिजितः इत्यत्र अण्प्रत्ययस्य अगोत्रप्रत्ययत्वात्।

**२०५८। ञ्यादयस्तद्राजाः॥ ५।३।११९॥**

**टी—। पूगाञ्ञ्य इत्यारभ्य उक्ताः एतत्संज्ञाः स्युः। तेन अस्त्रियां बहुषु लुक्। लौहितध्वजाः। कपोतपाकाः। कौञ्जायनाः ब्राध्नायनाः इत्यादि।**

All the suffixes beginning from ञ्य of the sutra "पूगाञ्—" (५।३।११२) and ending with यञ of the sutra "अभिजिद्—" (५।३।११८) are termed "तद्राज"।

मित—। "पूगाञ्ञ्यो—" (५।३।११२) इति सूत्रे यो ञ्यप्रत्ययः प्रोक्तः—तस्मात् आरभ्य "अभिजिद्—" (५।३।११८) इति सूत्रे यो यञ्प्रत्ययः कथितस्तम् यावत् सर्व्वे प्रत्ययाः "तद्राज" इति संज्ञां भजन्ति। एतत् संज्ञाविधानस्य किं फलमिति चेत् उच्यते। "तद्राजस्य बहुषु तेनैवास्त्रियाम्" (२।४।६२) इति सूत्रेण अस्त्रियाम् बहुषु प्रत्ययस्य लुक्। यथा लौहितध्वज्यः इत्यस्य बहुवचने लौहितध्वजाः, कापोतपाक्यः—अस्य बहुवचने कपोतपाकाः। कौञ्जायन्यः अस्य बहुषु कौञ्जायनाः। ब्राध्नायन्यः इति बहुषु ब्राध्नायनाः प्रपञ्चितमिदमस्माभिः प्रागेव।

२०६०। पादशतस्य संख्यादेर्वीप्सायांवुन् लोपश्च ॥ ५।४।१ ॥

टी—। लोपवचनम् अनैमित्तिकत्वार्थम्। अतो न स्थानिवत्। "पादः पत्"। "तद्धितार्थ—" इति समासे कृते प्रत्ययः। वुन्नन्तम् स्त्रियामेव। द्वो द्वौ पादौ ददाति द्विपदिकाम्। द्विशतिकाम्।

The suffix वुन् is attached to compound words the first member of which is any cardinal numeral and the second member is either पाद or शत, when वीप्सा (pervasion or multiplicity—taking more than one at a time ) is implied ; and the last letter of the compound elides before the suffix.

मित—। "वीप्सायाम्" गम्यमानायाम् "पादशतान्तस्य'—यस्य अन्ते पादः शतं वा तिष्ठति तादृशस्य प्रातिपदिकस्य, "संख्यादेः" संख्यापूर्वकस्य—यस्य अन्ते पादः शतं वा तिष्ठति आदौ च संख्यावाचकशब्दस्तिष्ठति तादृशस्य प्रातिपदिकस्य, वुन् इति प्रत्ययो भवति ; "लोपश्च"—प्रत्ययसन्नियोगेन च प्रातिपदिकस्य अन्त्योवर्णः लोपं याति।

ननु "यस्येति च" ( ६।४।१४८ ) इति सूत्रेणैव लोपः सिध्यति तर्हि कथं पुनरपि अत्र लोपो विधीयते इति चेत् ?—समाधत्ते। "लोपोवचनम् अनैमित्तिकत्वार्थम्" इत्यनेन। अस्यार्थः:—"लोपवचनम्" अत्रसूत्रे लोपस्य विधानम् 'अनैमित्तिकत्वार्थ" निमित्तात् जातः इति नैमित्तिकः तस्मात् अन्य इति अनैमित्तिकः, तस्य भावः इति अनैमित्तिकत्वम्। तस्मै इदम् इति अनैमित्तिकत्वार्थम्। लोपो हि अत्र न कस्मादपि निमित्तात् जातः इति ज्ञाप्यते, पुनरपि लोपविधानेन। तथाहि = "यस्येति च" इति लोपस्तु परनिमित्तकः। कथम् इति चेत् उच्यते। अकारे परे तद्धिते इवर्णान्तस्य अवर्णान्तस्य भस्य लोपोभवति। तस्मात् इकाराकारयोर्लोपः-परस्थितरनिमित्तकः—तद्धितनिमित्तकश्च। परस्थितः अकारस्तथा तद्धितश्च तत्र लोपे

निमित्तमित्यर्थ:। यस्मात् लोपस्तत्र परनिमित्तक:—तस्मात् तत्र लोपस्य स्थानिवत्ता विद्यते। तत्र स्थानिवत्तासद्भावविषये सूत्रं यथा—"स्थानिवदादेशोऽनल्विधौ" इत्यत्र प्रकरणे "अच:—" इति। अत्र पुन: लोपस्य स्थानिवत्ता न स्वीक्रियते। तस्य च प्रयोजनमस्ति [अतएव उक्तम्—लोपवचनम् अनैमित्तिकत्वार्थत्वम्]। किं प्रयोजनमिति चेत् कथ्यते। द्वौ द्वौ पादौ ददाति इति वीप्सायां द्योत्यायां वुन् प्रत्यय:, आदौ द्वि पाद इत्यनयो: समास: स्यात् "तद्धितार्थ—" (२।१।५१) इति सूत्रेण। तत: वुन्प्रत्यये परे सति (भत्वात्) "पाद: पत्" (६।४।१३०) इति पादशब्दस्य स्थाने पदादेश:। पाद: पत् इति सूत्रे लुप्ताकारो पादशब्दो गृह्यते। लुप्ताकार-पादशब्दो यस्य अन्ते तिष्ठति, तादृशस्य भस्य पत् इति आदेशोभवति। "यस्येति च" (६।४।१४८) इति सूत्रे विहितस्य लोपस्य स्थानिवत्ता अस्ति। अतएव तेन यदि पादशब्दस्य अकारो लुप्येत तर्हि तस्य लोपस्य स्थानिवत्तावशात् पाद: पत् इति पदादेशो नाभविष्यत्। परं एतत् तु न भवति; अपिच व्याख्यायमानेन सूत्रेण अकारस्य लोपो विधीयते। तस्य च स्थानिवत्ता नास्ति। अतएव स्थानिवत्ताया: अभावात् "पाद: पत्" इति सूत्रेण पदादेशे न कापि बाधा प्रसक्ता।

तस्मात् द्वि-पत् वुन इति स्थिति:। तत: अत्र वुन्प्रत्ययान्तं पदं स्वभावात् च स्त्रियामेव वर्त्तते अतएव द्विपदिका इत्येव रूपम्। द्विपदिकां ददाति। द्वे द्वे शते ददाति इति द्विशतिकां ददाति। पादशतस्य इति किम्? द्वौ द्वौ माषौ ददाति—अत्र न प्रत्यय:। संख्यादेरिति किम्? पादं पादं ददाति अत्रापि न प्रत्यय:। वीप्सायाम् इति किम्? द्वौ पादौ ददाति। द्वे शते ददाति। अत्र द्वौ एव पादौ नतु द्वौ द्वौ। द्वे एव शते नतु द्वे द्वे—अतएव न वीप्सा।

**दी—। पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्। (वा)। द्विमोदकिकाम्।**

This rule holds good-even if other words take the place of पाद or शत।

मित—। सूत्रे पादान्तस्य शतान्तस्य च ग्रहणम् नैव सृष्टु इति मति:। यत:

अन्यत्रापि एतत् दृश्यते—यथा द्वे द्वे मोदके ददाति इति द्विमोदकिकां ददाति। एवं त्रिमोदकिकाम्।

२०६१। दण्ड-व्यवसर्गयोश्च ॥ ५।४।२ ॥

**दी—। वुन् स्यात्। अवीप्सार्थमिदम्। द्वौ पादौ दण्डितः द्विपदिकाम्। द्विशतिकाम्। व्यवसृजति ददाति इत्यर्थः।**

The aforesaid rule holds good in the sense of suppression and charity also.

मित—। दण्डः दमनं, व्यवसर्गः दानम। व्यवसृजति ददाति इत्यर्थः। दण्डे व्यवसर्गे च गम्यमाने अपि पादान्तस्य शतान्तस्य च संख्यादेः प्रातिपदिकस्य वुन्प्रत्ययः स्यादन्तलोपश्च। अत्र वीप्सा न अभिप्रेता। द्वौ पादौ दण्डितः द्विपदिकां दण्डितः। द्वौ पादौ व्यवसृजति द्विपदिकां व्यवसृजति। द्वे शते दण्डितः द्विशतिकां दण्डितः। द्वे शते व्यवसृजति द्विशतिकां। एवं त्रिपदिकाम् त्रिशतिकाम्।

२०६२। स्थूलादिभ्यः प्रकारवचने कन् ॥ ५।४।७ ॥

**दी—। जातीयरोऽपवादः। स्थूलकः। अणुकः।**

The suffix 'कन्' is added to words that are called स्थूलादि in the sense of प्रकार i. e. to imply the nature of the objects—expressed by the said words.

मित—। स्थूल इति एवमादिभ्यः कन्प्रत्ययो भवति प्रकारवचने द्योत्यमाने सति, "प्रकारवचने जातीयर्" (५।३।६९) इति जातीयर् प्रत्ययस्य अपवादः। प्रकारः विशेषः। स्थूलप्रकारः इति कन् स्थूलकः। अणुप्रकारः इति अणुकः। एवं माषकः। स्थूलादिर्यथा—स्थूल, अणु, माष, इषु, इक्षु, तिल, पाद्य। यव व्रीहिषु—यथा यवकः व्रीहिविशेषः। कालावदात सुरायाम्—कालकः सुराविशेषः अवदातकः सुराविशेषः। काशिका तु—इक्षु तिल पाद्य इति एतानपि सुरायां पठति। तेन तन्मते इक्षुकः तिलकः पाद्यकः। इति सर्व्वे सुराविशेषवाचिनः।

गोमूत्र आच्छादने। गोमूत्रक: आच्छादनविशेष:। जीर्णशालीषु (शालिषु) जीर्णक:। शालि:। पत्रमूले समस्तव्यस्ते—तेन पत्रक: मूलक: पत्रमूलक: मूलपत्रक:। कुमारीपुत्र, कुमारीश्वशुर, मणि इति एतेऽपि अत्र पठ्यन्ते।

दी—। चञ्चत् बृहतोरुपसंख्यानम्॥

The suffix कन् is also added to चञ्चत् and बृहत् in the aforesaid sense.

मित—। चञ्चत् बृहत् इति एताभ्यामपि प्रकारवचने कन् स्यात्। चञ्चत्-प्रकार: चञ्चत्क: बृहत्प्रकार: बृहतक:।

दी—। सुराया अहौ॥

The self-same suffix is added to सुरा to imply a serpent.

मित—। अहौ सर्पे गम्यमाने सुराशब्दात् कन् स्यात्। सुरावर्णोऽहिरिति सुरक:। "यसेत्यति च" (६।४।१४८) इति आकारलोप:।

२०६३। अनत्यन्तगतौ क्तात्॥ ५।४।४॥

दी—। छिन्नकम्। भिन्नकम्। अभिन्नकम्।

The suffix कन् is added to words derived with the suffix क्त to imply that the said words cover only a portion of something (and not the whole).

मित—। अत्यन्तगतिरशेषेण संबन्ध:। तदभावोऽनत्यन्तगतिरिति काशिका। अनत्यन्तगतिरंशेन सह सम्बन्ध इत्यर्थ:। अनत्यन्तगतौ गम्यमानायाम् क्तप्रत्यय-निष्पन्नात् प्रातिपदिकात् कन्प्रत्ययो भवति। न खलु सम्यक् एव छिन्नम् अपितु अंशत: एव इति वाक्ये गम्ये छिन्नशब्दात् कन् इति छिन्नकम्। अंशत: एव भिन्नमिति भिन्नकम। अंशतएव अभिन्नम् इति अभिन्नकम्। अनत्यन्तगतौ इति किम्? छिन्नं सम्यगेव। भिन्नं—सम्यगेव।

२०६४। न सामिवचने॥ ५।४।५॥

दी—। सामिपर्य्याये उपपदे क्तान्तान्न कन्। सामिकृतम्।

अर्धकृतम्। अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात् पूर्व्वेण कन् न प्राप्तः। इदमेव निषेधसूत्रम् अत्यन्तस्वार्थिकमपि कनं ज्ञापयति—बहुतरकम्।

The suffix कन् is not to be added to words derived with the suffix क्त if the said words are presented in compounds by सामि or any other word having the sense of सामि ॥ क्तान्त words with सामि as उपपद naturally denote part connection (अनत्यन्त-गति) so the prior rule "अनत्यन्त"—has no scope here—then wha'st the necesity of nullifying कन् here by the present rule? On this Bhattoji says—By this निषेधसूत्र it is signified that purely स्वार्थिक कन् has scope every where and that कस् is being prohibited here.

मित—। सामिशब्दे तत्पर्य्यायभूते शब्दान्तरे वा उपपदे सति, क्त-प्रत्यय-निष्पन्नात् प्रातिपदिकात् कन्प्रत्ययो न स्यात्। सामिकृतम्। अर्द्धकृतम्। नेमकृतम्।

ननु सामि इत्यस्य अर्थस्तु अर्द्धमेव। अतएव सामिशब्दः स्वयमेव अनत्यन्तगतिं (अंशतः सम्पर्कम्—यद्वस्तु क्तप्रत्ययान्तेन पदेन विशिष्यते तस्य अंशेन सहैव विशेषणस्य सम्बन्धम् इति यावत्) ज्ञापयति; अनेन हेतुना सामि इति यस्य उपपदं तस्मात् पुनरपि तदर्थकः कन्प्रत्ययः न संगच्छते—तथा सति "अनत्यन्त—" (५।४।४।) इत्यनेन कन् प्रत्ययस्य प्राप्तिरेवात नास्ति। यस्य प्राप्तिःखलु नास्ति, तस्य निषेधवचनम् कथम् इति चेत्—समाधत्ते—"इदमेव" इत्यादिना।

अयमाशयः—नैव खलु अयम् अनत्यन्तगतौ विहितस्य कन्प्रत्ययस्य प्रतिषेधः। तर्हि कस्य प्रतिषेधोऽयम्? स्वार्थिकस्य कन्प्रत्ययस्य। केन पुनः स्वार्थिकः कन् प्रत्ययो विहितः? नैव केनचित् सूत्रेण। अपितु एतदेव सूत्रम् स्वार्थे कन् इति ज्ञापकं भवति। अनेनैव प्रतिषेधवचनेन अत्यन्यस्वार्थिकः कन्प्रत्ययः ज्ञाप्यते इति भावः। बहुतरम्एव बहुतरकम्। अभिन्नतरम् एव इति अभिन्नतरकम्। तथाहि काशिका—"एवंहि सूत्रमभिन्नतरकं भवति। एतर्हि बहुतरकं व्याप्यते।"

२०६५। बृहत्या आच्छादने ॥ ५।४।६ ॥

टी—। कन् स्यात्। "द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा।" आच्छादने किम्? बृहती छन्दः।

The suffix कन् is added to the word बृहती to imply some covering.

मित—। आच्छादने गम्यमाने बृहतीशब्दात् कन्प्रत्ययः स्यात्। बृहतिकः आच्छादनम्। अत्र "केऽणः" (७।४।१३) इति ह्रस्वत्वम्। स्त्रियां बृहतिका। तथाहि अमरः—"द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा"। अयमर्थः—प्रावारउत्तरासङ्ग-बृहतिका इति त्रयः एव पर्य्यायशब्दाः बृहतिका उत्तरीयवस्त्रम्। [तत् तु गौड़ीय-भाषायाम् चादर इति कथ्यते]। आच्छादनादन्यत्र—बृहतीशब्दोऽस्ति। बृहती नवाचर-पादच्छन्दविशेषः। बृहती इत्यस्य अपरोऽर्थः क्षुद्रवार्त्ताकी। कण्टफला इत्यर्थः। [व्याकुड़ इति गौड़ीयाः]। रत्नमालामतेनतु बृहतीशब्दस्य उत्तरीयवस्त्रम् इत्यपि अर्थः स्यात्।

२०६६। अषड्क्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ॥ ५।४।७ ॥

टी—। स्वार्थे। अषड्क्षीणो मन्त्रः। द्वाभ्यामेव कृतः इत्यर्थः। आशिता गावोऽस्मिन्नित्याशितङ्गवीनम् अरण्यम्। निपतनात् पूर्वस्यमुम्। अलं कर्मणे अलंकर्मीणः। अलं-पुरुषीणः। ईश्वराधीनः—नित्योऽयं खः। उत्तरसूत्रे विभाषा-ग्रहणात्। अन्येऽपि केचित् स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते। तमबादयः प्राक्कनः। ञ्यादयः प्राग्वुनः। आमादयः प्राङ्मयटः। बृहतीजात्यन्ताः समासान्ताश्चेति।

The suffix ख is added to अषड्क्ष, आशितंगु, अलंकर्मन्, अलंपुरुष as well as to words the last member of which is अधि। See Tika also.

मित—। अषड्च, आशितङ्ग, अलंकर्मन् अलंपुरुष इति एतेभ्यः अध्युत्तर-पदाच्च स्वार्थे खप्रत्ययो भवति। अविद्यमानानि षड्चीणि अस्य इति वहुव्रीहिः। "वहुव्रीहौ सक्थ्यक्ष्णो"रिति ( ५।४।११३ ) षच्प्रत्ययः—तेन अषड्च इति रूपं ततः अनेन खप्रत्ययः—अषड्चीणः। अषड्चीणो मन्त्रः—यो मन्त्रः द्वाभ्यामेव क्रियते न बहुभिः। अयमाशयः—द्वयोश्चत्वारि अचीणि सन्ति। त्रयाणां तु षड़ेव। यतो मन्त्रोऽयम् अषड्चीणस्ततः स द्वाभ्यामेव—अन्यथा तस्य अषड्चीणत्वं न स्यात्। अषड्चीण इति पदे विद्यमानो नञ् षड्संख्यायाः न्यूनसंख्याकानि ( चत्वारि इत्यर्थः ) अचीणि ज्ञापयति। आशिता गावोऽस्मिन् इति आशितङ्गवीनम् अरण्यम्। [ "अन्नातेराङ्पूर्व्वादाशितः कर्त्ता" इति ज्ञापकात् कर्त्तरि क्तः] निपातनादेव आशितम् इति पूर्व्वपदे सुम् इत्यस्य आगमः। [ अस्माकमाङ्गलव्याख्यायाम् "अशितङ्ग" इति मुद्रणप्रमादः ]। अलं कर्म्मणे इति आदौ "पर्य्यादयः ग्लानाद्यर्थे चतुर्थ्या" इति समासस्ततः स्वार्थे खप्रत्ययः अलंकर्म्मीणः। कर्म्मदत्तः इत्यर्थः। अलं पुरुषाय इति पूर्व्ववत् समासः प्रत्ययश्च—तेन अलंपुरुषीणः। अधिशब्दः शौण्डादिषु पठ्यते। ईश्वरे अधि इति "सप्तमीशौण्डैः" इति ( २।१।४० ) समासः। ततः खप्रत्ययः—ईश्वराधीनः। एवं राजाधीनः। तथाहि "वेदाधीनं जगत् सर्व्वं। मन्त्राधीनाश्च देवताः। ते मन्त्राः ब्राह्मणाधीनास्तस्माद्ब्राह्मणाः देवताः"। परसूत्रे विभाषाग्रहणात् अयं प्रत्ययः नित्य इति ज्ञेयम्। अतएव ईश्वरे अधि इत्यादौ खप्रत्ययं विना न पदं युज्यते।

ननु किम् अयमेव प्रत्ययो नित्य अपि तु अन्येऽपि केचित्? समाधत्ते—"अन्येऽपि केचित् स्वार्थिकप्रत्ययाः नित्याः इति वक्तव्यम्"; यथा अवक्षेपणे कन् इति कन्प्रत्ययात् पूर्व्वं विहिताः तमप्प्रभृतयः। "पादशत—" ( ५।४।१ ) इति वुन्प्रत्ययात् पूर्व्वं विहिताः ज्यादयः। मयट्प्रत्ययात् प्राक् "किमे—" ( ५।४।११ ) इत्यादि सूत्रैः विहिताः आम्प्रत्ययाः। तथा बृहतीशब्दात् जात्यन्तात् च विहिताः प्रत्ययाः। एवं समासान्ताश्च। समासान्ताः खलु ईश्वरे अधि ईश्वराधीनम् इति एवंजातीयकाः। बृहतीशब्दात्तु "बृहत्या—" ( ५।४।६ ) इति सूत्रेण। जात्यन्तात् तु "जात्यन्ताच्छ बन्धुनि" ( ५।४।९ ) इति सूत्रेण।

२०६७। विभाषाञ्चेरदिक्स्त्रियाम् ॥ ५।४।८ ॥

दी—। अदिक्स्त्रीवृत्तेरञ्चत्यन्तात् प्रातिपदिकात् खः स्याद्वा स्वार्थे। प्राक्—प्राचीनम्। प्रत्यक्—प्रतीचीनम्। अवाक्—अवाचीनम्। "निकृष्टप्रतिकृष्टार्वरेफयाप्यवमाधमाः"। अर्वन्तम् अञ्चतीति अर्वाक्—अर्वाचीनम्। अदिक्स्त्रियां किम्? प्राचीदिक्। उदीची दिक्॥ दिग्ग्रहणम् किम्? प्राचीना ब्राह्मणी। स्त्रीग्रहणं किम्? प्राचीनम् ग्रामादाम्राः।

The suffix ख is optionally attached without altering the sense to words derived from the root अञ्च्, provided they, being used in the feminine gender, do not stand for any quarter of the horizon. See Tika also.

मित—। विभाषा अञ्चेः अदिक्स्त्रियाम् इति पदच्छेदः। "विभाषा" विकल्पेन "अञ्चेः" अञ्च्धातुनिष्पन्नात् प्रातिपदिकात् स्वार्थे खप्रत्ययो भवति, "अदिक्स्त्रियाम्" अदिक्स्त्रीवृत्तेः—[ दिक् चासौ स्त्री चेति दिक्स्त्री। तत्प्रतिषेधः ] यदि तत् प्रातिपदिकं स्त्रीलिङ्गे वर्त्तमानं सत् काञ्चित् दिशं न अभिधत्ते। प्राक् इति अञ्च्धातुनिष्पन्नं प्रातिपदिकम्। प्राक् एव प्राचीनम्। अत्र प्राक्शब्दः काले वर्त्तते न दिशि। अवाक् एव अवाचीनम्। अवाचीनम्—दक्षिण दिग्भवस्तु इति स्वामिजठाधरौ। अर्वन्तम् अञ्चति इति अर्वाक्। अर्वाक् पूर्वकालतः पश्चात् इति शब्दकल्पद्रुमः। निकट इति भरतः। अर्वाक् एव अर्वाचीनम्। पश्चात् जातम्। विपर्य्यस्तम् इति धरणिः। "निकृष्ट इत्यादि"—अवर्न्तम् अञ्चतीति वाक्ये अर्वन्तम् इत्यस्य कोऽर्थः इति प्रश्ने समाधानं ददाति। तथाहि अमरः— "निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः"। कुपूय कुत्सितावद्यखेटगर्ह्याणकाः समाः"। इति अर्वा निकृष्टः इत्यर्थः। अर्वन्तम् निकृष्टम् अञ्चति इति अर्वाक्।

अदिक्स्त्रियामिति किम्? प्राचीदिक्। अत्र दिशि स्त्रीलिङ्गे च वर्त्तमानत्वात् न ख-प्रत्ययः। एवं उदीची दिक्। सूत्रे दिक् इत्यस्यग्रहणम् किम्?

प्राचीना ब्राह्मणी। अत्र स्त्रीलिङ्गे वर्त्तमानादपि खप्रत्ययो भवति—दिशि वर्त्तमानत्वाभावात्। स्त्रियाम् इत्यस्य ग्रहणं किम्? प्राचीनं ग्रामात् आम्राः। अत्र प्राक् इत्यस्य दिशि वर्त्तमानत्वेऽपि स्त्रीलिङ्गे वर्त्तमानत्वाभावात् प्रत्ययः। प्राचीनम् पूर्व्वदेशस्थितम्।

२०६८। जात्यन्ताच्छ बन्धुनि ॥ ५।४।६ ॥

टी—। ब्राह्मणजातीयः। बन्धुनि किम्? ब्राह्मणजातिः शोभना। जातव्यञ्जकं द्रव्यं बन्धु।

The suffix छ is added to words ending in जाति to imply बन्धु i. e: the charaterstic of the said जाति।

मित—। "जात्यन्तात्" यस्य प्रातिपदिकस्य अन्ते जातिरिति तिष्ठति तस्मात् छप्रत्ययः स्यात् बन्धुनि अभिधेये सति। बध्यते लक्ष्यते अस्मिन् जातिरितिबन्धु। येन द्रव्येन ब्राह्मणत्वादि जातिर्व्यज्यते तत्द्रव्यम् बन्धु इति प्रोच्यते। [ बन्धुशब्दो द्विविधः। रूढ़ो यौगिकश्च। तत्राद्यो ज्ञात्यादिषु प्रसिद्धः स च पुंलिङ्ग एव। स नेह गृह्यते! 'बन्धुनि' इति नपुंसकनिर्द्देशात् ] ब्राह्मणजातीयः ब्राह्मणजातिलक्षणसनाथ, इत्यर्थः। क्षत्रियजातीयः। वैश्यजातीयः। बन्धुनि इति किम्? ब्राह्मणजातिः शोभना—अयं षष्ठीतत्पुरुषः—अत्र जातिरेवाभिधीयते नतु जातिलक्षणविशिष्टः कश्चित् तस्मात्, न प्रत्ययः।

२०६९। स्थानान्ताद्विभाषा सस्थानेनेति चेत् ॥ ५।४।१० ॥

टी—। सस्थानेन तुल्येन चेत् स्थानान्तम् अर्थवदित्यर्थः। पितृस्थानीयः। पितृस्थानः। सस्थानेन किम्? गोः स्थानम्।

The suffix छ is optionally attached to words ending in स्थान to denote equality (i. e. to imply "as good as") with the object, expressed by the word of which स्थान is the second member.

मित—। समानं स्थानम् अस्य इति सस्थानं तुल्यम्। स्थानान्तात् प्रातिपदि-कात् छप्रत्ययो विकल्पेन भवति "सस्थानेन"—तुल्येन चेत् "स्थानान्त" प्रातिपदिकम् "अर्थवत्" सार्थकम्; पितातुल्यः पितृस्थानीयः—पक्षे पितृस्थानः। मातृस्थानीया—मातृस्थाना। राजस्थानीयः—राजस्थानः। सस्थानेन इति किम्? गोःस्थानम्। अश्वस्थानम्?

२०७०। अनुगादिनष्ठक्। ५।४।१३॥

दी—। अनुगदतीत्यनुगादी। स एव आनुगादिकः।

The suffix ठक् is attached to the word अनुगादिन् without any alteration in the sense.

मित—। अनुगदतीत्यनुगादी, [ अस्मात् निपातनात् इह उत्तरसूत्रे च इनिः ]। अनुगादिन् इति प्रातिपदिकात् स्वार्थे ठक् प्रत्ययो भवति। अनुगादी एव इति आनुगादिकः।

२०७१। विसारिणो मत्स्ये॥ ५।४।१६॥

दी—। अण् स्यात्। वैसारिणः। मत्स्ये इति किम्? विसारी देवदत्तः।

The suffix अण् is attached ( स्वार्थे ) to the word विसारिण to imply fish.

मित—। मत्स्ये अभिधेये सति विसारिन्शब्दात् अण् प्रत्ययो भवति। विसर-तीति विसारी। तस्मात् अण् वैसारिणः मत्स्यः। प्रसरणशीलः मत्स्यः इत्यर्थः। मत्स्य इति किम्? विसारी देवदत्तः।

२०७२। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ ५।४।१७॥

दी—। अभ्यावृत्तिर्जन्म। क्रियाजन्मगणनवृत्तेः संख्याशब्दात् स्वार्थे कृत्वसुच् स्यात्। पञ्चकृत्वो भुङ्क्ते। संख्यायाः किम्? भूरि-वारान् भुङ्क्ते।

The suffix कृत्वसुच् is attached to cardinal numerals when they stand for the repetition of "times" of some action.

मित—। अभ्यावृत्तिः जन्म। पौनःपुन्यम् अभ्यावृत्तिरिति काशिका। "संख्यायाः" संख्यावाचकशब्देभ्यः "क्रियाभ्यावृत्तिगणने" एककर्तृकानां तुल्यजातीयानां क्रियाणाम् पौनःपुन्यगणने अभिधेये सति "कृत्वसुच्" इति प्रत्ययः स्वार्थे भवति। पञ्चवारान् भुङ्क्ते इति पञ्चकृत्वो भुङ्क्ते। सप्तकृत्वः। संख्यायाः इति किम्? भूरिवारान् भुङ्क्ते—अत्र न प्रत्ययः। नहि भूरिशब्दः संख्यावाचकः।

## २०७३। द्वित्रिचतुर्भ्यः सुच्॥ ५।४।१८॥

**दी—। कृत्वसुचोऽपवादः। द्विर्भुङ्क्ते। त्रिः। "रात्सस्य"—चतुः।**

In the aforesaid sense, the suffix सुच् (and not कृत्वसुच्) is affixed to the words द्वि त्रि and चतुर्।

मित—। द्वि त्रि चतुर् इति एतेभ्यः पूर्व्वोक्ते विषये सुच् प्रत्ययो भवति। कृत्वसुचोऽपवादः। द्विवारं भुङ्क्ते इति द्विः भुङ्क्ते। त्रिः भुङ्क्ते। चतुर् शब्दात् सुच्। "रात्सस्य" (८।२।२४) इति सकारस्य लोपः—तेन चतुरिति पदम्। चतुर्भुङ्क्ते। सुच् प्रत्यये चकार इत् सन् "चितः" (६।१।१६३) इति अन्तोदात्तत्वं ज्ञापयति।

## २०७४। एकस्य सकृच्च॥ ५।४।१९॥

**दी—। सकृदित्यादेशः स्याच्चात् सुच्॥ सकृद् भुङ्क्ते। संयोगान्तस्येति सुचो लोपः। ननु हल्ङ्याविति। अभैत्सीदित्यत्र सिच इव सुचोऽपि तदयोगात्।**

The suffix सुच् is added to the word एक in the aforesaid sense and before the suffix (i. e. the suffix following the base

is changed to सकृत्)। In सकृत+सुच्=सकृत्+स्, the स् elides by the rule "संयोगान्तस्य लोपः" and not by "हल्ङ्याब्भ्यो—" for here as सि stands for सिप् and not सिच् (as seen in अभ्यैमीत्), so स् stands for सुप and not for सुच्।

मित—। एकशब्दात् पूर्व्वोक्ते विषये सुच् प्रत्ययः स्यात्; प्रत्यय-सन्नियोगेनच प्रकृतिस्थाने सकृत् इति आदेशः। एक सुच् इति स्थिते सति सकृत् सुच् इति स्थितिः। "संयोगान्तस्य लोपः" (८।२।२३) इति सुचो (स) लोपः। "हल्ङ्याब्भ्यो दीर्घात् सुति-स्यपृक्तं हल्" (६।१।६८) इति सूत्रेण सुच् प्रत्ययस्य लोपो न भवति। कथमिति चेत्उच्यते—भीधातोर्लुङि प्रथमपुरुषैकवचने अभैत्सीत् इति रूपम्। तत्र सिच इति प्रत्ययस्य तस्यैव अपृक्तस्य हलः (स्कारस्य इत्यर्थः) लोपो न भवति तत्र सुतिसि इति तिप् प्रत्ययेन सहचरितस्य सिशब्दस्य ग्रहणात् सिचो ग्रहणं नास्ति। यथा तत्र सिचो ग्रहणं नास्ति तद्वत् 'सु' इत्यनेन सुचोऽपि। अतएव तेन सूत्रेण न सुच् प्रत्ययस्य लोपः।

**२०७५। विभाषा बहोर्धाऽविप्रकृष्टकाले ॥ ५।४।२० ॥**

**दी—। अविप्रकृष्ट आसन्नः। बहुधा दिवसस्य भुङ्क्ते। आसन्नकाले किम्? बहुकृत्वो मासस्य भुङ्क्ते ॥**

The suffix धा is optionally added to the word बहु in the aforesaid sense, when nearness of time is implied.

मित—। बहुशब्दात् पूर्व्वोक्ते विषये धाप्रत्ययो भवति विकल्पेन, पक्षे कृत्वसुच्—"अविप्रकृष्टे" आसन्ने समये गम्यमाने सति। क्रियाणामुत्पत्तयश्चेदासन्नकालाः भवन्ति, न विप्रकृष्टकालास्तर्हि बहुशब्दात् क्रियाभ्यावृत्तिगणने विकल्पेन धाप्रत्ययो भवति इत्यर्थः, दिवसे बहून् वारान् भुङ्क्ते इति बहुधा दिवसस्य भुङ्क्ते। पक्षे कृत्वसुच् बहुकृत्वोभुङ्क्ते दिवसस्य। अविप्रकृष्टकाल इति किम्? बहुकृत्वो मासस्य भुङ्क्ते। अत्र मासस्य इति विप्रकृष्टकालाः एव क्रियाणाम् उत्पत्तयः व्यज्यन्ते—अतएव अत्र न धा अपितु कृत्वसुच् एव।

२०७६ । तत्प्रकृतवचने मयट् ॥ ५।४।२१ ॥

टी— । प्राचुर्य्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनम् । भावेऽधिकरणे वा ल्युट् । आद्ये प्रकृतमन्नमन्नमयम् । अपूपमयम् । यवागूमयी । द्वितीये अन्नमयो यज्ञः । अपूपमयं पर्व ।

The suffix मयट् is added to words to imply the sufficiency of the objects—expressed by the said words. See Tika for rest.

मित— । तदिति प्रथमासमर्थविभक्तिः । प्रकृष्टं कृतं प्राचुर्य्येण प्रस्तुतम् इति प्रकृतम् । तस्य वचनं कथनम् इति प्रकृतवचनं । वचनमिति वचिधातोर्भावे ल्युट् । तस्य प्रकृतवचनमिति तत्प्रकृतवचनं । "तस्ये"ति प्रातिपदिकेन वाच्यस्य वस्तुनः "प्रकृतवचने" प्राचुर्य्यस्य सत्तायां गम्यमानायां सत्यां प्रथमा-समर्थेभ्यः प्राति-पदिकेभ्यो मयट् प्रत्ययो भवति । यद्वा प्रकृतवचनमित्यत्र वचनपदे अधिकरणवाच्ये एव ल्युट् । प्रकृतम् उच्यते ऽस्मिन् इति प्रकृतवचनम् । यस्मिन् वस्तुनि अपरस्य वस्तुनः प्रकृतत्वम् अभिधीयते—तस्मात् अपरवस्तुवाचकात् प्रातिपदिकात् मयट् प्रत्ययो भवति । तत्र प्रथमव्याख्याम् अनुसृत्य उदाहरणं यथा—प्रकृतम् प्राचुर्य्येण प्रस्तुतम् अन्नम् इति अन्नमयम् । प्रकृतम् अपूपम् इति अपूपमयम् । मयट् प्रत्ययो टकार इत् सन् स्त्रियां ङीप् प्रत्ययं सूचयति । प्रकृता यवागूरिति यवागूमयी । अत्र प्रचुरार्थ-बोधकात् प्रथमान्तात् प्रातिपदिकात् प्राचुर्य्ये द्योत्ये मयट् प्रत्ययः स्यादिति ज्ञेयम् । अतएव "आनन्दमयोऽभ्यासात्" ( ब्रह्मसूत्र १।१।१३ ) इत्यस्य अनन्तरमेव "विकार-शब्दान्नेति चेन्न प्राचुर्य्यात्" ( ब्रह्मसूत्र १।१।१४ ) इति सूत्रे भगवता बादरायणेन भावे एव मयट् प्रत्ययोऽङ्गीकृतः । द्वितीयव्याख्याम् अनुसृत्य उदाहरणम् यथा—अन्नम् प्रकृतम् ( प्राचुर्य्येण प्रस्तुतम् ) अस्मिन् इति अन्नमयो यज्ञः । अपूपम् प्रकृतम् अस्मिन् इति अपूपमयं पर्व । एवं वटकमयी यात्रा । अत्र प्रचुरार्थबोधकात् प्रथमान्तात् प्रचुराधिकरणे द्योत्ये मयट् ।

२०७७। समूहवच्च बहुषु ॥ ५।४।२२ ॥

टी—। सामूहिकाः प्रत्यया अतिदिश्यन्ते, चान्मयट्। मोदकाः प्रकृताः मौदकिकम्। मोदकमयम्। शाष्कुलिकम्। शष्कुलीमयम्। द्वितीयेऽर्थे मौदकिको यज्ञः। मोदकमयः।

All the suffixes that are attached to words in the sense of समूह i. e. to imply groups, may also be added when the sufficiency of a large number of things is implied.

मित—। समूहार्थे अभिधेये ये प्रत्ययाः विहितास्ते बहुषु प्रकृतेषु उच्यमानेषु मतम् विधीयन्ते। सूत्रस्थचकारबलात् मयट् च। मोदकाः प्रकृताः प्राचुर्य्येण प्रस्तुताः इति मौदकिकम्। अत्र ठक् प्रत्ययः। ठक् समूहार्थे विधीयते—अतएव अत्रापि अतिदिश्यते। पक्षे मयट् मोदकमयम्। शष्कुल्यः प्राचुर्य्येण प्रस्तुताः इति शाष्कुलिकम् पक्षे शष्कुलीमयम्। एतत् उदाहरणम् प्रथमव्याख्यानुसारेण। द्वितीय व्याख्यानुसारेण यथा—मोदकाः प्रकृता अस्मिन् यज्ञे इति मौदकिकः यज्ञः। मोदकमयो यज्ञः। शाष्कुलिको यज्ञः। शष्कुलीमयो यज्ञः। शष्कुली इति स्त्रीलिङ्गम् तस्मात् स्वार्थे विहितो मयट्। शष्कुलीमयम् इति कथं क्लीवत्वं भजते इति चेत्—उच्यते, "स्वार्थिकाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते :

२०७८। अनन्तावसथेतिहभेषजाञ्ञ्यः ॥ ५।४।२३ ॥

टी—। अनन्तएव आनन्त्यम्। अवसथ एव आवसथ्यम्। इतिहेति निपातसमुदायः—ऐतिह्यम्। भेषजम् एव भैषज्यम्।

The suffix ञ्य is added to the words अनन्त, अवसथ, इतिह and भेषज without any alteration in the sense.

मित—। अनन्त अवसथ इतिह भेषज इति एतेभ्यः स्वार्थे ञ्यप्रत्ययः स्यात्। महाविभाषया प्रत्ययस्य विकल्पत्वमेव। अनन्त एव आनन्त्यम्। अवसथ एव

आवसथ्यम्। इतिह इति निपातसमुदायः अयम् उपदेश-पारम्पर्ये वर्त्तते। इतिह श्रूयते इत्यादयः उपनिषदि विष्णुपुराणादौ च दृश्यन्ते। इतिह इति अव्यय-शब्दात् ञ्यः—ऐतिह्यम्। ऐतिह्यम् इति श्रुतिः। भेषजम् औषधम्। तदेव भैषज्यम्।

## २०७९। देवतान्तात्तादर्थ्ये यत्॥ ५।४।२४॥

**टी—। तदर्थ एव तादर्थ्यम्। स्वार्थे ष्यञ्। अग्निदेवतायै इदम् अग्निदेवत्यम्। पितृदेवत्यम्।**

The suffix यत् is attached to words ending in देवता to denote something meant for them.

मित—। तस्मै अर्थः तदर्थः। तदर्थ एव तादर्थ्यमिति चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। 'देवतान्तात्" देवताशब्दान्तात् प्रातिपदिकात् चतुर्थीसमर्थात् "तादर्थ्ये यत् प्रत्ययोभवति। अग्निदेवतायै इदम् इति अग्निदेवत्यम्। पितृदेवतायै इदं इति पितृदेवत्यम्। एवं वायु देवत्यम्। "अग्निदैवत्यम्" इत्यादि तु प्रामादिकः पाठः।

## २०८०। पादार्घाभ्याञ्च॥ ५।४।२५॥

**टी—। पादार्थम् उदकम् पाद्यम्। अर्घ्यम्।**

The suffix यत् is also to be attached to the words पाद and अर्घ in the aforesaid sense.

मित—। पाद अर्घ इति एताभ्याम् चतुर्थीसमर्थाभ्यां यत्प्रत्ययः स्यात्तादर्थ्ये अभिधेये सति। पादाय इदम् पाद्यम्। पाद्यशब्दस्तु पादार्थे उदके एव वर्त्तते। अर्घाय इदं अर्घ्यम्। शिरसि प्रदेयम् पुष्पादि। सूत्रस्थचकारस्तु अनुक्तमप्यर्थम् समुच्चिनोति। तेन अन्यत्रापि दृश्यते यथा—वर्चसे इदं वर्चस्यम्। उक्थाय इदं उक्थ्यम्।

**टी—। नवस्य नू आदेशः त्नप्तनप्-खाश्च प्रत्यया वक्तव्याः॥ नूत्नम्। नूतनम्। नवीनम्।**

मित—। नवशब्दात् तप् तनप् ख इति प्रत्ययाः भवन्ति ; प्रत्ययसन्नियोगेन च नवशब्दस्य स्थाने नु इति आदेशः स्यात्। नव तप् नूतम्। नव तनप् नूतनम्। नव ख इति—ततः नु ख इति ततः नू ईन इति ; ततः गुणे सति सन्धिवशेन नवीनम्।

**दी—। नश्च पुराणे प्रात्॥ पुराणार्थे वर्त्तमानात् प्रशब्दान्नो वक्तव्यः। चात् पूर्वोक्ताः। प्रणम्। प्रतम्। प्रतनम्। प्रीणम्।**

मित—। प्र इति निपातनम् पुराणम् इत्यस्य द्योतकम्। अस्मात् नप्रत्ययो भवति तथा सूत्रस्थचकारबलात् तप् तनप् खप्रत्ययाश्च। पुराणम् एव इति प्रशब्दात् नः—प्रणः। तप्—प्रतम्। तनप् प्रतनम्। ख—प्रीणम्। प्रततत्त्वम् पुरातनकथा।

**दी—। भागरूपनामभ्यो धेयः॥ भागधेयम्। रूपधेयम्। नामधेयम्।**

मित—। भागः भाग्यम्। नामरूप भाग इति एतेभ्य स्वार्थे धेय इति प्रत्ययो भवति। भाग एव भागधेयम्। रूपमेव रूपधेयम्। नामएव नामधेयम्।

**दी—। आग्नीध्र साधारणादञ्॥ आग्नीध्रम्। साधारणम्। स्त्रियां ङीप् आग्नीध्री। साधारणी।**

मित—। आग्नीध्र साधारण इति एताभ्याम् अञ् प्रत्ययो भवति। आग्नीध्रम्। साधारणम्। प्रत्ययस्य ञित्त्वात् स्त्रियाम् ङीप्—तेन आग्नीध्री। साधारणी। समानं धारणमस्याः इति साधारणी (पृषोदरादित्वात् समानस्य सभावः)। [काशिकातु अत्र प्रत्ययस्य वैकल्पिकत्वं मन्यते तेन यथाप्राप्तमपि भवति—आग्नीध्रा शाला ; साधारणा भूरिति]

**२०८१। अतिथेर्ञ्यः॥ ५।४।२६॥**

**दी—। तादर्थ्ये इत्येव। अतिथये इदम् आतिथ्यम्।**

The suffix ञ्य is added to the word अतिथि to imply something meant for it.

मित—। अतिथिशब्दात् चतुर्थीसमर्थात् तादर्थ्ये अभिधेये ञ्य प्रत्ययो भवति। अतिथये इदं आतिथ्यम्।

२०८२। देवात्तल् ॥ ५।४।२७ ॥

दी—। देव एव देवता।

The suffix तल् is affixed to the word देव without any alteration in the sense.

मित—। तादर्थ्ये इति नानुवर्त्तते। देवशब्दात् स्वार्थे तल्प्रत्ययो भवति।

२०८३। अवेः कः ॥ ५।४।२८ ॥

दी—। अविरेवाविकः।

The suffix क is attached to the word अवि without any change in the sense.

मित—। अविशब्दात् स्वार्थे क प्रत्ययो भवति। अवि मेषः।

२०८४। यावादिभ्यः कन् ॥ ५।४।२९ ॥

दी—। याव एव यावकः। मणिकः।

The suffix कन् is attached, without any change in the meaning, to the word याव and others that pass by the term यावादि।

मित—। याव इत्येवमादिभ्यः स्वार्थे कन्प्रत्ययो भवति। याव एव यावकः। यावकः अलक्तकम्। तथाहि चण्डीदासपदावल्याम्—"चरणकमले मल्लतोड़ल-सुन्दरयावकरेखा"। मणिरेव मणिकः। यावादिर्यथा—याव, मणि, अस्थि, तालु, चण्ड, पीत, स्तम्ब, सान्द्र, जानु, अपिच पुत्र कृत्रिमे, कृत्रिमः पुत्रः, पुत्रकः स्नातवेद समाप्तौ, स्नातकः समाप्तवेदः, शून्य रिक्ते, शून्यकः रिक्तः, दान कुत्सिते दानकः

कुत्सितः, तनु सूत्रं, तनुकः सूत्रम्, ऋतावुष्णशीते—उष्णकः ग्रीष्मः ऋतुः, शीतकः शिशिरः ऋतुः, अनु निपुणे अनुकः निपुणः, पशौ शल विपर्य्यं ते, शलकः पशुः, किञ्च ज्ञातकुमार अज्ञातक्रीड़न इति एते अपि अत्र पश्यन्ते। ईयमुन्प्रत्ययान्तञ्च —यथा—श्रेयस्कः।

## २०८५। लोहितान्मणौ ॥ ५।४।३० ॥

## टी—। लोहित एव मणिर्लोहितकः।

The suffix कन् is added to the word लोहित to imply some gem original.

मित—। "लोहितात्" लोहितशब्दात् "मणौ" अभिधेये सति स्वार्थे कन् प्रत्ययो भवति। लोहित एव मणिर्लोहितकः। मणौ इति किम्? लोहितो रक्तः।

## २०८६। वर्णे चानित्ये ॥ ५।४।३१ ॥

## टी—। लोहितकः कोपेन।

The suffix कन् is attached to the word लोहित to imply some temporay reddishness.

मित—। "अनित्ये" अस्थायिनि-समयवशात्जाते—केनचित् कारणेन वा जनिते इत्यर्थः 'वर्णे' अभिधेये सति लोहितशब्दात् कन्प्रत्ययो भवति। लोहितकः अयं वटुः कोपेन। नहि वटुः स्वभावेन एव लोहितः—अपितु कोपवशादेव। तत्र सामयिकं लोहितत्वं सञ्जातं। लोहितकः पीड़नेन क्रिया वा। अनित्ये इति किम्? लोहितः गौः। लोहितं रूपम्।

## टी—। लोहितात्लिङ्गबाधनं वा ॥ लोहितिका, लोहिनिका कोपेन।

मित—। लोहितशब्दात् परस्य स्त्रीलिङ्गबोधकप्रत्ययस्य कना बाधा वा स्यात् इति वार्त्तिकार्थः। ततः सति बाधे लोहितशब्दात् विहिते कन्प्रत्यये तु स्त्रियाम्

"प्रत्ययस्थात् कात्—" (७।३।४४) इति सूत्रेण लोहितिका इति स्यात्। पक्षे अनेन वार्त्तिकेण कना ङीपो बाधे असति "वर्णादनु—" (४।१।३९) इति ङीप् प्रत्यये परे यो नकारादेशविधिः स इहापि स्यात्—तेन लोहिनिका, कोपेन लोहितिका लोहिनिका वेयं रमणी।

२०८७। रक्ते ॥ ५।४।३२ ॥

**दी—। लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात् कन् स्यात्। लिङ्गबाधनं वेतीव। लोहितिका लोहिनिका शाटी।**

The suffix कन् is attached to the word लोहित when it denotes something dyed with lac or the like. There arises optionel bar to ङीप् ( the स्त्रीलिङ्गबोधक प्रत्यय ) by कन् here also.

मित—। रक्तः विहितरागः। "रक्ते" लाक्षाप्रभृतिना रञ्जकद्रव्येन उत्पादितरागे वस्तुनि गम्यमाने सति लोहितशब्दात् कन् प्रत्ययो भवति। लोहितकः कम्बलः। लोहितकः पटः। लाक्षादिना, उत्पादितरागः इत्यर्थः। स्त्रियां ङीप् प्रत्ययस्य कना बाधा वा स्यात्तत्रापि ततः—लोहितिका शाटी ; पक्षे नकारादेशस्य —लोहिनिका शाटी।

२०८८। कालाच्च ॥ ५।४।३३ ॥

**दी—। "वर्णे चानित्ये" "रक्ते" इति द्वयमनुवर्त्तते। कालकं मुखं वैलक्ष्येण। कालकः पटः। कालिका शाटी।**

The suffix कन् is attached to the word काल to imply something which has been temporarily dyed with black.

मित—। काल इति कृष्णवर्णे तथा कृष्णवर्णरञ्जकद्रव्ये च वर्त्तते। तथाहि रघौ "अन्यत्र काला गुरुदत्तपत्रा" इति। "वर्णे च अनित्ये," "रक्ते" इति सूत्रद्वयस्य अत्र अनुवृत्तिस्तेनायमर्थः सूत्रस्य—"कालात्" कालशब्दात् "च" अपि कन्प्रत्ययो भवति, वस्तुनरे सामयिककालो राग उत्पादितः इति तथा कालरञ्जकद्रव्येन

द्रव्यान्तरं रञ्जितम् इति च गम्यते चेत्। कालकं मुखं वैलक्ष्येण। वैलक्ष्येण विकारेण। विकारेण मुखे सामयिकं कालत्वं सञ्जातमित्यर्थः। कालकः पटः—कालरञ्जकगव्येण रञ्जितः पटः इत्यर्थः। स्त्रियां—कालिका शाटी।

२०८८। विनयादिभ्यष्ठक् ॥ ५।४।३४ ॥

टी—। विनय एव वैनयिकः। सामयिकः।

The suffix ठक् is added to the word विनय and others passing by the denomination विनयादि without any alteration in the sense.

मित—। विनय इत्येवमादिभ्यः ठक्प्रत्ययो भवति स्वार्थे, विनय एव वैनयिकः

टी—। उपायो ह्रस्वत्वं च ॥ औपयिकः।

मित—। विनयादिषु उपायशब्दः पठ्यते। स्वार्थे विहिते ठक् प्रत्यये परतः तस्य ह्रस्वत्वं च भवति। उपाय एव औपयिकः—अत्र आकारस्य ह्रस्वत्वम्। तथा च भारविः "शिवमौपयिकम्" इत्यादि। विनयादि यथा—विनय, समय, उपाय, संप्रति, संगति, कथञ्चित्, अकस्मात्, समाचार, औपचार, समयाचार, व्यवहार, संप्रदान, समुत्कर्ष, समूह, विशेष, प्रत्यय।

२०९०। वाचो व्याहृतार्थायाम् ॥ ५।४।३५ ॥

टी—। संदिष्टार्थायां वाचि विद्यमानात् वाक्शब्दात् स्वार्थे ठक् स्यात्। "सन्देशवाक् वाचिकं स्यात्"।

The suffix ठक् is attached to the word वाक्—without any alteration in the sense, provided the said base stands for message.

मित—। व्याहृतः प्रकाशितोऽर्थो यस्याः सा व्याहृतार्था। तस्यां वर्त्तमानात् वाच्शब्दात् स्वार्थे ठक्प्रत्ययो स्यात्। अन्येन सन्दिष्टा या वाक्—तस्याम् अभिधेयायां सत्याम् एव वाच्शब्दात् ठक् इष्यते। अपरेण प्रोक्ता वाक् इति

ठक्—वाचिकम्। तथाहि अमरकोषे—"सन्देशवाक् वाचिकं स्यात्"। सन्देशवाक् अन्येन प्रोक्ता वाणी इत्यर्थः। दूतः वाचिकं कथयति। दूतमुखेन वाचिकं प्रहिणोति। तस्य वाचिकं श्रावय। व्याहृतार्थायाम् किम? मधुरा वाग देवदत्तस्य।

## २०८१। तद्युक्तात् कर्मणोऽण्॥ ५।४।३६॥

**टी—। कर्मैव कार्मणम्। वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः।**

The suffix अण् is to be attached to the word कर्म which is connected with वाचिक ( message ), ( i. e. the duty-done in consequence of message ).

मित—। "तद्युक्तात्" व्याहृतार्थया वाचा यत् कर्म्म युक्तं तदभिधायिनः "कर्मणः" कर्मशब्दात् स्वार्थे अण्प्रत्ययो भवति। कर्म एव इति अण् कार्मणम्। वाचिकं श्रुत्वा तथैव यत् कर्म क्रियते तत् कार्मणम् इत्युच्यते।

## २०८२। ओषधेरजातौ॥ ५।४।३७॥

**टी—। स्वार्थे अण्। औषधं पिबति। अजातौ किम्? ओषधयः क्षेत्रे रूढ़ाः।**

Tee suffix अण् is to be attached to the word ओषधि provided it does not stand for any class-name ( i. e. does not denote any class ).

मित—। अजातौ वर्त्तमानात् ओषधिशब्दात् स्वार्थे अण्प्रत्ययो भवेत्। ओषधिरेव इति अण् औषधम। औषधं पिबति रोगी। औषधं ददाति भिषक्। अजातौ इति किम्? क्षेत्रे ओषधयः रूढ़ाः। ओषधयः फलपाकान्ताः वृक्षाः।

## २०८३। प्रज्ञादिभ्यश्च॥ ५।४।३८॥

**टी—। प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। दैवतः। बान्धवः।**

The suffix अण् is added to words that pass by the denomination प्रज्ञादि, without affecting the sense of the said words.

मित—। प्रजानाति इति प्रज्ञः। प्रपूर्व्वकात् ज्ञाधातोः कप्रत्ययः। प्रज्ञ इत्येवमादिभ्यः स्वार्थे अण् प्रत्ययो भवति। प्रज्ञ एव प्राज्ञः। स्त्रियां प्राज्ञी स्त्री।

ननु कथं तर्हि प्राज्ञा इति दृश्यते ? उच्यते, "यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा भवति"। "प्रज्ञाश्रद्धा—" (५।२।१०१) इति सूत्रेण तत्र णप्रत्ययः। स्त्रियामाप्। पूर्व्वोदाहरणे "टिड्ढाण—" (४।१।१५) इति ङीप्। अत्र तु न तथा। देवता एव इति दैवतः। "दैवतम् हि पतिः स्त्रियाः"। बन्धुरेव इति बान्धवः। "राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः"। प्रज्ञादिर्यथा—प्रज्ञ, बन्धु, देवता, वणिज्, उष्णिक्, उश्मिक्, प्रत्यक्ष, विद्वस्, विदन्, षोड़न्, विद्या, मनस्, मनः एव मानसम्, श्रोत्र शरीरे, श्रौत्रं कर्णः, जुहत्, कृष्णः मृगे कार्ष्णः मृगविशेषः कृष्णसारः इत्यर्थः। चिकीर्षत्, चोरः, चोरः एव चौरः, शत्रु, योध, चक्षुस्, वसु, एनस्, मरुत्, मरुत् एव इति मारुतः, सत्वत्, सत्वत् एव सात्वतः, दशार्हः, दशार्ह एव इति दाशार्हः, वयस्, व्याकृत, असुरः, रक्षस्, स एव इति राक्षसः, पिशाच, अशनि, कार्षापण, शक्र, आतुर। आकृतिगणोऽयम्।

## २०६४। मृदस्तिकन् ॥ ५।४।३९ ॥

## दी—। मृदेव मृत्तिका।

The suffix तिकन् is added to the word मृद्—without affecting the sense.

मित—। मृद् इत्यस्मात् स्वार्थे तिकन्प्रत्ययो भवति। सर्व्वत्रैव प्रत्ययस्य वैकल्पिकत्वं—मृत् एव मृत्तिका। "स्त्रियां प्रत्ययस्यादित्वेनैव सिद्धे" इकारोच्चारणं प्रक्रियालाघवार्थम्। टापो लुकि समासादौ श्रवणार्थञ्च"—इति मनोरमायां स्पष्टम्।

## २०६५। सस्नौ प्रशंसायाम् ॥ ५।४।४० ॥

दी—। रूपपोऽपवादः। प्रशस्ता मृत् मृतसा। मृत्स्ना। उत्तरसूत्रे ऽन्यतरस्याम् ग्रहणात् नित्योऽयम्।

The two suffixes स and स्न are added to the word मृद to imply the better quality of the same. This is नित्य (obligatory) for we have अन्यतरस्याम् ( = विकल्प = optionality) in the next rule.

मित—। मृदः प्रशंसायाम् गम्यमानायाम् सस्न इति प्रत्ययौ भवतः। रूपप् प्रत्ययस्य अपवादः। प्रशस्ता मृत् मृत्सा। मृत्स्ना। मृत् इत्यस्य स्त्रीत्वात् मृत्तिका मृत्सा मृत्स्ना इति एतेषामपि स्त्रीत्वम्। अयं प्रत्ययः नित्यः नतु वैकल्पिकः। एतत् तु परसूत्रे अन्यतरस्याम् इत्यस्य दर्शनात् ज्ञायते।

## २०९६। बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥ ५।४।४२ ॥

दी—। बहूनि ददाति बहुशः। अल्पानि अल्पशः।

The suffix शस् is optionally affixed to words meaning many or few ( much or little ), when they are used in any case.

मित—। बहु इति एतस्मिन्नर्थे तथा अल्प इति एतस्मिन्नर्थे च वर्त्तमानात् कारकाभिधायिनः प्रातिपदिकात् शस् प्रत्ययोभवति अन्यतरस्याम्। कारकाभिधायिनः इत्यत्र विशेषेण अनभिधानात् सर्व्वं कर्म्मादिकारकं गृह्यते। बहूनि ददाति इति बहुशः ददाति। अल्पानि इति अल्पशः ददाति। बहुभिर्ददाति इति बहुशो ददाति। अल्पेन आदत्ते इति अल्पशः आदत्ते। एवं बहुभ्यः—बहुशः। अल्पेभ्यः—अल्पशः इत्येवमाद्युदाहार्य्यम्। बह्वल्पार्थादिति किम्? गां ददाति। अश्वं ददाति। कारकाभिधायिनः इति किम्? बहूनां स्वामी। अल्पानां स्वामी। सूत्रे बह्वल्पार्थात् इति अर्थशब्दस्यग्रहणात् बहुपर्य्यायेभ्यस्तथा अल्पपर्य्यायेभ्यश्चायं प्रत्ययः इष्यते; यथा—भूरिशः ददाति; स्तोकशः आदत्ते।

दी—। बह्वल्पार्थान्मङ्गलामङ्गलवचनम्। नेह—बहूनि ददात्यनिष्टेषु। अल्पं ददात्याभ्युदयिकेषु।

मित—। यथाक्रमं मङ्गलामङ्गलवाचकयोगे एवायं प्रत्ययः। फलतः यत्र मङ्गलं गम्यते तत्रैव अयं प्रत्ययः। यत्र अमङ्गलं गम्यते तत्र तु अयं न स्यात्। यज्ञकर्म्मणि भूरिशः ददाति। अत्र मङ्गलं गम्यते अतएव प्रत्यय इष्टः। अनिष्टेषु बहूनि ददाति इत्यत्र प्रत्ययो नेष्टः। अनिष्टेषु इति अमङ्गलस्य दर्शनात्। अल्पं ददाति आभ्युदयिकेषु। इत्यत्रापि प्रत्ययो नेष्यते। कथमिति चेत्— उच्यते। आभ्युदयिक इति श्राद्धपर्य्यायः। "श्राद्धादिषु" इति भाष्ये पर्य्यायः प्रदर्शितः। श्राद्धन्तु मृतमेव उद्दिश्य अनुष्ठीयते—अतएव तत्र अल्पदानेन अमङ्गलत्वं सूचितम्। तस्मात् अमङ्गलस्य सूचनात् अत्र शस्प्रत्ययो न भवति। प्रायिकं चैतत्।

## २०८७। संख्यैक-वचनाच्च वीप्सायाम्॥ ५।४।४३॥

**दी—। द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। परिमाणशब्दा वृत्तावेकार्था एव। संख्यैकवचनात् किम्? घटं घटं ददाति। वीप्सायां किम्? द्वौ ददाति। कारकादित्येव—द्वयोर्द्वयोः स्वामी।**

The suffix शस् is optionally added to cardinal numerical words and also to other words standing for a single unit (i. e. to collective nouns denoting परिमाण) in the sense of repetition.

मित—। वीप्सायां गम्यमानायाम् संख्यावाचिभ्यः प्रातिपदिकेभ्यस्तथा एकवचनात् प्रातिपदिकेभ्यः शस् प्रत्ययो भवति अन्यतरस्याम्। द्वौ द्वौ मोदकौ ददाति इति द्विशः मोदकं ददाति। एवं त्रिशः। एकवचनात्—माषं माषं ददाति माषशः ददाति। प्रस्थं प्रस्थं ददाति प्रस्थशः ददाति। एवं पादशो ददाति। एकवचनात् इत्यस्य कोऽर्थः? एकोऽर्थः उच्यते येन तदेकवचनम्। कार्षापणादयश्च परिमाण-शब्दा वृत्तौ ( अर्थप्रकाशनविषये ) एकार्था एव भवन्ति। संख्यैकवचनात् इति किम्? घटं घटं ददाति। अत्र न हि घटशब्दः संख्यावाची, नापि एकार्थाभिधायी। तस्मात् न प्रत्ययः। वीप्सायाम् इति किम्? द्वौ ददाति। कारकादिति अनुवर्त्तते तेन कारकादेव अयं अतएव द्वयोः द्वयोः स्वामी इत्यत्र प्रत्ययो नेष्यते। एवं कार्षापणस्य कार्षापणस्य स्वामी इत्यपि प्रत्ययोन।

२०९८। प्रतियोगे पञ्चम्यास्तसिः ॥ ५।४।४४ ॥

दी—। प्रतिना कर्म्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात्। प्रद्युम्नः कृष्णतः प्रति।

The suffix तसि is added to words ending in the fifth case-ending in connection with the कर्मप्रवचनीय प्रति।

मित—। "प्रतिनिधि-प्रतिदाने च यस्मादिति" (२।३।११) प्रतेः कर्म्म-प्रवचनीयत्वं तद्योगे च पञ्चमी। ईदृशस्य पञ्चम्यन्तस्य तसिः स्यात्। प्रद्युम्नः कृष्णात् प्रति इति तसिः—तेन प्रद्युम्नः कृष्णतः प्रति इत्यपि स्यात्।

दी—। आद्यादिभ्य उपसंख्यानम् ॥ आदौ आदितः। मध्यतः। पूर्व्वतः। पार्श्वतः। आकृतिगणोऽयम्। स्वरेण-स्वरतः। वर्णतः।

मित—। आदि इत्येवमादिभ्यश्च तसिः स्यात्। आदौ आदितः। मध्ये मध्यतः। "अग्रे व्याधः करधृतशरः पार्श्वतो जालमाला"। आद्यादिस्तु आकृतिगणः। स्वरेण स्वरतः। वर्णेन वर्णतः। "यतःस्वरतो वर्णतो वा"। "यथेन्द्रशत्रुः स्वरतोऽपराधात्"।

२०९९। अपादाने चाऽहीयरुहोः ॥ ५।४।४५ ॥

दी—। अपादाने या पञ्चमी तदन्तात्तसिः स्यात्। ग्रामादागच्छति। ग्रामतः। अहीयरुहोः किम्? स्वर्गात् हीयते। पर्वतात् अवरोहति।

The suffix तसि may be added to words to give the sense of the ablative case—the fifth case-ending being substituted by the said suffix, except with reference to the two roots हीय and रुह।

मित—। अपादाने या पञ्चमी विहिता, तस्याः पञ्चम्याः वा तसिप्रत्ययः स्यात् तच्चेदपादानम् हीयधातोस्तया रुहधातोश्च सम्बन्धि न भवति। ग्रामादागच्छति इति ग्रामतः आगच्छति। चौरात् बिभेति इति चौरतः बिभेति। अध्ययनात् पराजयते इति अध्ययनतः। अहीयरुहोः इति किम्? स्वर्गात् हीयते। पर्व्वतात् अवरोहति। हीयते इति विकारनिर्द्देशात् "ओहाक् त्यागे" इति जहातेरेव प्रतिपत्तिः न खलु "ओहाङ् गतौ" इति जिहीतेः। अतएव भूमेः उज्जिहीते इति भूमितः उज्जिहीते इति प्रयोगः साधुरेव स्यात्। कथं "मन्त्रो हीनः स्वरतो वर्णतो वा" इति वाक्ये "हीनः" इति हाक् धातोः अवस्थितौ अपि तसिरिति चेत् उच्यते—नैषा पञ्चमी। किं तर्हि? तृतीया। स्वरेण वर्णेन वा हीनः इत्यर्थः।

## २१००। अतिग्रहाऽव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः ॥ ५।४।४६ ॥

**दी—। अकर्त्तरि तृतीयान्ताद्वा तसिः स्यात्। अतिक्रम्य ग्रहोऽतिग्रहः। चारित्रेणातिगृह्यते। चारित्रतोऽतिगृह्यते। चारित्रेणान्यानतिक्रम्य वर्त्तत इत्यर्थः। अव्यथनमचलनम्। वृत्तेन न व्यथते। वृत्ततो न व्यथते। वृत्तेन न चलतीत्यर्थः। क्षेपे— वृत्तेन क्षिप्तः। वृत्ततः क्षिप्तः। वृत्तेन निन्दितः इत्यर्थः। अकर्त्तरीति किम्? देवदत्तेन क्षिप्तः।**

The suffix तसि is added to words replacing the third case-ending after them with reference to "surpassing", "standing firm" and "censuring" provided the said third case-ending is not due to nominative case ( अनुक्तकर्त्ता )।

मित—। अतिक्रम्य ग्रहोऽतिग्रहः। अन्यम् अतिक्रम्य स्थितिरित्यर्थः। अन्यातिशायिनी स्थितिरिति भावः। अव्यथनम् अचलनम्। क्षेपः निन्दा। अतिग्रहे अव्यथने क्षेपे च वर्त्तमाना या तृतीया तदन्ताद्वा तसिप्रत्ययो भवति सा चेत् तृतीया

कर्त्तरि न स्यात्। चारित्रेण अतिगृह्यते इति चारित्रतः अतिगृह्यते। चारित्र-बलेन अन्यानतिशेते। वृत्तेन न व्यथते इति वृत्ततो न व्यथते। वृत्तेन न चलतीत्यर्थः। वृत्तेन क्षिप्तः इति वृत्ततः क्षिप्तः। चारित्रेण निन्दितः इत्यर्थः। अकर्त्तरीति किम्? देवदत्तेन क्षिप्तः। विष्णुदत्तेन अतिगृह्यते। यज्ञसेनेन व्यथितः इति एतेषु न प्रत्ययः।

२१०१। हीयमानपापयोगाच्च ॥ ५।४।४७ ॥

दो—। हीयमानपापयुक्तादकर्त्तरि तृतीयान्ताद्वा तसिः। वृत्तेन हीयते। वृत्तेन पापः। वृत्ततः। क्षेपस्याविवक्षाया-मिदम्। क्षेपे तु पूर्व्वेण सिद्धम्। अकर्त्तरि किम्? देवदत्तेन हीयते।

The suffix तसि optionally replaces any third case-ending ( save and except that used in the nominative case ) coming after a word with which is connected the word पाप or any other word derived from the root हा to abandon. Rest easy.

मित—। "अकर्त्तरि तृतीयाया" इत्येव। हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात् परा या तृतीयाविभक्तिरकर्त्तरि तदन्ताद्वा तसिः प्रत्ययो भवति"—काशिका। हीयमानेन योगः—वृत्तेन हीयते—वृत्ततः हीयते। चारित्रेण हीयते—चारित्रतो हीयते. पापेन योगः—वृत्तेन पापः—वृत्ततः पापः। चारित्रेण पापः—चारित्रतः पापः।

ननु "क्षेपेषु" इति पूर्व्वसूत्रे कथितत्वात् कथं पुनरपि इदम् इति चेत्?—समाधत्ते—"क्षेपस्याविवक्षायाम् इदम्" इत्यनेन। क्षेपस्य निन्दायाः अविवक्षा अत्र गम्यते। तर्हि कस्मिन्नर्थे प्रत्ययः? "तत्त्वाख्यायाम् इदम् उदाहरणम् इति" काशिका। तत्त्वस्य स्वरूपस्य याथार्थ्यस्य इति यावत् आख्यायाम् प्रकाशने इदं भवति। क्षेपे विवक्षिते सति पूर्व्वेणैव सिध्यति। अकर्त्तरि इति किम्? देवदत्तेन हीयते देवदत्तेन इति अनुक्ते कर्त्तरि तृतीया अतएव नात्र तसिर्भवति।

२१०२। षष्ठ्या व्याश्रये ॥ ५।४।४८ ॥

टी—। षष्ठ्यन्ताद्वा तसिः स्यान्नानापक्षसमाश्रये। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। अर्जुनस्य पक्षे इत्यर्थः। व्याश्रये किम्? वृक्षस्य शाखा।

The suffix तसि optionally replaces the sixth case-ending when siding with various parties is thereby implied.

मित—। नानापक्षसमाश्रयो व्याश्रयः। तस्मिन् गम्यमाने सति षष्ठ्यन्तात् विकल्पेन तसिप्रत्ययो भवति। षष्ठ्यन्तादित्यत्र या षष्ठी प्रोक्ता सा तु पक्षस्य अपेक्षया एव। देवा अर्जुनस्य पक्षे अभवन्—आदित्याः कर्णस्य पक्षे अभवन् इति वाक्ये देवा अर्जुनतोऽभवन्—आदित्याः कर्णतोऽभवन् इत्यपि भवति। व्याश्रये इति किम्? वानराः वृक्षस्य शाखायाम् अभवन्।

२१०३। रोगाच्चापनयने ॥ ५।४।४९ ॥

टी—। रोगवाचिनः षष्ठ्यन्ताद्वा तसिश्चिकित्सायाम्॥ प्रवाहिकातः कुरु। प्रतीकारमस्याः कुर्वित्यर्थः। अपनयने किम्? प्रवाहिकायाः प्रकोपनं करोति।

The suffix तसि optionally replaces the sixth case-ending coming after word expressive of some disease when the treatment of the same is implied.

मित—। रोगः व्याधिः। अपनयनं प्रतीकारः—चिकित्सा इत्यर्थः। रोगाभिधायिनः शब्दात् या षष्ठी विभक्तिस्तदन्ताद्वा तसिप्रत्ययो भवति चिकित्सायां गम्यमानायाम्। प्रवाहिका—आमजनितरोगविशेषः। प्रवाहिकातः कुरु। छर्दिकातः कुरु। अपनयने इति किम्? प्रवाहिकायाः प्रकोपनं करोति। नात्र अपनयनं गम्यते।

२१०४। कृभ्वस्तियोगे संपद्यकर्तरि च्विः ॥ ५।४।५० ॥

अभूततद्भाव इति वक्तव्यम्॥

टी—। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्त्तमानाद्विकार-शब्दात् स्वार्थे च्विर्वा स्यात् करोत्यादिभिर्योगे।

The suffix च्वि is attached to a word itself a subject or objects of production ( and by production the creation of a new phase being implied) in connection with one of the following verb कृ भू or अस।

Or thus—च्वि may be attached to a transformation (प्रकृति-विकारभाव ) in the subjective ( कर्त्ता) with भू and अस् but in the accusative with कृ the transformed in both being in the same case with the transformation.

मित—। भूत: जात:। तस्मात् अन्य: अभूत: अजात:। भाव: उत्पत्ति:। तस्य अजातस्य भाव: इति तद्भाव:। योऽभूत: अजात:, तद्भावे तस्य उत्पत्तौ गम्यमानायाम् इत्यर्थ:।

संपद्यकर्त्तरि इति—संपद्यते इति धातु:। तस्य कर्त्ता संपद्यकर्त्ता। तस्मिन्। सूत्रार्थ:—"अभूततद्भावे" यत् वस्तु अविद्यमानं नाम तस्य उत्पत्तौ द्योत्यायाम् "सम्पद्यकर्त्तरि" सम्पद्यते इति क्रियाया: कर्त्तरि वर्त्तमानात् प्रातिपदिकात् कृ भू अस्ति इति धातुभिर्योगे च्वि प्रत्ययो भवति।

२१०५। अस्य च्वौ ॥ ७।४।३२ ॥

टी—। अवर्णस्य ईत्स्यात् च्वौ। वेर्लोप:। च्व्यन्तत्वादव्ययम्। अकृष्ण: कृष्ण: सम्पद्यते तं करोति कृष्णीकरोति। ब्रह्मीभवति। गङ्गीस्यात्।

The final अकार of the word preceding the च्वि is replaced by ईत्। व of च्वि elides, and च्व्यन्त word is an अव्यय as well.

मित—। "ई घ्राध्मो:" ( ७।४।३१ ) इत्यस्मात् ई अनुवर्त्तते। अवर्णान्तस्य

प्रातिपदिकस्य अकारस्थाने ईकारो भवति च्विप्रत्यये परे सति। अकृष्ण: (यः प्राक् कृष्णात् अन्यवर्णसनाथः आसीत् सः) कृष्णः (कृष्णवर्णः) सम्पद्यते (जायते); तं (कृष्णं) करोति (तथा करोति) इति कृष्णशब्दात् च्विः; च्विप्रत्यये चकार इत्; "वेरपृक्तस्य" (६।१।६१) इति सूत्रेण वकारो लुप्यते। कृष्ण इ इतिस्थितिः। ततोऽनेन ईकारः—कृष्णी इति स्थितिः। ततः कृः प्रयुज्यते कृष्णीकरोति। अब्रह्म ब्रह्म भवति इति ब्रह्मीभवति। "नस्तद्धिते" (६।४।१४४) इति नकारलोपः। अगङ्गा गङ्गा स्यात् इति गङ्गी स्यात्। "यस्येति च" (६।४।१४८) इति अकारलोपः।

टी—। अव्ययस्य च्वावीत्त्वं नेति वाच्यम्॥ दोषाभूतमहः। दिवाभूता रात्रिः। एतच्च अव्ययीभावश्च इति सूत्रे भाष्ये उक्तम्।

मित—। च्विप्रत्यये परे अवर्णान्तानाम् अव्ययशब्दानाम् अकारस्थाने ईकारो न स्यात्। दोषा रात्रिः। दिवा दिवसः। अव्ययद्वयम्। अदोषा दोषाभूतम् दोषाभूतम् अहः। अदिवा दिव-भूतम् इति दिवाभूतम्। दिवाभूता रात्रिः।

२१०६। क्यच्व्योश्च॥ ६।४।१५२॥

टी—। हलः परस्यापत्ययकारस्य लोपः स्यात्क्ये च्वौ च परतः। गार्गीभवति।

A यकार oweing its existence to some अपत्यप्रत्यय, elides before the suffixes क्य and च्वि, when (provided) the said यकार stands after some consonant.

मित—। हल उत्तरस्य अपत्यप्रत्ययाङ्गस्य यकारस्य लोपो भवति क्यप्रत्यये तथा च्वि प्रत्यये च परे। अगार्ग्यः गार्ग्यो भवति इति गार्गीभवति। अवात्स्यः वात्स्यो भूतः इति वात्सीभूतः। क्ये परे यथा वात्स्यम् इव आचरति वात्सीयति। गार्ग्यं इव आचरति गार्गीयति। अपत्ययकारस्य एवलोपः स्यात् नान्यस्य अतएव

असांकाश्यः सांकाश्यो भवति इति सांकाश्यीभवति। अत्र यकारस्य न लोपः— यतो नायं अपत्ययकारः। हलः परस्य इति किम्? अकारिकेयः कारिकेयो भवति भवति इति कारीकेयीभवति। अत्र यकारस्य हलः परत्वाभावात् न लोपः।

२१०७। च्वौ च ॥ ७।४।२६ ॥

टी—। च्वौ परे पूर्वस्य दीर्घः स्यात्। शुचीभवति। पटूस्यात। अव्ययस्य दीर्घत्वं नेति केचित्तन्निर्मूलम्। स्वस्ति स्यादिति तु महाविभाषया च्वेरभावात् सिद्धम्। स्वस्तीस्यादितत्रापि पक्षे स्यादिति चेदस्तु। यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यते इत्यस्तु। रीङृतः। मात्रीकरोति।

Before the च्वि suffix, the final vowel of the word (preceding the च्वि) is lengthened. This is for other vowels than अवर्ण for which ई comes by "अस्य च्वौ"। अव्यय (अनकारान्त) words also get the lengthening.

मित—। च्विप्रत्यये परे अजन्तस्य अङ्गस्य दीर्घोभवति। अशुचिः शुचि भवति इति शुचीभवति। एवं शुचीकरोति। शुचीस्यात्। अपटुः पटुः स्यात् इति पटूस्यात्। केचित् च्विप्रत्यये परतः अव्ययशब्दस्य अन्तिमस्वरवर्णस्य दीर्घत्वं नेच्छन्ति। परं तत्तु नानुमोदितं श्रीमताटीकितेन।

ननु अस्वस्ति स्वस्ति स्यात् इति स्वस्ति स्यात् इति रूपम्। तत् कथं सिध्यति? अत्र महाविभाषावशात् च्वेः वैकल्पिकत्वं टीकितो मन्यते अतएव पक्षे च्वेरभावात् इदं सिध्यति। स्वस्तीस्यात् इति रूपमपि विकल्पेन भवति। यदि स्वस्तीस्यादिति रूपं केषांचिदनभिमतं स्यात् तर्हि स्वस्ति स्यादिति एकं रूपं भवतु। तथा सति अत्र कथं दीर्घत्वाभावः? समाधत्ते—"अनभिधानात् च्विरेव नोत्पद्यते"। अत्र उदाहरणे च्विप्रत्ययोन भवति—कथमिति चेत्—अनभिधानादेव। तथाहि प्रोक्तं श्रीमद्भिः वोपदेवपादैः—"कृत्तद्धितसमासानामभिधानं नियामकम्"। उदाहरणान्तरं

अमातरं मातरं करोति इति मातृशब्दात् च्विप्रत्ययः। "रीङ् ऋतः" (७।४।२७) इति च्विप्रत्यये परतः ऋकारान्तस्य अङ्गस्य रीङ् इति आदेशः; अतएव मात्रीकरोति इति रूपम्।

२१०८। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥ ५।४।५१ ॥

टी—। एषां लोपः स्यात् च्विश्च। अरूकरोति। उन्मनीस्यात्। उच्चक्षूकरोति। विचेतीकरोति। विरहीकरोति। विरजीकरोति।

Before the suffix च्वि, the last letter of the words अरुस्, मनस्, चक्षुस्, चेतस्, रहस् and रजस् elide.

मित—। च्विप्रत्यये परे अरुस् मनस् चक्षुस् चेतस् रहस् रजस् इति एतेषां अन्त्यस्य सकारस्य लोपः स्यात्। अन्यत् सुगमम्।

२१०९। विभाषा साति कार्त्स्न्ये ॥ ५।४।५२ ॥

टी—। च्वि-विषये सातिर्वा स्यात् साकल्ये।

The suffix साति takes the place of च्वि when totality is implied.

मित—। अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि इति सर्व्वम् अनुवर्त्तते। अस्मिन् च्विविषये साति इति प्रत्ययो विकल्पेन भवति, कार्त्स्न्ये गम्यमाने सति। कार्त्स्न्यम् साकल्यम्।

२११०। सात् पदाद्योः ॥ ८।३।१११ ॥

टी—। सस्य षत्वं न स्यात्। दधि सिञ्चति। कृत्स्नं शस्त्रम् अग्निः सम्पद्यतेऽग्निसाद्भवति। अग्नीभवति। महाविभाषया वाक्यमपि। कार्त्स्न्ये किम्? एकदेशेन शुक्लीभवति पटः।

The dental स of the suffix साति as well as the initial dental स of a word does not change into मूर्द्धन्य ष। Rest easy.

मित—। "सात्" इति सातिप्रत्ययस्य यो नाम सकारस्तस्य तथा "पदाद्योः" पदस्य आदिस्थितो यः सकारस्तस्य च षत्वं न भवति। पदादेः—दधि सिञ्चति। अत सिञ्चति इत्यस्य यः सकारः सं तु पदस्य आदौ तिष्ठति अतएव नात षत्वम्।

ननु षत्वस्य प्राप्तिः कस्माद् भवति येन निषेधः विधीयते इति चेत्—उच्यते। "धात्वादेः षः सः" (६।१।६४) इति सूत्रेण धातोरादेः षकारस्य स्थाने सकारादेशो भवति। अतएव षकारस्य आदेशत्वात् "आदेशप्रत्यययोः" (८।३।५९) इति षकारस्य प्राप्तिरासीत्। स तु अनेन प्रतिषिध्यते। सातिप्रत्ययस्य—कृत्स्नम् शस्त्रम् अग्निः सम्पद्यते इति वाक्ये "विभाषा सातिकात्स्र्न्ये" (५।४।५२) इति सातिप्रत्ययः—तेन अग्निसात् भवति इति रूपम्। अत न षत्वम्। सातिप्रत्ययस्य विकल्पकात् पक्षे च्विप्रत्ययः—अग्नीभवति।

ननु सातिप्रत्ययस्य सकारस्य कथं षत्वसम्भावना येन सा निषिध्यते इति चेत्—उच्यते। प्रत्ययसकारत्वात् एव अत षत्वस्य प्राप्तिरासीत्। "महाविभाषया वाक्यमपि भवति।" प्रत्ययस्य उत्पत्तिः वैकल्पिकी इत्यर्थः। एवं लवणम् उदकसात् भवति (साति), लवणम् उदकीभवति (च्विः) = कृत्स्नं लवणम् उदकात्मना परिणमति (वाक्यम्)। कात्स्र्न्ये इति किम्? पटः एकदेशेन शुक्लो भवति—अत च्विरेव नखलु सातिप्रत्ययोऽपि।

## २११९। अभिविधौ संपदा च॥ ५।४।५२॥

दी—। संपदा कृभ्वस्तिभिश्चयोगे सातिर्वाह्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। संपदा तु वाक्यमेव। अग्निसात् संपद्यते अग्निसात् भवतिशस्त्रम्। अग्नीभवति। जलसात् संपद्यते जलीभवति लवणम्। एकस्या व्यक्तेः सर्व्वावयवावच्छेदेन अन्यथाभावः कात्स्र्न्यम्। बहूनां व्यक्तीनां किञ्चिदवयवावच्छेदेन अन्यथात्वं त्वभिविधिः।

The suffix साति may be used instead of the suffix च्वि, in connection with the verb संपद (also)—when partial scope ( with reference to attaching, covering and the like ) is implied ; it may be used in connection with कृ भू अस् also. See Tika for the rest and for expl. of कार्त्स्न्य and अभिविधि।

मित—। अभिविधिर्व्याप्तिः। संपदा इति सम्पूर्वकः पद्धातोः ग्रहणम्। च—इति कृ भू अस् इति एतानि समुच्चिनोति। "अभिविधौ" व्याप्त्याम् गम्यमानायाम् "संपदा" सम्पूर्वकपद् इति धातोर्योगे "च" अपि सातिप्रत्ययो भवति च्वि-विषये। पक्षे कृ भू अस् इति एतैर्योगेऽपि सातिप्रत्ययो भवति अभिविधौ। सातिप्रत्ययस्य वैकल्पिकत्वात् सातिप्रत्ययस्य अप्राप्तिपक्षे च्विप्रत्ययः स्यात्; स च कृ भू अस् इति एतैरेव योगे न तु संपदा। संपदा तु वाक्यमेव स्यात्। संपदायोगे सातिः—अग्निसात् सम्पद्यते शस्त्रम्। भूयोगे सातिः—अग्निसात् भवति शस्त्रम्। च्विः—अग्नीभवति शस्त्रम्। पक्षे संपदा योगे च्वेरभावात् वाक्यमेव—शस्त्रम् एकदेशेन अग्निः सम्पद्यते। लवणं जलसात् सम्पद्यते। लवणं जलसात् भवति। लवणम् जलीभवति। लवणम् एकदेशेन जलं सम्पद्यते।

ननु अभिविधिना सह कार्त्स्न्यस्य को विभेद इति चेत्—समाधत्ते। "एकस्याः व्यक्तेः" एकस्य द्रव्यस्य "सर्वावयवावच्छेदेन" सर्वं शरीरम् अधिकृत्य "अन्यथाभावः" रूपान्तरप्राप्तिः "कार्त्स्न्यम्" इत्युच्यते। प्रकृतेः सर्वात्मना विकाररूपप्राप्तिः कार्त्स्न्यम् इत्यर्थः। "बहूनाम् व्यक्तीनाम्" अनेकानां मूर्त्तीनाम् "किञ्चिदवयवावच्छेदेन" अवयवानाम् अंशमेव अधिकृत्य "अन्यथात्व" रूपान्तरप्राप्तिरभिविधिः। "यत्र एकदेशेनापि सर्वा प्रकृति र्विकारः सम्पद्यते सोऽभिविधिः। यथा अस्याम् सेनायाम् उत्पातेन सर्वं शस्त्रम् अग्निसात् संपद्यते। वर्षासु सर्वं लवणम् उदकसात् संपद्यते इति"—काशिका।

## २११२। तदधीनवचने ॥ ५।४।५४॥

**दी—। सातिः स्यात् कृभ्वस्तिभिः संपदा च योगे। राजसात् करोति। राजसात् सम्पद्यते। राजाधीनम् इत्यर्थः।**

The suffix साति is attached to words expressive of masters, in connection with the roots कृ भू अस and संपद्—to imply the making over of something to the said masters.

मित—। "तदधीनवचने" किञ्चित् तस्मिन् अधीनं करोति इति गम्ये सति। तत् इति यस्मिन् अधीनं क्रियते किञ्चित् स लक्ष्यते। अतएव सूत्रार्थस्तु—स्वामिनि किञ्चित् अधीनं करोति इति योगे सति स्वामिवाचकात् प्रातिपदिकात् सातिप्रत्ययो भवति कृ भू अस् संपदां इति एतेषां योगेसति। राज्ञि अधीनं करोति इति राजसात् करोति। राज्ञि अधीनं सम्पद्यते इति राजसात् सम्पद्यते। राजाधीनं करोति—राजाधीनं सम्पद्यते इत्यर्थः।

## २११३। देये त्रा च ॥ ५।४।५५ ॥

**दी—। तदधीने देये त्रा स्यात् सातिश्च कृभ्वादियोगे। विप्राधीनं देयं करोति। विप्रत्रा सम्पद्यते। पक्षे विप्रसात् करोति। देये किम्? राजसात् भवति राष्ट्रम्।**

The suffix त्रा may be used (also साति) in the aforesaid sense i. e. in the sense of "under control of" provided the making over of some dues is implied. i. e. if the thing controlled is a gift and there is syntactial connection with कृ, भू, अस्, सम् पद।

मित—। तदधीनवचनम् इत्यनुवर्त्तते। तत् इत्यस्य विशेषणं देयम्। देयं दातव्यम्। यत् अधीनंक्रियते तच्चेत् देयं स्यात् तर्हि स्वामिवाचकात् प्रातिपदिकात् त्रा प्रत्ययो भवति कृ भू अस् संपद् इति एतेषां योगे; सूत्रस्यचकारबलात् पक्षे सातिप्रत्ययोऽपि स्यात्। "ब्राह्मणेभ्यो देयमिति यद्विज्ञानं तद्यदा तेषां समर्पणेन तदधीनं क्रियते तदा त्राप्रत्ययः। ब्राह्मणाधीनं करोति ब्राह्मणत्रा करोति, पक्षे ब्राह्मणसात् करोति। विप्रत्रा—विप्रसात् करोति। ब्राह्मणत्रा सम्पद्यते। विप्रत्रा

सम्पद्यते। देये इति किम्? राजसात् करोति राष्ट्रम्। अत्र देयत्वाभावात् नत्रा —अपितु च्विरेव।

## २११४। देवमनुष्यपुरुष-पुरुमर्त्येभ्यो द्वितीयासप्तम्योर्वहुलम् ॥ ५।४।५६॥

टी—। एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वन्दे रमे वा। वहुलोक्तेरन्यत्रापि—वहुत्रा जीवतो मनः।

The suffix त्रा is often attached to the words देव मनुष्य पुरुष पुरु and मर्त्य to give out the sense of either द्वितीया or सप्तमी। See Tika also.

मित—। साति इति नानुवर्त्तते वा इत्येव अनुवृत्तिं भजति। कृ भू अस् इति एतेषां प्रसङ्गो नास्त्यत्र; अत्र खलु "सामान्येन विधान"मिति काशिका। अतएव सूत्रस्य अयमर्थः—देव मनुष्य पुरुष पुरु मर्त्य इति एतेभ्यः द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यो वा त्राप्रत्ययो भवति वहुलम्। देवान् वन्दे इति देवत्रा वन्दे। देवेषु रमे इति देवत्रा रमे। एवं देवान् गच्छति इति देवत्रा गच्छति। देवेषु वसति इति देवत्रा वसति। मनुष्यत्रा गच्छति—मनुष्यत्रा वसति। पुरुषत्रा गच्छति—पुरुषत्रा वसति। पुरुत्रा गच्छति—पुरुत्रा वसति। मर्त्यत्रा गच्छति—मर्त्यत्रा वसति। वहुलवचनात् एभ्योऽन्यत्रापि दृश्यते यथा वहुत्रा जीवतो मनः इति। अत्र वहुशब्दात् त्रा प्रत्ययः। वहुषु जीवतः इत्यर्थः।

## २११५। अव्यक्तानुकरणाद्‌द्व्यजवरार्द्धादनितौ डाच् ॥ ५।४।५७॥

टी—। द्व्यच् अवरं न्यूनम्, नतु ततो न्यूनम्। अनेकाजिति यावत। तादृशमर्द्धं यस्य तस्माड्डाच् स्यात् कृभ्वस्तिभियोगे।

डाचि विवक्षिते द्वे बहुलम् ॥ नित्यमाम्रेडिते डाचीति वक्तव्यम् ॥ डाच्परम् यदाम्रे ड़ितं तस्मिन् परे पूर्वपरयोः वर्णयोः पररूपं स्यात्। इति तकार-पकारयोः पकारः। पटपटा करोति। अव्यक्तानुकरणात् किम्? दृषत् करोति। द्व्यजवरार्द्धात् किम्? श्रत् करोति। अवरेति किम्? खरटखरटा करोति। त्वपट-त्वपटा करोति। अनेकाच्:—इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम्। अनितौ किम्? पटिति करोति।

With reference to ( in connection with ) the roots कृ, भू or अस्, the suffix डाच् is affixed to words that imply ( imitation of ) indistinct sounds—provided the second member of the said words being reduplicated, contains at least two ( or more than two ) vowels save when इति is not present there. For rest see Tika.

मित—। "अव्यक्तानुकरणात्" अव्यक्तस्य ध्वनेः अनुकरणं द्योतयति यः शब्दस्तस्मात्। "द्व्यजवरार्धात्" द्वौ अचौ एव अवरौ न्यूनौ यस्मिन् अर्द्धे विद्यते तस्मात्। सूत्रार्थस्तु—कृ भू अस् इति एतै र्योगे अव्यक्तानुकरणद्योतकेभ्यः प्रातिपदिकेभ्यः कृत—द्वित्वेभ्यः स्वार्थभागे द्वौ ततोऽधिकान् वा अचः धारयद्भ्यः डाच् इति प्रत्ययो भवति परं "इति" इत्यस्य योगे तु एतत् न स्यात्। डाचि विवक्षिते सति बहुलं द्वित्वं स्यात् प्रकृतेः। अपिच डाच् प्रत्यये परे यत् "आम्रेड़ितं" कृतद्विर्भावस्य द्वितीयपदं तस्मिन् द्विर्वचनपदे परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। पटत् इति कश्चित् अव्यक्तानुकरणवाची शब्दः। तत् करोति इति अभिधेये अस्मात् डाच्—तेन पटत् डाच् इति स्थितिः। पटत् इत्यस्य द्विर्वचनं—तथासति पटत् पटत् डाच् इति तिष्ठति। पटत् पटत् इति अर्द्धभागे द्वौ अचौ दृश्येते अतएव डाचो विधानं न

कापि बाधा। अतः पटत् पटत् इत्यत्र "पटत्" इति द्विर्वचने परे सति पूर्ववर्णो यो तकारस्तथा तस्मात् परस्थितो यो वर्णः पकारः इति उभयोः पररूपम् स्यात्; तथासति पटपटत् डाच् इति स्थितिः। ततः टेर्लोपे जाते पटपटा करोति इति रूपं भवति। एवं दमदमास्यात्। अव्यक्तानुकरणद्योतकेभ्यः इति किम्? दृषत् करोति। नहि दृषत् इति शब्दः अव्यक्तानुकरणवाची, अपितु उपलवाच्येव। एवम् ईषत् करोति इत्यादि। द्व्यजवराद्धात् इति किम्? श्रत् करोति। श्रत् इति अत्र एकः एव अच् तिष्ठति—अतएव अत्र द्व्यजवराद्धत्वं नास्ति। द्व्यजवराद्धात् इत्यनेन अनेकाचः इत्येव अर्थः ज्ञेयः। तेन खरट—खरटा करोति वपट-पवटा करोति इत्यादिस्थलेऽपि स्यात्। अनितौ इति किम्? इति इत्यस्य योगे एतत् न स्यात्, पटिति करोति। अनेकाच इति = सूत्रे 'अनेकाच' इति पाठोयुक्तः। 'एवंहि' तथा सति 'द्विरुक्ते' द्वित्वविषये डाचि—इत्यत्र 'परसप्तमी एव सुवचा' अतीव शोभनीया 'इति अवधेयम्' ज्ञेयम्। फलतः "डाचि (परतः) द्वित्वम्" इत्यादि वार्त्तिकं कर्त्तुम् शक्यम्।

**२११६। कृञो द्वितीयतृतीयशम्ववीजात् कृषौ॥ ५।४।५८॥**

**दी—। द्वितीयादिभ्यो डाच् स्यात् कृञ एव योगे कर्षणेऽर्थे। बहुलोक्तेर व्यक्तानुकरणात् अन्यस्य डाचि न द्वित्वम्। द्वितीयं तृतीयं कर्षणं करोति इति द्वितीयाकरोति। तृतीयाकरोति। शम्बशब्दः प्रतिलोमे। अनुलोमं कृष्टं क्षेत्रम् पुनः प्रतिलोमं कर्षति शम्बाकरोति। वीजेन सह कर्षति वीजाकरोति।**

With reference to the root कृञ् (कृ), the suffix डाच् is added to the words द्वितीय तृतीय शम्ब and वीज in the sense of कर्षण। No द्वित्व here for these are not अनुकरणशब्द।

मित—। कर्षणम् इत्येव अर्थे गम्यमाने सति द्वितीय तृतीय शम्ब वीज इति एतेभ्यः डाच् प्रत्ययो भवति कृञ् इति धातोर्योगे। डाचि विवक्षिते द्वे बहुलम्

इत्यत्र बहुलम् इत्यस्य ग्रहणात् अव्यक्तानुकरणात् अन्यत्र एव विषये डाचीति परे द्वित्वं न स्यात्। अतोऽत्र द्वित्वम्। द्वितीयं कर्षणं करोति इति द्वितीयाकरोति। तृतीयं कर्षणं करोति इति तृतीयाकरोति। शम्बशब्दः प्रतिलोमे वर्त्तते। अनुलोमं कृष्टं क्षेत्रम् पुनः प्रतिलोमं कर्षति इति शम्बाकरोति। बीजेन सह कर्षति इति बीजाकरोति। "शम्बाकृत्य बीजाकृतवान्" इति भाषावृत्तिः।

२१७। संख्यायाश्च गुणान्तायाः॥ ५।४।५८॥

दी—। कृञोयोगे कृषौ डाच् स्यात्। द्विगुणाकरोति क्षेत्रम्। क्षेत्रकर्म्मकं द्विगुणं कर्षणं करोतीत्यर्थः।

With reference to कृञ्, the suffix डाच् is attached to compound words the first member of which is any cardinal numeral and the second member is the word गुण, in the sense of ploughing.

मित—। कृञ् इत्यस्य योगे कर्षणे गम्यमाने गुणान्त संख्यायाः डाच् स्यात्। क्षेत्रम् द्विगुणाकरोति। त्रिगुणाकरोति। क्षेत्रम् द्विगुणं त्रिगुणं वा कर्षति।

२११८। समयाच्च यापनायाम्॥ ५।४।६०॥

दी—। "कृषौ" इति निवृत्तम्। कृञोयोगे डाच् स्यात्। समयाकरोति। कालं यापयति इत्यर्थः।

The suffix डाच् is added to the word समय in the sense of whiling or passing away.

मित—। कृषौ इत्यस्य नानुवृत्तिरत्र। यापना क्षेपणम्। क्षेपणम् इति एतस्मिन् अर्थे समयशब्दात् डाच् स्यात् कृञ् इत्यस्य योगे। समयं यापयति इति डाच् समयाकरोति। "समयाकुरुत मा वाग्भिः"।

२११९। सपत्रनिष्पत्रादतिव्यथने॥ ५।४।६१॥

दी—। सपत्राकरोति मृगम्। सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः। निष्पत्राकरोति। सपुङ्खस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्रम् करोतीत्यर्थः। अतिव्यथने किम्? सपत्रम् निष्पत्रं वा करोति भूतलम्।

The suffix डाच् is added to सपत्र and निष्पत्र in the sense of over-afflicting. Fer rest see Tika.

मित—। सपत्र निष्पत्र इति एताभ्याम् डाच् स्यात् अतिपीड़ने गम्यमाने सति। स मृगं सपत्राकरोति। पुङ्ख-सनाथं शरं तस्य शरीरे निक्षिप्य एवं तथा पत्रयुक्तं करोति यथा स अतीव पीड्यते। निष्पत्राकरोति। पुङ्खसमेतस्य शरस्य पार्श्वे भित्त्वा निर्गमनं भवति—येन मृगं निष्पत्राकरोति इति उच्यते। "धनुष्पाणेर्खातं दिवसमपि सपत्राकृतमसुम्"। अतिव्यथने किम्? सपत्रं निष्पत्रं वा करोति भूतलम्। भूतले पत्राणि स्थापयति तस्मात् पत्राणि अपनयति वा।

२११९। निष्कुलान्निष्कोषणे ॥ ५।४।६२ ॥

दी—। निष्कुलाकरोति दाड़िमम्। निर्गतं कुलमन्तरवयवानां समूहोयस्मादिति वहुव्रीहे डाच्।

The suffix डाच् is added to the word निष्कुल in the sense of "cutting" the different cells of anything (especially of any fruit).

मित— निष्कुलशब्दात् डाच् प्रत्ययः स्यात् निष्कोषने गम्यमाने। निष्कोषणम् कस्यचित् फलस्य भङ्गेन तस्य कोषानां स्वतन्त्रीकरणम्। निर्गतम् कुलम् अन्तःस्थितानाम् अवयवानां समूहोऽस्य वा अस्मात् इति वहुव्रीहिसमासनिष्पन्नात् निष्कुलशब्दात् डाच् प्रत्ययः ततः कृञ्—तेन निष्कुलाकरोति निष्कुलाकुरुते इति वा रूपम्। निष्कुलाकरोति दाड़िमम्। निष्कुलाकुरुते जम्बीरम्।

२१२०। सुख-प्रियादानुलोम्ये ॥ ५।४।६३ ॥

टी—। सुखाकरोति। प्रियाकरोति गुरुम्। अनुकूलाचरणेन आनन्दयतीत्यर्थः।

The suffix डाच is added to the words सुख and प्रिय in the sense of satisfying or pleasing.

मित—। "आनुलोम्ये" आनुकूल्ये गम्यमाने सुखशब्दात् प्रिय-शब्दाच्च डाच प्रत्ययो भवति। सुखेन आनुकूल्यं करोतीति सुखाकरोति। प्रियाकरोति गुरुम्। गुरोरनुकूलेन आचरणेन तं गुरुम् प्रीणयति। तथाहि "प्रियाकर्त्तुम् प्रियंवदा।" भूयोगेऽपि सुखशब्दात् डाच् दृश्यते यथा—"सीतामूचे सुखाभव"।

२१२१। दुःखात् प्रातिलोम्ये ॥ ५।४।६४ ॥

टी—। दुःखाकरोति। स्वामिनं पीड़यतीत्यर्थः।

The suffix डाच् is added to the words दुःख in the sense of afflicting.

मित—। "प्रातिलोम्ये" प्रातिकूल्ये गम्यमाने दुःखशब्दात् डाच् प्रत्ययो भवति। दुःखेन प्रातिकूल्यं करोति इति दुःखाकरोति। स्वामिनं पीड़यति। दुःखाकरोति कुपुत्रः इति भाषावृत्तिः। "असौ दुःखाकरोति माम्।"

२१२२। शूलात् पाके ॥ ५।४।६५ ॥

टी—। शूलाकरोति मांसम्। शूलेन पचतीत्यर्थः।

The suffix डाच् is affixed to the word शूल in the sense of cooking ( i. e. cooking upon a spit or prang ).

मित—। पाके गम्यमाने शूलशब्दात् डाच् प्रत्ययो भवति कृञ्योगे। मांसं शूलेन पचतीति मांसं शूलाकरोति।

२१२३। सत्यादशपथे ॥ ५।४।६६ ॥

टी—। सत्याकरोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः।

The suffix डाच् is added to the word सत्य save and except when it implies शपथ ( pledging or promising ).

मित—। सत्य इत्यस्मात् कृञ् योगे डाच् प्रत्ययो भवति—परं शपथे गम्ये तु न स्यात्। सत्याकरोति भाण्डं वणिक्, मया क्रेतव्यम् इति तथ्यं ज्ञापयति इत्यर्थः। मयैतत् ग्रहीतव्यम् इति सत्यङ्कारं ददातीति भावः। अशपथे किम्? विप्रः सत्यं करोति—शपति इत्यर्थः।,

२१२४। मद्रात् परिवापणे ॥ ५।४।६७ ॥

**दी—। मद्रशब्दो मङ्गलार्थः। परिवापणं मुण्डनम्। मद्राकरोति। माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः।**

The suffix डाच् is added to the word मद्र to imply shaving due to some auspicious ceremony.

मित—। मद्रशब्दस्य मङ्गलम् इति अर्थः। परिवापणम् मुण्डनं। मद्र शब्दात् माङ्गलिकमुण्डने गम्यमाने डाच् प्रत्ययो भवति। बालं मद्राकरोति माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः। मद्राकृतो बालः इति भाषावृत्तिः।

**दी—। भद्राच्चेति वक्तव्यम्॥ भद्राकरोति। अर्थः प्राग्वत्। परिवापणे किम्? भद्रं करोति।**

The suffix डाच् is added to the word भद्र also in the self same sense.

मित—। भद्रशब्दादपि पूर्वोक्ते एव अर्थे डाच् स्यात्। भद्राकरोति नापितः। परिवापणे इति किम्? भद्रं करोति मङ्गलं करोति इत्यर्थः।

इति तद्धितप्रक्रिया समाप्ता ॥

अथ द्विरुक्तप्रक्रिया।

२१२५। सर्वस्य द्वे ॥ ८।१।१ ॥

दी—। इत्यधिकृत्य ॥

The province of reduplication begins here.

मित—। अयम् अधिकारः। सर्व्वस्य द्विरुक्तिर्वाच्या। अस्मिन् प्रकरणे यानि वक्तव्यानि तेषां द्विरुक्तिः स्यादिति ज्ञेयम्।

२१२६। नित्य-वीप्सयोः ॥ ८।१।४ ॥

**दी—। आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनम्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च। पचति पचति। भुक्त्वा भुक्त्वा। वीप्सायां—वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः।**

Words implying repetition of action ( आभीक्ष्ण्य ) and pervasion (वीप्सा) are reduplicated i. e. they are then twice written. See Tika also.

मित—। नित्यता आभीक्ष्ण्यम्। सा च तिङ् अव्ययकृत् इति एतेषु सम्भवति। वीप्सा युगपत्व्याप्तिः, नित्येऽर्थे आभीक्ष्ण्ये इति यावत् तथा वीप्सायां च यः शब्दो वर्त्तते तस्य सर्व्वस्य द्वे स्याताम्। तिङन्ते आभीक्ष्ण्यम् यथा—पचति पचति। प्रपचति प्रपचति। अव्ययसंज्ञकेषु यथा—भुक्त्वा भुक्त्वा याति। नदीम् अवस्कन्द्य अवस्कन्द्य उपस्पृशति। "स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः।" वीप्सायाम्—वृक्षं वृक्षम् सिञ्चति। गृहे गृहेऽश्वाः। "दिने दिने सा परिवर्द्धमाना"—कुमारसम्भवम्। नदीम् नदीम् अवस्कन्द्योपस्पृशति। ग्रामो ग्रामो रमणीयः।

"इह आढ्यतरमाढ्यतरमानयेति जातप्रकर्षे प्रत्ययस्यद्विरुक्तिरिष्यते" इति भाषावृत्तिः। केचित्तु द्विरुक्तेः पश्चादेव प्रत्ययमिच्छन्ति यथा पचतिपचतितराम्। "क्वचित्तु वृत्तौ उक्तार्थत्वात् द्विरुक्तिर्न वर्त्तते। द्वौ द्वौ पदौ ददाति द्विपदिकां ददाति। द्वौ द्वौ देहि—द्विशो देहि। सप्त सप्त पर्णान्यस्य सप्तपर्णः। कुलम् कुलमटति कुलटा। क्वचिदुक्तार्थस्यापि प्रयोगः—एकैकशोदेहि। अन्योन्यसहाया इति।"—इति भाषावृत्तिः।

२१२७। परेर्वर्जने ॥ ८।१।५ ॥

टी—। परि परि वङ्गेभ्यो वृष्टो देवः। वङ्गान् परिहृत्येत्यर्थः।

The indeclinable परि is reduplicated—when it implies exclusion.

मित—। वर्जने यतः "परि" इति अव्ययं—तस्य द्वे स्याताम्। असमासे एव अस्य द्वे स्याताम् इति ज्ञेयम्—यथा परि परि वङ्गेभ्यः वृष्टो देवः। वंगविषयं परिहृत्य वृष्टः इत्यर्थः। परि परि त्रिगर्त्तेभ्यो वृष्टो देवः।

टी—। परेर्वर्जने वा वचनम्। परिवङ्गेभ्यः।

The above rule is to be treated as an optional one.

मित—। वर्जने परेर्यत् द्वित्वं प्रोक्तं तत् वैकल्पिकमेव इति बोध्यम्। अतएव परिवंगेभ्यः परित्रिगर्त्तेभ्यः इति द्वित्वाभावोऽपि साधुः। समासे तु द्वित्वं नैव यथा— परिवंगम्। परित्रिगर्त्तम्। समासस्तु "अप-परिबहिरञ्चवः पञ्चम्या" ( २।१।१२ ) इति सूत्रेण विकल्पेन विधीयते। वर्जने इति किम्? वृक्षं परिषिञ्चति। त्रिगर्त्तान् परि-षिञ्चति।

२१२८। उपर्य्यध्यधसः सामीप्ये ॥ ८।१।७ ॥

टी—। उपर्य्युपरि ग्रामम्। ग्रामस्योपरिष्टात् समीपे देशे इत्यर्थः। अध्यधि सुखम्। सुखस्योपरिष्टात् समीप-काले दुःखमित्यर्थः। अधोऽधः लोकम्। लोकस्याधस्तात् समीपे देशे।

To imply nearness or proximity the three indeclinables उपरि, अधि, and अधस् take the re-duplication.

मित—। उपर्य्युपरि ग्रामम्। ग्रामस्य सामीप्यभाजि देशे। अध्यधि सुखम् दुःखम् भवति। सुखस्य पश्चात् समीपे एव काले दुःखम् भवति। अधोऽधो लोकम्। लोकस्य अधस्तात् समीपे देशे। अधोऽधः ग्रामम्। "नवानधोऽधो वृहतः पयोधरान्" इति शिशुपालवधे। सामीप्ये इति किम्? सर्व्वस्या उपरि चन्द्रमाः।

२१२९। वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ॥ ८।१।८ ॥

टी—। असूयायाम्—सुन्दर सुन्दर वृथा ते सौन्दर्य्यम्। संमतौ—देवदेव वन्द्योऽसि। कोपे—दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि। कुत्सने—धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने—चौर चौर घातयिष्यामि त्वाम्।

The first word of a sentence uttered to imply either malice, appreciation, anger, deprecation or reproach, is reduplicated, provided the said word is used in the vocative case.

मित—। आमन्त्रणम् सम्बोधनम्। आमन्त्रितस्य सम्बोधितस्य। सूत्रार्थस्तु—असूया सम्मतिः कोपः कुत्सनम् भर्त्सनम् इति एतेषाम् एकतमम् गमयतो वाक्यस्य आदौ स्थितम् यत् सम्बोधनपदं तस्य द्वे स्याताम्। असूयायाम्—सुन्दर सुन्दर वृथा ते सौन्दर्य्यम्। भीम भीम रिक्तं ते धनुरितिभाषावृत्तिः। सम्मतौ—देवदेव वन्द्योऽसि। अर्जुनार्जुन शोभनः खल्वसि। एवं कोपादौ उदाहरणम् श्रीमता दीक्षितेनैव प्रदर्शितम्।

२१३०। एकं बहुव्रीहिवत् ॥ ८।१।९ ॥

टी—। द्विरुक्त एकशब्दो बहुव्रीहिवत् स्यात्। तेन सुब्लोपपुंवद्भावौ। एकैकमक्षरम्। इहद्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात् समुदायात् सुप्। एकैकया आहुत्या। इह पूर्वभागे पुंवद्भावात् अवग्रहे विशेषः। न बहुव्रीहौ इत्यत्र पुनर्बहुव्रीहिग्रहणम् मुख्यबहुव्रीहिलाभार्थम्; तेनातिदिष्टबहुव्रीहौ सर्व्वनामतास्त्येवेति प्राञ्चः। वस्तुतस्तु भाष्यमते प्रत्याख्यातमेतत्। सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके

विगृहे निषेधकं ननु वहुव्रीहावितीहातिदेशशङ्कैव नास्ति।
एकैकस्मै देहि।

The word एक—when reduplicated, should be treated as if in a वहुव्रीहि compound. Thus in एकैकम् etc, there is elision of सुप् विभक्ति in both एक and पुंवद्भाव also in first एक applies as in a वहुव्रीहि। Again it being like वहुव्रीहि, new विभक्ति arises when its duplicated forms are compounded. In एकैकया आहुत्या there is पुंवद्भाव in first एकया owing to वहुव्रीहिवद्भाव in एकया एकया yielding एक एकया ; if it is not said as वहुव्रीहिवत् but समासवत् only then without पुंवद्भाव the form is एका एकया। Thus the अवग्रह (i. e. first of duplicated form ; द्वित्वकरणे पूर्वखण्ड: अवग्रह: इति स्मरणात्) differs in the two cases. Hence the significance of saying "वहुव्रीहिवत्" here. To establish सर्वनामता in एकैकस्मै Bhattoji says that old grammarians hold सर्वनामता in अतिदिष्टवहुव्रीहि ; for the rule "न वहुव्रीहौ" speaks of मुख्यवहुव्रीहि। But as भाष्य rejects this rule (see ante) and as Sutrakara also wishes this निषेध in अलौकिकविग्रहवाक्य so want of सर्वनामता in वहुव्रीहि or question of अतिदेश has no scope here.

मित—। एकम् इति एतत् द्विरुक्तं सत् वहुव्रीहिवत् स्यात्। तस्य किम् फलमिति चेत्—समाधत्ते। वहुव्रीहिवद्भावात् एकशब्दात् सुब्विभक्तेर्लोप: स्यात्, तथा अस्य पुंवद्भावोपि भवति। एक: एक: इति एकैक:। एकैकम् अक्षरं जपति। 'एकैकश: विनिघ्नन्ति विप्रया:। एकैकया आहुत्या जुहोति" इति भाषावृत्ति:। समासे द्वयोरपि पदस्य सुपी लोपोभवति पश्चात् समस्तात् एव समुदायात् सुप् विधीयते। इहापि तथा भवति—यथा एकैकयाहुत्या जुहोति। एकया एकया आहुत्या जुहोति इत्यर्थ:।

ननु अकृतेऽपि वहुव्रीहिवद्भावेन पुंवद्भावे, सन्धिवशेन "एकैकया" इत्येवं रूपं

स्यात्, तर्हि एवं विधपुंवद्भावस्वीकारस्य का सार्थकता इति चेत्—समाधत्ते। 'इह' इत्यादिना—द्विरुक्तस्य समस्तपदस्य पूर्वखण्डः अवग्रहः ["तस्य पूर्वोऽवग्रहः" इति हि प्रातिशाख्यम्]। तदा अवग्रहविषये विशेषोऽस्ति। यथा बहुव्रीहौ 'एक एकया' तदभावे 'एका एकया' इति।

"न बहुव्रीहौ" (१।१।२९) इति सूत्रे यद्यपि बहुव्रीहौ इति अनुवृत्तिबलात् लब्धुम् शक्यं स्यात् तथापि 'बहुव्रीहौ' इति अत्र पुनरपि गृह्यते। कथमितिचेत्—उच्यते तत्र मुख्यबहुव्रीहिलाभार्थम्। अयं भावः—यत्र मुख्य एव बहुव्रीहिः तत्र सर्व्वनामसंज्ञा वारिता—यत्र तु बहुव्रीहिः अतिदिश्यते तत्र सा न वारिता। अतएव अत्र सर्व्वनामता अस्ति, तेन एकैकस्मै इति चतुर्थीरूपम्—इति प्राचानाशयः। वस्तुतस्तु महाभाष्ये एतत् प्रत्याख्यातम्। सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके न्यासवाक्ये निषेधः नतु बहुव्रीहौ अतएव अत्र अतिदेशशङ्का नास्ति इति मूले स्पष्टम्।

## २१३१। आबाधे च ॥ ८।१।१० ॥

दी—। पीड़ायां द्योत्ये द्वे स्तो बहुव्रीहिवच्च। गतगतः। विरहात् पीड्यमानस्य इयमुक्तिः। बहुव्रीहिवद्भावात् सुब्लुक्। गतगता। इह पुंवद्भावः।

Words implying affliction are reduplicated. Rest easy.

मित—। पीड़ायां गम्यमानायां शब्दस्य द्वे स्याताम्—तथा बहुव्रीहिवद्भावः। गतगतः। विरहपीड़ितस्य उक्तिरियम्। बहुव्रीहिवद्भावात् अत्र सुपः लुक्। पुंवद्भावश्च—यथा गतगता। नष्टनष्टा।

## २१३२। कर्मधारयवदुत्तरेषु ॥ ८।१।११ ॥

दी—। इत उत्तरेषु कर्म्मधारयवत्कार्य्यम्। प्रयोजनं सुलोपपुंवद्भावान्तोदात्तत्वानि।

Duplication of Words treated in the later sutras are to undergo the operation as in Karmadharaya compound. The result will be सुब्लोप, पुंवद्भाव and अन्तोदात्तत्व।

मित—। पश्चात् कथितेषु सूत्रेषु यत् द्विर्वचनं निर्दिष्टं तत्र कर्मधारयवद्भावः स्यात्, तथा सति सुपः लोपः पुंवद्भावः अन्तोदात्तत्वं च भवेयुः।

२१३३। प्रकारे गुणवचनस्य ॥ ८।१।१२ ॥

टी—। सादृश्ये द्योत्ये गुण-वचनस्य द्वे स्तस्तच्च कर्मधारयवत्। कर्मधारयवदुत्तरेष्वित्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः। समासस्येत्योदात्तत्वं च। पटुपट्वी। पटुपटुः। पटुसदृशः। ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवल-गुणवाचिनश्चेह ग्रहणन्ते। शुक्लशुक्लं रूपम्। शुक्लशुक्लः पटः।

Words implying attributes ( or attributives ) are reduplicated when expressing resemblance ( or similarity ). Rest easy—see Tika

मित—। प्रकारः सादृश्यम्। गुणवचनस्य—यो गुणं वक्ति तस्य। केवल-गुणवाचिनस्तथा य आदौ गुणे वर्त्तित्वा पश्चात् गुणवति द्रव्ये वर्त्तते तस्यापि च। सूत्रार्थस्तु—सादृश्ये द्योत्ये केवल-गुण-वाचिनस्तथा गुणोपसर्जनद्रव्य-वाचिनश्च द्वे स्याताम्; तच्च पूर्व्वसूत्रबलात् कर्मधारयवदेव भवति। अतएव पूर्व्वभागस्य पुंवद्भावः—तथा समासस्य ( ६।१।२२३ ) इति सूत्रेण अस्य अन्तोदात्तत्वं च स्यात्। पटुप्रकारः इति पटुपटुः। पटवीप्रकारः इति पटुपट्वी। अस्य अर्थस्तु पटुसदृशः—ईषत्पटुरभिभावः। शुक्लशुक्लः पटः। एवं पण्डितप्रकारः इति पण्डितपण्डितः। पण्डितपण्डिता। पण्डितशब्दः आदौ गुणे वर्त्तित्वा पश्चात् पाण्डित्यगुणवति नरे वर्त्तते। शुक्लाशब्दोऽपि तथा॥ मेघदूते "मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्" इत्यत्र अप्रकारे द्विर्भावः—इति वामनमल्लिनाथादयः। वयन्तु कविप्रयोगात् निपातनात् असमासः इति साधुमन्यामहे।

अपिच गुणवचनस्य इति वचनशब्दस्य ग्रहणात् क्रियाशब्दस्यापि द्विर्भवति। अत

भाषावृत्तिः—"इदञ्च द्विर्वचनं गुणविशिष्टद्रव्यवृत्तेर्गुणमात्रवृत्तेश्चेष्यते। शुक्ल-शुक्लः पटः। शुक्लशुक्लं यस्य रूपम्। एवं वचनग्रहणाधिक्यात् क्रियाशब्दस्यापि भवति। यथा वसन्ते भीतभीतेन कोकिलेन वने रुतम्। "भीतभीत इव शीतमयूखः।" इति। भीतभीतादौ भीतात् भीतः इत्यपि व्याख्या सुयुक्ता।

दी—। आनुपूर्व्ये द्वे वाच्ये॥ मूले मूले स्थूलः।

Reduplication takes place when order is implied.

मित—। आनुपूर्व्ये इति। "आनुपूर्व्ये" पौर्व्वापर्य्यभावे गम्यमाने शब्दस्य द्वे स्याताम्। यथा मूले मूले स्थूलाः दन्ताः। ज्येष्ठं ज्येष्ठं प्रवेशय।

दी—। संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः॥ सर्प सर्प बुध्यस्व बुध्यस्व। सर्प सर्प सर्प बुध्यस्व बुध्यस्व बुध्यस्व।

To imply hurry, one word may be twice or more than twice repeated.

मित—। संभ्रमेण संभ्रमवशात् प्रवृत्तौ कार्य्ये प्रवृत्तौ सत्याम्, शब्दस्य अनेकधा बहुशः प्रयोगः न्यायसिद्धः न्याय्यः इत्यर्थः। उदाहरणं श्रीमता दीक्षितेनैव प्रदर्शितम्।

दी—। क्रियासमभिहारे च॥ लुनीहि लुनीहीत्येवायं लुनाति। नित्यवीप्सयोरिति सिद्धे भृशार्थे द्वित्वार्थमिदम्। पौनः पुन्येऽपि लोटा सह समुच्चित्य द्योतकतां लब्धुम् वा।

Verbs undergo reduplication to imply frequency and intensity. See Tika for the rest.

मित—। क्रिया-समभिहारः पौनःपुन्यम् भृशार्थौ वा। तस्मिन् द्योत्ये क्रियायाः द्वे स्याताम्। नित्य-वीप्सयोरिति सिद्धे पुनः कथमिदमिति चेत्—समाधत्ते—"भृशार्थे" इति। 'भृशार्थे' अत्यन्तार्थे 'द्वित्वार्थम्' द्वित्वं ज्ञापयितुम् इदम्। "पौनः पुन्येऽपि

लोटा" लोट् इत्यनेन सह "समुच्चित्य" अस्य समुच्चयं स्वीकृत्य "द्योतकतां" पौन:-पुन्यज्ञापकतां लब्धुम् ज्ञापयितुम् वा। लोटि एव प्रयुक्तम् द्विर्वचनं पौन:पुन्यं द्योतयतीति भाव:। तथाहि "क्रियासमभिहारे लोटो हिस्वौ वा चतध्वमो:" (३।४।२) इति सूत्रेण क्रियासमभिहारे लोट: विधि:; अनेन क्रियासमभिहारे द्विर्वचनस्य विधि:। अतएव उभयो: समुच्चयं कृत्वा लोटि एव क्रियासमभिहारे द्विर्वचनं स्यादिति बोध्यम्। क्रियासमभिहारे गम्ये काल-त्रयेऽपि लोट् स्यात्। लुनीहि लुनीहि इत्ययं लुनाति, लविष्यति, अलावीत् वा। पुन:पुनरतिशयेन लुनातीत्यर्थ:। याहि याहि इति याति। पुन:पुनरतिशयेन वा याति। अधीष्वाधीष्वेत्यधीते। याहि याहि इति अयासीत् यास्यति वा। विस्तरं तु 'समुच्चये सामान्यवचनस्य" (३।४।५) इत्यत्र द्रष्टव्यम्।

**दी—। कर्मव्यतीहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्। (वा)॥ बहुलग्रहणादन्यपरयोर्न समासवत्। इतर-शब्दस्य तु नित्यम्। असमासवद्भावे पूर्वपदस्थस्य सुप: सुर्व-क्तव्य:॥ अन्योऽन्यं विप्रा नमन्ति। अन्योऽन्यौ। अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। अन्योऽन्येषां पुष्करैराम्शन्त इति माघ:। एवं परस्परम्। अत्र कस्कादित्वात् विसर्गस्य स:। इतरेतरम्। इतरेतरेण इत्यादि।**

Pronouns undergo reduplication when implying कर्मव्यतीहार or क्रियाव्यतिहार ( interchange of action )—each one doing the like ; and they are treated as if compounded ; but the two pronouns अन्य and पर are not treated as such, owing to "बहुल" here ; on the other hand the pronoun इतर is always treated as compounded ; When they are not treated as compounded, the Bibhakti of the first member is always replaced by the सु ( first case-ending singular ). Rest easy.

मित—। परस्परम् एकजातीयक्रियाकरणं व्यतीहारः। कर्म्मणः व्यतीहारः विनिमय इति कर्म्मव्यतीहारः। "कर्म्म-व्यतीहारे" यत्र परस्परं सजातीयामेव क्रियां कुर्व्वन्ति तत्र "सर्व्वनाम्नः" सर्व्वनामशब्दस्य "द्वे" द्विर्वचनं भवति इति ज्ञेयम्। कृते तु द्विर्वचने बहुलं समासवत् स्यात्। समासवद्भावस्य किम् फलमिति चेत्? उच्यते। पूर्व्वपदे विभक्तिलोप एव तत्र फलम्। "बहुलम्" इति वचनात् अन्य पर इति सर्व्व-नामद्वयं समासवत् न भवति। इतरशब्दस्तु नित्यमेव समासवत् स्यात्।

ननु यदा कश्चित् समासवत् न भवति तदा किं पूर्व्वपदे विभक्तिः तिष्ठतीति जिज्ञासायाम् उत्तरं पठति—"असमासवद्भावे" यदा समासवत् न भवति तदा "पूर्व्वपदस्यस्य" पूर्वपदे वर्त्तमानस्य "सुपः" विभक्तेः स्थाने 'सुः' सदैव प्रथमा-विभक्तेरेकवचनं भवति इति "वक्तव्यः" वाच्यः। अन्योऽन्य विप्राः नमन्ति। एकः विप्रः अन्यं नमति, स तु पुनस्तमेव नमति इति कर्म्मव्यतीहारः। अतएव अन्य इति सर्वनाम्नः द्विर्वचनं भवति। कृतेद्विर्वचने अन्य इत्यस्य न समासवद्भावः—तथा पूर्वपदस्यस्य सुपः स्थाने सुविभक्तिरेव। द्विवचने—अन्योऽन्यौ। बहुवचने—अन्योऽन्यान्। तृतीया—अन्योऽन्येन कृतम्। चतुर्थी—अन्योऽन्यस्मै दत्तम् इत्यादि द्रष्टव्यम्। एवं परम् परम् इति परस्परम्। अत्र "कस्कादिषु च" (८।३।४) इतिविसर्गस्य सकारः। परस्परान्, परस्परौ, परस्परेण, परस्परस्मै, परस्परस्मात्, परस्परेषां, परस्परस्मिन् इत्यादीनि रूपाणि। एवम् इतरम् इतरम् इति इतरेतरम्। अत्र नित्यमेव समासवद्भावः। इतरेतरान्। इतरेतरेण।

**दो—। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः॥ अन्योऽन्याम्। अन्योऽन्यम्। परस्पराम्। परस्परम्। इतरेतराम्। इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः।**

The vibhakti of the second member of इतरेतर, परस्पर and अन्योऽन्य is optionally substituted by आम्—with reference to feminine and neuter gender.

मित—। इतरेतर परस्पर अन्योऽन्य इति एतेषां उत्तरस्थिता या द्वितीयादि-

विभक्तिः स्यात् स्त्रियां क्लीवे च विकल्पेन आम् इति रूपं भजते। अन्योऽन्याम्, अन्योऽन्यम्। स्त्रियौ क्षत्रियकुले वा अन्योऽन्यं स्पर्द्धेते, अन्योऽन्यां वा। स्त्रियौ क्षत्रियकुले वा परस्परं भोजयतः, परस्पराम्। "परस्परां विस्मयवन्ति लक्ष्मीमालोकयाञ्चक्रुरिवाद्वरेण" इति भट्टिः। इतरेतरां, इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। स्त्रीभ्यां स्त्रीभिर्वा इतरेतरेण इतरेतरां वा स्पर्द्धते। अन्योऽन्येन अन्योऽन्यां वा उपहस्यते स्त्रीभिः। षष्ठ्यां—अन्योऽन्यां अन्योऽन्यस्य वा वा परस्परस्या परस्परां वा। किं बहुना—स्त्रियां क्लीवे च सर्व्वासाम् एव विभक्तीनां विकल्पेन आम्भावः भवति। इतरेतर अन्योऽन्य परस्पर इति त्रयाणामेव स्त्रियां क्लीवे इति किम्? पुंसि माभूत् यथा—इतरेतरं राजानौ युध्येते। अन्योऽन्यमसूयतः।

**टी—। अत्र केचित्—आमादेशो द्वितीयाया एव। भाष्यादौ तथैव उदाहृतात् तेन स्त्री-नपुंकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः।**

Some affirm that this replacement of the vibhakti by आम् is with reference to the second case-ending only; as the example of this same is only to be met with in the celebrated commentary (महाभाष्य) of Patanjali.

मित—। केचिद्वदन्ति यत् अयम् आम्भावः द्वितीयायाम् एव स्यात्—तथैव भाष्ये दर्शनात्। परं तृतीयादिषु पुंवदेव रूपाणि भवन्ति।

**टी—। अन्ये तूदाहरणस्य दिङ्मात्रत्वात् सर्व्व-विभक्तौ आमादेशमाहुः।**

But others contend that the commentary shows only a part of examples ( i. e. the examples there are not exhaustive ); and hence this rule of आम्भावः holds good with other bibhaktis also.

मित—। अपरे पुनः कथयन्ति यत् भाष्ये उदाहरणस्य दिङ्मात्रत्वमेव प्रदर्शितम्। अतएव तृतीयादिषु स्त्रियां क्लीबे च आभावः स्यादिति ज्ञेयम्।

टी—। दलद्वये टावभावः क्लीबे चादड्विरहः स्वमोः
समासे सोरलुक्चेति सिद्धं बाहुलकात्त्रयम्॥

The existence of टाप (available in the feminine gender) is barred in both the members (of the reduplicated form); in the neuter, the अदट् sanctioned in the place of सु and अम् is also barred, and the non-elision of the bibhakti सु in case of samasa (of course with reference to those mentioned above)—all these three are to be accepted by dint of the statement of "बहुलम्" here।

मित—। "दलद्वये" यस्य द्विर्वचनं जातम् तस्य उभयांशे एव "टावभावः" स्त्रीलिङ्गे विहितस्य एव प्रत्ययस्य अभावः इति एकपक्षः। तथा "क्लीबे" क्लीबलिङ्गे "स्वमोः" सु अम् इति विभक्तिद्वये "अदड्डतरादिभ्यः पञ्चभ्यः" (७।१।२५) इति सूत्रेण विहितस्य अदटोपि "विरहः" अभावः स्यात् इति अपरपक्षः। अपिच "समासे" समासस्थलेऽपि "सोः" सुविभक्तेः "अलुक्" लोपाभावश्च इति "त्रय" वितयं पक्षत्रयं "बाहुलकात्" बहुलम् इत्यस्य ग्रहणात् "सिद्ध" स्वीकृतं स्यात्। उदाहरणानि तु पश्चात् द्रष्टव्यानि।

टी—। तथाहि। अन्योऽन्यम् परस्परम् इत्यत्र दलद्वयेऽपि टाप् प्राप्तः। नच सर्वनाम्नोवृत्तिमात्रे इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। नच द्विर्वचनमेव वृत्तिः। यां यां प्रियः प्रैक्षत कातराक्षी सासीत्यादावतिप्रसङ्गात्। अन्योऽन्याम् इतरेतरमित्यत्र अदड्डतरादिभ्य इत्यदड् प्राप्तः। अन्योऽन्यसंसक्तमहस्त्रियामम्। अन्योऽन्याश्रयः। परस्पराक्षिसादृश्यम् अपर-

स्यरेरित्यादौ सोलुक् च प्राप्तः। सर्वं बाहुलकबलेन समाधेयम्। प्रकृतवार्त्तिकभाष्योदाहरणं "स्त्रिया"मिति सूत्रे अन्योन्यसंश्रयं त्वेतदिति भाष्यं चात्र प्रमाणम्।

Eng.—Easy—see Tika.

मित—। कारिकायाः—उदाहरणानि प्रदर्श्यन्ते। दलद्वये टाबभावस्य यथा—स्त्रियः अन्योऽन्यं परस्परम् वा पश्यन्ति—इति स्थले तु, स्त्रीणाम् अन्या अन्यां पश्यति इत्येव विग्रहः। अतएव अन्या अन्याः इति द्विर्वचने सञ्जाते द्विरूपस्य उभयांशे एव स्त्रीलिङ्गः विहितः टाप् प्रत्ययः प्राप्तः। स च बहुलम् इति वचनात् अत्र न स्यात् अतएव अन्योऽन्यम् इति पुंलिङ्गवद्रूपं दृश्यते। एवं परस्परम् इत्यत्रापि।

ननु सर्व्वनाम्नो वृत्तिमात्रे पुंवद्भावः इति वचनबलादेव पुंवद्भावः प्रसक्तः तर्हि कथं बहुलवचनात् पुंवद्भावः स्वीक्रियते इतिचेत्—समाधत्ते। बहुलग्रहणात् अन्य परयोर्न समासवत्—अतएव समासवद्भावस्य अनङ्गीकारात् अत्र वृत्तिर्नास्ति—यतः परार्थाभिधानं वृत्तिः। तत्र कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः सन्ति। नहि द्विर्वचनम् वृत्तिरिति स्वीक्रियते। अतएव बहुलवचनादेव अत्र टाबभावः। उत्तरखण्डे टाबभावोपि बाहुलकाश्रयणफलम्।

ननु द्विर्वचनमपि वृत्तिरिति स्वीक्रियते चेत् का हानिरिति चेत्—मैवम्। तथा सति "यायां प्रियः प्रैचत कातराक्षीं सा सा ह्रिया नम्रमुखी बभूव" (इति शिशुपालवधे) ["सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा" (इति रघुवंशे) "नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः" (रघुवंशे)] इत्यादिषु उदाहरणेषुद्विर्वचनसत्त्वेऽपि टाप् प्रत्ययस्य अभावो नास्ति तत्र द्विर्वचनस्य वृत्तित्वानङ्गीकारादेव। अतएव अन्योऽन्यम् परस्परम् इतिद्वये बहुलवचनादेव उभयत्र टाबभावः स्वीकर्त्तव्यः। "क्लीबे चा दङ्विरहः स्वमोः"—इत्यस्य उदाहरणम्—क्षत्रियकुलानि अन्योऽन्यं इतरेतरं वा स्पर्द्धन्ते। अत्र क्षत्रियकुलानाम् इतरत्—इतरत् स्पर्द्धते अन्यत् अन्यत् स्पर्द्धते इति विग्रहः। कर्म्मव्यतीहारे द्विर्वचने कृते सति "अन्यत् अन्यत्" "इतरत् इतरत्" इति "अद्ड्डतरादिभ्यः पञ्चभ्यः" (७।१।२५) इति सूत्र-

बलात् प्रसक्तः अदड् इति आदेशः बहुलवचनादेव न भवति—अतएव अन्योऽन्यम् इतरेतरम् इति पुंलिङ्गवदेव रूपं स्यात्। "समासे सोरलुक्" इत्यस्य उदाहरणम्— "अन्योऽन्यसंसक्तमहस्त्रियामम्" इत्यत्र "अन्योऽन्य" इत्यनेन सह "संसक्त" इत्यस्य समासघटनात् "अन्योऽन्य" इति पूर्व्वदले विभक्तेर्लोपश्च प्राप्तः। स च बहुल वचनात् न स्यात्। एवं अन्योऽन्याश्रयः', इत्यत्रापि "आश्रयः" इत्यनेन सह समास- घटनात् अन्योऽन्य इत्यत्र विभक्तिलोपश्च प्रसक्तः। सोऽपि बहुलवचनात् न भवति। एवं "परस्पराचिसादृश्यम्" "अदृष्टपरस्परैः" इत्यादौ समास घटनात् "परस्पर" इत्यंशेऽपि विभक्तिलोपः प्रसक्तः—स च बहुलवचनादेव न भवति इति बोध्यम्। अतएव सुष्ठूक्तं श्रीमता दीक्षितेन "सर्वं बाहुलकबलेन समाधेयम्" इति।

ननु बहुलवचनात् एतत् समाधेयम् इति या उक्तिस्तस्यां किं प्रमाणमस्ति उत नास्ति इति चेत्—अस्त्येव। "प्रकृतस्य" प्रक्रान्तविषयस्य स्त्रीनपुंसकयोरिति वार्त्तिकस्य भाष्ये च उदाहरणं प्रदत्तम्। तथा "स्त्रियाम्" (४।१।३) इति सूत्रस्य भाष्येऽपि लिखितम् "अन्योन्यसंश्रयम् त्वेतत्" इति वचनम् अत्र प्रमाणम्। अन्यानि कानिचित् उदाहरणानि—यथा—"क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः" इति किरातार्ज्जुनीये, "व्यर्थीकृतम् पतरथेन तथावसाय व्यवसायमस्य परस्परामर्पित- हस्ततालम् तत्कालमालीभिरहस्यतालमिति" नैषधचरिते। "ज्येष्ठानुवृत्तिजटिलञ्च शिरोऽस्य साधोरन्योऽन्यपावनमभूदुभयं समेत्य" इति रघुवंशे।

## २१३४। अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥ ८।१।१३ ॥

दी—। प्रियप्रियेण ददाति। प्रियेण वा। सुखसुखेन ददाति। सुखेन वा। द्विर्वचने कर्मधारयवद्भावात् सुपि लुकि तदेव वचनम्। अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः।

The words प्रिय and सुख optionally undergo reduplication when it implies अकृच्छ्र i. e. want of difficulty or easiness.

मित—। "अकृच्छ्रे" अनायासेन अवलीलया इति अर्थे गम्यमाने सति "प्रिय-

सुखयोः” प्रिय सुख इति एतयोः “अन्यतरस्याम्” विकल्पेन द्विर्वचनम् स्यात्। प्रियप्रियेण ददाति प्रियेण वा ददाति। अतिप्रियमपि वस्तु आनन्देन—अवलीलया ददातीत्यर्थः। सुख-सुखेन ददाति—सुखेन ददाति अतिसुखकरमपि अनायासेन प्रयच्छतीत्यर्थः। “कर्म्मधारयवदुत्तरेषु” (८।१।११) इति कर्म्मधारयवद्भावात् प्रियेण प्रियेण इति विग्रहे सुब्विभक्तेर्लोपः। पश्चात् प्रकृत्यादिभ्यः उपसंख्यानम् इति वचनेन तृतीयाया एकवचनमेव—तेन प्रियप्रियेण इति रूपम्।

**२१३५। यथास्वे यथायथम्॥ ८।१।१४॥**

दी—। **यथास्वमिति वीप्सायाम् अव्ययीभावः। योऽयमात्मा यच्चात्मीयम् तद् यथास्वम्। तस्मिन् यथाशब्दस्य द्वे क्लीवत्वं च निपात्यते। यथायथं ज्ञाता। यथास्वभावम् इत्यर्थः। यथात्मीयमिति वा।**

The word यथायथम् is (irregularly) formed by reduplication—to imply वीप्सा and meaning यथास्वम्—i. e. according to one's ownself or own relatives—or rather in accordance with true nature (i. e. properly or rightly).

मित—। स्वम् स्वम् प्रति इति वीप्सायाम् “अव्ययं विभक्तिसमीप—” (२।१।६) इति अव्ययीभावः। स्वः—आत्मा आत्मीयो वा। अतएव योऽयम् आत्मा—यत् च आत्मीयम् तत् यथास्वम्। [यद्वा स्वम् आत्मानम् स्वभावम् इति यावत् अनतिक्रम्य इति यथास्वम्]। “तस्मिन्” यथास्वम् इत्यर्थे यथाशब्दस्य “द्वे” द्विर्वचनम् “क्लीवत्वं च” क्लीवलिंगत्वम्—अतएव “ह्रस्वो नपुंसके प्रातिपदिकस्य” (१।२।४७) इति ह्रस्वत्वमपि “निपात्यते” निपातनेन सिध्यति। कर्मधारयवद्भावात् प्रातिपदिकत्वम्॥ यथास्वम् इति यथायथम्। यथायथम् ज्ञाता यथास्वभावम् ज्ञाता—यथात्मीयम् ज्ञाता इति वा। यथास्वभावम् ज्ञाता = “यथा” यादृशम् वस्तुनः स्वभावः तादृशम् एव तत् जानाति। यथात्मीयम् ज्ञाता—“यथा” यादृशम् “आत्मीयम्” आत्मनः ज्ञानम्—तथा (तादृशम् एव) वस्तु जानाति। आत्मबोधशक्त्यनुसारि वस्तुज्ञानं तस्य इत्यर्थः। तथाहि “यथायथं

ता: सहिता नभस्वरै:" "असक्तमाराधयती यथायथम्" इति। अत्र यथास्वीयमित्यर्थ: इति भाषावृत्ति:।

२१३६। द्वन्द्वं रहस्य-मर्य्यादावचन-व्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ ८।१।१५ ॥

टी—। द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु। तत्र रहस्यम् द्वन्द्वशब्दस्य वाच्यम्। इतरे विषयभूताः! द्वन्द्वं मन्त्रयते। रहस्यमित्यर्थ:। मर्य्यादा स्थित्यनतिक्रमः। आचतुरं ह्येमे पशवो द्वन्द्वं मिथुनीयन्ति। माता पुत्रेण मिथुनं गच्छति। पौत्रेण प्रपौत्रेणापि मर्य्यादीकृत्य। व्युत्क्रमणं पृथगवस्थानम्। द्वन्द्वं व्युत्क्रान्ता = द्विवर्गसम्बन्धेन पृथगवस्थिताः। द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। द्वन्द्वं सङ्कर्षणवासुदेवौ। अभिव्यक्तौ साहचर्य्येण इत्यर्थ:। योगविभागादन्यत्रापि द्वन्द्वमिष्यते।

इति द्विरुक्तप्रक्रिया ॥

इति श्रीमद्भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्द्धं समाप्तम् ॥

The word द्वि being reduplicated, gives birth to the word द्वन्द्व irregularly in the sense of रहस्य (secrecy, privacy, or reality), non-transgression of status, व्युत्क्रमण (separate existence), यज्ञपात्र प्रयोग (handling of sacrifical pots), and अभिव्यक्ति (manifestation—by साहचर्य)।

मित—। द्वि इत्यस्य द्विर्वचनं स्यात्; तथा सति "द्वि द्वि" इति स्थितस्य पूर्वपदम् "द्वि" इति अम्भावं भजति, तथा "द्वि" इति उत्तरपदं अत्वं लभते चनिपातनेन क्लीवलिङ्गम् प्राप्नोति—रहस्यम् मर्य्यादावचनं व्युत्क्रमणं यज्ञपात्रप्रयोग: अभिव्यक्तिरिति एतेषु अर्थेषु। एषां मध्ये रहस्यम् इत्येव द्वन्द्व इत्यस्य अभिधेयम्।

मर्य्यादादिषु विषयभूतः—मर्य्यादादिविषये एव द्वन्द्वशब्दस्य प्रयोगो भवति इत्यर्थः। द्वन्द्वं मन्त्रयते। द्वौ द्वौ भूत्वा द्वन्द्वं रहस्यम् मन्त्रयते इत्यर्थः। अत्र अकथितेऽपि रहस्ये द्वन्द्वम् इत्यस्य स्वाभाविकशक्तिबलादेव रहस्यम् इति अर्थः आयाति। मर्य्यादा-स्थितेरनतिक्रमणं—यथा आचतुरं होमे पशवो द्वन्द्वं मिथुनीयन्ति। इमे पशवः "आचतुरं" चतुरः पुरुषान् यावत् मिथुनम् इच्छन्ति; तथाहि पशुः पशुना मिथुनं गच्छति; पुत्रेण मिथुनं गच्छति। पौत्रेण प्रपौत्रेण अपि इति चतुरः पुरुषान् यावत् मिथुनीयन्ति (मिथुनायन्ते इति पाठान्तरं दृश्यते तन्न शोभनम्)। इमे पशव इति अत्र मर्य्यादाविषये द्वन्द्वशब्दस्य प्रयोगः। व्युत्क्रमणं—पृथगवस्थानं—द्वन्द्वं व्युत्क्रान्ता द्वि-वर्गसम्बन्धेन पृथगवस्थिताः। यज्ञपात्रप्रयोगे यथा—द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। अभिव्यक्तिः साहचर्येण प्रकाशः। द्वन्द्वं सङ्कर्षणवासुदेवौ। द्वन्द्वं रामलक्ष्मणौ। द्वौ साहचर्य्येण अभिव्यक्तौ इत्यर्थः। अत्र सूत्रे योगविभागः इष्टः। यथा (१) द्वन्द्वं इत्येकोऽंशः। (२) रहस्य मर्य्यादावचन व्युत्क्रमण यज्ञ-पात्रप्रयोगाभिव्यक्तिषु इति द्वितीयांशः। प्रथमांशस्य अर्थः—द्वन्द्वं इति निपात्यते। द्वितीयांशस्य अर्थः रहस्यादिषु अर्थेषु च। अतएव एभ्यः अर्थेभ्यः अन्यत्र अपि द्वन्द्वम् इत्यस्य प्रयोगो भवेत्; यथा—"सुखदुःखयोर्द्वन्द्व", "चार्थे द्वन्द्वः" (२।२।२९) इत्यादयः।

इति द्विरुक्तप्रक्रिया समाप्ता इत्यर्थः॥

इति श्रीकुमुदरञ्जनविरचितायां सिद्धान्तकौमुदीव्याख्यायां मितभाषिणीसमाख्यायां तद्धितप्रकरणं समाप्तम्॥

## CORRECTION

P. 622 line 12, for "यस्येति च इति आकारलोपः"
read "केणः इति ह्रस्वः"।

At P. 648, line 6 for "नस्तद्धिते……इति नकारलोपः"।
read "नलोपः प्रातिपदिकान्तस्य इति नकारलोपः"।

[N. B.—In case of ब्रह्मन् etc "नस्तद्धिते" should give अन्भाग-लोप and not only नकारलोपः]।

P. 648, line 7, omit "यस्येति च" इति अकारलोपः"।

*Now Available*

# PRINCIPAL S. RAY'S—

1. Sakuntalam (with Introduction, Notes &
Rs. 3/8
2. Uttaracharitam ( „ „ ) Rs. 3/8
3. Mudrarakshasam ( „ „ ) Rs. 3/8
4. Swapnavasavadattam ( „ „ ) Rs. 2/8
5. Ratnavali ( „ „ ) Rs. 2/8
6. Meghadutam ( „ „ ) Rs. 2/-
7. Laghu-kaumudi ( „ „ ) Rs. 1/8

etc.

Library IIAS, Shimla
S 491.25 B 469.I.1 S-B 469.V S
00001293

Published by K. R Calcut
and Print ss,
196, Vivekananda Road,